To ANNOUNCE, *v. a.* आख्या (c. 2. -ख्याति -ते -ख्यातुं), समाख्या; ख्या in caus. (ख्यापयति -यितुं), आख्या in caus.; विघुष् (c. 1. -घोषति -घोषितुं or c. 10. घोषयति), विद् in caus. (वेदयति -यितुं), निविद्, आविद्, समाविद्, विनिविद्, सन्निविद्; विज्ञा in caus. (-ज्ञापयति -यितुं).

ANNOUNCED, *p. p.* प्रकाशितः -ता -तं, निवेदितः -ता -तं, आवेदितः -ता -तं, अवघुष्टः -ष्टा -ष्टं, आख्यातः -ता -तं, परिकीर्तितः -ता -तं.

ANNOUNCEMENT, *s.* ख्यापनं, विज्ञापनं, विज्ञप्तिः *f.*, निवेदनं, विघोषणं.—(News) सन्देशः, समाचारः, संवादः.

ANNOUNCER, *s.* आख्यायकः, विज्ञापकः, विघोषकः, सन्देशहरः.

To ANNOY, *v. a.* पीड् (c. 10. पीडयति -यितुं), अभिपीड्, उपपीड्, प्रपीड्, प्रतिपीड्, सम्पीड्; तप् in caus. (तापयति -यितुं), सन्तप्, परितप्; क्लिश् (c. 9. क्लिश्नाति क्लेष्टुं), अर्द् in caus. (अर्दयति -यितुं), समर्द्, बाध् (c. 1. बाधते, बाधितुं).

ANNOYANCE, *s.* व्यथा, क्लेशः, विडम्बना, दुःखं, पीडा, बाधा.—(The act of annoying) पीडनं.—(A source of annoyance) कण्टकः, -कं.

ANNOYED, *p. p.* क्लिष्टः -ष्टा -ष्टं, परिक्लिष्टः -ष्टा -ष्टं, सव्यथः -था -थं, व्यथितः -ता -तं.

ANNOYER, *s.* क्लेशकः, दुःखकरः, व्यथाकरः.

ANNOYING, *a.* क्लेशी -शिनी -शि (न्), क्लेशकः -का -कं, दुःखकरः -री -रं.

ANNUAL, *a.* वार्षिकः -की -कं, आब्दिकः -की -कं, सांवत्सरः -री -रं, वर्षैकः -का -कं, समीनः -ना -नं.—(Lasting only for a year) एकवर्षजीवी -विनी -वि (न्); 'an annual plant,' ओषधिः *f.*

ANNUALLY, *adv.* प्रतिवर्षं, प्रतिवत्सरं, वत्सरे वत्सरे, वत्सरक्रमेण.

ANNUITY, *s.* वार्षिकं or सांवत्सरिकं वेतनं or वर्त्तनं, यन् निरूपितमूल्यं वत्सरे वत्सरे कस्मैचित् दीयते.

To ANNUL, *v. a.* लोपं कृ, निरर्थकं -कां -कं कृ, विनश् in caus. (-नाशयति -यितुं).

ANNULAR, *a.* मण्डलाकारः -रा -रं, वलयाकारः -रा -रं, वलयाकृतिः -तिः -ति, अङ्गुरीयाकारः -रा -रं.

ANNULET, *s.* क्षुद्रवलयः, क्षुद्राङ्गुरीयः, -यं.

ANNULMENT, *s*, लोपः, नाशः, विनाशः.

To ANNUMERATE, *v. a.* संख्यां संख्यया संयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं).

ANNUMERATION, *s.* संख्या संख्यया संयोजनं.

ANNUNCIATION, *s.* प्रत्यादेशः, घोषणं, -णा, ख्यापनं, विज्ञापनं.

ANODYNE, *a.* शूलघ्नः -घ्नी -घ्नं, वेदनाशान्तिकः -की -कं, पीडाशमकः -का -कं.

ANODYNE, *s.* शूलघ्नं, वेदनाशान्तिकं.

To ANOINT, *v. a.* लिप् (c. 6. लिम्पति -ते लेप्तुं), अनुलिप्, आलिप्, समालिप्, उपलिप्, विलिप्; अञ्ज् (c. 7. अनक्ति अङ्क्तुं) or caus. (अञ्जयति -यितुं), समालभ् (c. 1. -लभते -लब्धुं).—(To consecrate by unction) अभिषिच् (c. 6. -सिञ्चति -सेक्तुं).

ANOINTED, *p. p.* लिप्तः -प्ता -प्तं, अभिषिक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं, अनुलिप्तः -प्ता -प्तं, अभ्यक्तः -क्ता -क्तं, कृताभिषेकः -का -कं.

ANOINTER, *s.* अभिषेचकः, लेपकः, अञ्जनकरी *m.* (न्).

ANOINTING, *s.* अभिषेकः, -चनं, विलेपनं, समालम्भः, अभ्यञ्जनं, अञ्जनं.

ANOMALOUS, *a.* विधिविरुद्धः -द्धा -द्धं, विधिहीनः -ना -नं, विधिग्रः -ग्री -ग्रं, नियमविरुद्धः -द्धा -द्धं, अविधिः -धिः -धि.

ANOMALOUSLY, *adv.* अविधानतस् *ind.*, अविधिवत् *ind.*, अनियमतस् *ind.*

ANOMALY, *s.* अविधिः *m.*, अविधानं, विधिविरुद्धता, अनियमः.

ANON, *adv.* (Quickly, soon) झटिति, सपदि, झटिति.—(Now and then) कदापि, कदाचित्.

ANONYMOUS, *a.* अनामकः -का -कं, नामहीनः -ना -नं, सम्ज्ञारहितः -ता -तं.

ANONYMOUSLY, *adv.* नामव्यतिरेकेण, संज्ञाव्यतिरेकेण, संज्ञां विना.

ANOTHER, *a.* अन्यः -न्या -न्यत्, इतरः -रा -रं, परः -रा -रं, अपरः -रा -रं, परकीयः -या -यं, अन्यदीयः -या -यं. Another is often expressed by अन्तर in composition; as, 'another place,' स्थानान्तरं; 'along with another king,' राजान्तरेण सह. 'In another place,' अन्यत्र; 'in another manner,' अन्यथा; 'at another time,' अन्यदा; 'one after another,' अनुपूर्व्येशस् *ind.*, प्रत्येकं एकैकशस्; 'a defect in another,' परच्छिद्रं; 'another's wife,' परदारः; 'another man's goods,' परद्रव्यं, परस्वं; 'another's right,' परस्वत्वं; 'another day,' अन्यस्मिन् दिवसे, अन्येद्युः (स्).

To ANSWER, *v. n.* (To speak in reply) प्रतिवच् (c. 2. -वक्ति -वक्तुं), प्रतिभाष् (c. 1. -भाषते -भाषितुं), प्रतिवद् (c. 1. -वदति -ते -वदितुं), प्रतिब्रू (c. 2. -ब्रवीति -वक्तुं), व्याहृ (c. 1. -हरति -ते -हर्तुं), प्रतिभण् (c. 1. -भणति -भणितुं), प्रतिजल्प् (c. 1. -जल्पति -जल्पितुं).—(To correspond, to suit) युज् in pass. (युज्यते), अनुरूपः -पा -पं or तुल्यरूपः -पा -पं or सदृशः -शी -शं अस्.—(To succeed) सम्पद् (c. 4. -पद्यते -पत्तुं), संसिध् (c. 4. -सिध्यति -सेद्धुं).—(To be accountable for) प्रतिभूः or प्रतिनिधिः अस्, लग्नकं दा (c. 3. ददाति दातुं).

ANSWER, *s.* प्रतिवचनं, प्रतिकाव्यं, प्रतिवाक् *f.* (च्), उत्तरं, प्रत्युत्तरं, प्रत्युक्तिः *f.*, प्रतिवाणिः *f.*—(Refutation of a charge) वाक्यखण्डनं,

ANSWERABLE, *a.* प्रतिवाक्यः -क्या -क्यं.—(Responsible) परानुयोगाधीनः -ना -नं, पराज्ञानाधीनः -ना -नं, अभियोक्तव्यः -व्या -व्यं, येन प्रत्युत्तरं दातव्यं सः, यो लग्नकं दातुम् अर्हति.—(Corresponding to) योग्यः -ग्या -ग्यं, अनुरूपः -पा -पं, अनुसारी -रिणी -रि (न्).

ANSWERED, *p. p.* प्रत्युक्तः -क्ता -क्तं, प्रतिभाषितः -ता -तं, प्रतिभणितः -ता -तं.

ANT, *s.* पिपीलिका, पुत्रिका.

ANT-BEAR, *s.* पिपीलिकाखादको जन्तुविशेषः.

ANT-HILL, *s.* वल्मीकः, -कं, कृमिशैलः, कूलकः, भूअवाः *m.* (स्), वल्मीकूटं, वामलूरः, स्यमीकः, मृत्तिकाकूटं.

ANTAGONIST, *s.* विरोधी *m.* (न्), विपक्षः. वैरी *m.* (न्), शत्रुः *m.*, अभियोक्ता *m.* (क्तृ), पर्य्येषयिता *m.* (तृ), प्रतिबन्धकः.

ANTAGONISTIC, *a.* विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, विपरीतः -ता -तं.

ANTALGIC, *a.* वेदनाशमकः -का -कं, शूलघ्नः -घ्नी -घ्नं, शोकापनुदः -दा -दं.

ANTARCTIC, *adj.* दक्षिणकेन्द्रीयः -या -यं.—(The south pole) दक्षिणकेन्द्रं, कुमेरुः *m.*

ANTECEDENT, *a.* पूर्वगतः -ता -तं, अग्रगतः -ता -तं, अग्रगामी -मिनी -मि (न्).

ANTECEDENTLY, *adv.* पूर्वं, अग्रे, पूर्वतस्, अग्रतस्.

ANTEDILUVIAN, *a.* प्राग् भूतसम्प्लवाद् विद्यमानः -ना -नं, प्राग् जलाप्लावनाद् वर्त्तमानः -ना -नं.

ANTELOPE, *s.* मृगः, हरिणः, रेणेयः, कुरङ्गः. -ङ्गकः, -ङ्गमः.

ANTEMERIDIAN, *a.* पूर्वाह्णेतनः -नी -नं.

ANTEMUNDANE, *a.* प्राग् जगत्सृष्टेर् वर्त्तमानः -ना -नं.

ANTEPAST, *s.* पूर्वभुक्तिः *f.*, पूर्वभोजनं, पूर्वज्ञानं, अग्रग्रहणं.

ANTEPENULTIMATE, *s.* उपधायाः पूर्वं विद्यते यद् अक्षरं, पूर्वोपान्तः.

ANTERIOR, *a.* प्राक्तनः -नी -नं, पूर्वः -र्वी -र्वं, अग्रः -ग्रा -ग्रं.

ANTHEM, *s.* ईश्वरस्तवात्मकं गीतं, ईश्वरस्तुतिरूपकं गानं.

ANTHONY'S FIRE, *s.* उदर्दः, रोगविशेषः.

ANTHROPOPHAGI, *s.* नृजग्धाः *m. pl.*, आममांसाशिनः *m. pl.*, क्रव्याशिनः *m. pl.*, अघ्याः *m. pl.*, राक्षसाः *m. pl.*

ANTIBILIOUS, *a.* पित्तघ्नः -घ्नी -घ्नं.

ANTIC, *a.* (Buffoon-like) भण्डोपमः -मा -मं.—(Odd, unnatural) अपरूपः -पा -पं, विरूपः -पा -पं, असङ्गतः -ता -तं, अयोग्यः -ग्या -ग्यं.

ANTIC, *s.* (A buffoon) भण्डः, भाण्डकरः.—(An odd gesture) असङ्गतप्रकारेण हस्तादिविक्षेपः, विरूपो ऽङ्गविक्षेपः.

ANTI-CHAMBER, *s.* उपशाला.

To ANTICIPATE, *v. a.* (Before the time) पूर्वतस् ग्रह् (c. 9. गृह्णाति ग्रहीतुं), प्रवेश् (c. 1. -ईशते -ईशितुं).—(To foretaste) पूर्वास्वादनं कृ, अग्रतस् अनुभू (c. 1. -भवति -भवितुं), पूर्वं ज्ञा (c. 9. जानाति ज्ञातुं) or भुज् (c. 7. भुनक्ति, भुङ्क्ते, भोक्तुं), उद्दृश् (c. 1. उत्पश्यति उद्द्रष्टुं), प्रदृश्.

ANTICIPATED, *p. p.* पूर्वभुक्तः -क्ता -क्तं, पूर्वतस् अनुभूतः -ता -तं, प्रदृष्टः -ष्टा -ष्टं, प्रवेशितः -ता -तं, सन्दृष्टः -ष्टा -ष्टं, चित्रकलितः -ता -तं, पुरस्कृतः -ता -तं.

ANTICIPATION, *s.* पूर्वभुक्तिः *f.*, पूर्वभोजनं, पूर्वज्ञानं, प्रवेशणं.

ANTIDOTAL, *a.* विषनाशी -शिनी -शि (न्), विषघाती -तिनी -ति (न्), विषघ्नः -घ्नी -घ्नं, गरघ्नः -घ्नी -घ्नं.

ANTIDOTE, *s.* विषनाशनं, प्रतिविषं.—(Dealer in) विषवैद्यः, जाङ्गुलिकः.

ANTIFEBRILE, *a.* ज्वरघ्नः -घ्नी -घ्नं, ज्वरनाशकः -का -कं, ज्वरान्तकः -का -कं.

ANTIMONY, *s.* सौतोञ्जनं, सौवीरं, कापोताञ्जनं, यामुनं.—(Made of antimony) सौतोञ्जनमयः -यी -यं.

ANTIPATHY, *s.* सहजो विरोधः, द्वन्द्वभावः, विरुक्तिः *f.*, वैरिता, शत्रुता, विमतिः *f.*, अनिच्छा.

ANTIPHLEGMATIC, *a.* कफनाशनः -नी -नं, कफघ्नः -घ्नी -घ्नं, श्लेष्मघ्नः -घ्नी -घ्नं.

ANTIPHONY, *s.* प्रतिगानं, परस्परगीतिः *f.*, प्रतिध्वनिः *f.*

ANTIPODES, *s.* भूमण्डलस्य विपरीतभागे वर्त्तिनः; अन्यतरस्मिन् भूगोलभागे वर्त्तिनः परस्पराम् अभिमुखपादतला जनाः.

ANTIQUARIAN, *a.* प्राक्कालीनः -ना -नं, पूर्वकालीनः -ना -नं, प्राक्तनः -नी -नं.

ANTIQUARY, ANTIQUARIAN. *s.* प्राक्कालीनविषयेषु पण्डितः, पुरातनद्रव्यानुसन्धायी *m.* (न्).

ANTIQUE, *a.* (Ancient) पुराणः -णा or -णी -णं, पुरातनः -नी -नं, प्राक्तनः -नी -नं, पूर्वकालीनः -ना -नं, चिरन्तनः -नी -नं.—(Old-fashioned) अप्रचलः -ला -लं, अपरूपः -पा -पं.

ANTIQUE, *s.* प्राचीनद्रव्यं, प्राक्कालीनविषयः.

ANTIQUITY, *s.* (Old-times) प्राक्कालं, पूर्वकालं, गतकालं.—(The ancients) प्राचीनपुरुषाः *m. pl.*—(Ancientness) पुरातनत्वं, प्राचीनत्वं.

ANTISEPTIC, *a.* पूतिघ्नः -घ्नी -घ्नं, पूतिनिवारकः -का -कं, पूतिनाशकः -का -कं.

ANTISTES, *s.* प्रधानपुरोहितः, धर्म्माध्यक्षः.

ANTITHESIS, *s.* अर्थान्तरन्यासः, अर्थवैपरीत्यं, विकल्पः, प्रतिपक्षता, विरोधः.

ANTITYPE, *s.* प्रतिमूर्त्या प्रदर्शिता मूर्त्तिः *f.*, मूलमूर्त्तिः *f.*, वस्तु *n.*, आदर्शः.

ANTLER, *s.* मृगशृङ्गं, मृगशृङ्गशाखा, मृगविषाणं.

ANTLERED, *a.* शृङ्गी -ङ्गिनी -ङ्गि (न्), विषाणी -णिनी -णि (न्).

ANUS, गुदं, पायुः *m.*, मेढ्रः, अपानं.

ANVIL, *s.* ऊर्मी *f.*, शूर्म्मिः *m.*, स्थूणा, लोहप्रतिमा.

ANXIETY, *s.* चिन्ता, चित्तोद्वेगः, औत्सुक्यं, मनोदुःखं, मनस्तापः, चित्तवेदना, आधिः *m.*, व्यग्रता, उद्वेगः -जनं, उत्तापः, चिन्ताभारः, मानसी व्यथा.

Anxious, *a.* (Solicitous) उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), चिन्तापरः -रा -रं, व्यग्रः -ग्रा -ग्रं, उन्नग्नः -ग्ना -ग्नं, उत्सुकः -का -कं, विधुरः -रा -रं, समन्युः -न्युः -न्यु.—(Eagerly endeavouring) सयत्नः -त्ना -त्नं.—(Desirous of) ईषुः -षुः -षु, इच्छुः -च्छुः -च्छु; 'anxious to see,' दर्शनेच्छुः; 'anxious to do,' कर्तुकामः -मा -मं.—(To be anxious) उत्सुकाय् (nom. उत्सुकायते).

Anxiously, *adv.* औत्सुक्येन, उद्वेगेन, मनोदुःखेन, चिन्तया, सोद्वेगं, सयत्नं.

Any, *a.* कश्चित् *m.* काचित् *f.* किञ्चित् *n.*, को ऽपि *m.* काप्यि *f.* किमपि *n.*, कश्चन *m.* काचन *f.* किञ्चन *n.*; 'any thing,' किञ्चित्, किमपि; 'any where,' क्वचित्, क्वापि, कुत्रचित्, कुत्रापि; 'any longer,' पुनर्; 'any how,' कथञ्चन, कथञ्चित्, यथातथा; 'at any time,' कदाचित्, कर्हिचित्; 'any further,' दूरतरं; 'any one soever,' यः कश्चित्.

Aorta, *s.* हृत्पिण्डवामकोष्ठनिर्गता रक्तप्रवाहका वृहन्नाडी.

Apace, *adv.* सत्वरं, क्षीघ्रं, क्षिप्रं, सहसा, द्रुतं, सवेगं.

Apart, *adv.* Often expressed by the prep. वि; पृथक्, विरलं, पविरलं, प्रगतः -ता -तं, उत्तृम्भः -म्भा -म्भं; 'having the knees apart,' प्रगतजानुः -नुः -नु.—(Privately) एकान्ते, एकान्ततस् *ind.*, निभृतं, रहसि, विविक्तं, विजने. —(At a distance) दूरे, कियद्दूरे.—(Aside, to one's self) स्वगतं, विजने, जनान्तिकं.

Apartment, *s.* शाला, कोष्ठः, आवासः, आगारं, गृहं.—(The inner apartments) अन्तःपुरं, अन्तर्गृहं.

Apathetic, *a.* वीतरागः -गा -गं, निःसङ्गः -ङ्गा -ङ्गं, निःस्पृहः -हा -हं, निरीहः -हा -हं, निरपेक्षः -क्षा -क्षं.

Apathy, *s.* विरागः, वैराग्यं, निरीहता, जाड्यं, मान्द्यं.

Ape, *s.* वानरः, लघुच्छः कपिः *m.*, प्लवङ्गः.—(Imitator) अनुकारी *m.* (न्).

To ape, *v. a.* वानरवत् or कपिवत् अनुकृ (c. 8. -करोति -कर्तुं).

Apepsy, *s.* अजीर्णं, आमयावित्वं, तीक्ष्णाग्निः *m.*

Aperient, *a.* रेचकः -की -कं.—(An aperient medicine) रेचकः.

Aperture, *s.* छिद्रं, रन्ध्रं, द्वारं, पथः.—(Act of opening) व्यादानं.

Apetalous, *a.* दलहीनः -ना -नं, पुष्पपत्ररहितः -ता -तं, निष्पत्रः -त्रा -त्रं.

Apex, *s.* शिखा, शिखरं, अग्रं, चूडा, शिरः *n.* (स्).

Aphorism, *s.* सूत्रं, वचनं, तत्त्वं, उपदेशवाक्यं, आदेशः.

Aphrodisiac, *a.* (Exciting passion) वाजीकरः -रा -रं, कामाग्निदीपनः -ना -नं.

Apiary, *s.* करण्डः, छत्रकः, मधुमक्षिकारक्षणस्थानं, मधुकरस्थानं.

Apiece, *adv.* प्रत्येकं, एकैकशस् *ind.*, एकशस् *ind.*, एकतस् *ind.*, एकैकं, पृथक् पृथक्, विभागशस् *ind.*

Apish, *a.* कापेयः -यी -यं, कपिस्वभावः -वा -वं, वानरोपमः -मा -मं.—(Imitative) अनुकारशीलः -ला -लं.

Apishness, *s.* कापेयं, वानरता, अनुकारशीलता.

Apitpat, *adv.* पटपटा *ind.*

Apocalypse, *s.* प्रकाशितं भविष्यद्वाक्यं, प्रकाशनं, विवृतिः *f.*, स्पष्टीकरणं.

Apocrypha, *s.* धर्मग्रन्थानां मध्ये गणितः सन्दिग्धप्रमाणो ग्रन्थः.

Apocryphal, *a.* (Of uncertain authority) सन्दिग्धप्रमाणः -णा -णं, असिद्धप्रमाणः -णा -णं.

Apologetic, apological, *a.* व्यपदेशकः -का -कं, पक्षपाती -तिनी -ति (न्), प्रतिवादकः -का -कं, क्षान्तिकः -की -कं.

Apologist, *s.* (For another) पक्षपातकर्ता *m.* (र्तृ), पररक्षार्थं वादी *m.* (न्), प्रतिवादी *m.* (न्), उत्तरवादी *m.*—(For one's self) व्यपदेष्टा *m.* (ष्टृ), क्षमकारी, स्वदोषस्वीकारी *m.* (न्), प्रत्यवस्कन्दकारी *m.* (न्).

Apologise, *v. n.* (To state some plea) व्यपदिश् (c. 6. -दिशति -देष्टुं), क्षम or व्यपदेशं or प्रत्यवस्कन्दं कृ.—(To acknowledge one's fault) स्वदोषस्य स्वीकारं कृ.—(To apologise for another) पक्षपातं कृ, पररक्षार्थं प्रतिवद् (c. 1. -वदति -वदितुं).

Apologue, *s.* उपकथा, हितोपदेशकं उपाख्यानं, नीतिवाक्यं.

Apology, *s.* व्यपदेशः, अपदेशः, उपदेशः, प्रतिवादः, उत्तरं, क्षम *n.* (न्), प्रत्यवस्कन्दः, स्वदोषस्वीकारः, क्षमकरणं.—(For another) पक्षपातः, पररक्षार्थं प्रतिवादः.

Apophlegmatic, *a.* कफनाशनः -नी -नं, कफघ्नः -घ्नी -घ्नं, श्लेष्मघ्नः -घ्नी -घ्नं.

Apophthegm, *s.* सूत्रं, नीतिवाक्यं, वचनं, आदेशः.

Apoplectical, apoplectic, *a.* (Relating to apoplexy) अङ्गविकृतिविषयः -या -यं.—(Inclined to apoplexy) अङ्गविकृतिशीलः -ला -लं.

Apoplexy, *s.* अङ्गविकृतिः *f.*

Apostacy, *s.* स्वधर्मत्यागः, स्वधर्मच्युतिः *f.*, अपहारः, स्वधर्मभंशः, भ्रष्टत्वं, स्वजातीयधर्मत्यागानन्तरं परधर्माश्रयः.

Apostate, *s.* स्वधर्मत्यागी *m.* (न्), स्वजातीयव्यवहारभ्रष्टः, आत्मधर्मच्युतः, अन्यज्ञावः, स्वजातीयधर्मं त्यक्त्वा परधर्माश्रितः.

To apostatize, *v. n.* स्वधर्मात् or स्वजातीयव्यवहाराद् भंश् (c. 1. भ्रश्यति, c. 1. भंशते भंशितुं) or च्यु (c. 1. च्यवते च्योतुं), विच्यु; स्वजातीयधर्मं त्यक्त्वा परधर्मं आश्रि (c. 1. -श्रयति -श्रयितुं).

Aposteme, aposthume, *s.* श्वयथुः, विद्रधिः *m.*, शोफः, स्फोटः, पूयसम्पूर्णः स्फोटः.

Apostle, *s.* ईश्वरप्रेरितः, ईश्वरदूतः, ईश्वराज्ञावहः, प्रेरितः.

Apostleship, *s.* ईश्वरप्रेरितत्वं, ईश्वरदौत्यं, प्रेरित्वं.

Apostolical, apostolic, *a.* (Enjoined by an apostle) ईश्वरप्रेरितेनादिष्टः -ष्टा -ष्टं.—(Relating to the Apostles) ईश्वरप्रेरितसम्बन्धी -न्धिनी -न्धि (न्).

Apostrophe, *s.* सम्बोधनं, वाक्यालङ्कारविशेषः.

To apostrophise, *v. a.* सम्बोधनं कृ, सम्बोधनेन आमन्त्र् (c. 10. -मन्त्रयते -यितुं).

Apostume, *s.* पूयसम्पूर्णः स्फोटः, विद्रधिः *m.*

Apothecary, *s.* विक्रयार्थं औषधपेश्वरः, भेषजविक्रेता *m.* (तृ), औषधविक्रेता *m.* (तृ), अगदङ्कारः.

Apothegm, *s.* *See* Apophthegm.

Apotheosis, *s.* देवत्वं, ब्रह्मत्वं, ब्रह्मनिष्ठागणं, देवगणितत्वं.

To appal, *v. a.* भी in caus. (भाययति or भीषयति -यितुं), त्रस् in caus. (त्रासयति -यितुं), वित्रस्, सन्त्रस्; उद्विज् in caus. (-वेजयति -यितुं), व्याकुलीकृ.

Appalled, *p. p.* भयविप्लुतः -ता -तं, भयसंदृष्टरोमा -मा -म (न्), शङ्कितः -ता -तं, सन्त्रस्तः -स्ता -स्तं, व्याकुलीकृतः -ता -तं.

Apparatus, *s.* उपकरणं, सज्जा, यन्त्रं, सामग्र्यं, सामग्री *f.*—(Military apparatus) शस्त्रोपकरणं.

Apparel, *s.* वेशः, वस्त्रं, परिधानं, परिच्छदः, अम्बरं, आभरणं, संव्यानं.

To apparel, *v. a.* वस्त्र (nom. वस्त्रयति -यितुं), आच्छद् (c. 10. -च्छादयति -यितुं); वेष्ट् (c. 1. वेष्टते, वेष्टितुं), वस् in caus. (वासयति -यितुं), प्रवस्; प्रवृ (c. 5. -वृणोति, -वरितुं or -वरीतुं), संव्ये (c. 1. -व्ययति -व्यातुं). —(To apparel one's self) वस् (c. 2. वस्ते, वसितुं).

Apparelled, *p. p.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, वस्त्रवेष्टितः -ता -तं, संवीतः -ता -तं.

Apparent, *a.* व्यक्तः -क्ता -क्तं, अभिव्यक्तः -क्ता -क्तं, प्रव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, प्रेक्षणीयः -या -यं, प्रेक्ष्यः -क्ष्या -क्ष्यं, प्रत्यक्षः -क्षा -क्षं.- (Not real) अवास्तवः -वी -वं; 'apparent praise,' *i. e.*

'not real,' व्याजस्तुतिः *f.*, मिथ्याप्रशंसा; 'heir-apparent,' युवराजः. —(To make apparent) प्रादुष्कृ, आविष्कृ, प्रत्यक्षीकृ, स्पष्टीकृ, प्रकटीकृ.

APPARENTLY, *adv.* प्रादुस् *ind.*, साक्षात् *ind.*, आविस्, प्रत्यक्षतस्, स्पष्टं.

APPARITION, *s.* (Appearance, form) आभासः, आभा, छाया, आकारः, आकृतिः *f.*, रूपं.—(Spectre, walking spirit) रात्रिञ्चरः, प्रेतनरः, प्रेतः, वेतालः.

APPARITOR, *s.* यष्टिधरः, प्रेष्यजनः, राजदूतः.

APPEACHMENT, *s.* अभियोगः, अपवादः.

To APPEAL, *v. n.* परावर्त्तं प्रार्थ् (c. 10. -अर्थयते -यितुं); यत् कार्यं अवरप्रादिवाकेन तीरितं or निर्णीतं तस्यापि पुनर्विचारम् उत्तमप्रादिवाकसकाशात् प्रार्थ्.—(To call another as witness) साक्षिणं कृ, आह्वे (c. 1. -ह्वयति -ते -ह्वातुं).

APPEAL, *s.* परावर्त्तेव्यवहारः, पुनराह्वानं, पुनर्विचारप्रार्थना, उत्तमप्रादिवाकसाक्षाद् आह्वानं.—(The calling upon any one as witness or judge) आह्वानं.

To APPEAR, *v. n.* (To become visible) दृश् in pass. (दृश्यते), अभिदृश्, प्रतिदृश्; प्रभू (c. 1. -भवति -भवितुं), सम्भू, प्रकाश् (c. 1. -काशते -काशितुं), सम्प्रकाश्, सङ्काश्, उदि (c. 1. उदयति -यितुं), अभ्युदि, उच्चर् (c. 1. -चरति -चरितुं). —(Show one's self) आत्मानं दृश् in caus. (दर्शयति -यितुं, दर्शनं दा.—(To seem) प्रतिभा (c. 2. -भाति -भातुं), सम्प्रभा, निभा, आभा; लक्ष् in pass. (लक्ष्यते).—(To be evident) प्रकाश्, प्रादुर्भू (c. 1. -भवति -भवितुं), आविर्; प्रादुरस् (c. 2. -अस्ति); 'you appear dismayed,' विस्मित इव प्रतिभासि.

APPEARANCE, *s.* (Coming into sight) दर्शनं, सन्दर्शनं.—(Entry into a place or company) उपस्थितिः *f.*, प्रवेशनं.—(The thing seen) रूपं, आकृतिः *f.*, मूर्त्तिः *f.*, आकारः.—(Semblance, not reality) छाया, आभासः, आभा, अवस्तुता.—(Presence, mien) रूपं, अवस्था, भावः, आकारः.—(Probability) अनुमेयत्वं, अनुभवनीयत्वं.

To APPEASE, *v. a.* शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्; सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, उपसान्त्व्; तुष् in caus. (तोषयति -यितुं), परितुष्, मन्तुष्; प्रसद् in caus. (-सादयति -यितुं), अभिप्रसद्, सम्प्रसद्; सुस्थिरं -रां -रे कृ; परिमृज् (c. 6. -मृजति -र्ष्टुं), परामृश्, अनुनी (c. 1. -नयति -ते -नेतुं).—(To be appeased) शम् (c. 4. शाम्यति, शमितुं), उपशम्; प्रसद् (c. 1. -सीदति -सत्तुं).

APPEASED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशान्तः -न्ता -न्तं, आराधितः -ता -तं, अनुनीतः -ता -तं, प्रसन्नः -न्ना -न्नं, प्रसादितः -ता -तं.

APPEASING, *s.* शान्तिः *f.*, उपशान्तिः *f.*, प्रशान्तिः *f.*, आराधनं, प्रसादनं.

APPELLANT, *s.* उत्तमप्रादिवाकसकाशात् परावर्त्तप्रार्थकः, परावर्त्तप्रार्थयिता *m.* (तृ), पुनराह्वानकर्त्ता *m.* (र्त्तृ), आह्वानकर्त्ता *m.* (र्त्तृ), आवेदकः.

APPELLATE, *s.* पुनराहूतः, उत्तमप्रादिवाकसाक्षाद् आहूतः, प्रत्यर्थी *m.* (न्).

APPELLATION, *s.* नामधेयं, नाम *n.* (न्), आख्या, संज्ञा, अभिधानं, अभिधा, अभिख्या, आज्ञा.

APPELLATIVE, *a.* अभिधायिकः -का -कं, अभिधानीयकः -का -कं.—(Common) सामान्यः -न्या -न्यं, साधारणः -णा -णं.

APPELLEE, *s.* आहूतः, अभियुक्तः, प्रत्यर्थी *m.* (न्).

To APPEND, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्धुं or caus. -बन्धयति -यितुं), आबन्ध्; उपाधा (c. 3. -दधाति -धत्ते -धातुं), आधा; अवलम्ब् in caus. (-लम्बयति -यितुं).

APPENDAGE, *s.* अनुबन्धः, सम्बन्धः, उपाहितं, शेषांशः, उपाहितभागः.

APPENDANT, *adj.* अनुबन्धी -न्धिनी -न्धि (न्), सम्बन्धी -न्धिनी -न्धि (न्). अवलम्बी -म्बिनी -म्बि (न्).

APPENDIX, *s.* परिशिष्टं, उपग्रन्थः, शेषग्रन्थः.

To APPERTAIN, *v. n.* (To belong to one's self) आत्मसात् or आत्माधीनः -ना -नं, or स्वाधीनः -ना -नं, or स्वकीयः -या -यं अस्.—(To belong, in genèral) सम्बन्ध् in pass. (-बध्यते). The sense of 'appertaining' may often be expressed by the root अस् or विद् with the gen. case: as, 'money appertains to me,' मम धनं विद्यते.

APPERTAINING, *p. p.* सम्बन्धी -न्धिनी -न्धि (न्), अनुबन्धी -न्धिनी -न्धि (न्).

APPERTENANCE, *s.* अनुबन्धः, सम्बन्धः, उपकरणं, सामग्री.

APPETENCY, *s.* कामः, लोभः, अभिलाषः, वाञ्छा, इच्छा.

APPETITE, *s.* (Desire) कामः, लोभः, रागः, रुचिः *f.*, अभिरुचिः *f.*, अतिवाञ्छा, अतिशयलोभः, अभिलाषः, इच्छा.—(Hunger) बुभुक्षा, क्षुधा, आहारादिवाञ्छा, भक्तलुब्धं.—(The digestive faculty causing appetite) अग्निः *m.*, वह्निः *m.*, अग्निवृद्धिः *f.*—(One who has no appetite for food) अग्निरहितः.

APPETITIVE, *a.* कामुकः -का -कं, अभिलाषुकः -का -कं, इच्छुकः -का -कं.

To APPLAUD, *v. a.* प्रशंस् (c. 1. -शंसति -शंसितुं), अभिप्रशंस् प्रतिनन्द् (c. 1. -नन्दति -नन्दितुं), प्रणादेन प्रशंस्, प्रशंसां कृ, साधां कृ.—(By clapping the hands) करतालेन प्रशंस्.

APPLAUDER, *s.* प्रशंसकः, स्तावकः, साधाकर्त्ता *m.* (र्त्तृ).

APPLAUSE, *s.* (Loudly expressed) प्रणादः, जयशब्दः, धन्यवादः, प्रशंसाशब्दः, साधाध्वनिः, भुजनिःस्वनः, शब्दोन्नुगजनः.—(Praise) साधा, प्रशंसा, स्तुतिः *f.*

APPLAUSIVE, *a.* प्रशंसकः -का -कं, स्तुतिमयः -यी -यं, साधान्वितः -ता -तं.

APPLE, *s.* (A kind of fruit) फलप्रभेदः.—(Pupil of the eye) नयनतारा, कनीनिका, चक्षुर्गोलकः.

APPLIANCE, *s.* (The means applied) उपायः, अभ्युपायः, उपकरणं, सामग्री.—(The act of applying) योगः, अर्पणं.

APPLICABILITY, *s.* योग्यता, प्रयोज्यत्वं, सामञ्जस्यं, साङ्गत्यं.

APPLICABLE, *a.* योग्यः -ग्या -ग्यं, प्रयोक्तव्यः -व्या -व्यं, प्रयोज्यः -ज्या -ज्यं, उपयोग्यः -ग्या -ग्यं, व्यवहरणीयः -या -यं, अर्पणीयः -या -यं, अर्प्यः -र्प्या -र्प्यं, संयोजनीयः -या -यं, व्याप्यः -प्यिनी -प्यि (न्), समञ्जसः -सा -सं.

APPLICATION, *s.* (Of one thing to another) योगः, अर्पणं, न्यसनं.—(Attention to) आभङ्गिः *f.*, अनुष्ठानं, योगः, प्रवेशः, व्यसनं.—(Use) उपयोगः, प्रयोगः, प्रयोजनं.—(Application of mind, study) मनःप्रवेशः, अभिनिवेशः, प्रवेशः, अभ्यसनं, अभ्यासः, विद्याभ्यासः, अध्यवसायः, अभियुक्तता, मनोयोगः.—(Petition) याच्ञा, प्रार्थना, निवेदनपत्रं.

APPLIED, *p. p.* प्रयुक्तः -क्ता -क्तं, अर्पितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, निवेशितः -ता -तं.

APPLIER, *s.* उपेता *m.* (तृ), प्रयोजकः.

To APPLY, *v. a.* (One thing on another) संयुज् (c. 10. -योजयति -यितुं), न्यस् (c. 4. -अस्यति, -असितुं), विन्यस्; ह्व् in caus. (अर्पयति -यितुं), सङ्क्रम् in caus. (-गमयति -यितुं), प्रविश् in caus. (-वेशयति -यितुं), निविश्, संलग्नीकृ.—(To make use of) प्रयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), उपयुज्.—(To attend to) आस्था (c. 1. -तिष्ठति -ते -स्थातुं), समास्था, अनुष्ठा.—(To have recourse to, solicit) प्रयाच् (c. 1. -याचति -याचितुं), अभियाच्, आश्रि (c. 1. -श्रयति -ते -श्रयितुं), प्रार्थ् (c. 10. -अर्थयति -ते -यितुं).—(To make effort, study) अभ्यस् (c. 4. -अस्यति -असितुं), यत् (c. 1. यतते, यतितुं), प्रयत्.

To APPLY, *v. n.* (Suit, fit) युज् in pass. (युज्यते), संयुज्, उपपद्

(c. 4. -पद्यते -पत्तुं), सङ्गतः -ता -तं भू.—(Have recourse as a petitioner) कार्यसिद्धिनिमित्तं अन्यम् आश्रि (c. 1. -श्रयति -ते -श्रयितुं), अर्थ् (c. 10. अर्थयते -यितुं), प्रार्थ्.

To APPOINT, *v. a.* निधा (c. 3. -दधाति -धातुं), स्था in caus. (स्थापयति -यितुं), अवस्था, प्रस्था; युज् (c. 10. योजयति -यितुं).—(To appoint over any office) अधिकृ (c. 8. -करोति -कुरुते -कर्तुं), प्रकृ; नियुज् (c. 10. -योजयति -यितुं, c. 7. -युनक्ति -योक्तुं), with acc. of the pers. and loc. of the thing; अभिधिष् (c. 6. -सिषति -सेद्धुं), with two acc. or with acc. and loc.; समादिश् (c. 6. -दिशति -देष्टुं), व्यादिश्.—(To make an appointment) समयं कृ, समयाकृ.

APPOINTED, *p. p.* स्थापितः -ता -तं, प्रस्थापितः -ता -तं, नियोजितः -ता -तं, निपतः -ता -तं, विहितः -ता -तं, नियुक्तः -क्ता -क्तं, व्यवस्थितः -ता -तं.—(To any office) अधिकृतः -ता -तं, व्यापृतः -ता -तं, वावृत्तः -त्ता -त्तं.—(An appointed duty) नियोगः.—(An appointed time) कालावधिः *m.*—(Agreed upon) कृतसङ्केतः -ता -तं.—(As to time) कृतकालः -ला -लं, कृतावधिः -धिः -धि.

APPOINTMENT, *s.* नियोगः, -जनं, नियुक्तिः *f.*, प्रस्थापनं, निरूपणं, कल्पनं.—(Engagement) समयः, प्रतिज्ञा *f.*—(Breaking an appointment) समयभेदः, समयव्यभिचारः.—(Stipulation) समयः, नियमः, सङ्केतः.—(Order) आज्ञा.—(Decree) नियमः, विधिः *m.*—(Office) अधिकारः, पदं.—(Equipment, furniture) मज्जा, उपकरणं, सामग्री.—(Allowance) वर्त्तनं, निरूपितमूल्यं.—(Assignation) अभिसारः.

To APPORTION, *v. n.* विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, संविभज्; अंश् (c. 10. अंशयति -यितुं), वंश्; विन्यस् (c. 1. -अस्यति -असितुं), परिकॢप् (c. 10. -कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं).

APPORTIONMENT, *s.* विभागः, संविभागः, अंशनं, परिकल्पनं, विन्यासः.

APPOSITE, *a.* योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, सङ्गतः -ता -तं, हृदयङ्गमः -मा -मं, यथार्थः -र्था -र्थं, यथाहः -र्हा -र्हं.

APPOSITELY, *adv.* स्थाने, यथार्हतम् *ind.*, यथार्थं, सङ्गतप्रकारेण.

To APPRAISE, *v. a.* (Set a price on) अर्घं संख्या in caus. (-ख्यापयति -यितुं), मूल्यं निरूप् (c. 10. -रूपयति -यितुं) or व्यवसो, (c. 4. -स्यति -सातुं), मूल्यनिर्णयं कृ, मूल्यं निश्चितं कृ.

APPRAISER, *s.* अर्घसंख्यापकः, मूल्यनिरूपकः, मूल्यविज्ञापकः.

APPRAISING, *s.* अर्घसंख्यापनं, मूल्यनिरूपणं, मूल्यविज्ञापनं.

To APPRECIATE, *v. a.* मूल्यं or अर्घं or गुणागुणं or भद्राभद्रतां or सारासारं विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), or निरूप (c. 10. -रूपयति -यितुं), or निश्चितं कृ or विविच् (c. 7. -विनक्ति -वेक्तुं); 'one who knows how to appreciate,' गुणज्ञः, गुणागुणज्ञः, गुणग्राही *m.* (न्), मर्मज्ञः.

APPRECIATION, *s.* मूल्यविज्ञानं, गुणागुणज्ञानं, भद्राभद्रनिरूपणं, दोषादोषबोधः, विज्ञानं.

To APPREHEND, *v. a.* (Lay hold on) ग्रह् (c. 9. गृह्णाति -ह्लीते ग्रहीतुं), परिग्रह्, सङ्ग्रह्; परामृश् (c. 6. -मृशति -मर्ष्टुं), धृ (c. 1. धरति धर्तुं).—(Seize in order for trial) आसिध् (c. 1. -सेधति -सेद्धुं); ग्रह्, धृ, आक्रम् (c. 1. -क्रामति -क्रमति -क्रमितुं).—(By the mind) उपलभ् (c. 1. -लभते -लब्धुं), ऊह् (c. 1. ऊहते ऊहितुं); अनुमा (c. 2. -माति -मातुं), अवगम् (c. 1. -गच्छति -गन्तुं), अवबुध् (c. 4. -बुध्यते -बोद्धुं).—(To fear) शङ्क् (c. 1. शङ्कते शङ्कितुं) आशङ्क्; भी (c. 3. बिभेति भेतुं).

APPREHENDED, *p. p.* (Understood) उपलब्धः -ब्धा -ब्धं, अवगतः -ता -तं.—(Arrested) आसिद्धः -द्धा -द्धं.

APPREHENSIBLE, ग्राह्यः -ह्या -ह्यं, धीगम्यः -म्या -म्यं, उपलभ्यः -भ्या -भ्यं.

APPREHENSION, *s.* (Fear) भयं, शङ्का, आशङ्का, सन्देहः.—(Opinion) मतिः *f.*, बुद्धिः *f.*, बोधः.—(Seizure) ग्रहणं, आक्रमणं, धरणं.—(Arrest) आसेधः.—(Conception) उपलब्धिः *f.*, मेधा, अनुभवः, अनुमानं, अवगमः, अनुबोधः, उपलम्भः.

APPREHENSIVE, *a.* शङ्कितः -ता -तं, शङ्की -ङ्किनी -ङ्कि (न्), शङ्कान्वितः -ता -तं, कृतभयः -या -यं.

APPRENTICE, *s.* शिल्पविद्याशिष्यः, शिष्यः, निरूपितकालपर्य्यन्तं शिल्पविद्याशिक्षार्थं नियमपत्रेण स्थापितः or धृतः सेवकः.

To APPRENTICE, *v. a.* आविहितकालात् शिल्पविद्याशिक्षार्थे नियमपत्रेण शिष्यं or सेवकं स्था in caus. (स्थापयति -यितुं).

APPRENTICESHIP, *s.* शिल्पविद्याशिक्षावधिः *m.*, शिल्पशिक्षासमयः, सेवाकालः, दास्यकालः.

To APPRIZE, *v. a.* ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा; विद् in caus. (वेदयति -यितुं), निविद्, समाविद्; बुध् in caus. (बोधयति -यितुं), सूच् (c. 10. सूचयति -यितुं).

APPRIZED, *p. p.* विज्ञापितः -ता -तं, अनुज्ञापितः -ता -तं, विज्ञप्तः -प्ता -प्तं, सन्दिष्टः -ष्टा -ष्टं, प्रत्यादिष्टः -ष्टा -ष्टं, बोधितः -ता -तं.

To APPROACH, *v. n.* (Draw near to) अधिगम् (c. 1. -गच्छति -गन्तुं), आगम्, अभिगम्, अभ्यागम्, उपागम्, उपगम्, समुपगम्; या (c. 2. याति यातुं), अभिया, आया, उपाया, प्रत्याया, समाया, उपया, समुपया; उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), सृ (c. 1. सृच्छति सर्तुं), अभ्यृ; अभिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), उपावृत्, प्रतिवृत्, उपवृत्; समभ्यागा used only in the 3d pret.; as, 'he approached,' समभ्यागात्. इ, *i. e.* इ with आ (c. 2. ऐति, एतुं), अभ्ये, उपे, अभी (अभ्येति) उपसृप् (c. 1. -सर्पति -सर्प्तुं), समुपसृप्; आक्रम् (c. 1. -क्रामति -क्रमितुं), उपक्रम्; आव्रज् (c. 1. -व्रजति -व्रजितुं), प्रतिव्रज्, अभिपद् (c. 4. -पद्यते -पत्तुं), समापद्, समुपपद्, प्रतिपद्; अंह् (c. 1. अंहते अंहितुं).

To APPROACH, *v. a.* उपस्था in caus. (-स्थापयति -यितुं), समीपं स्था in caus.; समीपं धा (c. 3. -दधाति -धत्ते -धातुं), निकटे धा; सङ्क्रम in caus. (-गमयति -यितुं).

APPROACH, *s.* आगमः, अभिगमनं, आगमनं, उपगमः, उपस्थितिः *f.*, उपसन्नता.

APPROACHABLE, *a.* आगम्यः -म्या -म्यं, उपगम्यः -म्या -म्यं, उपसार्यः -र्या -र्यं.

APPROACHED, *p. p.* अभिगतः -ता -तं, उपगतः -ता -तं, उपस्थितः -ता -तं, अभ्यागतः -ता -तं, प्रत्युपस्थितः -ता -तं.

APPROACHING, *a.* (Near at hand) उपस्थितः -ता -तं, समुपस्थितः -ता -तं, आसन्नः -न्ना -न्नं.

APPROBATION, *s.* सम्मतिः *f.* or -तं, अनुमतिः *f.* or -तं, प्रशंसा, प्रसादः, मनःसन्तोषः, ग्रहणं.

To APPROPRIATE, *v. a.* (To consign to some particular use) प्रयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं, caus. -योजयति -यितुं), उपयुज्, विनियुज्.—(To claim to one's self by an exclusive right) स्वीकृ, स्वीयमिति or ममेति वद् (c. 1. वदति वदितुं), स्वकीयं -यां -यं or आत्मीयं -यां -यं or स्वाधीनं -नां -नं or आत्माधीनं -नां -नं or आत्मसात् कृ, स्वस्वत्वं बुध् in caus. (बोधयति -यितुं), or ज्ञा in caus. (ज्ञापयति -यितुं.)

APPROPRIATE, *a.* (Suited to the occasion) प्रस्तावसदृशः -शी -शं.—(Belonging peculiarly) आत्मनीनः -ना -नं, स्वकीयः -या -यं, सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं, विशेषकः -का -कं, जनीनः -ना -नं.—(Suitable) युक्तः -क्ता -क्तं, याग्यः -ग्या -ग्यं, सङ्गतः -ता -तं, उपयोगी -गिनी -गि (न्).

APPROPRIATED, *p. p.* (Made one's own) आत्मसात्कृतः -ता -तं.

APPROPRIATELY, *adv.* युक्तं, यथायोग्यं, यथोचितं, यथातथा, स्थाने.

APPROPRIATENESS, *s.* (Fitness of application) युक्तता, योग्यत्वं, औचित्यं, उपयुक्तता, सामञ्जस्यं, सङ्गतता.

APPROPRIATION, *s.* (The application of something to a particular purpose) उपयोगः, प्रयोगः, विनियोगः.—(Claiming any thing as peculiar) आत्मग्रहणं, स्वत्वबोधनं, आत्मसात्करणं.

APPROVAL, *s.* अनुमतिः *f.*, सम्मतिः *f.*, अनुमतं, सम्मतं, प्रशंसा.

To APPROVE, *v. a.* अनुमन् (c. 4. -मन्यते -मन्तुं), सम्मन्; प्रशंस् (c. 1. -शंसति -शंसितुं), रुच्, in caus. (रोचयति -यितुं), अनुरुच्; 'that is approved by me,' तत् मया प्रशस्यते or तत् मह्यं रोचते. प्रतिनन्द् (c. 1. -नन्दति -नन्दितुं), अनुरुच् (c. 4. -रुध्यते -रोद्धुं).—(To prove, show) प्रमाणीकृ, प्रमाण् (nom. प्रमाणयति -यितुं), भिधू in caus. (-भावयति -यितुं).

APPROVED, *p. p.* सम्मतः -ता -तं, अभिमतः -ता -तं, मतः -ता -तं, पथाभिमतः -ता -तं, प्रशस्तः -स्ता -स्तं, शिष्टः -ष्टा -ष्टं.—(Tried) परीक्षितः -ता -तं.—(Of tried probity) उपधाशुचिः -चिः -चि.

To APPROXIMATE, *v. n.* उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), समीपं or निकटं वृत् (c. 1. वर्त्तते वर्त्तितुं), or स्था, उपागम् (c. 1. -गच्छति -गन्तुं), उपगम्, समुपगम्, अभिगम्.—(To be like) तुल्य -त्या -त्यं or सदृशः -शी -शं अस्.

To APPROXIMATE, *v. a.* नेद् (nom. नेदयति -यितुं), उपस्था in caus. (-स्थापयति -यितुं), समीपं स्था in caus., उपनी (c. 1. -नयति -नेतुं), सङ्गम् in caus. (-गमयति -यितुं).

APPROXIMATE, *a.* समीपः -पा -पं, आसन्नः -न्ना -न्नं, सन्निकृष्टः -ष्टा -ष्टं, उपस्थायी -यिनी -यि (न्).

APPROXIMATED, *p. p.* उपस्थापितः -ता -तं, उपनीतः -ता -तं, उपनतः -ता -तं, उपसन्नः -न्ना -न्नं, कृतसन्निधानः -ना -नं.

APPROXIMATION, *s.* (Approach) उपगमः, समुपगमः, समीपगमनं, संहतता -त्वं, उपस्थितिः *f.*, उपस्थानं, समुपस्था.—(Nearness) नैकट्यं, सामीप्यं, सान्निध्यं, सन्निधानं.

APPULSE, *s.* आघातः, आघातनं, प्रतिहननं, प्रतिघातः.

APPURTENANCE, *s.* *See* APPERTENANCE.

APRICOT, *s.* फलविशेषः.

APRIL, *s.* चैत्रः, चैत्रिकः, मधुः, वैशाखः, माधवः, राधः.

APRON, *s.* मलनिवारणार्थं स्त्रीभिर् धृतम् आच्छादनं.

APROPOS, *adv.* स्थाने, यथायोग्यं, यथावसरं, यथावकाशं.

APSIS, *s.* (In astronomy) मन्दोच्चः.

APT, *a.* (Fit) उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, आप्तः प्ता -प्तं.—(Having a tendency to) expressed by शीलः in composition; as, 'disposed to piety,' धर्म्मशीलः -ला -लं, or by the affix आलुः; as, 'apt to sleep,' शयालुः -लुः -लु, or by the desiderative adjective; as, 'apt to do,' चिकीर्षुः -र्षुः -र्षु; 'apt to fall,' पिपतिषुः -षुः -षु.—(Skilful) कुशलः -ला -लं, दक्षः -क्षा -क्षं, पटुः -टुः -टुः -टु, अभिज्ञः -ज्ञा -ज्ञं.—(Ready, quick) त्वरितः -ता -तं, उद्युक्तः -क्ता -क्तं.

APTITUDE, *s.* (Fitness) योग्यता, पात्रता or -त्वं, उपयोगिता, आप्तिः *f.*—(Tendency) शीलत्वं, -ता, अभिप्रायः, आशयः.—(Disposition) शीलः, स्वभावः, भावः, रीतिः *f.*

APTLY, *adv.* यथायोग्यं, योगतस् *ind.*, स्थाने.—(Skilfully) दाक्ष्येण, चातुर्य्येण, सपाटवं.

APTNESS, *s.* (Fitness) योग्यता.—(Skill) कुशलता, पाटवं, विदग्धता, चातुर्य्यं.—(Ability) शक्तिः *f.*, सामर्थ्यं.

AQUATIC, *a.* (Inhabiting the water) जलेचरः -रा -रं, जलजः -जा -जं, वारिजः -जा -जं, वारिचरः -रा -रं, अम्बुचरः -रा -रं, अम्बुजः -जा -जं, आम्भसिकः -की -कं, जलौकसः -सा -सं, जलभूः -भूः -भु.—(Growing in the water) अम्भोरुहः, जलरुहः.—(Watery) औदकः -की -कं, आप्यः -प्या -प्यं; 'an aquatic animal,' जलजन्तुः *m.*

AQUEDUCT, *s.* जलमार्गः, जलपथः, जलनिर्गमः, जलप्रणाली.

AQUEOUS, *a.* अम्भयः -यी -यं, सजलः -ला -लं, जलसः -सा -सं, अनूपः -पा -पं.

AQUEOUSNESS, *s.* सजलता, औदकत्वं, अनूपता.

AQUILINE, *a.* (Resembling an eagle) उत्क्रोशरूपः -पा -पं, गृध्राकारः -रा -रं.—(Hooked) वक्रः -क्रा -क्रं, कुञ्चितः -ता -तं, वृजिनः -ना -नं; 'having an aquiline nose,' प्रलम्बघोणः.

ARABIA, *s.* यवनः, यवनदेशः.

ARABIAN, *a.* यवनसम्बन्धी -न्धिनी -न्धि (न्), यवनदेशीयः -या -यं; 'an Arabian,' यवनदेशजः.

ARABLE, *a.* कृषियोग्यः -ग्या -ग्यं, कर्षणीयः -या -यं, फालकृष्टः -ष्टा -ष्टं.

ARATION, *s.* कृषिः *f.*, कार्षिः *f.*, कर्षणं, हलहतिः *f.*

ARBITER, *s.* प्रमाणपुरुषः, मध्यस्थः, निर्णेता *m.* (तृ), विचारकर्त्ता *m.* (र्त्तृ).

ARBITRABLE, *a.* निर्णेयः -या -यं, विचारणीयः -या -यं.

ARBITRARILY, *adv.* स्वेच्छया, स्वेच्छातस् *ind.*, स्वकामतस् *ind.*

ARBITRARY, *a.* (Following the will) कामकारी -रिणी -रि (न्), यथाकामी -मिनी -मि (न्), स्वतन्त्रः -न्त्रा -न्त्रं, स्वच्छन्दः -न्दा -न्दं, स्वाधीनः -ना -नं, अनायत्तः -त्ता -त्तं, स्वैरवृत्तः -त्ता -त्तं.—(Capricious) चपलः -ला -लं.—(Tyrannical) क्रूरचरितः -ता -तं.—(Depending on no rule) अविहितः -ता -तं.

To ARBITRATE, *v. n.*, *v. a.* विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -नयति -ते -नेतुं), निश्चि (c. 5. -चिनोति -चेतुं), तीर् (c. 10. तीरयति -यितुं), निश्चयं or विचारं or निर्णयं or परिच्छेदं कृ.

ARBITRATED, *p. p.* निर्णीतः -ता -तं, तीरितः -ता -तं, निश्चितः -ता -तं, कृतनिश्चयः -या -यं.

ARBITRATION, *s.* (Determination) निर्णयः, विचारः, -रणं, निश्चयः, परिच्छेदः.—(Mediation) माध्यस्थ्यं.

ARBITRATOR, *s.* प्रमाणपुरुषः, स्थेयः, मध्यस्थः, निर्णेता *m.* (तृ), निश्चायकः, विचारकः.

ARBOROUS, *a.* वार्क्षः -क्षी -क्षं, वार्क्ष्यः -क्ष्यी -क्ष्यं, वृक्षसम्बन्धी -न्धिनी -न्धि (न्).

ARBOUR, *s.* लतागृहं, कुञ्जः, निकुञ्जः, पर्णशाला, मण्डपः -पं, कुटुङ्गकः, छत्वरः.

ARC, *s.* (Segment of a circle) खण्डमण्डलं, वृत्तखण्डं, गोलखण्डं.—(Arched gateway) तोरणः.

ARCADE, *s.* (Garden-walk) वृक्षैर् आच्छादित उद्यानपथः.—(A street arched over) इष्टकानिर्म्मिततोरणाकारपटला वीथिः, or धनुराकारेण पटलेन आवृता वीथिः.

ARCH, *s.* (Part of a circle) खण्डमण्डलं, वृत्तखण्डं, गोलखण्डं.—(Arched gateway) तोरणः -णं.—(The arched roof of a house) खोडकशीर्षं.—(Vault of heaven) खगोलः, नभोमण्डलं.

ARCH, *a.* (Sly, waggish) क्रीडाशीलः -ला -लं, रसिकः -का -कं, लोलापाङ्गः -ङ्गा -ङ्गं, विदग्धः -ग्धा -ग्धं.—(Chief) प्रधानः -ना -नं, मुख्यः -ख्या -ख्यं, उत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं.

To ARCH, *v. a.* (To make in the form of an arch) मण्डलीकृ, गोलीकृ तोरणरूपेण निर्मा (c. 2. -माति, c. 4. -मायते -मातुं) or कृ in caus. (कारयति -यितुं), तोरणाकारपटलेन आच्छद् (c. 10. -छादयति -यितुं).—(To build an arch) तोरणं निर्मा.

ARCHANGEL, *s.* ईश्वरदूतानां मध्ये मुख्यदूतः or प्रधानदूतः, ईश्वरदूताधिष्ठाता *m.* (तृ).

ARCHBISHOP, *s.* धर्म्माध्यक्षाणां मध्ये प्रधानो or मुख्यो धर्म्माध्यक्षः.

ARCHDEACON, *s.* (The bishop's vicegerent) धर्म्माध्यक्षसहायः, धर्म्माध्यक्षोपकारकः.

ARCHAIOLOGY or ARCHÆOLOGY, *s.* प्राक्कालीनव्यवहारविषयं वाक्यं, पुरातनशास्त्रं.

ARCHED, *p. p.* मण्डलीकृतः -ता -तं, गोलीकृतः -ता -तं, तोरणाकारः -रा -रं, कुचितः -ता -तं.

ARCHER, *s.* धनुर्धरः, धन्वी *m.* (न्), धन्वा *m.* (न्), धनुष्मान् *m.* (त्), धानुष्कः, धनुर्द्धारी *m.* (न्), इष्वासः, इषुधरः, कार्मुकीरः, निषङ्गी *m.*, अस्त्री *m.*

ARCHERY, *s.* धनुर्विद्या, शराभ्यासः, उपासनं, शराघातः, बाणमोक्षणं.—(Skilled in) कृतहस्तः, सुप्रयोगविशिक्षः, कृतपुङ्खः.

ARCHETYPE, *s.* मूलं, मूलमूर्त्तिः *f.*, आदर्शः, मूलशरीरं.

ARCHITECT, *s.* स्थपतिः *m.*, गृहादिनिर्म्माणविद्याज्ञः, गृहनिर्म्माणाध्यक्षः, निर्म्माता *m.* (तृ).

ARCHITECTURAL, *a.* निर्म्माणविद्यासम्बन्धी -न्धिनी -न्धि (न्).

ARCHITECTURE, *s.* निर्म्माणविद्या, निर्म्माणशिल्पं, गृहादिनिर्म्माणशिल्पं.

ARCHITRAVE, *s.* गृहस्य यो भागः स्तम्भाग्रे अवलम्बते or निवेश्यते.

ARCHIVES, *s.* प्राक्कालीनग्रन्थरक्षागारं.—(Ancient records) इतिहासः, पुरावृत्तं.

ARCHNESS, *s.* विदग्धता, वैदग्ध्यं, रसित्वं.

ARCHWISE, *adv.* तोरणरूपेण, अर्द्धमण्डलाकारेण, तोरणवत्; धनुराकारेण.

ARCTIC, *a.* उत्तरः -रा -रं, उदीचीनः -ना -नं, उत्तरकेन्द्रीयः -या -यं, चिरशिशिरग्रन्थिःस्थिते भूगोलभागः.

ARDENCY, *s.* उत्तापः, उत्साहः, उग्रता, व्यग्रता, कौतूहलं, उत्सुकता.

ARDENT, *a.* (Hot) उत्तप्तः -प्ता -प्तं, प्रचण्डः -ण्डा -ण्डं.—(Eager) कुतूहली -लिनी -लि (न्), उत्सुकः -का -कं, अतीच्छः -च्छा -च्छं, व्यग्रः -ग्रा -ग्रं, उत्साही -हिनी -हि (न्).—(Affectionate) अनुरागी -गिणी -गि (न्).

ARDENTLY, *adv.* उत्तापेन, कौतूहलेन, औत्सुक्येन, सानुरागं.

ARDOUR, *s.* उत्तापः, आसक्तिः *f.*, उग्रता, व्यग्रता, कौतूहलं, औत्सुक्यं, उत्साहः.—(Of affection) अनुरागः.

ARDUOUS, *a.* (Lofty) उच्चः -च्चा -च्चं, प्रांशुः -शुः -शु, आरोहणदुर्गम्यः -म्या -म्यं.—(Difficult) दुष्करः -रा -रं, सुदुष्करः -रा -रं, अतिदुष्करः -रा -रं, कठिनः -ना -नं, दुर्गम्यः -म्या -म्यं, दुःसाध्यः -ध्या -ध्यं, दुष्करः -रा -रं.

ARDUOUSNESS, *s.* उच्चता, उन्नतता.—(Difficulty) कठिनता, काठिन्यं.

AREA, *s.* अङ्गणं, प्राङ्गणं, अभ्यन्तरस्थानं.

ARENA, *s.* रङ्गः, रङ्गभूमिः *f.*, मल्लभूः, अखाटः.

ARGENT, *a.* रूप्यः -प्या -प्यं, रौप्यः -प्यी -प्यं, राजतः -ती -तं.

ARGILLOUS, *a.* मृण्मयः -यी -यं, मार्त्तिकः -की -कं, चिक्कणमृत्तिकामयः -यी -यं.

To ARGUE, *v. n.* (To reason) विचर् in caus. (-चारयति -यितुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, विवेचनं कृ. (To dispute) विवद् (c. 1. -वदते -वदितुं), वादानुवादं or उत्तरप्रत्युत्तरं कृ.

To ARGUE, *v. a.* (To prove by argument) प्रमाण्, (nom. प्रमाणयति -यितुं), प्रमाणीकृ, प्रमाणेन or तर्केण or विचारेण सिद्धीकृ; मृष् (c. 10. मृषयति -यितुं).—(To charge with, as a crime) दोषारोपं कृ, अपवद् (c. 1. -वदति -वदितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

ARGUER, *s.* तर्की *m.* (न्), विवादी *m.* (न्), विचारकः, प्रतिवादी *m.* (न्), न्यायी *m.* (न्).

ARGUMENT, *s.* (A reason stated) पक्षः, प्रमाणं, हेतुः *m.*, कारणं, वितर्कः, न्यायः; 'a false argument,' पक्षाभासः; 'a different side of the argument,' पक्षान्तरं.—(Controversy) वादानुवादः, वादयुद्धं, वाक्कलहं, विचारः, वितर्कः, विवादः, वितण्डा.—(The subject of any work) विषयः.—(Table of contents) अनुक्रमणिका, निर्घण्टः.

ARGUMENTATION, *s.* वितर्कणं, विचारणं, न्यायः.

ARGUMENTATIVE, *a.* (Consisting of argument) तार्किकः -की -कं वितर्की -र्किणी -र्कि (न्), विवादी -दिनी -दि (न्), न्यायी -यिनी -यि (न्), विचारी -रिणी -रि (न्).—(Disposed to controversy) विवादशीलः -ला -लं, विवादार्थी -र्थिनी -र्थि (न्), विवादप्रियः -या -यं.

ARGUMENTATIVELY, *adv.* सवितर्कं, वादानुवादपूर्व्वकं, वितर्कपूर्व्वकं, न्यायवत्.

ARID, *a.* शुष्कः -ष्का -ष्कं, शोषितः -ता -तं, परिशुष्कः -ष्का -ष्कं; 'arid soil,' मरुः *m.*, मरुस्थली, धन्वा *m.* (न्).

ARIDITY, *s.* शुष्कता, -त्वं, शोषः, शोषणं, परिशोषः.

ARIGHT, *adv.* युक्तं, ऋतं, यथार्थतं, यथोचितं, यथायोग्यं, सम्यक्, यथार्हं.

To ARISE, *v. n.* (To stand up) उत्था for उत्स्था (c. 1. -तिष्ठति -ते -थातुं).—(To have origin) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्; उद्भ्र् (c. 1. -चरति -चरितुं), उदि (c. 1. -अयति -एतुं), अभ्युदि, समुदि; प्रभू (c. 1. -भवति -भवितुं), सम्भू, आविर्भू, प्रादुर्भू; प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं), प्रभ् (c. 1. -सरति -सर्त्तुं), उद्गा (c. 2. -आति -आतुं), निर्भा; आत्मानं दृश् in caus. (दर्शयति -यितुं), जन् (c. 4. जायते जनितुं), अभिजन्, उपजन, सञ्जन्.—(From death) प्रतिसञ्जन्, समुत्था.

ARISEN, *p. p.* उत्थितः -ता -तं, सम्भातः -ता -तं, जातः -ता -तं, जनितः -ता -तं, उत्पन्नः -न्ना -न्नं, समुत्पन्नः -न्ना -न्नं, विनिःसृतः -ता -तं, जन्यः -न्या -न्यं.

ARISTOCRACY, *s.* (A form of government) कुलीनजनाधिष्ठितं राज्यं, कुलीनवर्गप्रमुखं राज्यं, कुलीनवर्गप्रभुत्वं.—(The persons of whom it is composed) कुलीनजनाः, कुलीनवर्गः.

ARISTOCRATICAL, *a.* कुलीनः -ना -नं, कुलीनकः -का -कं, कौलेयः -यी -यं, कुलीनवर्गयोग्यः -ग्या -ग्यं, उत्कृष्टः -ष्टा -ष्टं.

ARISTOCRATICALLY, *adv.* कुलीनजनवत्, राजन्यवत्, कुलीनकप्रकारेण.

ARITHMETIC, *s.* गणनाविद्या, गणितं, पाटीगणितं, अङ्कविद्या, परिपाटिः *f.* -टी, परिकर्म्म *n.* (न्); 'the eight rules of arithmetic,' परिकर्म्माष्टकं.

ARITHMETICAL, *a.* गणनाविद्यानुरूपः -पा -पं, अङ्कविद्यानुसारी -रिणी -रि (न्).

ARITHMETICIAN, *s.* गणनाविद्याज्ञः, गणनाशास्त्रपण्डितः, अङ्कविद्याज्ञः, गणकः.

ARK, *s.* (A vessel, ship) नौः, नौका, पोतः, तरणी, वृहन्नौका.—(A chest) आधारः, कोषः, पेटिका, पेटः -टा -टी.

ARM, *s.* (Of the body) बाहुः *m.*, भुजः or -जा *f.*, दोषा *f.*, दोः *m.* (-स्), प्रवेष्टः.—(Of a tree) शाखा, उपशाखा.—(Of the sea) समुद्रबाहुः.—(Of a river) चक्रं, चक्रः, नदीचक्रः, नदीचक्रं, पुटभेदः.—(Power, might) बलं, शक्तिः *f.*; 'a dominion acquired by one's own arm,' स्वभुजोपार्ज्जितं राज्यं'—(The upper arm) प्रगण्डः.

To ARM, *v. a.* सन्नह् (c. 4. -नह्यति -नद्धुं), सज्जीकृ, अस्त्रैः or शस्त्रैः सज्जीकृ, or युज् in caus. (योजयति -यितुं), or समायुज्.—(To arm one's self, put on one's arms) नह् (c. 4. नह्यते नद्धुं), सन्नह्.—(To put on armour) वर्म्म् (nom. वर्म्मयति -यितुं or संवर्म्मयति).

ARMADA, *s.* वृहन्नौकासमूहः, समुद्रयुद्धाय सज्जीकृतो वृहन्नौकासमूहः.

ARMADILLO, *s.* घृणः, कवचाकारचर्म्मधारी विलवासी क्षुद्रजन्तुः.

ARMAMENT, *s.* सैनिकः, युद्धाय सज्जीकृतं बलं, योद्धृसज्जनं.

ARMED, *p. p.* सज्जः -ज्जा -ज्जं, वर्म्मितः -ता -तं, सन्नद्धः -द्धा -द्धं, अभिसन्नद्धः -द्धा -द्धं, सायुधः -धा -धं, कृतास्त्रः -स्त्रा -स्त्रं, शस्त्री -स्त्रिणी -स्त्रि (न्).—(Having a weapon in the hand) शस्त्रपाणिः -णिः -णि.

ARM-HOLE, *s.* कक्षः, बाहुमूलं, भुजकोटरः, कक्षस्थानं, दोर्मूलं.

ARMISTICE, *s.* किञ्चित्कालपर्य्यन्तं युद्धनिवर्त्तनं, सान्धिः *m.*, क्षमा.

ARMLESS, *a.* (Without an arm) अभुजः -जा -जं.—(Without weapons) अस्त्रहीनः -ना -नं, अशस्त्रः -स्त्रा -स्त्रं.

Armlet. *s.* (Bracelet) वलयः or यं, केयूरं, अङ्गदं.—(A little arm) क्षुद्रबाहुः *m.*, उपशाखा.

Armorial, *a.* कावचिकः -की -कं, आयुधिकः -का -कं, आयुधीयः -या -यं. —(Belonging to the escutcheon of a family) कुलचिह्नसम्बन्धी -न्धिनी -न्धि (न्).

Armory, *s.* आयुधागारं, शस्त्रागारं, अस्त्रागारः.—(A collection of arms) शस्त्रसंहतिः *f.*, शस्त्रसमूहं.

Armour, *s.* वर्म्म *n.* (न्), लौहवर्म्म *n.* (न्), तनुत्रं, तनुत्राणं, कवचः or -चं, वारवाणः, कञ्चुकः, त्वक्त्रं, दंशनं, सन्नाहः, देहावरणं, युद्धास्त्रं, तनुवारं, सज्जा.—(Chain-armour) जालिका, जालप्राया; 'arrayed in armour,' वर्म्मितः ता -तं, कवची -चिनी -चि (न्).

Armour-bearer, *s.* सान्नहानकः, वर्म्मवाहकः.

Armourer, *s.* अस्त्रकारकः, शस्त्रकारः, शस्त्रमार्जः, अस्त्रनिर्म्माणशिल्पज्ञः, सज्जाकर्त्ता *m.* (र्त्तृ), अभिधावकः.

Arm-pit, *s.* कक्षः, बाहुमूलं, भुजकोटरः, दोर्मूलं.

Arms, *s.* अस्त्रं, शस्त्रं, आयुधः, युद्धास्त्रं, शस्त्रास्त्रं.—(War in general) विग्रहः, समरः, रणः, युद्धं, सङ्ग्रामः.—(State of hostility) युद्धावस्था, रणसमयः; 'dexterity in arms,' अस्त्रलाघवं; 'the taking up of arms,' अस्त्रग्रहणं, युद्धे प्रवृत्तिः, अस्त्रधारणं; 'passage of arms,' अस्त्रशिक्षा, शस्त्राभ्यासः, 'a brother in arms,' सहयुध्वा *m.* (न्).—(The ensigns armorial of a family) कुलीनपदसूचकचिह्नं, कुलचिह्नं.

Army, *s.* सेना *f.*, सैन्यं, बलं, वाहिनी, चमूः *f.*, दण्डः or -ण्डं, अनीकं, चक्रं, ध्वजिनी, व्यूहः, योधसमूहः, पृतना, वरूथिनी.—(A complete army) अक्षौहिणी, चतुरङ्गः.—(In motion) प्रचक्रं.

Aroma, *s.* गन्धः, वासः, आमोदः, धूपः, परिमलः.

Aromatic. *a.* सुगन्धीयः -या -यं, गन्धी -न्धिनी -न्धि (न्), तिक्तः -क्ता -क्तं, सुरभितः -ता -तं, सुवासितः -ता -तं, धूपितः -ता -तं.

Aromatics, *s.* उपस्कराः *m. pl.*, सुगन्धिद्रव्याणि *n. pl.*, सुगन्धानि *n. pl.*

To **aromatise,** *v. a.* वास् (c. 10. वासयति -यितुं), धूप् (c. 1. धूपायति, धूपितुं).

Around, *adv.* (Circularly) परितस्, अभितस्.—(On every side) समन्ततस्, सर्व्वतस्, विश्वतस्, समन्तात्.

Around, *prep.* परि, अभि.

To **arouse,** *v. a.* (To excite) उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्, उत्था for उत्स्था in caus. (उत्थापयति -यितुं), उद्बुध् in caus. (-बोधयति -यितुं), प्रबुध्.—(To wake from sleep) जागृ in caus. (जागरयति -यितुं), प्रबुध् in caus., निद्रां भञ्ज् (c. 7. भनक्ति भंक्तुं).

Aroused, *p. p.* प्रोत्साहितः -ता -तं.—(Awaked) प्रबोधितः -ता -तं, प्रबुद्धः -द्धा -द्धं, निद्राभङ्गः -ङ्गा -ङ्गं.

To **arraign,** *v. a.* (To set in order) विरच् (c. 10. -रचयति -यितुं), स्वस्थाने स्था in caus. (स्थापयति -यितुं).—(To accuse) अभियोगं कृ, आह्वे (c. 1. -ह्वयति -ह्वातुं), अपवद् (c. 1. -वदति -वदितुं), अभिशप् (c. 1. -शपति -शप्तुं).

Arraigned, *p. p.* अभियुक्तः -क्ता -क्तं, आहूतः -ता -तं, अभिशप्तः -प्ता -प्तं.

Arraignment, *s.* अभियोगः, आह्वानं, अपवादः.

To **arrange,** *v. a.* रच् (c. 10. रचयति -यितुं), विरच्; विधा (c. 3. -दधाति -धातुं), संविधा; क्रमेण or यथाक्रमं स्था in caus. (स्थापयति -यितुं), ग्रन्थ् (c. 1. ग्रन्थति, c. 9. ग्रथ्नाति, ग्रन्थितुं).

Arranged, *p. p.* विरचितः -ता -तं, ग्रथितः -ता -तं, विन्यस्तः -स्ता -स्तं, विहितः -ता -तं, प्रतिविहितः -ता -तं, परिमितः -ता -तं, व्यूढः -ढा -ढं; 'well-arranged,' सुघटितः -ता -तं.

Arrangement, *s.* विन्यासः, पर्य्यायः, प्रतिविधानं, व्यूहनं, व्यूढिः *f.*, रचना, विरचनं, ग्रन्थनं, -ना, व्यवस्थापनं, अनुसन्धानं, क्रमेण स्थापनं, परिपाटिः *f.*—(The state of being in order) क्रमः.

Arranger, *s.* विरचकः, उपायज्ञः, उपेता *m.* (तृ), व्यासः.

Arrant, *a.* (Bad in a high degree) अतिदुष्टः -ष्टा -ष्टं, अतिनिकृष्टः -ष्टा -ष्टं, अतिकुत्सितः -ता -तं.—(Excessive) अत्यन्तः -न्ता -न्तं.

Arras, *s.* नानावर्णानि चित्रितवस्त्राणि.

Array, *s.* (Of battle) व्यूहः, or -हनं, व्यूढिः *f.*, बलविन्यासः; 'to draw up in battle array,' व्यूह् (c. 1. -ऊहते -ऊहितुं).—(Order) क्रमः, श्रेणी, पङ्क्तिः *f.*, रचना.—(Dress) आभरणं, भूषणं, परिच्छदः.

To **array,** *v. a.* (To put in order) क्रमेण or व्यूहेन रच् (c. 10. रचयति -यितुं), विरच् or स्था in caus. (स्थापयति -यितुं), or व्यवस्था; or विधा (c. 3. -दधाति -धातुं), or सज्जीकृ.—(To dress) वस्त्रम् आच्छद (c. 10. -छादयति -यितुं), संव्ये (c. 1. -व्ययति -व्यातुं), भूष् (c. 10. भूषयति -यितुं); अलङ्कृ, परिष्कृ.

Arrear, *s.* ऋणशेषं, ऋणशेषांशः, ऋणस्य अशोधितो भागः, ऋणस्य शोधनीयो भागः.

Arrest, *s.* आसेधः, धरणं, ग्रहणं, निरोधः, बन्धनं.—(Stop) निवारणं.

To **arrest,** *v. a.* (As a bailiff) आसिध् (c. 1. -सेधति -सेद्धुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), ऋणहेतोः or दोषहेतोः राजलेखेन or राजाज्ञया बन्ध् (c. 9. बध्नाति -बन्द्धुं), or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं).—(Stop, bring to a stand) स्तम्भ् in caus. (स्तम्भयति -यितुं), विष्टम्भ् (c. 5. -स्तभ्नोति, c. 9. -स्तभ्नाति -स्तम्भितुं), निवृ in caus. (-वारयति -यितुं).

Arrested, *p. p.* आसिद्धः -द्धा -द्धं, धृतः -ता -तं, बद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं.

Arrival, *s.* आगमनं, अभिगमनं, उपस्थितिः *f.*, उपयातं, आयः.

To **arrive,** *v. n.* आगम् (c. 1. -गच्छति -गन्तुं), अभिगम्, उपगम्; उपस्था (c. 1. -तिष्ठति -स्थातुं), प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, अवाप्, अनुसम्प्राप्, उपसम्प्राप्, आया (c. 2. -याति -यातुं), अभिया, उपाया, समाया.

Arrived, *p. p.* आगतः -ता -तं, समायातः -ता -तं, उपस्थितः -ता -तं, प्राप्तः -प्ता -प्तं.

Arrogance, *s.* गर्वः, धर्षः, दर्पः, मानः, अभिमानः, मदः, अवलेपः, अहङ्कारः, प्रागल्भ्यं, प्रगल्भता, आटोपः, चित्तसमुन्नतिः, औद्धत्यं, प्रतिभानं.

Arrogantly, *adv.* सगर्व्वं, सदर्पं, साटोपं, गर्व्वेण, धर्षेण, प्रगल्भं.

Arrogant, *a.* प्रगल्भः -ल्भा -ल्भं, गर्व्वी -र्व्विणी -र्व्वि (न्), अतिगर्व्वितः -ता -तं, सगर्व्वः -र्व्वा -र्व्वं, मानी -निनी -नि (न्), मदोद्धतः -ता -तं, अहङ्कारी -रिणी -रि (न्), आत्मश्लाघी -घिनी -घि (न्), प्रधर्षितः -ता -तं, अवलिप्तः -प्ता -प्तं, उद्धतः -ता -तं, प्रतिभामुखः -खी -खं.—(To be arrogant) प्रगल्भ् (c. 1. -गल्भते -गल्भितुं), दृप् (c. 4. दृप्यति, दर्प्तुं द्रप्तुं).

To **arrogate,** *v. a.* (To claim proudly) गर्व्वपूर्व्वकं or सगर्व्वं or अनर्हतस् or अधर्म्मतस् or मिथ्या ग्रह् (c. 9. गृह्णाति ग्रहीतुं), अभिग्रह्, परिग्रह्; or लभ् (c. 1. लभते लब्धुं), or आदा (c. 3. -ददाति -दातुं), or अभ्यनुज्ञा (c. 9. -जानाति -ज्ञातुं), or आत्मीयं -यां -यं कृ or स्वीकृ; मृषा or मिथ्या ग्रह्; उपधां कृ, ध्वजीकृ.

Arrogation, *s.* सगर्व्वग्रहणं, अनर्हग्रहणं, अभिग्रहणं, अन्याय्यग्रहणं, मिथ्याग्रहणं, ध्वजीकरणं, उपधा.

Arrow, *s.* शरः, बाणः, इषुः *m.*, शायकः, काण्डं, शल्यं, विपाठः, विशिखः, पृषत्कः, पत्री *m.* (न्), भल्लः, नाराचः, प्रक्ष्वेडनः, अजिह्मगः, खगः, आशुगः, मार्गणः, कलम्बः, रोपः; 'arrow-head,' बाणाग्रं; 'arrow-shaft,' शरकाण्डं; 'a shower of arrows,' शराक्षेपः, शरवर्षं.

Arrowy, *a.* (Consisting of arrows) बाणी -णिनी -णि (न्), बाणवान्

-वती -वत् (त्).—(Arrow-shaped) बाणाकारः -रा -रं.

Arsenal, *s.* आयुधागारं, आयुधगृहं, शस्त्रागारं, अस्त्रागारं, युद्धभाण्डागारं. —(A collection of arms) शस्त्रसंहतिः, शस्त्रसमूहं.

Arsenic, *s.* मनःशिला, शिला, मनोगुप्ता, नागजिह्विका, नैपाली, कुनटी.

Arson, *s.* आगारदाहः, गृहदाहापराधः.

Art, *s.* शिल्पं, शिल्पविद्या, कला, व्यवसायः, कर्म्म *n.* (न्).—(Invention) कल्पनं, -ना.—(Science) विद्या.—(Skill) निपुणता, पाण्डित्यं, दक्षता, युक्तिः *f.*, शिक्षाशक्तिः *f.*—(Cunning) विदग्धता, वैदग्ध्यं, माया.

Artery, *s.* नाडी, नाडिः *f.*, कण्डरा, नाली, नालिः *f.*, सिरा, रक्तवाही *m.* (न्).

Arterial, *a.* नाडीसम्बन्धी -न्धिनी -न्धि (न्), रक्तवाही -हिनी -हि (न्).

Artful, *a.* (Performed with art) शिल्पेन or पाण्डित्येन कृतः -ता -तं. —(Skilful) शिक्षितः -ता -तं, निपुणः -णा -णं, पटुः -टुः -टुः -टु.—(Cunning) उपायज्ञः -ज्ञा -ज्ञं, विदग्धः -ग्धा -ग्धं, छलान्वितः -ता -तं, मायी -यिनी -यि (न्).

Artfully, *adv.* पाण्डित्येन, निपुण्येन, सपाटवं, वैदग्ध्येन, छलेन.

Artfulness, *s.* (Skill) पाण्डित्यं, निपुणता, चातुर्य्यं, दक्षता, पटुता.—(Cunning) विदग्धता, वैदग्ध्यं, शठता.

Arthritic, *a.* (Gouty) वातकी -किनी -कि (न्).—(Relating to the joints) ग्रन्थिलः -ला -लं.

Artichoke, *s.* शाकविशेषः.

Article, *s.* (Part of speech) वाक्यार्थनिर्णायको व्ययशब्दः.—(A particular part of any complex thing) संज्ञः, भागः, पदं, विषयः. —(Thing) द्रव्यं, वस्तु *n.*, विषयः.—(Apparatus) सामग्री *f.*—(Terms, stipulation) नियमपत्रं, समयः; 'articles of peace,' सन्धिसमयः. —(A point of time) क्षणः, समयः, वेला.

To article, *v. n.* समयं कृ, नियमपत्रेण स्थिरीकृ, सङ्गद् (c. 1. -घट्टते -घट्टितुं).

Articular, *a.* ग्रन्थिलः -ला -लं, ग्रन्थिसम्बन्धकः -का -कं.

Articulate, *a.* (Distinct) व्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं.

To articulate, *v. a.* (To utter words distinctly) स्पष्टं or व्यक्तं उच्चर् in caus. (-चारयति -यितुं), or उदीर् (c. 10. -ईरयति -यितुं, c. 1. -ईरति -ईरितुं), or उदाहृ (c. 1. -हरति -हर्त्तुं).—(To joint) ग्रन्थ् (c. 1. ग्रन्थति, c. 9. ग्रथ्नाति ग्रन्थितुं)

Articulated, *p. p.* (Uttered) उच्चारितः -ता -तं.—(Jointed) ग्रन्थितः -ता -तं, सन्धितः -ता -तं.

Articulation, *s.* (Of words) उच्चारणं, उदाहरणं.—(The juncture of bones) ग्रन्थिः *m.*, अस्थिसन्धिस्थानं, सन्धिः *m.*

Artifice, *s.* (Stratagem, contrivance) उपायः, छद्म *n.* (न्), छलं, व्यपदेशः, कपटः -टं, कौशलं.

Artificer, *s.* (An artist) शिल्पकारः, शिल्पी *m.* (न्), कर्म्मकारः, कर्म्मारः, कारुः *m.*—(Maker) कर्त्ता *m.* (तृ), निर्म्माता *m.* (तृ).—(Contriver) उपेता *m.* (तृ), उपायज्ञः.

Artificial, *a.* शिल्पिकः -की -कं, कृत्रिमः -मा -मं, कृतकः -का -कं, काल्पनिकः -की -कं, प्रतियत्नपृष्ठैः -ष्ठा -ष्ठं.—(Made by art) कल्पितः -ता -तं, शिल्पनिर्म्मितः -ता -तं; 'an artificial lake,' क्रीडासरः *n.* (स्).

Artificially, *adv.* शिल्पेन, कृत्रिमप्रकारेण, शिल्पिकप्रकारेण.

Artillery, *s.* सैन्यास्त्रं, युद्धास्त्रं, आग्नेयानि अस्त्राणि *n. pl.*

Artisan, *s.* शिल्पी *m.* (न्), शिल्पकारः, कर्म्मकारः, कारुकः.

Artist, *s.* शिल्पी *m.* (न्).—(A skilful man) पण्डितः, निपुणः, पटुः. —(Painter) चित्रकरः.

Artless, *a.* (Without fraud) अमायः -या -यं, अमायिकः -की -कं, कपटहीनः -ना -नं, दक्षिणः -णा -णं, सरलः -ला -लं, शुद्धमतिः -तिः -ति, छलरहितः -ता -तं, निर्य्याजः -जा -जं.—(Void of art) अपटुः -टुः -टु, अदक्षः -क्षा -क्षं, अनभिज्ञः -ज्ञा -ज्ञं.

Artlessly, *adv.* छलव्यतिरेकेण, मायां विना, कपटव्यतिरेकेण, अमायया, दाक्षिण्येन.

Artlessness, *s.* अमाया, सरलता, दाक्षिण्यं.

CITRON, *s.* (The tree) जम्बीरः, जम्भः -म्भकः -म्भलः -म्भरः, अम्लकेशरः, केशराम्लः, फलपूरः -रकः, बीजपूरः, गिलः, दन्तशठः, रूचकः, इच्छकः, बृहच्छिन्नः, मातुलुङ्गकः, घूर्णबीजः, लोलङ्गः, बीजकः -जपूर्णकः.—(The fruit) जम्बीरफलं.

CITY, *s.* पुरं -री, नगरं -री, पूः *f.* (पुर्), पत्तनं, पृथुपत्तनं, पट्टनं, पट्टं, पुरिः *f.*, कट्टेटं, टङ्कः, पत्ती, पुटभेदनं, स्थानीयं, निगमः; 'city-gate,' नगरद्वारं, पुरद्वारं; 'city-police,' नगररक्षिपुरुषः.

CITY, *a.* पौरः -री -रं, नागरः -री -रं, रेयकः -की -कं, नगरस्थः -स्था -स्थं.

CIVET, CIVET-CAT, *s.* गन्धमार्जारः, गन्धोतुः *m.*, खट्टाशः -शी, पूतिशारिजा, कस्तूरीमृगः.

CIVIC, *a.* पौराचारसम्बन्धी -न्धिनी -न्धि (न्) पौरः -री -रं.

CIVIL, *a.* (Relating to the usages of citizens) पुरव्यवहारसम्बन्धी -न्धिनी -न्धि (न्), नगराचारसम्बन्धीयः -या -यं, नीतिसम्बन्धीयः -या -यं, पौरः -री -रं; 'civil war, popular disturbance,' प्रकृतिक्षोभः, विप्लवः.—(Complaisant, gentle) अनुग्राही -हिणी -हि (न्), अनुनयी -यिनी -यि (न्), सानुनयः -या -यं, अनुकूलः -ला -लं, अनुरोधी -धिनी -धि (न्), चाटुकारः -रा, -रं, सुप्रसादः -दा -दं, दक्षिणः -णा -णं.—(Civil in speech) प्रियंवदः -दा -दं, अभिवादकः -का -कं, वन्दारुः -रुः -रु, शक्कु -क्कुः -क्कु.—(Civilized) सभ्यः -भ्या -भ्यं.

CIVILIAN, *s.* स्मार्त्तः, स्मृतिज्ञः, धर्म्मशास्त्रज्ञः, व्यवहारविधिज्ञः, नीतिज्ञः, नयविद्, व्यवस्थाकुशलः, राजकर्म्मेव्यवसायी *m.* (न्), राजव्यापारी *m.* (न्).

CIVILISATION, *s.* सभ्यता, शिष्टता, शिष्टाचारत्वं, आर्य्यवृत्तभावः, सुशीलत्वं.

CIVILITY, *s.* (Politeness) आनन्दनं, अनुग्रहः, अनुरोधः, अनुनयः, अभिनीतिः *f.*, अनुकूलता, अनुवृत्तिः *f.* -वर्त्तनं, सभाजनं, सौजन्यं, प्रश्रयः, सभ्यता, सुशीलता, शिष्टता.

To CIVILIZE, *v. a.* शिष्टाचारान् or आर्य्यव्यवहारान् शिक्ष् in caus. (शिक्षयति -यितुं) or शास् (c. 2. शास्ति, शासितुं).

CIVILIZED, *p. p.* शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, विनीतः -ता -तं, शिष्टाचारसेवी -विनी -वि (न्), सभ्याभ्यः -भ्या -भ्यं, आर्य्यवृत्तः -त्ता -त्तं; 'civilized and rude,' आर्य्या म्लेच्छाश्च.

CIVILLY, *adv.* (Politely) अनुनयेन, आनन्दनपूर्ब्बकं, सानुनयं, सुशीलवत्, सानुरोधं.—(In a manner relating to civil government) नीतिविद्यानुसारात्, पौरव्यवहारानुसारेण.

CLACK, *s.* (Incessant chattering) जल्पः -ल्पनं, वावदूकता, अतिशयजल्पः, वाक्चापल्यं, चटचटशब्दः, क्लम्फनं.—(Bell of a mill) पेषणीघण्टा.

To CLACK, *v. n.* अतिशयेन जल्प् (c. 1. जल्पति -ल्पितुं), पेषणीघण्टारूपेण शब्दं कृ, चटचटशब्दं कृ.

CLAD, *a.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, वस्त्रवेष्टितः -ता -तं, वस्त्रान्वितः -ता -तं, परिहितः -ता -तं, प्रावृतः -ता -तं, आवृतः -ता -तं, परिच्छन्नः -न्ना -न्नं, पिनद्धः -द्धा -द्धं, संवीतः -ता -तं, अनग्नः -ग्ना -ग्नं, सवासाः -सा -सः (स्), सचेलः -ला -लं; 'lightly clad,' लघुवासाः -सा -सः (स्).

To CLAIM, *v. a.* स्वीकृ, अङ्गीकृ; याच् (c. 1. याचति -चितुं), प्रार्थे (c. 10. प्रार्थयति -ते -यितुं), ममेति उक्त्वा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), मह्यं दातव्यमिति ज्ञापयित्वा ग्रह्; अभिमानं कृ; as, 'to claim money,' धनाभिमानं कृ; ममेति वद् (c. 1. वदति -दितुं), मदीयमिति or स्वीयमिति वद्, स्वाधिकारं or स्वस्वत्वं ज्ञा in caus. (ज्ञापयति -यितुं).—(To set up a claim) ध्वजीकृ.—(To have a claim to) अर्ह् (c. 1. अर्हति -ते -र्हितुं).

CLAIM, *s.* अधिकारः, अभियोगः, अभिमानं, याच्ञा, अभ्यर्थना, प्रार्थना; 'false claim,' मिथ्याभियोगः; 'claim laid to learning,' विद्याभिमानं.

CLAIMABLE, *a.* अभियोक्तव्यः -व्या -व्यं, याचनीयः -या -यं, प्रार्थनीयः -या -यं.

CLAIMANT, *s.* अभियोक्ता *m.* (क्तृ), अर्थी *m.* (न्), अधिकारी *m.* (न्), याचिता *m.* (तृ), प्रार्थयिता *m.* (तृ).

CLAIMED, *p. p.* अधिकृतः -ता -तं, याचितः -ता -तं, प्रार्थितः -ता -तं, अभियुक्तः -क्ता -क्तं, प्रख्यातः -ता -तं, मार्गितः -ता -तं.

CLAIR-OBSCURE, *s.* चित्रकर्म्मणि नानाछायाविन्यासविद्या.

To CLAM, *v. a.* (To clog with glutinous matter) श्यै in caus. (श्यापयति -यितुं), श्यानीकृ, सान्द्रीकृ.

To CLAMBER, *v. a.* पाणिपादेन or करचरणाभ्यां दुरारोहस्थानम् आयासेन आरुह् (c. 1. -रोहति -रोढुं) or अध्यारुह्.

CLAMBERING, *s.* पाणिपादेन विषमस्थानारोहणं, आयासेनारोहणं.

CLAMMINESS, *s.* श्यानता, क्षीनता, सान्द्रता, घनत्वं, अनुलग्नशीलत्वं.

CLAMMY, *a.* श्यानः -ना -नं, क्षीनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, घनः -ना -नं, अनुलग्नशीलः -ला -लं, संलग्नशीलः -ला -लं, आर्द्रः -र्द्रा -र्द्रं.

CLAMOUR, *s.* घोषणं -णा, उत्क्रोशः, उत्क्रुष्टं, संहूतिः *f.*, जनरवः, उच्चैर्घुष्टं,

उच्चैःस्वरः, रासः, बहुभिः कृता संहृतिः, प्रक्ष्वेडनं.

To CLAMOUR, *v. n.* उच्चैर् घुष् (c. 10. घोषयति -यितुं), उच्चुप्, उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), प्रक्ष्विड् (c. 1. -ष्वेडति -ष्वेडितुं).

CLAMOUROUS, *a.* घोषकरः -री -रं, घोषणः -णा -णं, उच्चैःस्वरकारी -रिणी -रि (न्), तुमुलकारी &c., मुखरः -रा -रं, महास्वनः -ना -नं, बहुघोषः -षा -षं, अनल्पघोषः -षा -षं, प्रक्ष्वेडितः -ता -तं, प्रक्ष्वेडितवान् -वती -वत् (त्).

CLAMP, *s.* (A piece of iron for joining stones) शिलाद्वयसम्बन्धनार्थं कीलः.—(A quantity of brick) इष्टकाराशिः *f.*

To CLAMP, *v. a.* पाषाणद्वयं or काष्ठद्वयं कीलेन सम्बन्ध् (c. 9. -बध्नाति -बन्धुं).

CLAN, *s.* कुलं, वंशः, गोत्रं, सन्तानः, वर्गीः, वर्गः, जातिः *f.*, कुटुम्बः, पंक्तिः *f.*, मण्डलं, सङ्घः, संसर्गः, शाखा.

CLANDESTINE, *a.* निभृतः -ता -तं, गुप्तः -प्ता -प्तं, गूढः -ढा -ढं, रहस्यः -स्या -स्यं, छद्मः -द्मा -द्मं, प्रच्छन्नः -न्ना -न्नं, निह्नुतः -ता -तं, अप्रकाशः -शा -शं, छलेन कृतः -ता -तं; 'a clandestine marriage,' चौरिकाविवाहः.

CLANDESTINELY, *adv.* निभृतं, रहः (स्), रहसि, रहस्यं, गुप्तं, छलेन प्रच्छन्नं, निह्नुतेन, अप्रकाशं.

CLANG OR CLANGOUR, *s.* घुष्टं, तुमुलं, क्रम्क्रा, क्रः.—(Of arms) शस्त्रघोषः

To CLANG, *v. n.* शिञ्ज् (c. 2. शिञ्जि, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), ध्वन् (c. 1. ध्वनति -नितुं), प्रक्ष्वेड् (c. 1. -ष्वेडति -डितुं), क्रम्क्रा (nom. क्रम्क्रायते).

CLANGOUS, *a.* घोषणः -णा -णं, तुमुलकरः -री -रं, शस्त्रघुष्टकरः -री -रं.

CLANK, *s.* शिञ्जितं, क्वणितं, घुष्टं, क्रम्क्रणं, क्रम्क्रा, प्रक्ष्वेडनं.

To CLAP, *v. a.* (Strike together suddenly) अकस्मात् संहन् (c. 2. -हन्ति -हन्तुं) or सङ्घट्ट् (c. 10. -घट्टयति -यितुं), आस्फल् in caus. (-स्फालयति -यितुं).—(The hands, arms) तालं कृ, करतालं कृ, आस्फुट् (c. 10. -स्फोटयति -यितुं).—(The wings) पक्षौ उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(To applaud) करतालेन प्रशंस् (c. 1. -शंसति -शंसितुं).—(To apply suddenly) अकस्मात् प्रविश् in caus. (-वेशयति -यितुं) or क्षु in caus. (सर्पयति -यितुं) or न्यस् (c. 4. -अस्यति -असितुं).

CLAP, *s.* स्तनितं, आस्फोटनं, ध्वनितं, क्वणितं, सङ्घट्टशब्दः.—(Of thunder) मेघनादः, मेघस्तनितं, वज्रनिर्घोषः, वज्रनिष्पेषः, स्मृच्चिषु: *m.*—(Of the hand) तालः.—(Applause) करतालेन प्रशंसा, प्रशंसाशब्दः, अनुरागजः शब्दः.

CLAPPER, *s.* (Of a bell) घण्टालोला, घण्टावादकः, नादनः.—(Applauder) करतालेन प्रणादकारी *m.* (न्).

CLARET, *s.* प्रसन्नमद्यं, प्रसवेरा, रक्तवर्णः स्वच्छमद्यविशेषः

CLARIFICATION, *s.* प्रसादनं, विशोधनं, पावनं, पवित्रीकरणं, मलापकर्षणं

To CLARIFY, *v. a.* शुध् in caus. (शोधयति -यितुं), परिशुध्, विशुध्, संशुध्, पू (c. 9. पुनाति -नीते, पवितुं), परिपू, विपू; पवित्रीकृ, विमल (nom. विमलयति -यितुं).

To CLARIFY, *v. n.* प्रसद् (c. 6. -सीदति -सत्तुं), पवित्रीभू, विमलीभू.

CLARINET, *s.* वेणुः *m.*, वंशः, विवरनालिका, उदात्तस्वरो वेणुभेदः.

CLARION, *s.* शुषिरवाद्यविशेषः, तूर्य्यं, शृङ्गः.

CLARITY, *s.* प्रसन्नता, स्वच्छता, कान्तिः *f.*, द्युतिः *f.*, दीप्तिः *f.*

To CLASH, *v. n.* सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), परस्परसमाघातं कृ, परस्परसङ्घट्टप्रयुक्तं क्रम्क्राशब्दं कृ or क्रम्क्रा (nom. क्रम्क्रायते).—(To contradict, disagree) विवद् (c. 1. -वदते -दितुं), विप्रवद्, विसंवद्, परस्परम् विरुध् (c. 7. -रुणद्धि -रोद्धुं).

CLASH, *s.* समाघातः, सङ्घट्टः -ट्टनं, सङ्घट्टः, क्रः, क्रम्क्रणं, क्वणितं, वर्ष्टेरः.—(Contradiction) वचनविरोधः, प्रतीपवचनं, विसंवादः.

CLASHING, *a.* (Contradictory) परस्परविरुद्धः -द्धा -द्धं, परस्परविरोधी -धिनी -धि (न्), विवदमानः -ना -नं, विरुद्धार्थैः -र्था -र्थं.

CLASP, *s.* (Embrace) आलिङ्गनं -ङ्गितं, परिष्वङ्गः, आश्लेषः, संश्लेषः, परिरम्भः, उपगूढं, अङ्कं, अङ्कपाली.—(Hook, buckle) कुटुपः.

To CLASP, *v. a.* (Shut with a clasp) कुटुपेन बन्ध् (c. 9. बध्नाति, बन्धुं) or पिनह् (c. 4. -नह्यति -नद्धुं).—(Embrace) आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्; आश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), संश्लिष्, पीड् (c. 10. पीडयति -यितुं), स्वञ्ज् (c. 1. स्वजते, स्वंक्तुं), परिष्वञ्ज्, सम्परिष्वञ्ज्, उपगुह् (c. 1. -गूहति -गूहितुं), परिरभ् (c. 1. -रभते -रब्धुं), क्रोडीकृ.—(Enclose round) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं).—(Clasp the hands) हस्तौ बन्ध् or संहन् (c. 2. -हन्ति -हन्तुं), अञ्जलिं बन्ध् or संश्लिष्.

CLASPED, *p. p.* आलिङ्गितः -ता -तं, श्लिष्टः -ष्टा -ष्टं, आश्लिष्टः -ष्टा -ष्टं, संश्लिष्टः -ष्टा -ष्टं, परिरब्धः -ब्धा -ब्धं, परिष्वक्तः -क्ता -क्तं, परिमृष्टः -ष्टा -ष्टं, उपगूढः -ढा -ढं, पीडितः -ता -तं, पिष्टः -ष्टा -ष्टं, क्रोडीकृतः -ता -तं; 'with hands clasped,' बद्धाञ्जलिः -लिः -लि, कृताञ्जलिः -लिः -लि.—(Clasped in the arms) भुजापीडितः -ता -तं.

CLASPER, *s.* लताभुजः, वृक्षादिपरिवेष्टनशीलः लताविटपः.

CLASP-KNIFE, *s.* वारङ्गमध्ये निवेशयितुं शक्या क्षुरिका.

CLASS, *s.* (A rank or order of persons) वर्गः, वर्गीः, पदं, आश्रमः, जातिः *f.*—(A set of things or beings) गणः, पंक्तिः *f.*, श्रेणी, संसर्गः, समूहः, गोत्रं; 'class of verbs,' गणः.—(A number of scholars) सहाध्यायिनां पंक्तिः, छात्रसमूहः; 'the lower classes,' अवरवर्गीः *m. pl.*, अन्यजातीयाः *m. pl.*

To CLASS OR CLASSIFY, *v. a.* वर्गक्रमेण or यथावर्गं विरच् (c. 10. -रचयति -यितुं), or व्यस् (c. 4. -अस्यति -असितुं) or ग्रन्थ् (c. 1. ग्रन्थति, ग्रन्थितुं), गणीकृ, वर्गीकृ.

CLASSED OR CLASSIFIED, *p. p.* गणीभूतः -ता -तं, वर्गीभूतः -ता -तं, वर्गीयः -या -यं, ग्रथितः -ता -तं, वर्गक्रमेण विन्यस्तः -स्ता -स्तं or व्यूढः -ढा -ढं.

CLASSICAL, *a.* (Refined) संस्कृतः -ता -तं, साधुः -धुः -ध्वी -धु.—(Of the first rank) प्रथमवर्गीयः -या -यं, श्रेष्ठः -ष्ठा -ष्ठं, प्रथमपदस्थः -स्था -स्थं. (Relating to ancient books) पूर्वकालीनग्रन्थसम्बन्धी -न्धिनी -न्धि (न्).

CLASSIFICATION, *s.* गणीकरणं, गणना, वर्गक्रमेण विन्यासः, प्रतिविधानं.

CLASSIFIER, *s.* गणकारः, व्यासः; 'of words,' पदसङ्घातः.

CLASSICK, *s.* ग्रन्थकर्तॄणां मध्ये श्रेष्ठः, पूर्वकालीनग्रन्थकारः.

To CLATTER, *v. n.* क्वण् (c. 1. क्वणति -णितुं), ध्वन् (c. 1. ध्वनति -नितुं), क्रम्क्रणं कृ, क्रम्क्रा (nom. क्रम्क्रायते), चटचट (nom. चटचटायते).—(To talk idly) जल्प् (c. 1. जल्पति -ल्पितुं).

CLATTER, *s.* क्वणितं, स्तनितं, ध्वनितं, तुमुलं, क्रः, क्रम्क्रणं, चटचट *ind.*

CLAVATED, *a.* ग्रन्थिलः -ला -लं, पिण्डी -ण्डिनी -ण्डि (न्), गण्डवान् -वती -वत् (त्).

CLAUDICATION, *s.* (Lameness) पङ्गुता, खञ्जत्वं, गतिवैकल्यं.

CLAVICLE, *s.* जत्रु *n.*, ग्रीवास्थि *n.*, कण्ठास्थि *n.*

CLAUSE, *s.* (Division of a subject) पदं, स्थानं, मार्गः, अधिकरणं, अङ्गं, शाखा.—(Sentence) वाक्यं.—(Particular stipulation) नियमपत्राङ्गं, नियमः.

CLAUSTRAL, *a.* मठसम्बन्धी -न्धिनी -न्धि (न्), विहारसम्बन्धी &c.

CLAW, *s.* नखः, नखरः, करजः, कररुहः, पाणिः *m.*, अङ्कचन्द्रः, अर्द्धेन्दुः.

To CLAW, *v. a.* नखेन दृ (c. 10. दारयति -यितुं) or आहन् (c. 2. -हन्ति -हन्तुं) or लिख् (c. 6. लिखति, लेखितुं), नखाघातं कृ.

CLAWED, *a.* नखी -खिनी -खि (न्), नखवान् -वती -वत् (त्).

CLAY, *s.* मृक्, कर्दमः, कर्दः, मृत् *f.* (द्), मृत्तिका, जम्बालः, शादः,

निषङ्गरः, शिलीन्ध्री.

To CLAY, *v. a.* पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं); 'clayed sugar,' शार्कः -र्करः, शुक्ला, सिताखण्डः, सिता, श्वेता.

CLAYEY, CLAYISH, *a.* पङ्की -ङ्गिनी -ङ्गि (न्), पङ्किलः -ला -लं, मज्जालः -ला -लं, मार्त्तिकः -की -कं, काईमः -मी -मं, मृन्मयः -यी -यं.

CLEAN, *a.* (Free from dirt) विमलः -ला -लं, निर्म्मलः -ला -लं, अमलिनः -ना -नं, पवित्रः -त्रा -त्रं, शुद्धः -द्धा -द्धं, शुचिः -चिः -चि, परिष्कृतः -ता -तं, अकल्कः -ल्का -ल्कं, अकल्मषः -षा -षं, वीप्रः -प्रा -प्रं; 'having a clean face,' शुचिमुखः -खी -खं; 'having clean clothes,' शुद्धवासाः -साः -सः (स्); 'ceremonially clean,' स्पृश्यः -श्या -श्यं.—(Guiltless, innocent) शुचिः -चिः -चि, शुद्धमतिः -तिः -ति, अनघः -घा -घं, विमलात्मा -त्मा -त्म (न्).—(Neat, smooth) श्लक्ष्णः -क्ष्णा -क्ष्णं; 'having a clean figure,' तनुमध्यमः -मा -मं.

CLEAN, *adv.* अशेषतस्, अखिलेन, साकल्येन, सम्यक्, सामूलं.

To CLEAN, *v. a.* शुध् in caus. (शोधयति -यितुं), परिशुध्, पू (c. 9. पुनाति, पवितुं), पवित्रीकृ, धाव् (c. 10. धावयति -यितुं), प्रक्षाल् (c. 10. -क्षालयति -यितुं), मृज् (c. 2. मार्ष्टि, मार्ष्टुं), शुचीकृ, परिष्कृ; 'to clean the teeth,' दन्तान् धाव् or शुध्.

CLEANED, *p. p.* शोधितः -ता -तं, पवित्रीकृतः -ता -तं, पूतः -ता -तं, क्षालितः -ता -तं, प्रक्षालितः -ता -तं, विगतकल्मषः -षा -षं.

CLEANING, *s.* शोधनं, प्रक्षालनं, मार्जनं, पयः, निष्यावः, पावनं, विशोधित्वं, मार्ष्टिः *f.*, मृजा, मार्ज्जना *f.*—(Cleaning the teeth) दन्तशुद्धिः *f.*, दन्तधावनं.

CLEANLINESS, *s.* शुद्धता, शुद्धिः *f.*, पवित्रत्वं, शुचिता, शौचं, परिष्कृतिः *f.*, मार्ष्टिः *f.*; 'neatness,' विनीतता.

CLEANLY, *a.* पवित्रशरीरः -रा -रं or शुचिशरीरः, शुद्धदेहः -हा -हं, मृष्टकायः -या -यं, निर्म्मलः -ला -लं, विनीतः -ता -तं; 'in dress,' शुद्धवासाः -साः -सः (स्).

CLEANLY, *adv.* शुचि, प्रवित्रं, निर्म्मलं, विनीतं, शुद्धप्रकारेण.

CLEANNESS, *s.* शुचिता, शौचं, निर्म्मलत्वं, वैमल्यं, शुद्धत्वं, शुद्धिः *f.*, विशुद्धिः *f.*, परिष्कारः, वेशद्यं, अकल्कता.—(Innocence) शुद्धिः *f.*

To CLEANSE, *v. a.* शुध् in caus. (शोधयति -यितुं), परिशुध्, विशुध्, संशुध्, पू (c. 9. पुनाति -नीते, पवितुं), परिपू, विपू, प्रक्षाल् (c. 10. -क्षालयति -यितुं), धाव् in caus. (धावयति -यितुं), प्रधाव्, निर्णिज् (c. 3. -नेनेक्ति -नेक्तुं), मृज् (c. 1. मार्जति, c. 2. मार्ष्टि, मार्ष्टुं), सम्मृज्, पवित्रीकृ, शुचीकृ, परिष्कृ.—(From dust) नीरजीकृ.

CLEANSED, *p. p.* पूतः -ता -तं, पवित्रः -त्रा -त्रं, पावित्रः -त्रा -त्रं, शोधितः -ता -तं, मार्ज्जितः -ता -तं, प्रक्षालितः -ता -तं, निर्णिक्तः -क्ता -क्तं, मृष्टः -ष्टा -ष्टं, परिष्कृतः -ता -तं, अनवस्करः -रा -रं, धौतः -ता -तं, निर्धौतः -ता -तं, शुचीकृतः -ता -तं, पवित्रीकृतः -ता -तं, निःशोध्यः -ध्या -ध्यं.

CLEANSER, *s.* प्रक्षालकः, निर्णेजकः, शोधकः, सम्मार्जकः; पावकः.

CLEANSING, *s.* शोधनं, शुद्धिः *f.*, पावनं, मार्ष्टिः *f.*, मार्जनं, प्रक्षालनं, निर्णेकः प्रलेपकर्म्मणं.

CLEAR, *a.* (Bright transparent) प्रसन्नः -न्ना -न्नं, विशदः -दा -दं, विमलः -ला -लं, निर्म्मलः -ला -लं, अमलः -ला -लं -लिनः -ना -नं, अच्छः -च्छा -च्छं, स्वच्छः -च्छा -च्छं, शुद्धः -द्धा -द्धं or विशुद्धः, स्फटिकप्रभः -भा -भं, दीप्रः -प्रा -प्रं.—(Serene, as the sky) वितिमिरः -रा -रं, अनभः -भा -भं, निरभः -भा -भं, व्यभः -भा -भं, गततोयदः -दा -दं; 'as the mind,' प्रसन्नः -न्ना -न्नं.—(Indubitable) निःसन्देहः -हा -हं.—(Evident) व्यक्तः -क्ता -क्तं or प्रव्यक्तः or अभिव्यक्तः, स्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, प्रत्यक्षः -क्षा -क्षं, सुप्रकाशः -शा -शं.—(Intelligible, perspicuous) स्पष्टार्थः -र्था -र्थं, भिन्नार्थः -र्था -र्थं, सुगम्यः -म्या -म्यं, सुग्राह्यः -ह्या -ह्यं.—(A clear understanding) विशुद्धबुद्धिः, शुद्धधीः.—(Innocent) शुद्धः -द्धा -द्धं, शुचिः -चिः -चि, अदूषदोषः -षा -षं.—(Out of debt) अनृणः -णा -णं.—(Sounding distinctly) पटुस्वरः -रा -रं, उच्चैःस्वरः -रा -रं.—(Open, free from trees, &c.) तरुगुल्मविविक्तः -क्ता -क्तं, निष्कण्टकः -का -कं, निर्वैनः -ना -नं; 'a clear space,' विविक्तता.—(Entire, free from deductions) अशेषः -षा -षं, निरवशेषः -षा -षं, अभग्नः -ग्ना -ग्नं, निरुद्धारः -रा -रं.—(Unobstructed) असम्बाधः -धा -धं, निर्विघ्नः -घ्ना -घ्नं.

To CLEAR, *v. a.* (Make bright or clean) शुध् in caus. (शोधयति -यितुं), प्रसद् in caus. (-सादयति -यितुं), प्रसन्नीकृ, निर्म्मलीकृ, विमल (nom. विमलयति -यितुं), मृज् (c. 2. मार्ष्टि, मार्ष्टुं).—(Explain) व्याख्या (c. 2. -ख्याति -ख्यातुं), स्पष्टीकृ, व्यक्तीकृ, प्रत्यक्षीकृ, बुध् in caus. (-बोधयति -यितुं), परिशुध् in caus.—(Liquidate) शुध् in caus., संशुध्, अपाकृ, विनी (c. 1. -नयते -ति -नेतुं). ✓(Clear a doubt) संशयम् अपनी.—(Free from incumbrances, &c.) विशुध् in caus., मुच् (c. 6. मुञ्चति, मोक्तुं), विप्रा विनी or हृ (c. 1. हरति, हर्त्तुं) or नश् in caus. (नाशयति -यितुं), निर्विघ्नं -घ्नां -घ्नं कृ, निष्कण्टकं -कां -कं कृ.—(Gain) निरवशेषं लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति -आप्तुं).—(Justify) परिशुध् in caus., विशुध् in caus.; 'he clears himself,' आत्मानं निर्दोषं करोति.—(Clear the throat) उत्कासनं कृ.—(Purge) रिच् (c. 7. रिणक्ति, रेक्तुं), विरिच्.

To CLEAR, *v. n.* (Grow bright) विमलीभू, शुचि (nom. शुचीयते); 'as the weather,' निरभ्रीभू, गततोयदीभू.

CLEARANCE OF CLEARING, *s.* शुद्धिः *f.*, विशुद्धिः *f.*, शोधनं, विशोधित्वं; 'clearance of a debt,' ऋणशोधनं, ऋणापाकरणं; 'of a grudge,' वैरशोधनं.—(Certificate from the custom-house) शुल्काध्यक्षमकाशात् शोधनपत्रं.

CLEARED, *p. p.* शोधितः -ता -तं, प्रसादितः -ता -तं, निर्म्मलीकृतः -ता -तं, रेचितः -ता -तं; 'as the weather,' गततोयदः -दा -दं.

CLEARER, *s.* शोधकः, प्रसादनः; 'of obstacles,' विघ्नशोधकः, विघ्नविनायकः.

CLEARLY, *adv.* (Plainly, evidently) व्यक्तं, सुव्यक्तं, स्पष्टं, प्रत्यक्षतस्, प्रत्यक्षेण, स्फुटं, स्पष्टरूपेण.—(Intelligibly) स्पष्टार्थं, भिन्नार्थं.—(Brightly) विमलं, प्रसन्नं, विशदं.—(Candidly) सरलं, दाक्षिण्येन.

CLEARNESS, *s.* (Brightness, transparency) प्रसादः, प्रसन्नता, निर्म्मलत्वं, वैमल्यं, नैर्म्मल्यं, शुद्धत्वं, शुद्धिः *f.*, स्वच्छता, वेशद्यं, दीप्तिः *f.*, प्रभा.—(Distinctness, plainness) स्पष्टता, व्यक्तत्वं, प्रत्यक्षत्वं, स्फुटता, भिन्नार्थत्वं.

CLEAR-SIGHTED, *a.* विवेकदृष्टा -ष्टा -ष्टि (न्), शुद्धदृष्टिः -ष्टिः -ष्टि, शुद्धधीः -धीः -धि, तीक्ष्णदृष्टिः -ष्टिः -ष्टि, दूरदर्शी -र्शिनी -र्शि (न्), सम्भेत्तृ -त्रा -त्रं.

CLEAR-SIGHTEDNESS, *s.* शुद्धदृष्टिः *f.*, विवेकदृष्टित्वं, तीक्ष्णदृष्टिः *f.*, दूरदृष्टिः.

To CLEAR-STARCH, *v. a.* गोधूमसम्भवादिमान्द्रद्रव्यप्रक्षेपेण वस्त्रादि धावयित्वा स्तब्धीकृ or दृढीकृ.

CLEAR-STARCHER, *s.* गोधूमसम्भवादिमान्द्रद्रव्यप्रक्षेपेण वस्त्रधावकः.

CLEAR-STARCHING, *s.* पूर्व्वोक्तमान्द्रद्रव्यप्रक्षेपेण वस्त्रधावनं.

To CLEAVE, *v. n.* (To adhere) सञ्ज् in pass. (सज्यते or सज्जते), अनुषञ्ज्, आसञ्ज्, ससञ्ज्, अनुबन्ध् (c. 9. -बध्नाति -बन्धुं), संयुज् in pass. (-युज्यते), संलग्नीभू, अनुलग्नीभू.—(Divide in two parts) स्फुट् (c. 1. स्फोटति, c. 6. स्फुटति -टितुं), दल् (c. 1. दलति -लितुं), विदल्; विदृ in pass. (-दीर्य्यते), भिद् in pass. (भिद्यते), फल् (c. 1. फलति -लितुं).

To CLEAVE, *v. a.* (To divide with violence) भिद् (c. 7. भिनत्ति.

भिन्ने. भेक्तुं), विभिद्, निर्भिद्, or in caus. (भेदयति भेदयितुं), पट् (c. 10. पाटयति -यितुं), विपद्, दृ (c. 9. दृणाति, दरितुं -रीतुं or in caus. दारयति -यितुं), विदृ, अवदृ, दल् in caus. (दालयति, दलयति -यितुं), विदल्, विदलीकृ.

Cleaver, *s.* (One who cleaves) भेत्ता *m.* (तृ), भेदकः, दारकः.—(A chopping-knife) मांसच्छेदनार्थं क्षुरिका, मांसभेदी *m.* (न्), मांसभिद् *f.*, क्षिदिः *f.*

Cleef, *s.* (In music) गन्धर्वविद्यायां वादीभूचनार्थं चिह्नं.

Cleft, *s.* दरी -रा, टङ्कः. सन्धिः *m.*, भेदः, विदीर्णं.

Cleft or cloven, *a.* भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, विदारितः -ता -तं, विदीर्णः -र्णा -र्णं, विदलितः -ता -तं, विदलः -ला -लं -लीकृतः -ता -तं. दलितः -ता -तं.

Clemency, *s.* कृपा, दया, क्षमा, कारुण्यं, अनुकम्पा, अनुक्रोशः, घृणा, प्रसादः, दयालुता.

Clement, *a* दयालुः -लुः -लु, कृपालुः -लुः -लु, दयाशीलः -ला -लं, वत्सलः -ल -लं, मृदुः -दुी -दु, कारुणिकः -की -कं, सानुकम्पः -म्पा -म्पं, करुणार्द्रः -द्रा -द्रं, हृदयालुः -लुः -लु.

Clench. *See* Clinch.

Clergy, *s.* पौरोहित्यं, पुरोहितवर्गः, पुरोहितसमूहः, धर्म्माध्यापकानां समवायः.

Clergyman, *s.* पुरोहितः, धर्म्माध्यापकः, धर्म्मोपदेशकः, धर्म्मप्रचारकः, धर्म्मदर्शकः. धर्म्मप्रवक्ता *m.* (क्तृ), याजकः.

Clerical, *a.* पौरोहितः -ती -तं, याजकीयः -या -यं, धर्म्मोपदेशविषयः -या -यं, पौरोहित्यमम्बन्धी -न्धिनी -न्धि (न्).

Clerk, *s.* (Man employed as a writer) कायस्थः, लेखकः, लिपिकरः, समिपगयः.—(Accountant) गणनाध्यक्षः.—(Scholar) विद्वान् *m.* (स्), पण्डितः, कृतविद्यः, ज्ञानी *m.* (न्).—(Clergyman) पुरोहितः, धर्म्माध्यापकः.—(Assistant of a clergyman) उपपुरोहितः, पुरोहितसहायः.

Clerkship, *s.* कायस्थता, कायस्थ्यं, कायस्थकर्म्म *n.* (न्).—(Scholarship) पाण्डित्यं.

Clever, *a.* चतुरः -रा -रं, पटुः -टुः -टु, दक्षः -क्षा -क्षं, अभिज्ञः -ज्ञा -ज्ञं, विचक्षणः -णा -णं, निपुणः -णा -णं, निपुणमतिः -तिः -ति, कुशलः -ला -लं, वैज्ञानिकः -की -कं, सुप्रयोगवान् -वती -वत् (न्), योग्यः -ग्या -ग्यं, दक्षः -क्षा -क्षं, विशारदः -दा -दं, पेशलः -ला -लं, विपश्चित् *m. f. n.*, पण्डितः -ता -तं, कृती -तिनी -ति (न्), विदग्धः -ग्धा -ग्धं, प्रवीणः -णा -णं, कल्याणबुद्धिः -द्धिः -द्धि.

Cleverly, *adv.* चतुरं, चातुर्य्येण, सपाटवं, निपुणं, दाक्ष्येण.

Cleverness, *s.* चातुर्य्यं, चतुरता, नैपुण्यं, कुशलता, कौशल्यं, पटुत्वं, पाटवं, दाक्ष्यं, दाक्षिण्यं, प्रवीणता, प्रावीण्यं, सुप्रयोगता, वैचक्षण्यं, विदग्धता, वैदग्ध्यं, योग्यता, मतिप्रकर्षः, निर्देश *m.* (ष्), उद्देशकः.

Clew or clue, *s.* (A ball of thread) सूत्रकोषः -षं.—(A guide) मूत्रं, गहनमार्गनिर्गमोपायः, दर्शकः.

To clew, *v. a.* रज्जुद्वारेण नौकावसनम् उत्सृ (c. 1. -सरति -सर्तुं, c. 10. सारयति -यितुं) यदनन्तरं वसनसंवरणं कर्त्तुं शक्यते.

To click, *v. n.* टं टं पट पट कट कट चित् चित् इत्यादिशब्दान् कृ, पटपट (nom. पटपटायते).

Client, *s.* (Dependent) आश्रितः, संश्रितः, अधीनः, आयत्तः, उपजीवी *m.* (न्), भाक्तिकः, अनुगतः, प्रत्याशी *m.* (न्).—(One who applies to an advocate for counsel) स्वार्थनिर्व्वाहणहेतोर् व्यवहारसचिवसंश्रितः.

Clientship, *s.* अधीनता, आयत्तत्वं, व्यवहारसचिवसंश्रितस्य दशा.

Cliff, *s.* प्रपातः, दरट *f.*, पातुकः, विषमं, अतटः. भृगुः *m.*, समुद्रवेलायां पातुकभूमिः.

Climacter or climacteric, *s.* शरीरविकारपरिणामो विशेषवत्सरपर्य्यायः, शरीरविकारानां वर्षचक्रं.

Climate or clime, *s.* (A region) देशः, प्रदेशः, दिक् *f.* (श्), राष्ट्रं, आशा.—(Temperature) जलवायुः, जलाकाशः, व्योम *n.* (न्), आकाशः, वायुगुणः.

Climax, *s.* सारं, क्रमशो वृद्धिः *f.*, ऊर्द्ध्वगमनं, उत्तरोत्तरवृद्धिः *f.*

To climb, *v. a.* आयासेन आरुह (c. 1. -रोहति -रोढुं), अध्यारुह, अभिरुह; अधिक्रम् (c. 1. -क्रामति -क्रमितुं) or अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं).

To climb, *v. n.* ऊर्द्धं or ऊर्द्धे or उपरि गम् (c. 1. -गच्छति -गन्तुं).

Climber, *s.* आरोही *m.* (न्), अधिरोही *m.* (न्), आरोढा *m.* (ढृ).—(Plant) वल्लिः *f.*

Clime, *s.* (Region) देशः, प्रदेशः.—(Temperature) जलवायुः *m.*, जलाकाशः.

To clinch or clench, *v. a.* (Grasp) दृढमुष्टिना सङ्गृह् (c. 9. -गृह्णाति -ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं), मुष्टिसङ्ग्राहणं पीड् (c. 10. पीडयति -यितुं); 'to clinch the fist,' मुष्टिं बन्ध् (c. 9. बध्नाति, बन्द्धुं), मुष्टिबन्धं or सङ्घातं कृ.—(Confirm) दृढीकृ, स्थिरीकृ, दृढप्रमाणं दा (c. 3. ददाति, दातुं).—(Fix the point of a nail on the other side) कीलाग्रं पराग् आवर्त्य विपरीतभागे निखन् (c. 1. -खनति -नितुं).

Clinch, *s.* (A pun) द्व्यर्थवाक्यं, श्लेषवाक्यं, श्लेषः.

Clincher, *s.* (A hold-fast) बन्धनकीलः, कीलकः, बन्धनी -ना.

To cling, *v. n.* अवलस्, (c. 1. -लसते -सितुं), समालस्, संलग्नीभू, अनुलग्नीभू, अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं or in pass. -बध्यते), सञ्ज् in pass. (सज्यते or सज्जते), अनुषञ्ज्, आसञ्ज्, प्रसञ्ज्, संसञ्ज्, ली (c. 4. लीयते, लेतुं); 'clinging to the neck,' कण्ठलग्नः -ग्ना -ग्नं.

Clingy, *a.* अनुलग्नशीलः -ला -लं, संलग्नशीलः -ला -लं, अनुषङ्गिकः -की -कं.

Clinic or clinical, *a.* अचिकित्स्यरोगोपहतत्वात् शयनात् समुत्थातुम् अक्षमः, शय्यागतः; 'clinical lecture,' दुश्चिकित्स्यव्याधियस्तस्य शयनोपाने चिकित्साविद्यार्थिनां रोगोपचारोपदेशः.

To clink, *v. n.* शिञ्ज् (c. 2. शिञ्जं, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), किङ्किण् (nom. किङ्किणायते), किरु (c. 2. -रौति -रवितुं).

Clink, *s.* शिञ्जितं, आशिञ्जितं, क्वणितं, किङ्किणिशब्दः, घर्घरारवः.

Clinquant, *a.* हेमरत्नभूषितः -ता -तं, अलङ्कारिष्णुः -ष्णुः -ष्णु.

To clip, *v. a.* (Embrace, hug) गाढम् आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), बाहुभ्यां परिष्वञ्ज् (c. 1. -ष्वजते -ष्वङ्क्तुं) or उपगुह् (c. 1. -गूहति -गूहितुं).—(Shear) आवप् in caus. (-वापयति -यितुं), परिवप्, मुण्ड् (c. 1. मुण्डति -ण्डितुं).—(Cut off) छिद् (c. 7. छिनत्ति, छेत्तुं), लू (c. 9. लुनाति, लवितुं), निकृत् (c. 6. -कृन्तति -कर्त्तितुं).—(Shorten) ह्रस् in caus. (ह्रासयति -यितुं), संक्षु (c. 1. -हरति -हर्त्तुं).

Clipped, *p. p.* छिन्नः -न्ना -न्नं, लूनः -ना -नं, क्लृप्तः -प्ता -प्तं, तप्तः -प्ता -प्तं, परिवापितः -ता -तं, कृतवापः -पा -पं, यमितः -ता -तं.

Clipper, *s.* (Debaser of coin) वञ्चकः.—(Barber) मुण्डी *m.* (न्).

Clipping, *s.* विदलं, छिन्नं, भिन्नं, लूनं, खण्डं.

Clitoris, *s.* योनिलिङ्गं, भगाङ्कुरः, स्मरच्छदं.

Cloak, *s.* प्रावारः -रकः, आवारः, पिधानं, प्रच्छदपटः, नीशारः. *See* Cloke.

To cloak, *v. a.* प्रावृ (c. 5. -वृणोति -वरितुं -रीतुं), छद् (c. 10. छादयति -यितुं).

Cloak-bag, *s.* प्रावारादिगात्रीयवस्त्रवाहनार्थं कोषः, वस्त्रकोषः.

Clock, *s.* घटी, घण्टः, यामघोषा, यामनाली.—(Of a stocking) पादाच्छादनपार्श्वयोः सूचिकर्म्म *n.* (न्).

Clockmaker, *s.* घटीकर्त्ता *m.* (र्त्तृ), घटीकारः, घण्टकृत्, घण्टविक्रेता *m.* (तृ).

CLOCKMAKING, *s.* घटीनिर्म्माणं, ङन्दकरणं, घटीनिर्म्माणशिल्पं.

CLOCKWORK, *s.* घटीकर्म्म *n.* (न्), घटीक्रिया, स्वचेष्टितकर्म्म, स्वसञ्चारितकर्म्म.

CLOD, *s.* (A lump of earth) लोष्टः -ष्टः -ष्टुः *m.*, मृल्लोष्टं, लेष्टुः *m.*, क्षितिखण्डः, दलनी, दलिः *m.* -लौ; 'clod-crusher,' लोष्टमर्द्दी *m.* (न्).—(A lump of any thing) पिण्डः -ण्डं.

CLODDY, *a.* लोष्टमयः -यी -यं, लोष्टपूर्णः -र्णा -र्णं, मार्त्तिकः -की -कं.

CLODPATE, or CLODPOLL, or CLODHOPPER, *s.* जडः, स्थूलबुद्धिः *m.*, मूढः.

To CLOG, *v. a.* (To shackle) शृङ्खलया or निगडेन बन्ध् (c. 9. बध्नाति बन्धुं), शृङ्खल (nom. शृङ्खलयति -यितुं), पाश (nom. पाशयति -यितुं), पाशीकृ, योक्त्र (nom. योक्त्रयति -यितुं).—(To hinder) संयम् (c. 1. -यच्छति -यन्तुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), विघ्न (nom. विघ्नयति -यितुं), रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, अवरुध्; प्रतिबन्ध्.

CLOG, *s.* (A shackle) शृङ्खला, पादपाशी, पाशः, निगडः, बन्धनं, अनुबन्धः.—(Any hindrance) विघ्नः, अन्तरायः, व्याघातः, प्रतिबन्धः, विघ्नम्भः, बाधा, प्रतिरोधः.—(A wooden shoe) काष्ठपादुका, उन्नतपादुका.

CLOGGED, *p. p.* संयमितचरणः -णा -णं, शृङ्खलितः -ता -तं, सशृङ्खलः -ला -लं, निगडितः -ता -तं, शृङ्खलाबद्धः -द्धा -द्धं, प्रतिरुद्धः -द्धा -द्धं, विघ्नितः -ता -तं.

CLOGGY, *a.* प्रतिबन्धकः -का -कं, प्रतिरोधी -धिनी -धि (न्), विघ्नकरः -री -रं.

CLOISTER, *s.* मठः, विहारः, सन्यासिनां मठः, मुनिस्थानं, मुनिशाला, मौनिगृहं.—(Piazza) एकपार्श्वे वायुच्छाप्तो विहारयोग्यश्च छन्नपथः.

To CLOISTER, *v. a.* सन्यासिनां मठे or मुनिशालायां प्रविश् in caus. (-वेशयति -यितुं).

CLOISTERAL, *a.* मठसम्बन्धी -न्धिनी -न्धि (न्), विविक्तसेवी -विनी -वि (न्).

CLOISTERED, *a.* मठप्रवेशितः -ता -तं, पृष्ठीकृतच्छन्नपथधारी -रिणी -रि (न्).

CLOISTERER, *s.* सन्यासी *m.* (न्), वानप्रस्थः, मठवासी *m.* (न्), मुनिः *m.* मौनी *m.* (न्).

CLOISTERESS, *s.* धर्म्मभगिनी, सन्यासिनी, धर्म्मचारिणी, मठवासिनी.

CLOKE, *s.* प्रावारः, उत्तरीयं, गात्रीयवस्त्रं, आच्छादनवस्त्रं. *See* CLOAK.

To CLOSE, *v. a.* (Shut) पिधा (c. 3. -दधाति -धातुं), अपिधा. तिरोधा; संवृ (c. 1. -वृणोति -वर्त्तुं); 'they closed the doors,' द्वाराणि पिदधुः.—(Shut up) निरुध् (c. 7. -रुणद्धि -रोद्धुं).—(Finish) समाप् in caus. (-आपयति -यितुं), अवसो (c. 4. -स्यति -सातुं), निवृत् in caus. (-वर्त्तयति -यितुं), साध् (c. 10. साधयति -यितुं), निष्पद् in caus. (-पादयति -यितुं), सम्पद्.—(Close in) परिवेष् (c. 1. -वेष्टते -ष्टितुं).—(Close the eyes) मील् (c. 1. मीलति -लितुं), निमील्, or in caus. (मीलयति -यितुं), निमिष् (c. 6. -मिषति -मेषितुं).—(Close the mouth) मुखं पिधा.—(Close the hands) हस्तौ बन्ध् (c. 9. बध्नाति, बन्धुं) or संहन् (c. 2. -हन्ति -हन्तुं), हस्तपुटितौ कृ.—(Close a book) पुस्तकं बन्ध्.

To CLOSE, *v. n.* (Coalesce) मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, संयुज् in pass. (-युज्यते), संश्लिष् in pass. (-श्लिष्यते), सङ्गम् (c. 1. -गच्छति -गन्तुं).—(Close with in fight) बाहूबाहवि or हस्ताहस्ति युध् (c. 4. युध्यते, योद्धुं), बाहुयुद्धे सङ्गम्.—(Close with, come to an agreement) सङ्गद् (c. 1. -द्गदते -द्गदितुं), संविदम् उपगम्, संविदा निष्पत्तिं कृ, सन्धा (c. 3. -धत्ते -धातुं).—(Come to an end) समाप् in pass. (-आप्यते), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरम् (c. 1. -रमते -रन्तुं), निष्पद् in pass. (-द्यते), विगम् (c. 1. -गच्छति -गन्तुं).

CLOSE, *s.* (Place enclosed) वाटः -टिका, वृतिः *f.*—(Conclusion) अवसानं, अवसायः, लायः, क्षयः, अन्तं, पर्य्यन्तं, शेषः, निवृत्तिः *f.*, समाप्तिः *f.*, पर्य्यवसानं, निष्पत्तिः *f.*, आलयः, निधनं, सातिः *f.*, विरामः, उपरमः, उपसंहारः; 'close of day,' दिवसान्तयः, दिवावसानं, सन्ध्याकालः, दिनान्तसमयः, सूर्य्यास्तकालः, सायाह्नः.

CLOSE, *a.* (Shut fast) संवृतः -ता -तं, बद्धः -द्धा -द्धं, दृढबद्धः -द्धा -द्धं.—(Confined, contracted) सङ्कटः -टा -टं, सङ्बाधः -धा -धं, सङ्कुचितः -ता -तं, अविस्तृतः -ता -तं, श्लिष्टः -ष्टा -ष्टं.—(Firm) गाढः -ढा -ढं, दृढः -ढा -ढं.—(Solid, dense, without interstices) घनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, अविरलः -ला -लं, निरन्तरः -रा -रं -रालः -ला -लं, अनन्तरः -रा -रं, निविडः -डा -डं, दृढसन्धिः -न्धिः -न्धि, निश्छिद्रः -द्रा -द्रं.—(Concise) संक्षिप्तः -प्ता -प्तं, साङ्क्षेपिकः -की -कं.—(Contiguous) समीपः -पा -पं, निकटः -टा -टं, सन्निकृष्टः -ष्टा -ष्टं, आसन्नः -न्ना -न्नं, पार्श्वगतः -ता -तं, पार्श्वस्थः -स्था -स्थं, उपस्थः -स्था -स्थं, उपान्तः -न्ता -न्तं 'close to the ear,' कर्णान्तिकः -का -कं, उपकर्णं.—(Intimate, on terms of close friendship) दृढसौहृदः -दी -दं, परिचितः -ता -तं.—(Reserved) वाग्यतः -ता -तं.—(Retired) विविक्तः -क्ता -क्तं.—(Attentive) निविष्टः -ष्टा -ष्टं or अभिनिविष्टः, आसक्तः -क्ता -क्तं, एकायः -या -यं.—(Without air) निर्वातः -ता -तं.—(Secret) गुप्तः -प्ता -प्तं.—(Niggardly) स्वल्पव्ययी -यिनी -यि (न्), कृपणः -णा -णं; 'close attendance,' सान्निध्यं; 'close proximity,' अनन्तरं; 'close fight,' नियुद्धं, बाहुयुद्धं, रणसङ्कुलं, तुमुलं; 'close study,' निरन्तराभ्यासः, अभिनिवेशः.

CLOSED, *p. p.* (Shut) बद्धः -द्धा -द्धं, संवृतः -ता -तं, पिहितः -ता -तं, पिधानवान् -वती -वत् (त्), सपिधानः -ना -नं, मुद्रितः -ता -तं.—(As a bud) मुकुलीकृतः -ता -तं, अविकचः -चा -चं.—(As the eye) निमीलितः -ता -तं; 'with closed eye,' निमीलितनयनः.—(Settled, finished) निष्पन्नः -न्ना -न्नं, समाप्तः -प्ता -प्तं; 'with closed hands,' बद्धाञ्जलिः, संश्लिष्टाभ्यां पाणिभ्यां.

CLOSE-FISTED or CLOSE-HANDED, *a.* दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः -ष्टिः -ष्टि, बद्धमुष्टिः -ष्टिः -ष्टि, अमुक्तहस्तः -स्ता -स्तं.

CLOSELY, *adv.* (Secretly) निभृतं, गुप्तं, सुनिभृतं, सुगुप्तं, रहसि.—(Nearly) निरन्तरं, अनन्तरं, सन्निकृष्टं, उपान्ते.—(Attentively) मनःप्रवेशेन, प्रयत्नात्.—(Firmly) गाढं, दृढं; 'closely attentive,' निविष्टः -ष्टा -ष्टं, आसक्तः -क्ता -क्तं, एकायः -या -यं, एकायनः -ना -नं, अनन्यवृत्तिः -त्तिः -त्ति, एकतानः -ना -नं.

CLOSENESS, *s.* (Nearness) समीपता, आनन्तर्य्यं, सान्निध्यं, उपस्थानं, नैकट्यं, सन्निकर्षः, अभ्यासत्वं.—(Secrecy) रहः *n.* (स्), गुप्तिः *f.*, सुगुप्तिः *f.*, गुप्तता, गूढत्वं.—(Compactness) घनता, सान्द्रता, नैविड्यं, नैरन्तर्य्यं.—(Parsimony) स्वल्पव्ययः, कार्पण्यं.—(Want of air) निर्वातता.

CLOSE-STOOL, *s.* शयनोपाने विण्मूत्राधारः, शयनपार्श्वस्थं मूत्रपुरीषभाजनं.

CLOSET, *s.* कुटिः, कुटी, आगारं, कोष्ठः, निभृतागारं, गोपनागारं.

To CLOSET, *v. n.* कुट्यां निविश् in caus. (-वेशयति -यितुं) or गुप् (c. 1. गोपायति, गोतुं).

CLOSURE, *s.* पिधानं, वेष्टनं, आवेष्टनं, प्रावरणं, प्रावृतिः *f.*

CLOT, *s.* गुल्मः, पिण्डः -ण्डं, घनता; 'clot of blood,' रक्तगुल्मः, घनलोहितं: 'of hair,' जटा.

To CLOT, *v. n.* सान्द्रीभू, घनीभू.—(As hair) जट् (c. 1. जटति -टितुं). श्यै (c. 1. श्यायते, श्यातुं), पिण्डीभू.

CLOTH, *s.* पटः, वस्त्रं, वासः, वासस् *n.* (स्), वसनं, चेलः -लं, चैलं, अंशुकं, मृगरोमजम् आच्छादनं, प्रोतं; 'fine cloth,' सुचेलकः, अंशुकं; 'coarse cloth,' स्थूलशाटकः, वराशिः *m.*; 'tattered cloth,' कर्पटः.—(Made of cloth) वास्त्रः -स्त्री -स्त्रं, वस्त्रमयः -यी -यं.—(Table-cloth) भोजनाधारपटः, फलकाच्छादनं.

To CLOTHE, *v. a.* वेष् (c. 1. वेष्टते -ष्टितुं), परिवेष्, प्रवेष्; आच्छद् (c. 10.

-छादयति -यितुं), वस् in caus. (वासयति), विवस्, प्रतिवस्, परिधा in caus. (-धापयति -यितुं), प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं), मज्जे (c. 1. -ज्यति -ज्यातुं), वस्त्र (nom. वस्त्रयति -यितुं); 'to clothe one's self,' वस् (c. 2. वस्ते वसितुं), प्रवस्, विवस्; परिधा (c. 2. -धत्ते -धातुं); 'in armour,' सन्नह् (c. 4. -नह्यते -नद्धुं).

Clothed, *p. p.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, प्रावृतः -ता -तं, संवीतः -ता -तं, परिहितः -ता -तं, वेष्टितः -ता -तं, पिनद्धः -द्धा -द्धं, आमुक्तः -क्ता -क्तं, प्रतिमुक्तः -क्ता -क्तं, वासी -सिनी -सि (न्), वेशी -शिनी -शि (न्), वस्त्रान्वितः -ता -तं, सवासाः -सा: -सः (स्), सचेलः -ला -लं, अनग्नः -ग्ना -ग्नं.

Clothes, *s. pl.* वस्त्रं, वासः *n.* (स्), वेशः, वसनं, प्रसाधनं, परिधानं, अम्बरं, संव्यानं, आच्छादः -दनं, सिचयः; 'a suit of clothes,' वस्त्रयुग्मं; 'old clothes,' जीर्णवस्त्रं, चीरं, प्रोथः; 'relating to clothes,' वास्त्रिकः -की -कं; 'clothes basket,' तरिः *f.*; 'bed-clothes,' शय्यास्तरणं; 'to put on one's clothes,' वस्त्राणि आच्छद् (c. 10. -छादयति -यितुं) or प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं) or परिधा (c. 3. -धत्ते -धातुं) or प्रमाष् (c. 10. -माषयति -यितुं) or आमुच् (c. 6. -मुञ्चति -मोक्तुं); 'to take off one's clothes,' वस्त्राणि अवतॄ in caus. (-तारयति -यितुं) or अवमुच् or उच्छद् or विहा (c. 3. -जहाति -हातुं); 'to change one's clothes,' अन्यवस्त्रं परिधा, निवस् (c.2. -वस्ते -वसितुं).

Clothier, *s.* पटकारः, वस्त्रकृत, पटनिर्म्माणकृत, पटनिर्म्माणोपजीवी *m.* (न्).

Clothing, *s.* परिधानं, प्रवारः, प्रच्छादनं, आच्छादनं, परिच्छदः; 'underclothing,' अधोवसनं, अन्तर्वासः *n.* (स्), अन्तरीयं.

Clotpoll, *s.* जडः, मूढः, स्थूलबुद्धिः *m.*, मूर्खः, बर्ब्बरः.

Clotted or clotty, *a.* पिण्डीभूतः -ता -तं, पिण्डितः -ता -तं, गुल्मी -ल्मिनी -ल्मि (न्), घनीभूतः -ता -तं, श्यानः -ना -नं; 'blood,' घनलोहितं, रक्तगुल्मः; 'clotted hair,' जटिः, जुटकं, जूटः.

Cloud, *s.* अभ्रं, मेघः, घनः, पर्জ্জन्यः, बलाहकः, जीमूतः, वृष्टिमान् *m.* (त्), जलधरः, तोयधरः, पयोधरः, धाराधरः, नीरधरः, जलदः, पयोदः, वारिदः, नीरदः, पाथोदः, अम्भोदः, जलवाहः, वारिवाहः -हनः, तोयवाहः, असुवाहः, असुभृत्, शक्रवाहनः, वारित्स्करः, पयोजन्मा *m.* (न्), जलमुक् *m.* (च्), वारिमुक् *m.* (च्) or वार्मुक्, पयोमुक् *m.* (च्), वारिरः, पक्षितोयशयः, तडित्वान् *m.* (त्), स्तनयित्नुः *m.*, धूमयोनिः *m.*, व्योमधूमः, नभोधूमः, जलमसिः *m.*, वारिमसिः *m.*, नीलाभः, खचरः, नभश्चरः, गगनाध्वजः, नभोदुहः, नभोगजः, देवः, पारणः, वामयः, मुदिरः, दर्दुरः, उरणकः, नभाट् *m.* (ज्); 'a black cloud,' नीलाभः *m.*, अम्बिताभं, कालिका; 'a gathering of clouds,' घनजालं, जलदसंहतिः *f.*, घनौघः; 'a succession of clouds,' मेघमाला, कादम्बिनी; 'a cloud of dust,' रजोमेघः, धूलीपटलः.

To cloud, *v. a.* अभ्रं कृ, मेघं कृ, तिमिर (nom. तिमिरयति -यितुं), प्रच्छद् (c. 10. -छादयति -यितुं), तिमिरीकृ, मलिनीकृ.

To cloud, *v. n.* मेघावृतः -ता -तं भू, मेघालन्नः -न्ना -न्नं भू, अभ्र (nom. अभ्रायते), मेघ (nom. मेघायते).

Clouded, *p. p.* मेघलन्नः -न्ना -न्नं, घनोपरुद्धः -द्धा -द्धं, दुर्दिनग्रस्तः -स्ता -स्तं, सन्तमसः -सा -सं, तमोवृतः -ता -तं, मलिनः -ना -नं, मलिनप्रभः -भा -भं.

Cloud-capt, *a.* अभ्रशेखरः -रा -रं, असिताभ्रशेखरः -रा -रं, अभ्रंलिहः -हा -हं, नभोलिह (ह्).

Cloudily, *adv.* साभ्रं, समेघं, तिमिरं, सान्धकारं, निगूढार्थं.

Cloudiness, *s.* साभ्रता, मेघाकीर्णता, मेघतिमिरं, जलदसंहतिः *f.*, दुर्दिनं.

Cloudless, *a.* अनभः -भा -भं, व्यभः -भा -भं, निरभः -भा -भं, अमेघः -घा -घं, गततोयदः -दा -दं, वितिमिरः -रा -रं.

Cloudy, *a.* साभ्रः -भ्रा -भ्रं, अभ्रियः -य्या -र्यं, मेघाकीर्णः -र्णा -र्णं, नीरदी -दिनी -दि (न्), समेघः -घा -घं, सघनः -ना -नं, दार्दुरः -री -रं; 'cloudy weather,' दुर्दिनं.—(Dark, obscure) तिमिरः -रा -रं, तमस्वी -स्विनी -स्वि (न्), तमोवृतः -ता -तं, तामसः -सी -सं, अन्धकारयुक्तः -क्ता -क्तं.

Clough, *s.* (Cleft of a hill) दरी -रिः *f.*, दरद्, कन्दरः -री -रं.—(An allowance of two in every hundred) शते शते पञ्चाशत्तमभागदानं.

Clove, *s.* (The spice) लवङ्गं, तीक्ष्णपुष्पं, मादनं, देवकुसुमं, दिव्यगन्धं, वाःपुष्पं, श्रीः, श्रीमंडं, सुपुष्पं, भृङ्गारं, वश्यं, शृङ्गारं, चन्दकपुष्पं.—(The clove tree) लवङ्गः, तोयधिप्रियः.—(Of garlic) रसुनमूलं.

Cloven, *a.* भिन्नः -न्ना -न्नं, भेदितः -ता -तं, विभिन्नः -न्ना -न्नं, छिन्नः -न्ना -न्नं, दलितः -ता -तं, विदलितः -ता -तं -लीकृतः -ता -तं, पृथक्कृतः -ता -तं; 'cloven tongued,' द्विखण्डजिह्वः -ह्वा -ह्वं, द्विजिह्वः -ह्वा -ह्वं.

Cloven-footed or cloven-hooved, *a.* द्विशफः -फा -फं, द्विखण्डशफः -फा -फं.

Clover, *s.* (Trefoil) त्रिपर्णीः -र्णी -र्णं, त्रिपत्रः -त्रा -त्रं; 'to live in clover,' महता विलासेन जीव् (c. 1. जीवति -वितुं), महासुखेन जीव्.

Clovered, *a.* त्रिपर्णीचितः -ता -तं, त्रिपत्राकीर्णः -र्णा -र्णं, सत्रिपत्रः -त्रा -त्रं.

Clout, *s.* (A cloth for any mean use) चीरं, कर्पटः, वस्त्रखण्डं.—(A patch) कन्था.—(An iron plate over an axle-tree) अक्षाग्रफलकं.

To clout, *v. a.* (To patch) कन्था (nom. कन्थायति -यितुं), जीर्णवस्त्राणि समाधा (c. 3. -दधाति -धत्ते -धातुं) चीरं चीरेण सन्धा.

Clouted, *a.* उपानः -ना -नं, संश्यानः -ना -नं, घनीभूतः -ता -तं.

Clouterly, *a.* (Clumsy) अदक्षः -क्षा -क्षं, अकृती -तिनी -ति (न्).

Clown, *s.* ग्राम्यजनः, ग्रामिकः, ग्रामी *m.* (न्), ग्रामवासः, ग्रामेवासी *m.* (न्), वृषलः, जानपदः, प्राकृतजनः, असभ्यजनः, पृथग्जनः, मूढः.

Clownish, *a.* ग्राम्यः -म्या -म्यं -मीयः -या -यं मौगः -ग्गा -ग्गं -मेयः -यी -यं -मिकः -की -कं, असभ्यः -भ्या -भ्यं, अशिष्टः -ष्टा -ष्टं, असंस्कृतः -ता -तं, ग्राम्यबुद्धिः -द्धिः -द्धि.

Clownishly, *adv.* ग्राम्यजनवत्, वृषलवत्, ग्रामीयप्रकारेण, असभ्यं.

Clownishness, *s.* ग्राम्यता, ग्रामीयत्वं, असभ्यता, अशिष्टता, ग्राम्यबुद्धित्वं.

To clov, *v. a.* अतिमोहितं or अतितृप्तिं जन् in caus. (जनयति -यितुं) or कृ, अतिशयेन or एकान्ततम or अतिरिक्तं तृप् in caus. (तर्पयति -यितुं), or सन्तुष् in caus. (-तोषयति -यितुं).

Cloyed, *p. p.* अतितृप्तः -प्ता -प्तं, अतिमुदितः -ता -तं, अतिसन्तोषितः -ता -तं

Club, *s.* यष्टिः *m.*, लगुडः, गदा, परिघः, उद्घातः, तोमरः -रा -रं, घनः दण्डगः; 'armed with a club,' यष्टीकः, लगुडहस्तः, यष्टिग्रहः, यष्टिहेतिकः.—(An assembly of companions) पंक्तिः *f.*, गणः, संसर्गः, सहभोजिनां संसर्गः, समांशिता; 'club-dinner,' गणचक्रकं, गणार्द्धं.—(Share of a reckoning) भागः, अंशः, उद्धारः, समांशः.

To club, *v. n.* (Contribute to a common expense) सर्व्वसाधारणधनव्यये स्वं स्वम् अंशं दा (c. 3. ददाति दातुं), or किञ्चित् किञ्चिद् दा.

Club-foot, *s.* श्रीपदं, स्थूलचरणं, कुञ्चचरणं, गडुपादः, वक्रपादः.

Club-footed, *a.* श्रीपदी -दिनी -दि (न्), वृहत्पादः -दी -दं, स्थूलचरणः -णा -णं.

Clubheaded, *a.* स्थूलशिरस्कः -स्का -स्कं, वृहन्मस्तकः -का -कं.

Clubroom, *s.* एकपंक्तिसामान्यशाला, साधारणशाला, इन्द्रकं.

To cluck, *v. n.* कुक्कुटीवत् शावकाह्वानार्थकं शब्दं कृ, कद् कद् शब्दं कृ.

Clucking, *s.* शावकाह्वानसमये कुक्कुटीरावः, कद् कद् शब्दः

Clue, *s.* सूत्रकोषे, सूत्रं. *See* Clew.

Clump, *s.* (Of grass) गुल्मः, स्तम्बः, गुच्छः, गुत्सः, काशः, विततिः *f.*, पिण्डः -ण्डं; 'a clump of reeds,' शरस्तम्बः, वंशविततिः *f.*—(A shapeless mass of wood) स्थूलकाष्ठं.

CLUMSILY, *adv.* अदक्षं, अनाप्तं, अकृतियत्, दाक्ष्यं विना, अपटु, आदाक्ष्येण.

CLUMSINESS, *s.* आचतुर्य्यं, आदाक्ष्यं, आनैपुणं, अपाटवं, अकृतित्वं.

CLUMSY, *a.* स्थूलः -ला -लं, अदक्षः -क्षा -क्षं, अनिपुणः -णा -णं, अकुशलः -ला -लं, अकृती -तिनी -ति (न्), अनाप्तः -प्ता -प्तं, अधिज्ञः -ज्ञा -ज्ञं, अपटुः, दुः -टु.

CLUSTER, *s.* (A bunch) गुच्छः, गुच्छः -च्छकः, स्तवकः, स्तबः, सान्द्रं, गुल्मः -ल्मकः, गुलुच्छः, विततिः *f.*, 'a number of beings,' सङ्घः, ओघः, समूहः, गणः, सङ्घातः, वृन्दं, निचयः; 'cluster of four houses,' चतुःशालं, सङ्भवनं; 'of reeds,' शरस्तम्बः, वंशविततिः *f.*; 'of people,' जनौघं, जनसमूहः; 'of grapes,' द्राक्षास्तवकः; 'in clusters,' सङ्घशस्, गुल्मशस्.

To CLUSTER, *v. a.* गुल्मीकृ, पिण्डीकृ, एकीकृ, सघि (c. 5. -चिनोति -चेतुं).

To CLUSTER, *v. n.* गुल्मीभू, पिण्डीभू, एकीभू, वृन्दीभू, स्तवकरूपेण रुह् (c. 1. रोहति, रोढुं)

CLUSTERING, *a.* गुल्मी -ल्मिनी -ल्मि (न्), व्यालीनः -ना -नं, अस्तवकः -का -कं, स्तवकाचितः -ता -तं, प्रस्तीतः -ता -तं, प्रस्तीमः -मा -मं, गुच्छाकारः -रा -रं.

To CLUTCH, *v. a.* (To grasp) ग्रह (c. 9. गृह्णाति, ग्रहीतुं), सङ्ग्रह, धृ (c. 1. धरति धर्त्तुं).—(To double the hand) मुष्टिं बन्ध् (c. 9. बध्नाति बन्द्धुं) or सङ्ग्रह्.

CLUTCH, *s.* सङ्ग्राहः, मुष्टिसङ्ग्राहः, ग्रहणं, मुष्टिबन्धः.—(Claw, hand) नखः -खं, पाणिः *m.*, हस्तः; 'to rescue from the clutches of the enemy,' शत्रुवशात् परित्रातुं.

CLUTCHED, *p. p.* गृहीतः -ता -तं, धृतः -ता -तं, मुष्टिसङ्ग्राहपीडितः -ता -तं.

CLUTTER, *s.* कोलाहलः, हलहलाशब्दः, तुमुलं, कालकोलः.

To CLUTTER, *v. n.* कोलाहलं कृ, हलहलाशब्दं कृ.

CLYSTER, *s.* वस्तिः *m. f.*, वस्तिकर्म्म *n.* (न्), वस्तिद्वारेण अन्त्रनिवेशितम् औषधीयद्रव्यं.

CLYSTER-PIPE, *s.* नेत्रं, वस्तिशिरः *n.* (स्), वस्तिनाली.

To COACERVATE, *v. a.* सघि (c. 5. -चिनोति -चेतुं), समाचि, समुपचि, राशीकृ, पिण्डीकृ, एकौघीकृ, पुञ्जीकृ, पूगीकृ.

COACERVATED, *p. p.* राशिगतः -ता -तं, एकौघभूतः -ता -तं, पुञ्जितः -ता -तं.

COACERVATION, *s.* राशीकरणं, एकौघीकरणं, सञ्चयनं, एकौघभावः.

COACH, *s.* रथः, चातुरं, चक्रयानं, यानं, गन्त्री, गन्त्रीरथः, शकटः, प्रवहणं, वाहनं; 'coach and four,' चतुरश्वो रथः; 'riding in a coach,' रथारोही *m.* (न्), रथारूढः, यानारूढः; 'he travels by coach,' रथेन सञ्चरति.

COACH-BOX, *s.* रथोपस्थः, सूतासनं, सारथिस्थानं.

COACH-DRIVING, *s.* रथसारथ्यं, रथवाहनं.

COACHFUL, *s.* पूर्णरथः, चातुरकं, शाकटं, रथपूरणं.

COACH-HORSE, *s.* रथ्यः, प्रवहणवाजी *m.* (न्), रथाश्वः.

COACH-HOUSE, *s.* रथस्थानं, रथशाला, रथागारं, रथाधारः.

COACHMAKER, *s.* रथकारः, रथकरः, रथनिर्म्माणकृत्, रथविक्रेता *m.* (तृ).

COACHMAN, *s.* सूतः, सारथिः *m.*, यन्ता *m.* (न्तृ), नियन्ता *m.* (न्तृ), चातुरिकः, वाहकः, रथवाहकः, प्रवहणवाहकः, प्राजकः, प्राजिता *m.* (तृ), शास्ता *m.* (स्तृ), हयकूपः, सादिः *m.*, दक्षिणस्थः, चाक्रिकः, प्रचेता *m* (तृ).

COACTION, *s.* बलात्कारः, बलात्कारप्रयोगः, प्रमाथः, नियमनं, निग्रहः.

COACTIVE, *a.* बलात्कारी -रिणी -रि (न्), बलान्वितः -ता -तं, बली -लिनी -लि (न्), सबलः -ला -लं, प्रमाथी -थिनी -थि (न्), नैयमिकः -की -कं, नियामकः -का -कं, अवश्यकः -का -कं.

COADJUTOR, *s.* सहकारी *m.* (न्), सहकृत्, सहकर्त्ता *m.* (तृ), सहायः सम्भूयकारी *m.* (न्), प्रतियोगी *m.* (न्).

COADJUVANCY, *s.* सहकारः -रिता, साहाय्यं, सम्प्रतियोगिः *f.*, प्रतियोगिता

COAGMENTATION, *s.* राशीकरणं, एकीकरणं, सञ्चयनं, पिण्डीकरणं, सन्निपातः.

COAGULABLE, *a.* श्यानीयः -या -यं, श्येयः -या -यं, घनीकर्त्तुं शक्यः -क्या -क्यं.

To COAGULATE, *v. a.* श्यै in caus. (श्यापयति -यितुं), श्यानीकृ, घनीकृ.

To COAGULATE, *v. n.* श्यै (c. 1. श्यायते, श्यातुं), घनीभू, श्यानीभू.

COAGULATED, *p. p.* शीनः -ना -नं, श्यानः -ना -नं, आश्यानः -ना -नं, घनीभूतः -ता -तं, संहतः -ता -तं.

COAGULATION, *s.* शीनता, घनता -त्वं, संहतत्वं, घनीभावः.

COAL, *s.* अङ्गारः -रं, आलातं, निधापकः, कृष्णमृत् *f.* -मृत्तिका, कृष्णभूमिः *f.*; 'burning coal,' तप्ताङ्गारः.

To COAL, *v. a.* अङ्गार (nom. अङ्गारयति -यितुं), अङ्गारीकृ.

COAL-BLACK, *a.* अङ्गारभवर्णः -र्णा -र्णं, घनकृष्णः -ष्णा -ष्णं, अत्यन्तकालः -ला -लं.

COAL-HOLE OF COAL-HOUSE, *s.* अङ्गारागारं, अङ्गारगुप्तिः *f.*, कृष्णमृत्तिकाधारः.

COAL-MAN, COAL-MERCHANT, *s.* अङ्गारविक्रेता *m.* (तृ), कृष्णभूमिविक्रयी *m.* (न्), अङ्गारविक्रयोपजीवी *m.* (न्).

COAL-MINE COAL-PIT, *s.* अङ्गाराकरः, अङ्गारखानिः *m.*, अङ्गारोत्पत्तिस्थानं.

To COALESCE, *v. n.* संयुज् in pass. (-युज्यते), सम्मिल (c. 6. -मिलति -मेलितुं), सङ्गम (c. 1. -गच्छति -गन्तुं), संसृज् in pass. (-सृज्यते), एकीभू, एकत्र भू or गम, संश्लिष in pass. (-श्लिष्यते), संलग्नीभू.

COALITION, *s.* संयोगः, संसृष्टिः *f.*, संसर्गः, सङ्गः -ङ्गमः -ङ्गतिः *f.*, मेलनं, संश्लेषः, संसक्तिः, अनुषङ्गः, संहतिः *f.*, सङ्घातः.

COAL, *a.* अङ्गारमयः -यी -यं, आङ्गारिकः -की -कं, अङ्गारपूर्णः -र्णा -र्णं.

COAPTATION, *s.* समायोगः, संयोजनं, समाधानं, सन्धानं.

To COARCT, *v. a.* सङ्कुच् (c. 1. -कोचति -कोचितुं), संहृ (c. 1. -हरति -हर्त्तुं).

COARCTATION, *s.* सङ्कोचः -चनं, संवारः, संवृतिः, ह्रासः, सङ्क्षेपः, संयमः.

COARSE, *a.* (Not fine) घनः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, निविडः -डा -डं, स्थूलः -ला -लं, निरन्तरः -रा -रं, नीरन्ध्रः -न्ध्रा -न्ध्रं.—(Unpolished) अपरिष्कृतः -ता -तं, असंस्कृतः -ता -तं, अशिष्टः -ष्टा -ष्टं.—(Indelicate, indecent) अवाच्यः -च्या -च्यं, अशुद्धः -द्धा -द्धं.—(Vulgar) असभ्यः -भ्या -भ्यं, प्राकृतः -ता -तं, ग्राम्यः -म्या -म्यं, व्रीलः -ला -लं, अश्लीलः -ला -लं.—(Vile) नीचः -चा -चं, निकृष्टः -ष्टा -ष्टं, कदर्य्यः -र्य्या -र्य्यं, कुत्सितः -ता -तं; 'coarse cloth,' स्थूलपट्टं, स्थूलशाटकः, वराशिः *m.*; 'coarse-minded,' प्राकृतचेताः -ताः -तः (स्); 'coarse fare,' मन्दाहारः; 'coarse abuse,' अश्लीलाक्षेपः; 'coarse language,' अश्लीलं, खलोक्तिः *f.*

COARSELY, *adv.* अशिष्टं, अशुद्धं, निकृष्टं, मन्दं, अश्लीलं, अपरिष्कृतं.

COARSENESS, *s.* (Of substance) घनता, स्थूलता, सान्द्रता, स्थौल्यं, नैविड्यं, नैरन्तर्य्यं.—(Want of polish, vulgarity) अपरिष्कारः, अशिष्टता, असभ्यता, अशुद्धिः *f.*, नीचता, अश्लीलत्वं.

COAST, *s.* (Sea-coast) समुद्रतीरं, समुद्रतटं, वेला, वेलामूलं, समुद्रान्तं, अम्बितीरं.—(Border, limit) सीमा, समन्तः, सामन्तं.—(Quarter) दिक् *f.*, (श्), देशः, प्रदेशः; 'the coast is clear,' गतं भयं, निर्विघ्नः पथः.

To COAST, *v. n.* उपतीरं or उपतटं or वेलानिकटे नावं or पोतं वह् in caus. (वाहयति -यितुं), or नौकया वह in pass. (उह्यते).

COASTER, *s.* उपतीरं पोतवाहकः, समुद्रवेलावह्नी *m.* (न्).

COASTING, *s.* उपतीरं नौकावाहनं, वेलानिकटे वह्ननं.

COAT, *s.* (An upper garment) प्रावारः, उत्तरीयं, परिधेयं, निचोलः वरूथं; 'a covering,' पटलं, छादनं, छदनं, आच्छादनं, प्रावरणं, पुटः -टं, आवेष्टनं; 'coat of the eye,' अक्षिपटलं.—(Hair of a beast) रोम *n.* (न्), लोम *n.* (न्); 'coat of a horse,' अश्वरोम *n.* (न्).—(Coat of arms) कुलचिह्नपत्रं.

To COAT, *v. a.* छद् (c. 10. छादयति -यितुं), वेष्ट् in caus. (वेष्टयति -यितुं). —(Inlay) अनुव्यध् (c. 4. -विध्यति -व्यद्धुं).—(Coat with paint) लिप् (c. 6. लिम्पति, लेप्तुं).

COATED, *p. p.* छन्नः -न्ना -न्नं, आछन्नः -न्ना -न्नं, वेष्टितः -ता -तं, अनुविद्धः -द्धा -द्धं, रूपितः -ता -तं, लुलितः -ता -तं, लिप्तः -प्ता -प्तं.

COATING, *s.* पटलं, पुटः -टी -टं, छादनं.—(Of paint) लेपः.

To COAX, *v. n.* लल (c. 10. लालयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं), मधुरैर्वाक्यैः or चाटुक्त्या सान्त्व् or प्रलुभ् in caus. (-लोभयति -यितुं).

COAXED, *p. p.* लालितः -ता -तं, चाटुकारापन्नः -न्ना -न्नं.

COAXER. *s.* लाली *m.* (न्), चाटुवादी *m.* (न्), चाटुकारः, सान्त्ववादः,

COAXING, *s.* लालनं, चाटुः *m.* -टु *n.*, चाटूक्तिः *f.*, मधुरवचः *n.* (स्), मधुरवाक्यं, आश्वासनं; 'repeated coaxing,' चाटुशतं.

COB, *s.* (Sea-fowl) समुद्रीयपक्षिभेदः.—(Entire horse) वीजाश्वः, सवृषणोऽश्वः.—(A small compact horse) दृढदेहः क्षुद्रवाजी *m.* (न्).

COBALT, *s.* (Mineral substance) आवञ्जः, मधुधातुः *m.*, मनःशिलाधातुः.

To COBBLE, *v. a.* (To mend shoes) जीर्णपादुकाः सृच्या समाधा (c. 3. -दधाति -धातुं) or सन्धा.—(To make any thing clumsily) आदाक्ष्येण किञ्चित् कृ or निर्मा (c. 2. -माति -मातुं).

COBBLER, *s.* (A mender of old shoes) जीर्णपादुकासन्धाता *m.* (तृ). —(A clumsy workman) अदक्षः शिल्पी *m.* (न्), अनिपुणः, अनभिज्ञः.

COBIRON, *s.* मांससंस्कारे प्रयुक्तः स्थूलाग्रो लोहशूलः.

COBISHOP, *s.* धर्माध्यक्षसहायः, धर्माधिपतेः सहकारी *m.* (न्).

COBRA CAPELLO, *s.* (Snake) फणकरः, फणी *m.* (न्). फणवान् *m.* (त्), नागः.

COBWEB, *s.* ऊर्णनाभजालः, जालः -लं, मर्कटवासः, मर्कटजालः, आशावन्ध्यः, सनानिका, लूतातन्तुवितानं.

COCCIFEROUS, *a.* गुटिकाकारफलविशिष्टः -ष्टा -ष्टं.

COCHINEAL, *s.* (Insect) लाक्षा, जतु *n.* -तुकं, तित्तिभः, क्रिमिः *m.*

COCHLEARY OR COCHLEATED, *a.* आवञ्जी -ञ्जिनी -ञ्जि (न्), परिवलैकः -का -कं.

COCK, *s.* (The male to the hen) कुक्कुटः, चरणायुधः, नखायुधः, स्वर्णचूडः, ताम्रचूडः, ताम्रशिखी *m.* (न्), शिखी *m.* (न्), शिखण्डी *m.* (न्) -खिडकः, कृकवाकुः *m.*, कलविङ्कः, कालहः, उषाकलः, निशावेदी *m.* (न्), रात्रिवेदी *m.* (न्), यामघोषः, रसाखनः, सुपर्णः, पूर्णकः; 'relating to a cock,' काङ्केयकायः -यी -यं; 'cock's comb,' चूडा, शिखा; 'a cock-sparrow,' चटकः.—(Weathercock) प्रासादशृङ्गाग्रे स्थापितं कुक्कुटाकारं वातस्कन्धलक्षणं, वायुलक्षणं, वायुध्वजः, वायुस्कन्धलक्ष्यं.—(Spout to let out water at will) सचिधानं जलनिर्गमरन्ध्रं, प्रणाली, जलनिर्गमः, जलस्रावणयन्त्रं.—(Notch of an arrow) बाणाग्रभागे अवच्छेदः.—(Cock of a gun) आग्नेयनाडिसम्बन्धी सूक्ष्ममुद्गरविशेषो यद्द्वारेण अन्तःस्थचूर्णो संज्वाल्यते.—(A leader) मुख्यः, मुखरः, पुरोगः. —(Heap of hay) शुष्कतृणचितिः *f.*, तृणोत्करः.—(Form of a hat) शिरस्कसंस्कारः, शिरस्त्राकारः; 'cock a hoop,' जयी *m.* (न्), दृप्तः, दर्पध्मातः, गर्वोद्धतः; 'cock and a bull story,' वृथाकथा, शशविषाणधनुर् अस्य इति मृषार्थकम् आख्यानं.

To COCK, *v. a.* (To set erect) उच्छ्रि in caus. (-नामयति -नमयति -यितुं), उच्छि (c. 1. -श्रयति -यितुं), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्भन् (c. 2. -हन्ति -हन्तुं); 'to cock the ears,' कर्णौ स्तब्धीकृ; 'the tail,' उत्पुच्छ (nom. उत्पुच्छयते -यितुं).—(To put hay into cocks) शुष्कतृणम् उत्करीकृ.—(To cock a gun) आग्नेयनाडिसम्बन्धिनं पृष्ठोक्तसूक्ष्ममुद्गरम् उच्छ्रि in caus. (-नमयति -यितुं).

To COCK, *v. n.* कुक्कुटवत् खेलगत्या चल् (c. 1. चलति -लितुं). दृप् (c. 4. दृप्यति).

COCKED, *p. p.* उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, उच्छ्रितः -ता -तं, उत्क्षिप्तः -प्ता -प्तं; 'with tail cocked,' समुद्गतलाङ्गूलः -ला -लं.

COCKADE, *s.* राजव्यापृतस्य सेवकेन शिरस्कोपरि धृता चूडा, कुक्कुटचूडाकारो मस्तकालङ्कारः.

COCKATRICE, *s.* अजगरः, वाहसः, कुक्कुटाण्डजः सर्पः or व्यालः.

COCKBOAT, *s.* उपनौका, क्षुद्रनौका, क्षुद्रपोतः, उपतरिः *f.*

COCKCHAFER, *s.* पिङ्गशरीरो ध्वनमोदी भमरभेदः.

COCKCROWING, *s.* कुक्कुटरवः -रवं, चरणायुधशब्दः.—(Morning) प्रभातकालः, प्रातःकालः.

To COCKER, *v. a.* (To fondle) कोमलं or कोमलप्रकारेण पुष् (c. 9. पुष्णाति, c. 1. पोषति -षितुं), or संवृध् in caus. (-वर्धयति -यितुं). अनुरुध् (c. 4. -रुध्यते -रोद्धुं), क्रोडीकृ.

COCKEREL, *s.* (Young cock) कुक्कुटशावकः, चरणायुधशावकः.

COCKERING, *s.* पोषणं, संवर्धनं, अनुरोधः, छन्दोनुवृत्तं, कोमलता.

COCKET, *s.* शौल्किकमुद्रा, शुल्कस्थाने द्रव्यनिक्षेपानन्तरं शौल्किकमकाशात् प्रत्ययपत्रं.

COCKFIGHT, *s.* प्राणिद्यूतं, समाह्वयः, माह्वयः, कौलीनं.

COCKHORSE, *a.* अश्वारूढः -ढा -ढं, जयी -यिनी -यि (न्), दर्पध्मातः -ता -तं.

COCKLE, *s.* (Shell-fish) दुनोमा *m.* -स्त्री *f.* (न्) दीर्घकोपिका, सितालिका, शुक्तिः *f.*—(Weed growing in corn) कण्यः, शस्यक्षेत्ररुह ओषधिभेदः.

COCKLED, *a.* दुनोमाकारः -रा -रं, शौक्तिकः -की -कं, आवञ्जी -ञ्जिनी -ञ्जि (न्).

COCKLOFT, *s.* कूटागारं, व्योमः -मं, चूला, चन्द्रशालिका, गृहस्य उपरिस्थः प्रकोष्ठः.

COCKMASTER, *s.* चरणायुधपालकः, युद्धकुक्कुटपोषकः.

COCKMATCH, *s.* कुक्कुटयुद्धं, चरणायुधसमाह्वयः, कौलीनं.

COCKNEY, *s.* नागरजनः, पुरवासी *m.* (न्), नगरवासी *m.*, प्राकृतजनः, पृथग्जनः.

COCKPIT, *s.* (Area where cocks fight) कुक्कुटयुद्धभूमिः.—(In a man of war) वृहद्युद्धनौकाया अधोभागे कायशल्यादिचिकित्सायोग्या कुटी.

COCKROACH, *s.* परोष्णी, खलाधारा, तैलपा *f.* -पायिका, चारिका, पिङ्गकपिशा.

COCK'S-COMB, *s.* *See* COXCOMB.

COCKSURE, *a.* सुनिश्चितः -ता -तं, निःसन्देहः -हा -हं, असन्दिग्धः -ग्धा -ग्धं.

COCKSWAIN, *s.* उपनौकाकर्णधारः, क्षुद्रनौकापतिः *m.*

COCOA-NUT, *s.* नारिकेलः, नालिकेरः, नारिकेरः, नाडिकेलः, नारिकेली, पयोधरः, कौशिकफलं, स्वानोदकः, पुटोरकः, दाक्षिणात्यः.—(The tree) तृणद्रुमः, फलकेशरः, दृढफलः, सुखफलः, सदाफलः, शिरःफलः, सदापुष्पः, दृढमूलः, सुतुङ्गः, सुभङ्गः, लाङ्गली.—(The juice) नारिकेलरसः.

COCOON, *s.* (Of the silk worm) कृमिकोषः, कोटकोषः, गुटिका.

COCTION, *s.* निष्क्वाथः, क्वाथः, क्वथनं, पाचनं.

COD or COD-FISH, *s.* स्थूलशिरस्कः समुद्रीयमत्स्यभेदः.

COD, *s.* (Seed-vessel, pod) बीजकोशः, बीजगुम्भिः *f.*, शमी, पुटः.

CODDED, *p. p.* कोशस्थः -स्था -स्थं, कोषगुप्तः -प्ता -प्तं.

To CODDLE, *v. a.* (Parboil) ईषत्क्वथ् (c. 1. -क्वथति -यितुं), शनैः स्थाल्यां पच् (c. 1. पचति, पक्तुं) or तप् in caus. (तापयति -यितुं), कोष्णजलेन कोमलीकृ.—(Breed up tenderly) कोमलतया or सौकुमार्येण पुष् (c. 1. पोषति -षितुं).

CODE, *s.* (Of laws) धर्मसंहिता, स्मृतिशास्त्रं, धर्मशास्त्रं, स्मृतिः *f.*, व्यवहारविधिः *m.*

CODICIL, *s.* मुमूर्षुजनपत्रस्य अनुबन्धः or उपलेखनं or उपाङ्गं or उत्तरखण्डं.

CODLING, *s.* भोजनात्पूर्वम् ईषत्क्वथनीय आपक्वः काम्रफलभेदः.

COEFFICACY OR COEFFICIENCY, *s.* सहकारिणाम् अनेकहेतुकानां प्रभावः, सहकारिता, संयोगिता, सम्प्रयोगिता, सम्प्रतिपत्तिः *f.*, सम्भूतिः *f.*

COEFFICIENT, *s.* (In arithmetic) वर्णः, प्रकृतिः *f.*, गुणः.

COEMPTION, *s.* पूर्वक्रयः, प्रख्यातभाक्षक्रयः, अवच्छेदावच्छेदक्रयः, समुदयक्रयः.

ENCOMPASSMENT, *s.* परिवेष्टनं, वेष्टनं, परिवृतिः *f.*, वृतिः *f.*, परिवेशः -वेषणं, परिगमः, परिसर्पः, परिक्रिया.—(Circumlocution) वक्रोक्तिः *f.*

ENCORE, *s.* पुनर्, पुनर्वारं, नाटकमन्त्रीतादिशालायां प्रशंसासूचनार्थं प्रेक्षकाणां पुनरुक्तिः सांराविणं or पुनर् गीयतां पुनर् अभिनीयतामिति बहुभिः कृता संहतिः *f.*

To ENCORE, *v. a.* प्रशंसासूचनार्थं पुनरुक्तिं उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), पुनरुक्तिं संहतिं कृत्वा पुनरभिनयं प्रार्थ् (c. 10. -अर्थयति -ते -यितुं).

ENCOUNTER, *s.* (Meeting) समागमः, समागतिः *f.*, सङ्गः, सङ्गमः, सङ्गतं, मेलनं, मेलकः, मिलनं, समादानं.—(Conflict, collision) समाघातः, संयुगः, समरः, सङ्ग्रामः, युद्धं, विग्रहः, सम्प्रहारः, अभिसम्पातः, सम्परायः, सङ्कट्टः -ट्टनं, सम्मर्दः, प्रतिघातः, सम्फेटः.

To ENCOUNTER, *v. a.* and *n.* (Meet) समागम् (c. 1. -गच्छति -गन्तुं), सङ्गम्, मिल् (c. 6. मिलति, मेलितुं), सम्मिल् सम्मे (c. 2. समैति -तुं, rt. इ), आसद् (c. 10. -सादयति -यितुं), समासद् प्रतिमुखं or अभिमुखं गम्, सम्मुखीभू.—(In a hostile manner) प्रतियुध् (c. 4. -युध्यते -योद्धुं), विग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सङ्कट्ट् (c. 1. -घट्टते -ट्टितुं), समाहन् (c. 2. -हन्ति -न्तुं), समाघातं कृ.

ENCOUNTERED, *p. p.* समागतः -ता -तं, सङ्गतः -ता -तं, समुपागतः -ता -तं, मिलितः -ता -तं, प्रतिमुखागतः -ता -तं, अभिमुखागतः -ता -तं, आसादितः -ता -तं, समासादितः -ता -तं, आक्रान्तः -न्ता -न्तं, विगृहीतः -ता -तं.

To ENCOURAGE, *v. a.* आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, उच्छ्वस्; प्रोत्सह् in caus. (-साहयति -यितुं), समुत्सह्, परिशान्त्व् (c. 10. -शान्त्वयति -यितुं), प्रहृष् in caus. (-हर्षयति -यितुं), उत्तिज् in caus. (-तेजयति -यितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सङ्ग्रह्, प्रदिश् in caus. (-देशयति -यितुं), तेजः or विश्वासं or आशां कृ or दा or वृष् in caus. (वर्षयति -यितुं) or संवृष्; प्रवृत् in caus. (-वर्त्तयति -यितुं).

ENCOURAGED, *p. p.* आश्वासितः -ता -तं, समाश्वासितः -ता -तं, उच्छ्वासितः

-ता -तं, प्रोत्साहितः -ता -तं, उत्तेजितः -ता -तं, अनुगृहीतः -ता -तं.

ENCOURAGEMENT, *s.* (Act of encouraging) आश्वासनं, समाश्वासनं, उज्जासः, प्रोत्साहः -हनं, प्रवर्धनं, प्ररोचनं, उत्तेजनं, समुत्तेजनं, तेजोवर्धनं, वर्धनं, संवर्धनं.—(Favor) अनुग्रहः, आग्रहः, सङ्ग्रहः, ग्रहः, साहाय्यं, उपकारः, अनुपालनं, आनुकूल्यं, अभ्युपपत्तिः *f.*, अनुरागः.

ENCOURAGER, *s.* आश्वासकः, प्रोत्साहकः, प्रवर्धकः, अनुग्रहीता *m.* (तृ).

ENCOURAGING, *a.* आश्वासकः -सिका -कं, आश्वासवर्धकः -का -कं, तेजस्करः -री -रं, सान्त्वदः -दा -दं, प्ररोचनदः -दा -दं.

To ENCROACH, *v. n.* क्रमे क्रमे क्रमेण प्रसृप् (c. 1. -सर्पति -सप्तुं), पदे पदे प्रसृप्य पराधिकारं or परभूमिम् आविश् (c. 6. -विशति -वेष्टुं) or प्रविश् or समाविश्; क्रमे क्रमे स्वाधिकारमर्य्यादाम् अतिक्रम्य पराधिकारं or परभूमिम् आक्रम् (c.1. -क्रामति -क्रमितुं) or अभिक्रम् or अध्याक्रम्; पराधीनं किञ्चिद् द्रव्यम् अधर्म्मतः or अन्यायतो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or अभिग्रह् or ग्रस् (c. 1. ग्रसते -सितुं) or स्वीकृ or आत्मीयं कृ.

ENCROACHER, *s.* पदे पदे प्रसर्पकः or पराधिकारग्रसकः or पराधिकाराक्रामकः or स्वभूमिमर्य्यादातिक्रामकः or पराधीनद्रव्यग्राहकः.

ENCROACHING, ENCROACHMENT, *s.* पदे पदे प्रसर्पणं or पराधिकारप्रवेशः; क्रमे क्रमे पराधिकाराक्रमणं or परभूम्यभिक्रमः or स्वाधिकारातिक्रमणं or स्वाधिकारोल्लङ्घनं or पराधीनद्रव्यग्रसनं or पराधिपत्याक्रान्तिः *f.* or स्वाधिपत्यातिक्रान्तिः *f.*

To ENCRUST, *v. a.* *See To* INCRUST.

To ENCUMBER, *v. a.* (Load, clog) भारं दा or न्यस् (c. 4. -अस्यति -असितुं), भारवन्तं -वतीं -वत् कृ, भाराक्रान्तं -न्तां -न्तं कृ, भारेण परिवाध् (c. 1. -बाधते -धितुं) or गतिपरिबाधां कृ or उपरुध् (c. 7. -रुणद्धि -रोद्धुं) or प्रतिरुध् or प्रतिबन्ध् (c. 9. -बध्नाति -बन्धुं) or स्तम्भ् in caus. (स्तम्भयति -यितुं) or विघ्न (nom. विघ्नयति -यितुं) or आयस् in caus. (-आयसयति -यितुं) or क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं).—(Load with debts) ऋणभारग्रस्तं -स्तां -स्तं कृ.

ENCUMBERED, *p. p.* भारवान् -वती -वत् (त्), भारी -रिणी -रि (न्), भारयुक्तः -क्ता -क्तं, भाराक्रान्तः -न्ता -न्तं, भारग्रस्तः -स्ता -स्तं, बाधितः -ता -तं, प्रतिरुद्धः -द्धा -द्धं, विघ्नितः -ता -तं.

ENCUMBRANCE, *s.* (Load) भारः, धुरा.—(Impediment) बाधा -धकः, प्रतिबन्धः, प्रतिरोधः, उपरोधः, विघ्नः, स्तम्भः, प्रतिष्टम्भः, विष्टम्भः, प्रत्यूहः, अन्तरायः.—(Useless addition) अनुबन्धः.—(Debt) ऋणभारः, ऋणं, धारणा.

ENCYCLICAL, *a.* चाक्रिकः -की -कं, चाक्रेयः -यी -यं, मण्डली -लिनी -लि (न्), वर्तुलः -ला -लं; 'letter,' बहुजनानुद्दिश्य पत्रं, बहुसाधारणपत्रं.

ENCYCLOPÆDIA, *s.* विद्याचक्रं, विद्यामण्डलं, विद्यामण्डलावलिः *f.*, विद्याहारावलिः *f.*, विद्यावलिः *f.*, विद्यापर्य्यायः.

END, *s.* (Extremity) अन्तः -न्तं, पर्य्यन्तं, प्रान्तः, समन्तः, पारः -रं.—(Termination) अवसानं, पर्य्यवसानं, अवसायः, अवसादः, अवसन्नता, सात्तिः *f.*, सायः, अन्तः -न्तं, शेषः, पर्य्यवशेषः, परिणामः, क्षयः, गतिः *f.*, निधनं, अत्ययः.—(Conclusion) समाप्तिः *f.*, निष्पत्तिः *f.*, सिद्धिः *f.*, निर्वृत्तिः *f.*, निष्ठा.—(Cessation) विरतिः *f.*, विरामः, अवरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, विनिवृत्तिः *f.*, विच्छेदः, उपशमः.—(Limit, term) अवधिः *m.*, सीमा, अन्तरं.—(Last stage) परिणामः.—(Death) अन्तकालः, अन्तः, अन्तकः, निधनं, क्षयः, अपगमः, अपायः, मरणं, नाशः, विनाशः, देहक्षयः, उपसंहारः.—(Extreme point) अग्रं, अग्रभागः, मुखं, शिखा, शिखरं, अणिः *m.*—(Consequence) अन्तः, फलं, फलनुबन्धः, उत्तरं, परिणामः.—(Object, scope) आशयः, आशयः, अभिप्रायः, तात्पर्यं, उद्देशः, अभिसन्धिः *m.*, कार्यं, कार्यवस्तु *n.*; 'end of the world,' प्रलयः, क्षयः, कल्पः, कल्पान्तः, संवर्तः उपसंयमः; 'end of day,' दिवसात्ययः, दिनावसानं; 'end of night,' निशावसानं, क्षपात्ययः; 'end of a garment,' अञ्चलः, पटाञ्चलः -लं, तरी, तरिः *f.*, दशा, वस्तिः *m.*; 'hear my speech to the end,' मद्वचनम् अवसानपर्य्यन्तं or शेषं यावत् शृणु.

To END, *v. a.* अवसो (c. 4. -स्यति -सातुं), समाप् in caus. (-आपयति -पयितुं), सम्पृ in caus. (-पूरयति -पयितुं), निवृत् in caus. (-वर्त्तयति -यितुं) or निवृत् with abl. c. (c. 1. -वर्त्तते -र्त्तितुं), निर्वृत्, विनिवृत्, विरम् in caus. (-रमयति -यितुं) or विरम् with abl. c. (c. 1. -रमति -रन्तुं), उपरम्, व्युपरम्, निष्पद् in caus. (-पादयति -यितुं), साध् in caus. (साधयति -यितुं), प्रतियत् (c. 10. -यातयति -यितुं). Often rendered by अन्त as the last member of a compound; as, 'death ends life,' मरणान्तं जीवितं.—(Gét to the end) पार् (c. 10. पारयति -यितुं), तीर् (c. 10. तीरयति -यितुं).

To END, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, व्युपरम्; निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विनिवृत्, निर्वृत्, समाप् in pass. (-आप्यते), निष्पद् in pass. (-पद्यते), विगम् (c. 1. -गच्छति -गन्तुं), अपया (c. 2. -याति -तुं), विच्छिद् in pass. (-छिद्यते), अवसद् (c. 1. -सीदति -सत्तुं), शम् (c. 4. शाम्यति, शमितुं). Often expressed by अन्तः -न्ता -न्तं or पर्य्यन्तः -न्ता -न्तं as the last member of a compound; as, 'a name which ends in a long vowel,' दीर्घस्वरान्तं नाम; 'ending at the ocean,' सागरपर्य्यन्तः -न्ता -न्तं.

To ENDANGER, *v. a.* संशयस्थं -स्थां -स्थं कृ, शङ्कास्थं -स्थां -स्थं कृ, सन्देहस्थं -स्थां -स्थं कृ, भयस्थं -स्थां -स्थं कृ, सन्देहदोलस्थं -स्थां -स्थं कृ, संशयापन्नं -न्नां -न्नं कृ, शङ्कास्पदं कृ; 'one who endangers his life,' संशयितजीवितः.

To ENDEAR, *v. a.* प्रियं -यां -यं कृ, हृदयप्रियं -यां -यं कृ, दयितं -तां -तं कृ, प्रीतं -तां -तं कृ, अभीष्टं -ष्टां -ष्टं कृ, इष्टं -ष्टां -ष्टं कृ, स्नेहपात्रं कृ.

ENDEARING, *a.* प्रियङ्करः -री -रं, प्रियकारः -री -रं, प्रीतिकरः -री -रं.

ENDEARMENT, *s.* प्रेमकारणं, स्नेहकारणं, प्रियता -त्वं, प्रेमहेतुः *m.*, प्रेमकर्म्म *n.* (न्), शृङ्गारकर्म्म *n.*, ललितं, हावः, विलासः; 'word of endearment,' प्रियवाक्यं.

ENDEAVOR, *s.* यत्नः, प्रयत्नः, उद्यमः, उद्योगः, उत्साहः, चेष्टा -ष्टनं, व्यवसायः, अध्यवसायः, समुद्यमः, प्रवृत्तिः *f.*, आरम्भः, उपक्रमः, आयासः, प्रयासः, गुरणं, विचेष्टितं, उत्थानं, ग्रहः, व्यापारः, घटना.

To ENDEAVOR, *v. n.* यत् (c. 1. यतते -तितुं), प्रयत्, चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, सञ्चेष्ट्, व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो, उद्यम् (c. 1. -यच्छति -यन्तुं), व्यायम्, घट् (c. 1. घटते -टितुं), उपक्रम् (c. 1. -क्रमते -मितुं), आयस् (c. 4. -यस्यति -यसितुं), प्रयस्, आरभ् (c. 1. -रभते -रब्धुं), समारभ्, वाह् (c. 1. वाहते -हितुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), उद्योगं कृ, प्रयासं कृ.

ENDEAVORED, *p. p.* व्यवसितः -ता -तं, अध्यवसायितः -ता -तं, चेष्टितः -ता -तं, कृतप्रयत्नः -त्ना -त्नं, समुद्यतः -ता -तं, कृतोत्साहः -हा -हं, वाहितः -ता -तं.

ENDED, *p. p.* अवसितः -ता -तं, अवसन्नः -न्ना -न्नं, पर्य्यवसितः -ता -तं, सन्नः -न्ना -न्नं, सितः -ता -तं, निवृत्तः -त्ता -त्तं, निर्वृत्तः -त्ता -त्तं, वृत्तः -त्ता -त्तं, समाप्तः -प्ता -प्तं, परिणतः -ता -तं, गतः -ता -तं, विगतः -ता -तं, अस्तङ्गतः -ता -तं. अस्तङ्गमितः -ता -तं.

ENDING, *s.* अन्तः -न्तं, शेषः, समाप्तिः *f.*; 'of a word,' पदान्तं, पदस्य शेषवर्णः.

ENDICT, ENDICTMENT, ENDITE. *See* INDICT, &c.

ENDIVE, *s.* शाकप्रभेदः, शुक्लौलादिना सह खादनीयः शाकः.

ENDLESS, *a.* अनन्तः -न्ता -न्तं -न्तकः -क्या -कं, अत्यन्तः -न्ता -न्तं, अपर्य्यन्तः -न्ता -न्तं, अज्ञेयः -या -यं, निरवधिः -धिः -धि, अपारः -रा -रं, निरन्तरः -रा -रं, अविरतः -ता -तं, अनवरतः -ता -तं, अमितः -ता -तं, अतिदीर्घः -र्घा -र्घं.

ENDLESSLY, *adv.* अत्यन्तं, अविरतं, अनारतं, निरन्तरं, अज्ञेयतस्.

ENDLESSNESS, *s.* अनन्तत्वं, अनन्तता -त्वं, अत्यन्तत्वं, अविरामः, अविरतिः *f.*, अविच्छेदः, अनन्तर्य्यं, नित्यता.

ENDORSE, ENDORSEMENT. *See* INDORSE, INDORSEMENT.

To ENDOW, *v. a.* (With a portion) यौतुकं or शुल्कं or वृत्तिं दा, प्रतिष्ठां कृ, प्रतिष्ठा in caus. (-ष्ठापयति -यितुं).—(Furnish with any thing) युज् (c. 10. योजयति -यितुं), समायुज्, सम्पद् -द्यां -द्यं कृ, युक्तं -क्तां -क्तं कृ, दा; 'to be endowed with,' युज् in pass. (युज्यते); 'he is endowed with all good qualities,' सर्व्वगुणोपेतोऽस्ति.

ENDOWED, *p. p.* (With a portion, &c.) प्रतिष्ठितः -ता -तं, गृहीतशुल्कः -ल्का -ल्कं.—(Furnished with any thing) युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, उपेतः -ता -तं, सम्पन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं, अन्वितः -ता -तं, प्रयुक्तः -क्ता -क्तं, शीलः -ला -लं, शीलितः -ता -तं.—(With a grant of property) निषद्वः -द्वा -द्वं.

ENDOWMENT, *s.* (Settling a dower on a woman) यौतुकदानं, प्रतिष्ठा.—(Settling property for religious purposes) देवस्वदानं, अग्रहारदानं, प्रतिष्ठा.—(The property so settled) देवस्वं, अग्रहारः.—(Grant of money for support) निबन्धः -न्धनं.—(Quality, gift of nature) गुणः, शक्तिः *f.*

To ENDUE, *v. a.* सम्पद् -द्यां -द्यं कृ, युक्तं -क्तां -क्तं कृ, युज् (c. 10. योजयति -यितुं), समायुज्, दा; 'to be endued,' सम्पद् -द्या -द्यं भू, युज् in pass. (युज्यते). *See* ENDOW.

ENDUED, *p. p.* सम्पन्नः -न्ना -न्नं, उपेतः -ता -तं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, समायुक्तः -क्ता -क्तं, अन्वितः -ता -तं, आपन्नः -न्ना -न्नं, उपपन्नः -न्ना -न्नं.

ENDURANCE, *s.* (Bearing with patience) सहनं, सहत्वं, सहता, साहनं, सहिष्णुता -त्वं, सहनशीलता, क्षमा, तितिक्षा, क्षान्तिः *f.*, तपः -पैणं, धैर्य्यं, धृतिः *f.*, धीरत्वं, स्थैर्य्यं, उत्साहः; 'of austerities,' दमः.—(Continuance) संस्थितिः *f.*, स्थितिः *f.*, स्थायित्वं.

To ENDURE, *v. a.* (Bear) सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), संक्षम्, तिज् in des. (तितिक्षते -क्षितुं), मृष् (c. 4. मृष्यति -ते, मर्षितुं, c. 10. मर्षयति -यितुं), धृ in caus. (धारयति -यितुं), उपागम् (c. 1. -गच्छति -गन्तुं), भुज् (c. 7. भुंक्ते, भोक्तुं), धैर्य्यम् आलम्ब् (c. 1. -लम्बते -म्बितुं) or अवलम्ब्. Sometimes expressible by शक्; as, 'I cannot endure to see him,' नं द्रष्टुं न शक्नोमि.

To ENDURE, *v. n.* (Last, continue) स्था (c. 1. तिष्ठति -ते, स्थातुं), चिरस्थायी -यिनी -यि भू.

ENDURED, *p. p.* सोढः -ढा -ढं, विसोढः -ढा -ढं, क्षान्तः -न्ता -न्तं, तितिक्षितः -ता -तं, मर्षितः -ता -तं; 'not to be endured,' न सह्यः -ह्या -ह्यं, न क्षन्तव्यः -व्या -व्यं.

ENDURER, *s.* सोढा *m.* (तृ), विसोढा *m.*, क्षन्ता *m.* (न्तृ), सहः in comp.

ENDURING, *a.* (Lasting) स्थायी -यिनी -यि (न्), चिरस्थायी &c., दीर्घकालस्थायी &c., संस्थः -स्था -स्थं, अविसर्गी -र्गिणी -र्गि (न्).—(Patient) सहिष्णुः -ष्णुः -ष्णु, सहनशीलः -ला -लं, तितिक्षुः -क्षुः -क्षु, सहनः -ना -नं, क्षमः -मा -मं, सहः -हा -हं.

ENDWISE, *adv.* अग्रे, अग्रतस्, अध्यग्रं, अग्रम् उपधाय or अवलम्ब्य.

ENEMY, *s.* शत्रुः *m.*, रिपुः *m.*, अरिः *m.*, अरातिः *m.*, विपक्षः, वैरी *m.* (न्), शात्रवः, प्रतिपक्षः, अपकारी *m.* (न्), अपकर्त्ता *m.* (र्तृ), द्वेषी *m.* (न्), द्वेष्टा *m.* (ष्टृ), द्वेष्यः, द्विषन् *m.* (त्), द्विट् *m.* (ड्), विद्विट्, विद्वेषी *m.* (न्), अहितः, विरोधी *m.* (न्), प्रतिरोधी *m.* -रोधकः, सपत्नः, दुर्हृद् *m.*, अभिघाती *m.* (न्), प्रत्यवस्थाता *m.* (तृ), परः, पारक्यः, परिपन्थी *m.* (न्) -न्थकः, प्रत्यर्थी *m.* (न्), शात्रवः, प्रनिपन्थकः, विजिगीषुः *m.*; 'enemy in the rear,' पार्ष्णिग्राहः; 'having no enemies,' अभूतशत्रुः -त्रुः -त्रु.

ENERGETIC, *a.* उत्साही -हिनी -हि (न्), उद्योगी -गिनी -गि (न्), व्यवसायी -यिनी -यि (न्), उद्यमी -मिनी -मि (न्), उत्साहयुक्तः -क्ता -क्तं, सोत्साहः -हा -हं, सोद्योगः -गा -गं, उद्युक्तः -क्ता -क्तं, तेजोवान् -वती -वत् (त्), तेजस्वी -स्विनी -स्वि (न्), कृतप्रयत्नः -त्ना -त्नं, प्रयत्नवान् -वती -वत् (त्), सयत्नः -त्ना -त्नं, कर्म्मीद्युक्तः -क्ता -क्तं, तीक्ष्णकर्म्मा -र्म्मी -र्म्म (न्), कर्म्मशीलः -ला -लं, कर्म्मी -र्म्मिणी -र्म्मि (न्), शक्तिमान् -मती -मत् (त्), शक्तिरूपः -पा -पं, अनलसः -सा -सं, अतन्द्रः -न्द्रा -न्द्रं, अतन्द्रितः -ता -तं, आलस्यशून्यः -न्या -न्यं, प्रगल्भः -ल्भा -ल्भं, वीर्य्यवान् -वती -वत् (त्).

ENERGETICALLY, *adv.* सोत्साहं, सोद्योगं, सव्यवसायं, उद्यमेन, सयत्नं, शक्त्या, प्रयत्नतस्, सवीर्य्यं, समस्वं, पौरुषेण.

ENERGY, *s.* (Power) तेजः *n.* (स्), वीर्य्यं, शक्तिः *f.*, सत्त्वं, प्रभावः, पौरुषं.—(Activity) उद्योगः, व्यवसायः, उद्यमः, उत्साहः, सत्त्वोत्साहः, कर्म्मोद्योगः, सयत्नता, प्रवृत्तिः *f.* The divine energies or mothers of the gods are ब्राह्मी, महेश्वरी, ऐन्द्री, वाराही, वैष्णवी, कौमारी, कौबेरी, चामुण्डा.

To ENERVATE, *v. a.* दुर्बलीकृ, शिथिलीकृ, तेजः or शक्तिं or वीर्य्यं हृ (c. 1. हरति, हर्त्तुं), क्लीव् in caus. (क्लीवयति -यितुं), क्षीणीकृ, क्षीणं -णां -णं कृ, क्लीबीकृ.

ENERVATED, *p. p.* हृततेजाः -जाः -जः (स्), क्षीणवीर्य्यः -र्य्या -र्य्यं, शिथिलशक्तिः -क्तिः -क्ति.

ENERVATION, *s.* दुर्बलीकरणं, शिथिलीकरणं, तेजोहरणं, तेजोहानिः *f.*, वीर्य्यक्षयः, शक्तिहानिः *f.*, क्लीवभावः, क्लीयत्वं, क्लमीला.

To ENFEEBLE, *v. a.* दुर्बलीकृ, अल्पबलीकृ, तेजः or सत्त्वं हृ (c. 1. हरति, हर्त्तुं).

ENFEEBLED, *p. p.* क्षीणशक्तिः -क्तिः -क्ति, शिथिलबलः -ला -लं, हृततेजाः -जाः -जः (स्), क्षीणसत्त्वः -त्त्वा -त्त्वं, गतवीर्य्यः -र्य्या -र्य्यं, मामर्थ्यहीनः -ना -नं, दुर्बलः -ला -लं; 'by age,' जरितः -ता -तं, जरातुरः -रा -रं.

To ENFORCE, *v. a.* (Give strength to) दृढीकृ, स्थिरीकृ, द्रढ (nom. द्रढयति -यितुं), संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं), सबलं -लां -लं कृ, तेजः or शक्तिं दा.—(Put in act by force) बलेन or बलात्कारेण कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं) or प्रणी (c. 1. -नयति -नेतुं) or निर्वह् in caus. (-वाहयति -यितुं) or निष्पद् in caus. (-पादयति -यितुं). The causal form of a verb may express the sense of enforce; as, 'to enforce payment,' दा in caus. (दापयति -यितुं).

ENFORCED, *p. p.* बलेन प्रवर्त्तितः -ता -तं or निष्पादितः -ता -तं or प्रणीतः -ता -तं, दृढीकृतः -ता -तं, स्थिरीकृतः -ता -तं, संस्तब्धः -ब्धा -ब्धं; 'payment must be enforced,' दाप्यः (*i.e.* he must be made to pay).

ENFORCEMENT, *s.* (Putting in act by force) बलात्कारः, बलेन प्रवर्त्तनं or प्रणयनं or निष्पादनं.—(Corroboration) दृढीकरणं, स्थिरीकरणं, संस्तम्भः, दृढप्रमाणं.—(Urgent evidence) दृढप्रमाणं, गुरुप्रमाणं.

To ENFRANCHISE, *v. a.* (Free from slavery or confinement) दास्यात् or बन्धनाद् मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं) or विमुच् or मोक्ष् (c. 10. मोक्षयति -यितुं) or विसृज् (c. 6. -सृजति -स्रष्टुं).—(Admit to the privileges of citizens) स्वाधीनीकृ, स्वतन्त्रीकृ, स्ववशीकृ, पौरजनानाम् अधिकारान् दा or प्रदा.

ENFRANCHISEMENT, *s.* (Liberation from slavery or custody) दास्यमोक्षः, बन्धनगोक्षः, दासभावाद् विमोक्षः or विमुक्तिः *f.*—(Admission to the privileges of citizen, &c.) पौरजनाधिकारदानं, स्वाधीनीकरणं.

To ENGAGE, *v. a.* (Occupy, employ) व्यापृ in caus. (-पारयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं): 'be occupied in,' व्यापृ in pass. (-प्रियते) with loc. c., वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत् with loc. c., आस्था (c. 1. -तिष्ठति -स्थातुं) with acc. c., सेव् (c. 1. सेवते -वितुं), निरतः -ता -तं भू.—(Appoint to any business) नियुज्, विनियुज्, अधिकृ, प्रकृ, वृ (c. 10. वरयति -यितुं).—(Bind by contract) नियमपत्रेण or नियमेन बन्ध् (c. 9. बध्नाति, बन्धुं), प्रतिज्ञापत्रेण बन्ध्.—(Encounter, attack) युधं कृ, सङ्ग्रामं कृ, समाघातं कृ, संयुध् (c. 4. -युध्यते -योद्धुं), आक्रम् (c. 1. -क्रामति -क्रमितुं).—(Win, draw) आराध् (c. 10. -राधयति -यितुं), आनुरज्ञ् (c. 10. -रञ्जयति -यितुं), आकृष् (c. 1. -कर्षति -क्रष्टुं), अनुनी (c. 1. -नयति -नेतुं).—(Pledge, pawn) पण् (c. 1. पणते -णितुं), आधीकृ.

To ENGAGE, *v. n.* (In battle) संयुध् (c. 4. -युध्यते -योद्धुं), युद्धारम्भं कृ, रणाभियोगं कृ.—(Undertake) आरभ् (c. 1. -रभते -रब्धुं), उपक्रम् (c. 1. -क्रमते -मितुं), व्यवसो (c. 4. -स्यति -सातुं).—(Promise, make a contract) प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), सम्प्रतिज्ञा, नियमं कृ, समयाकृ, पणं कृ, अङ्गीकृ, पण् (c. 1. पणते -णितुं), उपगम् (c. 1. -गच्छति -गन्तुं); 'make a contract of marriage,' विवाहप्रतिज्ञां कृ, विवाहसम्बन्धं कृ, वाग्दानं कृ, वाग्निश्चयं कृ; 'better die than engage in such an act as this,' घरं मरणं न च ईदृशे कर्म्मणि प्रवृत्तिः.

ENGAGED, *p. p.* (Occupied in) व्यापृतः -ता -तं, निरतः -ता -तं, रतः -ता -तं, प्रवृत्तः -त्ता -त्तं, परः -रा -रं, निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, आस्थितः -ता -तं, अवस्थितः -ता -तं, वृत्तः -त्ता -त्तं, निविष्टः -ष्टा -ष्टं, निवेशितः -ता -तं; 'engaged in business,' कर्म्मनिष्ठः -ष्ठा -ष्ठं, कर्म्मोद्युक्तः -क्ता -क्तं, कार्य्यवान् -वती -वत् (त्), क्रियावान् &c., कर्म्मी -र्म्मिणी -र्म्मि (न्), व्यापारी -रिणी -रि (न्), व्यवसायी -यिनी -यि (न्), कर्म्ममूढः -ता -तं; 'being engaged in,' प्रवर्त्तमानः -ना -नं; 'engaged in devotion,' योगारूढः -ढा -ढं; 'engaged in reading,' अध्ययनरतः -ता -तं, अध्ययनाभिमुखः -खा -खं; 'engaged in meditation,' ध्यानपरः -रा -रं, ध्यानतत्परः -रा -रं; 'engaged in one's own duties,' स्वधर्म्मे निरतः -ता -तं; 'engaged in a quarrel,' कलहायितः -ता -तं.—(By contract, promised) प्रतिज्ञातः -ता -तं, संविदितः -ता -तं, उपगतः -ता -तं, अभ्युपगतः -ता -तं, अभ्युपेतः -ता -तं, अङ्गीकृतः -ता -तं, प्रक्षमः -मा -मं, कृतसङ्केतः -ता -तं, कृतसमयः -या -यं, कृतसम्बन्धः -न्धा -न्धं.—(Engaged to be married) प्रतिज्ञाविवाहितः -ता, वाग्दत्तः -त्ता, प्रक्तः -त्ता.

ENGAGEMENT, *s.* (Occupation) व्यापारः, कार्य्यं, कर्म्म *n.* (न्), प्रवृत्तिः *f.*, प्रवर्त्तनं, वृत्तिः *f.*, व्यवसायः, व्यवहारः.—(Agreement, contract) प्रतिज्ञा -ज्ञानं, सङ्केतः, संविद् *f.*, समयः, नियमः, संस्कारः, उपगमः, अभ्युपगमः, अभ्युपायः, पणः, परिपणनं, व्यवस्था, प्रक्षतिः *f.*, समाधिः *m.*; 'to make an engagement,' समयं कृ, समयाकृ. *See To* ENGAGE, *v. n.* 'To keep an engagement,' प्रतिज्ञातं पाल् (c. 10. पालयति -यितुं); 'to break an engagement,' समयं भिद् (c. 7. भिनत्ति, भेत्तुं), समयभेदं कृ, विसंवादं कृ; 'one who has fulfilled his engagement,' कृतप्रतिज्ञः.—(Marriage-contract) वाग्निश्चयः, विवाहप्रतिज्ञा. — (Battle) युद्धं, रणाभियोगः, समाघातः, सङ्ग्रामः, सम्प्रहारः.—(Obligation) अवश्यकर्त्तव्यं.

ENGAGING, *a.* (Attractive, pleasing) मनोहरः -रा -रं, हृदयग्राही -हिणी -हि (न्), हृदयङ्गमी -मिणी -मि (न्), मित्रयुः -युः -यु, मित्रवत्सलः -ला -लं, अनुरञ्जकः -का -कं, हृदयङ्गमः -मा -मं, अनुरागजनकः -का -कं.

ENGAGINGLY, *adv.* मनोहरं, सप्रणयं, यथा हृदयम् आकृष्यते तथा.

To ENGENDER, *v. a.* (Beget) जन् in caus. (जनयति -यितुं), सञ्जन्, विजन्, प्रसू (c. 2. -सूते, c. 4. -सूयते -सोतुं).—(Produce) उत्पद् in caus. (-पादयति -यितुं), जन् in caus.

ENGENDERED, *p. p.* जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, उत्पादितः -ता -तं, प्रसूतः -ता -तं, प्ररूढः -ढा -ढं, उद्भवः -वा -वं, in comp.

ENGINE, *s.* यन्त्रं, उपकरणं, साधनं, विलासः: 'military engine,' युद्धयन्त्रं, युद्धास्त्रं; 'fire-engine,' अग्निनिर्व्वापणयन्त्रं.

ENGINEER, *s.* यन्त्रकारः -रकः, यन्त्रनिर्म्माणशिल्पविद्, यन्त्रविद्, कलाज्ञः.

ENGINEERING, *s.* यन्त्रकारस्य व्यापारः or कर्म्म *n.* (न्).

To ENGIRD, *v. a.* परिवेष् (c. 1. -वेष्टते -ष्टितुं), मण्डल (nom. मण्डलयति -यितुं).

ENGLAND, *s.* श्वेतद्वीपः, इङ्गलण्डनामको देशः.

To ENGORGE, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), निगृ (c. 6. -गिरति -गरितुं -रीतुं).

To ENGRAPPLE, *v. n.* बाहुबाहवि or हस्ताहस्ति युध् (c. 4. युध्यते, योद्धुं).

To ENGRASP, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्त्तुं).

To ENGRAVE, *v. a.* तक्ष् (c. 1. तक्षति -क्षितुं, c. 5. तक्ष्णोति), त्वष् (c. 1. त्वष्टि -ष्टितुं), रेखादिना अलकृ or उपस्कृ or मुद्रीकृ or मुद्र (nom. मुद्रयति -यितुं).

ENGRAVED, *p. p.* तक्षः -क्षा -क्षं, रेखादिना मुद्रितः -ता -तं or मुद्रीकृतः -ता -तं.

ENGRAVER, *s.* तक्षकः, तक्षा *m.* (ष्टृ), त्वष्टा *m.* (ष्टृ), मुद्राकरः.

ENGRAVING, *s.* तक्षणं, तक्षणकर्म्म *n.* (न्).—(A print) मुद्रा.

To ENGROSS, *v. a.* (Thicken) स्थूलीकृ, घनीकृ, बान्द्रीकृ, निर्गिडीकृ.—(Fatten) पुष् in caus. (पोषयति -यितुं), पी in caus. (पाययति -यितुं).—(Take the whole) सर्व्वं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), पूर्व्वं ग्रह्, समुदायं ग्रह्; 'to engross the mind,' चित्तैकाग्र्यं जन् (c. 10. जनयति -यितुं), चित्तम् अनन्यविषयं कृ or एकप्रवणं कृ.—(Purchase the whole of a commodity with a view to sell at a higher price) अधिकमूल्येन विक्रयार्थं सर्व्वभाण्डानि पूर्व्वं क्री (c. 9. क्रीणाति -णीते, क्रेतुं), पूर्व्वक्रयं कृ, प्रख्या (c. 2. -ख्याति -तुं).—(Copy in a large distinct hand) सुव्यक्ताक्षरैः or स्पष्टरूपेण लिख् (c. 6. लिखति, लेखितुं), सुस्पष्टाक्षराणि लिखित्वा उत्तृ (c. 1. -तरति -रितुं -रीतुं).

ENGROSSED, *p. p.* (Absorbed) निविष्टः -ष्टा -ष्टं, अभिनिविष्टः -ष्टा -ष्टं, आविष्टः -ष्टा -ष्टं, निमग्नः -ग्ना -ग्नं, आसक्तचेताः -ताः -तः (स्), अनन्यविषयः -या -यं, एकप्रवणः -णा -णं, एकायः -या -यं, परायणः -णा -णं; 'by fear,' भयैकप्रवणः -णा -णं.—(Forestalled) पूर्व्वं गृहीतः -ता -तं or क्रीतः -ता -तं.

ENGROSSER, *s.* (Forestaller) पूर्व्वक्रेता *m.* (तृ), सर्व्वभाण्डक्रेता, पूर्व्वक्रयाहकः, प्रख्याता *m.* (तृ).—(Copier) सुस्पष्टरूपेण लेखकः, सुव्यक्तलिपिकारः.

To ENGULPH, *v. a.* अलावर्त्ते or जलगुल्मे निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवपूर्णेन ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्.

To ENHANCE, *v. a.* वृध् in caus. (वर्धयति -यितुं), उपचि (c. 5. -चिनोति -चेतुं), अधिकीकृ, अधिकं -कां -कं कृ, गर (nom. गरयति -यितुं), प्रचुरीकृ; 'is enhanced,' उपचीयते.

ENHANCED, *p. p.* वर्धितः -ता -तं, अधिकीकृतः -ता -तं, उपचितः -ता -तं.

ENHANCEMENT, *s.* वृद्धिः *f.*, वर्धनं, उपचयः, विवर्धनं, उन्नतिः *f.*, अभ्युदयः.

ENIGMA, *s.* गूढं, गूढवाक्यं, गूढप्रश्नः, प्रवह्लिः *f.* -ह्लिका, प्रहेलिका, प्रश्नदूती,

खेदः, खेदोक्तिः *f.*

ENIGMATICAL, *a.* गूढः -ढा -ढं, गूढार्थः -र्था -र्थं, निगूढार्थः -र्था -र्थं, सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः -र्था -र्थं, द्व्यर्थः -र्था -र्थं, दुर्ज्ञेयः -या -यं, बोधागम्यः -म्या -म्यं, अव्याख्येयः -या -यं, व्याख्यागम्यः -म्या -म्यं, वक्रः -क्रा -क्रं.

ENIGMATICALLY, *adv.* गूढं, सगूढार्थं, निगूढार्थतम्, अस्पष्टं, अव्यक्तं, वक्रोक्त्या.

To ENJOIN, *v. a.* आदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, प्रदिश्, विनिर्दिश्, समादिश्, सन्दिश्, व्यादिश्, उपदिश्; आज्ञा in caus. (-ज्ञापयति -यितुं), समाज्ञा. नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), विनियुज्, सन्नियुज्, चुद् (c. 10. चोदयति -यितुं), प्रचुद्, सञ्चुद्, शास् (c. 2. शास्ति, शासितुं), विधा (c. 3. -दधाति -धातुं).

ENJOINED, *p. p.* आदिष्टः-ष्टा-ष्टं, निर्दिष्टः-ष्टा-ष्टं, उद्दिष्टः-ष्टा-ष्टं, प्रचोदितः-ता-तं, सञ्चोदितः-ता-तं, विहितः-ता-तं: 'by the vedas,' वेदविहितः-ता-तं.

To ENJOY, *v. a.* भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उपभुज्, अनुभुज्, परिभुज्, अधिभुज्; अश् (c. 5. अश्नुते, c. 9. अश्नाति, अशितुं), समश्, उपाश्; अनुभू (c. 1. -भवति -वितुं), आस्वद् or आस्वाद् (c. 1. -स्वदति or -स्वादति -दितुं), पुष् (c. 4. पुष्यति, पोषुं) with acc. c.—(Delight in) रम् (c. 1. रमते, रन्तुं), अभिरम्, नन्द् (c. 1. नन्दति -न्दितुं), अभिनन्द्. रुच् (c. 1. रोचते -चितुं).—(Possess with satisfaction) सुखेन or सन्तोषेण उपयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं) or भृ (c. 10. धारयति -यितुं) or धा (c. 3. धत्ते, धातुं) or सेव् (c. 1. सेवते -वितुं).

ENJOYABLE, *a.* भोग्यः -ग्या -ग्यं, उपभोग्यः -ग्या -ग्यं, सुभोगीनः -ना -नं, भोगवान् -वती -वत् (त्), रम्यः -म्या -म्यं, रमणीयः -या -यं, सुभगः -गा -गं, आनन्ददः -दा -दं, सुखदः -दा -दं, मनोरमः -मा -मं, कमनीयः -या -यं, आस्वादनीयः -य, -यं.

ENJOYABLY, *adv.* सभोगं, सोपभोगं, रमणीयं, सुभगं, जोषं.

ENJOYED, *p. p.* भुक्तः -क्ता -क्तं, उपभुक्तः -क्ता -क्तं, कृतोपभोगः -गा -गं, अनुभूतः -ता -तं, अशितः -ता -तं, आस्वादितः -ता -तं.

ENJOYMENT, *s.* (Fruition) भोगः, भुक्तिः *f.*, उपभोगः, परिभोगः, अनुभवः, आस्वादः -दनं, फलभोगः, सुखास्वादः, निर्वेशः.—(Pleasure) सुखं, सौख्यं, रतिः *f.*, रतं, आनन्दः, हर्षः, आह्लादः, आमोदः, प्रमोदः, सन्तोषः, मदः.

To ENKINDLE, *v. a.* उद्दीप् in caus. (-दीपयति -यितुं), उज्जृष् in caus. (-जृषयति -यितुं), उत्तिज् in caus. (-तेजयति -यितुं), सन्दिप् (c. 7. -दृम्पे -म्पितुं), प्रज्वल् in caus. (-ज्वलयति -यितुं), संज्वल्, सन्धुक्ष् (c. 10. -धुक्षयति -यितुं).

ENKINDLED, *p. p.* उद्दीप्तः-प्ता -प्तं, समिद्धः -द्धा -द्धं, उत्तेजितः -ता -तं, उज्जृषितः -ता -तं, ज्वलितः -ता -तं, सन्धुक्षितः -ता -तं.

To ENLARGE, *v. a.* (Extend, make large) विस्तृ in caus. (-स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), प्रथ् (c. 10. प्रथयति -यितुं), विशालीकृ, विपुलीकृ, प्रचुरीकृ, प्रसृ in caus. (-सारयति -यितुं).—(Augment) वृध् in caus. (वर्धयति -यितुं), संवृध्; रुध् in caus. (रुधयति -यितुं), आपॄ in caus. (-प्याययति -यितुं), समापॄ, स्फाय् in caus. (स्फाययति -यितुं), स्फीतीकृ, वृद्धिं नी (c. 1. नयति, नेतुं), बृंह् (c. 10. बृंहयति -यितुं), उपबृंह्.

To ENLARGE, *v. n.* (Grow large) वृध् (c. 1. वर्धते -र्धितुं), अभिवृध्, विवृध्, प्रवृध्; विशालीभू, विपुलीभू, प्रचुरीभू, पॄ (c. 1. प्यायते, प्यातुं), उपचि in pass. (-चीयते), स्फाय् (c. 1. स्फायते -यितुं), आस्फाय्, विसृम् in pass. (-सृम्यते), विस्तृ in pass. (-स्तीर्यते), वृद्धिम् इ (c. 2. इति -तुं), प्रसृ (c. 1. -सरति -रोतुं).—(Describe at large) वर्ण् (c. 10. वर्णयति -यितुं), उपवर्ण्, संवर्ण्, सुविस्तरेण वद् (c. 1. वदति -दितुं), सविस्तारेण or वाक्प्रपञ्चेन व्याख्या (c. 2. -ख्याति -तुं), प्रपञ्च् (c. 10. -पञ्चयति -यितुं), अतुर्किं कृ.

ENLARGED, *p. p.* प्रवृद्धः -द्धा -द्धं, प्रथितः -ता -तं, उपचितः -ता -तं, वर्धितः -ता -तं, प्ररूढः -ढा -ढं, प्रीनः -ना -नं, स्फीतः -ता -तं, स्फायितः -ता -तं, आप्यायितः -ता -तं, बृंहितः -ता -तं.

ENLARGEMENT, *s.* वृद्धिः *f.*, वर्धनं, प्रवृद्धिः *f.*, विवृद्धिः *f.*, स्फातिः *f.*, स्फीतिः *f.*, विस्तारः, आप्यायनं, बृंहणं, विपुलता, विशालता, स्फारः, प्रपञ्चः, बाहुल्यं.

ENLARGER, *s.* वृद्धिकरः, स्फीतिकरः, विस्तारकः, संवर्धकः.

To ENLIGHTEN, *v. a.* विकाश् in caus. (-काशयति -यितुं), प्रकाश्, द्युत् in caus. (द्योतयति -यितुं), प्रद्युत्, उद्द्युत्, दीप्, in caus. (दीपयति -यितुं), विदीप्, उद्दीप्; विराज् in caus. (-राजयति -यितुं), भास् in caus. (भासयति -यितुं), प्रभास्, उद्भास्, भाज् in caus. (भाजयति -यितुं), विमल् (nom. विमलयति -यितुं).—(Instruct) उपदिश् (c. 6. -दिशति -देष्टुं).

ENLIGHTENED, *p. p.* प्रकाशितः -ता -तं, प्रद्योतितः -ता -तं, उद्द्योतितः -ता -तं, दीपितः -ता -तं, सुप्रभातः -ता -तं.—(Instructed) गृहीतार्थः -र्था -र्थं, प्राप्तबुद्धिः -द्धिः -द्धि, उपदिष्टः -ष्टा -ष्टं.

To ENLIST, *v. a.* (Enter names on a list) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति -यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्.—(Enlist soldiers) सैन्यमध्ये समारुह् in caus. or सैन्यनामावलिमध्ये आरुह् or अभिलिख्, युद्धकर्म्मणि व्यापृ in caus. (-पारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं), अस्त्राणि ग्रह् in caus. (ग्राहयति -यितुं).—(Gain over to one's own party) स्वपक्षीकृ, आत्मपक्षीकृ, आत्मसात्कृ.

ENLISTED, *p. p.* सैन्यनामावलिमध्ये समारोपितः -ता -तं, अभिलिखितः -ता -तं.

ENLISTING, *s.* सैन्यनामावलिमध्ये समारोपणं or आरोपणं or नामाभिलेखनं, युद्धे प्रवर्त्तनं.

To ENLIVEN, *v. a.* आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, उत्तिज् in caus. (-तेजयति -यितुं), तेजः कृ or दा.—(Make cheerful) हृष् in caus. (हर्षयति -यितुं), ह्लाद् in caus. (ह्लादयति -यितुं), आह्लाद्, उल्लस् in caus. (-लासयति -यितुं).

ENMITY, *s.* वैरं, वैरिता, शत्रुता, रिपुता, अरिता, शात्रवं, विपक्षता, द्वेषः -षणं, विद्वेषः, विरोधः, वैरभावः, प्रतिद्वन्द्वं, प्रतिपक्षता, विद्विष्टता, अप्रीतिः *f.*, परता.

To ENNOBLE, *v. a.* (Raise to nobility) कुलीनपदे नियुज् (c. 7. -युंक्ते -योक्तुं) or प्रतिपद् in caus. (-पादयति -यितुं).—(Dignify) शुभ् in caus. (शोभयति -यितुं), सम्मन् in caus. (-मानयति -यितुं), उत्कर्षं कृ, उन्नतिं कृ, यशः कृ.

ENNOBLEMENT, *s.* प्रतिपत्तिः *f.*, उत्कर्षः, पदवृद्धिः *f.*, कुलीनता, पदसमुन्नतिः *f.*

ENNUI, *s.* ग्लानिः *f.*, ग्लाक्तिः *f.*, आक्तिः *f.*, विषादः, विपन्नता, विमर्दः.

ENORMITY, *s.* (Atrocious crime) अतिपातकं, अतिपापं, महापातकं, महापापं, अघोरपातकं.—(Atrociousness) अतिदुष्टता, अघोरता, घोरता.

ENORMOUS, *a.* (Beyond measure, exceeding) अतिमात्रः -त्रा -त्रं, अत्यन्तः -न्ता -न्तं, अपरिमितः -ता -तं.—(Very large) अतिमहान् -हती -हत् (त्). सुमहान् &c., अतिबृहन् -हती -हत् (त्).—(In body) अतिकायः -या -यं, बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं, भीमविग्रहः -हा -हं.

ENORMOUSLY, *adv.* अत्यन्तं, अतिमात्रं, अतिशयेन, सुमहत्, अतिमहत्.

ENOUGH, *adv.* अलं, यथेष्टं, इयत्तं, पर्य्याप्तं, प्रचुरं, प्रचुरतरं, उपयुक्तं, कृतं, यथावत्; 'quite enough,' अलमतिं; 'enough of this,' अलम् अनेन; 'enough of ceremony,' कृतम् आदरेण; 'to be enough for,' क्षम् (c 1. क्षमते -मितुं).

ENOUGH, *a.* यथेष्टः -ष्टा -ष्टं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, समर्थः -र्था

-यैं, पर्य्याप्तः-प्ता-प्तं, प्रचुरः-रा-रं-रतरः-रा-रं, सम्पूर्णः-र्णा-र्णं, बहुलः-ला-लं; 'just food enough to satisfy hunger,' तृप्तिमात्रोचितम् अन्नं; 'food enough for a year,' संवत्सरनिर्वाहसमर्थम् अन्नं.

ENOUGH, *s.* यथेष्टत्वं, पर्य्याप्तिः *f.*, प्राचुर्यं, उपयुक्तत्वं, बाहुल्यं, निर्वाहः; 'having enough for subsistence,' अलम्प्रीणिकः-का-कं.

ENQUIRE, ENQUIRY. *See* INQUIRE, &c.

To ENRAGE, *v. a.* कुप् in caus. (कोपयति-यितुं), प्रकुप्, संकुप्; क्रुध् in caus. (क्रोधयति-धितुं), रुष् in caus. (रोषयति-यितुं), क्रोधं or कोपं जन् (c. 10. जनयति-यितुं).

To be ENRAGED, *v. n.* कुध् (c. 4. कुध्यति, क्रोद्धुं), संक्रुध्, अभिसंक्रुध्; कुप् (c. 4. कुप्यति, कोपितुं), प्रकुप्, सङ्कुप्; रुष् (c. 4. रुष्यति, रोषितुं), with dat. c.

ENRAGED, *p. p.* क्रुद्धः-द्धा-द्धं, कुपितः-ता-तं, प्रकोपितः-ता-तं, प्रकुपितः-ता-तं, संक्रुद्धः-द्धा-द्धं, कोपाकुलः-ला-लं, रुषितः-ता-तं, रुष्टः-ष्टा-ष्टं, संरब्धः-ब्धा-ब्धं, उपजातकोपः-पा-पं, जातामर्षः-र्षा-र्षं, आगतमन्युः-न्युः-न्यु, जातरोषः-षा-षं, इद्धमन्युः-न्युः-न्यु, उच्चान्वितः-ता-तं.

To ENRAPTURE, ENRAVISH, *v. a.* परमहर्षेण मुह् in caus. (मोहयति-यितुं) or सम्मुह्, अतिशयेन प्रहृष् in caus. (-हर्षयति-यितुं) or परिहृष्; 'to be enraptured,' अत्यन्तं हृष् (c. 4. हृष्यति, हर्षितुं), पुलकितः-ता-तम् अस्, परमहर्षेण मुह् (c. 4. मुह्यति, मोहितुं).

ENRAPTURED, *p. p.* हर्षमोहितः-ता-तं, सम्मोहितः-ता-तं, प्रहर्षितः-ता-तं, सम्प्रहृष्टः-ष्टा-ष्टं, पुलकितः-ता-तं, रोमाञ्चितः-ता-तं, परमानन्दितः-ता-तं, विस्मितः-ता-तं, हर्षोन्मत्तः-त्ता-त्तं.

ENRAVISHMENT, *s.* परमहर्षजो मोहः, सम्मोहः, प्रहर्षः, हर्षावेशः, परमानन्दः, अत्यन्ताह्लादः, विस्मयः, उन्मदः.

To ENRICH, *v. a.* (Make rich) सधनं-नां-नं कृ, आढ्यं-ढ्यां-ढ्यं कृ, समृद्धीकृ, वृध् in caus. (वर्धयति-यितुं), धनं or अर्थं वृध्.—(Make fertile) आप्यै in caus. (-प्याययति-यितुं), स्फाय् in caus. (स्फावयति-यितुं), स्फीतीकृ, सफल (nom. सफलयति-यितुं).—(Adorn) शुभ् in caus. (शोभयति-यितुं), उपशुभ्.

ENRICHED, *p. p.* संवर्धितः-ता-तं, आप्यायितः-ता-तं, स्फीतीकृतः-ता-तं.

ENRICHING, *a.* अर्थकरः-री-रं, अर्थजनकः-का-कं, शोभकृत् *m. f. n.*

To ENROLL, *v. a.* नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति-यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति-लेखितुं) or लिख्.

ENROLLED, *p. p.* नामावलिपत्रे समारोपितः-ता-तं or अभिलिखितः-ता-तं, अभिलिखितनामा-मा-म (न्), आरोपितनामा-मा-म (न्).

ENROLLER, *s.* नामलेखकः, नामाभिलेखकः, नामसमारोपकः, नामारोपकः.

ENROLMENT, *s.* नामाभिलेखनं, नामसमारोपणं, नामारोपणं, नामलिखनं, नामलेखनं.

ENS, *s.* (Being) भूतं, अधिभूतं, सत्त्वं, भावः, सत्ता, सम्भवः.

ENSAMPLE, *s.* *See* EXAMPLE.

To ENSANGUINE, *v. a.* रक्तेन or शोणितेन लिप् (c. 6. लिम्पति, लेप्तुं), रक्ताक्तं-क्तां-क्तं कृ.

To ENSCONCE, *v. a.* छद् (c. 10. छादयति-यितुं), संछद्, प्रच्छद्, रक्ष् (c. 1. रक्षति-क्षितुं), गुप् (c. 1. गोपायति, गोप्तुं), अभिगुप्, गुह् (c. 1. गूहति-हितुं); 'ensconce one's self,' आत्मि (c. 1. -श्रयति-यितुं), समात्मि, संत्मि, आत्मानं गुप् or गुह्.

ENSCONCED, *p. p.* समात्मिः-ता-तं, गुप्तः-प्ता-प्तं, प्रच्छन्ने स्थापितः-ता-तं.

To ENSEAR, *v. a.* दह् in caus. (दाहयति-यितुं), क्षारम् क्षु in caus. (क्षपयति-यितुं).

To ENSHIELD, *v. a.* आछद् (-छादयति-यितुं), गुप् (c. 1. गोपायति, गोप्तुं).

To ENSHRINE, *v. a.* पवित्रद्रव्यं सुगहनाधारे or सुगहनभाण्डे or सुप्रतिष्ठितभाजने निविश् in caus. (-वेशयति-यितुं) or रक्ष् (c. 1. रक्षति-क्षितुं).

ENSHRINED, *p. p.* सुप्रतिष्ठितभाण्डे or सुगहनाधारे रक्षितः-ता-तं.

ENSIFORM, *a.* अस्याकारः-रा-रं, खड्गाकृतिः-तिः-ति, खड्गाकारः-रा-रं.

ENSIGN, *s.* (Banner) पताका, ध्वजः, ध्वजपटः, केतनं, केतुः *m.*, वैजयन्ती, केतुवसनः, जयन्तः कदली-लिका, उच्छ्रयः.—(Badge) चिह्नं, लिङ्गं, ध्वजः, व्यञ्जनं, लक्षणं.—(Officer). *See* the next word.

ENSIGN-BEARER, *s.* ध्वजी *m.* (न्), ध्वजवान् *m.* (त्), पताकी *m.* (न्), वैजयन्तिकः, ध्वजधारी *m.* (न्), पताकाधारी *m.* (न्), पताकावाहकः.

To ENSLAVE, *v. a.* दासीकृ, वशीकृ, करदीकृ, दास (nom. दासयति-यितुं), दास्ये or दासत्वे नियुज् (c. 7. -युनक्ति-योक्तुं), दास्यं गम् in caus. (गमयति-यितुं).

ENSLAVED, *p. p.* दासीकृतः-ता-तं, दास्यं गमितः-ता-तं, दास्यगतः-ता-तं.

ENSLAVEMENT, *s.* दास्यं, दासत्वं, दासभावः, परप्रेष्यत्वं, बन्धनं.

To ENSNARE, *v. a.* *See* INSNARE.

To ENSUE, *v. n.* अनुवृत् (c. 1. -वर्त्तते-र्त्तितुं), प्रवृत्, अनुसृ (c. 1. -सरति-सर्त्तुं), उत्पद् in pass. (-पद्यते), जन् in pass. (जायते), अन्वि (c. 2. अन्वेति-तुं rt. इ), अनुया (c. 2. -याति-तुं), उपस्था (c. 1. -तिष्ठति-स्थातुं), अनुष्ठा, पश्चाद् आगम् (c. 1. -गच्छति-गन्तुं), सम्भू, प्रभू, उद्भू.

ENSUED, *p. p.* उत्पन्नः-न्ना-न्नं, प्रवृत्तः-त्ता-त्तं, वृत्तः-त्ता-त्तं, जातः-ता-तं.

ENSUING, *a.* आगामी-मिनी-मि (न्), भावी-विनी-वि (न्), उत्तरकालीनः-ना-नं, अनुवर्त्ती-र्त्तिनी-र्त्ति (न्), अनागतः-ता-तं; 'in the ensuing year,' आगामिवत्सरे.

To ENSURE, *v. a.* *See* INSURE.

ENTABLATURE, ENTABLEMENT, *s.* गृहस्य यो भागः स्तम्भाग्रेऽवलम्बते.

ENTAIL, *s.* (An estate inherited lineally) क्रमागतरिक्थं, क्रमायातरिक्थं.—(Rule of descent) क्रमागमविधिः *m.*, अन्वयागमविधिः *m.*, बद्धत्वं, नियुक्तता.

To ENTAIL, *v. a.* (An estate) रिक्थं or स्थावरधनादि विशेषक्रमागमानुसारेण दायादिभ्यः प्रदा (c. 3. -ददाति-दातुं), रिक्थाधिकारित्वं विशेषक्रमागमानुसारात् स्थिरीकृ or बन्ध् (c. 9. बध्नाति, बन्धुं).—(Bring on) आवह् (c. 1. -वहति-वोढुं) or उत्पद् in caus. (-पादयति-यितुं) or जन् in caus. (जनयति-यितुं).

To ENTANGLE, *v. a.* संश्लिष् in caus. (-श्लेषयति-यितुं), आश्लिष्, परिश्लिष्, श्लिष्टीकृ, संलग्नीकृ, ग्रन्थ् (c. 1. ग्रन्थति-न्थितुं), ग्रन्थिलीकृ, सङ्कुलीकृ, आकुलीकृ, आकुञ्च् (c. 1. -कुञ्चति-ञ्चितुं), व्यावृत् in caus. (-वर्त्तयति-यितुं), सङ्कीर्णीकृ, सबन्ध् (c. 9. -बध्नाति-बन्धुं), सम्मिश्र् (c. 10. -मिश्रयति-यितुं); 'to be entangled, as the hair,' जट् or रूह् (c. 1. जटति, रूटति-टितुं); 'to disentangle,' उज्झन्थ्, समुज्झन्थ्.

ENTANGLED, *p. p.* (Caught) श्लिष्टः-ष्टा-ष्टं, आश्लिष्टः-ष्टा-ष्टं, संश्लिष्टः-ष्टा-ष्टं, परिश्लिष्टः-ष्टा-ष्टं, परिलग्नः-ग्ना-ग्नं, संलग्नः-ग्ना-ग्नं, सक्तः-क्ता-क्तं, सबद्धः-द्धा-द्धं.—(Confused) सङ्कीर्णः-र्णा-र्णं, सङ्कुलः-ला-लं, ग्रन्थिलः-ला-लं.—(Twisted) आकुञ्चितः-ता-तं; 'entangled in the teeth,' दन्तासक्तः-क्ता-क्तं; 'entangled in the branches,' विटपपरिलग्नः-ग्ना-ग्नं, शाखासु सक्तः-क्ता-क्तं; 'entangled hair,' जटा, जुटकं, जूटः; 'having entangled hair,' जटावान्-वती-वत् (त्), जटिलः-ला-लं; 'entangled in a net,' जालबद्धः-द्धा-द्धं.

ENTANGLEMENT, *s.* आश्लिष्टता, संलग्नता, ग्रन्थिलत्वं, जटिलत्वं; सङ्कुलता सङ्कीर्णत्वं, सङ्करः, सङ्कर्यं, व्यतिकरः, आकुलत्वं, व्याकुलत्वं.

To ENTER, *v. a.* and *n.* विश् (c. 6. विशति, वेष्टुं), प्रविश्, निविश्, आविश्, समाविश्, आगम् (c. 1. -गच्छति -गन्तुं), अभिगम्, अभ्यागम्, अनुगम्, आया (c. 2. -याति -तुं), अभिया, उपस्था (c. 1. -तिष्ठति -स्थातुं), श्रि (c. 1. श्रयति -श्रयितुं), आश्रि, गाह् (c, 1. गाहते -हितुं), विगाह्. —(Set down in writing) अभिलिख् (c. 6. -लिखति -लेखितुं), पुस्तके समारुह् in caus. (-रोपयति -रोपितुं) or आरुह्.—(Enter upon a business) प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं), प्रक्रम् (c. 1. -क्रमते -मितुं), उपक्रम्.—(Enter into another's views) परमतम् अनुमन् (c. 4. -मन्यते -मन्तुं) or ग्रह् (c. 9. गृह्णाति, गृहीतुं).

ENTERED, *p. p.* प्रविष्टः -ष्टा -ष्टं, निविष्टः -ष्टा -ष्टं, आविष्टः -ष्टा -ष्टं.—(In writing) अभिलिखितः -ता -तं, आरोपितः -ता -तं, लेख्यारूढः -ढा -ढं, समारोपितः -ता -तं.

ENTERPRISE, *s.* (Undertáking) प्रवृत्तिः *f.*, उद्योगः, उत्साहः, आरम्भः, उपक्रमः, व्यवसायः, उद्यमः, चेष्टा, चेष्टितं, कर्म्म *n.* (न्), प्रौढिः *f.*, ग्रहः, साध्यं.—(Bold undertaking) महोत्साहः, दुर्गकर्म्म *n.* (न्), अद्भुतकर्म्म *n.*, आश्चर्य्यकर्म्म *n.*, कठिनकर्म्म *n.*

To ENTERPRISE, *v. a.* उपक्रम् (c. 1. -क्रमते -मितुं), आरभ् (c. 1. -रभते -रब्धुं), समारभ्, व्यवसो (c. 4. -स्यति -सातुं), प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं).

ENTERPRISER, *s.* कठिनकर्म्मप्रवृत्तः, दुर्गकर्म्मव्यवसायी *m.* (न्), महोत्साहः.

ENTERPRISING, *a.* व्यवसायी -यिनी -यि (न्), व्यवसायकारी -रिणी -रि (न्), उद्योगी -गिनी -गि (न्), सोद्योगः -गा -गं, कठिनकर्म्मव्यवसायी &c, साहसिकः -की -कं.

To ENTERTAIN, *v. a.* (A guest with hospitality) अतिथिं सत्कृ or सेव् (c. 1. सेवते -वितुं) or पूज् (c. 10. पूजयति -यितुं), आतिथ्यं कृ, सत्कारं कृ; 'with choice food,' स्वाद्वन्नैः or भोजनविशेषैः सन्तुष् in caus. (-तोषयति -यितुं) or तृप् in caus. (तर्पयति -यितुं) or भुज् in caus. (भोजयति -यितुं).—(Amuse) विनुद् (c. 10. -नोदयति -यितुं), विलस् (c. 10. -लासयति -यितुं), रम् (c. 10. रमयति -यितुं).—(Hold in the mind) मनसि or मनसा धृ (c. 1. धरति, धर्त्तुं) or उपलभ् (c. 1. -लभते -लब्धुं) or ग्रह् (c. 9. गृह्णाति, गृहीतुं).

ENTERTAINED, *p. p.* (Hospitably) सत्कृतः -ता -तं.—(Amused) विनोदितः -ता -तं.

ENTERTAINER, *s.* सत्कारी *m.* (न्), सत्कृत् *m.*, आमन्त्रयिता *m.* (तृ), निमन्त्रणकृत्.

ENTERTAINING, *a.* विनोदकः -का -कं, विनोदजनकः -का -कं, हास्ययुक्तः -क्ता -क्तं.

ENTERTAINMENT, *s.* (Amusement) विनोदः, विलासः.—(Of guests) सत्कारः, सत्कर्म्म *n.* (न्), अतिथिसत्क्रिया, अतिथिसेवा, अतिथिपूजनं, आतिथ्यं, अतिथिक्रिया, सङ्ग्रहः.—(Feast) उत्सवः, सहभोजनं, सम्भोजनं.

To ENTHRALL. *See* INTHRALL.

To ENTHRONE, *v. a.* राजासने or सिंहासने उपविश् in caus. (-वेशयति -यितुं) or अध्यास् in caus. (-आसयति -यितुं), राज्ये अभिषिच् (c. 6. -सिञ्चति -सेक्तुं).

ENTHRONED, *p. p.* सिंहासनोपविष्टः -ष्टा -ष्टं, सिंहासनाध्यासितः -ता -तं, अध्यासीनः -ना -नं, राज्ये अभिषिक्तः -क्ता -क्तं.

ENTHRONEMENT, *s.* सिंहासनोपवेशनं, सिंहासनाध्यासः, अभिषेकः.

ENTHUSIASM, *s.* (Religious) अतिशयदेयभक्तिजन्यो मादविशेषः or उन्मादः or मदः or उन्मदः, अतिश्रद्धाप्रयुक्ता उन्मत्तता, भक्तिव्यग्रता, श्रद्धाव्यग्रता, भक्तिचञ्चलता, मिथ्याभक्तिः *f.*—(Warmth, zeal) उत्साहः, उद्योगता, उष्मः, उग्रता, उत्कटता, प्रचण्डता, व्यग्रता, उग्रता, औत्सुक्यं, तैक्ष्ण्यं, तीक्ष्णता, अत्यनुरागः, बुद्धिव्यग्रता.

ENTHUSIAST, *s.* (In religion) अतिशयदेयभक्तिवाद उन्मत्तो जनः, देयभक्तिव्यग्रः, मिथ्याभक्तिमान् *m.* (त्).—(In any thing) उन्मत्तबुद्धिः *m.*, व्यग्रबुद्धिः *m.*, प्रमदजनः, तीक्ष्णजनः.

ENTHUSIASTIC, ENTHUSIASTICAL, *a.* व्यग्रः -ग्रा -ग्रं, उन्मत्तः -त्ता -त्तं, चञ्चलः -ला -लं, उच्चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उग्रः -ग्रा -ग्रं, उत्साहः -ही -हि, उग्रः -ग्रा -ग्रं, अत्यनुरागी -गिणी -गि (न्), उत्सुकः -का -कं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), उद्युक्तः -क्ता -क्तं, उन्मादवान् -वती -वत् (त्).

ENTHUSIASTICALLY, *adv.* अतिव्यग्रं, उग्रभावेन, अत्यनुरागेण, सकुतूहलं.

ENTHYMEME, *s.* न्यूनैकावयवः or न्यूनैकपक्षो न्यायविशेषः, लुप्तन्यायः.

To ENTICE, *v. a.* आकृष् (c. 1. -कर्षति -क्रष्टुं), लुभ् in caus. (लोभयति -यितुं), प्रलुभ्, परिलुभ्, मुह् in caus. (मोहयति -यितुं), भ्रान्तिं जन् (c. 10. जनयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), लल् (c. 10. लालयति -यितुं), दुष्कर्म्मणि प्रवृत् in caus. (-वर्त्तयति -यितुं) or नियुज् (c. 10. -योजयति -यितुं).

ENTICED, *p. p.* आकृष्टः -ष्टा -ष्टं, प्रलोभितः -ता -तं, लालितः -ता -तं.

ENTICEMENT, *s.* आकर्षणं, आकृष्टिः *f.*, प्रलोभनं, विलोभनं, मोहनं, विमोहनं, मोहः, लोभः, लालनं, लोभदर्शनं, वञ्चनं, प्रलम्भः.

ENTICER, *s.* प्रलोभकः, आकर्षकः, विमोहनो *m.* (न्), लाली *m.* (न्), लोभदर्शकः.

ENTICING, *a.* प्रलोभकः -का -कं, आकर्षकः -का -कं, आकर्षी -र्षिणी -र्षि (न्), विमोहनः -ना -नी -नं, मोही -हिनी -हि (न्), भ्रान्तिजनकः -का -कं.

ENTICINGLY, *adv.* सप्रलोभनं, आकृष्य, प्रलोभनेन, आकर्षकप्रकारेण.

ENTIRE, *a.* (Complete, whole, not defective) कृत्स्नः -त्स्ना -त्स्नं, सकलः -ला -लं, सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, सम्पूर्णः -र्णा -र्णं, पूर्णः -र्णा -र्णं, समग्रः -ग्रा -ग्रं, निखिलः -ला -लं, अखिलः -ला -लं, समस्तः -स्ता -स्तं, पर्य्याप्तः -प्ता -प्तं, अशेषः -षा -षं, निःशेषः -षा -षं, निरवशेषः -षा -षं, अन्यूनः -ना -नं, अनूनः -ना -नं, अविकलः -ला -लं, अखण्डः -ण्डा -ण्डं, अभग्नः -ग्ना -ग्नं, अभिन्नः -न्ना -न्नं, अक्षतः -ता -तं, साद्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, न्यग्रः -ग्रा -ग्रं, सिम्रः *m.* only. (Of perfect integrity) अभेद्यः -द्या -द्यं, अहार्य्यः -र्य्या -र्य्यं, सरलः -ला -लं.—(An entire horse) सवृषणोऽश्वः, योजाश्वः.

ENTIRELY, *adv.* अशेषतस्, अशेषेण, निःशेषेण, निरवशेषं, कृत्स्नशस्, कात्स्न्येन, साकल्येन, अखिलेन, निखिलेन, सर्व्वतस्, सर्व्वशस्, विश्वतस्, आमूलं, सम्यक्, पर्य्याप्तं, साद्यन्तं, अन्यूनं, अखण्डतस्; 'entirely around,' समन्ततस्, अभितस्.

ENTIRENESS, ENTIRETY, *s.* कार्त्स्न्यं, कार्त्स्न्यं, साकल्यं आखिल्यं, सामस्त्यं, सम्पूर्णता, समुदायः, समग्रता, समष्टिः *f.*, अभिन्नता, अखण्डत्वं, अन्यूनता, अवैकल्यं.—(Integrity) अभेद्यता, सारल्यं, अमायाहीनता.

To ENTITLE, *v. a.* (Give a title or name) नाम कृ or दा, उपाधिं or संज्ञां दा, नामधेयं कृ, अभिधा (c. 3. -दधाति -धातुं), आख्या (c. 2. -ख्याति -तुं), कृत् (c. 10. कीर्त्तयति -यितुं), उद्गृह् (c. 1. -हरति -हर्त्तुं).—(Give a claim) अधिकारं or अधिकारित्वं or स्वत्वं दा; 'to be entitled,' अर्ह् (c. 1. अर्हति -ते -र्हितुं), अर्हः -र्हा -र्हं or उपयुक्तः -क्ता -क्तम् अस्; 'he is entitled to honour,' मानम् अर्हति; 'he is entitled to receive so much salary,' उपयुक्तोऽयम् इतावद् वर्त्तनं गृह्णाति; 'knowledge entitles to respect,' विद्या मान्यत्वकारणं; 'a good man is entitled to reverence,' साधुजनः पूजनीयः.

ENTITLED, *p. p.* (Named) प्रोक्तः -क्ता -क्तं, अभिहितः -ता -तं, स्मृतः -ता -तं, संज्ञितः -ता -तं, उदाहृतः -ता -तं, आख्यातः -ता -तं. *See* CALLED. (Having a claim) अधिकारी -रिणी -रि (न्), अर्हः -र्हा -र्हं; 'entitled to honour,' पूजार्हः -र्हा -र्हं; 'entitled to a sixth,'

षड्भागभाक् *m*, *f*. *n*. (ज्).

ENTITY, *s*. भूतं, अधिभूतं, सत्त्वं, सत्ता, भावः, वस्तु *n*., वस्त्वनं.

To ENTOMB, *v*. *a*. श्मशाने or समाधौ स्था in caus. (स्थापयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or निखन् (c. 1. -खनति -नितुं) or समृ in caus. (-सर्पयति -यितुं).

ENTOMBED, *p*. *p*. निखातः-ता -तं, समाधिनिखातः-ता -तं, भूमिनिखातः-ता -तं.

ENTRAIL, ENTRAILS, *s*. अन्त्रं, अन्त्राणि *n*. *pl*., पुरीतत् *m*. *n*., नाडिः -डी *f*., धमनी, कोषः.

ENTRANCE, *s*. (Act of entering) प्रवेशः -शनं, निवेशः -शनं, आवेशः -शनं, समावेशः, वेशः -शनं, वेषणं, वेशिका, प्रतिहारणं.—(Door, gate) द्वारं, द्वारवर्त्म *n*. (न्), मुखं, गृहमुखं, निःसरणं, प्रतीहारः, पथः; 'principal entrance,' सिंहद्वारं; 'private entrance,' प्रच्छन्नद्वारं.

ENTRANCED, *p*. *p*. (Put in a trance) मूर्च्छितः -ता -तं, मूर्च्छापन्नः -न्ना -न्नं.—(Enraptured) सम्मोहितः -ता -तं, मोहप्राप्तः -प्ता -प्तं, परमहर्षमोहितः -ता -तं.

To ENTRAP, *v*. *a*. उन्माथे or पाशे पत् in caus. (पातयति -यितुं), जाले पातयित्वा बन्ध् (c. 9. बध्नाति, बन्धुं) or धृ (c. 1. धरति, धर्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रलुभ् in caus. (-लोभयति -यितुं).

ENTRAPPED, *p*. *p*. उन्माथे पातितः -ता -तं, पाशबद्धः -द्धा -द्धं, जालबद्धः -द्धा -द्धं.

To ENTREAT, *v*. *a*. अञ्जलिं कृत्वा प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), सम्प्रार्थ्, अभ्यर्थ्; विनयेन or कृताञ्जलिवत् प्रार्थ् or याच् (c. 1. याचति -चितुं), अभियाच्, प्रयाच्, सम्प्रयाच्; प्रसद् (c. 10. -सादयते -ति -यितुं), विनी (c. 1. -नयति -नेतुं), विनयेन स्वार्थं निविद् (c. 10. -वेदयति -यितुं).

ENTREATED, *p*. *p*. अञ्जलिकर्म्मपूर्व्वं प्रार्थितः -ता -तं or अभ्यर्थितः -ता -तं, विनयेन याचितः -ता -तं, प्रसादितः -ता -तं, अनुनीतः -ता -तं.

ENTREATY, *s*. प्रार्थनं -ना, अभ्यर्थना, अर्थः, अर्थित्वं -ता, याचना, विनतिः *f*., मार्गणं, विनयेन निवेदनं.

ENTRY, *s*. (Passage for entrance) द्वारं, द्वारवर्त्म *n*. (न्), गमनागमनपथः.—(Ingress) प्रवेशः -शनं.—(Committing to writing) अभिलिखनं, लेख्यारोपणं, पुस्तकारोपणं, समारोपणं.

To ENUCLEATE, *v*. *a*. स्पष्टीकृ, व्यक्तीकृ, विशुध् in caus. (-शोधयति -यितुं), परिशुध्.

To ENUMERATE, *v*. *a*. संख्या (c. 2. -ख्याति -तुं), सम्परिख्या, परिसंख्या, प्रसंख्या; परिगण् (c. 10. -गणयति -यितुं), विगण्, प्रगण्, गण्; अनुपूर्व्वशस् or एकैकशस् or यथाक्रमं or पृथक् पृथक् ख्या, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश् निर्दिश्.

ENUMERATED, *p*. *p*. परिसंख्यातः -ता -तं, परिगणितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, समुद्दिष्टः -ष्टा -ष्टं, एकैकशः or प्रत्येकं कथितः -ता -तं or निर्दिष्टः -ष्टा -ष्टं, अनुक्रान्तः -न्ता -न्तं.

ENUMERATION, *s*. परिसंख्या -ख्यानं, संख्या, गणनं -ना, परिगणना, समुद्देशः, एकैकशो निर्देशः.

To ENUNCIATE, *v*. *a*. उच्चर् in caus. (-चारयति -यितुं), उदीर् (c. 10. -ईरयति -यितुं), समुदीर्, उदाहृ (c. 1. -हरति -हर्तुं), प्रख्या (c. 2. -ख्याति -तुं), कृत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्.

ENUNCIATED, *p*. *p*. उच्चारितः -ता -तं, उदीरितः -ता -तं, उदाहृतः -ता -तं.

ENUNCIATION, *s*. उच्चारणं, उदीरणं, उदाहरणं, व्याहारः -हरणं, समुदाहरणं, ख्यापनं, विज्ञापनं, प्रकीर्त्तनं, प्रकाशनं, घोषणा.

ENUNCIATIVE, *a*. उच्चारकः -का -कं, ख्यापकः -का -कं, आवेदकः -का -कं.

To ENVELOP, *v*. *a*. आवेष्ट् (c. 1. -वेष्टते -ष्टितुं), परिवेष्ट्, संवेष्ट्, आच्छद् (c. 10. -छादयति -यितुं), परिच्छद्, समाच्छद्, प्रच्छद्, प्रतिच्छद्, संच्छद्; परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), आवृ; पिधा (c. 3. -दधाति -धातुं), कोशेन परिवेष्ट्.

ENVELOPE, *s*. कोशः, कोषः, आवेष्टनं, परिवेष्टनं, वेष्टनं, प्रच्छदपटः, प्रावारः, प्रावरणं, वासनं, पिधानं, पुटः, आच्छादनं, निचोलः, अवगुण्ठनं.

ENVELOPED, *p*. *p*. वेष्टितः -ता -तं, आवेष्टितः -ता -तं, परिवेष्टितः -ता -तं, कोशस्थः -स्था -स्थं, वासनस्थः -स्था -स्थं, परीतः -ता -तं, अवगुण्ठितः -ता -तं.

To ENVENOM, *v*. *a*. विषेण लिप् (c. 6. लिम्पति, लेप्तुं) or दिह् (c. 2. देग्धि -ग्धुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं) or संसृज् (c. 6. -सृजति -स्रष्टुं), सविषं -षां -षं कृ.

ENVENOMED, *p*. *p*. विषाक्तः -क्ता -क्तं, विषलिप्तः -प्ता -प्तं, विषप्रदिग्धः -ग्धा -ग्धं, सविषः-षा -षं, गरली-लिनी-लि(न्); 'envenomed shaft,' दिग्धः.

ENVIABLE, *a*. ईर्ष्येणीयः -या -यं, ईर्ष्योत्पादकः -का -कं, लोभ्यः -भ्या -भ्यं, स्पृहणीयः -या -यं, प्रार्थनीयः -या -यं, आकांक्षणीयः -या -यं.

ENVIED, *p*. *p*. ईर्षितः -ता -तं, ईर्ष्यितः -ता -तं, अभिलषितः -ता -तं, स्पर्धितः -ता -तं.

ENVIER, *s*. ईर्ष्यी *m*. (न्), असूयकः, अभ्यसूयकः, परोत्कर्षासहनः.

ENVIOUS, *a*. ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्), ईर्ष्यालुः -लुः -लु, ईर्ष्यकः -का -कं, मेर्ष्यः -र्ष्या -र्ष्यं, मत्सरः -रा -रं -रो -रिणी -रि (न्), समत्सरः -रा -रं, परधनमत्सरः -रा -रं, परधनाभिलाषुकः -का -कं, परगुणमत्सरः -रा -रं, परोत्कर्षासहनः -ना -नं, परप्रशंसामहिष्णुः -ष्णुः -ष्णु, स्पर्धी -र्धिनी -र्धि (न्), साभ्यसूयः -या -यं, कृतेर्ष्यः -र्ष्या -र्ष्यं, सञ्जातेर्ष्यः -र्ष्या -र्ष्यं, कुहनः -ना -नं, वीभत्सुः -त्सुः -त्सु, स्पृहयालुः -लुः -लु, अभिलाषी -षिणी -षि (न्), परशुभामर्षणः -णा -णं.

ENVIOUSLY, *adv*. मेर्ष्यं, सासूयं, समत्सरं, समात्सर्य्यं, साभ्यसूयं.

To ENVIRON, *v*. *a*. परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), आवृ, परिष्ठा (c. 1. -तिष्ठति -ष्ठातुं). *See* ENCOMPASS.

ENVIRONED, *p*. *p*. परिवेष्टितः -ता -तं, परिवृतः -ता -तं, आवृतः -ता -तं, परिगतः -ता -तं, परीतः -ता -तं, वलयितः -ता -तं, व्याप्तः -प्ता -प्तं.

ENVIRONS, *s*. (Of a town) नगरोपान्तं, उपनगरं, उपपुरं, परिसरः.

ENVOY, *s*. दूतः, राजदूतः, सत्ती *m*. (न्), सन्देशहरः, वार्त्ताहरः, निमृष्टार्थः, कार्य्यङ्करः, राजचारः, राजप्रतिनिधिः *m*.

To ENVY, *v*. *a*. ईर्ष्य् (c. 1. ईर्ष्यति -र्ष्यितुं), ईर्ष्य् (c. 1. ईर्ष्यति -र्ष्यितुं), स्पृह् (c. 10. स्पृहयति -यितुं), स्पर्ध् (c. 1. स्पर्धते -र्धितुं), असूय (nom. असूयति -ते -यितुं), अभ्यसूय, परद्रव्यम् अभिलष् (c. 1. -लषति, c. 4. -लष्यति -षितुं), परोत्कर्षं न सह् (c. 1. सहते, सोढुं) or न मृष् (c. 4. मृष्यति, मर्षितुं), मात्सर्य्यं कृ.

ENVY, *s*. ईर्ष्या, असूया, मात्सर्य्यं, मत्सरः -रता, स्पर्धा, स्पर्धता, अक्षान्तिः *f*., अमर्षः, परिमर्षः, रागः, द्वेषः, ईर्षा, स्पृहा, परधनाभिलाषः, परोत्कर्षासहिष्णुता, अन्यगुणासहिष्णुता, अन्यशुभद्वेषः, परप्रशंसाया असहिष्णुता.

EOLUS, *s*. (God of the winds) पवनदेवता, वायुदेवता.

EPACT, *s*. कालगणकभाषायां सौरवत्सरावसाने समावस्याः प्रभृति तिथिसंख्यासूचकः शब्दः or शब्दो येन चान्द्रवत्सरात् सौरवत्सराधिक्यं सूच्यते.

EPAULET, *s*. स्कन्धाभरणं, सैनिकजनैः स्कन्धदेशे धृतः पदसूचको लक्षारः, अंशालङ्कारः, अंशाभरणं.

EPHEMERAL, *a*. ऐकाहिकः -की -कं, क्षणविध्वंसी -सिनी -सि (न्), उत्पन्नविनाशी -शिनी -शि (न्), क्षणभङ्गुरः -रा -रं, एकाहमात्रस्थायी -यिनी -यि (न्).

EPHEMERIS, *s*. आह्निकव्यवहारपुस्तकं, दैवसिकवृत्तान्तपुस्तकं.—(In astronomy) पुस्तकं यस्मिन् नक्षत्राणां गतिभावादि प्रतिदिनम् आरोप्यते.

EPIC, *a*. ऐतिहासिकः -की -कं, वीरचरित्रकथकः -का -कं, काथिकः -की -कं, शूरवृत्तान्तविषयः -या -यं, महाकाव्यसम्बन्धी -न्धिनी -न्धि (न्)

Epic, *s.* (Poem) महाकाव्यं, इतिहासः. वीरचरित्रविषयं काव्यं.

Epicene, *a.* सामान्यलिङ्गः -ङ्गा -ङ्गं, साधारणलिङ्गः -ङ्गा -ङ्गं.

Epicure, *a.* मिष्टान्नव्यञ्जनादिषु प्रसक्तः, सद्वीत्तरसज्ञः, स्वाद्वन्नाभिलाषी *m.* (न्), उदरपरायणः, कुक्षिम्भरिः *m.*, लोलुपः, अतिलोभी *m.* (न्), रसिकः, वैषयिकः, विषयासक्तः, विषयसेवी *m.* (न्), पात्रेसमितः.

Epicurean, *a.* विषयी -यिणी -यि (न्), शारीरिकसुखसेवी -विनी -वि (न्), वैषयिकः -की -कं, भोगपरायणः -णा -णं.

Epicurism, *s.* विषयोपसेवा, विषयासक्तिः *f.*, शारीरिकसुखानुरागः.

Epicycle, *s.* (In astronomy) प्राक् चक्रं, परिधिः *m.*

Epidemic, epidemical, *a.* देशसाधारणः -णा -णी -णं, सर्व्वत्रगः -गा -गं, बहुजनसामान्यः -न्या -न्यं; 'disease,' मारी, मारः -रिः *f.*, महामारी, मरकः, मारकः, आतञ्चनं, सन्निपातकः, उपसर्गः.

Epidermis, *s.* वात्यत्वक् *f.* (च्), वहिस्त्वक, वाह्यचर्म्म *n.* (न्), सवभासिनी.

Epiglottis, *s.* उपजिह्वा, अलिजिह्वा, प्रतिजिह्वा, घण्टिका, शुण्डिका.

Epigram, *s.* अबहुश्लोकपरिमाणं रसिककाव्यं, सरसं लघुकाव्यं.

Epigrammatical, *a.* पृश्नोक्तलघुकवितायोग्यः -ग्या -ग्यं, रसिककवितासम्बन्धी -न्धिनी -न्धि (न्).—(Pointed) रसिकः -का -कं, रसवान् -वती -वत् (त्), मरसः -सा -सं.

Epigrammatist, *s.* पृश्नोक्तरसिककविताकर्त्ता *m.* (र्त्तृ), लघुकाव्यरचकः.

Epilepsy, *s.* अपस्मारः, ग्रहामयः, भ्रामरं, भूतविक्रिया, प्रतानः, मूर्च्छावायुः *m.*

Epileptic, *a.* अपस्मारी -रिणी -रि (न्), भ्रामरी -रिणी -रि (न्), वातग्रस्तः -स्ता -स्तं, वायुग्रस्तः -स्ता -स्तं, ग्रहामयपीडितः -ता -तं, आकृष्टः -ष्टा -ष्टं.

Epilogue, *s.* अन्तवाक्यं, शेषवाक्यं, अन्त्यवचनं, समापकवाक्यं, समापनवचनं.

Epinicion, *s.* जयगीतं, जयशब्दः.

Epiphany, *s.* खृष्टप्रकाशनं, खृष्टप्रकाशनमुद्दिश्य खृष्टजन्मपर्व्वणः परं द्वादशदिने सेवितो महोत्सवः, खृष्टप्रकाशनपर्व्व *n.* (न्).

Episcopacy, *s.* धर्म्माध्यक्षता -त्वं, धर्म्माध्यक्षाधिपत्यं, धर्म्माध्यक्षाधिकारः, धर्म्माध्यक्षकर्त्तृका खृष्टीयसमाजनीतिः *f.*

Episcopal, episcopalian, *a.* धर्म्माध्यक्षसम्बन्धी -न्धिनी -न्धि (न्), धर्म्माध्यक्षशासितः -ता -तं, धर्म्माध्यक्षपालितः -ता -तं.

FIRE-BRAND, *s.* उल्का, उल्मुकं, अङ्गारः -रं, अलातं, आलातं, अग्निकाष्ठं, अग्निकुक्कुटः, कुक्कुटः, कुलुक्कगुम्बा, अग्नियुद्धकाष्ठं. ज्वलनकाष्ठं: 'a

number of fire-brands,' अङ्गारं.—(Incendiary) अग्निदः.

FIRED, *p. p.* ज्वलितः -ता -तं, प्रज्वालितः -ता -तं, समिद्धः -द्धा -द्धं, प्रदीप्तः -प्ता -प्तं, उद्दीप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, सन्धुक्षितः -ता -तं.

FIRE-ENGINE, *s.* अग्निनिर्वापणयन्त्रं, गृहदाहनिर्वापणकरणार्थं यन्त्रं.

FIRE-EYED, *a.* ज्वलितनयनः -ना -नं, ज्वलितचक्षुः -क्षूः -क्षु (क्षुस्).

FIRE-FLY, *s.* खद्योतः, खद्योतिः *m.* (स्), ज्योतिरिङ्गः -ङ्गणं, प्रभाकीटः, ज्योतिर्वीजं, गुह्यदीपकः, ध्वान्तोन्मेषः, चिल्लमौलिका.

FIRE-MAN, *s.* गृहदाहनिर्वापणे नियुक्तो जनः, अग्निनिर्वापणकारी *m.* (न्).

FIRE-PAN, *s.* अग्न्याधारः, अङ्गारिणी, अङ्गारधानिका, अङ्गारशकटी, अग्निपात्रं, हसनी, हसन्ती -न्तिका.

FIRE-PLACE, *s.* चुल्लिः *f.* -ल्ली, अङ्गारिणी, वितानं, अङ्गमनं -नकं, आमनं, अन्तिका, अन्दिका, उद्धानं, उध्मानं, उद्धारं, अधिश्रयणी, दृडक्षः, अग्निकुण्डं.

FIRE-PROOF, *a.* अदाह्यः -ह्या -ह्यं, अदहनीयः -या -यं, अग्निनाम्यूश्यः -श्या -श्यं.

FIRE-SHIP, *s.* अग्निनौका, आग्नेयनौका, शीघ्रदाह्यवस्तुपूरिता युद्धनौका.

FIRE-SHOVEL, *s.* अङ्गारधारणयोग्यो लोहकुद्दालः.

FIRE-SIDE, *s.* गृहाग्निस्थानं, अग्निसमीपं, गृहाग्न्युपान्तं, वितानं.

FIRE-STONE, *s.* अग्निप्रस्तरः, अग्निपाषाणः, आग्नेयाश्मा *m.* (न्).

FIRE-TONGS, *s.* अङ्गारधारणयोग्यो लोहसन्दंशकविशेषः.

FIRE-WOOD, *s.* अग्निकाष्ठं, दाह्यकाष्ठं, इन्धनं, इध्मं, समित् *f.* (ध्).

FIRE-WORKS, *s* अग्निक्रीडा, खपुष्पादिक्रीडा, अग्नितारादिक्रीडा.

FIRING, *s.* दाह्यं, इध्मं, समिन्धनं, अङ्गारकाष्ठतृणादीनि दाह्यवस्तूनि.

FIRKIN, *s.* मानविशेषः, आढकः, अर्द्धाढकः, द्रोणः, अर्द्धद्रोणः.

FIRM, *a.* दृढः -ढा -ढं, स्थिरः -रा -रं, निश्चलः -ला -लं, अचलः -ला -लं, अविचलितः -ता -तं, धीरः -रा -रं, धृतिमान् -मती -मत् (त्), धैर्य्यवान् -वती -वत् (त्), स्थाणुः -णुः -णु, स्थास्नुः -स्नुः -स्नु, स्थावरः -रा -रं, स्थेयान् -यसी -यः (स्), स्थिष्ठः -ष्ठा -ष्ठं, अकम्पितः -ता -तं, अक्षुब्धः -ब्धा -ब्धं, अस्खलितः -ता -तं, अव्यभिचारी -रिणी -रि (न्), व्यवस्थितः -ता -तं, स्थितः -ता -तं, स्थितिमान् -मती -मत् (त्), गाढः -ढा -ढं, प्रगाढः -ढा -ढं.—(Compact) घनः -ना -नं, दृढः -ढा -ढं, संहतः -ता -तं, अशिथिलः -ला -लं, दृढसन्धिः -न्धिः -न्धि, निर्भटः -टा -टं; 'firm in mind,' स्थिरमतिः -तिः -ति, निश्चलमतिः -तिः -ति, स्थितधीः -धीः -धि, स्थिरात्मा -त्मा -त्म (न्), अभिन्नात्मा &c.; 'in friendship,' दृढसौहृदः; 'in allegiance,' दृढभक्तिः *m.*: 'in battle,' दृढायुधः; 'firm as a rock,' शिलाघनः -ना -नं, शैलसारः -रा -रं; 'firm step,' अस्खलितगतिः; 'a firm, compact breast,' घनपयोधरः; 'firm-footed,' स्थिरपदः -दा -दं

FIRM, *s.* (Partnership) अनेकवाणिजजनसंसर्गः, सहव्यापारिणां बहुजनानाम् आख्या or उपाधिः *m.*

To FIRM, *v. a.* दृढीकृ, स्थिरीकृ, दृढ (nom. दृढयति -यितुं).

FIRMAMENT, *s.* आकाशः, आकाशवर्त्म *n.* (न्), व्योम *n.* (न्), नभोविस्तृतिः, नभोमण्डलं, नभस्तलः -लं, गगणं, खं, अन्तरीक्षं, नक्षत्रमण्डलं, ज्योतिश्चक्रं, तारापथः, खगोलः, उडुपथः, शून्यं, शून्यत्वं, घनाश्रयः, मेघधामन् *n.* (न्).

FIRMAMENTAL, *a.* आकाशीयः -या -यं, आन्तरीक्षः -क्षी -क्षं, वैहायसः -सी -सं, विहायसीयः -या -यं, गगणीयः -या -यं, गगणस्थः -स्था -स्थं, नभःस्थः -स्था -स्थं.

FIRMLY, *adv.* दृढं, स्थिरं, निश्चलं, धैर्य्येण, स्थैर्य्येण, गाढं, प्रगाढं, दार्ढ्येन; 'firmly rooted,' बद्धमूलः -ला -लं; 'firmly devoted,' दृढभक्तिः -क्तिः -क्ति; 'firmly tied,' दृढबद्धः -द्धा -द्धं; 'firmly united,' दृढसन्धिः -न्धिः -न्धि.

FIRMNESS, *s.* दृढता, दार्ढ्यं, दृढिमा *m.* (न्), दृढत्वं, स्थिरता, स्थैर्य्यं, धीरत्वं, धैर्य्यं, धृतिः *f.*, निश्चलता, अचलत्वं, स्थितिः *f.*, अवस्थितिः *f.*, स्थाणुता, धृतिमत्त्वं, स्थितिमत्त्वं, गाढता, प्रगाढता, स्थेमा *m.* (न्), अक्षोभः, अकम्पः, अस्खलनं, स्थावरत्वं, धारणा.—(Compactness) घनत्वं -ना, संहतिः *f.*, संहतता, सन्धिः *m.*, सान्द्रता, दृढत्वं.

FIRST, *a.* प्रथमः -मा -मं, पूर्वः -र्वी -र्वं, आद्यः -द्या -द्यं, आदिमः -मा -मं, अग्र्यः -ग्र्या -ग्र्यं, अग्रिमः -मा -मं, आदिः *m.*, पौरस्यः -स्या -स्यं, प्राक्तनः -नी -नं.—(Chief) मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः -ग्र्या -ग्र्यं, अग्रियः -या -यं, अग्रीयः -या -यं, प्रधानः -ना -नं, प्रष्ठः -ष्ठा -ष्ठं, प्रवरः -रा -रं, पुरोगमः -मा -मं; 'first and last,' पूर्वापरः -रा -रं; 'first half,' पूर्वार्द्धः; 'first part of the night,' पूर्वरात्रः; 'first attack' (of disease), पूर्वावस्थरः; 'dying first,' पूर्वमारी -रिणी -रि (न्); 'first of all,' सर्वप्रधानः -ना -नं, सर्वाग्रः -ग्रा -ग्रं.

FIRST, *adv.* प्रथमं, पूर्वं, अग्रे, आदितस्, आदौ, पुरस्, पुरस्तात्; 'at first, in the first place,' प्रथमं, प्रथमतस्, पूर्वं; 'first and last,' आद्यन्तं.

FIRST-BEGOTTEN, *a.* पूर्वप्रसूतः -ता -तं, पूर्वजनितः -ता -तं, पूर्वजः -जा -जं, प्रथमजातः -ता -तं, प्रथमप्रसूतः -ता -तं, अग्रजातः -ता -तं.

FIRST-BORN, *s.* पूर्वजः, अग्रजः, अग्र्यः, अग्रिमः, अग्र्यः, अग्रजन्मा *m.* (न्), ज्येष्ठः, वयोज्येष्ठः, अधिकवयाः *m.* (स्), सर्वपुत्रज्येष्ठः, प्रधानसन्तानः.

FIRST-FRUITS, *s.* प्रथमफलं, आदिफलं, प्रथमजातं फलं, अग्रफलं, प्रथमोत्पन्नं फलं, प्रथमोत्पन्नं, नवशस्यं; 'sacrifice of first-fruits,' आग्रायणं.

FIRSTLING, *s.* पशोः प्रथमजातसन्तानः or प्रथमप्रसूतसन्ततिः *f.*

FIRSTLY, *adv.* प्रथमतस्, प्रथमं, पूर्वं, आदितस्.

FIRST-RATE, *a.* परमः -मा -मं, अग्रः -ग्रा -ग्रं, उत्कृष्टः -ष्टा -ष्टं.

FISCAL, *a.* वालेयः -यी -यं, शौल्कः -ल्की -ल्कं, राजायमसम्बन्धीयः -या -यं

FISH, *s.* मत्स्यः, मीनः, झषः, मत्स्यः, विसारः -री *m.* (न्), वैसारी *m.* (न्) वेसारिणः, अगाद्यजः, शकली *m.* (न्), शल्की *m.* (न्), शल्कली *m.* कण्टकी *m.* (न्), आम्भसिकः, जलजः, जलप्रियः, जलजन्तुः *m.*, जलेचरः जलचारी *m.* (न्), पाठीनः, अनिमिषः, अनिमेषः, स्थिरजिह्वः, षडङ्गीणः, पृथुरोमा *m.* (न्), आत्माशी *m.* (न्), मत्स्यी *f.*, मत्सः; 'fish-bone,' कण्टकः; 'fish-sauce,' मत्स्यगन्धः, मीनाम्बीरणः; 'fish-bannered god,' मीनकेतनः, मकरध्वजः, मकरकेतुः *m.*, झषकेतनः.

To FISH, *v. a.* and *n.* मत्स्यान् ग्रह (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं) or बन्ध् (c. 9. बध्नाति, बन्धुं), मत्स्यघातं कृ, झष् (c. 1. झषति -षितुं).—(Search) अन्विष् (c. 1. -इच्छति -इषितुं), अनुसृ (c. 1. -सरति -सर्त्तुं).

FISH-BASKET, *s.* मत्स्यधानी, मत्स्यबन्धिनी, कुपेणी, मत्स्यभाजनं.

FISHER, FISHERMAN, *s.* धीवरः, कैवर्त्तः, मात्स्यिकः, मैनिकः, निषादः, मत्स्यधारी *m.* (न्), मत्स्यजीवी *m.* (न्), मत्स्यबन्धी *m.* (न्), मीनाघाती *m.* (न्), मत्स्यघातोपजीवी *m.* (न्), जालिकः, जाली *m.* (न्), कुपिनी *m.* (न्), साक्षरिकः, तीवरः, क्षोटी *m.* (न्), दासः, दाशः, धीवा *m.* (न्).

FISHERY, *s.* धीवरकर्म्म *n.* (न्), मत्स्यबन्धनं, मत्स्यग्रहणं.—(Place for catching fish) मत्स्यग्रहणस्थानं.

FISH-HOOK, *s.* बडिशं -शा -शी, वरिशी, वलिशं -शी, मत्स्यबन्धनं -नी.

FISHING, *s.* मत्स्यबन्धनं, मत्स्यग्रहणं, मत्स्यवधः, मत्स्यघातः.

FISHING-BOAT, *s.* धीवरनौका, कैवर्त्तनौका, निषादनौका, मात्स्यिकपोतः.

FISHING-NET, *s.* मत्स्यजालं, मत्स्यग्रहणार्थं जालं, कुपिनी.

FISHING-TACKLE, *s.* मत्स्यग्रहणोपकरणं, मत्स्यबन्धनसाधनं.

FISH-KETTLE, *s.* मत्स्यपचनयोग्या दीर्घस्थाली, मत्स्यपचनी

FISH-MARKET, *s.* मत्स्यविक्रयस्थानं, मीनविक्रयशाला, निषद्या.

FISHMONGER, *s.* मत्स्यविक्रेता *m.* (तृ), मत्स्यविक्रयोपजीवी *m.* (न्).

FISH-POND, *s.* मत्स्यपूर्णं सरः *n.* (स्), मीनाश्रयः, मत्स्यालयः, मीनालयः.

FISH-SPAWN, *s.* मीनाण्डं, मत्स्याण्डं, झषाण्डं, मत्स्यडिम्भः.

FISH-WOMAN, *s.* मत्स्यविक्रेत्री, मत्स्यविक्रयोपजीविनी.

FISHY, *a.* मात्स्यः -त्स्यी -त्स्यं, मात्स्यिकः -की -कं, मात्सिकः -की -कं, नैषिकः -की -कं, मीनरः -रा -रं, मत्स्यगुणोपेतः -ता -तं.

FISSILE, *a.* विदलः -ला -लं, भिदुरः -रा -रं, छिदुरः -रा -रं, भिदेलिमः -मा -मं.

FISSURE, *s.* छिद्रं, रन्ध्रं, सन्धिः *m.*, भित्तिः *f.*, भङ्गः, दरी -रा, विदरः.

To FISSURE, *v. a.* विद् (c. 10. -दारयति -यितुं), विदल् (c. 10. -दलयति -यितुं).

FIST, *s.* मुष्टिः *m.f.* -ष्टी, हस्तमुष्टिः, मुस्तुः *m.*, खटः -टकः -टिकः, रौंसिः *m.* -सी *f.*, जितकाशिः *m.*; 'doubling or clenching the fist,' मुष्टिबन्धः, मुष्टिसङ्ग्राहः, हस्तसङ्ग्राहः.

To FIST, *v. a.* मुष्टिना or मुष्ट्या तड् (c. 10. ताडयति -यितुं) or प्रहृ (c. 1. -हरति -हर्तुं), मुष्टिसङ्ग्राहेण पीड् (c. 10. पीडयति -यितुं).

FISTICUFFS, *s.* मुष्टिप्रहारः, मुष्टिपातः, मुष्टियुद्धं, मौष्टा, मुष्टीमुष्टि युद्धं, बाहुयुद्धं, मल्लयुद्धं, पाणिघातः.

FISTULA, *s.* नाडिः *f.* -डी, नालिः -ली, नाडीव्रणः, नालीव्रणः, नालीक्षतं; 'in ano,' शतपोनकः, भगन्दरः; 'lachrymalis,' अश्रुनाली.

FISTULOUS, *a.* नाड्याकारः -रा -रं, नाडिरूपः -पा -पं; 'fistulous sore,' नाडीव्रणः.

FIT, *s.* (Paroxysm of any disease) आवेशः, अवतारः -तरणं, आक्रमः -मणं; 'fit of the gout,' वातरोगावेशः; 'fit of fever,' ज्वरावतारः; 'of ague,' कम्पज्वराक्रमः, शीतज्वरावेशः; 'fit of anger,' क्रोधावेशः; 'fit of lust,' कामावेशः; 'of madness,' उन्मादावेशः,—(Fit of fainting, epilepsy, &c.) मूर्च्छा -र्च्छनं -ना, भ्रमरं, भ्रमिः *f.*, घूर्णिः *f.*

FIT, FITTING, *a.* युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उपयुक्तः -क्ता -क्तं, उपयोगी -गिनी -गि (न्), यथायोग्यः -ग्या -ग्यं, उचितः -ता -तं, समुचितः -ता -तं, यथोचितः -ता -तं, समञ्जसः -सा -सं, उपपन्नः -न्ना -न्नं, पर्य्याप्तः -प्ता -प्तं, न्याय्यः -य्या -य्यं, सम्भाव्यः -व्या -व्यं, सम्भावितः -ता -तं, अनुरूपः -पा -पं, अर्हः -र्हा -र्हं, यथार्हः -र्हा -र्हं, सङ्गतः -ता -तं, सङ्गतायैः -यी -यैं, पथ्यः -थ्या -थ्यं, औपयिकः -की -कं, अभिनीतः -ता -तं, लभ्यः -भ्या -भ्यं, भजमानः -ना -नं.—(Qualified) क्षमः -मा -मं, कर्म्मक्षमः -मा -मं, अलङ्कर्म्मीणः -णा -णी; 'fit for a man,' अलम्पुरुषीणः -णा -णी; 'fit for sacrifice,' यज्ञियः -या -यं, यज्ञार्हः -र्हा -र्हं; 'a field fit for growing rice,' शाल्युद्भवोचितं क्षेत्रं. Sometimes expressed by the fut. pass. part.; as, 'fit to be eaten,' खाद्यः -द्या -द्यं. खादनीयः -या -यं; 'fit to be done,' कार्य्यः -र्य्या -र्य्यं, करणीयः -या -यं.

To FIT, *v. a.* (Adapt, accommodate) युज् (c. 10. योजयति -यितुं, c. 7. युनक्ति, योक्तुं), समायुज्, आयुज्, सन्धा (c. 3. -दधाति -धातुं), समाधा, योग्यं-ग्यां-ग्यं or उपयुक्तं-क्तां-क्तं कृ.—(Fit out, equip) सज्जीकृ, सज्ज् (c. 1. सज्जति -ज्जितुं), सोपकारद्रव्यैः समायुज्, उपयुक्तद्रव्याणि सम्पद् (c. 10. -कल्पयति -यितुं) or उपकॢप् or उपपद् (c. 10. -पादयति -यितुं) or पुरस्कृ or उपस्कृ or प्रस्तुतीकृ सङ्गोपकारद्रव्ययुक्तं -क्तां -क्तं कृ, उपयुक्तद्रव्यसाधनं कृ; 'fit out a ship,' समुद्रयानार्थं or युद्धार्थं नावं सज्जीकृ.

To FIT, *v. n.* (Be proper, suitable) युज् in pass. (युज्यते), उपपद् in pass. (-पद्यते), योग्यः -ग्या -ग्यं भू or अस्, उपयुक्तः -क्ता -क्तं भू, अर्ह् (c. 1. अर्हति -र्हितुं); 'it is not fit that you should grieve,' न शोचितुं त्वं अर्हसि; 'it is not fit that I should go,' न गन्तुं अर्हामि.—(Be qualified) कॢप् (c. 1. कल्पते -क्लृप्तुं), उपकॢप्, क्षमः -मा -मं भू, उचितः -ता -तं भू; 'he is fit for immortality,' अमृतत्वाय कल्पते.

FITCH, *s.* (A chick-pea) चणकः, हरिमन्थः -न्थकः.

FITFUL, *a.* चञ्चलः -ला -लं, चलः -ला -लं, विषमः -मा -मं, लोलः -ला -लं, चपलः -ला -लं, अनित्यः -त्या -त्यं.

FITLY, *adv.* युक्तं, योग्यं, यथायोग्यं, उचितं, यथोचितं, उपयुक्तं, योगतस्, यथार्हं -र्हतस्, सम्यक्, यथार्थं, यथायथं, यथातथं, अनुरूपं, साम्प्रतं, स्थाने.

FITNESS, *s.* युक्तता, योग्यता, युक्तिः *f.*, उपयोगः, उपयुक्तता, उपयोगिता, उचितत्वं, औचित्यं, सामञ्जस्यं, समञ्जसं, उपपत्तिः *f.*, सम्भावना, न्यायः -यता, सङ्गतत्वं, पर्य्याप्तिः *f.*, यथार्हता, याथार्थ्यं, कल्पः, अभेषः, देशरूपं, कल्पेष्यता.—(Qualification) पात्रता -त्वं, क्षमता.

FITTING, *s.* (Adaptation) समायोजनं, समाधानं.—(Equipping) सज्जीकरणं, सज्जनं, सज्जकर्म्म *n.* (न्), साधनं, पुरस्करणं.—(Suitable) *see* FIT.

FIVE, *a.* पञ्च *m.f.n.* (न्), पञ्चकः -का -कं, दशार्द्धः, पञ्चतयः -या -यं, पञ्चत् *m.f.n.*, पञ्चसंख्यकः -की -कं; 'aggregate of five,' पञ्चत्वं -ता, पञ्चकत्वं; 'having five claws,' पञ्चनखः -खा -खं; 'having five fingers,' पञ्चाङ्गुलिः -लिः -लि; 'five times,' पञ्चकृत्वस्; 'having five parts,' पञ्चाङ्गः -ङ्गी -ङ्गं; 'five-hundred,' पञ्चशतं.

FIVE-FOLD, *a.* पञ्चगुणः -णा -णं, पञ्चविधः -धा -धं, पञ्चधा

FIVE-LEAVED, *a.* पञ्चपर्णः -र्णी -र्णं, पञ्चपत्रः -त्रा -त्रं, पञ्चदलः -ला -लं.

FIVES, *a.* कन्दुकक्रीडा, कन्दुकलीला, गुलिकाक्रीडाविशेषः.

To FIX, *v. a.* (Establish) स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, अवस्था, संस्था, धा (c. 3. दधाति, धातुं), विधा, प्रतिनिधा, रुह् in caus. (रोपयति -यितुं), आरुह्, निरुह्.—(Make firm) स्थिरीकृ, दृढीकृ, सुस्थिरं -रां -रं कृ.—(Fasten) बन्ध् (c. 9. बध्नाति, बन्धुं).—(Determine, ascertain) निश्चि (c. 5. -चिनोति -चेतुं), निर्णी (c. 1. -र्णयति -र्णेतुं), उन्नी, निरूप् (c. 10. -रूपयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं).—(Fix the gaze or eye) लक्षं बन्ध्, अनिमिषेण or अनिमेषेण or अनन्यदृष्ट्या or स्तिमितलोचनेन दृश् (c. 1. पश्यति, द्रष्टुं), दृष्टिं निविश् in caus. (-वेशयति -यितुं).—(Fix the mind) मनो निविश् in caus., or युज् (c. 7. युनक्ति, योक्तुं, c. 10. योजयति -यितुं), अनन्यमनस्कः -स्का -स्कं भू, एकाग्रः -ग्रा -ग्रं भू; 'on any object,' अर्थे धृतिं बन्ध्.

To FIX, *v. n.* (Be fixed) निष्ठा (c. 1. -तिष्ठति -ष्ठातुं), प्रणिधा in pass. (-धीयते), प्रतिनिधा, स्था in caus. pass. (स्थाप्यते), प्रतिष्ठा, बन्ध् in pass. (बध्यते), स्थिरीभू.

FIXED, *p. p.* (Established) स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, प्रतिष्ठितः -ता -तं, संस्थापितः -ता -तं, संस्थितः -ता -तं, स्थितः -ता -तं, व्यवस्थापितः -ता -तं, व्यवस्थितः -ता -तं, निहितः -ता -तं, रोपितः -ता -तं, कृतावस्थः -स्था -स्थं, स्थिरीकृतः -ता -तं, विहितः -ता -तं.—(Certain, determined) नियतः -ता -तं, निश्चितः -ता -तं, सुनिश्चितः -ता -तं, निष्पन्नः -न्ना -न्नं.—(Firm) स्थिरः -रा -रं, स्थायी -यिनी -यि (न्), स्थावरः -रा -रं, स्थायुः -युः -यु, स्थास्नुः -स्नुः -स्नु, दृढः -ढा -ढं, निश्चलः -ला -लं, अकम्पितः -ता -तं, अस्पन्दः -न्दा -न्दं, नैष्ठिकः -की -कं.—(Attached) लग्नः -ग्ना -ग्नं, अनुलग्नः -ग्ना -ग्नं, आसक्तः -क्ता -क्तं, संसक्तः -क्ता -क्तं.—(Fastened) बद्धः -द्धा -द्धं; 'firmly fixed,' दृढबद्धः -द्धा -द्धं, दृढरोपितः -ता -तं, बद्धमूलः -ला -लं; 'having the eye or look fixed,' बद्धदृष्टिः -ष्टिः -ष्टि, अनिमिषनयनः -ना -नं, स्तिमितलोचनः -ना -नं, स्थिरदृष्टिः -ष्टिः -ष्टि; 'having the mind fixed,' अवस्थितमतिः -तिः -ति, निवेशितमनाः -नाः -नः (स्), आसक्तमनाः &c., आसक्तचित्तः -त्ता -त्तं, अनन्यमनस्कः -स्का -स्कं, अकुण्ठमेधाः -धाः -धः (स्); 'fixed in the mind,' चित्तीकृतः -ता -तं; 'of fixed intent,' बद्धानुशयः -या -यं; 'fixed as to time,' कृतकालः -ला -लं.

FIXEDLY, *adv.* दृढं, स्थिरं, स्थैर्य्येण, अवस्थितचेतसा, स्थिरदृष्ट्या.

FIXEDNESS, *s.* स्थिरता, स्थैर्य्यं, स्थितिः *f.*, अवस्थितिः *f.*, अवस्थितिः *f.*, संस्थितिः *f.*, स्थायित्वं, निष्ठा, धृतिः *f.*, धैर्य्यं, दृढता, दार्ढ्यं, स्थावरत्वं,

स्थायुता, निश्चलत्वं, स्थेमा m. (न्), स्थितिमत्त्वं, अकम्यः.

FIXITY, s. संलग्नत्वं. अनुलग्नता, संश्लेषः f., संश्लेषः, संहतिः f., समासज्जनं.

FIXTURE, s. स्थावर्यं, स्थावरद्रव्यं, स्थितद्रव्यं; 'fixtures,' स्थावराणि.

FLABBINESS, s शिथिलता. शैथिल्यं, मृदुता, कोमलत्वं, लालित्यं.

FLABBY, शिथिलः -ला -लं, ललितः -ता -तं कोमलः -ला -लं, स्निग्धः -ग्धा -ग्धं, मेदुरः -रा -रं, अकठिनः -ना -नं.

FLACCID, a. शिथिलः -ला -लं, अथः -था -थं, प्रश्लथः -था -थं, म्लानः -ना -नं, आर्द्रः -र्द्रा -र्द्रं, असंहतः -ता -तं, वलिनः -ना -नं, वलिभः -भा -भं, वलिमान् -मती -मत् (न्).

FLACCIDITY, s. शैथिल्यं, शिथिलता. अथता, प्रश्लथः, अन्यः म्लानता, आर्द्रता, विसंसः, असंहतत्वं, वलिमत्त्वं.

FLAG, s. (Ensign, banner) पताका, ध्वजः, ध्वजपटः, ध्वजांशुकः, केतनं, केतुः m., केतुवसनः, वैजयन्ती-न्तिका, जयन्तः, कदली-लिका, उच्छ्रयः.—(Stone) शिला, परिस्तरः, प्रस्तरः.—(Plant) गोलोमी, भूतकेशः, श्वेतदूर्वा.

To FLAG, *v. n.* ग्लै (c. 1. ग्लायति, ग्लातुं), परिग्लै, सद् (c. 1. सीदति, सत्तुं), अवसद्, ग्लै (c. 1. ग्लायति, ग्लातुं), ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, संस् (c. 1. संसते -सितुं), विसंस्, क्षि in pass. (क्षीयते), शिथिलीभू, शिथिलबलः -ला -लं भू, शिथिलतेजाः -जाः -जः भू, खिद् (c. 4. खिद्यते, खेत्तुं), खिन्नः -न्ना -न्नं भू.

To FLAG, *v. a.* (Pave with flag-stones) परिस्तरेण or प्रस्तरैः or शिलाभिर् आस्तृ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं -रीतुं).

FLAG-OFFICER, *s.* नौकासमूहपतिः *m.*, युद्धनौकासमूहाधिपतिः *m.*

FLAG-STAFF, *s.* ध्वजस्तम्भः, केतुयष्टिः *m. f.*, ध्वजः, यष्टिः, पताकायष्टिः.

FLAG-STONE, *s.* शिला, शिलापट्टः, शिलाफलकं, परिस्तरः, प्रस्तरः.

To FLAGELLATE, *v. a.* रज्ज्वा or रज्जुना or चर्म्मदण्डेन तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).

FLAGELLATION, *s.* कशाघातः, कशाताडनं, कशा, चर्म्मदण्डताडनं.

FLAGEOLET, *s.* वंशः, वेणुः *m.*, विवरनालिका, सानेयी -यिका

FLAGGED, *p. p.* प्रस्तरास्तीर्णः -र्णा -र्णं, शिलास्तीर्णः -र्णा -र्णं.

FLAGGING, *part.* ग्लानः -ना -नं, संसी -सिनी -सि (न्), खिन्नः -न्ना -न्नं.

FLAGGY, *a.* शिथिलः -ला -लं, अथः -था -थं, प्रश्लथः -था -थं.

FLAGITIOUS, *a.* अतिपापी -पिनी -पि (न्), महापापी &c., अतिपातकी -किनी -कि (न्), महापातकी &c., अतिदुर्वृत्तः -त्ता -त्तं, अतिपापिष्ठः -ष्ठा -ष्ठं, अतिदुष्टः -ष्टा -ष्टं, अतिदोषी -षिणी -षि (न्), दारुणः -णा -णं, घोरः -रा -रं.

FLAGITIOUSLY, *adv.* ममहापापं, अतिपापिष्ठवत्, अतिदुर्वृत्तवत्, दारुणं.

FLAGITIOUSNESS, *s.* अतिदुष्टता, महापातकं, महापापं, पापिष्ठता, दौरात्म्यं, दुर्वृत्तता, घोरता, दारुणता

FLAGON, *s.* घटयीवः, सुराभाजनं, पानभाजनं, पानपात्रं.

FLAGRANCY, *s.* सद्यप्रकाशता, सद्यप्राकट्यं, याच्यता, अतिदुष्टता, घोरता.

FLAGRANT, *a.* प्रकाशः -शा -शं, सद्यप्रकाशः -शा -शं, सद्यप्रसिद्धः -द्धा -द्धं, लोकविदितः -ता -तं, अतिदुष्टः -ष्टा -ष्टं, घोरः -रा -रं, पुरःस्फुरन् -रन्ती -रत् (त्)

FLAGRANTLY, *adv.* प्रकाशं, सुप्रकाशं, सद्यप्रसिद्धं, अतिदुष्टं.

FLAGRATION, *s.* दाहः, दहनं, दाहनं, ज्वलनं, ज्वालः, प्रोषः.

FLAIL, *s.* धान्यमर्द्दनयष्टिः *m. f.*, शस्यकर्द्दनयन्त्रं, कर्द्दनी, शस्यमर्द्दनी, शिथिलदण्डविशेषो यदाघातेन धान्यादि निस्तुषीक्रियते.

FLAKE, *s.* (Of snow) हिमलवः, हिमकणः, तुषारघनः, नीहारघनः, हिमगुलं, हिमाङ्कुरः, तुषारगुलः, तूलोपमो हिमानीलवः.—(Layer) फलकः -कं.—(Scale, loose piece) वल्कं, शल्कं, शकलं

To FLAKE, *v. n.* शकलीभू, शकलानि चल् (c. 9. चलाति, चलितुं).

FLAKY, *a.* सशल्कः -ल्का -ल्कं, शकली -लिनी -लि (न्), फलकी -किनी -कि (न्).

FLAM, *s.* अनर्थकं, मृषार्थकं, माया, छलं, प्रतारणा, छद्म *n.* (न्).

FLAMBEAU, *s.* उल्का, उल्मुकं, ज्वलनकाष्ठं, अग्निकाष्ठं, अलातं.

FLAME, *s.* शिखा, अग्निशिखा, अर्चिः *f.* (स्), अर्चीः *f.*, ज्वालः -ला, अग्निज्वाला, ज्वलः -लका, ज्वालाग्निः *m.*, अग्निजिह्वा, शिखिशिखा, कोलः -ला, अग्निकोलः, हेतिः *f.*, उल्का, तेजः *n.* (स्); 'in flames,' ज्वलन् -लन्ती -लत् (त्), ज्योतिस्सात्.

To FLAME, *v. a.* ज्वल् in caus. (ज्वालयति, ज्वलयति -यितुं), प्रज्वल्, सम्प्रज्वल्.

To FLAME, *v. n.* ज्वल् (c. 1. ज्वलति -लितुं), प्रज्वल्, उज्ज्वल्, सम्प्रज्वल्, ज्वल् in freq. (जाज्वल्यते), दीप् (c. 4. दीप्यते -पितुं), प्रदीप्, आदीप्.

FLAME-COLOURED, *a.* अग्निवर्णः -र्णा -र्णं, वह्निवर्णः -र्णा -र्णं. पीतः -ता -तं.

FLAMING, *part.* and *a.* ज्वलन् -लन्ती -लत् (त्), ज्वलयन् -यन्ती -यत् (त्), ज्वलः -ला -लं. ज्वली -लिनी -लि (न्), ज्वाली &c., ज्वालः -लो -लं, ज्वलितः -ता -तं, उज्ज्वलः -ला -लं, जाज्वल्यमानः -ना -नं, प्रज्वलितः -ता -तं, उज्ज्वसः -स्वा -स्वं. पद्दीप्तः -प्ता -प्तं, अर्चिष्मान् -ष्मती -ष्मत् (त्).

FLAMINGO, *s.* राजहंसः, हंसकः. रक्तपक्षः. अग्निवर्णः पक्षिभेदः.

FLAMY, *a.* शिखी -खिनी -खि (न्). शिखावलः -ला -लं, आग्नेयः -यी -यं.

FLANK, *s.* पार्श्वः -र्श्वं. पार्श्वभागः, पार्श्वाङ्गं, पक्षः, पक्षभागः, उत्सङ्गः, कुक्षिः *m.*, अक्षुः, कोलः, कृत्स्नं, तः; 'of a horse,' कक्ष्यं; 'on the flank,' पार्श्वतस्.

To FLANK, *v. a.* and *n.* (Attack the flank) पार्श्वं or पार्श्वभागम् आक्रम् (c. 1. -क्रामति -क्रमितुं).—(Guard on the flank) पार्श्वतो रक्ष् (c. 1. रक्षति -क्षितुं).—(Border, be posted on the side) पार्श्वतः or निकटे or पार्श्वभागे स्था (c. 1. तिष्ठति स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), स्पृश् (c. 6. स्पृशति. स्प्रष्टुं).

FLANNEL, *s.* कम्बलः, ऊर्णायुः *m.*, और्णपटः, और्भं, ऊर्णानिर्म्मितं or मेषलोममयं विरलवस्त्रं, सहस्रलोम *n.* (न्), साशूकः, कुतपः.

FLAP, *s.* (Any thing that hangs loose) लम्बिका, लोला, लोलकः, लम्बमानवस्तु *n.*, प्रलम्बवस्तु, प्रलम्बितं.—(The motion of it) आस्फालः -लनं -लितं.

To FLAP, *v. a.* (The wings) पक्षौ स्फल् in caus. (स्फालयति -यितुं) or आस्फल् or चल् in caus. (चालयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

To FLAP, *v. n.* आस्फालितं कृ, आस्फल् (c. 1. -स्फलति -लितुं), फलम्फला (nom. फलम्फलायते).

FLAPPED, *p. p.* आस्फालितः -ता -तं, चालितः -ता -तं, लोलितः -ता -तं.

FLAPPING, *s.* (Of wings) आस्फालनं, पक्षास्फालनं, पक्षोत्क्षेपः, फलम्फला.—(Of ears) कर्णतालः.

To FLARE, *v. n.* चञ्चलशिखया or सचञ्चलशिखं or चञ्चलरूपेण ज्वल् (c. 1. ज्वलति -लितुं) or उज्ज्वल् or ज्वल् in freq. (जाज्वल्यते).

FLARE, *s.* चञ्चलशिखा, चञ्चलज्वालः, कम्पितज्वाला, स्फुरद्द्युतिः *f.*

FLARING, *a.* चञ्चलशिखया जाज्वल्यमानः -ना -नं or उज्ज्वलः -ला -लं.

FLASH, *s.* ज्वाला, स्फुरितं, स्फुरणं, द्युतिस्फुरणं, प्रभाकम्पः, अकस्मात्स्फुरणं, अकस्माद्दीप्तिः *f.*, क्षणप्रभा, क्षणद्युतिः *f.*, अचिरप्रभा, अचिरद्युतिः *f.*—(Of lightning) विद्युत्स्फुरणं, सौदामिनीस्फुरणं, विद्युत्प्रकाशः, विद्युत्कम्पः, विद्युद्दाम *n.* (न्), मेघज्योतिः *n.* (स्), विद्युज्ज्वाला, इरम्मदः.

To FLASH, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), विद्युत् (c. 1. -द्योतते -तितुं), अकस्मात् प्रकाश् (c. 1. -काशते -शितुं) or ज्वल् (c. 1. ज्वलति -लितुं) or उज्ज्वल् or प्रज्वल्, विद्युद्वत् कम्प् (c. 1. कम्पते -म्पितुं).

FLASHING, *a.* or *part.* स्फुरन् -रन्ती -रत् (त्), स्फुरितः -ता -तं, विद्योत-

मानः -ना -नं, द्योतमानः -ना -नं, कम्यमानः -ना -नं, कम्मितप्रभः -भा -भं, क्षणप्रकाशन् -शनी -शत् (न्).

Flashy, *a.* क्षणमात्रद्योती -तिनी -ति (न्), मिथ्याद्योती &c., मिथ्यातेजसः -सी -सं, मिथ्यातेज्ञोमयः -यी -यं.—(Unsubstantial) असारः -रा -रं, निस्सत्त्वः -त्त्वा -त्त्वं.

Flask, *s.* कूपी, घुटयोयः, काचपात्रं, काचभाजनं; 'of wine,' मद्यभाजनं.

Flasket, *s.* अन्नभाजनं, अन्नपात्रं, खाद्यद्रव्यभाजनं.

Flat, *a.* (Even) समः -मा -मं, समानः -ना -नं, समस्थः -स्था -स्थं, सपाटः -टा -टं, समरेखः -खा -खं, निर्भुग्नः -ग्ना -ग्नं, अभुग्नः -ग्ना -ग्नं.—(Not elevated) अनुच्चः -च्चा -च्चं, अनुन्नतः -ता -तं, निम्नः -म्ना -म्नं, नतः -ता -तं.—(Prostrate, lying flat) दण्डवत्पतितः -ता -तं, भूमौ क्षिप्तदेहः -हा -हं, अवनिङ्गतः -ता -तं.—(Vapid, tasteless) विरसः -सा -सं, नीरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु, असारः -रा -रं, निस्सारः -रा -रं, अलवणः -णा -णं, सारहीनः -ना -नं, लवणहीनः -ना -नं, निस्तेजाः -जाः -जः (म्), तेजोहीनः -ना -नं, क्लीवः -वा -वं, निःस्वादुः -दुः -दु, विस्वादः -दा -दं.—(Plain) अवक्रः -क्रा -क्रं; 'flat roof,' पृष्ठं; 'flat surface,' समपृष्ठं, समतलं.

Flat, *s.* (A plain) समभूमिः *f.*, समस्थलं -ली, समभूभागः, समस्थानं, साजिः *f.*, पाटः, समं.—(Low ground) निम्नभूमिः *f.*—(Shoal) सैकतं.—(Of a sword, &c.) फलकः -कं, पत्रं.—(In music) अनुदात्तः, मन्दः, मन्द्रः, उदात्तेतरः शब्दः.—(Flat-bottomed boat) तरालुः *m.*, तरान्धुः *m.*—(Stupid fellow) मन्दबुद्धिः *m.*, स्थूलधीः *m.*

To flat, *v. a.* समीकृ, समानीकृ, समस्थलीकृ, निम्नीकृ.

Flat-bottomed, *a.* समतलः-ला-लं, समाधोभागः-गा-गं, समाधःस्थानः-ना-नं.

Flat-nosed, *a.* नतनासिकः -का -कं, अवनाटः -टा -टं, अवटीटः -टा -टं, अवभटः -टा -टं, सुरणासः -सा -सं or -णाः -णाः -णः (स).

Flatly, *adv.* समं, समानतस्.—(Plainly) अवक्रं, मुग्धक्रं.

Flatness, *s.* (Evenness) समता, साम्यं, समानता -त्वं, साम्यता, पाटः, निर्भुग्नता, अभुग्नता.—(Want of elevation) अनुच्चता, अनुन्नतिः *f.*, निम्नता, नतत्वं.—(Insipidity, dulness) अरसिकत्वं, आरस्यं, फल्गुता, असारता, निःस्वादुता, अलावण्यं, अलवण्यं, अतेजः *n.* (स), तेजोहीनता.

To flatten, *v. a.* समीकृ, समानीकृ, समस्थलीकृ, निम्नीकृ, वामनीकृ.—(Depress) अवनम् in caus. (-नामयति -नमयति -यितुं), नम्रीकृ.—(Lay flat) दण्डवत् पत् in caus. (पातयति -यितुं).—(Make vapid) रसं हृ (c. 1. हरति, हर्तुं), फल्गूकृ, विरसीकृ.

To flatten, *v. n.* समीभू, निम्नीभू, अवनतीभू, नम्रीभू, विरसीभू.

Flattened, *p. p.* अवनामितः -ता -तं, निम्नीकृतः -ता -तं, नम्रीकृतः -ता -तं.

Flattening, *s.* अवनामः, निम्नीकरणं, नम्रीकरणं, समीकरणं.

Flatter, *s.* अवनामकः, सम्प्रकरणयन्त्रं, मुद्गरविशेषः.

To flatter, *v. a.* (Soothe by praise, &c.) सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), परिशान्त्व्, अभिशान्त्व्, अतिप्रशंसया or स्तुतिवाक्यैः or चाटूक्त्या or मधुरैर्वचोभिः सान्त्व् or प्रलुभ् (c. 10. -लोभयति -यितुं) or सन्तुष् (c. 10. -तोषयति -यितुं) or लल् (c. 10. लालयति -यितुं).—(Speak what is agreeable) प्रियं or प्रियाणि or चाटुवाक्यानि वद् (c. 1. वदति -दितुं).—(Praise falsely) मिथ्या प्रशंस् (c. 1. -शंसति -सितुं) or श्लाघ् (c. 1. श्लाघते -घितुं).—(Gratify) आराध् (c. 10. -राधयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), सभाज् (c. 10. सभाजयति -यितुं).—(Raise false hopes) मिथ्या आशावृद्धिं कृ.

Flattered, *p. p.* प्रशंसितः -ता -तं, मिथ्याप्रशस्तः -स्ता -स्तं, लालितः -ता -तं, कृतसान्त्वनः -ना -नं, चाटूक्त्याराधितः -ता -तं, सभाजितः -ता -तं, आश्वासितः -ता -तं.

Flatterer, *s.* प्रशंसकः, प्रियवादी *m.* (न्), प्रियंवदः, चाटुवादी *m.* सान्त्ववादः, सान्त्वनकारी *m.* (न्), चाटुकारः, लालौ *m.* (न्), मिथ्याप्रशंसकः, शंस्ता *m.* (स्तृ), कापटप्रशंसाकृत् *m.*, मिथ्याश्वासकः आश्वासनशीलः, कापटिकः.

Flattering, *a.* परितोषकः -का -कं, सन्तोषणः -णा -णं, सान्त्वनः -ना -नं, स्तुतिमयः -यी -यं, प्रशंसाकरः -री -रं, प्रीतिकरः -रा -रं, आश्वासकः -का -कं.

Flatteringly, *adv.* अतिप्रशंसया, चाटूक्त्या, अतिशयस्तुत्या, सान्त्वनपूर्वं.

Flattery, *s.* अतिप्रशंसा -सनं, मिथ्याप्रशंसा -सनं, सान्त्वः -त्वं -त्वनं -ना, सान्त्ववाक्यं, सान्त्वोक्तिः *f.*, सान्त्वकारः, चाटूक्तिः *f.*, चाटुकारः, चाटुः *m.*, -टु *n.*, लालनं, प्रियवाक्यं, मधुरवाक्यं, मधुरवचः *n.* (स), कोमलवाक्यं, कोमलत्वं, आश्वासनं, आलोकः, आलोकशब्दः, अनुनयः, आराधनं.

Flattish, *a.* ईषत्समः -मा -मं, ईषत्समानः -ना -नं, ईषन्निम्नः -म्ना -म्नं.

Flatulence, flatulency, *s.* वायुपूर्णता, वायुरोगः, वातफुल्लता, वातफुल्लत्वं, वातिकत्वं, कोष्ठाश्रितवायुः *m.*, वायुः *m.*, वातः, वायुगुल्मः अन्त्राध्मानं, उदराध्मानं, आध्मातः. ५-फुल्लः -ल्लं.

Flatulent, *a.* वायुग्रस्तः -स्ता -स्तं, वायुरोगग्रस्तः -स्ता -स्तं, वातफुल्लः -ल्ला -ल्लं, वातफुल्लान्त्रः -न्त्रा -न्त्रं, वातिकः -की -कं, वातबद्धः -द्धा -द्धं, वायुबद्धः -द्धा -द्धं.

Flatus, *s.* वायुः *m.*, वातः, अन्त्रस्थवायुः, उदरजवातः, उदरजो वातः.

To flaunt, *v. n.* सगर्वं or सदम्भं चल् (c. 1. चलति -लितुं), गर्वितगत्या चल् or चर् (c. 1. चरति -रितुं).

Flaunting, *a.* गर्वेण चारी -रिणी -रि (न्), गर्वितगतिः -तिः -ति, खेलगामी -मिनी -मि (न्), दर्शनीयमानी -निनी -नि (न्).

Flavor, *s.* रसः, आस्वादः, स्वादः, रुचिः *f.*, अभिरुचिः *f.*, लालित्यं, लावण्यं.

To flavor, *v. a.* रसं दा (c. 3. ददाति, दातुं), मरमं -सां -मं कृ, सुरसीकृ.

Flavored, *p. p.* or *a.* रसितः -ता -तं, मरमः -मा -मं, रसिकः -का -कं; 'well-flavored,' सुरसः -सा -सं, सुस्वास्वादः -दा -दं, सुललितः -ता -तं, सुस्वादुः -दुः -दु.

Flavorless, *a.* अरसः -सा -सं -सिकः -की -कं, विरसः -सा -सं, निरसः -सा -सं, नीरसः -सा -सं, निःस्वादुः -दुः -दु, विस्वादः -दा -दं, अस्वादुः -दुः -दु.

Flavorous, *a.* सुरसः -सा -सं, रसिकः -का -कं, रसवान् -वती -वत् (त्), स्वादुः -दुः -दु, सुस्वास्वादः -दा -दं, मिष्टः -ष्टा -ष्टं.

Flaw, *s.* (Crack) छिद्रं, रन्ध्रं, भित्तिः *f.*, स्फोटः, भेदः, स्फेदः, भङ्गः, सन्धिः *m.*—(Defect) दोषः, अपराधः छिद्रं, कलङ्कः.—(In a gem) पुलकः, स्फोटः, रक्तबिन्दुः *m.*; 'without a flaw,' निष्छिद्रः -द्रा -द्रं, नीरन्ध्रः -न्ध्रा -न्ध्रं.—(Sudden gust of wind) प्रभञ्जनः, निर्घातः, व्योमसुहृत्.

To flaw, *v. a.* छिद्र् (c. 10. छिद्रयति -यितुं), स्फुट् (c. 10. स्फोटयति -यितुं).

Flawless, *a.* निष्छिद्रः -द्रा -द्रं, नीरन्ध्रः -न्ध्रा -न्ध्रं, निर्दोषः -षा -षं.

Flawy, *a.* सच्छिद्रः -द्रा -द्रं, सरन्ध्रः -न्ध्रा -न्ध्रं, सदोषः -षा -षं, दर्दरः -रा -रं.

Flax, *s.* अतसी, उमा, क्षुमा, क्षौमी, शणं, मसीना, ममृणा, मृदुवल्ला, मालिका.

Flax-comb, *s.* अतसीमार्जकः, उमामार्जनी, उमाशोधनी, शणप्रमाथनी.

Flax-dresser, *s.* अतसीशोधकः, उमापरिष्कारकः, शणप्रमाथकः.

Flaxen, *a.* क्षौमः -मी -मं, क्षौमकः -की -कं, क्षौमः -मी -मं, शाणः -णी -णं.

To flay, *v. a.* त्वच (nom. त्वचयति -यितुं), निस्त्वचीकृ, चर्म निष्कृष् (c. 1. -कर्षति -क्रष्टुं) or उत्कृष् or निर्हृ (c. 1. -हरति -हर्तुं), निश्चर्म (nom. निश्चर्मयति -यितुं), त्वच् (c. 1. त्वचति -क्षितुं).

Flayed, *p. p.* निस्त्वचीकृतः -ता -तं, निस्त्वचः -चा -चं, निश्चर्मा -र्मा -र्म (न्).

Flayer, *s.* चर्मनिष्कर्षकः, चर्मोत्पाटी *m.* (न्), त्वग्विदारकः.

Flaying, *s.* निस्त्वचीकरणं, चर्मनिष्कर्षणं, निश्चर्मकरणं, त्वक्परिपुटनं.

Flea, *s.* देहिका, मत्कुणः, मक्षिका, तल्पकीटः, रक्तपायी *m.* (न्).

To flea, *v. a.* देहिका or तल्पकीटान् अपनी (c. 1. -नयति -नेतुं) or दूरीकृ.

Flea-bite, *s.* देहिकादंशः, मत्कुणदंशनं, देहिकादशनाङ्कः, मक्षिकादंशः.

FLEA-BITTEN, *a.* देहिकादष्टः-ष्टा-ष्टं, देहिकादंशितः-ता-तं, मक्षिकादष्टः-ष्टा-ष्टं

FLEAM, *s.* पशुचिकित्सकादिभिः सिराव्यधे or रक्तमोक्षणे प्रयुक्तं तीक्ष्णाग्रयन्त्रं.

FLED, *p. p.* पलायितः -ता -तं, विपलायितः -ता -तं, विद्रुतः -ता -तं.

To FLEDGE, *v. a.* सपक्षं -क्षां -क्षं कृ, पक्षैर् युज् (c. 10. योजयति -यितुं).

FLEDGED, *p. p.* पक्षयुक्तः -क्ता -क्तं, पक्षवान् -वती -वत् (त्), गरुत्मान् -त्मती -त्मत् (त्मत्).

To FLEE, *v. n.* पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, विप्रद्रु, प्रद्रु, प्राद्रु; प्रधाव् (c. 1. -धावति -वितुं), अपधाव्, निष्पत् (c. 1. -पतति -तितुं), उत्पत्, अपक्रम् (c. 1. -क्रामति -क्रमितुं), निर्गम् (c. 1. -गच्छति -गन्तुं), अपगम्, अपसृप् (c. 1. -सर्पति -सप्तुं), व्यपसृप्, भज् (c. 1. भजति -ते, भक्तुं) with दिशः or ककुभः.—(Avoid) वृज् (c. 10. वर्जयति -यितुं), विवृज् परिवृज्, परिहृ (c. 1. -हरति -हर्त्तुं), त्यज् (c. 1. त्यजति, त्यक्तुं).

FLEECE, *s.* मेषलोम *n.* (न्), अविलोम *n.* (न्), मेषरोम *n.* (न्), मेषाङ्गरुहं, यन् मेषलोमपरिमाणम् एकवारे अवच्छिद्यते, मेषस्य छिन्नलोम *n.* (न्).

To FLEECE, *v. a.* मेषलोम छिद् (c. 7. छिनत्ति, छेत्तुं) or लू (c. 9. लुनाति, लवितुं).—(Strip, plunder) हृ (c. 1. हरति, हर्त्तुं), अपहृ, प्रबाध् (c. 1. -बाधते -धितुं).

FLEECED, *p. p.* हृतसर्वस्वः -स्वा -स्वं, अपहृतस्वः -स्वा -स्वं, बाधितः -ता -तं.

FLEECY, *a.* लोमशः -शा -शं, रोमशः -शा -शं, बहुलोमा -मा -म (न्), बहुरोमा &c., लोमावृतः -ता -तं, बहुलोमवान् -वती -वत् (त्), मेषलोममयः -यी -यं.

To FLEER, *v. a.* अवहस् (c. 1. -हसति -सितुं), अपहस्, कु स्मि (c. 1. स्मयते, स्मेतुं), उत्स्मि, विकृतदृष्ट्या स्मि, तिरस्कृ, मुखरीकृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

FLEER, *s.* अवहासः, अवहेला, अवक्षेपः, कुस्मयः, कुस्मितं, दृष्टिविक्षेपः.

FLEERER, *s.* उपहासकः, अवक्षेपकः, मुखरजनः, कुस्मितः.

FLEET, *s.* वृहन्नौकासमूहः, महानौकासमूहः, वृहन्नौसङ्ग्रहः, युद्धनौसमूहः.

FLEET, *a.* शीघ्रगामी -मिनी -मि (न्), द्रुतगामी &c., द्रुतगतिः -तिः -ति, लघुगतिः -तिः -ति, महावेगः -गा -गं, महाजवः -वा -वं, वेगवान् -वती -वत् (त्), जवी -विनी -वि (न्), शीघ्रजवः -वा -वं, प्रतूर्णः -र्णा -र्णं, त्वरितः -ता -तं, त्वरितगतिः -तिः -ति, ससौष्ठवः -वा -वं.—(As the wind) वायुवेगः -गा -गं, वायुवेगसमः -मा -मं, वायुगतिः -तिः -ति, वायव्यः -व्या -व्यं.

To FLEET, *v. n.* (Go swiftly) द्रुतगत्या or महावेगेन चल् (c. 1. चलति -लितुं), त्वर् (c. 1. त्वरते -रितुं), शीघ्र (nom. शीघ्रायते), द्रुतं गम् (c. 1. गच्छति, गन्तुं).

To FLEET, *v. a.* (Skim over) लघुगत्या अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or विसृप् (c. 1. -सर्पति -सप्तुं).—(Skim milk) दुग्धफेनम् अपनी (c. 1. -नयति -नेतुं).

FLEETING, *a.* क्षणमात्रस्थायी -यिनी -यि (न्), अचिरस्थायी &c., अध्रुवः -वा -वं, क्षणभृतः -ता -तं, क्षणभङ्गुरः -रा -रं, क्षणिकः -का -की -कं.

FLEETLY, *adv.* शीघ्रं, द्रुतं, त्वरितं, महावेगेन, महाजवेन, द्रुतगत्या, लघुगत्या, लघु, क्षिप्रं, सरभसं, ससौष्ठवं.

FLEETNESS, *s.* शीघ्रता, द्रुतत्वं, शीघ्रगामित्वं, त्वरितगतिः *f.*, वेगः, प्रजवः, जवः, सत्वरता, तूर्णिः *f.*, आशुगमनं, रभसः.

FLESH, *s.* मांसं, आमिषं, पललं, क्रव्यं, पिशितं usually in plural, तरसं, पलं, असृजं, शुक्रं, मेदस्कृत् *n.*, काश्यपं, उद्वसं; 'dried flesh,' शुष्कलः -ला -ली -लं, शुष्कमांसं, उत्तप्तं, वल्लूरं; 'game,' जङ्गलं, जाङ्गलं.—(Body) शरीरं.—(Carnality) शरीरोपसेवा, विषयासक्तिः *f.*, आमिषं.

To FLESH, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), निर्दयीकृ, क्रूरकर्म्माभ्यस्तं -स्तां -स्तं कृ.

FLESH-BROTH, *s.* मांसजूषं, मांसयूषं, मांसनिष्क्वाथः, मांसक्वाथः, सूपः.

FLESH-BRUSH, *s.* त्वगाघर्षणी चर्म्मनिर्घर्षणकः, चर्म्ममार्जनी.

FLESH-COLOR, *s.* मांसवर्णः, आमिषवर्णः, क्रव्यवर्णः, मांसरागः.

FLESH-COLORED, *a.* मांसवर्णः -र्णा -र्णं, आमिषवर्णः -र्णा -र्णं, क्रव्यसवर्णः -र्णा -र्णं.

FLESH-DIET, *s.* मांसाहारः, मांसभोजनं, आमिषाहारः.

FLESHINESS, *s.* मांसत्वं, मांसलत्वं, पुष्टता, पुष्टाङ्गत्वं, पीनता, पीवरता, मेदस्विता, मेदोवृद्धिः *f.*, शरीरस्थूलता.

FLESHLESS, *a.* अमांसः -सा -सं, निर्मांसः -सा -सं, विमांसः -सा -सं, विपुष्टः -ष्टा -ष्टं, अपुष्टः -ष्टा -ष्टं, मांसहीनः -ना -नं.

FLESHLINESS, *s.* शरीरोपसेवा, विषयोपसेवा, विषयासक्तिः *f.*, शारीरिकविषयसङ्गः, कामासक्तिः *f.*

FLESHLY, *a.* (Carnal) शारीरिकः -की -कं, शरीरजः -जा -जं, दैहिकः -की -कं, कायिकः -की -कं, वापुषिकः -की -कं, विषयी -यिणी -यि (न्), ऐहिकः -की -कं, सांसारिकः -की -कं.

FLESH-MEAT, *s.* मांसाहारः, मांसभोजनं, खाद्यमांसं, भोजनार्थम् आमिषं.

FLESHMONGER, *s.* मांसविक्रयी *m.* (न्), सौनिकः.—(Pimp) विटः.

FLESHY, *a.* मांसलः -ला -लं, मांसशीलः -ला -लं, पुष्टः -ष्टा -ष्टं, पुष्टाङ्गः -ङ्गी -ङ्गं, क्रव्यमयः -यी -यं, पीनः -ना -नं, पीवरः -रा -रं, मेदस्वी -स्विनी -स्वि (न्).

FLEXIBILITY, *s.* आनम्यता, नम्यता, नमनीयत्वं, कुञ्चनीयता, अवकुञ्चनीयत्वं, आयम्यत्वं, मृदुता, कोमलता, शैथिल्यं.

FLEXIBLE, *a.* आनम्यः -म्या -म्यं, नम्यः -म्या -म्यं, नमनीयः -या -यं, कुञ्चनीयः -या -यं, अवकुञ्चनीयः -या -यं, आयम्यः -म्या -म्यं, नमनशीलः -ला -लं, कुञ्चनशीलः -ला -लं, मृदुः -दुः -द्वी -दु, कोमलः -ला -लं, शिथिलः -ला -लं, अदृढः -ढा -ढं.

FLEXION, *s.* नतिः *f.*, नमनं, आनतिः *f.*, आनमनं, कुञ्चनं, अवकुञ्चनं, भङ्गः -ङ्गी

FLEXUOUS, *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, भङ्गुरः -रा -रं, कुटिलः -ला -लं, जिह्मः -ह्मा -ह्मं, विसर्पी -र्पिणी -र्पि (न्).

FLEXURE, *s.* नतिः *f.*, आनतिः *f.*, वक्रता, वक्रिमा *m.* (न्), कुञ्चनं, अवकुञ्चनं जिह्मता, भङ्गः -ङ्गी, पुटः.

To FLICKER, *v. n.* (With the wings) विहायसा or व्योममध्ये पक्षास्फालनं कृ —(As a flame, &c.) इतस्ततश् चल् (c. 1. चलति -लितुं), चञ्चलीभू चपलीभू, चञ्चलरूपेण ज्वल् (c. 1. ज्वलति -लितुं).

FLICKERING, *a.* (With the wings) व्योममध्ये पक्षास्फालनकारी -रिणी -रि (न्).—(Unsteady) चञ्चलः -ला -लं, विचलः -ला -लं, चलः -ला -लं, चपलः -ला -लं.

FLIER, *s.* पलायी *m.* (न्), विपलायी *m.*, प्रपलायी *m.*, पलायनकृत् *m.*

FLIGHT, *s.* (Act of fleeing, running away) पलायनं, विपलायनं, प्रपलायनं, द्रावः, द्रवः, विद्रवः, प्रद्रावः, उद्द्रावः, सन्द्रावः, सन्दावः, अपक्रमः, अपयानं, अपायः, अपगमः, डमरं, शृगाली -लिका; 'to put to flight,' विद्रु in caus. (-द्रावयति -यितुं), द्रु; 'put to flight,' भयद्रुतः -ता -तं, विद्रुतः -ता -तं, कान्दिशीकः -का -कं, प्रपलायितः -ता -तं, पलायितः -ता -तं.—(Flying of a bird) डीनं, डयनं, प्रडीनं, निडीनं; 'upward flight of a bird,' उड्डीनं, उड्डयनं, प्रडीनं; 'downward flight,' अवडीनं; 'indirect flight,' विडीनं, 'direct flight,' अविडीनं.—(Number of birds flying) पक्षिमाला, पक्षिश्रेणी, डीयमानपक्षिगणः; 'of geese,' हंसमाला; 'of pigeon,' कापोतं; 'of parrots,' शौकं.—(Flight of an arrow) शरवेगः, शरपातः.—(Elevation or excursion of thought) बुद्धिसमुन्नतिः *f.*, बुद्धिविलासः.—(Flight of stairs) सोपानपद्धतिः *f.*, सोपानश्रेणिः *f.*, निःश्रेणी -णिः *f.*

FLIGHTINESS, *s.* चुञ्चिभावः *f.*, चुञ्चिविभवः, चुञ्चिविलासः, मतिचापल्यं, उच्छृङ्खलता.

FLIGHTY, *a.* भावचुञ्चिः -ञ्चिः -ञ्चि, विभ्रान्तमनाः -नाः -नः (स्), चपलमतिः -तिः -ति, उच्छृङ्खलचुञ्चिः -ञ्चिः -ञ्चि, अस्थिरचुञ्चिः -ञ्चिः -ञ्चि, चारित्रभ्रंशः -शा -शं.

FLIMSINESS, *s.* असारता, निःसारता, निर्बलता, तेजोहीनता, तुच्छत्वं, शैथिल्यं.

FLIMSY, *a.* असारः -रा -रं, निःसारः -रा -रं, सारहीनः -ना -नं, निस्तेजाः -जाः -जः (स्); अवास्तवः -वी -वं -विकः -की -कं, निर्बलः -ला -लं, तुच्छः -च्छा -च्छं, तनुः -नुः -न्वी -नु, शिथिलः -ला -लं.

To FLINCH, *v. n.* निवृत् (c. 1. -वर्तते -र्त्तितुं), परिवृत्, परावृत् with abl. c., उद्विज् (c. 6. -विजते -जितुं) with abl. c., विकम्प् (c. 1. -कम्पते -म्पितुं), अवस्था (c. 1. -तिष्ठते -स्थातुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), पराङ्मुखीभू, विमुखीभू, त्यज् (c. 1. त्यजति, त्यक्तुं).

FLINCHER, *s.* परिवर्त्तकः, परिवर्त्ती *m.* (न्), कम्पनिवृत्तः, कम्पत्यागी *m.* (न्), पराङ्मुखः, विकम्पितः -म्पकः.

FLINCHING, *s.* विकम्पः -म्पनं, विकम्पितं, निवृत्तिः *f.*, निवर्त्तनं, पराङ्मुखता.

To FLING, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, अस् (c. 4. अस्यति. -सितुं), ग्रास्, अभ्यस्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, मृज् (c. 6. मृजति, मर्ष्टुं), ईर् (c. 10. ईरयति -यितुं), पत् in caus. (पातयति -यितुं). —(Fling away) अपास्, अवमुच्, प्रमुच्, अवसृज्, विसृज्, अपसृज्, प्रतिक्षिप्, अपहा (c. 3. -जहाति -हातुं).

To FLING, *v. n.* क्रोधसंरम्भत्वात् पादादिक्षेपं कृ or क्षुरक्षेपं कृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

FLING, *s.* क्षेपः -पणं, प्रक्षेपः, निःक्षेपः, असनं, पातः -तनं.—(Gibe) क्षेपः, अवक्षेपः.

FLINT, *s.* अग्निप्रस्तरः, अरणिः *m.*, वह्निप्रस्तरः, आग्नेयप्रस्तरः.

FLINTY, *a.* अग्निप्रस्तरमयः -यी -यं.—(Cruel, hard-hearted) पाषाणहृदयः -या -यं, अयोहृदयः -या -यं, कठिनहृदयः -या -यं.

FLIP, *s.* (A beverage) मद्ययवसुरादिनिर्म्मितं पानीयं.—(Stroke) आघातः, आस्फालनं.

FLIPPANCY, *s.* (Of speech) वाक्चापल्यं, धावदूकता.—(Pertness) चापल्यं, चपलत्वं, चाञ्चल्यं, अस्थिरता, लोलता, लौल्यं, अनवस्थितिः *f.*, प्रगल्भता.

FLIPPANT, *a.* (In speech) वाक्चपलः -ला -लं, वाक्चञ्चलः -ला -लं, वाचालः -ला -लं.—(Pertness) चपलः -ला -लं, चञ्चलः -ला -लं, अस्थिरः -रा -रं, लोलः -ला -लं, अनवस्थितः -ता -तं, प्रगल्भः -ल्भा -ल्भं.

FLIPPANTLY, *adv.* चपलं, चापल्यात्, लौल्यात्, चञ्चलं, अस्थैर्य्यात्.

To FLIRT, *v. a.* (Toss suddenly) अकस्मात् or सहसा क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

To FLIRT, *v. n.* (Jeer) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्.—(Act with giddiness) चपलः -ला -लं भू, चञ्चलः -ला -लं भू.—(Coquet) विलस् (c. 1. -लसति -सितुं), लल् (c. 1. ललति -लितुं), खेला (nom. खेलायति -यितुं), विलासं कृ, हावं कृ, प्रेमलिलितं कृ, प्रेमखेलां कृ.

FLIRT, *s.* (Quick throw) अकस्मात्क्षेपः, आकस्मिकक्षेपः.—(Coquette) रसिका स्त्री, प्रगल्भा स्त्री, धृष्टा स्त्री, चपला स्त्री, विलासिनी, लालिनी, लीलावती, प्रेमखेलाकारिणी.

FLIRTATION, *s.* (Playing at courtship) प्रेमखेला, प्रेमलिलितं, लीला, खेला, विलासः, हावः लालसा, रमण्यं.

To FLIT, *v. n.* (Fly away, move rapidly) द्रुङ् (c. 4. -द्रीयते, c. 1. -द्रयते -यितुं), द्रुतगत्या or लघुगत्या or लघु चल् (c. 1. चलति -लितुं) or सृप् (c. 1. सर्पति, सर्प्तुं).—(Rove on the wing, flutter) चियति or आकाशे विसृप्, ओलमध्ये पक्षास्फालनं कृ.—(Be unstable) अस्थिरः -रा -रं भू चञ्चलीभू, चपलीभू.—(Migrate, move about) उत्क्रम् (c. 1. -क्रामति -क्रमितुं), देशान्तरं गम् (c. 1. गच्छति, गन्तुं), स्थानात् स्थानं गम्, इतस्ततो भ्रम् (c. 4. भाम्यति, भ्रमितुं).

FLITCH, *s.* लवणीकृतं शूकरपार्श्वमांसं, शूकरस्य शुष्कमांसं, वज्रूरं.

FLITTER, *s.* वस्त्रखण्डः -ण्डं, चीरं, कर्पटः, लङ्कं, कन्था.

FLITTER-MOUSE, *s.* जतुका -तूका, अजिनपत्रा, चर्म्मचटका, चर्म्मचटी.

FLITTING, *s.* लघुचलनं, विसर्पणं, सर्पणं, अस्थैर्य्यं, भ्रमणं.

To FLOAT, *v. n.* (Be borne on the surface, not to sink) प्लु (c. 1. प्लवते, प्लोतुं), भास् (c. 1. भासते -सितुं), उन्मज्ज् (c. 6. -मज्जति -मंक्तुं), उत्पत् (c. 1. -पतति -तितुं).—(Swim) तॄ (c. 1. तरति -रितुं -रीतुं), जले विसृ (c. 1. -सरति -सर्त्तुं).

To FLOAT, *v. a.* प्लु in caus. (प्लावयति -यितुं), वह् in caus. (वाहयति -यितुं).

FLOAT, *s.* (Raft) प्लवः, प्लवाका, तरणः -णी, तरण्डः, तरत् *n.*, तर्णिः *m.*, तारणः, वहित्रं, कोलः, उडुपः -पं, वारित्रः.—(Of a fishing-line) तरण्डः.

FLOATING, *part.* or *a.* प्लवमानः -ना -नं, भासमानः -ना -नं.

FLOCCULENT, *a.* घनीभूतः -ता -तं, झ्यानः -ना -नं.—(Seeds) ग्रीष्महासं, वंशकर्म.

FLOCK, *s.* (Collection of animals) यूथं, गणः, समूहः, सङ्घः, सङ्घातः, व्रजः, कुलं, वृन्दं, संहतिः *f.*, ओघः, कदम्बकं, निवहः, समुदायः, समुदयः, समाहारः, पाशर्वं, निकरः, समवायः, सञ्चयः, चयः, निकुरुम्बं -म्बकं, वारः, विसरः, व्रातः, सन्दोहः, समजः, सार्थः, निकायः.—(Flock of sheep) मेषयूथं, अविगणः, अविकुलं, अविकटः, आविकं, औरभ्रकं; 'of goats,' आजकं; 'of goats and sheep, अजाविकं; 'of cattle,' पशुगणः, गोकुलं, गोवृन्दं; 'of pigeons,' कापोतं, 'of parrots,' शौकं; 'of peacocks,' मायूरं; 'of geese,' हंसमालां, हंसश्रेणी; 'of partridges,' तैत्तिरं; 'in flocks,' यूथशस्.—(Flock of cotton) तूलं -लिका, इन्द्रतूलं; 'flock-mattress,' तूलिका.

To FLOCK TOGETHER, *v. n.* एकत्र मिल् (c. 6. मिलति, मेलितुं), यूथशः or पशुयूथवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or समागम् or समे (c. 2. समेति -तुं, rt. इ) or अनुसृ (c. 1. -सरति -सर्त्तुं), एकीभू, एकत्रभू, एकीभूभू, समूहीभू, सङ्कुलीभू.

To FLOG, *v. a.* चर्म्मदण्डेन or कशया or वेत्रेण ताड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -र्हर्त्तुं) or दण्ड् (c. 10. दण्डयति -यितुं).

FLOGGED, *p. p.* कशाताडितः -ता -तं, कशादण्डितः -ता -तं, वेत्राहतः -ता -तं.

FLOGGING, *s.* कशाताडनं, कशाघातः, कशा, रज्जुताडनं, वेत्राघातः, चर्म्मदण्डप्रहारः; 'deserving it,' कश्यः -श्या -श्यं, कशार्हः -र्हा -र्हं.

FLOOD, *s.* (Deluge, inundation) जलाप्लावनं, जलप्लावनं, आप्लावः, जलप्रलयः, जलवेगः, तोयविप्लवः, सलिलोपप्लवः, जलोच्छ्वासः, जलौघः, आप्लाविजलं, परीवाहः, विदारः, वन्या.—(Universal flood) भूतसम्प्लवः, एकार्णवं.—(Stream) स्रोतः *n.* (स्), प्रवाहः.—(Tide) वेला, रयः. —(Overflow of a river) वानं.—(Flood of tears) अश्रुप्रवाहः, अश्रुपातः, अश्रुवर्षः, वाष्पवर्षः, धाराश्रु *n.*, अश्रुकलाप्लुः *m.*

To FLOOD, *v. a.* प्लु in caus. (प्लावयति -यितुं), आप्लु, सम्प्लु; 'is flooded,' प्लाव्यते.

FLOODED, *p. p.* प्लावितः -ता -तं, आप्लावितः -ता -तं, परिप्लुतः -ता -तं अभिप्लुतः -ता -तं, सम्प्लुतोदकः -का -कं, अभिपरिप्लुतः -ता -तं.

FLOOD-GATE, *s.* जलद्वारं, जलपथः, जलवर्त्म *n.* (न्), जलनिर्गमः, जलनिःसरणं.

FLOOK, *s.* लङ्गरदण्डः, लङ्गरभुजः, लङ्गराकर्षणी, नौबन्धनयन्त्रकीलः.

FLOOR, *s.* (Bottom of a building, part on which one walks) तलं, गृहतलं, हर्म्यतलं, गृहभूमिः *f.*, गृहभूः *f.*, वेश्मभूः *f.*, कुट्टिमं, तलिमं, थुतलः, गृहपोटः, गृहपोतकः, पोतः, वास्तु: *m.*, प्रतिष्ठानं, गृहमूलं, भूमिः *f.*, भूतलं, पृष्ठं.—(Story of a house) भूमिः, कोष्ठः -ष्ठं, मञ्चः; 'second floor,' द्वितीयभूमिः *f.*, द्वितीयकोष्ठं; 'upper floor,' उपरिभूमिः *f.*

—(Platform of boards) फलकः-कं, फलकास्तरः-रणं, दीर्घकाष्ठास्तरः-रणं, फलकस्तरिमा *m.* (न्), फलकसंस्तरः, मञ्चः-ञ्चकः.

To FLOOR, *v. a.* फलकैः or दीर्घकाष्ठैः or काष्ठफलकैर् आस्तृ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), फलक (nom. फलकयति -यितुं), सफलकीकृ.—(Strike down) भूमौ पत् in caus. (पातयति -यितुं).

FLOORING, *s.* फलकास्तरणं, फलकास्तरः, फलकास्तरिमा *m.* (न्), परिस्तरः.

To FLOP, *v. a.* आस्फोटनशब्देन तड् (c. 10. ताडयति -यितुं), आस्फल् (c. 10. -स्फालयति -यितुं).

FLORA, *s.* (The goddess) सीता, पुष्पदेवता.—(Catalogue of plants) ओषधिपरिसंख्या.

FLORAL, *a.* पौष्पः-ष्पी-ष्पं-ष्पिकः-की-कं, कौसुमः-मी-मं, सौमनसः-सी-सं.

FLORID, *a.* (In colour or complexion) रक्तवर्णः-र्णा-र्णं, अरुणवर्णः-र्णा-र्णं, पुष्पवर्णः-र्णा-र्णं.—(As style) पुष्पितः-ता-तं, अलङ्कृतः-ता-तं, वागलङ्कारमयः-यी-यं, व्यञ्जनामयः-यी-यं, शोभितः-ता-तं.

FLORIDITY, FLORIDNESS, *s.* (Of complexion) कपोलरागः, वदनरक्तता, मुखारुणिमा *m.* (न्).—(Of style) अलङ्कारः, सालङ्कारत्वं, वागलङ्कारः, वागलङ्क्रिया, वाक्शोभा.

FLORIFEROUS, *a.* पुष्पोत्पादकः-का-कं, पुष्पजनकः-का-कं, पुष्पदः-दा-दं.

FLORILEGIUM, *s.* पुष्पचयः, पुष्पावचयः, पुष्पप्रचायः, कुसुमावचयः.

FLORIN, *s.* विदेशीयमुद्राविशेषः, रूप्यमुद्राविशेषः.

FLORIST, *s.* पुष्पादिविद्याज्ञः, पुष्पलावः, ओषधिविद्याज्ञः, मालाकारः, मालिकः, माली *m.* (न्).

FLOTA, *s.* बृहन्नौकासमूहः, महायाणिज्यनौकासमूहः.

FLOTILLA, *s.* क्षुद्रनौकासमूहः, क्षुद्रनौकासङ्घः.

To FLOUNCE, *v. n.* सम्भ्रमोपहतत्वात् or संरम्भाविष्टत्वात् शरीराङ्गानि or शरीरम् इतस्ततः क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or विक्षिप् or चल् in caus. (चालयति -यितुं) or विचल्.

FLOUNCE, *s.* (Sudden jerk of the body) अकस्माद् अङ्गविक्षेपः or शरीरविक्षेपः.—(A piece of cloth sewed round a gown with the lower border loose) स्त्रीवेशपरिः स्मृतः शिथिलाधोभागो वस्त्रखण्डः, स्त्रीवेशोपरि शोभार्थम् अधिकवस्त्रविन्यासः.

FLOUNCED, *p. p.* अधिकवस्त्रपंक्तिशोभितः-ता-तं, वेशोपरिस्थपटपंक्तिशोभितः-ता-तं.

FLOUNDER, *s.* समुद्रजः क्षुद्रमत्स्यभेदः.

To FLOUNDER, *v. n.* यथा वाजी पङ्के तथा पादादिविक्षेपेण लुठ् (c. 6. लुठति -ठितुं), पङ्गुपतितवद् निर्गमेच्छया शरीराङ्गानि इतस्ततः क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विप्लु (c. 1. -प्लवते -प्लोतुं).

FLOUR, *s.* शक्तुः *m.*, गोधूमचूर्णं, गोधूमक्षोदः, चूर्णं, क्षोदः, अपूप्यः, पिष्टं, गृहिडकः-का, समीदः, समिता.

To FLOURISH, *v. n.* (Thrive) क्षुभ् (c. 5. क्षुभ्नोति, c. 4. क्षुभ्यति, -धितुं), समृध्, एध् (c. 1. एधते -धितुं), समेध्, वृध् (c. 1. वर्धते -धितुं), विवृध्, संवृध्, समृद्धीभू.—(Use lofty language) गर्भितवाक्यम् आश्रि (c. 1. -श्रयति -यितुं).

To FLOURISH, *v. a.* (Embellish with flowers, &c.) पुष्पाद्यलङ्कारेण शुभ् (c. 10. शोभयति -यितुं) or रञ्ज् (c. 10. रञ्जयति -यितुं), अलङ्कृ, समलङ्कृ, चित्र् (c. 10. चित्रयति -यितुं).—(Brandish) भ्रम् in caus. (भ्रमयति, भ्रामयति -यितुं), उद्भ्रम्.

FLOURISH, *s.* (Show, embellishment) शोभा, अलङ्कारः, अलङ्क्रिया, रञ्जनं.—(Lofty language) गर्भितवाक्यं, दर्पवाक्यं.—(Brandishing) भ्रान्तिः *f.*, उद्भ्रमः, उद्भ्रामिः *f.*

FLOURISHED, *p. p.* (Embellished) अलङ्कृतः-ता-तं.—(Brandished) उद्भ्रान्तः-न्ता-न्तं.

FLOURISHING, *a.* समृद्धः-द्धा-द्धं, वर्धमानः-ना-नं, वर्ष्णुः-ष्णुः-ष्णु, अधिकर्द्धिः-र्द्धिः-र्द्धि, उदयी-यिनी-यि (न्), शुभान्वितः-ता-तं, सुस्थः-स्था-स्थं.

To FLOUT, *v. a.* अवहस् (c. 1. -हसति -सितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), गर्ह् (c. 1. गर्हते -र्हितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), तिरस्कृ, मुखरीकृ.

FLOUTED, *p. p.* अवज्ञातः-ता-तं, मुखरीकृतः-ता-तं, गर्हितः-ता-तं.

To FLOW, *v. n.* (Run as water) सु (c. 1. सवति, सोतुं), प्रसु, परिसु, स्यन्द् (c. 1. स्यन्दते -न्दितुं), प्रस्यन्द्, सृ (c. 1. सरति, सर्तुं), प्रसृ, संसृ, क्षर् (c. 1. क्षरति -रितुं), री (c. 4. रीयते, रेतुं), गल् (c. 1. गलति -लितुं), जलं प्रवह् (c. 1. -वहति -वोढुं), पयस (nom. पयस्यति).—(Glide along) प्रसृप् (c. 1. -सर्पति -सर्तुं), विसृप्, संसृप्, सृप्, विसृ, प्रसृ.—(As the tide) वेलावत् प्रसु, वेला (nom. वेलायते).—(Proceed) प्रवृत् (c. 1. -वर्तते -र्त्तितुं), प्रसृ, प्रगम् (c. 1. -गच्छति -गन्तुं), प्रया (c. 2. -याति -तुं), प्रचल् (c. 1. -चलति -लितुं).—(Arise from) उत्पद् (c. 1. -पद्यते -पत्तुं), जन् (c. 4. जायते, जनितुं), प्रभू, प्रवृत्.—(Hang loose, as hair, &c.) विगलितः-ता-तं भू, प्रविततः-ता-तं भू, प्रश्लथः-था-थं भू, विसंस्थ (c. 1. -संसते -सितुं), शिथिलीभू.

FLOW, *s.* (Stream, course) स्रवः-वणं, प्रवाहः, स्रोतः *n.* (स्), प्रसवः, प्रस्रवणं, प्रस्रावः, स्रावः, संसृतिः *f.*, प्रवृत्तिः *f.*, जलवाहनं, स्यन्दः-न्दनं, निस्यन्दः, अभिष्यन्दः, गलनं, गालः, क्षरणं, उदकप्रवाहः.—(Current) वेला, वेगः, रयः, धारः-रा, स्रोतः, पात्रसंस्कारः, असृपद्धतिः *f.*, पात्रक्लृप्तिः, रायभाटी, ऊर्मी.—(Tide) वेला, समुद्रवेला, समुद्ररयः.—(Flow of words) वाक्सरणिः *f.*, वाक्चापल्यं; 'flow of tears,' अश्रुपातः, अश्रुप्रवाहः, धाराश्रु *n.*; 'flow of blood,' असृक्पातः, असृग्धारा.

FLOWER, *s.* पुष्पं, कुसुमं, सुमनाः *m.*-नः *n.*-नस् *f. pl.* (स्), पुष्पं, प्रसवः, प्रसूनं, प्रसूतं, सूनं; 'flower-gathering,' पुष्पचयः, पुष्पावचयः, पुष्पप्रचयः, पुष्पप्रचायः, कुसुमावचयः; 'flower-gatherer,' पुष्पचायी *m.* (न्), पुष्पावचायी *m.* (न्), पुष्पलावः; 'flower-seller,' पुष्पाजीवी *m.* (न्), मालाकारः, मालिकः.—(Prime, best part) सारः, उत्तमभागः, श्रेष्ठभागः; 'flower of age,' यौवनावस्था; 'flower of youth,' यौवनप्रौढिः *f.*, नवयौवनं, अक्षतयौवनं; 'of corn,' धान्यस्य खाद्यभागः; 'in the flower of youth,' प्रौढयौवनः-ना-नं.—(Catamenia) पुष्पं, कुसुमं.

To FLOWER, *v. n.* (Blossom) पुष्प् (c. 4. पुष्प्यति, पुष्पितुं), कुसुम (nom. कुसुमयति -यितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), स्फुट् (c. 6. स्फुटति -टितुं, c. 1. स्फोटते -टितुं), विकस् (c. 1. -कसति -सितुं).—(Be in the prime) प्रौढयौवनः-ना-नं भू.—(Froth) फेन (nom. फेनायते) मण्ड (nom. मण्डायते).

To FLOWER, *v. a.* पुष्पाद्यलङ्कारेण शुभ् (c. 10. शोभयति -यितुं).

FLOWER-ARMED, *a.* (The Hindu Cupid) कुसुमायुधः, कुसुमेषुः *m.*, पुष्पास्त्रः, पुष्पचापः.

FLOWER-DE-LUCE or FLOWER-DE-LIS, *s.* उत्पलभेदः, पद्मविशेषः.

FLOWERED, *p. p.* or *a.* पुष्पितः-ता-तं, कुसुमितः-ता-तं, विकसितः-ता-तं, फुल्लः-ल्ला-ल्लं.—(Embellished with flowers) पुष्पाद्यलङ्कारशोभितः-ता-तं.

FLOWERET, *s.* पुष्पकः-कं, क्षुद्रपुष्पं, क्षुद्रकुसुमं.

FLOWER-GARDEN, *s.* पुष्पोद्यानं, कुसुमोद्यानं, पुष्पवाटी-टिका, उद्यानं, कुसुमाकरः.

FLOWERING, *a.* फुल्लवान्-वती-वत् (त्), प्रफुल्लः-ल्ला-ल्लं, पुष्पी-ष्पिणी-ष्पि (न्), पुष्पवान्-वती-वत् (त्), पुष्पितः-ता-तं, कुसुमितः-ता-तं, कुसुमवान्-वती-वत् (त्), स्फुटितपुष्पः-ष्पा-ष्पं, विकासी-सिनी-सि

(न्), पुष्पदः -दा -दं.

FLOWERLESS, *a.* अपुष्पः -ष्पा -ष्पं, अपुष्पकः -का -कं, अपुष्पदः -दा -दं.

FLOWER-STALK, *s.* मञ्जरी, पुष्पवृन्तं, प्रसवबन्धनं.

FLOWERY, *a.* (Having flowers) पौष्पः -ष्पी -ष्पं, पुष्पी -ष्पिणी -ष्पि (न्), सपुष्पः -ष्पा -ष्पं, पुष्पितः -ता -तं, पुष्पशाली -लिनी -लि (न्), पुष्पमयः -यी -यं, कौसुमः -मी -मं, सौमनसः -सी -नं, सकुसुमः -मा -मं. —(As style) पुष्पितः -ता -तं, अलङ्कृतः -ता -तं, वागलङ्कारमयः -यी -यं, व्यञ्जनामयः -यी -यं.

FLOWING, *part.* or *a.* सुतः -ता -तं, स्रवन् -वन्ती -वत् (त्), प्रसुतः -ता -तं, स्यन्नः -न्ना -न्नं, स्यन्दी -न्दिनी -न्दि (न्), विसारी -रिणी -रि (न्), प्रसारी &c., विसृत्वरः -रा -रं, विसृमरः -रा -रं, रीणः -णा -णं, स्रुतः -ता -तं.

FLOWING, *s.* स्रवः -वणं, प्रस्रवः -वणं, प्रस्रावः, स्रावः, उदक्प्रवाहः, वेला.

FLOWINGLY, *adv.* वाक्सरणिपूर्वं, वाक्चापल्येन, द्रुतं, द्रुतवाक्येन, अस्खलितवाक्येन, अविलम्बितं, अविलम्बितवाक्येन.

FLUCTUANT *a.* ऊर्म्मिवद् इतस्ततो लोलमानः -ना -नं or विचलः -ला -लं.

To FLUCTUATE, *v. n.* (Roll or move to and fro) इतस्ततो लुठ् (c. 6. लुठति -ठितुं) or लुल् (c. 1. लोलति -ते -लितुं) or चल् (c. 1. चलति -लितुं) or विचल्.—(Be unsteady, irresolute) दोल् (nom. दोलायते -यितुं), विचल्, विचलीभू, अस्थिरः -रा -रं भू, अस्थिरीभू, अनवस्थितः -ता -तं भू, चञ्चलीभू, पातोत्पातं कृ, विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं).

FLUCTUATING, *a.* दोलायमानः -ना -नं, विचलः -ला -लं, अप्रतिष्ठः -ष्ठा -ष्ठं, अनवस्थितः -ता -तं, अस्थिरः -रा -रं, चलः -ला -लं, चञ्चलः -ला -लं, लोलः -ला -लं, लोलमानः -ना -नं, चपलः -ला -लं, तरलायितः -ता -तं.

FLUCTUATION, *s.* अस्थैर्य्यं, अस्थिरता, अनवस्थितिः *f.*, विचलनं, चञ्चलता, चाञ्चल्यं, चलता, आन्दोलनं, दोलायमानता, अप्रतिष्ठा, चपलता, पातोत्पातः.

FLUE, *s.* (Passage for smoke) धूमपथः, धूमस्रागः, धूमवर्त्म *n.* (न्), धूमनिर्गमपथः.—(Soft down) मृदुलोम *n.* (न्), मृदुपक्ष्मः.

FLUENCY, *s.* (Of speech) वाक्सरणिः *f.*, वाग्द्रुतता, वाक्चापल्यं, वाक्क्षिप्रता, वाग्विभवः, वाक्पटुता, वाक्चातुर्य्यं, शब्दचातुर्य्यं, वाक्शैशलं, वाक्शीघ्रता, वाग्बाहुल्यं.

FLUENT, *a.* (In speech) वाग्द्रुतः -ता -तं, द्रुतवाक् *m. f. n.* (च्), वाक्क्षिप्रः -प्रा -प्रं, वाक्त्वरितः -ता -तं, त्वरितवाक् *m. f. n.*, वाक्पटुः -टुः -टु, अस्खलितवाक्यः -क्या -क्यं, अस्खलद्वाक्यः -क्या -क्यं, अविलम्बितवाक्यः -क्या -क्यं, शब्दचतुरः -रा -रं.

FLUENTLY, *adv.* द्रुतवाक्येन, क्षिप्रवाक्येन, वाक्चापल्येन, अविलम्बितवाचा, अस्खलितवाचा, त्वरितवाचा, वाग्विभवेन, द्रुतं, शीघ्रं, अस्खलितं, अविलम्बितं.

FLUID, *a.* द्रवः -वा -वं, द्रुतः -ता -तं, विद्रुतः -ता -तं, द्राव्यः -व्या -व्यं, विलीनः -ना -नं, तरलः -ला -लं, पयस्यः -स्या -स्यं, विभाजनीयः -या -यं.

FLUID, *s.* द्रवः, रसः, द्रवद्रव्यं, द्रववस्तु *n.*, जलवद्द्रव्यं, वारि *n.*, जलं, पयः *n.* (स्).

FLUIDITY, *s.* द्रवता -त्वं, द्राव्यत्वं, द्रुतत्वं, विद्रुतत्वं, विलीनता, तारल्यं.

FLUKE, *s.* लङ्गरदन्तः, लङ्गरभुजः. *See* FLOOK.

FLUMMERY, *s.* मिथ्याप्रशंसा, मिथ्यास्तुतिः *f.*, कल्पितप्रशंसा, अनर्थकस्तुतिः *f.*

FLUNG, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं; 'flung aside,' अपास्तः -स्ता -स्तं, अपसारितः -ता -तं, समाक्षिप्तः -प्ता -प्तं.

FLUNKEY, *s.* दासः, नीचकर्म्मकरः, तुच्छकर्म्मकरः, कापुरुषः, लटकः.

FLURRIED, *p. p.* आकुलितः -ता -तं, आकुलीकृतः -ता -तं, व्याकुलः -ला -लं, चलितः -ता -तं, सम्भ्रान्तः -न्ता -न्तं, ससम्भ्रमः -मा -मं, विभ्रान्तमनाः -ना -नः (स्), विक्षिप्तचित्तः -त्ता -त्तं, व्यग्रः -ग्रा -ग्रं, समाकुलः -ला -लं, चित्तवेगवान् -वती -वत् (त्), व्यस्तः -स्ता -स्तं, कातरः -रा -रं.

FLURRY, *s.* आकुलत्वं, व्याकुलता, सम्भ्रमः, विभ्रमः, चित्तभ्रान्तिः *f.*, चित्तवेगः, व्यग्रता, आवेगः, संवेगः, व्यस्तता, कातरता, वैक्लव्यं, विस्मयः, मोहः.

To FLURRY, *v. a.* आकुलीकृ, व्याकुलीकृ, व्याकुल् (nom. व्याकुलयति -यितुं), कातरीकृ, मुह् (c. 10. मोहयति -यितुं), विमुह्, चित्तवेगं जन् (c. 10. जनयति -यितुं).

To FLUSH, *v. n.* (Become suddenly red) अकस्माद् रक्तोद्गमत्वाद् अरुणमुखीभू or लोहिताननः -ना -नं भू or रक्तवदनः -ना -नं भू, अरुणीभू, रक्तीभू, लोहित (nom. लोहितायते), रञ्ज् in pass. (रज्यते) संरञ्ज्.

To FLUSH, *v. a.* (Redden suddenly) अकस्माद् अरुणीकृ or रक्तीकृ or अरुण (nom. अरुणयति -यितुं), सरागं -गां -गं कृ, रञ्ज् in caus. (रञ्जयति -यितुं).—(Elate) दृप् in caus. (दर्पयति -यितुं), उद्धतीकृ, गर्व्वितीकृ.

FLUSH, *a.* (Vigorous) प्रौढतेजाः -जाः -जः (स्), तेजस्वी -स्विनी -स्वि (न्), प्रौढः -ढा -ढं.—(Affluent) धनाढ्यः -ढ्या -ढ्यं, समृद्धः -द्धा -द्धं.—(Liberal) धनव्ययशीलः -ला -लं, मुक्तहस्तः -स्ता -स्तं.

FLUSH, *s.* कपोलरागः, कपोलरक्तता, मुखारुणिमा *m.* (न्), वदनरागः, नववर्णः.—(Abundance, affluence) बाहुल्यं, धनबाहुल्यं, समृद्धिः *f.*

FLUSHED, *p. p.* (Colored) अरुणितः -ता -तं, अरुणीकृतः -ता -तं, रञ्जितः -ता -तं, रक्तः -क्ता -क्तं, रागी -गिणी -गि (न्), कपोलरागवान् -वती -वत् (त्).—(Elated) उद्धतः -ता -तं, दर्पाध्मातः -ता -तं, दृप्तः -प्ता -प्तं; 'with victory,' जयगर्व्वितः -ता -तं.

FLUSHING, *s.* अरुणीभावः, वदनरक्तत्वं, रक्तवर्णः, लोहितवर्णः.

To FLUSTER, *v. a.* पानादिना मद् in caus. (मादयति -यितुं) or उन्मत्तीकृ or विमुह् (c. 10. -मोहयति -यितुं) or चित्तविभ्रमं जन् (c. 10. जनयति -यितुं).

FLUSTER, *s.* चित्तविभ्रमः, मद्यपानजः सम्भ्रमः, व्यग्रता, मोहः, व्याकुलता.

FLUTE, *s.* (Instrument) वेणुः *m.*, वंशः -शी, मुरली, सानेयी -यिका, सानिका, विवरनालिका, दर्दुरः, नन्दः; 'sound of the flute,' वेणुशब्दः, वेणुध्वनिः *m.*, क्षोजनं.—(Channel of a column) स्तम्भरेखा, स्तम्भसीता.

To FLUTE, *v. n.* (Play on the flute) वेणुं or वंशीं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा or वद् in caus. (वादयति -यितुं) or संवद् or प्रवद्.

To FLUTE, *v. a.* स्तम्भपरितो दीर्घरेखाः कृ or निखन् (c. 1. -खनति -नितुं).

FLUTE-PLAYER, *s.* वेणुध्मः, वांशिकः, वैणविकः, मुरलीवादकः.

FLUTED, *p. p.* or स्तम्भवद् दीर्घरेखायुक्तः -क्ता -क्तं or रेखापंक्तियुक्तः -क्ता -क्तं.

To FLUTTER, *v. n.* (Flap the wings in mid air) विहायसा or व्योममध्ये पक्षास्फालनं कृ or पक्षस्पन्दनं कृ or पक्षौ स्फल् (c. 10. स्फालयति -यितुं) or आस्फल्. प्रक्षेपम् अकृत्वा आकाशमध्ये पक्षौ विचल् in caus. (-चालयति -यितुं) or चल्.—(Move about with bustle) इतस्ततश् चल् or भाव् (c. 1. धावति -वितुं).—(Vibrate, beat, be agitated) स्पन्द् (c. 1. स्पन्दते -न्दितुं), कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, स्फुर् (c. 6. स्फुरति -रितुं), क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), उच्छ्वस् (c. 2. -च्छ्वसिति -तुं rt. श्वस्), दोल् (nom. दोलायते -यितुं).

FLUTTER, *s.* (Vibration) स्पन्दनं, प्रतिस्पन्दनं, स्फुरणं, कम्पः -म्पनं, विकम्पः, उच्छ्वासः, उच्छ्वसनं, इतस्ततो विचलनं or चलनं.—(Hurry, agitation) सम्भ्रमः, वेगः, संवेगः, आवेगः, चित्तवेगः, क्षोभः.

FLUTTERING, *s.* पक्षास्फालनं, पक्षस्पन्दनं, पक्षकम्पनं, पक्षचालनं, स्फालनं.

FLUTTERING, *part.* or *a.* आस्फालितः -ता -तं, स्पन्दमानः -ना -नं, कम्पमानः -ना -नं, विचलः -ला -लं, विचलन् -लन्ती -लत् (त्), उच्छ्वसी -सिनी -सि (न्); 'in the breeze,' अनिलोद्धितः -ता -तं, पवनाहतः -ता -तं, पवनक्षिप्तः -प्ता -प्तं.

FLUVIAL, FLUVIATIC, *a.* नादयः -यी -यं, नदीसम्बन्धी -न्धिनी -न्धि (न्).

FLUX, *s.* (Flow) स्रवः -वणं, प्रस्रवः -वणं, प्रस्रावः, प्रवाहः, स्यन्दः, क्षरणं, गलनं, गालः.—(Of the tide) वेला.—(Confluence) सङ्गमः, समागमः.—(Bloody flux) आमातिसारः, आमरक्तः.

To FLUX, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), द्रवीकृ, द्रु in caus. (द्रावयति -यितुं), विद्रु, गल् in caus. (गालयति -यितुं), विलीनीकृ.

FLUXIBILITY, FLUXILITY, *s.* द्रवत्वं, द्राव्यत्वं, गलनीयता, विलीनता.

FLUXIBLE, *a.* द्राव्यः -व्या -व्यं, गलनीयः -या -यं, सुविलयः -या -यं.

FLUXION, *s.* स्रवः -वणं, प्रस्रवः -वणं, स्रावः, प्रवाहः, गलनं, क्षरणं.

To FLY, *v. n.* (As a bird in the air) डी (c. 4. डीयते, c. 1. डयते -यितुं), पडी, उड्डी, खे or वियति विसृप् (c. 1. -सर्पति -स्रप्तुं) or सृप्, आकाशेन गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं), पत् (c. 1. पतति -तितुं), उत्पत्, प्रोत्पत्, समुत्पत्, सम्पत्.—(Move along swiftly) त्वरितं or सत्वरं or शीघ्रं गम् or चल् (c. 1. चलति -लितुं) or सृ (c. 1. सरति, सर्त्तुं) or प्रसृ.—(Run away) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, प्रद्रु (c. 1. -द्रवति -द्रोतु), विद्रु, विप्रद्रु, प्रधाव् (c. 1. -धावति -वितुं), अपधाव्, अपक्रम् (c. 1. -क्रामति -क्रमितुं), अपगम्, निर्गम्, अपसृप् (c. 1. सर्पति -स्रप्तुं), अपया (c. 2. -याति -तुं), अपसृ (c. 1. -सरति -सर्त्तुं), अपे (c. 2. अपैति -तुं, rt. इ).—(Pass rapidly) शीघ्रम् अतिक्रम् or अती (c. 2. अत्येति -तुं, rt. इ) or अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं); 'to fly away,' उड्डी, प्रडी, प्रोड्डी, निष्पत्; 'he flew away,' पलायितः; 'to fly at,' अभिपत्, आपत्, उपपत्, अभिद्रु, आद्रु, उपद्रु, अभिधाव्, आधाव्, प्रतिधाव्, 'to fly up,' उड्डी, उत्पत्, अधिरुह् (c. 1. -रोहति -रोढुं) 'to let fly,' मुच् (c. 6. मुञ्चति, मोक्तुं), सृज् (c. 6. सृजति, स्रष्टुं), पत् in caus. (पातयति -यितुं).

To FLY, *v. a.* (Avoid) वृज् (c. 10. वर्जयति -यितुं), विवृज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परिहृ (c. 1. -हरति -हर्त्तुं).—(Cause to float in the air) आकाशे विसृप् in caus. (-सर्पयति -यितुं) or विसृ in caus. (-सारयति -यितुं).

FLY, *s.* (Insect) मक्षिका, मशकः, मक्षीका, माचिका, भम्भः, भम्भराली, बम्भराली.

FLY-BITTEN, *a.* मक्षिकादष्टः -ष्टा -ष्टं, मक्षिकादंशाङ्कितः -ता -तं.

To FLY-BLOW, *v. a.* मक्षिकावद् अण्डप्रसवेन खाद्यमांसं दूष् (c. 10. दूषयति -यितुं).

FLY-BOAT, *s.* प्रणालीप्रवनयोग्या लघुनौका, द्रुतगामिनी दीर्घनौका.

FLY-CATCHER, *s.* मक्षिकाखादकः पक्षिभेदः, मक्षिकाभुक् *m.* (ज्), मक्षिकानाशकः.

To FLY-FISH, *v. n.* मक्षिकां वडिशे निवेश्य मत्स्यान् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

FLY-FLAP, *s.* मक्षिकानिवारणार्थं चामरं, अवचूलकं, रोमगुच्छः.

FLY-LEAF, *s.* मलपृष्ठं, पुस्तकस्य आद्यन्तयोः शून्यपत्रं.

FLYER, *s.* डीयमानः, खविसर्पी *m.* (न्), आकाशगामी. *See* FLIER.—(Wheel) तुलाचक्रं.

FLYING, *s.* (Act of) डीनं, डयनं, प्रडीनं, विसर्पणं, आकाशगमनं, पतनं; 'flying up and down,' डीनावडीनं.

FLYING, *part.* डीयमानः -ना -नं, खविसर्पी -र्पिणी -र्पि (न्), आकाशगतिः -तिः -ति, आकाशगामी -मिनी -मि (न्), आकाशयायी -यिनी -यि (न्), पतन् -तन्ती -तत् (त्), नभोगतिः -तिः -ति; 'flying up,' उड्डीयमानः -ना -नं.

FLYING-BRIDGE, *s.* नौसेतुः *m.*, चलसेतुः *m.*, जङ्गमसेतुः.

FLYING-FISH, *s.* आकाशगमनशीलो मत्स्यभेदः.

FOAL, *s.* अश्वशावः -वकः, किशोरः, घोटकवत्सः, बालः, बालघोटकः, अम्बरीषः.

To FOAL, *v. n.* किशोरं or अश्वशावकं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं) or प्रजा (c. 4. -जायते -जनितुं).

FOAM, *s.* फेनः, मण्डः -ण्डं, पराञ्जः, परञ्जः, कारुजः, उत्पीडः, उत्सेकः, उत्सेचनं.

To FOAM, *v. n.* फेन (nom. फेनायते -यितुं), मण्ड (nom. मण्डायते -यितुं), उत्सेचनं कृ, उत्पीडं कृ, फेनम् उत्पद् in caus. (-पादयति -यितुं) or निर्गम् in caus. (-गमयति -यितुं).

FOAMING, *part.* फेनायमानः -ना -नं, उत्सेचनकारी -रिणी -रि (न्).

FOAMY, *a.* फेनलः -ला -लं, फेनिलः -ला -लं, फेनवान् -वती -वत् (त्), फेनी -निनी -नि (न्), फेनोत्पादकः -का -कं.

FOB, *s.* घटीकोषः, घटीपिधानं, क्षुद्रघटीधारकः, कटिवस्त्रपार्श्वे कालमापनयन्त्राधारः or -कोषः.

To FOB, *v. a.* छल् (c. 10. छलयति -यितुं), वञ्च् in caus. (वञ्चयते -यितुं), छद्म कृ.

FOCUS, *s.* अग्रांशुः *m.*, अग्रकरः, केन्द्रं, विन्दुः *m.*, अक्षः, तेजःसङ्कर्षदेशः, नाभिः *m. f.*

FODDER, *s.* पशुभोजनं, गवादनं, गवादिभोजनं, अश्वादनं, पशुखादनीयं शुष्कतृणादि, विधः -धा -धानं, विधिः *m.*

To FODDER, *v. a.* शुष्कतृणादि दा (c. 3. ददाति, दातुं) or भुज् (c. 10. भोजयति -यितुं).

FOE, *s.* शत्रुः *m.*, रिपुः *m.*, अरिः *m.*, अरातिः *m.*, वैरी *m.* (न्), विपक्षः, अमित्रः, प्रतिपक्षः, विरोधी *m.* (न्), प्रतिद्वन्द्वः, सपत्नः, अपकारी *m.* (न्), अहितः.

FŒTAL, FŒTUS, FŒCES. *See* FETAL, &c

FOG, *s.* (Mist) धूमिका, धूलिका, धूपिका, शीकरः, खवाष्पः, मृगतृष्णा -तृषा -ष्णिका, मृगतृट् *f.* (ष्), कूहा, कुहेडिका, कुज्झटिका, कुज्झटिः *f.* -टी -टिका, हिमज्झटिः *f.*, रुभेटिः *f.*, धूममहिषी.—(After grass) द्वितीयतृणं.

FOGGINESS, *s.* सधूमिकत्वं, धूमलता, सशीकरत्वं, कुज्झटिकावस्था, कुज्झटिकाकीर्णता, सान्धकारत्वं, शीकराकीर्णता.

FOGGY, *a.* सधूमिकः -का -कं, धूमिकावृतः -ता -तं, धूमलः -ला -लं, सशीकरः -रा -रं, शीकरीयः -या -यं, शीकरौघः -घा -घं, कुज्झटिकाच्छन्नः -न्ना -न्नं, सान्धकारः -रा -रं, सकुज्झटिकः -का -कं, अभ्रियः -या -यं.—(Dull) स्थूलः -ला -लं.

FOH, *exclam.* धिक्, शान्तं, अपैहि, अपसर.

FOIBLE, *s.* छिद्रं, दोषः, कलङ्कः अपराधः, वैकल्यं, हानिः *f.*, हीनता.

To FOIL, *v. a.* (Frustrate) प्रतिहन् (c. 2. -हन्ति -न्तुं), व्याहन्, परास् (c. 4. -अस्यति -असितुं), खण्ड् (c. 10. खण्डयति -यितुं), उद्यमभङ्गं कृ, विफलीकृ, वृथा कृ.—(Blunt) रुग्नीकृ, विरुग्नीकृ; 'one who foils one's designs,' कार्य्यहन्ता *m.* (न्तृ).

FOIL, *s.* (Defeat, frustration) प्रतिहतिः *f.*, खण्डनं, भङ्गः.—(Blunt sword) धाराहीनः खड्गः, क्रीडाखड्गः, युद्धक्रीडायां प्रयुक्तो लोहयष्टिः.—(Leaf of metal) धातुपत्रं; 'tin-foil,' त्रपुपत्रं.—(Foil of a jewel) रत्नप्रभावर्धकं, मणितेजोवर्धको धातुपत्रखण्डः.—(Any thing which sets off) प्रकाशकः -का -कं, कान्तिवर्धकः -का -कं, शोभकृत् *m. f. n.*

FOILED, *p. p.* प्रतिहतः -ता -तं, परास्तः -स्ता -स्तं, भग्नोद्यमः -मा -मं, विफलीकृतः -ता -तं, खण्डिताशंसः -सा -सं, अकृतार्थः -र्था -र्थं, हताशः -शा -शं, मनोहतः -ता -तं, विक्षिप्तः -प्ता -प्तं, विनिवृत्तकामः -मा -मं, तिरस्कृतः -ता -तं.

FOILER, *s.* कार्य्यहन्ता *m.* (न्तृ), उद्यमभङ्गकारी *m.* (न्), कर्म्मध्वंसकारी *m.*

FOIN, *s.* यष्टिक्रीडायां यष्ट्याघातः or यष्टिप्रहारः, खड्गाघातः.

To FOIN, *v. a.* यष्टिक्रीडायां यष्टिना प्रहृ (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं).

To FOIST, *v. a.* छलेन or कपटेन निविश् in caus. (-वेशयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं), मिथ्या क्लृप् (c. 10. कल्पयति

-यितुं), कृत्रिमं -मां -मं कृ.

Foisted, *p. p.* छलेन निवेशितः -ता -तं or अभिलिखितः -ता -तं.

Foistiness, *s.* पर्य्युषितत्वं, विरसत्वं, ईषत्पूतित्वं, पूतिगन्धिता, कुरसवत्त्वं.

Fold, *s.* (For sheep or cattle) मेषस्थानं -नकं, व्रजः, व्रजाजिरं, मेषव्रजः, मेषशाला, गोष्ठं, गोस्थानकं.—(A double in cloth, &c.) पुटः, वस्त्रपुटः, अभ्रिः *m.f.* -भ्रिका -भ्री, भङ्गः, वस्त्रभङ्गः, तरङ्गः, व्यावर्त्तनं, चूर्णः. 'Fold,' in comp. is expressed by the affix धा; as, 'two-fold,' द्विधा, or by गुण; as, द्विगुणः -णा -णं.

To fold, *v. a.* (Double) पुटीकृ, पुट (nom. पुटयति -यितुं), द्विगुण (nom. द्विगुणयति -यितुं), द्विगुणीकृ, व्यावृत् (c. 10. -वर्त्तयति -यितुं) विपरिवृत्, व्यावर्त्तनं कृ, संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं -रीतुं), सम्पीड् (c. 10. -पीडयति -यितुं); 'fold the arms,' भुजौ सम्पीड्; 'in the arms,' भुजापीडं कृ.—(Confine sheep in a fold) मेषान् व्रजे निविश् in caus. (-वेशयति -यितुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

Folded, *p. p.* पुटितः -ता -तं, पुटीकृतः -ता -तं, द्विगुणितः -ता -तं, संवृतः -ता -तं, सम्पीडितः -ता -तं, व्यावर्त्तितः -ता -तं; 'folded or wrapped up,' वेष्टितः -ता -तं, वासनस्थः -स्था -स्थं; 'folded leaf,' दलकपाटः.

Folding, *s.* पुटीकरणं, व्यावर्त्तनं, संवृतिः *f.*; 'folding in the arms,' भुजापीडं कृ.

Folding-doors, *s.* द्विकपाटयुक्तं or द्विशाखायुक्तं द्वारं.

Foliage, *s.* पत्रं -त्राणि *n. pl.*, पर्णं, दलं, वृक्षपत्रं, तरुच्छदः, तरुजं.

To foliate, *v. a.* मुद्गराघातेन धातुं सूक्ष्मपत्राकारं कृ or धातुपत्रं कृ, उद्वर्त्तनं कृ.

Foliation, *s.* मुद्गराघातेन धातुपत्रकरणं, उद्वर्त्तनं.

Folio, *s.* पुस्तकपत्रं, महापत्रं, पृथुपत्रं, बृहत्पत्रं, विशालपत्रं, द्विपत्रं.

Folk, *s.* लोकः, जनः, मनुष्यजातिः *f.*, नृजातिः *f.*, प्रजा, जगती.

To follow, *v. a.* (Go after) अनुगम् (c. 1. -गच्छति -गन्तुं), अन्वागम्, पश्चाद् गम्, अनुया (c. 2. -याति -तुं), समनुया, अन्वि (c. 2. -एति -तुं), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), समनुवृत्, अनुसृ (c. 1. -सरति -सर्त्तुं), अनुव्रज् (c. 1. -व्रजति -जितुं), समनुव्रज्, अनुक्रम् (c. 1. -क्रामति -क्रमितुं), अनुचर् (c. 1. -चरति -रितुं), अन्वग्या, पुरस्कृ.—(Imitate) अनुकृ, अनुवृत्, अनुगम्.—(Observe, practise) अनुज्ञा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, सेव् (c. 1. सेवते -वितुं), उपसेव्, निषेव्, समासेव्, आश्रि (c. 1. -श्रयति -श्रयितुं), पिधा (c. 3. -दधाति -धातुं).—(Adhere to, serve, honour) आश्रि, शु in des. (शुश्रूषते -षितुं), उपास् (c. 2. -आस्ते -आसितुं), भज् (c. 1. भजते, भक्तुं), परिचर्.—(Result from) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् in pass. (जायते), अनुवृत्, उद्भू, अनुभू.

Followed, *p. p.* अनुगतः -ता -तं, अनुयातः -ता -तं, अनुगम्यमानः -ना -नं, अन्वीयमानः -ना -नं.—(Observed) अनुष्ठितः -ता -तं, सेवितः -ता -तं, आश्रितः -ता -तं.

Follower, *s.* (One who goes after) अनुगामी *m.* (न्), पश्चाद्गामी, अनुगः -गतः, अनुयायी *m.* (न्), अनुवर्त्ती *m.* (न्), अनुचरः -चारी *m.* (न्), अनुगतिकः, अनुयात्रिकः, अभिसरः, पार्श्वपरिवर्त्ती *m.* (न्), पार्ष्णिग्राहः, उपधावनः.—(Adherent, disciple) अनुपक्षी, भक्तः, आश्रितः, भाक्तिकः, शिष्यः; 'follower of Krishna,' कृष्णाश्रितः.—(Attendant, defendant) परिजनः, अनुचरः, सेवकः, अनुजीवी *m.* (न्) -विकः, उपजीवी *m.*, परिवारः.—(Companion, associate) सहायः, सहचरः, सङ्गी *m.* (न्).

Following, *part.* (Going after) अनुगः -गा -गं, अनुयायी -यिनी -यि (न्), अनुसारी -रिणी -रि (न्), अनुयामा -मी -मि (न्), अनुपथः -था -थं, अन्वञ्चः -ञ्चा -ञ्चं, अन्वक् अनूची अन्वक् (च्), अनुपदं.—(Next after) परः -रा -रं.—(Succeeding) अनुयायी &c.

Following, *s.* (Act of) अनुगमः -मनं, अनुसरणं, अनुवर्त्तनं, अनुव्रजनं.

Folly, *s.* मूर्खता, मौर्ख्यं, मूढता -त्वं, मोहः, मौढ्यं, बुद्धिहीनता, निर्बुद्धिता, अज्ञता, अविज्ञता, अनभिज्ञता, अज्ञानं, ज्ञानाभावः, प्रज्ञाहीनता.

To foment, *v. a.* (Heat with warm lotions) स्विद् in caus. (स्वेदयति -यितुं), प्रस्विद्, घर्म्मोदकादिना or उष्णोदकादिना लिप् (c. 6. लिम्पति, लेप्तुं) or अनुलिप् or अभ्यञ्ज् (c. 7. अनक्ति, अंक्तुं) or दिह् (c. 2. देग्धि -ग्धुं) or सिच् (c. 6. सिञ्चति, सेक्तुं) or निषिच्.—(Encourage, excite) वृध् in caus. (वर्धयति -यितुं), संवृध् in caus., प्रवृत् in caus. (-वर्त्तयति -यितुं), तेजो दा, तेजोवृद्धिं कृ, उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं), उद्दीप् (c. 10. -दीपयति -यितुं); 'foment dissensions,' उपजप् (c. 1. -जपति -पितुं), कर्णे जप्, उपजापेन भेदं वृध् in caus.

Fomentation, *s.* (Act of heating with warm lotions, &c.) स्वेदनं, प्रस्वेदनं, घर्म्मोदकादिना विलेपनं or अनुलेपनं or सेचनं.—(The lotion itself) घर्म्मलेपः, घर्म्मानुलेपनं, उष्णोपदेहः.—(Encouragement) उद्दीपनं, उत्तेजनं, उत्तापः, संवर्धनं.

Fomented, *p. p.* स्वेदितः -ता -तं.—(Encouraged) उद्दीप्तः -प्ता -प्तं, संवर्धितः -ता -तं.

Fomenter, *s.* (Of dissension) उपजापकः, कर्णेजपः, भेदकरः, कलिकारकः.

Fond, *a.* (Loving) अनुरक्तः -क्ता -क्तं, अनुरागवान् -वती -वत् (त्), अनुरागी -गिणी -गि (न्), सानुरागः -गा -गं, स्नेही -हिनी -हि (न्), स्नेहितः -ता -तं, कामी -मिनी -मि (न्), प्रणयी -यिनी -यि (न्).—(Attached to, delighting in) आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, परः -रा -रं, तत्परः -रा -रं, रतः -ता -तं, सेवी -विनी -वि (न्), अभिलाषी -षिणी -षि (न्), आनन्दी -न्दिनी -न्दि (न्) -न्दितः -ता -तं, प्रमोदी -दिनी -दि (न्); 'fond of one's ease,' सुखाभिलाषी -षिणी -षि (न्); 'fond of embracing,' आलिङ्गनतत्परः -रा -रं; 'fond of noise,' ध्वनमोदी &c. Often expressed by प्रिय in comp.; as, 'fond of water,' जलप्रियः -या -यं, ; 'fond of mountains,' गिरिप्रियः -या -यं; 'fond of ornament,' प्रियमण्डनः -ना -नं; or by काम in comp.; as, 'fond of flesh,' मांसकामः -मा -मं; 'to be fond of,' अनुरागवान् -वती -वत् अस् or भू, सेव् (c. 1. सेवते -वितुं), अभिलष् (c. 1. -लषति -षितुं), रुच् (c. 1. रोचते -चितुं), with dat. of the person; अभिनन्द् (c. 1. -नन्दति -न्दितुं).—(Doting) अत्यनुरक्तः -क्ता -क्तं.—(Silly) मूढः -ढा -ढं, मुग्धः -ग्धा -ग्धं.

To fondle, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्, परिष्वञ्ज् (c. 1. -ष्वजते -ष्वंक्तुं), परिमृश् (c. 6. -मृशति -र्ष्टुं), लल् (c. 10. लालयति -यितुं), क्रोडीकृ, भुजापीडितं -तां -तं कृ, प्रेम कृ, अनुरागं कृ, अङ्कीकृ, अङ्के कृ, अङ्के पाल् (c. 10. पालयति -यितुं).

Fondled, *p. p.* लालितः -ता -तं, क्रोडीकृतः -ता -तं, भुजापीडितः -ता -तं.

Fondling, *s.* (Caressing) आलिङ्गनं, परिष्वङ्गः, लालनं, क्रोडीकरणं, अङ्कपाली -लिका -लिः *m.*, भुजापीडः.—(The person or thing fondled) प्रेमपात्रं, प्रेमभूमिः *f.*, अनुरागपात्रं.

Fondly, *adv.* सानुरागं, वात्सल्येन, अतिस्नेहेन, अतिप्रीतिपूर्व्वं.—(Foolishly) मूढवत्.

Fondness, *s.* स्नेहः, प्रीतिः *f.*, अनुरक्तिः *f.*, अनुरागः, प्रेम *n.* (न्), प्रियता, वात्सल्यं, वत्सलता, प्रणयः, अभिरुचिः *f.*, रुचिः *f.*, सन्तोषः.

Font, *s.* पूजाशालामध्ये जलसंस्कारकरणे प्रयुक्तः प्रस्तरमयो जलाधारः.—(Complete assortment of printing types of one size) समपरिमाणमुद्राक्षरपरिसंख्या.

Food, *s.* भोजनं, आहारः, भोज्यं, भक्ष्यं, खाद्यं, अन्नं, आद्यं, अदनं, स्वादनं.

आहार्य्यं, अभ्याहार्य्यं, आमिषं, जग्धिः *f.*, अशनं, भक्ष्यं, भक्षं, चाम्यं, जेमनं, जमनं, चनः *n.* (स्), घसिः *m.*, निघसः, विघसः, ग्रासः, ग्रानं, प्रत्यदनं, आशः, देहयात्रा, जीवनकः, शरीरयात्रा, न्यादः, लेपः, लेहः; 'choice food,' परमान्नं, उत्तमान्नं, भोजनविशेषः; 'bad food,' कदन्नं; 'food and raiment,' ग्रासाच्छादनं, अन्नाच्छादनं, अशनाच्छादनं or -ने n. du., अन्नवस्त्रं, कशिपूः m. du.; 'food of the gods,' अमृतं, पीयूषं, पेयूषं, सुधा, लेह्यं; 'to eat food,' आहारं कृ. Food is divided by the Hindús into five kinds, भक्ष्यं, भोज्यं, लेह्यं, चोष्यं, पेयं.

Fool, *s.* मूर्खः, मूढः, अज्ञः, निर्बुद्धिः *m.*, निर्बोधः, अबुद्धिः *m.* -द्धिमान् *m.* (त्), अबुधः, अप्राज्ञः, अविद्वान्, अविद्वान् *m.* (स्), प्रमूढः, प्रज्ञाहीनः, अज्ञानी *m.* (न्), जडः, जडमतिः *m.*, अल्पधीः *m.*, मन्दबुद्धिः *m.*, मन्दः, वञ्चकः, कुशठकः, लटः.—(Buffoon, jester) विदूषकः, नर्म्मसचिवः, भण्डः.

To Fool, *v. n.* खेला (nom. खेलायति), क्रुड् (c. 6. क्रुडति -डितुं), परिहासं कृ. लट् (c. 1. लटति -टितुं).

To Fool, *v. a.* मुह् (c. 10. मोहयति -यितुं), सम्मुह्, वञ्च् (c. 10. वञ्चयते -यितुं), प्रलभ (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं).

Foolery, *s.* मूर्खकर्म्म *n.* (न्), मूर्खक्रिया, मूर्खता, बालकर्म्म *n.*, बालिश्यं.

Fool-hardiness, *s.* असमीक्ष्य साहसं, अविचारेण प्रगल्भता, अतिसाहसिकत्वं, जाल्मत्वं, अविमृश्यकारित्वं, अत्यूहनं, दर्पः, प्रमत्तता.

Fool-hardy, *a.* असमीक्ष्य साहसी -सिनी -सि (न्), अविमृश्य प्रगल्भः -ल्भा -ल्भं, जाल्मः -ल्मा -ल्मं, प्रमत्तवीरः -रा -रं, प्रमत्तशूरः -रा -रं.

Foolish, *a.* मूर्खः -र्खा -र्खं मूढः -ढा -ढं, अज्ञः -ज्ञा -ज्ञं, अनभिज्ञः -ज्ञा -ज्ञं, निर्बुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, अबुद्धिमान् -मती -मत् (त्), अप्राज्ञः -ज्ञा -ज्ञं, अल्पबुद्धिः &c., दुर्बुद्धिः &c., अल्पधीः -धीः -धि, बुद्धिहीनः -ना -नं, प्रज्ञाहीनः -ना -नं, दुर्मेधाः -धाः -धः (स्), दुर्मतिः -तिः -ति, अज्ञानः -ना -नं -नी -निनी -नि (न्), अकोविदः -दा -दं, बालिशः -शा -शं, बालिशमतिः -तिः -ति, अल्पधीः -धीः -धि, वैधयः -यी -यं, असङ्कृतः -ता -तं.

Foolishly, *adv.* मूर्खवत्, मूढवत्, अज्ञवत्, अज्ञानात्, मौर्ख्यात्, अल्पबुद्धा.

Foolishness, *s.* मूर्खता, मौर्ख्यं, मूढता, मौढ्यं, अज्ञता, अनभिज्ञता, निर्बुद्धित्वं, मोहः, बुद्धिहीनता, अबोधता, अज्ञानं, ज्ञानाभावः, बालिशता, बालिश्यं.

Foolscap, *s.* मूर्खशिरोवेष्टनसंज्ञकः कार्पासविशेषः or पत्रविशेषः.

Foot, *s.* (Part of the body) पादः, पदं, चरणं -णः, अंघ्रिः *m.*, अङ्घ्रिः *m.*, अधमाङ्गं, लम्बः; 'both feet,' पादौ du., चरणौ du., चरणयुगं; 'point of the foot,' पादाग्रं, पदिकं; 'foot and knee,' पदक्षीवं.—(Bottom, base) तलं, अधोभागः, अधःस्थानं, मूलं, उपस्थः; 'foot of a tree,' तरुतलं, वृक्षतलं, वृक्षाङ्घ्रिः *m.*, पादः; 'foot of a mountain,' उपत्यका, शैलोपशल्यं, पर्व्वततलं, गिरिपादः, पर्व्वताधोभागः.—(Measure) मनुष्यपादपरिमाणं, मार्ङ्गचतुरङ्गुलिपरिमाणं; 'ornament for the feet,' नूपुरः, पादाङ्गदं, चरणाभरणं, पादकटकः, तुलाकोटिः *f.*, मञ्जीरं; 'water for ablution of the feet,' पाद्यं, पादोदकं; 'to go on foot,' पद्भ्यां or पादाभ्यां व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं); 'going on foot,' पादचारः; 'foot by foot,' पादशः, पदे पदे, पदशः; 'at the foot,' पादतः; 'to set on foot,' प्रवृत् (c. 10. -वर्त्तयति -यितुं); 'set on foot,' प्रवर्त्तितः -ता -तं, उपक्रान्तः -न्ता -न्तं.

To Foot, *v. a.* (Kick) पादेन प्रह् (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं). पादाघातं कृ.—(Tread) क्रम् (c. 1. क्रामति, क्रमितुं), चरणपातं कृ.

To Foot it, *v. n.* नृत् (c. 4. नृत्यति, नर्त्तितुं), पादादि सञ्चल् in caus. (-चालयति -यितुं).

Foot-ball, *s.* वाताध्मातो गोवस्तिर् यः सक्रीडमानजनपादाघातेन इतस्ततो विक्षिप्यते, पादाहतकन्दुकक्रीडा.

Foot-board, *s.* पादफलकं, चरणफलकं, पादकाष्ठं.

Foot-boy, *s.* बालसेवकः, युवसेवकः, बालभृत्यः, युवप्रेष्यः.

Foot-bridge, *s.* सङ्क्रमः, सङ्क्रामः, सङ्क्रमसेतुः *m.*, दुर्गसञ्चरः -सञ्चारः.

Footed, *p. p.* पादाहतः -ता -तं.—(Having feet) पादी -दिनी -दि (न्), पदी &c.

Foot-fall, *s.* पदपातः, पादपातः, चरणपातः, पदन्यासः, पदविष्टम्भः.—(Trip) स्खलनं.

Foot-fight, *s.* पादातियुद्धं, पदातियुद्धं, पदिकयुद्धं, पदगयुद्धं.

Foot-guard, *s.* पादातिकसैन्यः, पदातिकसैनिकः, पदगरक्षकः.

Footing, *s.* (Ground for the feet) पादन्यासस्थानं, पादनिक्षेपस्थानं, पदविष्टम्भस्थानं, पदं, स्थानं, भूमिः *f.*, स्थलं, आस्पदं, वर्त्म *n.* (न्), पदवी -विः *f.*, अयनं, सरणिः *f.*, वर्त्मनं; 'firm footing,' प्रतिष्ठानं; 'place with no firm footing,' अस्थानं.—(Basis, foundation) मूलं, उपष्टम्भः, तलं.—(Support) उपस्तम्भः, उपाष्टः, आश्रयः, अवलम्बनं. (Condition, position) अवस्था, स्थितिः *f.*, भावः, संस्थानं, वृत्तिः *f.*

Footless, *a.* पादहीनः -ना -नं, निष्पादः -दा -दं, चरणहीनः -ना -नं.

Foot-licker, *s.* पादसेवकः, चरणसेवकः, पदानुरागः, पीठमर्दः.

Foot-man, *s.* (Foot-soldier) पदातिः *m.* -तिकः, पादातिः *m.* -तिकः, पादातः, पदातः, पादात्, पत्तिः *m.*, पदगः, पत्तः, पदिकः, पादचारः -री *m.* (न्), पादाविकः, पदाजिः *m.*—(Running footman) जाङ्घिकः.—(Servant) सेवकः, प्रेष्यः, कुलसेवकः, परिचरः, किङ्करः.

Foot-mark, *s.* पादचिह्नं, पदचिह्नं, पदाङ्कः, पदपंक्तिः *f.*, पादमुद्रा, चरणपदवी, पदवी, पदं; 'of a horse,' खुरपदवी.

Foot-pace, *s.* पदपातः, पादगतिः *f.*, पदक्रमः, चरणक्रमः,

Foot-pad, *s.* मारणिकघ्नः, पादचिकघ्नः, परिपन्थी *m.* (न्), होडा *m.* (ड्).

Foot-pan, *s.* पाद्यपात्रं, पाद्यभाजनं, पाद्याधारः, पादोदकपात्रं.

Foot-path, *s.* पदविः *f.* -वी, पदगपथः, पदिकमार्गः, पादचारयोग्यः क्षुद्रपथः.

Foot-soldier, *s.* पदातिः *m.*, पत्तिः *m.*, पदातिकसैन्यः, पादातिकयोद्धा *m.* (द्ध्). *See* Foot-man.

Foot-stalk, *s.* प्रसवबन्धनं, वृन्तं, मञ्जरी.

Foot-step, *s.* (Mark of the foot) पादचिह्नं, पदाङ्कः, पदपंक्तिः *f.*, पादमुद्रा, चरणपदवी.—(Tread) पदपातः, पादपातः, पादन्यासः, चरणपातः, पदविक्षेपः, पदविष्टम्भः.—(Course, track) पदविः -वी *f.*, अनुपदं, पद्धतिः *f.*, पथः, मार्गः, अयनं, वर्त्म *n.* (न्).—(Token) चिह्नं, लक्षणं.

Foot-stool, *s.* पादपीठं, चरणपीठं, पादासनं, पादपः, पदासनं.

For, *s.* दर्शनीयमानी *m.* (न्), दम्भी *m.* (न्), गर्व्वी *m.* (न्), आत्माभिमानी, रूपगर्व्वितः, सुवेशमानी *m.*, सुवेशिनम्मन्यः, लेकः.

Foppery, *s.* सुवेशमानिता, रूपमानिता, मूर्खता, मूर्खकर्म्म *n.* (न्).

Foppish, *a.* दम्भी -म्भिनी -म्भि (न्), वेशाभिमानी -निनी -नि (न्).

Foppishness, *s.* वेशाभिमानता, दम्भः, दाम्भिकत्वं, रूपगर्व्वितत्वं.

For, *conj.* (Because) यतस्, यत्, येन, यस्मात्, हि, इति हेतोः, तदर्थं, अनेन हेतुना. *See* Because.—(For as much as) यतस्, यत्, or expressed by the abl. c. of the abst. noun; as, 'for as much as he was a good man,' सज्जनत्वात्.

For, *prep.* (In exchange for) प्रति with abl. c., विनिमयेन; 'he exchanges beans for sesamum seed,' तिलेभ्यः प्रति माषान् ददाति; or expressed by the inst. c., as, तिलैर् माषान् परिवर्त्तयति; 'in exchange for one's life,' स्वप्राणविनिमयेन.—(Instead of, in place of) स्थाने, प्रति.—(Toward) प्रति, उद्दिश्य with

acc. c.—(On account of, by reason of) अर्थं, अर्थे, हेतोः, हेतौ, कृते, निमित्ते, कारणात् all affixed to the crude; as, 'for this cause,' तदर्थं, or expressed by उद्दिश्य with acc. c., or by the abl. c.; as, 'for anger he did it,' कोपात् तत् कृतवान्; 'for want of money,' धनाभावात्.—(Conducive to) अर्थं, अर्थे, or expressed by the dat. c., as, 'for the good of the world,' भूतये भुवः; 'for one's own advantage,' आत्मविवृद्धये.—(For the sake of) अर्थं, अर्थे, हेतोः, कृते, or by dat. c., as, 'for the satisfying of hunger,' क्षुधाशान्तये; 'for thy enjoyment,' तव भोगाय.—(In order to obtain) अर्थं, अर्थे or by dat. c., as, 'for fame,' प्रतिपत्तये, or even by inst. c., as, 'for hire,' भाटकेन.—(In return for) प्रति, or more usually expressed by the indec. part.; as, 'for so doing,' तत् कृत्वा.—(During a certain time) यावत्, पर्य्यन्तं; 'for life,' पुरुषस्यायुर् यावत्, यावज्जीवं, जीवनपर्य्यन्तं, or by prefixing आ with abl. c., as, आमरणात्, आजीवनान्तात् (*i. e.* until death); 'lasting for life,' आमरणान्तिकः -का -कं; 'for three days,' दिनत्रयपर्य्यन्तं; 'for a hundred years,' वर्षशतं यावत्. Sometimes expressed by the acc. c., as, 'for one month,' एकं मासं; 'for two months,' द्वौ मासौ; 'for a hundred years,' वर्षशतं, or even by the instr. c., as, 'for twelve years,' द्वादशभिर् वर्षैर्; 'for a few days,' कतिपयदिवसैः; 'for a long time,' चिरकालं, अनेककालं, चिरात्, चिरेण, चिराय; 'food for a year,' वर्षोपभोग्यम् अन्नं.—(In proportion to, considering) अपेक्ष्य, उद्दिश्य, प्रतीक्ष्य, अवेक्ष्य, all with acc. c.—(On the part of) अपेक्ष्य, उद्दिश्य, कृते; 'as for me,' मामपेक्ष्य, मामुद्दिश्य, मत्कृते.—(On the side of) सपक्षः -क्षा -क्षं; 'he is for us,' अस्माकं सपक्षो भवति.—(Notwithstanding, for all that) तथापि.—(As if) वत् affixed, इव; 'he shewed himself for dead,' मृतवत् or मृतम् इव स्वात्मानम् अदर्शयत्.—(According to) यथा, अनुसारेण, अनुरूपेण; 'for one's ability,' यथाशक्ति. 'For,' may be expressed by the acc. c. in such phrases as 'looking for,' 'waiting for,' &c.; as, 'he looks for me,' माम् अपेक्षते, or by other cases; as, 'we depend on God for success,' ईश्वराधीना सिद्धिः; 'I have great affection for her,' तस्याम् अनुरागवान् अस्मि or तया सह महान् स्नेहः, or by गत, as, 'through love for him,' तत्प्रेम्णा अनुरागेण, or by the crude form, as, 'search for money,' धनान्वेषणं, or even by the affix सात्, as, 'he built a house for the Brahman,' गृहं चकार द्विजातिसात्.—(For the most part) प्रायेण, प्रायस्, प्रायशस्, भूयिष्ठं.

Forage, *s.* (Food for horses and cattle) अश्वादनं, गवादनं, अश्वादिभोजनं.—(Provisions) याचिकं, पाथेयं, खाद्यद्रव्यं, भोज्यं, भोजनसम्भारः.—(Search for food) खाद्यद्रव्यान्वेषणं; 'going to forage,' प्रसारः -रणं, प्रसरणं.

To forage, *v. n.* परिभ्रमणं कृत्वा खाद्यद्रव्याणि or अश्वादनम् अन्विष् (c. 4. -इष्यति -एषितुं), प्रसारं or अवस्कन्दं or उपद्रवं कृत्वा धान्यादिभोज्यम् अपहृ (c. 1. -हरति -हर्तुं).

Forager, *s.* भोजनार्थं परिभ्रमणकारी *m.* (न्) or अवस्कन्दकारी or प्रसारी *m.* (न्), युद्धसमये खाद्यद्रव्यान्वेषी *m.* (न्), or अश्वादिभोजनार्थं धान्यादिहारकः.

Foraging, *s.* भोजनान्वेषणार्थं परिभ्रमणं or प्रसारणं or प्रसरणं or अवस्कन्दः or उपद्रवः, युद्धसमये खाद्यद्रव्यान्वेषणं; 'foraging army,' प्रचक्रं.

Foray, *s.* उपद्रवः, अवस्कन्दः, विप्लवः, लोष्ट्रापर्दम् उपप्लवः.

To forbear, *v. a.* and *n.* (Cease from) निवृत् (c. 1. -वर्तते -वर्तितुं), विरम् (c. 1. -रमति -रन्तुं).—(Delay, pause) विलम्ब् (c. 1. -लम्बते -म्बितुं), विरम्, आकालान्तरात् त्यज् (c. 1. त्यजति, त्यक्तुं).—(Avoid) वृज् (c. 10. वर्जयति -यितुं), परिहृ (c. 1. -हरति -हर्तुं).—(Be patient) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते -मितुं, क्षन्तुं).

Forbearance, *s.* (Cessation from, avoidance) निवृत्तिः *f.*, विनिवृत्तिः *f.*, सन्निवृत्तिः *f.*, विरतिः *f.*, विरामः, उपरतिः *f.*, वर्जनं, त्यागः, परिहारः.—(Patience) क्षमा, क्षान्तिः *f.*, तितिक्षा, सहनं, सहनशीलता, सहिष्णुता, मर्षः, परामर्षः, अपकारेऽपि चित्तस्याविकारः.—(Restraint) संयमः, यमः, यामः, संयामः, वियामः, वियमः, दमः.

Forbearing, *a.* सहनशीलः -ला -लं, सहिष्णुः -ष्णुः -ष्णु, तितिक्षुः -क्षुः -क्षु, क्षमी -मिणी -मि (न्), संयामवान् -वती -वत् (त्).

To forbid, *v. a.* (Prohibit) प्रतिषिध् (c. 1. -षेधति -षेद्धुं, c. 10. -षेधयति -यितुं), निषिध्, प्रत्याख्या (c. 2. -ख्याति -तुं), मनाःरूपा, परिभाष् (c. 1. -भाषते -षितुं), मैवं कुरु or मैवं कार्षीर् इति आज्ञा in caus. (-ज्ञापयति -यितुं) or आदिश् (c. 6. -दिशति -देष्टुं).—(Prevent) वृ in caus. (वारयति -यितुं), निवृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं), बाध् (c. 1. बाधते -धितुं); 'heaven forbid!' इत्थं न भूयात्, एतादृशं न भवतु, शान्तं.

Forbiddance, *s.* निषेधः, प्रतिषेधः, प्रतिषेधोक्तिः *f.*, प्रत्याख्यानं, वारणं, निवारणं, निरोधः, बाधः, बाधकता.

Forbidden, *p. p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, निवारितः -ता -तं.

Forbidding, *a.* बीभत्सजनकः -का -कं, घृणोत्पादकः -का -कं, अनिष्टः -ष्टा -ष्टं.

Force, *s.* (Strength) बलं, शक्तिः *f.*, सामर्थ्यं, समर्थता.—(Energy) might) तेजः *n.* (स्), वीर्यं, विक्रमः, पराक्रमः, ऊर्जः, शौर्यं.—(Violence) बलात्कारः, साहसं, प्रसभः.—(Momentum) वेगः, आपातः.—(Efficacy) प्रभावः, प्राबल्यं, गौरवं, सामर्थ्यं, प्रतापः.—(Validity) सिद्धिः *f.*, निष्पत्तिः *f.*; 'of force,' सिद्धः -द्धा -द्धं, निष्पन्नः -न्ना -न्नं; 'of no force,' असिद्धः -द्धा -द्धं, मोघः -घा -घं, निष्फलः -ला -लं; 'put in force,' प्रवर्तितः -ता -तं.—(Force of a word) शब्दशक्तिः *f.*, शब्दसामर्थ्यं -समर्थता, निरूढः, लक्षणं.—(Forces, troops) बलं, सैन्यं, सेना, सैन्याः *m. pl.*, अनीकं -कानि *n. pl.*, अनीकिनी, दलः; 'by force,' बलात्, बलेन, बलात्कारेण; 'taken by force,' बलाद्गृहीतः -ता -तं, बलहापहृतः -ता -तं.

To force, *v. a.* (Compel). Expressed by the causal form usually in conjunction with बलात् or बलेन or बलात्कारेण or यत्नेन; as, 'to force a man to do any thing,' बलेन पुरुषं किञ्चित् कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्तयति -यितुं); 'to force to give,' दा in caus. (दापयति -यितुं); 'to force to go,' बलेन गम् in caus. (गमयति -यितुं).—(Impel, drive) प्रेर् (c. 10. प्रेरयति -यितुं), कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रगुद् (c. 6. -गुदति -गोत्तुं).—(Use force) बलात्कारं कृ, साहसं कृ, विक्रमं कृ. यत्नं कृ, प्रतियत्नं कृ. -(Force a town, storm) दुर्गं लुह् (c. 10. लुम्पयति -यितुं) or भञ्ज् (c. 7. भनक्ति, भङ्क्तुं) or बलेन प्रविश् (c. 6. -विशति -वेष्टुं).—(Violate) धृष् (c. 10. धर्षयति -यितुं), बलात्कारेण अभिगम् (c. 1. -गच्छति -गन्तुं).—(Cause to produce fruit prematurely) प्राक्पूर्णकालात् फलोत्पत्तिं जन् (c. 10. जनयति -यितुं).

Forced, *p. p.* (To do) बलात् कारितः -ता -तं.—(To pay) दापितः -ता -तं.—(Done by force) बलाकृतः -ता -तं, बलात्कारितः -ता -तं.—(Strained, unnatural, affected) यत्नकृतः -ता -तं, यत्नपूर्वः -र्वा -र्वं.—(Strained, unnatural, affected)

क्लिष्टः -ष्टा -ष्टं, प्रतियत्नपूर्वः -र्वा -र्वं, विलक्षः -क्षा -क्षं, कृत्रिमः -मा -मं; 'a forced idea,' क्लिष्टकल्पना; 'a forced smile,' वैलक्ष्यस्मितं.

Forcedly, *adv.* बलात्, यत्नपूर्वं, प्रतियत्नपूर्वं, वैलक्ष्येण, सवैलक्ष्यं.

Forceful, *a.* बलवान् -वती -वत् (त्), शक्तः -क्ता -क्तं, साहसी -सिनी -सि (न्).

Forceless, *a.* निर्बलः -ला -लं, शक्तिहीनः -ना -नं, अशक्तः -क्ता -क्तं.

Force-meat, *s.* घुस्तं, निस्तनी, मिश्रान्नं, उपस्करः, व्यञ्जनं.

Forceps, *s.* सन्दंशः -शकं -शका, खण्डधारा, शल्योद्धरणयन्त्रं.

Forcible, *a.* (Powerful) प्रबलः -ला -लं, बलवान् -वती -वत् (त्), शक्तिमान् -मती -मत् (त्), समर्थः -र्था -र्थं, तेजोवान् -वती -वत् (त्), —(Efficacious) सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, अमोघः -घा -घं, अव्यर्थः -र्था -र्थं.—(Impressive) निर्बन्धेन or दार्ढ्येन or गौरवेण or सगौरवम् उक्तः -क्ता -क्तं, तीक्ष्णः -क्ष्णा -क्ष्णं.—(Violent, done by force) साहसिकः -की -कं, बलेन कृतः -ता -तं; 'forcible entry,' बलप्रवेशः or बलात्प्रवेशः; 'forcible removal,' बलापकर्षः.

Forcibleness, *s.* बलवत्त्वं, शक्तिमत्त्वं, प्रावल्यं, सामर्थ्यं, तेजस्वं, गौरवं.

Forcibly, *adv.* बलात्, बलेन, बलात्कारेण, बलवत्, प्रसभं, प्रसह्य, अभिभूय, प्रमथ्य, बलापकर्षं, अवगृह्य.—(Impressively) निर्बन्धेन, दार्ढ्येन, गौरवेण, सगौरवं.

Ford, *s.* नदीतरस्थानं, नदीतरस्थलं, तरणस्थानं, उत्तरणस्थानं, ईषज्जलो नदीभागः, घट्टः.

To ford, *v. a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन नदीम् ईषज्जलस्थाने तॄ (c. 1. तरति -रितुं -रीतुं) or नदीपारं तॄ.

Fordable, *a.* पद्भ्यां or पादाभ्यां or अश्वगजादिवाहनेन तार्यः -र्या -र्यं, सुतरः -रा -रं, पादम्पृश्यतलः -ला -लं, अल्पजलः -ला -लं.

Fording, *s.* पद्भ्यां or पादाभ्यां or अश्वादिवाहनेन नदीतरणं or उत्तरणं.

Fore, *a.* पूर्वः -र्वा -र्वं, अग्रः -ग्रा -ग्रं, पूर्ववर्ती -र्तिनी -र्ति (न्), अग्रगामी -मिनी -मि (न्), पूर्वगतः -ता -तं; 'fore-part,' अग्रभागः, अग्रांशः; 'fore part of the thigh,' अग्रजङ्घा.

Fore, *adv.* पूर्वे, पूर्वं, अग्रे, अग्रतस्, पूर्वतस्, प्राक्; 'fore and aft,' नावोऽग्रभागात्प्रभृति पश्चिमभागपर्य्यन्तं.

To fore-admonish, *v. a.* अग्रे प्रबुध् (c. 10. -बोधयति -यितुं) or उपदिश् (c. 6. -दिशति -देष्टुं).

Fore-arm, *s.* प्रकोष्ठः, प्रवेष्टः, कलाचिका, अग्रबाहुः *m.*, अग्रभुजः.

To fore-arm, *v. a.* अग्रे or पूर्वं सन्नह् (c. 4. -नह्यति -नद्धुं) or युद्धार्थं सज्जीकृ.

To fore-bode, *v. a.* अनिष्टघटनां पूर्वं सूच् (c. 10. सूचयति -यितुं) or अग्रे ज्ञा (c. 9. जानाति, ज्ञातुं) or प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्वलक्षणं दा, पूर्वचिह्नं दा, पूर्वलक्षणेन अनिष्टम् अनुमा (c. 2. -माति -तुं) or अवगम् (c. 1. -गच्छति -गन्तुं).

Foreboder, *s.* अनिष्टसूचकः, अनिष्टप्रदर्शकः, पूर्वलक्षणज्ञः, पूर्वलिङ्गज्ञः, अग्रसूचकः.

Foreboding, *s.* अनिष्टसूचनं -ना, अनिष्टप्रदर्शनं, पूर्वलक्षणाद् अनिष्टानुमानं.

To forecast, *v. a.* and *n.* अग्रे or पूर्वं चिन्त् (c. 10. चिन्तयति -यितुं) or प्रचिन् or निरूप् (c. 10. -रूपयति -यितुं) or उपायम् अनुसन्धा, (c. 3. -दधाति -धातुं), अग्रविवेचनां कृ, अग्रकल्पनां कृ.

Forecast, *s.* अग्रचिन्तनं, अग्रनिरूपणं, पूर्वविवेचनं, पूर्वकल्पना, दीर्घदृष्टिः *f.*

Forecastle, *s.* नावः पूर्वभागः or अग्रभागः, अग्रकूपकपुरतो नौभागः.

To foreclose, *v.* प्रतिषन्ध् (c. 9. -षन्धाति -षन्धुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं).—(Foreclose a mortgage) न्यासकारिणं ऋणमोक्षणक्षमतां अपनी (c. 1. -नयति -नेतुं).

Foreclosure, *s.* प्रतिषन्धनं, प्रतिषेधः, अवरोधनं, ऋणमोक्षणक्षमताहरणं.

Foredeck, *s.* नौकापुरस्य पूर्वभागः or अग्रभागः, पूर्वपृष्ठं, अग्रपृष्ठं.

To fore-determine, *v. a.* अग्रे निश्चि (c. 5. -चिनोति -चेतुं) or निर्णी (c. 1. -णयति -णेतुं).

Fore-determined, *p. p.* पूर्वनिश्चितः -ता -तं, पूर्वनिर्णीतः -ता -तं, अग्रविचारितः -ता -तं.

To foredoom, *v. a.* अग्रे or पूर्वं निर्दिश् (c. 6. -दिशति -देष्टुं) or प्रकॢप् (c. 10. -कल्पयति -यितुं) or विधिर् in caus. (-धारयति -यितुं).

Forefathers, *s. pl.* पूर्वाः *m. pl.*, पूर्वपुरुषाः *m. pl.*, पूर्वजाः *m. pl.*, पितृलोकः, पितरः *m. pl.*, पितृपितामहादि *n.*, वृद्धाः *m. pl.*; 'practice of forefathers,' वृद्धाचारः.

To forefend, *v. a.* निवॄ (c. 10. -वारयति -यितुं), प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिकृ.

Forefinger, *s.* प्रदेशिनी, प्रदेशनी, देशिनी, देशी *m.* (न्), तर्जनी, तरिता.

Forefoot, *s.* अग्र्यादिचतुष्पदजन्तूनां पूर्वपादः or अग्रपादीनपादः.

To forego, *v. a.* अवमृज् (c. 6. -मृजति -मार्ष्टुं), उत्सृज्, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, हा (c. 3. जहाति, हातुं), उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्.

Foregone, *s.* त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, अवसृष्टः -ष्टा -ष्टं.

Foreground, *s.* चित्रगतभूमेर् अग्रभागः or पूर्वभागः.

Forehead, *s.* ललाटं, अलिकं, अलीकं, भालं, गोधिः *m.*, मुखः -खं, ललाटतटं, ललाटपट्टं, लकं, निटलं, गरुडशैलः, महाशङ्खः; 'having a high forehead,' उज्ज्वललाटः -टा -टं; 'the open forehead,' ललाटफलकं.

Foreign, *a.* विदेशीयः -या -यं, वैदेशिकः -की -कं, विदेशी -शिनी -शि (न्), पारदेशिकः -की -कं, परदेशी -शिनी -शि (न्), विदेशजः -जा -जं, अन्यदेशीयः -या -यं, अन्यदेशजः -जा -जं, अन्यदेशोद्भवः -वा -वं, भिन्नदेशीयः -या -यं; 'a foreign country,' विदेशः, बहिर्देशः, देशान्तरं, अन्यदेशः.—(Extraneous) बहिर्भवः -वा -वं, बहिर्भूतः -ता -तं, बहिःस्थः -स्था -स्थं, बाह्यः -ह्या -ह्यं.—(Not pertaining) असम्बन्धी -न्धिनी -न्धि (न्), असन्नित्तः -ता -तं, असम्पर्कीयः -या -यं.

Foreigner, *s.* विदेशी *m.* (न्), विदेशीयः, वैदेशिकः, परदेशी *m.* (न्), पारदेशिकः, पारदेश्यः, भिन्नदेशीयः, बहिर्देशजः, विदेशादागतः, देशान्तरादागतः, बहिर्देशोद्भवः, वैदेश्यः.

Foreignness, *s.* बाह्यत्वं, बहिर्भूतत्वं, दूरत्वं, असम्बन्धः, असम्पर्कः.

To fore-imagine, *v. a.* अग्रे मन् (c. 4. मन्यते, मन्तुं) or चिन्त् (c. 10. चिन्तयति -यितुं).

To fore-judge, *v. a.* अग्रे or पूर्वं विधिर् (c. 10. -धारयति -यितुं) or निर्णी (c. 1. -णयति -णेतुं).

To fore-know, *v. a.* अग्रे or पूर्वं ज्ञा (c. 9. जानाति, ज्ञातुं) or विद् (c. 2. वेत्ति, वेदितुं) or निरूप् (c. 10. -रूपयति -यितुं) or बुध् (c. 4. बुध्यते, बोद्धुं), भविष्यद् ज्ञा, प्रवेद् (c. 1. -ईष्टे -वेत्तुं), प्रदृश् (c. 1. -पश्यति -द्रष्टुं), पूर्वं लक्ष्यीकृ.

Foreknowledge, *s.* अग्रज्ञानं, पूर्वज्ञानं, अग्रनिरूपणं, भविष्यज्ञानं, भाविज्ञानं, प्रवेद्यं, प्रदर्शनं, पूर्वलक्ष्यं, अग्रदृष्टिः *f.*, पूर्वदृष्टिः *f.*

Foreknown, *p. p.* पूर्वज्ञातः -ता -तं, अग्रज्ञातः -ता -तं, अग्रनिरूपितः -ता -तं.

Foreland, *s.* अम्बरीषः -षं, समुद्रमध्ये महाद्वीपवहिःस्थो भूमिभागः, उदग्रभूमिः *f.*, उदग्रभूः *f.*, उदग्रस्थलं, महाद्वीपनासिका, समुद्रनासिका.

Forelock, *s.* ललाटरुहः -हं, ललाटजः -जं, केशपाशी, ललाटकेशः, मस्तकाग्रकेशः, मस्तकाग्ररुहः केशपाशः or केशपक्षः.

Foreman, *s.* (Of a jury) द्वादशप्रमाणपुरुषप्रग्रहः, द्वादशन्यस्तपुरुषनायकं, प्रधानमध्यस्थः, मुख्यप्रमाणपुरुषः.—(Superintendant) कार्य्याधिष्ठाता *m.* (तृ), अधिकर्म्मिकः, कार्य्याधीशः, कार्य्याध्यक्षः, कार्य्याधिकृतः, ज्येष्ठी *m.* (न्), कर्म्मे कुशलताम् अधिष्ठाता *m.*

FOREMAST, *s.* नौकायस्थः कूपकः, नौकायभागे गुणवृक्षकः, अग्रकूपकः.

FORE-MENTIONED, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FOREMOST, *a.* अग्रः -ग्रा -ग्रं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, प्राग्र्यः -ग्र्या -ग्र्यं, प्रधानः -ना -नं, प्रथमः -मा -मं, उत्तमः -मा -मं, उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, सर्व्वाग्रस्थः -स्था -स्थं; 'first in rank,' प्रथमपदस्थः -स्था -स्थं.

FORENAMED, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वाभिहितः -ता -तं, पूर्व्वोदाहृतः -ता -तं.

FORENOON, *s.* पूर्व्वाह्णः, प्राह्णः, पूर्व्वाह्णकालः; 'in the forenoon,' प्राह्णे, पूर्व्वाह्णे, प्राह्णेतनमां; 'relating to it,' प्राह्णेतनः-नी-नं, पूर्व्वाह्णेतनः-नी-नं.

FORENSIC, *a.* व्यावहारिकः-की-कं or व्यवहारिकः, व्यवहारी-रिणी-रि(न्), विचारसभासु व्यवहारितः -ता -तं, विचारस्थानसम्बन्धीयः -या -यं.

To FORE-ORDAIN, *v. a.* अग्रे or पूर्व्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रकॢप् (c. 10. -कल्पयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or नियुज् (c. 7. -युनक्ति -योक्तुं) or विधा (c. 3. -दधाति -धातुं).

FORE-ORDAINED, *p. p.* अग्रनिरूपितः -ता -तं, पूर्व्वनिर्दिष्टः -ष्टा -ष्टं, पूर्व्वप्रकल्पितः -ता -तं.

FOREPART, *s.* अग्रभागः, पूर्व्वभागः, आदिभागः, प्रथमभागः, सम्मुखभागः

FORERANK, *s.* अग्रपदं, प्रथमपदं, प्रधानपदं, मुख्यपदं, श्रेष्ठपदवि: *f.*

To FORE-RUN, *v. a.* अग्रे or अग्रतः or पुरः or प्राक् सृ (c. 1. सरति, सर्त्तुं) or गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं).

FORE-RUNNER, *s.* अग्रेसरः, अग्रसरः, अग्रगः-गामी *m.* (न्), पुरोगः-गामी *m.*, प्राग्गामी *m.*, अग्रवर्त्ती *m.* (न्), अग्रगतः, पूर्व्वपुरुषः.

FORESAID, *p. p.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FORESAIL, *s.* नौकायस्थकूपकालम्बितं वायुवसनं or वातवसनं.

To FORESAY, *v. a.* अग्रे or पूर्व्वं वद् (c. 1. वदति -दितुं) or प्रवद्, भविष्यद् वद्.

To FORESEE, *v. a.* प्रदृश् (c. 1. -पश्यति -द्रष्टुं), उद्दृश्, प्रवेष्टुं for प्रावेष्टुं (c. 1. -ईक्षते -क्षितुं), अग्रे or पूर्व्वं दृश्, अनागतं or परिणामं or भविष्यद् दृश् or समीक्ष्, अग्रे ज्ञा (c. 9. जानाति, ज्ञातुं) or निरूप् (c. 10. -रूपयति -यितुं).

FORESEEING, *part.* प्रपश्यन् -श्यन्ती -श्यत् (त्), अग्रदर्शी -र्शिनी -र्शि (न्), अनागतदर्शी &c., पूर्व्वदर्शी &c., भविष्यद्दर्शी &c., दूरदर्शी &c., अनारङ्गः -ङ्गा -ङ्गं, प्रवेक्ष्यन् &c. for प्रावेक्ष्यन् &c.

FORESEEN, *p. p.* प्रवेक्षितः -ता -तं, प्रदृष्टः -ष्टा -ष्टं, सन्दृष्टः -ष्टा -ष्टं, सन्दृश्यमानः -ना -नं, अग्रनिरूपितः -ता -तं.

To FORESHADOW, *v. a.* पूर्व्वचणैनं कृ, पूर्व्वमूर्त्तिं कृ, अग्रे रूप् (c. 10. रूपयति -यितुं).

To FORESHAME, *v. a.* लज्ज् in caus. (लज्जयति -यितुं), कलङ्क् (nom. कलङ्कयति -यितुं).

FORE-SHIP, *s.* नावः पूर्व्वभागः or अग्रभागः, नौकाग्रभागः.

To FORESHORTEN, *v. a.* मूर्त्तिं चित्रसमर्पणात् सम्मुखभागे ह्रस् (c. 10. ह्रासयति -यितुं) or संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

To FORESHOW, *v. a.* प्रदृश् in caus. (-दर्शयति -यितुं), अग्रे or पूर्व्वं दृश् or सूच् (c. 10. सूचयति -यितुं), भविष्यत् सूच् or वद् (c. 1. वदति -दितुं).

FORESHOWN, *p. p.* प्रदर्शितः -ता -तं, अग्रसूचितः -ता -तं, पूर्व्वसूचितः -ता -तं.

FORESIGHT, *s.* पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, प्रवेक्षणं, प्रदर्शनं, परिणामदृष्टिः *f.*, अग्रनिरूपणं, भविष्यद्दर्शनं, दूरदृष्टिः *f.*, दूरदर्शनं, दीर्घदृष्टिः *f.*, परिवेदना.

FORESKIRT, *s.* अग्रस्थो वस्त्राञ्चलः, परिधानस्य अग्राञ्चलः, अग्रतो वसनाग्रं.

To FORESPEAK, *v. a.* अग्रे वद् (c. 1. वदति -दितुं), प्रवद्, प्रव्याहृ (c. 1. -हरति -हर्त्तुं).

FORESPENT, *a.* क्षीणबलः -ला -लं, श्रान्तः -न्ता -न्तं, खिन्नः -न्ना -न्नं.

FORESPOKEN, *a.* पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं, प्रागुक्तः -क्ता -क्तं.

FOREST, *s.* अरण्यं -ण्यी -ण्यानी, वनं -नी, अटविः -वी *f.*, गहनं, गहः, काननं, विपिनं, जङ्गलः -लं, दावः, दवः, कान्तारः -रं, कुञ्जं, रिञ्जं, तल्लं; 'forest on fire,' दावः, दावाग्निः *m.*, मुखाग्निः, मङ्गिलः.

FOREST, *a.* वन्यः -न्या -न्यं, आरण्यः -ण्यी -ण्यं -ण्यकः -का -कं, जाङ्गलः -ला -लं, जाङ्गलः -ली -लं; 'produced in a forest,' वनोद्भवः -वा -वं, अरण्यजः -जा -जं -जातः -ता -तं, अरण्यभवः -वा -वं, अरण्योत्पन्नः -न्ना -न्नं, अरण्यसम्भवः -वा -वं, अरण्य or वन in comp.; as, 'a forest tree,' वनपादपः, अरण्यवृक्षः, वनराजिः *m.*, वनस्पतिः *m.*, वन्यतरुः *m.*

To FORESTALL, *v. a.* (Take beforehand) अग्रे or पूर्व्वं or पूर्व्वतो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -दत्ते -दातुं), अग्रे गृहीत्वा निरु (c. 10. -वारयति -यितुं) or निषिध् (c. 1. -षेधति -षेद्धुं).—(Buy beforehand) पूर्व्वं क्री (c. 9. क्रीणाति, क्रेतुं), पूर्व्वक्रयं कृ, प्रक्रय् (c. 2. -क्रयाति -तुं).

FORESTALLED, *p. p.* पूर्व्वगृहीतः -ता -तं, पूर्व्वक्रीतः -ता -तं, प्रक्रयातः -ता -तं.

FORESTALLER, *s.* पूर्व्वक्रेता *m.* (तृ), अग्रक्रयी *m.* (न्), सर्व्वपण्यानि विक्रयस्थानानयनात् पूर्व्वं क्रीत्वा मूल्यवर्धकः.

FORESTER, *s.* (Inhabitant of a forest) वनवासी *m.* (न्), अरण्यवासी *m.*, वनस्थायी *m.* (न्), वनस्थः, वनेचरः, वनचरः, वनचारी *m.* (न्), वनवर्त्ती *m.* (न्), वनौकाः *m.* (स्), अरण्यौकाः *m.* (स्), वनाश्रयः, वनव्यवहारी *m.* (न्), आरण्यकः, अरण्यसद् *m.*—(Overseer of the forests) अरण्याध्यक्षः, अरण्यरक्षकः.

FORETASTE, *s.* पूर्व्वभुक्तिः *f.*, अग्रभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वास्वादनं, अग्रोपभोगः, पूर्व्वोपभोगः, पूर्व्वानुभवः, पूर्व्वज्ञानं, अग्रज्ञानं.

To FORETASTE, *v. a.* अग्रे or पूर्व्वं or अग्रतो भुज् (c. 7. भुङ्क्ते, भोक्तुं) or उपभुज् or अनुभू or आस्वाद् (c. 1. -स्वादति -दितुं), पूर्व्वभुक्तिं कृ, पूर्व्वास्वादनं कृ.

FORETASTED *p. p.* पूर्व्वभुक्तः -क्ता -क्तं, पूर्व्वास्वादितः -ता -तं, पूर्व्वानुभूतः -ता -तं.

To FORETELL, *v. a.* अग्रे or अग्रतः or पूर्व्वं वद् (c. 1. वदति -दितुं) or प्रवद्, भविष्यद् वद् or वच् (c. 2. वक्ति -क्तुं), प्रदृश् in caus. (-दर्शयति -यितुं) अग्रे दृश्, अनागतं ज्ञा in caus. (ज्ञापयति -यितुं).

FORETELLER, *s.* अग्रवादी *m.* (न्), भविष्यद्वक्ता *m.* (क्तृ), भविष्यद्वादी *m.*, भाविवक्ता *m.*, अनागतज्ञापकः, प्रदर्शकः, भाविदर्शकः, दैवज्ञः.

To FORETHINK, *v. a.* पूर्व्वं or अग्रे चिन्त् (c. 10. चिन्तयति -यितुं) or प्रचिन्त् or विमृश् (c. 6. -मृशति -र्शितुं) or निरूप् (c. 10. -रूपयति -यितुं), पूर्व्वविवेचनं कृ.

FORETHOUGHT, *s.* पूर्व्वचिन्ता, अग्रचिन्ता, पूर्व्वविवेचनं -ना, अग्रविवेचनं, पूर्व्वविचारणं -णा, अग्रनिरूपणं, पूर्व्वविमर्शः, प्रसमीक्षा, प्रवेक्षणं, पूर्व्वदृष्टिः *f.*, दीर्घदृष्टिः *f.*, परिणामदृष्टिः, परिवेदना.

To FORETOKEN, *v. a.* अग्रे or पूर्व्वं दृश् (c. 10. दर्शयति -यितुं) or सूच् (c. 10 सूचयति -यितुं), प्रदृश्, पूर्व्वलक्षणं or पूर्व्वचिह्नं दा, पूर्व्वलक्षणेन भविष्यत् सूच्.

FORETOKEN, *s.* पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, भौवलक्षणं, भाविचिह्नं, भविष्यल्लक्षणं, भविष्यल्लिङ्गं.

FORETOLD, *p. p.* पूर्व्वकथितः -ता -तं, प्रदर्शितः -ता -तं, प्राक्सम्भावादुक्तः -क्ता -क्तं.

FORE-TOOTH, *s.* अग्रदन्तः, राजदन्तः, सम्मुखदन्तः, मुख्यदन्तः.

FORETOP, *s.* मस्तकाग्रकेशः.—(Of a ship) कूपकाग्रे मञ्चकः.

FOR-EVER, *adv.* नित्यं, सर्व्वकालं, अनन्तकालं, शाश्वतीः समाः.

FORE-WARD, *s.* सेनामुखं, ध्वजिनीमुखं, सेनाग्रं, रणमूर्द्धा *m.* (न्), शिरः *n.* (स्).

To FORE-WARN, *v. a.* अग्रे or पूर्व्वं बुध् (c. 10. बोधयति -यितुं) or प्रबुध् or प्रत्यादिश् (c. 6. -दिशति -देष्टुं) or उपदिश् or सन्दिश् or ज्ञा in caus. (ज्ञापयति -यितुं), पूर्व्वलक्षणं दा.

FORE-WARNED, *p. p.* पूर्व्वबोधितः -ता -तं, अग्रविज्ञापितः -ता -तं, पूर्व्वोपदिष्टः -ष्टा -ष्टं.

Fore-warning, *s.* अग्रप्रत्यादेशः, पूर्वबोधनं, पूर्वोपदेशः, पूर्वविज्ञप्तिः *f.*

To forfeit, *v. a.* दण्ड् in pass. (दण्ड्यते), दण्डं दा; 'he forfeits the eighth part of his property,' स्ववित्तस्य अष्टमांशं दण्ड्यते.—(Lose one's right) स्वाधिकारात् or स्वस्वत्वाद् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं) or परिभ्रंश् or प्रभ्रंश् or च्यु (c. 1. च्यवते, च्योतुं) or प्रच्यु, हा in pass. (हीयते) with instr. or abl. c., प्रहा; 'he forfeits his right,' तस्मात् स्वत्वम् अपयज्ञते; 'his kingdom,' राज्यात् प्रभ्रश्यति.

Forfeit, *s.* दण्डः, धनदण्डः, अर्थदण्डः, हारितं, विहापितं, निक्षेपः, न्यासः.

Forfeitable, *a.* दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डनीयः -या -यं, हेयः -या -यं.

Forfeited, *p. p.* दण्डितः -ता -तं, भग्नः -ग्ना -ग्नं, हीनः -ना -नं, च्युतः -ता -तं; 'one who has forfeited his right,' हृताधिकारः -रा -रं, च्युताधिकारः -रा -रं, अधिकाराद्भ्रष्टः -ष्टा -ष्टं; 'all his property,' सर्वस्वदण्डः -ण्डा -ण्डं, हृतसर्वस्वः -स्वा -स्वं; 'his kingdom,' राज्यात्प्रभ्रष्टः -ष्टा -ष्टं.

Forfeiture, *s.* हानिः *f.*, भंशः, अपहारः, च्युतिः *f.*, नाशः, अपयज्ञनं, वृद्धिः *f.*, दण्डदानं; 'of right,' स्वत्वहानिः *f.*, अधिकारहानिः, अधिकारभंशः; 'of property,' वित्तहानिः *f.*, दायापयज्ञनं.

Forge, *s.* कुटिलिका, उष्मानं, अग्निकुण्डं, ताम्रलोहघटनस्थानं, निर्म्माणस्थानं.

To forge, *v. a.* (Metals) ताम्रलोहादि मुद्गरादिना ताडयित्वा नानारूपेण घट् (c. 10. घटयति -यितुं) or कुटिलिकायां विलाप्य घट् or निर्मा (c. 2. -माति -तुं).—(Make) घट्, निर्मा, कॄप् (c. 10. कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं), विरच् (c. 10. -रचयति -यितुं).—(Counterfeit) छलेन or कपटेन कॄप् or निर्म्मा, कूटं कृ, कपटं कृ; 'forge a writing,' कपटलेख्यं कृ, कूटलेखं कृ.

Forged, *p. p.* (Fabricated) घटितः -ता -तं, कल्पितः -ता -तं, रचितः -ता -तं, निर्म्मितः -ता -तं.—(Counterfeit) कालपनिकः -की -कं, कृत्रिमः -मा -मं, कपटी -टिनी -टि (न्), कूट or कपट in comp.; as, 'a forged document,' कपटलेख्यं, कूटलेखः; 'a forged decree,' कूटशासनं; 'forged coin,' कूटवर्णः.

Forger, *s.* कूटकः, कूटकृत् *m.* -कारः, कपटलेख्यकारी *m.* (न्), कूटलेख्यकारकः, कपटिकः, कपटकारी *m.*, कृत्रिमलेखकृत्.

Forgery, *s.* कूटकरणं, कपटकरणं, कपटलेख्यकरणं, कूटलेख्यकरणं, कृत्रिमलेखकरणं, कूटता.—(That which is counterfeited) कपटलेखः.

To forget, *v. a.* विस्मृ (c. 1. -स्मरति -ते -स्मर्तुं), न स्मृ, अपस्मृ, स्मृतेर् भंश् (c. 4. भ्रश्यति, भ्रंशितुं) with nom. of thing forgotten, स्मृत्यपेतः -ता -तं भू, विस्मरणात् परित्यज् (c. 1. -त्यजति -त्यक्तुं), अवमर्षणं कृ.

Forgetful, *a.* विस्मरणशीलः -ला -लं, विस्मारकः -का -कं, नष्टसंस्मृतिः -तिः -ति, नष्टस्मृतिः -तिः -ति, अपस्मृतिः -तिः -ति, अनवहितः -ता -तं, प्रमत्तः -त्ता -त्तं.

Forgetfulness, *s.* विस्मृतिः *f.*, विस्मरणं, विस्मरणशीलता, अस्मृतिः *f.*, अस्मरणं, अपस्मारः, प्रस्मृतिः *f.*, स्मृतिभंशः, स्मृतिहानिः *f.*, स्मृतिनाशः, भ्रमः.

Forging, *s.* घटनं -ना, निर्म्माणं, कल्पनं, रचना, कूटकरणं.

To forgive, *v. a.* क्षम् (c. 1. क्षमते -ति, क्षन्तुं), संक्षम्, मुच् (c. 6. मुञ्चति, मोक्तुं), विमुच्, अवमुज् (c. 6. -मृञ्चति -मर्ष्टुं), त्यज् (c. 1. त्यजति, त्यक्तुं), मृष् (c. 4. मृष्यति, मर्षितुं, मर्ष्टुं, c. 10. मर्षयति -यितुं), मृज् (c. 2. मार्ष्टि -र्ष्टुं), अनुज्ञा (c. 9. -जानाति -ज्ञातुं), समनुज्ञा, सह् (c. 1. सहते, सोढुं), निर्यत् (c. 10. -यातयति -यितुं); 'forgive injuries,' अपराधान् क्षम्; 'forgive sins,' पापानि मृज् or अवमृज्; 'forgive a debt,' ऋणं त्यज्.

Forgiven, *p. p.* क्षान्तः -न्ता -न्तं, दोषमुक्तः -क्ता -क्तं, पापमुक्तः -क्ता -क्तं, विमोचितः -ता -तं, अवमृष्टः -ष्टा -ष्टं, पापमार्ज्जितः -ता -तं.

Forgiveness, *s.* क्षमा, क्षान्तिः *f.*, पापमोचनं, पापमुक्तिः *f.*, दोषमुक्तिः *f.*, अपराधसहिष्णुता, पापमार्जनं, विमोचनं, कृपा, दया, मर्षणं; 'of a debt,'

Forgiving, *a.* क्षमी -मिणी -मि (न्), क्षमावान् -वती -वत् (त्), क्षमान्वितः -ता -तं, क्षमायुक्तः -क्ता -क्तं, अपराधसहिष्णुः -ष्णुः -ष्णु, दयालुः -लुः -लु, कृपालुः -लुः -लु.

Forgotten, *p. p.* विस्मृतः -ता -तं, अस्मृतः -ता -तं, स्मृतिभ्रष्टः -ष्टा -ष्टं, स्मृत्यपेतः -ता -तं, अनवगतः -ता -तं.

Fork, *s.* खाद्यमांसाद्युत्क्षोलनार्थं शूलविशेषः, काष्टकः; 'two-pronged,' द्विशिखशूलः, द्व्यग्रशूलः; 'three-pronged,' त्रिशिखशूलः, त्र्यग्रशूलः.

To fork, *v. n.* (Divide in two) द्विशिखः -खा -खं भू, द्विशिखारूपेण भिद्भीभू or विभिद् in pass. (-भिद्यते), द्विशिखीभू.

To fork, *v. a.* पृष्ठीकृशूलेन उत्क्षुल् (c. 10. -तोलयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Forked, forky, *a.* द्विशिखः -खा -खं, द्व्यग्रः -ग्रा -ग्रं, वज्रः -ज्रा -ज्रं, काष्टकाकारः -रा -रं; 'having a forked tongue,' द्विजिह्वः -ह्वा -ह्वं, द्विरसनः -ना -नं; 'forked lightning,' विद्युल्लता, तडिल्लता, शौचं.

Forlorn, *a.* गतिहीनः -ना -नं, अगतिकः -का -कं, अशरणः -णा -णं, निःशरणः -णा -णं, सहायहीनः -ना -नं, निःसहायः -या -यं, असहायः -या -यं, अनाथः -था -थं, निराश्रयः -या -यं, एकाकी -किनी -कि (न्), निरवलम्बः -म्बा -म्बं; 'on the forlorn hope,' त्यक्तजीवितः -ता -तं, त्यक्तप्राणः -णा -णं.

Form, *s.* (Shape) आकारः, आकृतिः *f.*, रूपं, मूर्त्तिः *f.*, संस्कारः, संस्थानं, परिमा *m.* (न्), विग्रहः, वपुः *n.* (स्), घर्षः *n.* (स्); 'in the form of a man,' नररूपेण; 'of regular form,' आकारशुद्धः -द्धा -द्धं.—(Manner, fashion) प्रकारः, रीतिः *f.*, विधः, विधिः *m.*, मार्गः, विधानं, प्रकृतिः *f.*, भेदः.—(Established rule) विधिः *m.*, नियमः, स्थितिः *f.*, मूर्त्त, धर्म्मः, मर्य्यादा, व्यवस्था, क्रमः, आचारः, चर्य्या, व्यवहारः.—(Method) क्रमः.—(Ceremony) नियमः, विधिः *m.* संस्कारः.—(Arrangement) विन्यासः, पर्य्यायः, प्रतिविधानं, विरचना.—(Long seat) दीर्घासनं, दीर्घपीठं, फलकं.—(Class of scholars) सहाध्यायिनां पंक्तिः *f.*, छात्रपदं.—(Bed of a hare) शशकशय्या, शशकासनं; 'in due form,' यथाविधि, यथावत्, विधिवत्, विधितस्.

To form, *v. a.* कृ (c. 8. करोति, कुरुते, कर्त्तुं), सङ्कृ, अभिकृ, निर्मा (c. 2. -माति, c. 3. -मिमीते, c. 4. -मायते -मातुं), विनिर्मा, कॄप् (c. 10. कल्पयति -यितुं), सङ्कॄप्, विधा (c. 3. -दधाति -धातुं), रच् (c. 10. रचयति -यितुं), विरच्, घट् (c. 10. घटयति -यितुं); 'to form a plan,' उपायं प्रचिन् (c. 10. -चिन्तयति -यितुं) or मनसा कॄप्; 'to form in clots, as blood,' रक्तगुल्मान् बन्ध् (c. 9. बध्नाति, बन्धुं); 'to form an alliance,' सन्धा, सन्धिं कृ.

Formal, *a.* (Agreeable to established rule) नैयमिकः -की -कं, वैधिकः -की -कं, नियमानुसारी -रिणी -रि (न्), रीत्यनुसारी &c., व्यावहारिकः -की -कं.—(Strictly ceremonious) अत्याचारः -रा -रं, आचारसेवी -विनी -वि (न्), सभ्याचारनिष्ठः -ष्ठा -ष्ठं, नियमनिष्ठः -ष्ठा -ष्ठं, नियमशीलः -ला -लं.—(Exact) यथार्थः -र्था -र्थं, याथार्थिकः -की -कं, समञ्जसः -सा -सं.—(Constituent) वास्तवः -वी -वं.

Formalist, *s.* नियममात्रसेवी *m.* -विनी *f.* (न्), धर्म्मक्रियामात्रनिष्ठः *m.* -ष्ठा *f.*, धर्म्मकृत्यमात्रावलम्बी *m.* -म्बिनी *f.* (न्), यमान् अकुर्व्वाणो नियमान् केवलान् भजन् *m.* (त्).

Formality, *s.* (Observance of forms) नियममात्रसेवनं, धर्म्मक्रियामात्रनिष्ठा.—(Ceremoniousness) अत्याचारसेवनं, अत्यादरः, सभ्यरीतिनिष्ठा, एकाग्रतः सभ्यनियमसेवनं; 'enough of this formality,' कृतं कृतम् आदरेण.

FORMALLY, *adv.* (According to established rule) विधिवत्, यथाविधि, नियमानुसारेण, रीत्यनुसारात्. — (Ceremoniously) श्रद्धादरेण, आदरपूर्व्वं, आचारसेवनात्, सभ्यनियमानुसारात्.

FORMATION, *s.* निर्म्माणं, निर्म्मितिः *f.*, रचना, विरचनं -ना, कल्पनं -ना, विधानं, करणं, घटनं, उत्पादनं, उत्पत्तिः *f.*, जननं, उद्भवः, सम्भवः, सृष्टिः *f.*, सर्ज्जनं.

GLIBLY, *adv.* द्रुतं, श्लक्ष्णं, क्षिप्रं, वाक्चापल्येन, द्रुतवाचा, अविलम्बितं, अस्खलितवाक्येन, अस्खलितं.

GLIBNESS, *s.* (Smoothness) श्लक्ष्णता, स्निग्धता, चिक्कणत्वं.—(In speech)

वाक्चापल्यं, वाग्द्रुतता, वाक्क्षिप्रता, वाक्पटुता, वाक्सरणिः *f.*

To GLIDE, *v. n.* सृप् (c. 1. सर्पति, स्रप्तुं), प्रसृप्, विसृप्, संसृप्, विसृ (c. 1. -सरति -सर्त्तुं), प्रसृ, संसृ, चल् (c. 1. चलति -लितुं).—(As a river) स्रु (c. 1. स्रवति, स्रोतुं), प्रस्रु, स्यन्द् (c. 1. स्यन्दते -न्दितुं), प्रस्यन्द्, री (c. 4. रीयते, रेतुं).—(Move slowly) शनैः शनैः सृ or चल्.

GLIDE, *s.* सर्पणं, संसर्पः, विसर्पणं, विसारः, स्रवः -वणं, प्रस्रवणं.

GLIDER, *s.* विसर्पी *m.* (न्), संसर्पी *m.*, विसारी *m.* (न्), विसर्पणकृत् *m.*

GLIDING, *part.* विसर्पन् -र्पन्ती -र्पत् (त्), विसर्पी -र्पिणी -र्पि (न्), संसर्पी &c., विसारी -रिणी -रि (न्), प्रसारी &c., विसृत्वरः -रा -रं, स्रवन् -वन्ती -वत् (त्), स्यन्दी -न्दिनी -न्दि (न्); 'in the air,' वियति विसर्पी &c.

GLIDING, *s.* सर्पणं, विसर्पः -र्पणं, संसर्पः -र्पणं, विसारः, संसृतिः *f.*, स्रवः -वणं, शनैः सरणं; 'in the air,' खसर्पणं, वियति विसर्पणं; 'gliding up,' उत्सर्पणं.

GLIDINGLY, *adv.* द्रुतं, अविलम्बितं, शनैः शनैः, विसृत्वरं.

GLIFF, *s.* ईषद्दर्शनं, ईषद्दृष्टिः *f.*, अर्द्धवीक्षणं, अर्द्धदृष्टिः *f.*

GLIKE, *s.* अवहासः, अवक्षेपः, तिरस्कारः, गर्हा, अवज्ञा.

GLIM, *s.* दीपः -पकः, दीपिका, प्रदीपः, दीपद्युतिः *f.*

To GLIMMER, *v. n.* मन्दतेजसा or मन्दप्रभया दीप् (c. 4. दीप्यते, दीपितुं) or प्रकाश् (c. 1. -काशते -शितुं) or द्युत् (c. 1. द्योतते -तितुं), ईषत् or मन्दं द्युत् or स्फुर् (c. 6. स्फुरति -रितुं), प्रस्फुर्, ईषत्स्फुरणं कृ, मन्दप्रभः -भा -भं भू, पाण्डुकिरणान् पत् (c. 10. पातयति -यितुं).

GLIMMER, *s.* मन्दतेजस् *n.*, मन्दद्युतिः *f.*, मन्दप्रभा, मन्ददीप्तिः *f.*, स्फुरणं, स्फुरितं, ईषत्स्फुरणं, ईषत्प्रभा, पाण्डुप्रभा.

GLIMMERING, *part.* ईषत्स्फुरितः -ता -तं, मन्दप्रभः -भा -भं, मन्दच्छायः -या -यं, मन्दतेजाः -जाः -जः (स्), पाण्डुद्युतिः -तिः -ति, पाण्डुरश्मिः -श्मिः -श्मि, पाण्डुकिरणः -णा -णं.

GLIMPSE, *s.* (Short or slight view) ईषद्दर्शनं, ईषद्दृष्टिः *f.*, अर्द्धदृष्टिः *f.*, अर्द्धवीक्षणं, क्षणदर्शनं, अचिरदर्शनं, मुहूर्त्तदर्शनं.—(Flash) क्षणप्रभा, अचिरप्रभा.

To GLISTEN, *v. n.* द्युत् (c. 1. द्योतते -तितुं), स्फुर् (c. 6. स्फुरति -रितुं).

GLISTENING, *part.* or *a.* स्फुरन् -रन्ती -रत् (त्), स्फुरितः -ता -तं.

To GLISTER, *v. n.* *See To* GLISTEN.

To GLITTER, *v. n.* द्युत् (c. 1. द्योतते -तितुं), प्रकाश् (c. 1. काशते -शितुं), स्फुर् (c. 6. स्फुरति -रितुं), दीप् (c. 4. दीप्यते, दीपितुं), राज् (c. 1. राजति -ते -जितुं), भा (c. 2. भाति -तुं), भ्राज् (c. 1. भ्राजति -जितुं), विभ्राज्, भास् (c. 1. भासते -सितुं), आभास्, प्रभास्, अवभास्, चकास् (c. 2. चकास्ति, चकासितुं), रुच् (c. 1. रोचते -चितुं), वर्चस् (nom. वर्चायते).

GLITTER, *s.* द्युतिः *f.*, दीप्तिः *f.*, प्रभा, तेजस् *n.*, ज्योतिस् *n.*, कान्तिः *f.*, रुचिः *f.*, द्युतिमत्त्वं, दीप्तिमत्त्वं, आभा, वर्चस् *n.*, छविः *f.*, छाया, उज्ज्वलता.

GLITTERING, *part.* or *a.* द्योती -तिनी -ति (न्), द्योतमानः -ना -नं, दीप्तिमान् -मती -मत् (त्), प्रभावान् -वती -वत् (त्), देदीप्यमानः -ना -नं, तेजोमयः -यी -यं, प्रकाशमानः -ना -नं, वर्चस्वी -स्विनी -स्वि (न्), धौतः -ता -तं, उज्ज्वलः -ला -लं, कान्तिमान् -मती -मत् (त्), मितः -ता -तं, स्फुरितप्रभः -भा -भं.

GLITTERINGLY, *adv.* दीप्त्या, तेजसा, वर्चसा, स्फुरत्तेजसा, स्फुरितं, उज्ज्वलं.

To GLOAT, *v. n.* अत्यभिलाषात् or अतिलोभाद् विवृताक्षो निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or शून्यदृष्ट्या निरीक्ष् or विवृतनयनः -ना -नं भू.

GLOATING, *part.* or *a.* अतिलोभेन विवृताक्षः -क्षी -क्षं, लोभोत्फुल्लनयनः -ना -नं, अत्यभिलाषात् शून्यदृष्टिः -ष्टिः -ष्टि

GLOBATE, GLOBATED, *a.* गोलाकारः -रा -रं, गोलाकृतिः -तिः -ति, मण्डलाकारः -रा -रं, वर्त्तुलः -ला -लं, वर्त्तुलाकृतिः -तिः -ति, मण्डली -लिनी -लि (न्).

GLOBE, *s.* (A sphere) गोलः -ला -लं -लकः, मण्डलं, परिमण्डलं, वर्त्तुलः, निधः, चक्रं.—(Earth) भूगोलः, भूमण्डलं, क्षितिमण्डलं, अवनिमण्डलं, इलागोलं, ब्रह्माण्डः.

To GLOBE, *v. a.* गोलीकृ, एकमण्डलीकृ, परिमण्डलीकृ, वर्त्तुलीकृ.

GLOBOSE, GLOBOUS, *a.* मण्डली -लिनी -लि (न्), वर्त्तुलः -ला -लं.

GLOBOSITY, *s.* गोलत्वं, गोलाकारत्वं, वर्त्तुलता, मण्डलत्वं, परिमण्डलता.

GLOBULAR, *a.* गोलाकारः -रा -रं, गोलाकृतिः -तिः -ति, मण्डलाकारः -रा -रं, मण्डली -लिनी -लि (न्), वर्त्तुलः -ला -लं, वृत्तः -त्ता -त्तं, गुडः -डा -डं, वटी -टिनी -टि (न्), निस्तलः -ला -लं.

GLOBULARLY, *adv.* गोलवत्, मण्डलवत्, गोलाकारेण, मण्डलरूपेण, वर्त्तुलं.

GLOBULE, *s.* गुलिका, गुली, बिन्दुः *m.*, अणुः *m.*, रेणुः *m. f.*, परमाणुः *m.*, क्षुद्रगोलः.

GLOBY, *a.* मण्डलाकारः -रा -रं, गोलाकारः -रा -रं, वर्त्तुलः -ला -लं.

To GLOMERATE, *v. a.* गोलीकृ, मण्डलीकृ, परिमण्डल (nom. परिमण्डलयति -यितुं), वर्त्तुलीकृ, पिण्डीकृ, एकौघीकृ, एकत्र कृ.

GLOMERATE, GLOMERATED, *a.* or *p. p.* पिण्डीभूतः -ता -तं, एकौघीभूतः -ता -तं, एकगोलीकृतः -ता -तं, एकत्रीभूतः -ता -तं.

GLOMERATION, *s.* (The act) पिण्डीकरणं, राशीकरणं.—(A collection) राशिः *m. f.*, पिण्डः, ओघः, सन्निपातः, सञ्चयः.

GLOMEROUS, *a.* पिण्डी -ण्डिनी -ण्डि (न्), पिण्डितः -ता -तं, पिण्डाकृतिः -तिः -ति.

GLOOM, *s.* अवतमसं, अन्धकारः, ईषदन्धकारः, तमस् *n.*, तिमिरं, तमिस्रं, तामिस्रं, तमसं, निष्प्रभता, सान्धकारता, ध्वान्तं, अन्धं, भूच्छाया.

To GLOOM, *v. n.* तिमिरीभू, अन्धीभू, तमस्वी -स्विनी -स्वि भू.

To GLOOM, *v. a.* तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, कलुषीकृ.

GLOOMILY, *adv.* (Dimly) सावतमसं, सान्धकारं, निष्प्रभं, अप्रकाशं.—(Not cheerfully) सविषादं, सावसादं, विषण्णमनसा, सोद्वेगं.

GLOOMINESS, *s.* अवतमसं, ईषत्तिमिरं, ईषत्तमस्विता, निष्प्रभता, अप्रकाशत्वं, सान्धकारत्वं.—(Of mind) विषादः, विषण्णता, अवसन्नता, चित्तोद्वेगः, निरानन्दता.

GLOOMY, *a.* तमस्वी -स्विनी -स्वि (न्), ईषत्तमस्वी &c., तामसः -सी -सं, ईषत्तामसः -सी -सं, ईषदन्धकारः -रा -रं, सान्धकारः -रा -रं, सतिमिरः -रा -रं, तमोयुक्तः -क्ता -क्तं, तमस्कल्पः -ल्पा -ल्पं, तमोवृतः -ता -तं, तमोमयः -यी -यं, निष्प्रभः -भा -भं or निःप्रभः, निरालोकः -का -कं, अप्रकाशः -शा -शं, अस्पष्टः -ष्टा -ष्टं, अप्रभः -भा -भं, मलिनप्रभः -भा -भं, दुर्दर्शः, -र्शा -र्शं, मलिनः -ना -नं, अरोकः -का -कं, विगतः -ता -तं.—(Dejected, melancholy) विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, दीनचेतनः -ना -नं, निरानन्दः -न्दा -न्दं, म्लानः -ना -नं.

GLORIFICATION, *s.* (Act of giving glory) गुणप्रशंसा -सनं, गुणोत्कीर्त्तनं, उत्कीर्त्तनं, यशःकीर्त्तनं, अनुकीर्त्तनं, यशोवर्णना, स्तुतिवादः, गुणश्लाघा, धन्यवादः, वन्दना, प्रशंसाकरणं.—(Elevation to glory) ऊर्द्ध्वगतिः *f.*, स्वर्गारोहणं, स्वर्गगतिः *f.*, परमपदप्राप्तिः *f.*

GLORIFIED, *p. p.* उत्कीर्त्तितः -ता -तं, प्रशंसितः -ता -तं, कृतधन्यवादः -दा -दं.—(Elevated to glory) ऊर्द्ध्वगतः -ता -तं, स्वर्गारूढः -ढा -ढं.

To GLORIFY, *v. a.* गुणान् कृत् (c. 10. कीर्त्तयति -यितुं) or उत्कृत्, प्रशंस् (c. 1. -शंसति -सितुं), श्लाघ् (c. 1. श्लाघते -घितुं), स्तु (c. 2. स्तौति, स्तोतुं), धन्यं वद् (c. 1. वदति -दितुं), धन्यवादं कृ, यशः or कीर्त्तिं or महिमानं वर्ण् (c. 10. वर्णयति -यितुं) or प्रकाश् (c. 10. -काशयति -यितुं).—(Elevate to celestial glory) स्वर्गम् आरुह् in caus. (-रोपयति -यितुं), परमपदं प्राप् in caus. (-आपयति -यितुं).

GLORIOUS, *a.* (Illustrious) महायशाः -शाः -शः (स्), कीर्त्तिमान् -मती

-मत् (त्), यशस्वी -स्विनी -स्वि (न्) यशस्वान् -स्वती -स्वत् (त्), महोदयः, -या -यं, श्रीमान् -मती -मत् (त्), विश्रुतः -ता -तं, ख्यातः -ता -तं.—(Of great splendour) प्रतापवान् -वती -वत् (त्), प्रतापी -पिनी -पि (न्), तेजोमयः -यी -यं, तेजस्वी -स्विनी -स्वि (न्), ओजस्वी &c., वर्चस्वी &c., सुप्रभः -भा -भं, अतिशोभनः -ना -नं, तेजसः -सी -सं.—(Excellent, noble) उत्कृष्टः -ष्टा -ष्टं, उत्तमः -मा -मं, प्रशस्तः -स्ता -स्तं, 'conferring glory,' यशस्करः -री -रं, कीर्तिकरः -री -रं.

Gloriously, *adv.* प्रतापेन, सप्रतापं, सुप्रभं, उत्कृष्टं, उत्तमं, प्रशस्तं.

Glory, *s.* (Splendour) तेजस् *n.*, द्युतिः *f.*, वृहद्द्युतिः *f.*, प्रतापः, तेजस्विता, ओजस्विता, प्रभा, शोभा, उज्ज्वलता.—(Praise) प्रशंसा, श्लाघा, स्तुतिः *f.*, स्तुतिवाक्यं, स्तोत्रं.—(Honour) मानं, पूजा.—(Fame, renown) कीर्तिः *f.*, यशस् *n.*, ख्यातिः *f.*, सुख्यातिः *f.*, विश्रुतिः *f.*, कीर्तनं, प्रथा, प्रतिपत्तिः *f.*, महिमा *m.* (न्), जनोदाहरणं.—(Celestial bliss) स्वर्गगतिः *f.*, स्वर्गभोगः, सद्गतिः *f.*, परमागतिः *f.*, परमपदं, अपवर्गः, सिद्धिः *f.*, मोक्षः.—(Of victory) जयश्रीः.—(Vain-glory) आत्मश्लाघा, दर्पः, गर्वः, अहङ्कारः, विकत्था.

To glory, *v. n.* (Boast) आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं), दृप् (c. 4. दृप्यति, दर्प्तुं), गर्व् (c. 1. गर्वति -र्वितुं), विकत्थ् (c. 1. -कत्थते -त्थितुं), दम्भं कृ.—(Exult) अत्यन्तं नन्द् (c. 1. नन्दति -न्दितुं) or आनन्द्.

Glorying, *s.* आत्मश्लाघा, विकत्था, अहङ्कारः, दर्पः, दम्भः, दर्पकरणं.

Gloss, *s.* (Comment) टीका, भास्यं, भाष्यं, व्याख्या, विवरणं, वार्त्तिकं, टिप्पनी.—(Superficial lustre) वाह्यशोभा, कल्पितशोभा, वाह्यस्निग्धता, वाह्यकान्तिः *f.*, वाह्यरुचिः *f.*, आभा, छविः *f.*

To gloss, *v. a.* and *n.* (Explain, write a comment) टीकया व्याख्या (c. 2. -ख्याति -तुं) or व्याकृ or स्पष्टीकृ or व्याह् (c. 1. -हरति -हर्तुं), टीकां लिख् (c. 6. लिखति, लेखितुं), टीकां कृ.—(Give a superficial lustre) वाह्यशोभां दा, वाह्यकान्तिं दा, स्निग्धीकृ, उपरिभागं शुभ् (c. 10. शोभयति -यितुं).

Glossarial, *a.* शब्दकोषविषयकः -का -कं, परिभाषाप्रकाशकः -का -कं.

Glossarist, glossator, glosser, *s.* शब्दकोषलेखकः, शब्दसङ्ग्रहकारी *m.* (न्), कौशिकः, निर्वचनकृत् *m.*

Glossary, *s.* कोषः, शब्दकोषः, शब्दसङ्ग्रहः, शब्दग्रन्थः, शब्दजालं, निर्वचनं, निघण्टुः *m.*, अभिधानं, परिभाषाप्रकाशको ग्रन्थः.

Glossiness, *s.* वाह्यशोभा, वाह्यकान्तिः *f.* वाह्यरुचिः *f.*, स्निग्धता, स्नैग्ध्यं, चिक्कणता, कल्पितशोभा.

Glossographer, *s.* टीकालेखकः, भाष्यलेखकः, टिप्पनीलेखकः.

Glossography, *s.* टीकालेखनं, शब्दकोषलेखनं, शब्दकोषरचनं.

Glossy, *a.* स्निग्धः -ग्धा -ग्धं, चिक्कणः -णा -णं, श्लक्ष्णः -क्ष्णा -क्ष्णं, बहिर्भागे शोभनः -ना -नं or रुचिरः -रा -रं or तेजितः -ता -तं or परिष्कृतः -ता -तं.

Glottis, *s.* उपजिह्वा, प्रतिजिह्वा, अलिजिह्वा.

Glove, *s.* हस्ताच्छादनं, हस्तत्राणं, हस्तपरिधानं, पाणिवस्त्रं, पाणिवेष्टनं, करवेष्टनं, हस्ताभरणं.

To glove, *v. a.* हस्तं पूर्वोक्तवस्त्रेण आछद् (c. 10. -छादयति -यितुं).

Glover, *s.* हस्ताच्छादनकृत् *m.*, पाणिवस्त्रविक्रयी *m.* (न्).

To glow, *v. n.* दीप् (c. 4. दीप्यते, दीपितुं) or in freq. (देदीप्यते) ज्वल् (c. 1. ज्वलति -लितुं), दह् (c. 4. दह्यति, दग्धुं or in pass. दह्यते), तप् in pass. (तप्यते or c. 1. तपति, तप्तुं), सन्ताप्, प्रताप्, अभितप्.—(Become red) अरुणीभू, रक्तीभू, रञ्ज् in pass. (रज्यते), संरञ्ज्; 'the east glows,' प्राची संरज्यते.

Glow, *s.* तापः, उष्णः, दीप्तिः *f.*, तेजस्, द्युतिः *f.*, दाहः, चञ्चलता, उष्णता, उज्ज्वलता.—(Redness of colour) रक्तता, अरुणिमा *m.* (न्), रागः; 'glow in the cheek,' कपोलरागः, मुखरागः.

Glowing, *part.* or *a.* दीप्तः -प्ता -प्तं, दीप्यमानः -ना -नं, देदीप्यमानः -ना -नं, तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, उपतप्तः -प्ता -प्तं, अभितप्तः -प्ता -प्तं, उत्तप्तः -प्ता -प्तं, तापी -पिनी -पि (न्), तेजसः -सी -सं, चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उज्ज्वलः -ला -लं, ज्वाली -लिनी -लि (न्), दह्यमानः -ना -नं; 'glowing with anger,' रोषप्रदीपितः -ता -तं, कोपज्वलितः -ता -तं; 'having glowing cheeks,' रक्तकपोलः -ला -लं; 'having glowing eyes,' दीप्ताक्षः -क्षा -क्षं.

Glowingly, *adv.* तापेन, उष्णापेन, तेजसा, दीप्त्या, प्रचण्डं, उष्णं.

Glow-worm, *s.* प्रभाकृमिः *m.*, प्रभाकीटः, द्युतिमत्कीटः, खद्योतः.

To gloze, *v. a.* लल् (c. 10. लालयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं).

Gloze, *s.* लालनं, सान्त्वनं -ना, सान्त्ववाक्यं, चाटुः *m.*, मधुरवाक्यं.

Glozer, *s.* लाली *m.* (न्), सान्त्ववादः, चाटुकारः, चाटुवादी *m.* (न्).

Glue, *s.* लेपः, विलेपः, संलग्नीकरणार्थम् अतिश्यानद्रव्यं, सुधा.

To glue, *v. a.* पूर्वोक्तलेपद्वारेण संलग्नीकृ or संयुज् (c. 7. -युनक्ति -योक्तुं) or संश्लिष् (c. 10. -श्लेषयति -यितुं).

Glued, *p. p.* संलग्नीकृतः -ता -तं, संयुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं.

Gluey, *a.* श्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, चिक्कणः -णा -णं.

Glum, *a.* वक्त्रभावः -वा -वं, सदावक्त्रः -क्त्रा -क्त्रं, प्रतीपः -पा -पं.

To glut, *v. a.* (Satiate) अत्यन्तं तृप् (c. 10. तर्पयति -यितुं) or सन्तृप् or तृ in caus. (पूरयति -यितुं) or परितृप्, अतितृप्तिं or अतितौहित्यं जन् (c. 10. जनयति -यितुं).—(Swallow, gorge) ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्, गॄ (c. 6. गिरति, गरितुं -रीतुं).

Glut, *s.* (More than enough) अतिरेकः, अतिरिक्तता, आधिक्यं, अतिशय्यं, उत्सेकः, उद्रेकः, उच्चयः.—(Too great plenty) अतिबाहुल्यं.—(Satiety) अतितृप्तिः *f.*, अतितौहित्यं.

To glutinate, *v. a.* लेपद्वारेण संलग्नीकृ or संयुज् (c. 7. -युनक्ति -योक्तुं).

Glutination, *s.* लेपादिना संलग्नीकरणं or संयोजनं or संश्लेषणं.

Glutinous, *a.* श्यामः -ना -नं, चिक्कणः -णा -णं, सान्द्रः -न्द्रा -न्द्रं, स्निग्धः -ग्धा -ग्धं, संलग्नशीलः -ला -लं, अनुलग्नशीलः -ला -लं.

Glutinousness, *s.* श्यानता, सान्द्रता, स्निग्धता, स्नैग्ध्यं, संलग्नशीलता.

Glutted, *p. p.* अतितृप्तः -प्ता -प्तं, अतिपूरितः -ता -तं, अतिपूर्णः -र्णा -र्णं.

Glutton, *s.* अत्याहारी *m.* (न्), अपरिमिताहारी *m.*, अत्यन्नभोजी *m.* (न्), कुक्षिम्भरिः *m.*, उदरम्भरिः *m.*, औदरिकः, अतिलोभी *m.* (न्), गृध्नजनः, सत्वरभुक् *m.*, वह्निः *m.*

To gluttonize, *v. n.* अत्यन्तं भुज् (c. 7. भुंक्ते, भोक्तुं), अत्याहारं कृ, गृध् (c. 4. गृध्यति, गर्धितुं), अतिभोजनं कृ.

Gluttonous, gluttonish, *a.* अत्याहारी -रिणी -रि (न्), बह्वाशी -शिनी -शि (न्), अतिभोजी -जिनी -जि (न्), अतिबुभुक्षुः -क्षुः -क्षु, बहुभोक्तृ -क्त्री -क्तृ (क्तृ), अपरिमिताहारी &c., भक्षकः -का -कं, धस्मरः -रा -रं, अग्रः -रा -रं, ग्रसः -सा -सं, कुक्षिम्भरिः -रिः -रि, उदरम्भरिः -रिः -रि, देहम्भरः -री -रं, औदरिकः -की -कं, लोलुपः -भा -भं, गृध्नः -ध्ना -ध्नं, गर्धी -र्धिनी -र्धि (न्), लोलः -ला -लं, आशूनः -ना -नं.

Gluttonously, *adv.* अत्याहारेण, गृध्नजनवत्, औदरिकवत्, सातिभोजनं

Gluttony, *s.* अत्याहारः, अतिभोजनं, अतिबुभुक्षा, अधिकभोजनं, अपरिमिताहारः, धस्मरता, गृध्नता, लोलता, लौल्यं, अतृप्तिः *f.*, उदरम्भरणं.

Glyph, *s.* गृहनिर्म्माणे स्तम्भोपरि रेखाकारेण तक्षितो ऽलङ्कारः.

Glyptography, *s.* रत्नोपरि तक्षणशिल्पं or तक्षणकर्म्म *n.* (न्) or लिखनं.

To gnarl, *v. n.* गर्ज् (c. 1. गर्जति -र्जितुं), रै (c. 1. रायति, रातुं), घुर्घुरां कृ.

Gnarled, *a.* ग्रन्थिलः -ला -लं, बहुग्रन्थिः -न्थिः -न्थि, पक्षैविशिष्टः -ष्टा -ष्टं.

To GNASH, *v. a.* and *n.* क्षिद् or क्षिद (c. 1. क्षेडति, क्षेदति -डितुं -दितुं), दन्तान् दन्तैर् घृष् (c. 1. घर्षति -र्षितुं) or निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), सन्दंश (c. 1. -दशति -दंष्टुं), कटकट (nom. कटकटायति -यितुं), क्षेडनं कृ, दन्तघर्षणं कृ.

GNASHING, *s.* दन्तघर्षणं, क्षेडनं, क्षेडितं, कटकटशब्दः.

GNAT, *s.* मशकः, मसकः, मृष्टमक्षिका, दंशकः; भम्भरालिका, सूचिवदनः, रथारणः, प्राचिका, रात्रिजागरदः.

GNAT-SNAPPER, *s.* मशकखादकः पक्षिभेदः, मशकनाशकः.

To GNAW, *v. a.* and *n.* चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), दंश् (c. 1. दशति, दंष्टुं), विदंश, सन्दंश, सम्मुखदन्तैर् अल्पाल्पं खाद् (c. 1. खादति -दितुं) or अश् (c. 9. अश्नाति, अशितुं) or भक्ष् (c. 10. भक्षयति -यितुं), क्रमशः खाद् or चर्वणं कृ or कर्त्तनं कृ.

GNAWED, *p. p.* चर्वितः -ता -तं, सम्मुखदन्तैः क्रमशः खादितः -ता -तं, विदश्यमानः -ना -नं, गलितः -ता -तं.

GNAWER, *s.* चर्वणकारी *m.* (न्), दंशनकृत् *m.*, सम्मुखदन्तैः खादकः.

GNAWING, *s.* चर्वणं, दंशनं, सम्मुखदन्तैर् अल्पाल्पखादनं or कर्त्तनं.

GNOME, *s.* पृथिव्यभ्यन्तरे वासी खन्याकरादिरक्षको भूतविशेषः.

GNOMON, *s.* (Of a dial) कीलः, मयूखः, शङ्कुः *m.*, नरः, ना *m.* (नृ).

GNOMONIC, *s.* घटीकीलनिर्म्माणसम्बन्धी -न्धिनी -न्धि (न्).

GNOMONICS, *s.* घटीकीलनिर्म्माणविद्या, कालमापकमण्डलसम्बन्धिनी विद्या.

GNOSTIC, *s.* ग्नास्तिकसंज्ञकः प्राचीननास्तिकविशेषः.

To GO, *v. n.* गम् (c. 1. गच्छति, गन्तुं), या (c. 2. याति -तुं), इ (c. 2. एति -तुं), मृ (c. 1. मरति, मर्त्तुं), चर (c. 1. चरति -रितुं), पद् (c. 4. पद्यते, पत्तुं), व्रज् (c. 1. व्रजति -जितुं), क्षु (c. 1. क्षुच्छति, क्षोत्तुं), चल् (c. 1. चलति -लितुं), गा (used only in 3d pret. अगात्), इङ्ग् (c. 1. इङ्गति -ङ्गितुं), सह (c. 1. सहते -हितुं).—(Walk) क्रम् (c. 1. क्रामति, c. 4. क्राम्यति, क्रमितुं), पादाभ्यां गम or चर.—(Flow) सु (c. 1. सवति, सोतुं), स्यन्द् (c. 1. स्यन्दते -न्दितुं), री (c. 4. रीयते, रेतुं).—(Glide along) सृप् (c. 1. सर्पति, सर्प्तुं).—(Pass current, circulate) प्रचल्, प्रचर.—(Fare) वृत् (c. 1. वर्त्तते -र्त्तितुं), स्था (c. 1. तिष्ठति, स्थातुं); 'How goes it with you?' कीदृशी स्थितिर् भवतः.—(Be about to do) expressed by काम with the infin.; as, 'What were you going to say?' किम् असि वक्तुकामः; 'What are you going to do?' किं कर्त्तुकामो ऽसि, or by the desid. form, as किं विवक्षसि, किं चिकीर्षसि.—(Go about, attempt) यत् (c. 1. यतते -तितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), व्यवसो (c. 4. -स्यति -सातुं), उपक्रम्.—(Go against) आक्रम्, अभिक्रम्, अभिप्रया.—(Go aside) पार्श्वं चल्.—(Go astray) भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), विभ्रम, मत्यपात चु (c. 1. च्यवते, च्योतुं) or भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), उत्क्रम, व्युत्क्रम, व्यभिचर, उन्मार्गेण गम्.—(Go away) अपगम, व्यपगम, गम, अपया, व्यपया, प्रया, अपे (c. 2. अपैति -तुं, rt. इ), व्यपे, अपमृ, अपक्रम, व्यपक्रम, अपमृष, चल्, प्रस्था, विप्रस्था, सम्प्रस्था.—(Go between) अन्तर्धर, अन्तरि, अन्तर्वृत, मध्ये वृत, मध्ये स्था, मध्यस्थः -स्था -स्थं भू, मध्यवर्त्ती -र्त्तिनी -र्त्ति भू.—(Go by) अतिक्रम्, अती, व्यती, अतिवृत; 'to go by sea,' समुद्रेण या.—(Go down) अधो गम्, अधो या, अवया, अवरुह (c. 1. -रोहति -रोढुं).—(Go for nothing) तृणप्रायः -या -यं भू.—(Go forth) निर्गम, निर्या, विनिर्या, निःमृ, विनिःमृ, निष्क्रम, निरि, निष्धर.—(Go forward) प्रगम, अग्रे गम, पुरो गम, प्रया, प्रमृ, प्रस्था.—(Go in) विश (c. 6. विशति, वेष्टुं), निर्विश, प्रविश, आविश, आगम, अन्तर्गम्, आया, उपस्था.—(Go in and out) गमनागमनं कृ.—(Go off, depart) अपगम्, अपया.—(Go off, die) प्रे, परे, अती, देहाद् अपगम्, लोकान्तरं गम्.—(Go off, explode) अन्तरग्निबलेन विभिद् in pass. (-भिद्यते), विदृ in pass. (-दीर्य्यते).—(Go on, proceed) प्रगम्, प्रया, प्रमृ, प्रमृष्, प्रवृत्; 'the work goes on,' प्रसर्पति कर्म्म; 'the laugh goes on,' प्रवर्त्तते हासः.—(Go out, issue) निर्गम्, विनिर्गम्, निःमृ, विनिःमृ, निर्या, विनिर्या, अभिनिर्या, निष्क्रम्, विनिष्क्रम्, अभिनिष्क्रम्, निष्धर्, विनिष्धर, निरि, बहिर्गम्.—(Go out, as a fire or light) निर्वा (c. 4. -वायति -वातुं) or in caus. pass. (-वाप्यते), शम् (c. 4. शाम्यति, शमितुं).—(Go over, read) अधी (c. 2. अधीते, rt. इ). अधिगम्, अधिगा used only in 3d pret. átm. (अध्यगीष्ट).—(Go over from one party to another) स्वपक्षं त्यक्त्वा परपक्षम् आश्रि (c. 1. -श्रयति -यितुं), स्वधर्म्माद् भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं).—(Go through, execute) निर्वह् (c. 10. -वाहयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), साध् (c. 10. साधयति -यितुं).—(Go through, undergo) उपगम्, उपागम्, सह् (c. 1. सहते, सोढुं), अनुभू.—(Go through, penetrate) प्रविश्, निर्विश्, विश्, व्यध् (c. 4. विध्यति, व्यद्धुं), निर्भिद् (c. 7. -भिनत्ति -भेत्तुं).—(Go to, go towards) आगम, उपगम्, उपागम्, समुपगम्, अधिगम, अभिगम, आया, अभिया, उपया, उपाया, प्रत्याया, समाया, समुपया, उपस्था, अभिमृ, आवृत्, अभिवृत्, प्रतिवृत्, उपावृत्, अभ्यावृत्, आव्रज्, प्रतिव्रज्, अभिपद्, समापद्, प्रतिपद्, समुपपद्, इ (c. 2. एति -तुं, rt. इ with आ), अभ्ये, उपे, अभी, (अभ्येति), प्रती, आक्रम्, उपक्रम्, अभ्यृ.—(Go up) ऊर्द्धं गम्, उदि (c. 1. -अयति -एतुं), उच्चैर् व्रज्.—(Go with) अनुया, समनुया, अन्वि, सह गम् or चर, सहायीभू.—(Go on horseback) अश्ववाहनेन व्रज्.—(Go on foot) प्रादाभ्यां गम्.—(Go to bed) शय्यां गम्.—(Go to law) विवद् (c. 1. -वदते -दितुं).—(Go to sea) नौकाम् आरुह्.—(Go ashore) नौकायाः उत्तृ (c. 1. -तरति -रितुं -रीतुं) or अवरुह्.

GO-BETWEEN, *s.* मध्यस्थः, मध्यवर्त्ती *m.* (न्), सन्धिजीवकः.—(Female) दूती, सञ्चारिका, भुरततालो.

GO-BY, *s.* पलायनं, अपक्रमः, निर्गमः, अपयानं, व्यपदेशः.

GO TO, *interj.* अपेहि, अपसर, रहि, यातु, धिक्.

GO-CART, *s.* शकटिका, बालकानां पादचारशिक्षार्थं चक्रयानविशेषः, क्रीडाशकटः.

GOAD, *s.* तोदनं, तोत्रं, प्रतोदः, अङ्कुशः, प्राजनं, शृणिः *f.*, प्रवयणं.

To GOAD, *v. a.* प्रतोदेन तुद् (c. 6. तुदति, तोत्तुं) or वितुद् or आतुद्.—(Incite) प्रेर् (c. 10. ईरयति -यितुं), प्रचुद् (c. 10. -चोदयति -यितुं), प्रणुद् (c. 6. -नुदति -नोत्तुं), प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रोत्साह् (c. 10. -साहयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं).

GOADED, *p. p.* प्रतुन्नः -न्ना -न्नं, प्रेरितः -ता -तं, प्रोत्साहितः -ता -तं.

GOAL, *s.* अग्रं, अग्रभूमिः *f.*, अग्रस्थानं.—(Final end) अभिप्रायः, शेषाभिप्रायः, आशयः, उद्देशः, अर्थः, अन्तः, उत्तरं, फलमुत्तरं, परिणामः.

GOAT, *s.* छागः -गलः, छगलः, अजः, वस्तः, स्तुनकः, पर्णभोजनः, लम्बकर्णः, पयस्वलः, शिवाप्रियः, देवानाम्प्रियः; 'wild-goat,' वनाजः, वनछागः, अरण्यछागः; 'she-goat,' छागी, अजा; 'excrescence on a goat's neck,' मणिः *m. f.*; 'flock of goats,' आजकं; 'relating to a goat,' वास्तः -स्ती -स्तं.

GOAT-HERD, *s.* जाबालः, अजजीविकः, अजाजीवः -वी *m.* (न्), अजापालकः, छागपालकः, अजपः -पालकः, छागपोषकः.

GOATISH, *a.* अजवत् कामुकः -का -कं, अजगन्धः -न्धा -न्धं, छागगन्धः &c.

GOATISHLY, *adv.* अजवत्, छागवत्, कामुकवत्, कामुकं.

GOATSKIN, *s.* अजचर्म्म *n.* (न्), छागचर्म्म *n.*, छागाजिनं, अजाजिनं.

GOB, *s.* अल्पिका, अल्पपिण्डः, अल्पग्रासः, मुखपूरणं, कवलः.

To GOBBLE, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्, गृध्नवत् सत्वरं भक्ष् (c. 10. भक्षयति -यितुं) or लाद् (c. 1. लादति -दितुं), गॄ (c. 6. गिरति, गरितुं -रीतुं).

To GOBBLE, *v. n.* शीघ्रनिगरणशब्दं कृ, दीर्घकण्ठपक्षिवत् शब्दं कृ.

GOBBLER, *s.* शीघ्रभोजी *m.* (न्), शीघ्राशी *m.* (न्), बद्धाशी *m.*, भक्षकः, ग्रसरः.

GOBLET, *s.* कांस्यं, कंसः -सं, कंशः -शं, पानभाजनं, पानपात्रं; 'relating to one,' कंसीयः -या -यं.

GOBLIN, *s.* वेतालः, रात्रिचरः, रात्रिञ्चरः, रजनीचरः, क्षपादाचरः, नक्तञ्चरः -चारी *m.* (न्), निशाटः, भूतः, राक्षसः, पिशाचः, असुरः, प्रेतः, अपदेवता, क्रव्याद् *m.*, यज्ञारिः *m.*, विधुरः, कवुरः, कौणपः.

GOD, *s.* (The Supreme Being) ईश्वरः, परमेश्वरः, परेश्वरः, परमात्मा *m.* (न्).—(A god) देवः -वता, सुरः, अमरः, विबुधः, अनिमिषः, अजरः, चिरायूः *m.* (स्), सुचिरायूः *m.* (स्), भगवान् *m.* (न्).—(The Creator) सर्व्वस्रष्टा *m.* (ष्टृ), धाता *m.* (तृ), विधाता *m.*, जगत्कर्त्ता *m.* (र्त्तृ), विश्वसृक् *m.*, भूतादिः *m.*, सात् *n.*—(God of gods) ईश्वरेश्वरः; 'city god,' नगरदेवता.—(Self-existent) स्वयम्भूः *m.*

GODAVERÍ, *s.* (River) गोदावरी, तपनी, तपनात्मजा.

GOD-CHILD, *s.* धर्म्मपुत्रः -त्री, धर्म्मसुतः -ता.

GOD-DAUGHTER, *s.* धर्म्मपुत्री, धर्म्मसुता, जलसंस्कारकाले स्त्रीष्टीयधर्म्मशिक्षणार्थं स्वीकृता पुत्री.

GODDESS, *s.* देवी, सुरी, अमरा -री, अजरा -री, देवपत्नी, देवाङ्गना, भगवती.

GODFATHER, *s.* धर्म्मपिता *m.* (तृ), धर्म्मप्रतिभूः *m.*, जलसंस्कारकाले स्त्रीष्टीयधर्म्मशिक्षणाय प्रतिजानीते यो बालस्य कृत्रिमपिता.

GODHEAD, *s.* देवत्वं -ता, ईश्वरत्वं -ता, देवभूयं, भगवत्त्वं, ब्रह्मत्वं, ब्रह्मभूयं.

GODLESS, *a.* अनीश्वरः -रा -रं, अनीश्वरवादी -दिनी -दि (न्), नास्तिकः, अनीश्वररोचितः -ता -तं.—(Impious) निर्धर्म्मः -र्म्मा -र्म्मं, अधार्म्मिकः -की -कं, अतिदुष्टः -ष्टा -ष्टं.

GODLESSLY, *adv.* नास्तिकवत्, पापण्डवत्, अतिदुष्टं, धर्म्मव्यतिरेकेण.

GODLESSNESS, *s.* अनीश्वरत्वं, नास्तिकत्वं, निर्धर्म्मता, अतिदुष्टता.

GODLIKE, *a.* देवतुल्यः -ल्या -ल्यं, देवोपमः -मा -मं, देवरूपी -पिणी -पि (न्), दिव्यः -व्या -व्यं, देवार्हः -र्हा -र्हं, ईश्वरीयः -या -यं, ईश्वरमूर्त्तिः -र्त्तिः -र्त्ति.

GODLINESS, *s.* ईश्वरसेवा -वनं, ईश्वरभक्तिः *f.*, देवभक्तिः *f.*, ईश्वरश्रद्धा, ईश्वरपूजा, धर्म्मत्वं, धार्म्मिकता, धर्म्मसेवा, ब्रह्मण्यता, पुण्यशीलता.

GODLY, *a.* ईश्वरसेवी -विनी -वि (न्), ईश्वरभक्तः -क्ता -क्तं, ईश्वरपूजकः -का -कं, देवपूजकः -का -कं, पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्), भजनशीलः -ला -लं, भक्तिमान् -मती -मत् (त्), धर्म्मी -र्म्मिणी -र्म्मि (न्), धार्म्मिकः -की -कं, धर्म्माचारी -रिणी -रि (न्), ब्रह्मण्यः -ण्या -ण्यं.

GODLY, *adv.* ईश्वरभक्तवत्, देवपूजकवत्, धार्म्मिकवत्, पुण्यं.

GODMOTHER, *s.* धर्म्ममाता *f.* (तृ), जलसंस्कारकाले स्त्रीष्टीयधर्म्मशिक्षणाय प्रतिजानीते या बालकस्य कृत्रिममाता.

GODSEND, *s.* देवदत्तं, ईश्वरदत्तं, लक्ष्मीदत्तं, श्रीदत्तं, सौभाग्यं.

GODSHIP, *s.* ईश्वरत्वं -ता, देवत्वं -ता, देवभावः, देवभूयं, भगवत्त्वं.

GODSON, *s.* धर्म्मपुत्रः, धर्म्मसुतः, जलसंस्कारकाले स्त्रीष्टीयधर्म्मशिक्षणार्थं स्वीकृतः पुत्रः.

GODWIT, *s.* दीर्घमुखः पक्षिभेदः, दीर्घचञ्चुः *m.*, दीर्घतुण्डः, दीर्घपाद् *m.*

GOER, *s.* गामी *m.* (न्), गन्ता *m.* (न्तृ), यायी *m.* (न्), सरः, सारी *m.* (न्), क्रमिता *m.* (तृ), चलः, गमनकारी *m.* (न्); 'a quick goer,' अविलम्बितक्रमः, द्रुतक्रमः.

To GOGGLE, *v. n.* चक्षुषी इतस्ततो लुल् (c. 1. लोलति -लितुं, c. 10. लोलयति -यितुं), विवृताक्षः -क्षा -क्षं भू, तिर्य्यग्दृष्टिः -ष्टिः -ष्टि भू.

GOGGLE-EYE, *s.* लोलनयनं, लोलनेत्रं, फुल्लनयनं, विवृतचक्षुस् *n.*

GOGGLE-EYED, *a.* लोलनयनः -ना -नं, लोलाक्षिः -क्षिः -क्षि, उत्फुल्लनयनः -ना -नं, फुल्ललोचनः -ना -नं, तिर्य्यग्दृष्टिः -ष्टिः -ष्टि, चक्रदृष्टिः -ष्टिः -ष्टि, उन्नेत्रः -त्रा -त्रं, उदग्रनयनः -ना -नं

GOING, *part.* चरन् -रन्ती -रत् (त्), चलन् -लन्ती -लत् (त्), क्रामन् -मन्ती -मत् (त्), सरन् -रन्ती -रत् (त्), गामी -मिनी -मि (न्), सरः -रा -रं, सरणः -णा -णं, चरः -रा -रं; 'going in a straight line,' सरल-यायी -यिनी -यि (न्).

GOING, *s.* गमः -मनं, सरणं, चरणं, चारः, चलनं, व्रजनं, गोः *f.*, गतं, अयनं, क्रमः -मणं; 'going away,' अपगमः, अपगमः, अपयानं, अपसरणं, अपायः, प्रस्थानं; 'going out,' निष्क्रमः -मणं, निष्क्रान्तिः *f.*, निर्गमः, निर्यायणं, बहिर्गमनं; 'going and coming,' गमागमः, गमनागमनं, गतागतं, यातायातं.

GOITRE, *s.* गडुः *m.*, गण्डिः *m.*; 'having it,' गडुलवः -ली -लं.

GOITROUS, *a.* गडुपीडितः -ता -तं, गडुलवः -ली -लं.

GOLD, *s.* सुवर्णं, स्वर्णं, कनकं, काञ्चनं, हिरण्यं, हेम *n.* (न्), हेमं, रूक्मं, रुग्मं, भर्म *n.* (न्), भर्मं, जातरूपं, जाम्बूनदं, शातकुम्भं, शतकुम्भः, शातकौम्भं, चामीकरं, निष्कं, हाटकं, हिरणं, तपनीयं, महारजतं, कलधौतं, कलधूतं, कार्त्तस्वरं, अष्टापदः -दं, कर्बुरं, कर्बूरं, गाङ्गेयं, गौरं, दीप्तं, भास्वरं, जाम्बवं, तेजस्, शातकुम्भं, महाधातुः *m.*, सौमेरुकं, लोहोत्तमं, पिङ्गानं, सुरार्हं, दाक्षायणं, मानसिः *m.*, पुरटं, पुरुदं, बर्हिषीजं, अकुप्यं, मृदुस्रकं; 'pure gold,' कुमारं; 'virgin gold,' पिङ्गाशं; 'false gold,' कूटवर्णं; 'gold for ornaments,' शृङ्खिकनकं; 'a heap of gold,' काञ्चनचयः; 'a piece of gold,' कनकभङ्गः; 'a gold coin,' सुवर्णमुद्रा; 'a weight of gold,' कनकपलः, सुवर्णः -र्णी.

GOLD, *a.* सुवर्ण or स्वर्ण or कनक or काञ्चन &c. in comp.; as, 'a gold bracelet,' सुवर्णकङ्कणं; 'gold stick,' कनकदण्डः; 'gold-mine,' कनकस्थली, काञ्चनकन्दरः; 'gold necklace,' हेममूत्रकं, कनकसूत्रं. *See* GOLDEN.

GOLD-BEATER, *s.* स्वर्णपत्रकारः -कृत्, सुवर्णकारविशेषो यो मुद्गरादिना सुवर्णम् अतिसूक्ष्मीकरोति or अतिशयेन तनूकरोति or उद्घट्टयति.

GOLD-DRAWER, *s.* सुवर्णोद्घट्टनकारी *m.* (न्), कनकोद्घट्टनकृत् *m.*

GOLD-DUST, *s.* कनकपरागः, काञ्चनभूः *f.*, कनकरेणुः *m.*

GOLDEN, *a.* सौवर्णः -र्णी -र्णं, स्वर्णमयः -यी -यं, स्वर्णनिर्म्मितः -ता -तं, स्वर्णकः -का -कं, सुवर्णवान् -वती -वत् (त्), काञ्चनः -नी -नं, काञ्चनमयः -यी -यं, कनकमयः -यी -यं, सुवर्णकृतः -ता -तं, रूक्मवान् -वती -वत् (त्), तापनीयः -यी -यं; 'golden ornament,' कनकभूषणं. *See* GOLD, *a.*

GOLDFINCH, *s.* कनकवर्णपक्षयुक्तो मधुरस्तविशिष्टः क्षुद्रपक्षी *m.* (न्).

GOLD-FISH, *s.* चीनदेशजः कनकवर्णो मत्स्यभेदः.

GOLD-LEAF, *s.* स्वर्णपत्रं, कनकपत्रं, अष्टापदपत्रं, पत्रं.

GOLDSMITH, *s.* स्वर्णकारः, सुवर्णकारः, हेमकारः, रूक्मकारकः, नाडिन्धमः, हेमलः, प्लवादः, कणादः, गौम्रिकः, सुवर्णस्य विकारान्तरकृत् *m.*

GOLD-THREAD, *s.* कनकसूत्रं, हेमसूत्रं, सुवर्णतन्तुः *m.*

GOLF, *s.* कन्दुकक्रीडा, कन्दुकलीला, गुलिकाक्रीडा.

GONDOLA, *s.* चेनिशनगरवासिभिः प्रयुक्तो लघुनौकाविशेषः.

GONDOLIER, *s.* पूर्व्वोक्तनौकाचालकः, पूर्व्वोक्तनौकादण्डधरः.

GONE, *p. p.* गतः -ता -तं, यातः -ता -तं, चलितः -ता -तं, सृतः -ता -तं, चरितः -ता -तं, व्रजितः -ता -तं, इतः -ता -तं, पन्नः -न्ना -न्नं; 'gone away,' अपगतः -ता -तं, व्यपगतः -ता -तं; 'gone out,' निर्गतः -ता

-तं, निष्क्रान्तः -न्ता -न्तं, बहिर्गतः -ता -तं.—(Past) वृत्तः -त्ता -त्तं, भूतः -ता -तं, अतीतः -ता -तं, अतिक्रान्तः -न्ता -न्तं.

GONFALON, GONFANON, *s.* पताका, ध्वजः, केतुः *m.*, वैजयन्ती.

GONG, *s.* कांस्यं, घनं, गभीरिका.

GONIOMETER, *s.* कोणपरिमापकयन्त्रं, असमापनयन्त्रं.

GONORRHŒA, *s.* रक्षणीरकः, रक्षणारकः, धातुक्षरणं, मूत्रमार्गरोगः.

GOOD, *a.* (Not bad, excellent) साधुः -धुः -ध्वी -धु, भद्रः -द्रा -द्रं, उत्तमः -मा -मं, प्रशस्तः -स्ता -स्तं, प्रशस्यः -स्या -स्यं, शस्तः -स्ता -स्तं, शस्यः -स्या -स्यं, शिष्टः -ष्टा -ष्टं, शुभः -भा -भं, कुशलः -ला -लं, कल्याणः -णा -णं, सन् सती सत् (त्), सत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, सारः -रा -रं, सारवान् -वती -वत् (त्), आर्यः -र्या -र्यं, वरः -रा -रं, निर्दोषः -षा -षं, अदुष्टः -ष्टा -ष्टं, often expressed by सु prefixed; as, 'a good action,' सुक्रिया; 'a good man,' साधुजनः, सज्जनः; 'a good road,' सुपथः, सन्मार्गः.—(Virtuous) धार्मिकः -की -कं, सच्चरितः -ता -तं, सदाचारः -रा -रं, साधुवृत्तः -त्ता -त्तं, आर्यवृत्तः -त्ता -त्तं, शुभाचारः -रा -रं, सुकर्मा -र्मा -र्म (न्), सुकृती -तिनी -ति (न्), सुकृत् *m. f. n.*, सुचरितः -ता -तं, कुशली -लिनी -लि (न्), पुण्यः -ण्या -ण्यं, पुण्यकर्मा -र्मा -र्म (न्), पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्), वृत्तवान् -वती -वत् (त्).—(Suitable, fit) योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, समुचितः -ता -तं, हितः -ता -तं, सुहितः -ता -तं, sometimes expressed by the fut. pass. part.; as, 'good to eat,' खाद्यः -द्या -द्यं, स्वादनीयः -या -यं.—(Wholesome) पथ्यः -थ्या -थ्यं.—(Useful) उपयोगी -गिनी -गि (न्), सोपकारः -रा -रं.—(Kind) हितः -ता -तं, हितकामः -मा -मं, सज्जनः -ना -नं, प्रियङ्करः -रा -रं, प्रियकारः -रा -रं, उपकारकः -का -कं.—(Tending to promote) उत्पादकः -का -कं.—(Sound, undamaged) अक्षतः -ता -तं, अदूषितः -ता -तं.—(Entire, complete) सम्पूर्णः -र्णा -र्णं, सकलः -ला -लं, कृत्स्नः -त्स्ना -त्स्नं.—(Considerable, great) बहुः -ह्वी -हु, अनल्पः -ल्पा -ल्पं, महान् -हती -हत् (त्), भूरिः -रिः -रि, प्रचुरः -रा -रं, सु or अति prefixed; as, 'a good deal vexed,' सुदुःखितः -ता -तं, अतिदुःखितः -ता -तं; 'a good distance,' सुदूरं; 'a good while ago,' सुदीर्घकाले गते.—(Valid) धर्म्यः -र्म्या -र्म्यं, अविशुद्धः -द्धा -द्धं. 'Good quality,' गुणः; 'endowed with good qualities,' गुणी -णिनी -णि (न्), सद्गुणः -णा -णं; 'good wishes,' कल्याणवचनं, आशीर्वचनं; 'good and bad,' शुभाशुभः -भा -भं, हिताहितः -ता -तं, सारासारः -रा -रं; 'beloved by the good,' आर्यवृन्दः -न्दा -न्दं; 'to make good,' सम्पद् (c. 10. -पादयति -यितुं), सम्पृ (c. 10. -पूरयति -यितुं), साध् (c. 10. साधयति -यितुं); 'make good a promise,' प्रतिज्ञाम् अपवृज् (c. 10. -वर्जयति -यितुं); 'make good a debt,' ऋणं शुध् (c. 10. शोधयति -यितुं) or अपाकृ; 'a good fellow,' भद्रः; 'in good time,' उपयुक्तकाले.

GOOD, *s.* (Benefit, welfare) हितं, श्रेयस् *n.*, भद्रं, शुभं, कल्याणं, कुशलं, क्षेमं, मङ्गलं, भूतिः *f.*; 'for the good of the world,' लोकहिताय, भूतये भुवः; 'good and evil,' हिताहितं, शुभाशुभं, भद्राभद्रं, मङ्गलामङ्गलं; 'good and bad,' सारासारं.—(Utility) उपयोगः, अर्थः, फलं, लाभः.—(Virtue) पुण्यं, सुकृतं, सुचरितं, साधुवृत्तं, धर्मः; 'to do good,' हितं कृ, क्षेमं कृ, उपकृ.

GOOD, *adv.* सु prefixed, सुष्ठु; 'as good as,' समं; 'this is as good as a sixteenth part,' एतत् षोडशांशेन समं.

GOOD, *interj.* भद्रं, वाढं, कामं, भवतु, अस्तु, एवमस्तु, तथेति.

GOOD-BREEDING, *s.* सभ्यता, विनयः, सुविनयः, सुशीलता; 'a man of good breeding,' सुविनीतः, सुशीलः.

GOOD-CONDITIONED, *a.* सुस्थः -स्था -स्थं, सुस्थितः -ता -तं, सुवृत्तः -त्ता -त्तं.

GOOD-FELLOW, *s.* भद्रः, भद्रजनः, साधुजनः, सहपायी *m.* (न्), रसिकजनः.

GOOD-FELLOWSHIP, *s.* उत्सवकारिणां संसर्गः, सुसङ्गः, सुसाहित्यं, सुमैत्र्यं.

GOOD-FORTUNE, *s.* सौभाग्यं, भाग्यं, कल्याणं, भद्रं, शुभं, मङ्गलं, माङ्गल्यं, कुशलं, कौशल्यं, दैवं, सुदैवं, श्रीः *f.*, लक्ष्मीः *f.*, शर्म *n.* (न्), सम्पद्, सम्पत्तिः *f.*, पुण्योदयः.

GOOD-FRIDAY, *s.* ख्रीष्टस्य क्रूशारोपणमुद्दिश्य महोपवासदिनं.

GOOD-HUMOUR, *s.* सद्भावः, सुखभावः, सुशीलता, चित्तप्रसन्नता, सत्प्रकृतिः *f.*

GOOD-HUMOURED, *a.* सुप्रकृतिः -तिः -ति, सत्प्रकृतिः -तिः -ति, हृद्यभावः -वा -वं, हृद्यचित्तः -त्ता -त्तं, प्रसन्नस्वभावः -वा -वं.

GOOD-HUMOUREDLY, *adv.* सद्भावेन, सुखभावात्, सुशीलवत्, हृद्यवत्.

GOOD-LOOKING, *a.* सुदृश्यः -श्या -श्यं, सुदर्शनः -ना -नं, सुरूपः -पी -पं.

GOOD-LUCK, *s.* सौभाग्यं. *See* GOOD-FORTUNE.

GOOD-MANNERS, *s.* विनयः, विनीतता, मर्य्यादा, सुशीलता, सभ्यता, सदाचारता, सुनीतिः *f.*, सुचरित्रं, सच्चरित्रं.

GOOD-NATURE, *s.* सद्भावः, सुखभावः, सुप्रकृतिः *f.*, सत्प्रकृतिः *f.*, सुशीलता, साधुशीलत्वं, साधुत्वं, आर्यता.

GOOD-NATURED, *a.* सुप्रकृतिः -तिः -ति, सत्प्रकृतिः -तिः -ति, सुशीलः -ला -लं, सुभाववान् -वती -वत् (त्), साधुशीलः -ला -लं, सुहृदयः -या -यं, सुहृदयवान् &c.

GOOD-SENSE, *s.* सुविवेकः, सुबोधः, बुद्धिमत्त्वं, विज्ञता, प्रज्ञता.

GOOD-WILL, *s.* हितता, सुहितता, हितेच्छा, प्रीतिः *f.*, हितकाम्या, सौहृद्यं प्रियता, अनुकूलता.

GOOD-WOMAN, *s.* गृहिणी, गृहमेधिनी, गृह्यापारकुशला or -दक्षा.

GOODLINESS, *s.* रूपलावण्यं, सौन्दर्य्यं, शोभा, चारुता, रूपवत्त्वं.

GOODLY, *a.* (Graceful) सुन्दरः -रा -री -रं, चारुः -रुः -रुः, सुदृश्यः -श्या -श्यं, सुदर्शनः -ना -नं, सुरूपः -पी -पं, लावण्यवान् -वती -वत् (त्).—(Pleasant) रम्यः -म्या -म्यं, रमणीयः -या -यं, रुचिरः -रा -रं.

GOODMAN, *s.* गृही *m.* (न्), गेही *m.* (न्), कुटुम्बी *m.* (न्), स्वामी *m.* (न्).

GOODNESS, *s.* (Excellence) साधुता -त्वं, सत्त्वं, प्रशस्तता, प्राशस्त्यं, प्रशस्तिः *f.*, उत्तमता, श्रेष्ठता, उत्कृष्टता, सारत्वं, प्रकृष्टता, विशिष्टता, कौशलं, सौष्ठवं, आर्य्यता.—(Virtue, piety) पुण्यता, पुण्यशीलता, साधुशीलता, धर्म्मित्वं, सदाचारता, साधुवृत्तत्वं, धार्म्मिकत्वं, देवभक्तिः *f.*—(Kindness) सुजनत्वं, सौजन्यं, प्रियता, दया, कृपा.

GOODS, *s. pl.* (Property, effects) द्रव्यं, द्रव्याणि *n. pl.*, वस्तूनि *n. pl.*, विभवः, सामग्री -ग्र्यं, रिक्थं.—(Moveable household furniture) अस्थावरद्रव्याणि *n. pl.*, गृहोपस्करादि *n.*, गृहोपकरणानि.—(Merchandise) भाण्डानि *n. pl.*, भाण्डकं, पण्यं, पण्यानि *n. pl.*, विट्पण्यं.

GOOSE, *s.* हंसः -सी, राजहंसः -सी, वरटः -टा -टी, वरला, चक्राङ्गः -ङ्गी, श्वेतपत्रः, श्वेतच्छदः, श्वेतगरुत् *m.*, सितपक्षः, शितिच्छदः, शितिपक्षः, जालपाद् *m.*, नीलाक्षः, मानसालयः, मानसौकाः *m.* (स्), मक्षुगमना, भारद्वाराष्ट्रः, पुरुदंशकः, मक्षिकः, शाकयः, सरःकाकः -की, कलहंसः -सी; 'ruddy goose,' चक्रः, चक्रवाकः, रथाङ्गः, कोकः, द्वन्द्वचरः -चारी; 'wild goose,' चक्राङ्गी; 'tame goose,' ग्राम्यहंसः.—(Fool) मूर्खः, निर्बुद्धिः *m.*

GOOSEBERRY, *s.* काण्टकितगुल्मोत्पन्नं अम्लफलं.

GOOSEBERRY-FOOL, *s.* क्षीरेण सह क्वथितः पूर्व्वोक्तफलरसः.

GOR-BELLIED, *a.* महोदरः -रा -रं, स्थूलोदरः -रा -रं, लम्बोदरः -रा -रं, तुन्दी -न्दिनी -न्दि (न्), बृहत्कुक्षिः -क्षिः -क्षि, पृथुनाभिः -भिः -भि.

GOR-BELLY, *s.* महोदरं, स्थूलोदरं, बृहत्तुन्दं, बृहत्कुक्षिः *m.*

GORE, *s.* (Blood) रक्तं, असृक् *n.* (ज्), लोहितं, रुधिरं, शोणितं, क्षतजं. —(Clotted blood) घनरक्तं, घनलोहितं, रक्तगुल्मः.—(Triangular piece of cloth sewed into a garment to widen it) वस्त्रपृथुकरणार्थं तन्निवेशितम् त्र्यस्राकारः पटखण्डः.

To GORE, *v. a.* (Pierce with a pointed instrument) शूलादिना त्वचं भिद् (c. 7. भिनत्ति, भेत्तुं) or निर्भिद् or छिद् (c. 7. छिनत्ति, छेत्तुं) or व्यध् (c. 4. विध्यति, व्यद्धुं).—(With the point of a horn) शृङ्गाग्रेण त्वचं निर्भिद् or व्यध्.

GORED, *p. p.* छिन्नत्वक् *m. f. n.*, क्षतचर्म्मा -र्म्मी -र्म्म (न्), विदारितत्वक् *m. f. n.*, उल्लिखितचर्म्मा &c., विद्धः -द्धा -द्धं.

GORGE, *s.* (Gullet) निगरणः, अन्नवाहिस्रोतस् *n.*, गलः, कण्ठः.—(Defile between mountains) सङ्कटं, सङ्कटपथः, दुर्गमागः, कन्दरः -री, पर्व्वतरन्ध्रं, रन्ध्रं, सचरः, सञ्चारः, पर्व्वतमध्ये सञ्चारपथः.

To GORGE, *v. a.* (Swallow) गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, ग्रस् (c. 1. ग्रसते -सितुं).—(Fill with food) अन्नेन पॄ (c. 10. परयति -यितुं), or परिपॄ or अत्यर्थं तृप् (c. 10. तर्पयति -यितुं).

To GORGE, *v. n.* अन्नेन पॄ in pass. (पूर्य्यते) or अत्यर्थं पॄ.

GORGED, *p. p.* अन्नपूरितः -ता -तं, अतिपूरितः -ता -तं, अतितृप्तः -प्ता -प्तं.

GORGEOUS, *a.* तेजस्वी -स्विनी -स्वि (न्), तैजसः -सी -सं, महाप्रतापः -पा -पं, प्रतापी -पिनी -पि (न्), प्रतापवान् -वती -वत् (त्), अतिशोभनः -ना -नं, सुप्रभः -भा -भं, शुभः -भा -भं, उज्ज्वलः -ला -लं, स्पर्धी -र्धिनी -र्धि (न्).

GORGEOUSLY, *adv.* अतितेजसा, महाप्रतापेन, अतितैजसं, सुप्रभं.

GORGEOUSNESS, *s.* अतितेजस् *n.*, सुप्रतापः, अतिशोभा, सुप्रभा, उज्ज्वलता.

GORGET, *s.* ग्रीवात्राणं, गलत्राणं, कण्ठावरणं, अर्द्धचन्द्राकृति कवचं.

GORGING, *s.* निगरणं, ग्रसनं, अत्याहारः, अतिभोजनं, अन्नपूरणं.

GORGON, *s.* सर्पाकारकेशविशिष्टा भयङ्करमूर्त्तिः स्त्री.

GORMAND, *s.* अत्याहारी *m.* (न्), अतिभोजी *m.* (न्). *See* GOURMAND.

To GORMANDIZE, *v. n.* अत्यर्थं भुज् (c. 7. भुनक्ति, भोक्तुं), अत्याहारं कृ, अतिभोजनं कृ.

GORMANDIZER, *s.* अत्याहारी *m.* (न्), बह्वाशी *m.* (न्), अतिभोजी *m.* (न्), अतिबुभुक्षुः *m.*, भक्षकः, घस्मरः, अक्षरः, कुक्षिम्भरिः *m.*, उदरम्भरिः *m.*, पात्रसमितः.

GORMANDIZING, *s.* अत्याहारः, अतिभोजनं, घस्मरता, बह्वाशित्वं, गृध्नता.

GORY, *a.* रक्तविलिप्तः -प्ता -प्तं, रक्ताक्तः -क्ता -क्तं, असृग्लिप्तः -प्ता -प्तं, रक्तगुल्ममयः -यी -यं, रक्तमलिनः -ना -नं.

GOSHAWK, *s.* अतिगृध्रशीलः श्येनभेदः, श्येनकः.

GOSLING, *s.* हंसशावकः, वरटशावकः, हंसशिशुः *m.*

GOSPEL, *s.* सुसंवादः, मङ्गलसंवादः, मङ्गलसमाचारः, सुवार्त्ता, शुभवार्त्ता

GOSPELER, *s.* ख्रीष्टसमाचाररचकः, सुसंवादलेखकः, सुसंवादप्रचारकः, ख्रीष्टीयधर्म्मप्रवक्ता *m.* (क्तृ).

To GOSPELIZE, *v. a.* सुसंवादं प्रचर् in caus. (-चारयति -यितुं).

GOSSAMER, *s.* ग्रीष्मसमये वायुप्रेरिता मकटवासतन्तवः *m. pl.*, वाततूलं.

GOSSIP, *s.* (Tattler) जल्पकः, जल्पाकः, उपजल्पी *m.* (न्), परार्थवादी *m.* (न्), परकार्य्यचर्च्चकः, वावदूकः, प्रलापी *m.* (न्), गायनः.—(Tattle) जल्पितं, जल्पः, प्रजल्पः, प्रलापः.—(Tippling companion) सहपायी *m.* (न्), पानमित्रं.

To GOSSIP, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), प्रलप् (c. 1. -लपति -पितुं), संलप्, अनर्थैककथां कृ, वृथाकथां कृ, कथोपकथनं कृ.

GOSSIPING, *s.* जल्पः -ल्पनं, जल्पितं, प्रजल्पः, संलापः, वाक्चापल्यं, जालस्यवचनं, गायनं, निरर्थैककथा, वावदूकता, वाचालता.

GOT, GOTTEN, *p. p.* प्राप्तः -प्ता -प्तं, अवाप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, अधिगतः -ता -तं, आसादितः -ता -तं, आपन्नः -न्ना -न्नं, प्रपन्नः -न्ना -न्नं.

GOUGE, *s.* अर्द्धचन्द्राकारफलको व्रश्चनविशेषः, तक्षणी.

To GOUGE, *v. a.* (The eye) लोचनम् उत्पद् (c. 10. -पाटयति -यितुं).

GOURD, *s.* अलाबूः *f.*, अलाबुः *f.*, आलाबुः, लाबुः, तुम्बी -म्बिः *f.*, तुम्बः -म्बकः -कं, चिच्चिका, सुपर्णी, कुष्माण्डकः, कूष्माण्डकः, कर्कारुः *m.*, कर्कटः; 'bitter gourd,' तिक्तिका, कटुतुम्बी, इक्ष्वाकुः *f.*

GOURMAND, *s.* अत्याहारी *m.* (न्), बहुभक्षकः, बहुभोजी *m.* (न्), भक्षकः, कुक्षिम्भरिः *m.*, उदरम्भरिः *m.*, लौदरिकः.

GOUT, *s.* वातः, वातरोगः, वातव्याधिः *m.*, वातगुल्मः, वातरक्तं, वातपुडा, वातशोणितं, पादशोथः, पादगण्डिरः, पादवल्मीकं.

GOUTINESS, *s.* वातुलता, वातूलत्वं, वातिकत्वं, सवातत्वं.

GOUTY, *a.* वातकी -किनी -कि (न्), वातरोगी -गिणी -गि (न्), वातुलः -ला -लं, वातूलः -ला -लं, वातग्रस्तः -स्ता -स्तं, वातिकः -की -कं, वातासहः -हा -हं.

To GOVERN, *v. a.* शास् (c. 2. शास्ति, शासितुं), अनुशास्, प्रशास्, समनुशास्, यम् (c. 1. यच्छति, यन्तुं), नियम्, संयम्, विनियम्, सन्नियम्, ईश् (c. 2. ईष्टे, ईशितुं), पाल् (c. 10. पालयति -यितुं), परिपाल्, विनी (c. 1. -नयति -नेतुं), प्रणी, वशीकृ, विधा (c. 3. -दधाति -धातुं), अध्यास् (c. 2. -आस्ते -आसितुं), गुप् (c. 1. गोपायति, c. 10. गोपयति -यितुं).—(Keep in subjection, restrain) वशीकृ, यम्, विनियम्, संयम्, नियह्, (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, संह (c. 1. -हरति -हर्त्तुं), दम् (c. 10. दमयति -यितुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), नियन्त्र्; 'to govern a country well,' राष्ट्रं सम्यक् पाल्; 'governing noun,' अन्वयी *m.* (न्).

To GOVERN, *v. n.* राज्यं कृ, राज्याधिकारं कृ, राज्यपालनं कृ, राज्यशासनं कृ, राजकार्य्यं कृ, राज्यव्यवहारं कृ, आधिपत्यं कृ.

GOVERNABLE, *a.* शास्यः -स्या -स्यं, शासनीयः -या -यं, वश्यः -श्या -श्यं, विधेयः -या -यं, प्रणेयः -या -यं, विनेयः -या -यं, विनीतः -ता -तं, आज्ञाधीनः -ना -नं.

GOVERNANCE, *s.* शासनं, शास्तिः *f.*, अनुशासनं, पालनं, प्रतिपालनं, आधिपत्यं, अधिकारः, नीतिः *f.*, विनयः, वशः, वशिता, संयमः, विनियमः, यमः.

GOVERNED, *p. p.* शासितः -ता -तं, अनुशासितः -ता -तं, प्रशासितः -ता -तं, पालितः -ता -तं, वशीकृतः -ता -तं, संयतः -ता -तं, विनियतः -ता -तं, नियमितः -ता -तं, निगृहीतः -ता -तं; 'governed by another,' पराधीनः -ना -नं, परतन्त्रः -त्रा -त्रं.

GOVERNESS, *a.* बालाध्यापका, बालोपदेशिका, बालोपदेशिनी, शिक्षाकरी.

GOVERNMENT, *s.* (Administration of government) राज्यं, राज्याधिकारः, राज्यधुरा, राजधुरा, राज्यनीतिः *f.*, राज्यपालनं, राज्यव्यवहारः, नीतिः *f.*, वैशस्त्रं.—(Control, regulation) शासनं, शास्तिः *f.*, अनुशासनं, वशः -शं, यमः, संयमः, विनियमः, नियहः, दमः -मनं, यन्त्रणं.—(Authority) अधिकारः, अधीकारः, आधिपत्यं, प्रभुत्वं, ईशत्वं, ऐश्वर्य्यं.—(Empire) राज्यं, राजत्वं, आधिपत्यं.—(The king's ministers) राजधुर्वहाः *m. pl.*, राजमन्त्रिणः *m. pl.*, राजसचिवाः *m. pl.*; 'form of government,' राज्यरीतिः *f.*, राज्यविधिः *m.*; 'government affairs,' राज्यव्यवहारः, राजकार्य्यं; 'good government,' सम्यक् पालनं; 'bad government,' असम्यक् पालनं.

GOVERNOR, *s.* अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अधिकारी *m.* (न्), अध्यक्षः, अधिपः, शासिता *m.* (तृ), प्रशासिता *m.*, शास्ता *m.*, शासकः, अनुशासकः, अधिकृतः, ईशिता *m.* (तृ), ईश्वरः, ईशः, पालयिता *m.* (तृ), नियन्ता *m.* (न्तृ), राट्टियः.

GOVERNORSHIP, *s.* आधिपत्यं, अधिष्ठातृत्वं, अध्यक्षता, अधिकारिता.

GOWN, *s.* शाटी, शाटकः, स्त्रीकटीवस्त्रं, कटिवस्त्रं, कटीपटः, पटवासः. चोटी, चलनकं.

GOWNED, *a.* सशाटकः -का -कं, कटिपरिधृतवेष्टितः -ता -तं.

GOWNSMAN, *s.* परिधृतवेशधारी *m.* (न्), परिधृतवेशः.—(In an university) राजविद्यालये अनेवासिवेशधारी *m.* (न्).

GRAB, *s.* ग्रहः, ग्रहणं, सङ्ग्रहः -हणं, सङ्ग्राहः, धरणं, धृतिः *f.*

GRABBED, *p. p.* अकस्मात् सङ्गृहीतः -ता -तं or धृतः -ता -तं.

To GRABBLE, *v. n.* (Grope) परामृश् (c. 6.- मृशति -मर्ष्टुं).—(Lie prostrate on the belly) उदरेण भूमिं गम् (c. 1. गच्छति, गन्तुं), शिश्नदेहः -हा -हं भू, अवमूर्द्धशयः -या -यं भू.

GRACE, *s.* (Favor) प्रसादः, अनुग्रहः, दया, कृपा, अनुकम्पा, प्रसन्नता, अनुकूलता, अनुरोधः.—(Good-will, kindness) प्रीतिः *f.*, प्रियता, हितता, हितेच्छा.—(Beauty, elegance) शोभा, लावण्यं, विलासः, चारुता, सौन्दर्यं, विनीतता, लालित्यं, श्रीः *f.*—(Pardon) क्षमा, पापशोधनं, पापमार्जनं, निष्कृतिः *f.*—(Blessing before or after meat) भोजनात् पूर्वं परं वा धन्यवादः.—(Goddess of beauty) श्रीदेवता, श्रीः *f.*

To GRACE, *v. a.* शुभ् (c. 10. शोभयति -यितुं), उपशुभ्, अलङ्कृ, समलङ्कृ, भूष् (c. 10. भूषयति -यितुं), विभूष्, शोभां कृ or दा, मन् (c. 10. मानयति -यितुं).

GRACED, *p. p.* शोभितः -ता -तं, उपशोभितः -ता -तं, कृतशोभः -भा -भं.

GRACEFUL, *a.* विलासी -सिनी -सि (न्), चारुः -रुश्री -रु, लावण्यवान् -वती -वत् (त्), सुन्दरः -रा -री -रं, सुरूपः -पी -पं, सुललितः -ता -तं, ललितः -ता -तं, विनीतः -ता -तं, लीलावान् -वती -वत् (त्), शुभगः -गा -गं, सुगः -गा -गं; 'graceful walk,' शुभगतिः *f.*, सुगतिः *f.*; 'graceful speech,' वाग्विलासः; 'having a graceful gait,' शुभगतिः -तिः -ति.

GRACEFULLY, *adv.* सविलासं, विलासेन, विलासतया, सलावण्यं, लावण्येन, सुन्दरं, सौन्दर्येण, सुललितं, विनीतं, चारु.

GRACEFULNESS, *s.* चारुता, सौन्दर्यं, लावण्यं, रूपलावण्यं, विलासः -सिता, लालित्यं, सुलालित्यं, विनीतता -त्वं, रूपवत्त्वं, शोभा, श्रीः *f.*, वामता, सुरूपत्वं.

GRACELESS, *a.* अनार्दृष्टभावः -वा -वं, दुराचारः -रा -रं, मन्दचरित्रः -त्रा -त्रं, नष्टभावः -वा -वं, अतिदुष्टः -ष्टा -ष्टं, ईश्वरप्रमादबहिष्कृतः -ता -तं.

GRACELESSNESS, *s.* अनार्दृष्टता, अतिदुष्टता, दुराचारता, नष्टता.

GRACIOUS, *a.* प्रसन्नः -न्ना -न्नं, सुप्रसन्नः -न्ना -न्नं, अनुग्राही -हिणी -हि (न्), अनुकूलः -ला -लं, आनुग्राहकः -की -कं, प्रसादितः -ता -तं, अनुकम्पी -म्पिनी -म्पि (न्), दयावान् -वती -वत् (त्), दयाशीलः -ला -लं, दयालुः -लुः -लु, कृपावान् &c., सानुकम्पः -म्पा -म्पं, हितः -ता -तं, हितबुद्धिः -द्धिः -द्धि, सानुक्रोशः -शा -शं, कृपालुः -लुः -लु, उपकारी -रिणी -रि (न्), उपकारकः -का -कं, भक्तवत्सलः -ला -लं; 'be thou gracious,' प्रसीद.

GRACIOUSLY, *adv.* प्रसन्नं, सुप्रसन्नं, प्रसादेन, सप्रसादं, अनुग्रहेण, सानुग्रहं, अनुकूलं, सानुकूल्यं, सानुकम्पं, कृपया, दयया, हितेच्छया.

GRACIOUSNESS, *s.* प्रसन्नता, सुप्रसन्नता, प्रसादः, अनुग्रहः, अनुकूलता, आनुकूल्यं, अनुकम्पा, दयालुत्वं, कृपालुत्वं -ता, हितता, हितबुद्धित्वं, सानुकम्पता.

GRADATION, *s.* क्रमः -मणं, अनुक्रमः -मण, पर्य्यायः, आनुपूर्व्यं, आनुपूर्व्ये -र्व्यी -र्व्यकं, परम्परा, अन्वयः, समन्वयः, उत्तरोत्तरं, अल्पाल्पता, अनुयायित्वं; 'in regular gradation,' यथाक्रमं, क्रमशस्, अनुपूर्व्यशस्, क्रमे क्रमे, पर्य्यायेण.

GRADE, *s.* क्रमः, पदं, पदवि: *f.* -वी, आस्पदं, अवस्था; 'highest grade,' परमपदं.

GRADIENT, *a.* (Moving by steps) क्रमन् -मनी -मत् (त्), क्रमगामः -गा -गं.—(Rising and descending) उन्नतानतः -ता -तं; 'gradients,' पातोत्पाताः *m. pl.*

GRADUAL, *a.* क्रमकः -का -कं, क्रमिकः -का -कं, अल्पाल्पः -ल्पा -ल्पं, उत्तरोत्तरः -रा -रं, आनुक्रमिकः -की -कं, आनुपदिकः -की -कं, अनुपूर्व्यः -र्व्वी -र्व्वं, आनुपूर्व्विकः -की -कं.

GRADUALLY, *adv.* क्रमशस्, क्रमतस्, क्रमेण, क्रमे क्रमे, पदे पदे, पदशस्, प्रतिपदं, अनुपदं, पदात्पदं, शनैः, शनैः शनैः.

To GRADUATE, *v. a.* राजविद्यालये पदं प्राप् in caus. (-आपयति -यितुं) or पदे नियुज् (c. 7. -युंक्ते -योक्तुं).—(Mark with degrees) आनुक्रमिकचिह्नैर् अङ्क् (c. 10. अङ्कयति -यितुं), अनुक्रमेण चिह्नैर् अङ्क्, क्रमकलेखैर् अङ्क्.

To GRADUATE, *v. n.* (Receive a degree at an university) राजविद्यालये पदं प्राप् (c. 5. -आप्नोति -आप्तुं).

GRADUATE, *a.* महाविद्यालये पदप्राप्तः or पदयुक्तः or पदवान् *m.* (त्).

GRADUATED, *p. p.* राजविद्यालये पदयुक्तः -क्ता -क्तं.—(Marked with degrees) आनुक्रमिकचिह्नैर् अङ्कितः -ता -तं, आनुक्रमिकलेखाङ्कितः -ता -तं.

GRADUATION, *s.* अनुक्रमः -मणं, क्रमः -मणं, पर्य्यायः, आनुपूर्व्यं.—(Marking with degrees) आनुक्रमिकचिह्नाङ्कनं, आनुक्रमिकलेखाङ्कनं.

GRAFT, *s.* वृक्षशाखानिवेशितो भिन्नवृक्षपल्लवः -वं or भिन्नवृक्षकिसलयः.

To GRAFT, *v. a.* एकवृक्षशाखायां भिन्नवृक्षपल्लवं निविश् (c. 10. -वेशयति -यितुं), एकवृक्षपल्लवं भिन्नवृक्षपल्लवेन संयुज् (c. 10. -योजयति -यितुं) or संलग्नीकृ.

GRAFTED, *p. p.* भिन्नवृक्षशाखानिवेशितः -ता -तं, भिन्नवृक्षविटपसंयुक्तः -क्ता -क्तं.

GRAFTING, *s.* एकवृक्षशाखायां भिन्नवृक्षपल्लवनिवेशनं.

GRAIN, *s.* (Seed of corn) धान्यं, धान्यादि *n.*—(Corn in general) शस्यं, सीत्यं, गारित्रः, सस्यकरिः *m.*, बीजरुहः, जीवसाधनं.—(Seed) बीजं -जकं.—(A particle) कणः -णिकः -का, लवः, लेशः, अणुः *m.*, रेणुः *m.*; 'a grain of rice,' तण्डुलकणः.—(Seed used as a weight) काकिणी.—(Vein of wood) काष्ठरेखा, काष्ठलेखा, काष्ठशिरा; 'against the grain,' प्रतिलोमः -मा -मं, प्रतीपः -पा -पं; 'with the grain,' अनुलोमः -मा -मं; 'grain freed from chaff,' धान्यास्थि; 'fried grain,' लाजा -जाः *m. pl.*, अक्षतं; 'wetted grain,' लाजः.

To GRAIN, *v. a.* काष्ठरेखानुकारेण चित्र् (c. 10. चित्रयति -यितुं) or चित्रीकृ.

GRAINED, *p. p.* or *a.* (Painted in imitation of the fibres of wood) काष्ठरेखासमवर्णेन चित्रितः -ता -तं or लिखितः -ता -तं, दारुरेखानुकृतवर्णः -र्णा -र्णं

GRAINY, *a.* धान्यमयः -यी -यं, शस्यमयः -यी -यं, धान्यवान् -वती -वत् (त्).

GRAMINEOUS, *a.* तृणमयः -यी -यं, तृणमः -सा -सं, शाद्वलः -ला -लं.

GRAMINIVOROUS, *a.* तृणभक्षकः -का -कं, तृणखादकः -का -कं, तृणभोजी -जिनी -जि (न्), तृणजम्भः -म्भा -म्भं, घासादः -दा -दं, घासाहारी -रिणी -रि (न्).

GRAMMAR, *s.* व्याकरणं, व्याकृतिः *f.*, व्याकरणशास्त्रं, शब्दशास्त्रं, शास्त्रचक्षुस् *n.*, व्युत्पत्तिः *f.*, व्युत्पत्तिवादः, शब्दव्युत्पत्तिः *f.*, शब्दशुद्धिः *f.*

GRAMMAR-SCHOOL, *s.* व्याकरणशिक्षाशाला, व्याकरणपाठशाला.

GRAMMARIAN, *s.* वैयाकरणः, वैयाकरणीयः, व्याकरणशास्त्रज्ञः, शब्दशास्त्रज्ञः, व्याकरणज्ञः, व्याकरणाध्यापकः, शाब्दिकः, व्याकरणव्युत्पन्नः.

GRAMMATICAL, *a.* वैयाकरणः -णी -णं -णीयः -या -यं, शाब्दिकः -की -कं, व्याकरणसम्बन्धी -न्धिनी -न्धि (न्).—(According to grammar) व्याकरणानुसारी -रिणी -रि (न्), व्याकरणाविरुद्धः -द्धा -द्धं; 'grammatical accuracy,' शब्दशुद्धिः *f.*

GRAMMATICALLY, *adv.* व्याकरणानुकारेण, व्याकरणाविरोधेन, शब्दशास्त्रवत्.

GRANARY, *s.* कुशूलः, धान्यागारं, शस्यागारं, व्रीह्यगारं, अन्नकोष्ठः -ष्ठकं, कोष्ठकं, कण्डोलः -लकः, कण्डालः, पिटः, कूदरः, मरारः.

GRAND, *a.* (Great) महान् -हती -हत् (त्), बृहत् -हती -हत् (त्).—(Splendid) प्रतापी -पिनी -पि (न्), प्रतापवान् -वती -वत् (त्), सुप्रभः -भा -भं, तेजसः -सी -सं, तेजस्वी -स्विनी -स्वि (न्), उज्ज्वलः -ला -लं.—(Principal) प्रधान in comp., प्रमुखः -खा -खं, मुख्यः -ख्या -ख्यं, ज्यैष्ठः -ष्ठा -ष्ठं, अग्र्यः -ग्रा -ग्र्यं, अग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, उत्तमः -मा -मं.—(Noble) उत्कृष्टः -ष्टा -ष्टं.

GRANDAM, *s.* मातामही, पितामही.—(Old woman) वृद्धा स्त्री, जरिणी.

GRANDCHILD, *s.* पुत्रसुतः -ता, पुत्रात्मजः -जा, पौत्रः -त्री, दौहित्रः -त्री.

GRANDDAUGHTER, *s.* पौत्री, नप्त्री, पुत्रसुता, पुत्रपुत्री, सुतात्मजा, पुत्रात्मजा.—(Daughter's daughter) दौहित्री, पुत्रिकासुता; 'great granddaughter,' प्रपौत्री, प्रतिनप्त्री.

GRANDEE, *s.* कुलीनजनः, कुलश्रेष्ठी *m.* (न्), राजन्यः, उच्चपदस्थः, उत्कृष्टपदस्थः, सत्कुलीनः, अभिजनवान् *m.* (त्).

GRANDEUR, *s.* (Greatness) महत्त्वं, महिमा *m.* (न्), बृहत्त्वं.—(Splendor, dignity) प्रतापः, विभूतिः *f.*, वैभवं, तेजस् *n.*, उज्ज्वलता, सुप्रभता, ओजस्विता, प्रभावः, ऐश्वर्यं, सम्पत्तिः *f.*—(Nobleness, elevation) माहात्म्यं, औदार्यं, उदारता, उत्कर्षः, उत्कृष्टता, श्रेष्ठत्वं.

GRANDEVITY, *s.* चिरजीवः -वा -वितं, दीर्घवयस्कत्वं, वृद्धता.

GRANDEVOUS, *a.* चिरजीवी -विनी -वि (न्), दीर्घजीवी &c., दीर्घायूः -युः -युः (स).

GRANDFATHER, *s.* (Paternal) पितामहः, पितृपिता *m.* (तृ).—(Maternal) मातामहः, मातृपिता *m.* (तृ), आर्य्यकः; 'great grandfather,' प्रपितामहः, प्रमातामहः; 'great great grandfather,' वृद्धप्रपितामहः, 'great great grandmother,' वृद्धप्रमातामहः.

GRANDILOQUENCE, *s.* गर्व्वितवाक्यं, अतिशयोक्तिः *f.*, असत्यिः *f.*, चित्रोक्तिः *f.*, दर्पवाक्यं, दर्पोद्भावितवचनं.

GRANDILOQUENT, *a.* गर्व्वितवाक्यः -क्या -क्यं, उच्चवादी -दिनी -दि (न्).

GRANDINOUS, *a.* करकामयः -यी -यं, शिलावृष्टिमान् -मती -मत् (त्).

GRANDLY, *adv.* तेजसा, प्रतापेन, सप्रतापं, सुप्रभं, विभूत्या, वैभवेन, ऐश्वर्य्येण, उज्ज्वलं, उत्कर्षेण, उत्कृष्टं, श्रेष्ठं, प्रभावेण.

GRANDMOTHER, *s.* (Paternal) पितामही, पितृमाता *f.* (तृ), पितृप्रसूः *f.*—(Maternal) मातामही, मातृमाता *f.* (तृ); 'great grandmother,' प्रपितामही, प्रमातामही.

GRAND-NEPHEW, *s.* भ्रातृपौत्रः, भ्रातृनप्ता *m.* (तृ), स्वसृपौत्रः, स्वसृनप्ता *m.*

GRANDNESS, *s.* महत्त्वं, महिमा *m.* (न्), वैभवं, प्रतापः. *See* GRANDEUR.

GRAND-NEICE, *s.* भ्रातृपौत्री, भ्रातृनप्त्री, स्वसृनप्त्री, स्वसृपौत्री.

GRANDSIRE, *s.* पितामहः, मातामहः, आर्य्यकः, पितृपिता *m.* (तृ).

GRANDSON, *s.* (Son's son) पौत्रः, नप्ता *m.* (तृ), पुत्रसुतः, पुत्रपुत्रः, सुतात्मजः, पुत्रात्मजः.—(Daughter's son) दौहित्रः, पुत्रिकापुत्रः, पुत्रिकासुतः; 'great grandson,' प्रपौत्रः, प्रतिनप्ता *m.* (तृ); 'great great grandson,' परप्रपौत्रः, परप्रतिनप्ता *m.* (तृ), परम्परः.

GRANGE, *s.* क्षेत्रं, भूमिः *f.*, क्षेत्रभूमिः *f.*, क्षेत्रिकगृहादि *n.*

GRANITE, *s.* पाषाणसंज्ञकः सुदृढप्रस्तरविशेषः.

GRANIVOROUS, *a.* शस्यभक्षकः -का -कं, शस्यादः -दा -दं, धान्यभुक् *m. f. n.*

GRANT, *s.* प्रदानं, सम्प्रदानं, दानं, दत्तं, प्रदा, वितरणं, विसर्जनं, उत्सर्गः, उत्सर्जनं, दायः, विहापितं; 'grant of maintenance,' वृत्तिदानं; 'a written grant,' लेखपत्रं, सम्पत्तिपत्रं; 'a royal grant,' शासनं, शासनपत्रं, पट्टः; 'grant of property,' निबन्धः -न्धनं; 'grant of safe conduct,' अभयप्रदानं.

To GRANT, *v. a.* (Give, confer) दा (c. 3. ददाति, c. 1. यच्छति, दातुं), प्रदा, अनुदा, वितॄ (c. 1. -तरति -रितुं -रीतुं), प्रतिपद् (c. 10. -पादयति -यितुं), दिश् (c. 6. दिशति, देष्टुं), उपकृ, उपाकृ.—(Admit) स्वीकृ, स्वीकारं कृ, अङ्गीकृ, ग्रह् (c. 9. गृह्णाति, गृहीतुं), अनुग्रह्.—(Allow) अनुज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), अभ्यनुज्ञा, अनुमन् (c. 4. -मन्यते -मन्तुं).

GRANTED, *p. p.* प्रदत्तः -त्ता -त्तं, प्रत्तः -त्ता -त्तं, दत्तः -त्ता -त्तं, वितीर्णः -र्णा -र्णं, स्वीकृतः -ता -तं, अङ्गीकृतः -ता -तं, अनुज्ञातः -ता -तं, अनुमतः -ता -तं; 'be it so,' भवतु, ध्वमस्तु, अस्त्वेवं.

GRANTEE, *s.* दानग्रहीता *m.* (तृ), आदाता *m.* (तृ), दानभोगी *m.* (न्).

GRANTOR, *s.* दाता *m.* (तृ), दानकर्त्ता *m.* (र्तृ), उत्सर्गकर्त्ता *m.*

GRANULAR, GRANULARY, *a.* बीजमयः -यी -यं, शस्यबीजाकारः -रा -रं.

To GRANULATE, *v. a.* बीजाकारं -रां -रं कृ, क्षुद्रपिण्डीकृ, शस्यबीजाकारेण घनीकृ or सान्द्रीकृ or संहतीकृ or खण्डीकृ.

To GRANULATE, *v. n.* बीजाकारपिण्डान् बन्ध् (c. 9. बध्नाति, बन्धुं). बीजाकारीभू, सूक्ष्मपिण्डीभू, शस्यबीजाकारेण घनीभू.

GRANULATED, *p. p.* शस्यबीजाकारः -रा -रं.—(Sugar) खण्डमोदकः. शर्करा.

GRANULATION, *s.* बीजाकारपिण्डबन्धनं, क्षुद्रपिण्डबन्धनं.—(Of flesh) उत्मादनं, असृयं.

GRANULE, *s.* कणिका, बीजकं, लयः, अणुः *m.*, गुटिका, क्षुद्रगुटिका.

GRAPE, *s.* द्राक्षा, मृद्वीका, मृद्वी, स्वाद्वी, स्वादुरसा, मधुरसा, गोस्तनी -ना, रसा, रसाला, चारुफला, कापिशायनी, साव्दी, हरहूरा; 'made of grapes,' माद्वीकः -की -कं; 'juice of grapes,' द्राक्षारसः.

GRAPERY, *s.* द्राक्षारोहणयोग्यं गृहं, द्राक्षावाटिका.

GRAPE-SHOT, *s.* युद्धनाडेः प्रक्षेपणीयो द्राक्षाफलरूपेण पिण्डीभूतो गुलिकासमूहः.

GRAPE-STONE, *s.* द्राक्षाबीजं -जकं, द्राक्षाफलस्य अस्थिः *f.* or अष्ठीला.

GRAPHIC, GRAPHICAL, *a.* सुचित्रितः -ता -तं, सुवर्णितः -ता -तं, सुनिर्दिष्टः -ष्टा -ष्टं, सुलिखितः -ता -तं, सुकथितः -ता -तं, सुनिर्देशकः -का -कं.

GRAPHICALLY, *adv.* सुवर्णनेन, सुनिर्देशेन, सुविवरणेन, सुचित्रितं, सुनिर्दिष्टं.

GRAPNEL, *s.* चतुर्दन्तयुक्तो लङ्गरविशेषः, चतुर्दन्तयुक्तम् आकर्षणयन्त्रं, आकर्षणी -र्षिणी.

To GRAPPLE, *v. a.* (Lay hold of, seize) सङ्गृह् (c. 9. -गृह्णाति -ग्रहीतुं), उपसङ्गृह्, धृ (c. 1. धरति, धर्त्तुं), आकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं).

To GRAPPLE WITH, *v. n.* बाहुबाहवि or हस्ताहस्ति युध् (c. 4. युध्यते, योद्धुं), बाहुयुद्धे सङ्गम् (c. 1. -गच्छति -गन्तुं).

GRAPPLE, *s.* (Hold) सङ्ग्राहः, आग्रहः, धृतिः *f.*—(Close fight) बाहुयुद्धं.—(Hook) आकर्षणी -र्षिणी.

GRAPPLED, *p. p.* सङ्गृहीतः -ता -तं, धृतः -ता -तं, आकर्षितः -ता -तं.

GRAPPLING-IRONS, *s. pl.* लोहमयम् आकर्षणयन्त्रं, आकर्षणी -र्षिणी.

GRAPY, *a.* द्राक्षामयः -यी -यं, द्राक्षासरसः -सा -सं, द्राक्षोपमः -मा -मं.

GRASHOPPER, *s.* *See* GRASSHOPPER.

To GRASP, *v. a.* and *n.* ग्रह् (c. 9. गृह्णाति, गृहीतुं), सङ्गृह्, परिग्रह्, अभिग्रह्, उपसङ्गृह्, मुष्टिना ग्रह् or सङ्गृह्, धृ (c. 1. धरति, धर्त्तुं), ग्रस् (c. 1. ग्रसते -सितुं), परामृश् (c. 6. -मृशति -र्शितुं), चवलम्ब् (c. 1. -लम्बते -म्बितुं), सङ्ग्राहं कृ.—(Grasp at, try to seize) ग्रह् in des. (जिघृक्षति -ते -क्षितुं), दृ (c. 1. हरति, हर्त्तुं), संदृ, उपदृ, दृ in des. (जिहीर्षति -ते -र्षितुं); 'one who has grasped his sword,' गृहीतखड्गः.

GRASP, *s.* मुष्टिसङ्ग्राहः, ग्रहः -हणं, मुष्टिग्रहणं, सङ्गृहः, सङ्ग्राहः, हस्तग्रहः, आग्रहः, धृतिः *f.*, हस्तधृतिः *f.*, धरणं, चवलम्बनं, करालम्बनं; 'tightness of grasp,' दृढमुष्टिता; 'within the grasp,' ग्राह्यः -ह्या

-द्यं, ग्रहणीयः -या -यं.

GRASPED, *p. p.* गृहीतः -ता -तं, मुष्टिसङ्गृहीतः -ता -तं, मुष्टिसङ्ग्राहपीडितः -ता -तं, धृतः -ता -तं, ग्रस्तः -स्ता -स्तं, लग्नः -ग्ना -ग्नं, कुण्ठितः -ता -तं.

GRASPER, *s.* ग्राहकः, मुष्टिसङ्ग्राहकृत्, सङ्गृहीता *m.* (तृ), हस्ती *m.* (स्त्रिन्).

GRASPING, *s.* ग्रहणं, सङ्ग्राहः, सङ्ग्रहः, धृतिः *f.*, धरणं, हरणं.

GRASPING, *part.* or *a.* जिघृक्षुः -क्षुः -क्षु, जिहीर्षुः -र्षुः -र्षु, पुरोभागी -गिनी -गि (न्), ग्रहणशीलः -ला -लं.

GRASS, *s.* तृणं, घासः, वयसः, जवसः, शादः, अर्जुनं -नी, खटः, खेटं; 'sacrificial grass,' कुशः -शः, दर्भः, कुपः, पवित्रं; 'young grass,' बालतृणं, शष्पं; 'fragrant grass,' कत्तृणं, सौगन्धिकं, देवजग्धं -ग्धकं, पौरं, ध्यामं, रौहिषं; 'abounding with grass,' तृणपूर्णः -र्णा -र्णं, बहुतृणः -णा -णं, महाघासः -सा -सं.

To GRASS, *v. a.* तृणेन आच्छद् (c. 10. -छादयति -यितुं), सतृणं -र्णां -र्णं कृ.

GRASSHOPPER, *s.* शरभः, शलभः, पतङ्गः, त्रिशङ्कुः *m.*

GRASSINESS, *s.* सतृणत्वं, सघासत्वं, शाद्वलता, बहुघासत्वं.

GRASSLESS, *a.* तृणहीनः -ना -नं, अतृणः -णा -णं, तृणवर्जितः -ता -तं.

GRASS-PLOT, *s.* तृणावृतो भूमिभागः or भूप्रदेशः, सतृणस्थलं.

GRASSY, *a.* तृणमः -मा -सं, तृणमयः -यी -यं, सतृणः -णा -णं, तृणावृतः -ता -तं, तृणाच्छादितः -ता -तं, घासमयः -यी -यं, बहुघासः -सा -सं, बहुतृणः -णा -णं, महाघासः -सा -सं, शाद्वलः -ला -लं, माद्वलः -ला -लं.—(Green, verdant) हरितः -ता -तं, शादहरितः -ता -तं.

GRATE, *s.* (Fire-place) इध्मगुम्भिः *f.*, अङ्गारगुम्भिः *f.*, अङ्गारिणी, अग्निकुण्डं. चुल्ली, इध्मवारणी, अङ्गारवारणी, चितानं.—(Iron-lattice) लोहजालं, लोहजालकः, व्यत्यस्तलोहदण्डयुक्रम् अवरोधकं or व्यवधानं.

To GRATE, *v. a.* (Rub) घृष् (c. 1. घर्षति -र्षितुं), पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, मृद् (c. 9. मृद्नाति, मर्दितुं), सङ्घट्ट (c. 10. -घट्टयति -यितुं); 'to grate the teeth,' दन्तान् दन्तैर् घृष् or निष्पिष्.—(Fret, irritate) व्यध् (c. 10. व्यधयति -यितुं), बाध् (c. 1. बाधते -धितुं), तप् (c. 10. तापयति -यितुं), मर्म्माणि तुद् (c. 6. तुदति, तोत्तुं) or स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).—(Furnish with an iron lattice) लोहजालेन युज् (c. 10. योजयति -यितुं), व्यत्यस्तलोहदण्डैर् युज्.—(Reduce to powder by rubbing) घर्षणेन चूर्णीकृ or क्षोदीकृ.

To GRATE, *v. n.* परस्परघर्षणं कृ, परस्परघर्षणजं कर्कशशब्दं कृ.

GRATED, *p. p.* (Rubbed) घर्षितः -ता -तं, आघर्षितः -ता -तं, पिष्टः -ष्टा -ष्टं, चूर्णीकृतः -ता -तं, क्षोदितः -ता -तं.—(Furnished with a grating) लोहजालयुक्तः -क्ता -क्तं.

GRATEFUL, *a.* (Having a due sense of benefits) कृतज्ञः -ज्ञा -ज्ञं, कृतवेदी -दिनी -दि (न्), कृत्यवेदी -दिनी -दि (न्), उपकृतज्ञः -ज्ञा -ज्ञं, उपकारस्मर्त्ता -र्त्री -र्त्तृ (र्त्तृ), कृतोपकारस्य स्मर्त्ता &c., उपकृतस्मरन् -रन्ती -रत् (न्).—(Agreeable) रम्यः -म्या -म्यं, रमणीयः -या -यं, सुभगः -गा -गं, हृद्यः -द्या -द्यं.—(To the taste) सुस्वादः -दा -दं, सुरसः -सा -सं.

GRATEFULLY, *adv.* कृतज्ञवत्, उपकारस्मरणात्.—(Agreeably) रम्यं, सुभगं.

GRATEFULNESS, *s.* (Gratitude) कृतज्ञता, उपकृतज्ञता, उपकारस्मरणं, कृतोपकारस्मरणं.—(Agreeableness) रम्यता, रमणीयता, सुभगता.

GRATER, *s.* घर्षणी, घर्षणयन्त्रं, निर्घर्षणकः, घर्षणालः, आघट्टकः.

GRATIFICATION, *s.* (Act of pleasing, indulging) मनोरमणं, तोषः -षणं, तुष्टिकरणं, तुष्टिदानं, तर्पणं, प्रीतिकरणं, आराधनं, अनुरोधः -धनं, अनुयन्त्रनं, प्रमादनं, आनमनं, आनतिः *f.*; 'gratification of an humour,' छन्दोनुयन्त्रनं, छन्दोनुवृत्तं; 'of a wish,' मनोरथसिद्धिः *f.*, इच्छासाधनं, इच्छादानं.—(Pleasure, satisfaction) तुष्टिः *f.*, सन्तोषः, परितोषः, तोषः, प्रीतिः *f.*, तृप्तिः *f.*, सुखं, सौख्यं, आनन्दः, आह्लादः, रतिः *f.*, अभिरुचिः *f.*

GRATIFIED, *p. p.* तुष्टः -ष्टा -ष्टं, सन्तोषितः -ता -तं, परितुष्टः -ष्टा -ष्टं, सन्तुष्टः -ष्टा -ष्टं, प्रीतः -ता -तं, तृप्तः -प्ता -प्तं, तर्पितः -ता -तं, आराधितः -ता -तं, प्रसादितः -ता -तं, आनन्दितः -ता -तं, प्रमोदितः -ता -तं, प्रतिग्राहितः -ता -तं; 'in mind,' प्रीतमनाः -नाः -नः (स्); 'having every wish gratified,' सर्व्वसिद्धार्थः -र्थी -र्थं, पूर्णकामः -मा -मं, कृतार्थः -र्थी -र्थं, चरितार्थः -र्थी -र्थं.

To GRATIFY, *v. a.* (Please) सुख् (c. 10. सुखयति -यितुं), सन्तुष् (c. 10. -तोषयति -यितुं), परितुष्, नन्द् (c. 10. नन्दयति -यितुं), आनन्द्, प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं), तृप् (c. 10. तर्पयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), रम् (c. 10. रमयति -यितुं), ह्लाद् (c. 10. ह्लादयति -यितुं), हृष् (c. 10. हर्षयति -यितुं), सभाज् (c. 10. सभाजयति -यितुं), रुच् (c. 1. रोचते -चितुं) with dat. of person, सुखं कृ, प्रीतिं दा.—(Indulge, humour, soothe) अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), आराध् (c. 10. -राधयति -यितुं), प्रसद् (c. 10. -सादयति -यितुं), अनुरुध् (c. 10. -रुन्धयति -यितुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं), लल् (c. 10. लालयति -यितुं).

GRATIFYING, *part.* or *a.* परितोषकः -का -कं, सन्तोषकः -का -कं, तुष्टिकरः -रा -रं, तुष्टिदः -दा -दं, परितोषजनकः -का -कं, तुष्टिजननः -नी -नं, सुखकरः -रा -रं, सुखदः -दा -दं, प्रीतिकरः -री -रं, प्रीतिदः -दा -दं, आनन्ददः -दा -दं, आनन्दकरः -का -कं, तर्पी -र्पिणी -र्पि (न्), रमणः -णा -णं, आराधकः -का -कं, अनुरुन्धकः -का -कं.

GRATING, *part.* or *a.* कर्कशः -शा -शं, निष्ठुरः -रा -रं, खरः -रा -रं, अरुन्तुदः -दा -दं, कटुः -टुः -टुी -टु; 'to the ears,' कर्णकटुः -टुः -टु.

GRATING, *s.* परस्परघर्षणं, परस्परघर्षणजः कर्कशशब्दः.—(Partition of iron bars) लोहजालं, लोहजालकः, व्यत्यस्तलोहदण्डयुक्रम् अवरोधकं or व्यवधानं.

GRATINGLY, *adv.* कर्कशं, निष्ठुरं, अरुन्तुदं, कटु, कार्कश्येन.

GRATIS, *adv.* मूल्यं विना, मूल्यव्यतिरेकेण, निर्मूल्यं, धर्म्मार्थं.

GRATITUDE, *s.* कृतज्ञता, उपकारज्ञता, उपकृतज्ञता, उपकारस्मरणं, कृतोपकारस्मरणं, प्रत्युपकारकरणेच्छा.

GRATUITOUS, *a.* मूल्यं विना दत्तः -त्ता -त्तं, निर्मूल्यः -ल्या -ल्यं, प्रकामं or स्वेच्छातो दत्तः -त्ता -त्तं, धर्म्मार्थकः -का -कं; 'gratuitous labour,' विष्टिः *f.*—(Groundless) अहेतुकः -का -कं, निर्निमित्तः -त्ता -त्तं, निष्कारणः -णा -णं.

GRATUITOUSLY, *adv.* मूल्यं विना, मूल्यव्यतिरेकेण, धर्म्मार्थं, निर्मूल्यं.

GRATUITY, *s.* पारितोषिकं, शुल्कः -ल्कं, उपायनं, प्रदानं, दानं.

To GRATULATE, *v. a.* अभिनन्द् (c. 1. -नन्दति -न्दितुं), अभिवन्द् (c. 1. -वन्दते -न्दितुं), कल्याणवचनं वद् (c. 1. वदति -दितुं), कल्यं वद्, कुशलवादं कृ. *See* CONGRATULATE.

GRATULATION, *s.* अभिनन्दा -न्दनं, अभिवन्दनं, कल्याणवादः, कल्यवादः.

GRATULATORY, *a.* कल्यवादी -दिनी -दि (न्), अभिनन्दकः -का -कं.

GRAVE, *s.* (Place for the dead) समाधिः *m.*, अवटः, श्मशानं, मृतशरीरस्थानं, शवकं, सन्धिः *m.*, शवगन्धः.

GRAVE, *a.* (Serious) गुरुः -र्वी -रु, अलघुः -घुः -घु, मन्दः -न्दा -न्दं, जडः -डा -डं.—(Momentous) गुरुर्वीः -र्वी -र्वि, बह्वर्थः -र्थी -र्थं, गम्भीरार्थः -र्था -र्थं,—(Deep in sound) गम्भीरः -रा -रं, गभीरः -रा -रं, मन्द्रः -न्द्रा -न्द्रं, मन्दः -न्दा -न्दं, मन्थरः -रा -रं, आमन्द्रः -न्द्रा -न्द्रं, धीरः -रा -रं, घनः -ना -नं.—(In grammar) प्लुतः -तं; 'the grave accent,' अनुदात्तः.

To GRAVE, *v. a.* and *n.* तक्ष् (c. 1. तक्षति -क्षितुं, c. 5. तक्ष्णोति), त्वक्ष् (c. 1.

त्वक्षति -क्षितुं), मुद्र (nom. मुद्रयति -यितुं), मुद्रीकृ.

GRAVE-CLOTHES, *s.* शववस्त्रं, शवाच्छादनं, मृतशरीरपरिधानं.

GRAVE-DIGGER, *s.* समाधिखनकः, अवटखनिता *m.* (तृ), शवगर्त्तखनकः.

GRAVE-STONE, *s.* चित्यं, चैत्यं, चैत्रः, चिताचूडकं, मृतजनस्मरणप्रस्तरः, श्मशानप्रस्तरः, समाधिप्रस्तरः.

GRAVEL, *s.* शर्करा, वालुका, चूर्णखण्डः, चूर्णः -र्णं, शिलाखण्डः, पाषाणखण्डः, शिलाचूर्णं, पाषाणचूर्णं.—(The disease) शर्करा, अश्मरी, अश्मीरः -रं, मूत्रखण्डः, पाण्डुशर्करा.

To GRAVEL, *v. a.* सशर्करं -रां -रं कृ, शर्करान्वितं -तां -तं कृ, शर्करावृतं -तां -तं कृ, शर्करीकृ.—(Perplex) विमुह् (c. 10. -मोहयति -यितुं), शल्यं कृ.

GRAVELLY, *a.* शार्करीयः -यी -यं, शार्करः -री -रं, शार्करकः -का -कं, शर्करावान् -वती -वत् (त्), शर्करिकः -की -कं, शर्करिलः -ला -लं, सशर्करः -रा -रं.

GRAVEL-WALK, *s.* शर्करावृतः पथः, शर्करावान् उद्यानमार्गः.

GRAVELY, *adv.* गुरु, अलघु, गौरवेण, सगौरवं, गम्भीरं, भावगम्भीरं, गाम्भीर्य्येण, धीरं, मन्दं.

GRAVEN, *p. p.* तष्टः -ष्टा -ष्टं, तक्षितः -ता -तं, मुद्रितः -ता -तं.

GRAVENESS, *s.* गुरुता -त्वं, गौरवं, गरिमा *m.* (न्), गम्भीरता, गाम्भीर्य्यं, धीरत्वं -ता, अलघुता, अलाघवं, जडता, जाड्यं.

GRAVEOLENCE, *s.* दुर्गन्धः, कुत्सितगन्धः, दौर्गन्धि *n.*, पूतिगन्धः.

GRAVEOLENT, *a.* दुर्गन्धी -न्धिनी -न्धि (न्), कुत्सितगन्धः -न्धा -न्धं.

GRAVER, *s.* तक्षकः, तष्टा *m.* (ष्टृ), तक्षणकर्त्ता *m.* (र्त्तृ), मुद्राकरः.

GRAVID, *a.* गर्भिणी, गर्भवती, पूर्णगर्भा, गृहीतगर्भा, अन्तरापत्या.

GRAVING, *s.* तक्षणं, तक्षणकर्म्म *n.* (न्), तक्षणकार्य्यं.

To GRAVITATE, *v. n.* स्वभारगुरुत्वाद् भूमिं प्रति पत् (c. 1. पतति -तितुं) or पत् in des. (पिपतिषति -षितुं, पित्सति) or अधः पत्, or अधो गम् (c. 1. गच्छति, गन्तुं) or अन्यमूर्त्तिं प्रति आकृष् in pass. (-कृष्यते).

GRAVITATION, *s.* स्वभारगुरुत्वाद् भूमिं प्रति पतनशीलता or पातुकत्वं or पिपतिषा or अधःपातुकता or अन्यमूर्त्तिं प्रति आकर्षणशीलता.

GRAVITY, *s.* (Weight) गुरुत्वं, गौरवं, गरिमा *m.* (न्), भारः, भारगुरुता.—(Seriousness) गुरुता, गौरवं, गम्भीरता, गाम्भीर्य्यं, धीरत्वं -ता, अलघुता, अलाघवं, जडता, जाड्यं, मन्दता.—(Tendency of a body towards the earth, or towards another body) स्वभारगुरुत्वाद् भूमिं प्रति पातुकत्वं or अन्यमूर्त्तिं प्रति आकर्षणशीलता.—(Specific gravity) भारमानं.

GRAVY, *s.* मांसयूषं, मांसजूषं, मांसव्यञ्जनं, व्यञ्जनं, उपस्करः, तेमनं, लालसीकं, प्रहितं, मिष्टान्नं, प्रदिग्धः.

GRAY, *a.* धूसरः -री -रं, धूषरः -री -रं, पांशुवर्णः -र्णा -र्णं, भस्मवर्णः -र्णा -र्णं, ईषत्पाण्डुः -ण्डुः -ण्डु, ईषद्धवलः -ला -लं, आशुक्लः -क्ला -क्लं, शुक्लकृष्णः -ष्णा -ष्णं.—(As the hair) पलितः -ता -तं, धवलः -ला -लं, पक्वः -क्वा -क्वं; 'gray hair,' पलितं.—(Old) जीर्णः -र्णा -र्णं, वृद्धः -द्धा -द्धं, पक्वः -क्वा -क्वं.

GRAY, *s.* (The colour) धूसरः, धूषरः, धूसरवर्णः, पांशुवर्णः.

GRAY-BEARD, *s.* शुक्लश्मश्रुः *m.*, धवलश्मश्रुः *m.*, जीर्णकूर्च्चः.

GRAY-EYED, *a.* पाण्डुनयनः -ना -नं, धूसरनेत्रः -त्रा -त्रं.

GRAY-HAIRED, *a.* पलितः -ता -तं, पलिक्नी *f.*, धवलकेशः -शी -शं, शुक्लकेशः -शी -शं, पक्वकेशः -शी -शं.

GRAY-HEADED, *a.* पलितशिराः -राः -रः (स्), पलितमस्तकः -का -कं.

GRAY-HOUND, *s.* *See* GREY-HOUND.

GRAYISH, *a.* ईषद्धूसरः -रा -रं, आधूसरः -रा -रं, ईषत्पांशुवर्णः -र्णा -र्णं.

GRAYLING, *s.* स्वच्छनदीजो मत्स्यप्रभेदः.

GRAYNESS, *s.* धूसरत्वं, धूसरवर्णत्वं, पांशुवर्णत्वं.—(Of the hair) पलितं, केशधावल्यं, केशशुक्लता, केशपक्वता.—(Oldness) वृद्धत्वं, जीर्णता, पक्वता.

To GRAZE, *v. a.* (Touch lightly, rub) घृष् (c. 1. घर्षति -र्षितुं), लघु तड् (c. 10. ताडयति -यितुं), लघुगत्या अतिक्रम्य घृष्.—(Feed cattle with grass) चर् in caus. (चारयति -यितुं), तृणम् अश् in caus. (आशयति -यितुं) or भुज् in caus. (भोजयति -यितुं) or खाद् in caus. (खादयति -यितुं), तृणं दा.

To GRAZE, *v. n.* (Feed on grass) चर् (c. 1. चरति -रितुं), तृण् (c. 8. तर्णोति, तृणोति, तर्णितुं), तृणं खाद् (c. 1. खादति -दितुं) or अश् (c. 9. अश्नाति, अशितुं) or भक्ष् (c. 10. भक्षयति -यितुं).

GRAZED, *p. p.* (Rubbed) घृष्टः -ष्टा -ष्टं, घर्षितः -ता -तं, लघु ताडितः -ता -तं.—(Eaten by cattle) गोचरितः -ता -तं, गोभक्षितः -ता -तं, आशितङ्गवीनः -ना -नं, अशितङ्गवीनः -ना -नं.

GRAZER, *s.* तृणखादकः, तृणभक्षकः, तृणाशी *m.* (न्), चरिता *m.* (तृ).

GRAZIER, *s.* गोचारकः, गवादिचारकः, गोपालकः, पशुपोषकः.

GRAZING, *s.* गोचरः -रणं, गोप्रचारः, प्रचारः, तृणखादनं.

GREASE, *s.* वसा, घृतं, मेदस् *n.*, स्नेहः, मांसस्नेहः, मांससारः, वपा, तैलं, तिलस्नेहः, अभ्यञ्जनं.

To GREASE, *v. a.* वसया or घृतेन or स्नेहेन लिप् (c. 6. लिम्पति, लेप्तुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं, c. 10. अञ्जयति -यितुं) or दिह् (c. 2. देग्धि -ग्धुं), घृताक्तं -क्तां -क्तं कृ, स्निग्धीकृ, स्नेहाक्तीकृ.

GREASED, *p. p.* वसालिप्तः -प्ता -प्तं, घृताभ्यक्तः -क्ता -क्तं, स्नेहाक्तः -क्ता -क्तं, वसाभ्यक्तः -क्ता -क्तं, घृतोक्षितः -ता -तं, अभ्यक्तः -क्ता -क्तं.

GREASILY, *adv.* चिक्कणं, स्निग्धं, वसया, सस्नेहं, सघृतं, घृतेन.

GREASINESS, *s.* चिक्कणता -त्वं, स्निग्धता, स्नैग्ध्यं, घृताक्तत्वं, घृतवत्त्वं, स्नेहवत्त्वं, सस्नेहत्वं, मेदस्विता, वसालिप्तता.

GREASY, *a.* वसामयः -यी -यं, घृतवान् -वती -वत् (त्), घृताक्तः -क्ता -क्तं, वसाभ्यक्तः -क्ता -क्तं, चिक्कणः -णा -णं, स्निग्धः -ग्धा -ग्धं, स्नेहवान् -वती -वत् (त्), सस्नेहः -हा -हं, स्नेही -हिनी -हि (न्), स्नेहाक्तः -क्ता -क्तं, मेदस्वी -स्विनी -स्वि (न्), प्रमेदितः -ता -तं, वसायुक्तः -क्ता -क्तं, सतैलः -ला -लं.

GREAT, *a.* (Large) महान् -हती -हत् (त्), बृहन् -हती -हत् (त्), विशालः -ला -लं, विपुलः -ला -लं, पृथुः -थुः -थ्वी -थु, पृथुलः -ला -लं, उरुः -रुः -रु, स्थूलः -ला -लं, विकटः -टा -टं, करालः -ला -लं, विशङ्कटः -टा -टी -टं, वड्रः -ड्रा -ड्रं, ऊर्ज्जितः -ता -तं.—(Great in number, a great many) बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, बहुसंख्यकः -का -कं, भूरिः -रिः -रि, प्रचुरः -रा -रं.—(Extensive) विस्तीर्णः -र्णा -र्णं, पृथुपरिमाणः -णा -णं.—(Noble, eminent) महात्मा -त्मा -त्म (न्), विश्रुतः -ता -तं, महायशस्कः -स्का -स्कं, प्रसिद्धः -द्धा -द्धं, उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, महाभागः -गा -गं, प्रतिष्ठः -ष्ठा -ष्ठं.—(Chief, principal) प्रधान in comp., मुख्यः -ख्या -ख्यं, अग्रः -ग्रा -ग्रं, परमः -मा -मं.—(Important) गुरुः -र्व्वी -रु, परमः -मा -मं, अलघुः -घुः -घु.—(Expressing a great degree of any thing) अति or सु or महा prefixed, अत्यन्तः -न्ता -न्तं, गाढः -ढा -ढं, अतिमात्रः -त्रा -त्रं, अधिकः -का -कं, नितान्तः -न्ता -न्तं, एकान्तः -न्ता -न्तं, भृशः -शा -शं, अतिरिक्तः -क्ता -क्तं, परः -रा -रं; 'great fear,' महाभयं, अतिभयं; 'great vigour,' सुवीर्य्यं; 'great heat,' अतिदाहः, सुदाहः, गुरुतापः; 'great rain,' भूरिवृष्टिः *f.*; 'to a great distance,' सुदूरं -रे -रतस्, अतिदूरं -रे; 'to a great degree,' अत्यन्तं, अत्यर्थं, अतिमात्रं, भृशं, अतिशयं -येन, निर्भरं, गाढं, बहु; 'great grandson,' प्रपौत्रः; 'great grandfather,' प्रपितामहः; 'a great many people' बहुजनाः *m. pl.*

GREAT, *s.* (The whole) साकल्यं, समुदायः, समाजः, समष्टिः *f.*, सामस्त्यं. —(Great people) कुलीनजनाः *m. pl.*, श्रेष्ठजनाः *m. pl.*, उत्कृष्टपदस्थाः *m. pl.*, महाजनाः *m. pl.*; 'fit for the great,' माहाजनिकः -की -कं.

GREAT-COAT, *s.* उत्तरीयं, उत्तरीयवस्त्रं, प्रावारः -रकः, निचोलः -लौ.

GREAT-HEARTED, GREAT-MINDED, *a.* महात्मा -त्मा -त्म (न्), महामनाः -नाः -नः (स्), उदारचेताः -ताः -तः (स्), महासत्त्वः -त्त्वा -त्त्वं, महेच्छः -च्छा -च्छं.

GREATER, *a.* महत्तरः -रा -रं, विशालतरः -रा -रं, बृहत्तरः -रा -रं, गुरुतरः -रा -रं, गरीयान् -यसी -यः (स्), उत्तरः -रा -रं.—(Greater number) बहुतरः -रा -रं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, अधिकः -का -कं, अधिकतरः -रा -रं, परः -रा -रं, परतरः -रा -रं, अपरः -रा -रं; 'greater and greater,' अधिकाधिकं, उत्तरोत्तरं.

GREATEST, *a.* महत्तमः -मा -मं, बृहत्तमः -मा -मं, सुमहान् -हती -हत् (न्). गुरुतमः -मा -मं, गरिष्ठः -ष्ठा -ष्ठं, अधिकतमः -मा -मं; 'in the greatest degree,' सुभृशं, सुमहत्, अतिमहत्, सुतरां, अतितरां.

GREATLY, *adv.* (In a great degree) सु or अति or अतिशय prefixed, भृशं, सुभृशं, अत्यन्तं, निर्भरं, अतिशयं -येन, अतिमात्रं, अत्यर्थं, भूरि, गाढं, निह्नानं, सुतरां, अतितरां, अधिकं, अतीव, परं, बलवत्; 'greatly grieved,' सुदुःखितः -ता -तं.—(Nobly) माहात्म्येन, उदारवत्.

GREATNESS, *s.* (Largeness) महत्त्वं, महिमा *m.* (न्), बृहत्त्वं, विशालता, विपुलता, पृथुता -त्वं, प्रथिमा *m.* (न्), पार्थवं, स्थूलता, स्थौल्यं, उरुता -त्वं, विकटता, वैकट्यं, व्रढिमा *m.* (न्), परिव्रढिमा *m.*—(Extent) विस्तीर्णता, सुविस्तीर्णता.—(Bulk) परिमाणं.—(Eminence) उत्कर्षः, उत्कृष्टता, प्रसिद्धता, श्रेष्ठत्वं, यशस्विता, विभूतिः *f.*, आधिक्यं.—(Grandeur) विभूतिः *f.*, वैभवं, प्रभावः, ऐश्वर्यं.—(Greatness of mind) माहात्म्यं, उदारता, औदार्यं.—(Of rank) कुलीनता, कुलोत्कर्षः, अभिजातता, सेव्यता.

GREAVES, *s. pl.* जङ्घात्राणं, मंक्षणं, मंक्षुणं, जङ्घाकवचं, जङ्घारक्षणी, ऊरुत्राणं, ऊरुवर्म *n.* (न्).

GRECIAN, *a.* ग्रीकदेशीयः -या -यं, ग्रीकदेशजः -जा -जं, यावनः -नी -नं, यवनीयः -या -यं, यवनदेशीयः -या -यं.

GRECIAN, *s.* ग्रीकदेशवासी *m.* (न्), यवनः, यवनदेशजः.

GRECISM, *s.* ग्रीकभाषानुसारिणी वाग्वृत्तिः, ग्रीकभाषासम्प्रदायः.

GREECE, *s.* ग्रीक्देशः, यवनः, यवनदेशः.

GREEDILY, *adv.* अतिलोभेन -भात्, अतिलौल्यात्, लुब्धजनवत्, गृध्नवत्, अतिशयलिप्सया, अतिशयजिघृक्षया, लोभावेशात्, अत्यभिलाषेण, अतीच्छया, अतिस्पृहातम्.

GREEDINESS, *s.* लुब्धता, लोभवत्त्वं, लोभः, अतिभोजनं, अत्याहारः, गृध्नता, गृध्नुता, अतिबुभुक्षा, अधिकभोजनं, यस्मरता, लोलता, लौल्यं, अत्वरता, अतृप्तिः *f.*, अपरितोषः, अत्याकांक्षा, अतिलिप्सा, लिप्सातिशयः, उदरभरणं, जिघृक्षा, गर्द्धः, भक्षकत्वं, अत्यभिलाषः, अतिस्पृहा.

GREEDY, *a.* (Voracious) लुब्धः -ब्धा -ब्धं, आहारलुब्धः -ब्धा -ब्धं, लोभी -भिनी -भि (न्), भक्षकः -का -कं, बहुभक्षकः -का -कं, बद्धाशी -शिनी -शि (न्), बहुभुक् *m. f. n.*, यस्मरः -रा -रं, अत्वरः -रा -रं, गृध्नः -ध्ना -ध्नं, गृध्नुः -ध्नुः -ध्नु, गर्धी -र्धिनी -र्धि (न्), गर्धनः -ना -नं, जिघृक्षुः -क्षुः -क्षु, बुभुक्षुः -क्षुः -क्षु, अतिभोजी -जिनी -जि (न्), अत्याहारी -रिणी -रि (न्), अपरिमिताहारी &c., कुक्षिम्भरिः -रिः -रि, उदरम्भरिः -रिः -रि, आत्मम्भरिः -रिः -रि, सौदरिकः -की -कं, स्वोदरपूरकः -का -कं, उदरपिशाचः -ची -चं, लोलुभः -भा -भं, लोलः -ला -लं, लोलुपः -पा -पं, लोभाविष्टः -ष्टा -ष्टं.—(Eager after) अत्यभिलाषी -षिणी -षि (न्), अभिलाषकः -का -कं, अतीच्छः -च्छा -च्छं, तृष्णकः -का -कं, अत्याकांक्षी -क्षिणी -क्षि (न्), मत्सरः -रा -रं; 'to be greedy,' गृध् (c. 4. गृध्यति, गर्धितुं), लुभ् (c. 4. लुभ्यति, लोभितुं).

GREEK, *a.* ग्रीकदेशीयः -या -यं, यवनदेशीयः -या -यं.

GREEK, *s.* ग्रीकदेशजः, यवनदेशवासी *m.* (न्), यवनः.—(Language of Greece) ग्रीकभाषा.

GREEN, *a.* हरितः -ता -रिणी -तं, हरित् *m. f. n.*, हरितवर्णः -र्णा -र्णं, हरिद्वर्णः -र्णा -र्णं, हरिः -रिः -रि, पलाशः -शी -शं, पालाशः -शी -शं, श्यामः -मा -मं, भरितः -ता -तं, तालकाभः -भा -भं, श्यामवर्णः -र्णा -र्णं; 'green wood,' आर्द्रकाष्ठं; 'to make green,' हरितीकृ; 'to become green,' हरित् (nom. हरितायते).

GREEN, *s.* (The colour) हरित् *m.*, हरितः, हरिः *m.*, पालाशः, तालकाभः.—(Grassy plat) हरिततृणावृतो भूमिभागः, हरितस्थानं, हरितस्थलं -स्थानं.

GREENED, *p. p.* हरितीकृतः -ता -तं, हरितीभूतः -ता -तं.

GREEN-FINCH, *s.* हरितपक्षयुक्तः पक्षिभेदः.

GREENGAGE, *s.* हरितवर्णः फलविशेषः.

GREEN-GROCER, *s.* शाकफलादिविक्रेता *m.* (तृ), शाकादिविक्रयी *m.* (न्).

GREENHORN, *s.* अविपक्वबुद्धिः *m.*, अपक्वधीः *m.*, अकोविदः.

GREEN-HOUSE, *s.* बालवृक्षादिरक्षणार्थं काचपटलं गृहं.

GREENISH, *a.* ईषद्धरितः -ता -तं, ईषत्पलाशः -शी -शं, आश्यामः -मा -मं.

GREEN-LEAVED, *a.* हरितच्छदः -दा -दं, हरित्पर्णः -र्णा -र्णं, हरितपत्रः -त्रा -त्रं.

GREENNESS, *s.* हरितत्वं, हरिम्नं, पलाशता, पालाशता, श्यामता -त्वं.—(Immaturity) अपक्वता, अविपक्वता; 'of mind,' अपक्वबुद्धित्वं.

GREEN-ROOM, *s.* शाणी, नेपथ्यं, नेपथ्यशाला.

GREENS, *s. pl.* शाकादि *n.*, हरितकं, खादनीयशाकाः *m. pl.*

GREEN-SICKNESS, *s.* स्त्रीरोगविशेषो यस्मिन् मुखं श्यामवर्णं भवति देहस्य चावसादो जायते.

GREEN-SWARD, *s.* घासावृता भूमिः, हरितभूमिः, सतृणस्थलं.

To GREET, *v. a.* अभिनन्द् (c. 1. -नन्दति -न्दितुं), अभिवन्द् (c. 1. -वन्दते -न्दितुं), वन्द्, अभिवद् (c. 10. -वादयते -ति -यितुं), कुशलवाक्यैर् अभिवद् or अभिभाष् (c. 1. -भाषते -षितुं), अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), अभ्यर्च्, नमस्कृ, नमस्कारं कृ, सत्कृ, कुशलवादं कृ, प्रणम् (c. 1. -णमति -णन्तुं), प्रणतिं कृ; 'to greet in return,' प्रत्यभिवद्, प्रत्यर्च्.

GREETED, *p. p.* अभिनन्दितः -ता -तं, अभिवादितः -ता -तं, कुशलवाक्यैः सम्भाषितः -ता -तं or अभिभाषितः -ता -तं, नमस्कृतः -ता -तं, सत्कृतः -ता -तं.

GREETER, *s.* अभिवादयिता *m.* (तृ), अभिवादकः, अभिनन्दकः.

GREETING, *s.* अभिनन्दा -न्दनं, अभिवादः -दनं, वन्दनं, अभिवन्दनं, कुशलवाक्यैः सम्भाषणं or अभिभाषणं, कुशलप्रश्नः, सत्कारः, सत्कृतिः *f.*, नमस्कारः, नमस्क्रिया, कौशलं -ली, कुशलवादः; 'greeting in return,' प्रत्यभिवादः -दनं.

GREGARIOUS, *a.* यूथचारी -रिणी -रि (न्), अनेकचरः -रा -रं, सङ्घचारी &c.

GREGARIOUSLY, *adv.* यूथशस्, सङ्घशस्, अनेकशस्, गणशस्.

GREGARIOUSNESS, *s.* यूथचारित्वं, सङ्घचारित्वं, अनेकचारित्वं.

GRENADE, *s.* युद्धे हस्तप्रक्षेपणीया आग्नेयचूर्णगर्भा लोहगुली या अग्निबलेन शतखण्डशो विदीर्णा भूत्वा रिपुनाशं करोति.

GRENADIER, *s.* दीर्घशिरस्कभृत् पृष्ठोक्ताग्नेयास्त्रपाणिः सैन्यविशेषः.

GREY, *a.* *See* GRAY.

GREYHOUND, *s.* दृष्टिगोचरशशकानुसरणे शिक्षितः सुतनुशरीरो मृगयाकुक्कुरः.

GRICE, *s.* शूकरशावकः, शूकरशिशुः *m.*, वराहशावकः.

To GRIDE, *v. a.* कर्कशशब्दपूर्वं छिद् (c. 7. छिनत्ति, छेत्तुं).

GRIDELIN, *a.* शुक्लरक्तः -क्ता -क्तं, धवलरक्तः -क्ता -क्तं.

GRIDIRON, *s.* विरलाधोभागो भर्ज्जनयन्त्रविशेषः, ऋसरीयं, भाष्ट्रः -ष्ट्रं, भृज्जनं, भृजीयं.

GRIEF, *s.* शोकः, खेदः, दुःखं, सन्तापः, क्लेशः, शुक् *f.* (च्), मन्युः *m.*, व्यथा, विषादः, पीडा, मनोदुःखं, मनस्तापः, मनःपीडा, मनोव्यथा, निर्वेदः, आधिः *m.*, उद्वेगः, परितापः, अनिर्वृतिः *f.*, कृच्छ्रं, मनःकृच्छ्रं, मनोवेदना. आर्त्तिः *f.*; 'grief for the loss of any one,' उत्कण्ठा, औत्कण्ठ्यं, उद्वेगः, उत्सुकता, उत्कः.

GRIEVANCE, *s.* कष्टं, क्लिष्टिः *f.*, क्लेशः, दुःखं, पीडा, बाधा, आबाधा, बाधकं, क्लेशकं, आर्त्तिः *f.*, द्रोहः, कष्टकरं किञ्चित्; 'infantine grievance,' शिशुक्रन्दः.

To GRIEVE, *v. a.* दुःखय् (c. 10. दुःखयति -यितुं), शुच् (c. 10. शोचयति -यितुं), पीड् (c. 10. पीडयति -यितुं), आपीड्, उपपीड्, अभिपीड्, परिपीड्, व्यथ् (c. 10. व्यथयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं, क्लेष्टुं), संक्लिश्, खिद् (c. 10. खेदयति -यितुं), तप् (c. 10. तापयति -यितुं), परितप्, सन्तप्, अनुतप्, अभितप्, उपतप्, उद्विज् (c. 10. -वेजयति -यितुं), त्रायस् (c. 10. -त्रासयति -यितुं), दु (c. 5. दुनोति, दोतुं), विदु, शोकं दा or जन् (c. 10. जनयति -यितुं), क्लेशं कृ, व्यथां कृ, मनोदुःखं कृ.

To GRIEVE, *v. n.* शुच् (c 1. शोचति -चितुं), अनुशुच्, परिशुच्, अनुप्रशुच्, शोकार्त्तीभू, खिद् (c. 4. खिद्यते, खेत्तुं), परिखिद्, दुःख (nom. दुःखायते or दुःखीयते), तप् in pass. (तप्यते), परितप्, सन्तप्, अनुतप्, अभितप्, उपतप्, उद्विज् (c. 6. -विजते -जितुं), व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ्, सम्प्रव्यथ्, क्लिश् (c. 4. क्लिश्यते -ति, क्लेशितुं), परिक्लिश्, संक्लिश्, दु (c. 5. दुनोति, c. 4. दूयते, दोतुं), विदु, दुर्मनस् (nom. दुर्मनायते), उन्मनस्, कृच्छ्र (nom. कृच्छ्रायते), मन्यु (nom. मन्यूयते), शोचनं कृ; 'to grieve for,' अनुशुच्.

GRIEVED, *p. p.* दुःखितः -ता -तं, दुःखी -खिनी -खि (न्), दुःखार्त्तः -र्त्ता -र्त्तं, शोचितः -ता -तं, शोकार्त्तः -र्त्ता -र्त्तं, शोकातुरः -रा -रं, पीडितः -ता -तं, पीड्यमानः -ना -नं, सन्तप्तः -प्ता -प्तं, सन्तापितः -ता -तं, अभिसन्तप्तः -प्ता -प्तं, तापितः -ता -तं, खेदितः -ता -तं, क्लेशितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लिश्यमानः -ना -नं, व्यथितः -ता -तं, उद्वेजितः -ता -तं, उद्विग्नः -ग्ना -ग्नं, दूनः -ना -नं, विदूनः -ना -नं, बाधितः -ता -तं, अनुभूतशोकः -का -कं, आर्त्तः -र्त्ता -र्त्तं or आतुरः -रा -रं in comp.

GRIEVING, *part.* शोचमानः -ना -नं, शोचनः -ना -नं, खिद्यमानः -ना -नं, क्लिश्यमानः -ना -नं, परितप्यमानः -ना -नं, विदूयमानः -ना -नं.

GRIEVINGLY, *adv.* सशोकं, सखेदं, सदुःखं, सक्लेशं, सोद्वेगं, शोकेन, उद्वेगेन.

GRIEVOUS, *a.* दुःखकरः -री -रं, दुःखमयः -यी -यं, दुःखी -खिनी -खि (न्), शोकजनकः -का -कं, क्लेशकः -का -कं, क्लेशी -शिनी -शि (न्), क्लेशदः -दा -दं, उग्रः -ग्रा -ग्रं, पीडाकरः -रा -रं, व्यथकः -का -कं, व्यथाकरः -री -रं, कष्टकरः -री -रं -कारकः -का -कं, शोचनीयः -या -यं, शोच्यः -च्या -च्यं, सशोकः -का -कं, उपतापनः -ना -नं, उद्वेजकः -का -कं, सवेदनः -ना -नं, बाधकः -का -कं, गुरुः -रुः -रु, आत्ययिकः -की -कं, दुर् दुश्, दुष्, दुस् or दुः in comp.

GRIEVOUSLY, *adv.* उग्रं, शोचनीयं, सशोकं, यथा शोकः or क्लेशो जायते तथा.

GRIEVOUSNESS, *s.* उग्रत्वं -ता, शोच्यता, शोचनीयता, सशोकत्वं, क्लेशः, क्लिष्टता, दुःखं, दुःखिता, घोरता, कष्टं.

GRIFFIN, GRIFFON, *s.* कविकल्पित उत्क्रोशेऽङ्गकायः सिंहाधःकायो जन्तुविशेषः.

GRIFFIN-LIKE, *a.* पूर्व्वोक्तजन्तुसरूपः -पी -पं or -समभावः -वा -वं.

GRIG, *s.* चञ्चलशीलः क्षुद्रजलव्यालः, कुधिकाभेदः.

To GRILL, *v. a.* भर्ज्ज् (c. 6. भृज्जति, भर्ष्टुं), भृज् (c. 1. भ्रजते -र्ष्टुं), भ्रस्ज् (c. 1. भ्रस्जते -ष्टुं), तप् (c. 10. तापयति -यितुं), पच् (c. 1. पचति, पक्तुं).

GRILLED, *p. p.* भृष्टः -ष्टा -ष्टं, भर्जितः -ता -तं, तापितः -ता -तं.

GRIM, *a.* घोरः -रा -रं, उग्रः -ग्रा -ग्रं, दारुणः -णा -णं, भयानकः -का -कं, रौद्रः -द्री -द्रं, करालः -ला -लं, विकटः -टा -टं, कुत्सितः -ता -तं; 'in appearance' घोराकृतिः -तिः -ति, उग्राकारः -रा -रं, उग्रमुखः -खी -खं, उग्रदर्शनः -ना -नं, रौद्रदर्शनः -ना -नं, कुरूपः -पी -पं, अपरूपः -पी -पं, कदाकारः -रा -रं, दुर्दर्शनः -ना -नं, कुदृश्यः -श्या -श्यं.

GRIM-FACED, *a.* उग्रमुखः -खी -खं, घोरवदनः -ना -नं, करालवदनः -ना -नं.

GRIMACE, *s.* वदनविकृतिः *f.*, मुखविकृतिः *f.*, मुखविकारः, मुखवैरूप्यं, मुखविरूपता, मुखवक्रता, वक्रमुखं, विकृतमुखं, वक्रास्यं, कुमुखं.

GRIMALKIN, *s.* वृद्धविडालः, वृद्धमार्जारः, जीर्णविडालः.

GRIME, *s.* मलं, किट्टं, कल्कं, अमेध्यं, कलुषं, मालिन्यं.

To GRIME, *v. a.* मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), मलेन दुष् (c. 10. दूषयति -यितुं).

GRIMED, *p. p.* मलिनितः -ता -तं, मलदूषितः -ता -तं, अमेध्यलिप्तः -प्ता -प्तं.

GRIMLY, *adv.* उग्रं, घोरं, दारुणं, भयानकं, रौद्रं, घोराकारेण.

GRIMNESS, *s.* घोरता, उग्रता -त्वं, रौद्रता, दारुण्यं, उग्राकारत्वं, करालता, उग्रमुखत्वं, करालमुखत्वं, कुदृश्यत्वं, कुरूपत्वं.

GRIMY, *a.* समलः -ला -लं, अमेध्याक्तः -क्ता -क्तं, कल्की -ल्किनी -ल्कि (न्).

To GRIN, *v. n.* कुस्मि (c. 1. -स्मयते -यितुं -स्मेतुं), कुस्मितं कृ, कु हस् (c. 1. हसति -सितुं), कुहासं कृ, विकृतं स्मि or हस्, विकृतमुखेन स्मि, मुखविकारेण हस्, कुस्मितं कृत्वा दन्तान् दृश् (c. 10. दर्शयति -यितुं), दन्तान् घृष् (c. 1. घर्षति -र्षितुं).

GRIN, *s.* कुस्मितं, कुहासः, कुहसितं, कुत्सितहसितं, विकृतस्मितं, विकृतहासः, वक्रस्मितं, दन्तदर्शनं, दन्तघर्षणं.

To GRIND, *v. a.* (Comminute by attrition) चूर्ण् (c. 10. चूर्णयति -यितुं), प्रचूर्ण्, विचूर्ण्, चूर्णीकृ, पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, विनिष्पिष्, प्रतिपिष्, उत्पिष्, मृद् (c. 9. मृद्नाति, मर्द्दितुं, c. 10. मर्दयति -यितुं), अवमृद्, विमृद्, प्रमृद्, अभिमृद्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), क्षोदीकृ, खण्ड् (c. 10. खण्डयति -यितुं), गुण्ड् (c. 1. गुण्डति, c. 10. गुण्डयति -यितुं), कुट्ट् (c. 10. कुट्टयति -यितुं).—(Sharpen by friction) घर्षणेन निश्शो (c. 4. -श्यति -शातुं) or तिज् (c. 10. तेजयति -यितुं) or तीक्ष्णीकृ or तीक्ष्णधारीकृ.—(Rub one against another) घृष् (c. 1. घर्षति -र्षितुं), परस्परघर्षणं कृ; 'to grind the teeth,' दन्तान् दन्तैर् निष्पिष् or घृष्, दन्तघर्षणं कृ, क्ष्विद् (c. 1. क्ष्वेडति -डितुं), दन्तक्ष्वेडनं कृ.—(Oppress) बाध् (c. 1. बाधते -धितुं), पीड् (c. 10. पीडयति -यितुं).

To GRIND, *v. n.* पेषणं कृ, चूर्णीभू, क्षोदीभू, सम्पिष्टीभू, खण्डीभू.

GRINDER *s.* (One who grinds) पेषणकारी *m.* (न्), पेषकः, पेष्टरः.—(Instrument for grinding) पेषणं -णी, पेषणयन्त्रं.—(Tooth that chews) दाढा, चर्वणदन्तः, महादन्तः.

GRINDING, *s.* पेषणं, निष्पेषणं, चूर्णीकरणं, मर्दनं, विमर्दनं, कुट्टनं, अवहननं, घर्षणं; 'of the teeth,' दन्तघर्षणं, क्ष्वेडनं.

GRINDSTONE, *s.* (For grinding) पेषणं -णी -णिः *f.*, पेषणशिला, पेषणप्रस्तरः, पेषाकः, शिला, शिलापट्टः, क्षोदः.—(For sharpening) शाणः -णी, शानः, भमः -मिः *f.*, शाणप्रस्तरः.

GRINNER, *s.* कुस्मितकारी *m.* (न्), कुस्मेरः, कुहासी *m.* (न्), विकृतहासी *m.*, विकृतमुखः, दन्तदर्शकः.

GRIPE, *s.* (Grasp) सङ्ग्राहः, ग्रहः -हणं, मुष्टिसङ्ग्राहः, मुष्टिबन्धः, हस्तग्रहः, दुर्मोचहस्तग्रहः, धृतिः *f.*, हस्तधृतिः *f.*—(Squeeze, pressure) पीडा -डनं, निपीडनं.—(Handful) मुष्टिः *f.*

To GRIPE, *v. a.* (Grasp) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), सङ्ग्रह्, मुष्टिना ग्रह् or सङ्ग्रह्, हस्तेन धृ (c. 1. धरति, धर्त्तुं), सङ्ग्राहं कृ.—(Close

the fist) मुष्टिं or हस्तं बन्ध् (c. 9. बध्नाति, बन्धुं), मुष्टिबन्धं कृ.—(Squeeze) पीड् (c. 10. पीडयति -यितुं), सम्पीड्.—(Pain in the bowels) अन्त्रवेदनां कृ or जन् (c. 10. जनयति -यितुं).

GRIPED, *p. p.* मुष्टिसङ्ग्राहपीडितः -ता -तं, हस्तधृतः -ता -तं.

GRIPER, *s.* ग्राहकः, मुष्टिसङ्ग्राहकृत् *m.*—(Oppressor) परस्वग्राहकः, बाधकः, पीडकः.

GRIPES, *s. pl.* अन्त्रशूलं, नाडिशूलं, अन्त्रवेदना, जठरव्यथा.

GRISETTE, *s.* वणिक्पुत्री, वणिजः स्त्री or दुहिता *f.* (तृ), कन्या.

GRISLINESS, *s.* उग्रता -त्वं, घोरता, दारुणता, रौद्रता, क्रूरता.

GRISLY, *a.* उग्रः -ग्रा -ग्रं, घोरः -रा -रं, दारुणः -णा -णं, भयानकः -का -कं, क्रूरः -रा -रं, करालः -ला -लं, घोराकृतिः -तिः -ति, उग्रम्यश्यः -श्या -श्यं, उग्रदर्शनः -ना -नं, करालवदनः -ना -नं, कुदृश्यः -श्या -श्यं.

GRIST, *s.* (Corn ground) गोधूमचूर्णं, गोधूमक्षोदः, पिष्टधान्यं, पिष्टं.—(Corn for grinding) पेषणाय धान्यं, पेषणयोग्यं शस्यं, पेषणीयधान्यं, यच्छस्यम् एकवारे पेष्टुं शक्यते.

GRISTLE, *s.* तरुणास्थि *n.*, कोमलास्थि *n.*, उपास्थि *n.*, शिथिलास्थि *n.*, सन्धिबन्धनं, दृढमांसं.

GRISTLY, *a.* तरुणास्थिमयः -यी -यं, कोमलास्थिमान् -मती -मत् (त्), उपास्थिसमभावः -वा -वं.

GRIT, *s.* (Sand, gravel) शर्करा, चूर्णखण्डः, शिलाखण्डः, चूर्णः -र्णं, वालुका.—(Coarse part of meal) शक्तुशर्करा, घनशक्तुः *m.*, शक्तुघनः.

GRITTINESS, *s.* शार्करीयता, शर्करावत्त्वं, सशर्करत्वं.

GRITTY, *a.* शार्करीयः -यी -यं, शर्करावान् -वती -वत् (त्), शार्करिकः -की -कं, शर्करिलः -ला -लं, सशर्करः -रा -रं.

GRIZZLE, *s.* (Gray colour) धूसरः, धूसरवर्णः, पांशुवर्णः.

GRIZZLY, *a.* ईषद्धूसरः -रा -रं, ईषत्पांशुवर्णः -र्णा -र्णं, ईषत्पाण्डुः -ण्डुः -ण्डु, शुक्लकृष्णः -ष्णा -ष्णं; 'grizzly bear,' पूर्व्वोक्तवर्णविशिष्टो बृहद्रूक्षः.

To GROAN, *v. n.* वेदनोपहतत्वाद् दीर्घनादं कृ or दीर्घरावं कृ or दीर्घं निःश्वस् or निश्वस् (c. 2. -श्वसिति -तुं) or दीर्घं रु (c. 2. रौति, रवितुं) or नद् (c. 1. नदति -दितुं) or क्रुश् (c. 1. क्रोशति, क्रोष्टुं), दुःखार्त्तत्वाद् दीर्घचित्कारं कृ, आर्त्तनादं कृ, आर्त्तरावं कृ, आर्त्तवद् दीर्घं नद् or स्तन् (c. 1. स्तनति -नितुं) or विस्तन्, or निष्टन्, स्तननं कृ, दीर्घनिश्वासं कृ, गम्भीरनादं कृ, गम्भीरनिश्वासं कृ.

GROAN, *s.* आर्त्तनादः, आर्त्तरावः, दुःखार्त्तस्य दीर्घनादः or दीर्घरावः or दीर्घचित्कारः, दीर्घनिश्वासः, दीर्घनिःश्वासः, सदीर्घनिश्वासो गम्भीरनादः, सीत्कारः, सीत्कृतं, चीत्कारः, स्तननं, परिदेवनं -वितं.

GROANING, *part.* वेदनोपहतत्वाद् दीर्घनादी -दिनी -दि (न्) or दीर्घनिश्वासी &c.

GROANING, *s.* दीर्घनादकरणं, आर्त्तनादः, दीर्घनिश्वसितं, स्तननं.

GROAT, *s.* ताम्रमुद्राविशेषः.

GROCER, *s.* उपस्करादिविक्रेता *m.* (तृ), मिष्टान्नादिविक्रयी *m.* (न्), शुष्कफलादिविक्रेता *m.*, शर्करादिविक्रयी *m.*

GROCERY, *s.* मिष्टान्नादि *n.*, उपस्करादिद्रव्यं, शुष्कफलादि *n.*, शर्करादिद्रव्यं.

GROG, *s.* मदिरा, सुरा -री, वारुणी, शीधुः *m.* -धु *n.*, शुण्डा.

GROG-DRINKER, *s.* सुरापः -पी, शुण्डापायी *m.* -यिनी *f.*, शीधुपः.

GROIN, *s.* वंक्षणः -णं, वाटः, ऊरुसन्धिः *m.*, सक्थिसन्धिः *m.*

GROOM, *s.* अश्वपालः -लकः, सायी *m.* (न्), पालकः, भोगपालः, भोगिकः, चारकः, अश्वरक्षः -क्षकः, अश्वसेवकः, किरातः.

To GROOM, *v. a.* अश्वलोम मृज् (c. 2. मार्ष्टि -ष्टुं), अश्वं पाल् (c. 10. पालयति -यितुं).

GROOVE, *s.* शुषिरं, दीर्घशुषिरं, दीर्घरेखारूपेण खनितं शुषिरं, दीर्घगर्त्तः, दीर्घकुहरं, दीर्घशून्यं, स्तम्भरेखा, स्तम्भसीता.

To GROOVE, *v. a.* शुषिरीकृ, दीर्घरेखारूपेण खन् (c. 1. खनति -नितुं) or उत्खन्, दीर्घशुषिरं कृ, दीर्घरेखां कृ, सीतां कृ.

To GROPE, *v. a.* and *n.* तमसि or अन्धकारे परामृश् (c. 6. -मृशति -म्रष्टुं) or परिमृश्, तमसि परीक्ष् (c. 1. -ईक्षते -क्षितुं) or अन्विष् (c. 4. -इष्यति, c. 1. -इच्छति -एषितुं) or निरूप् (c. 10. -रूपयति -यितुं), तमः प्रविश्य हस्तेन परीक्ष् or निरूप्, निरूपणार्थं or हस्तपरामर्शार्थं तमः प्रविश् (c. 6. -विशति -वेष्टुं) or तमःप्रवेशं कृ.

GROPER, *s.* अन्धकारे हस्तपरामर्शकारी *m.* (न्), तमसि परीक्षकः or निरूपकः, तमःप्रवेशकः.

GROPING, *s.* अन्धकारे हस्तद्वारेण परामर्शः, तमसि हस्तेन जिज्ञासा or अन्वेषणं or निरूपणं.

GROSS, *a.* (Bulky) स्थूलः -ला -लं, स्थूलकायः -या -यं, बृहन् -हती -हत् (न्), बृहदङ्गः -ङ्गी -ङ्गं.—(Fat, corpulent) पीनः -ना -नं, पीवरः -रा -रं, मेदस्वी -स्विनी -स्वि (न्), बृहत्कुक्षिः -क्षिः -क्षि.—(Coarse, thick, not fine) घनः -ना -नं, स्थूलः -ला -लं, असूक्ष्मः -क्ष्मा -क्ष्मं, सान्द्रः -न्द्रा -न्द्रं, निबिडः -डा -डं, निरन्तरः -रा -रं, नीरन्ध्रः -न्ध्रा -न्ध्रं, स्त्यानः -ना -नं.—(Indelicate, vulgar) अशुद्धः -द्धा -द्धं, अवाच्यः -च्या -च्यं, गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं, असभ्यः -भ्या -भ्यं, ग्राम्यः -म्या -म्यं, नीचः -चा -चं.—(Unrefined, impure) अशिष्टः -ष्टा -ष्टं, अविनयः -या -यं, अविनीतः -ता -तं, अपरिष्कृतः -ता -तं, दुर्मर्य्यादः -दा -दं, अमेध्यः -ध्या -ध्यं, मलीमसः -सा -सं.—(Great, excessive) अत्यन्तः -न्ता -न्तं, अति or सु or महा prefixed; as, 'a gross blunder,' अतिदोषः.—(Disgraceful) अयशस्करः -री -रं, लज्जाकरः -री -रं.—(Dull) मन्दः -न्दा -न्दं, मूढः -ढा -ढं, जडः -डा -डं; 'gross measurement,' स्थूलमानं; 'gross ignorance,' घनाज्ञानं; 'gross darkness,' अन्धतमस्, अन्धतामसं.

GROSS, *s.* (The bulk, chief part) प्रधानभागः, प्रधानांशः, अधिकभागः, स्थूलांशः, बहुतरभागः, साकल्यं, सामग्र्यं, समुदायः, समासः, समस्तिः *f.*; 'in the gross,' साकल्येन.—(Twelve dozen) द्वादशद्वादशकं, एकशतं चतुश्चत्वारिंशत्.

GROSSLY, *adv.* (Coarsely, not finely) स्थूलं, घनं, सान्द्रं, निबिडं.—(Not delicately) अशुद्धं, असभ्यं, अशिष्टं, अविनीतं, विनयविरोधेन, मर्य्यादाविरुद्धं.—(Greatly, enormously) अत्यन्तं, अतिशयेन, अतिमात्रं, अति or महा prefixed; as, 'grossly indecent,' अतिगर्हितः -ता -तं; 'grossly criminal,' महापातकी *m.* (न्).

GROSSNESS, *s.* (Bulkiness) स्थूलता, स्थौल्यं, बृहत्त्वं.—(Fatness) शरीरस्थूलता, स्थूलकायत्वं, पीनता, मेदस्विता.—(Density) घनता, सान्द्रता, स्थूलत्वं, नैबिड्यं, नैरन्तर्य्यं, स्त्यानं, स्त्यानता.—(Coarseness, want of refinement) अशुद्धता, अशुद्धिः *f.*, अशिष्टता, असभ्यता, अविनयः, अविनीतत्वं, अमर्य्यादा, गर्ह्यता, अमेध्यता.—(Enormity) अत्यन्तता, अतिरिक्तता, आधिक्यं, गाढता, महत्त्वं.

GROT, GROTTO, *s.* (Cave) कन्दरः -रा, गह्वरं -री, कुहरं, शैलरन्ध्रं, गुहा, शैलविवरं.—(Natural grotto) देवखातं -तकं, देवखातबिलं.—(Artificial) क्रीडाकन्दरः, क्रीडागह्वरं, कुञ्जः, कुञ्जकुटीरः.

GROTESQUE, *a.* अपरूपः -पा -पी -पं, असङ्गतरूपः -पा -पं, हास्यरूपः -पा -पं, असङ्गताकारः -रा -रं, कदाकारः -रा -रं, हास्यः -स्या -स्यं, विषमः -मा -मं, विलक्षणः -णा -णं.

GROTESQUELY, *adv.* असङ्गतरूपेण, हास्यरूपेण, विषमं, असङ्गतं.

GROTESQUENESS, *s.* अपरूपता, असङ्गतत्वं, हास्यता, वैषम्यं.

GROUND, *s.* (Earth) भूमिः *f.*, भूः *f.*, मही, पृथिवी, पृथ्वी, धरणी, धरा,

वसुधा, क्षितिः *f.*, अवनिः *f.* -नी, उर्वी, मेदिनी, वसुमती, वसुन्धरा, धारिणी, क्षोणी -णिः *f.*, क्षौणिः *f.*—(Surface of the earth) भूतलं, महीतलं, महीपृष्ठं, भूपृष्ठं, पृथिवीतलं, क्षितितलं, क्षौणितलं, क्षितिपीठं, धरोपस्थः.—(Land, estate) भूमिः *f.*, क्षेत्रं.—(Foundation, basis of any thing) मूलं, उपष्टम्भः, उपस्तम्भः, वस्तु.—(Fundamental cause, reason) हेतुः *m.*, आदिहेतुः *m.*, कारणं, आदिकारणं, निमित्तं, निदानं, प्रयोजनं, उपपत्तिः *f.*—(First principle) तत्त्वं.—(Ground for the site of a house) गृहभूमिः *f.*, वेश्मभूः *f.*, भित्तिमूलं, तलिमं, कुट्टिमं, वास्तुः *m.*, पोतः, गृहपोतकः, गृहप्रतिष्ठा.—(Soil) मृत् *f.*, मृत्तिका, मृदा, मृत्खण्डः.—(Field of action) रणभूमिः *f.*, रणक्षेत्रं.—(First colour) आदिवर्णः.—(First form) प्रथमसंस्कारः; 'to gain ground,' वृध् (c. 1. वर्धते -र्धितुं), प्रवृध्, उत्तरोत्तरं वृध्; 'ground,' क्षि in pass. (क्षीयते), अपचि in pass. (-चीयते), शनैः शनैर् निवृत् (c. 1. -वर्त्तते -र्त्तितुं).

To GROUND, *v. a.* (Lay on the ground) भूमौ न्यस् (c. 4. -अस्यति -अस्तुं) or निधा (c. 3. -दधाति -धातुं).—(Fix, found) मूलं न्यस् or स्था in caus. (स्थापयति -यितुं) or प्रतिष्ठा; often expressed by मूलः -ला -लं in comp.; as, 'faith grounded on knowledge,' ज्ञानमूलः प्रत्ययः.—(Settle in rudiments of knowledge) विद्यारम्भान् or विद्यातत्त्वानि शिक्ष् (c. 10. शिक्षयति -यितुं); 'in grammar,' व्याकरणारम्भान् शिक्ष्.

To GROUND, *v. n.* (As a ship) उत्कूल (nom. उत्कूलयति -यितुं), उत्कूलीभू.

GROUND, *p. p.* (Reduced to powder) चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, पिष्टः -ष्टा -ष्टं, निष्पिष्टः -ष्टा -ष्टं, सम्पिष्टः -ष्टा -ष्टं, मर्दितः -ता -तं, विमर्दितः -ता -तं, मृदितः -ता -तं, परिमृदितः -ता -तं, क्षोदितः -ता -तं, क्षोदीकृतः -ता -तं, क्षुण्णः -ण्णा -ण्णं, खण्डितः -ता -तं, गुण्डितः -ता -तं, रूपितः -ता -तं, घर्षितः -ता -तं, घृष्टः -ष्टा -ष्टं.

GROUNDED, *p. p.* (Run aground) उत्कूलितः -ता -तं; 'grounded on the rudiments of knowledge,' सुशिक्षितविद्यारम्भः -म्भा -म्भं; 'in grammar,' स्वधीतव्याकरणः -णा -णं.

GROUND-FLOOR, *s.* गृहस्य अधःकोष्ठाः *m. pl.* or भूमिष्ठाः शालाः *f. pl.* or भूमिष्ठो भागः or भूमिष्ठभागाः, गृहतलं, गृहतलिमं, गृहकुट्टिमं.

GROUND-IVY, *s.* नीलपुष्पः क्षुद्रलताविशेषः.

GROUNDLESS, *a.* निर्मूलः -ला -लं, अमूलः -ला -लं -लकः -का -कं, निर्हेतुः -तुः -तु, अहेतुकः -का -कं, निष्प्रयोजनः -ना -नं, निर्निमित्तः -त्ता -त्तं, निष्कारणः -णा -णं, अनर्थकः -का -कं; 'groundless charge,' मिथ्याभियोगः; 'groundless enmity,' शुष्कवैरं.

GROUNDLESSLY, *adv.* निष्कारणं, अकारणं, हेतुना विना, हेतुं विना, निष्प्रयोजनं, कारणं विना, प्रयोजनं विना, मिथ्या.

GROUNDLESSNESS, *s.* अहेतुता, निर्हेतुता, निष्कारणत्वं, अकारणं, निर्मूलत्वं, निर्निमित्तत्वं.

GROUND-PLOT, *s.* गृहभूमिः *f.*, वेश्मभूः *f.*, वास्तुः *m.* -स्तु, कुट्टिमं, तलिमं.

GROUND-RENT, *s.* भूमिकरः, भूमिशुल्कः -ल्कं, भूस्वामिग्राह्यः शुल्कः.

GROUNDS, *s. pl.* (Dregs) मलं, किट्टं, उच्छिष्टं, शेषं, खलं, कल्कं, कलङ्कः, असारः.

GROUNDSEL, *s.* क्षुद्रपक्षिखाद्य ओषधिभेदः.

GROUNDSIL, *s.* देहली, गृहावग्रहणी, गृहतटी.

GROUNDWORK, *s.* मूलं -लत्वं, आरम्भः, प्रारम्भः, आदिकर्म्म *n.* (न्), मूलकर्म्म *n.*

GROUP, *s.* सङ्घः, समूहः, सङ्घातः, समुदायः, समवायः, सञ्चयः, गणः, गुल्मः, गुच्छः -च्छकः, गुत्सः, स्तवकः, ओघः, वृन्दं; 'a group of people,' जनसमूहः, जनौघं, जनसङ्घः, जननिवहः, जनता; 'of houses,' सङ्घवनं, सङ्घचितिः *f.*, चतुःशालं; 'of flowers,' पुष्पगुत्सः; 'in groups,' सङ्घशम्, गुल्मशम्.

To GROUP, *v. a.* सङ्घशः कृ, एकत्र कृ, एकीकृ, सङ्घीकृ, समूहीकृ, गुल्मीकृ, वृन्दीकृ, गणीकृ, सञ्चि (c. 5. -चिनोति -चेतुं).

GROUPED, *p. p.* कृतसङ्घः -घा -घं, कृतसमूहः -हा -हं, गणीभूतः -ता -तं.

GROUSE, *s.* वन्यपक्षिभेदः, जङ्गलप्रियः कृष्णवर्णः पक्षिभेदः.

GROUT, *s.* (Coarse meal) घनशक्तुः *m.*—(Lees) उच्छिष्टं, शेषं, किट्टं, असारः.

GROVE, *s.* वनं, उपवनं, काननं, विपिनं, वृक्षवाटिका, वृक्षजालं, वनिका, वनान्तः, आरामः, गहनं, अरण्यं, अटविः *f.* -वी, वृक्षखण्डं, वृक्षलतायाः प्रपावनं; 'a grove near a house,' गृहारामः, निष्कुटः; 'a number of groves,' वन्या, वनसमूहः.

To GROVEL, *v. n.* क्षोटवद् भूमौ मृप् (c. 1. मर्षति, सम्र्), सर्पवद् उरसा चल् (c. 1. चलति -लितुं). उरोगमनं कृ.—(Act in a mean manner) नीचवत् or अधमवत् or अपकृष्टवत् or निकृष्टवद् आचर (c. 1 -चरति -रितुं), तुच्छीभू.

GROVELING, *part.* or *a.* (Creeping) भूमौ मर्षी -र्षिणी -र्षि (न्).—(Abject) नीचः -चा -चं, अधमः -मा -मं, निकृष्टः -ष्टा -ष्टं, अपकृष्टः -ष्टा -ष्टं, कृपणः -णा -णं, अधमाचारः -रा -रं, क्षुद्रः -द्रा -द्रं, तुच्छः -च्छा -च्छं.

To GROW, *v. n.* (As a plant) रुह् (c. 1. रोहति, रोढुं), प्ररुह्, संरुह्, स्फुट् (c. 6. स्फुटति -टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं): 'the lotus does not grow on the top of mountains,' न पर्वताग्रे नलिनी प्ररोहति.—(Increase) वृध् (c. 1. वर्धते -र्धितुं), विवृध्, संवृध्, अभिवृध्, प्रवृध्, परिवृध्, संविवृध्, एध् (c. 1. एधते -धितुं), समेध्, ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, ऋधितुं), उपचि in pass. (-चीयते), पै (c. 1. प्यायते, प्यातुं), आप्ये, पुष् (c. 4. पुष्यति, पोषुं), स्फाय् (c. 1. स्फायते -यितुं), आस्फाय्, वृद्धिम् इ (c. 2. एति -तुं) or या (c. 2. याति -तुं), स्फीतीभू.—(Extend) विस्तृ in pass. (-स्तीर्य्यते), व्याप् (c. 5. -आप्नोति -आप्तुं), विततीभू.—(Improve) आगमं कृ: 'in knowledge,' विद्यागमं कृ, विद्याप्राप्तिं कृ.—(Become) भू, सम्भू, जन् (c. 4. जायते) 'to grow fat,' स्थूलीभू, पीवरीभू, पुष्टीभूः 'to grow lean,' कृशीभू, कृशाङ्गः -ङ्गी -ङ्गं भू.—(Proceed from, arise) जन्, उपजन्, प्रजन्, सञ्जन्, विजन्, अभिजन्, उत्पद् (c. 1. -पद्यते -पत्तुं), उदि (c. 1. -अयति -एतुं), उद्भू, प्रभ्, सम्भू.—(Grow up, arrive at manhood) प्रौढीभू, अतीतशैशवः -वा -वं भू.—(Grow old) जॄ (c. 4. जीर्य्यति, जरितुं -रीतुं), जीर्णीभू.

To GROW, *v. a.* (Cause to grow) रुह् in caus. (रोपयति -यितुं) निरुह्, संरुह्, वृध् in caus. (वर्धयति -यितुं).

GROWER, *s.* रोपयिता *m.* (तृ), वर्धकः; 'of trees,' वृक्षरोपयिता *m.*

GROWING, *part.* (As a plant, &c.) रोही -हिणी -हि (न्), रुहः -हा -हं, प्रजनिष्णुः -ष्णुः -ष्णु, उद्भवः -वा -वं or प्रभवः -वा -वं or भवः -वा -वं or जः जा जं or उत्थः -त्था -त्थं or जातः -ता -तं or भूः भूः भु in comp.; as, 'growing in water,' जलरुहः -हा -हं, जलरुह् *m. f. n.* (ह्), जलोद्भवः -वा -वं, जलजः -जा -जं -जातः -ता -तं, जलभूः -भूः -भु; 'growing on the rocks,' शिलाभवः -वा -वं, शिलोत्थः -त्था -त्थं, शिलाजः -जा -जं; 'growing on the head,' शिरोरुहः -हा -हं.—(Increasing) वर्धमानः -ना -नं, वर्धी -र्धिनी -र्धि (न्), वर्धनः -नी -नं, वर्धिष्णुः -ष्णुः -ष्णु, एधमानः -ना -नं, उपचीयमानः -ना -नं, विस्तीर्य्यमाणः -णा -णं, विजृम्भाणः -णा -णं; 'growing in size,' वर्धमानशरीरः -रा -रं, प्रचीयमानावयवः -वा -वं; 'growing old,' जीर्य्यन् -र्य्यन्ती -र्य्यत् (त्).

GROWL, *s.* गर्जनं, गर्जितं, पुरोरुरा, घर्घरितं, भषणं, रायणं, रुतं.

To GROWL, *v. n.* गर्ज् (c. 1. गर्जति -र्जितुं), अभिगर्ज्, परिगर्ज्, गर्जनं कृ, घुर्घुरां कृ, भष् (c. 1. भषति -षितुं), रै (c. 1. रायति, रातुं), घुर् (c. 6. घुरति -रितुं).

GROWN, *p. p.* रूढः -ढा -ढं, वर्धितः -ता -तं, प्ररूढः -ढा -ढं, संवर्धितः -ता -तं, प्रवृद्धः -द्धा -द्धं, उपचितः -ता -तं, एधितः -ता -तं, समेधितः -ता -तं, समृद्धः -द्धा -द्धं, स्फीतः -ता -तं, आप्यायितः -ता -तं, चूंहितः -ता -तं.—(Produced) जातः -ता -तं, उत्पन्नः -न्ना -न्नं, उपजातः -ता -तं.—(Grown in size) वर्धितदेहः -हा -हं, प्ररूढकायः -या -यं.—(Full grown) प्रौढः -ढा -ढं, प्रौढशरीरः -रा -रं, प्रवृद्धः -द्धा -द्धं, गतशैशवः -वा -वं, अतीतशैशवकालः -ला -लं, वयःप्राप्तः -प्ता -प्तं, वृद्धः -द्धा -द्धं.

GROWTH, *s.* रूढिः *f.*, प्ररूढिः *f.*—(Increase) वृद्धिः *f.*, वर्धनं, विवृद्धिः *f.*, विवर्धनं, प्रवृद्धिः *f.*, वृद्धिः *f.*, उपचयः, स्फातिः *f.*, स्फीतिः *f.*, अभ्युदयः, समुत्थानं, आप्यायनं, विस्तारः, व्याप्तिः *f.*—(Production) उत्पत्तिः *f.*, उत्पादनं, जन्म *n.* (न्), जननं, प्रजननं, उद्भवः, प्रभवः.—(Improvement) वृद्धिः, आगमः.—(Full growth) प्रौढिः *f.*, प्रौढता, प्रवृद्धता.

To GRUB, *v. n.* खन् (c. 1. खनति -नितुं); 'grub up,' उत्खन्, प्रोत्खन्.

GRUB, *s.* कीटः, कृमिः *m.*, कीटडिंभः, कीटाखर्जं, कोशस्थः.—(Dwarf, short, thick man) वामनः, खर्वः, ह्रस्वस्थूलः.

GRUBBER, *s.* खनकः, खनिता *m.* (तृ).—(Instrument) खनित्रं, खात्रं.

To GRUBBLE, *v. n.* अन्धकारे हस्तेन परामृश् (c. 6. -मृशति -ष्टुं) or सालभ् (c. 1. -लभते -लब्धुं) or स्पर्शेन निरूप् (c. 10. -रूपयति -यितुं).

To GRUDGE, *v. a.* and *n.* (Envy) असूय् (nom. असूयति -ते -यितुं), ईर्ष्यै (c. 1. ईर्ष्यति -र्ष्यितुं), स्पृह् (c. 10. स्पृहयति -यितुं), अभिलष् (c. 1. -लषति, c. 1. -लष्यति -षितुं), न सह् (c. 1. सहते, सोढुं), न मृष् (c. 4. मृष्यति, मर्षितुं), मात्सर्यं कृ.—(Give or take unwillingly) अकामतस् or अकामेन or अनिच्छातो दा or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Do any thing reluctantly or grudgingly) अकामतस् or अनिच्छातस् or दुःखेन or कृच्छ्रेण or सामूर्यं or असूयया किंचित् कृ.—(Refuse) प्रत्याख्या (c. 2. -ख्याति -तुं).—(Complain, murmur) विलप् (c. 1. -लपति -पितुं).

GRUDGE, *s.* (Malice, ill-will) मात्सर्यं, असूया, अभ्यसूया, ईर्ष्या, द्रोहः, द्रोहचिन्तनं, दुष्टभावः.—(Enmity) वैरं, वैरिता, वैरभावः.—(Hatred) द्वेषः, विद्वेषः, विद्विष्टता, दीर्घद्वेषः, चिरद्वेषः, द्वेष्यता.

GRUDGINGLY, *adv.* सामूर्यं, असूयया, अभ्यसूयया, मात्सर्येण, समात्सर्यं, दुष्टभावेन, सकामतस्, सकामं -मेन, अनिच्छातस्, दुःखेन, कृच्छ्रेण, कातर्येण.

GRUEL, *s.* काम्बलिकः.—(Rice-gruel) यवागूः *f.*, आरग्वधं, तरला, विलेपी, उष्णिका, सिद्धजलं.—(Sour gruel) आरनालं -लकं, सौवीरं, कुल्माषं, कुल्मासः, कुल्माषाभिषुतं, अभिषवं, सभिषुतं, काम्बिका -कं, काम्बिकं, काम्बीकं, कुजलं, धान्याम्लं, अवन्तिसोमं.

GRUFF, *a.* कर्कशस्वभावः -वा -वं, कर्कशः -शा -र्शं, रूक्षः -क्षा -क्षं, परुषः -षा -षं, निष्ठुरः -रा -रं, कटुः -टुः -टुः, कठोरः -रा -रं, कठिनः -ना -नं.—(As tone) मन्द्रः -न्द्रा -न्द्रं, आमन्द्रः -न्द्रा -न्द्रं, गम्भीरः -रा -रं; 'a gruff voice,' गम्भीरस्वरः.

GRUFFLY, *adv.* कर्कशं, रूक्षं, परुषं, निष्ठुरं, कठिनं, कठोरं, मन्द्रं.

GRUFFNESS, *s.* कर्कशत्वं -ता, कार्कश्यं, रूक्षता, रौक्ष्यं, परुषता, निष्ठुरत्वं, नैष्ठुर्यं, कटुत्वं, कठोरता, काठिन्यं, स्वभावकटुता.—(Of tone) मन्द्रता, गम्भीरता, गाम्भीर्यं.

To GRUMBLE, *v. n.* (Make a low, harsh sound) गर्ज् (c. 1. गर्जति -र्जितुं), परिगर्ज्, गर्जनं कृ, स्तन् (c. 1. स्तनति -नितुं), स्तनितं कृ, घुर् (c. 6. घुरति -रितुं), गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), मन्द्रशब्दं कृ, गम्भीरशब्दं कृ.—(Complain discontentedly) असन्तुष्टत्वाद् विलप् (c. 1. -लपति -पितुं) or परिदेव् (c. 1. -देवते -वितुं).

GRUMBLER, *s.* असन्तुष्टत्वात् सदापरिदेवी *m.* (न्), असन्तुष्टजनः.

GRUMBLING, *s.* गर्जनं, गर्जितं, परिगर्जनं, स्तनितं, स्तननं, मन्द्रशब्दः, गम्भीरशब्दः, गम्भीरनादः, गम्भीरध्वनिः *m.*, गभीरशब्दः.—(Sound of complaint) परिदेवनं -वितं, विलपनं.

GRUMBLING, *part.* गम्भीरनादी -दिनी -दि (न्), मन्द्रशब्दकारी -रिणी -रि (न्).

GRUME, *s.* गुल्मः, पिण्डः -ण्डं, घनता; 'of blood,' रक्तगुल्मः, घनलोहितं.

GRUMOUS, *a.* पिण्डीभूतः -ता -तं, घनीभूतः -ता -तं, श्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, गुल्मी -ल्मिनी -ल्मि (न्); 'grumous blood,' घनलोहितं.

To GRUNT, *v. n.* शूकरवद् घर्घरितं कृ or कखनादं कृ or गम्भीरनादं कृ, गर्ज् (c. 1. गर्जति -र्जितुं), घुर्घुराशब्दं कृ.

GRUNT, GRUNTING, *s.* घर्घरितं, शूकरनादः, शूकरगर्जितं, शूकरस्य कखनादः or गम्भीरनादः.

GRUNTLING, *s.* शूकरशावकः, शूकरशिशुः *m.*, बालशूकरः.

GUARANTEE, *s.* (One who is surety for another) प्रतिभूः *m.*, प्रतिनिधिः *m.*, मध्यस्थः.—(Security) प्रातिभाव्यं, पारिभाव्यं, प्रात्ययिकः, प्रत्ययकारिणी, लग्नकः, बन्धकः.

To GUARANTEE, *v. a.* प्रतिभूः or प्रतिनिधिः भू, प्रातिभाव्यं कृ, पारिभाव्यं कृ, लग्नकं or प्रात्ययिकं or बन्धकं दा, प्रत्ययं कृ.

To GUARD, *v. a.* and *n.* रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, पाल् or पा (c. 10. पालयति -यितुं, c. 2. पाति -तुं), अनुपाल्, परिपाल्, प्रतिपाल्, सम्पाल्, अभिपाल्, उपपाल्, गुप् (c. 1. गोपायति, गोप्तुं, c. 10. गोपयति -यितुं), अनुगुप्, अभिगुप्, प्रगुप्, अभिसङ्गुप्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै, अव् (c. 1. अवति -वितुं), पर्याप् in des. (-ईप्सति -प्तितुं), परिप्राप्.—(Ward off) वृ (c. 10. वारयति -यितुं), निवृ.—(Guard against) अवधा (c. 3. -धत्ते -धातुं), अवहितः -ता -तं भू, सावधानः -ना -नं भू, अवधानं कृ; 'guard against avarice,' लोभात् सावधानो भव.—(Keep guard) रक्षां कृ, रक्षायै जागृ (c. 2. जागर्ति, जागरितुं).

GUARD, *s.* (Act of guarding) रक्षणं, रक्षा, रक्षणः, पालनं, त्राणं, गुप्तिः *f.*, गोपनं, अवनं.—(A sentry) रक्षकः, रक्षी *m.* (न्), सैन्यः, सैनिकः, सेनारक्षः, परिचरः, उपरक्षणं, परिधिस्थः, रक्षिवर्गः, अनीकस्थः, सज्जनं; 'captain of the guards,' गुल्मस्थानाधिकारी *m.* (न्), गुल्मस्थानाधिपः, रक्षाधिकृतः.—(That which protects any part of the body from injury) त्राणं, त्रं affixed, त्रारणं; 'a finger-guard,' अङ्गुलित्राणं, अङ्गुलित्रं; 'guard for the arm in shooting,' गोधा, तलं -ला, ज्याघातवारणं; 'to stand on one's guard,' सावधानः -ना -नं or सचेतनः -ना -नं स्था or भू; 'be on your guard,' सावधानो भव, सावहितो भव.

GUARD-ROOM, *s.* उल्लाटः, रक्षकाणां वासागारं, सैन्यस्थानं, सैनिकशाला.

GUARDABLE, *a.* रक्षणीयः -या -यं, रक्ष्यः -क्ष्या -क्ष्यं, पालनीयः -या -यं.

GUARDED, *p. p.* रक्षितः -ता -तं, अभिरक्षितः -ता -तं, पालितः -ता -तं, उपपालितः -ता -तं, गुप्तः -प्ता -प्तं, गोपायितः -ता -तं, त्रातः -ता -तं त्राणः -णा -णं, अवितः -ता -तं.—(Cautious) अवहितः -ता -तं, सावहितः -ता -तं, सावधानः -ना -नं.

GUARDEDLY, *adv.* सावधानं, अवधानेन, अवहितं, सावहितं, सुविमृश्य.

GUARDEDNESS, *s.* अवधानता, सावधानता, सावहितत्वं, समीक्ष्यकारित्वं.

GUARDER, *s.* रक्षकः, रक्षी *m.* (न्), परिरक्षी *m.*, रक्षिता *m.* (तृ), पालयिता *m.* (तृ), पालकः, पालः -ली *m.* (न्), गोप्ता *m.* (तृ), गोपः -पकः, गोपायकः, गोपी *m.* (न्), गोपिलः, त्राता *m.* (तृ), पः in comp.

GUARDFUL, *a.* सावधानः -ना -नं, अवहितः -ता -तं, सावहितः -ता -तं.

GUARDIAN, *s.* पालकः, प्रतिपालकः, रक्षकः, गोप्ता *m.* (तृ), पालः, नाथः, अध्यक्षः.—(Of an orphan) पितृस्थानः -नीयः, मातृपितृस्थानः, नाथः; 'guardian deity,' लोकपालः -लकः.

GUARDIANSHIP, *s.* रक्षणं, रक्षा, रक्षकत्वं, पालकत्वं, रक्षितृपदं.

GUARDSHIP, *s.* रक्षणं, रक्षा, पालनं, त्राणं, गुप्तिः *f.*, गोपनं.

GUDGEON, *s.* वडिशग्रहारेण सुग्रहणीयः क्षुद्रमत्स्यभेदः.—(A person easily cheated) सुवञ्चनीयः, सुप्रतारणीयः.

GUERDON, *s.* फलं, प्रतिफलं, पारितोषिकं, वेतनं.

To GUESS, *v. a.* and *n.* अनुमा (c. 2. -माति, c. 4. -मायते, c. 3. -मिमीते -मातुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, ऊह् (c. 1. ऊहते -हितुं), अवगम् (c. 1. -गच्छति -गन्तुं), शङ्क् (c. 1. शङ्कते -ङ्कितुं), अनिर्णयपूर्वम् अनुभू, अनिश्चयपूर्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रदृश् (c. 1. -पश्यति -द्रष्टुं) or विवेचनां कृ or मन् (c. 4. मन्यते, मन्तुं).

GUESS, *s.* अनुमानं, अनुमितिः *f.*, अनुमानोक्तिः *f.*, वितर्कः -र्कणं, ऊहा -हनं, शङ्का, अनुभवः, अनुभूतिः *f.*, अनिश्चयपूर्वं निरूपणं, अनिर्णयपूर्वा विवेचना, अदृष्टप्रमाणः परामर्शः, अवगतिः, उपलम्भिः *f.*, उपलब्धयः.

GUESSED, *p. p.* अनुमितः -ता -तं, वितर्कितः -ता -तं, शङ्कितः -ता -तं.

GUESSER, *s.* अनुमाता *m.* (तृ), अनुमानकर्त्री *m.* (त्रे), वितर्ककः.

GUEST, *s.* अतिथिः *m. f.* -थी *f.*, अभ्यागतः, अभ्यागतजनः, गृहाभ्यागतः, गृहागतः, आगन्तुः *m. f.*, आगान्तुः, आगन्तुकः -का -कं, आवेशिकः -की -कं, प्राघुणः, प्राघुणिकः, प्रघुणः, साङ्गतिकः; 'proper for a guest,' आतिथ्यः -थ्यी -थ्यं, आतिथेयः -यी -यं.

GUEST-CHAMBER, *s.* अतिथिशाला, अतिथिसत्कारयोग्या शाला.

GUEST-RITE, *s.* अतिथिसत्कारः -सक्रिया, अतिथिक्रिया, अतिथिमेघा.

To GUGGLE, *v. n.* *See* GURGLE.

GUIDANCE, *s.* नयः, नायः, नीतिः *f.*, प्रणयनं, नेतृत्वं, विनियमः, पथदर्शनं.—(Direction) निर्देशः, निदेशः, उपदेशः, शास्तिः *f.*, शासनं, अनुशास्तिः *f.*, अनुशासनं, विधानं; 'good guidance,' सुनयः, सुनीतिः *f.*

HELVE, *s.* परशुदण्डः, दण्डः, वारङ्गः, तलः, मुष्टिः *m.* -ष्टी.

To HELVE, *v. a.* परशुं दण्डेन युज् (c. 10. योजयति -यितुं).

HEM, *s.* (Of a garment) अञ्चलः, वस्त्राञ्चलः -लं, दशा, वसनदशा, वस्तिः *m.*, तरी, माटिः *f.*, चीरी, शुकं, वसनग्रन्थिः *m.*, वसनप्रान्तः, वसनान्तः.—(Clearing the throat) उत्कासनं.

To HEM, *v. a.* अञ्चल (nom. अञ्चलयति -यितुं), अञ्चलं सिव् (c. 4. सीव्यति, सेवितुं), अञ्चलं कृ.—(Clear the throat) उत्कास् (c. 1. -कासते -सितुं), उत्कासनं कृ.

To HEM IN, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिवृ (c. 5. -वृणोति -वरितुं -रीतुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्.

HEMMED IN, *a.* परिवेष्टितः -ता -तं, परिवृतः -ता -तं, प्रतिरुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, प्रतिच्छन्नः -न्ना -न्नं, सङ्कुलः -ला -लं.

HEMICYCLE, *s.* अर्द्धचक्रं, अर्द्धगोलः, अर्द्धावृत्तिः *f.*

HEMIPLEGY, *s.* पक्षाघातः, अर्द्धाङ्गाघातः, अर्द्धाङ्गकायुः *m.*

HEMISPHERE, *s.* अर्द्धगोलः, अर्द्धमण्डलं, भूगोलस्य अर्द्धभागः, अर्द्धभुवनं.

HEMISPHERICAL, *a.* अर्द्धगोलाकारः -रा -रं, अर्द्धमण्डली -लिनी -लि (न्).

HEMISTICH, *s.* अर्द्धश्लोकः, श्लोकार्द्धं, अर्द्धपद्यं.

HEMLOCK, *s.* पृष्ठकाले प्रसिद्धो विषप्रधाने प्रयुक्तस् तीक्ष्णौषधिभेदः.

HEMORRHAGE, HEMORRHAGY, *s.* रक्तस्रावः, रुधिरस्रावः, रक्तातीसारः, असृक्स्रावः, रक्तक्षरणं.

HEMORRHOIDS, *s.* अर्शस् *n.*, अर्शं, अर्शोरोगः, गुदाङ्कुरः, गुदकीलः, गुदरोगः.

HEMP, *s.* शणं, भङ्गा, मातुलानी, इन्द्राशनः, अजया, मल्लपर्णिः *m.*

HEMPEN, *a.* शाणः -णी -णं, भाङ्गीनः -ना -नं, शणमयः -यी -यं, शणसूत्रमयः -यी -यं; 'a hempen cord,' शणसूत्रं.

HEMP-FIELD, *s.* भङ्गाक्षेत्रं, भाङ्गीनक्षेत्रं, शणक्षेत्रं, भङ्गाक्षेत्रं.

HEMP-SEED, *s.* शणबीजं, भाङ्गीनबीजं, पक्षिखाद्यं क्षुद्रबीजं.

HEN, *s.* कुक्कुटी, कुक्कुटवधूः *f.*, पक्षिणी, ग्राम्यकुक्कुटी.

HEN-COOP, *s.* ग्राम्यकुक्कुटादिरक्षणार्थं पिञ्जरं or वीतंसः, कुक्कुटपालिका, कुक्कुटपिञ्जरं.

HEN-HEARTED, *a.* भीरुहृदयः -या -यं, कुक्कुटीव भयशीलः -ला -लं.

HEN-HOUSE, *s.* कुक्कुटपालिका, कुक्कुटगृहं, कुक्कुटागारं.

HEN-PECKED, *a.* स्त्रीजितः -ता -तं, स्त्रीवशः -शा -शं, स्त्रीवशवर्त्ती -र्त्तिनी

-र्त्ति (न्), दयिताधीनः-ना-नं, स्त्रीविधेयः-या-यं, भार्य्याटिकः, काकरुकः, कावरुकः-की-कं.

HEN-ROOST, *s.* कुक्कुटालयः, कुक्कुटनिलयः, कुक्कुटनिवासस्थानं.

HENCE, *adv.* (From this place) इतस्; 'begone hence!' अपैहि, अपसर, दूरम् अपसर.—(From this time) अद्यारभ्य, अतःपरं, एतत्कालादारभ्य, अत ऊर्द्ध्वं.—(From this cause) तस्मात्, अतस्, अस्मात्, अतएव, अमुतस्.—(For this reason) अतःकारणात्, अनेन हेतुना, तस्य हेतोः.—(In another place) अन्यतस्, अन्यत्र, अपरतस्, इतरतस्.

HENCEFORTH, HENCEFORWARD, *adv.* अद्य प्रभृति, अद्यारभ्य, अद्यावधि, अधुनारभ्य, एतत्कालादारभ्य, एतद्दिनादारभ्य, अतःपरं, अतःप्रभृति, इतःपरं.

HEPTAGON, *s.* सप्तास्रं -स्री, सप्तकोणः -णं, सप्तभुजः, सप्तकोणा मूर्त्तिः.

HEPTAGONAL, *a.* सप्तास्रः -स्रा -स्रं, सप्तकोणः -णा -णं, सप्तभुजः -जा -जं.

HER, *pron.* तां acc. c. *f.* (तद्), इमां acc. c. *f.* (इदं); 'of her,' तस्याः, अस्याः; as, 'her house,' तस्या गृहं; 'her own,' expressed by स्व; as, 'her own house,' स्वगृहं.

HERALD, *s.* वन्दी *m.* (न्), राजदूतः, सन्दिष्टार्थः, राजसन्देशहरः, राजवार्त्ताहरः, अग्रेसरः -री *m.* (न्), अग्रगामी *m.* (न्), राजघटकः.

HERALDICK, *a.* वंशावलीसूचकः -का -कं, कुलीनपदचिह्नविषयः -या -यं.

HERALDRY, *s.* कुलीनपदचिह्नविषया विद्या, वंशावलीविषयका विद्या.

HERB, *s.* ओषधिः -धी *f.*, शाकः, तृणं, लता, हरितकं, अर्भः, कन्दः.

HERBACEOUS, *a.* (Relating to herbs) शाकतृणादिविषयः -या -यं, तृणसः -सा -सं.—(Eating herbs) शाकतृणादिभोजी -जिनी -जि (न्).

HERBAGE, *s.* तृणं, घासः, यवसः, गवादनं, गवादिखाद्यं, क्षेत्रियं.

HERBAL, *s.* शुष्कौषधिपुस्तकं, शुष्कतृणादिपुस्तकं, वृक्षतृणादिविवरणपुस्तकं, शुष्कतृणादिविषयो ग्रन्थः, वृक्षायुर्वेदः.

HERBALIST, *s.* शाकतृणादिविषयशास्त्रज्ञः, ओषधितृणादिनामगुणादितत्त्वज्ञः, शुष्कौषधिसङ्ग्राहकः, वृक्षायुर्वेदज्ञः.

HERBARIUM, *s.* शुष्कौषधिपुस्तकं, शुष्कौषधिसङ्ग्रहः, शुष्कौषधयः *f. pl.*

To HERBALIZE, *v. n.* शुष्कौषधिसङ्ग्रहं कृ, ओषधितृणाद्यन्वेषणार्थं भ्रमणं कृ.

HERBELET, *s.* ओषधिकः, क्षुद्रौषधिः *f.*, क्षुद्रलता.

HERBESCENT, *a.* ओषधिरूपेण रोही -हिणी -हि (न्), ओषधितृणादिमध्ये जातः -ता -तं.

HERBID, *a.* तृणाद्यावृतः -ता -तं, तृणादिविशिष्टः -ष्टा -ष्टं.

HERBOUS, *a.* तृणादिमयः -यी -यं, ओषधिशाकादिमयः -यी -यं.

HERB-WOMAN, *s.* शाकादिविक्रेत्री स्त्री, शाकादिविक्रयिणी.

HERBY, *a.* शाकतृणादिसगुणः -णा -णं, शाकादिगुणविशिष्टः -ष्टा -ष्टं.

HERCULEAN, *a.* अत्यन्तबलवान् -वती -वत् (त्), अतिशक्तिमान् -मती -मत् (त्), अतिप्रबलः -ला -लं, अतिवृहन् -हती -हत् (त्), अतिदुष्करः -री -रं.

HERD, *s.* (Collection of animals) यूथं, गणः, सङ्घः, सङ्घातः, समूहः, कुलं, वृन्दं, व्रजः, संहतिः *f.*, कदम्बकं, ओघः, निवहः, समुदायः, समुदयः, समाहारः, निकरः, समवायः, सञ्चयः, सार्थः, विसरः, वारः, निकायः, निकुरुम्बं -म्बकं, समजः, सन्दोहः; 'herd of cattle,' पशुगणः, गोकुलं, गोवृन्दं, गव्या, गोत्रा, पाशवं; 'herd of swine,' शूकरगणः, शूकरनिवहः, वराहव्रजः; 'a herd of elephants,' हास्तिकं; 'a herd of calves,' वात्सकं; 'of oxen,' औक्षकं, उक्षणां संहतिः; 'of milch cows,' धैनुकं, 'rich in herds of cattle,' गोमान् -मती -मत् (त्), गोमी -मिनी -मि (न्).—(Company of men) जनसमूहः, पुरुषगणः.

To HERD, *v. n.* पशुयूथवद् एकत्र मिल् (c. 6. मिलति, मेलितुं), यूथशः सङ्गम् (c. 1.- गच्छति -गन्तुं) or समागम् or समे (c. 2. समैति -तुं, rt. इ), एकीभू, एकत्र भू, एकौघीभू, समूहीभू, सङ्कुलीभू.

HERDSMAN, *s.* गोपालः, पशुपालः, गोरक्षः -क्षकः, पशुरक्षी *m.* (न्), गोचारकः, यूथपतिः *m.*, गोपः, गोसंख्यः; 'his business,' पाशुपाल्यं, पशुपालनं, पशुरक्षणं; 'herdsman's wife,' गोपी.

HERE, *adv.* (In this place) अत्र, इह, इहस्थाने, अस्मिन् देशे.—(In this world) इह, इहलोके, इहकाले; 'in this world and the next,' इहामुत्र; 'on this occasion,' इहसमये; 'here am I,' सोऽहं, एषोऽस्मि; 'here we are,' इमे स्मः; 'here and there,' इतस्ततस्, इतश्चेतस्, प्रतिदेशं.

HEREABOUTS, *adv.* अत्र, इह, इहसमीपे, इहस्थानसमीपे, अत्रोपान्ते, अत्रान्तिके, इहस्थानोपान्ते.

HEREAFTER, *adv.* अतःपरं, अत ऊर्द्ध्वं, ततः परं, इतःपरं, परं, परम्, परतस्, अपरं, अनन्तरं, एतदनन्तरं, तदनन्तरं, परस्तात्, पश्चात्, तत्पश्चात्, एतत्पश्चात्, उत्तरतस्, उत्तरत्र, परकाले, अपरकाले, अतस्, ततस्, पुरा; 'in the next world,' परत्र, अमुत्र, प्रेत्य, परलोके; 'in the sequel,' अग्रे.

HEREAFTER, *s.* परकालः, अपरकालः, उत्तरकालः, भविष्यत्कालः, भाविकालः, आगामिकालः.

HEREAT, *adv.* अतस्, ततस्, तदनन्तर, अत्रान्तरे.

HEREBY, *adv.* तेन, एतेन, तद्द्वारा, तद्द्वारेण, तस्मात्.

HEREDITAMENT, *s.* दायः, पैतृकं रिक्थं, गोत्ररिक्थं, अधिकारः.

HEREDITARILY, *adv.* पारम्पर्य्येण, क्रमागमेन, वंशक्रमेण, परम्परतस्, परम्परं.

HEREDITARY, *a.* परम्परीणः -णा -णं, पारम्परीयः -या -यं, परम्परः -रा -रं, परम्परागतः -ता -तं, क्रमागतः -ता -तं, क्रमायातः -ता -तं, पैतृकः -की -कं, कौलिकः -की -कं, कुलजः -जा -जं, परम्परप्राप्तः -प्ता -प्तं.—(As disease) सञ्चारी -रिणी -रि (न्), शुक्रशोणितद्वारेणानुप्रविशन् -शन्ती -शत् (त्); 'hereditary estate,' पैतृकभूमिः *f.*, वंशभोज्यं; 'hereditary succession,' क्रमागतत्वं; 'hereditary servant,' मूलभृत्यः.

HEREFROM, *adv.* अतस्, अतःकारणात्, तस्मात्, अस्य हेतोः.

HEREIN, *adv.* अत्र, इह, इहविषये, अस्मिन् विषये, अस्मिन् अथ.

HEREON, *adv.* अत्रोपरि, तत्रोपरि, अतस्, अत्रान्तरे.

HERESIARCH, *s.* विधर्म्मनायकः, वैधर्म्यपतिः *m.*, स्वधर्म्मपरित्यागं कारयित्वा परधर्म्मावलम्बनं कारयति यो जनः, धर्म्मत्यागप्रवर्त्तकः.

HERESY, *s.* विधर्म्मः, वैधर्म्यं, उपधर्म्मः, विधर्म्मसेवा, अपथः, विपथः, अपथगमनं, मिथ्यादृष्टिः *f.*, कुदृष्टिः *f.*, स्वधर्म्मपरित्यागपूर्व्वं परधर्म्मावलम्बनं or परधर्म्माश्रयः or परमतग्रहणं or मतान्तरप्रवेशः, नास्तिक्यं, नास्तिकता, देवनिन्दा, असच्छास्त्रानुष्ठानं.

HERETIC, *s.* पाषण्डः -ण्डकः -ण्डी *m.* (न्), अपथगामी *m.* (न्), अपथवर्त्ती *m.* (न्), विधर्म्मसेवी *m.* (न्), उपधर्म्मसेवी *m.*, उपधर्म्मः, विधर्म्मावलम्बी *m.* (न्), परधर्म्मावलम्बी *m.*, स्वधर्म्मभ्रष्टः, स्वधर्म्मच्युतः, मतान्तरावलम्बी *m.*, नास्तिकः, देवनिन्दकः, वृष्णिः *m.*

HERETICAL, *a.* वैधर्म्मिकः -की -कं, पाषण्डधर्म्मा -र्म्मा -र्म्म (न्), अपथगामी -मिनी -मि (न्), विपथगामी &c., अपथवर्त्ती -र्त्तिनी -र्त्ति (न्), धर्म्मविरुद्धः -द्धा -द्धं.

HERETICALLY, *adv.* पाषण्डवत्, नास्तिकवत्, धर्म्मविरुद्धं, देवनिन्दकवत्.

HERETOFORE, *adv.* पूर्व्वं, पूर्व्वे, पूर्व्वकाले, प्राक्काले, पूर्व्वतस्, पुरा, प्राक्, भूतकाले, अतीतकाले, गतकाले, वर्त्तमानकालात् पूर्व्वं, इहसमयात् पूर्व्वं, इतःप्राक्.

HEREUPON, *adv.* अतस्, ततस्, अत्रोपरि, तत्रोपरि, अत्रान्तरे.

HEREWITH, *adv.* अनेन सह, एतेन सह, तेन सह, एतत्सहितं, एतेन समं.

HERIOT, *s.* भूस्वामिने देयो दण्डः or शुल्कविशेषः.

HERIOTABLE, *a.* पूर्व्वोक्तशुल्काधीनः -ना -नं.

HERITABLE, *a.* पितृप्राप्यः-प्या-प्यं, औद्धारिकः -की -कं, दाययोग्यः -ग्या -ग्यं.

HERITAGE, *s.* पैतृकधनं, पैतृकं रिक्थं, अधिकारः, पैतृकाधिकारः, दायः.

दायत्वं, गोत्ररिक्थं, पैतृकं, औद्धारिकं

HERMAPHRODITE, *s.* षण्ढः, शण्ढः, षण्डः, क्लीवः, अर्द्धेन पुरुषोऽर्द्धेन स्त्री.

HERMETICAL, *a.* रसायनीयः -या -यं, रसायनजः -जा -जं.

HERMETICALLY, *adv.* रसायनानुसारात्, रसायनरीत्यनुसारेण.—(Closely) सुदृढं, अतिदृढं, सुगाढं.

HERMIT, *s.* अरण्यवासी *m.* (न्), वनवासी *m.* (न्), वनस्थायी *m.* (न्), वनस्थः, वानप्रस्थः, योगी *m.* (न्), यती *m.* (न्), तपस्वी *m.* (न्), मुनिः *m.*, सन्न्यासी *m.* (न्), यतिः *m.*, वैखानसः, वनी *m.* (न्), उदासीनः, संसारत्यागी *m.* (न्), लोकत्यागी *m.*

HERMITAGE, *s.* आश्रमः, मुनिवासः, मुनिस्थानं, अरण्यवासः, पर्णशाला.

HERNIA, *s.* अन्त्रवृद्धिः *f.*, अन्त्रवृद्धिरोगः; 'umbilical hernia,' नाभिवर्द्धनः, नाभिगुडकः, नाभिगोलकः.

HERO, *s.* वीरः, शूरः, विक्रान्तः, महावीरः, प्रवीरः, दृढायुधः, युद्धवीरः, भटः, सुभटः, महौजाः *m.* (स्), औजसिकः, अतिरथः, रथी *m.* (न्), रथारोही *m.* (न्), युयुत्सुः *m.*, प्रयुत्सुः *m.*, शौटीरः, गण्डीरः, जेता *m.* (तृ), दमनः, चारभटः, वागरः, पत्तिः *m.*, त्यागी *m.* (न्), जजः.—(Of a drama, &c.) नायकः.

HEROIC, HEROICAL, *a.* वीर्य्यवान् -वती -वत् (त्), महावीर्य्यः -र्य्या -र्य्यं, वीरः -रा -रं, शूरः -रा -रं, प्रवीरः -रा -रं, विक्रान्तः -न्ता -न्तं, पराक्रान्तः -न्ता -न्तं, शौर्य्यवान् -वती -वत् (त्), शूरयोग्यः -ग्या -ग्यं, धामवान् &c., साहसिकः -की -कं; 'heroic poem,' वीरचरित्रविषयं काव्यं.

HEROICALLY, *adv.* शूरवत्, वीरवत्, सवीर्य्यं, महावीर्य्येण, शौर्य्येण, सशौर्य्यं, सपराक्रमं, सविक्रमं.

HEROINE, *s.* वीरा, शूरा, विक्रान्ता स्त्री, पराक्रान्ता स्त्री, वीर्य्यवती.—(Of a poem, &c.) नायिका, दिव्यादिव्या.

HEROISM, *s.* वीर्य्यं, शौर्य्यं, वीरत्वं, सुवीर्य्यं, शूरत्वं -ता, प्रवीरत्वं, विक्रमः, सुविक्रमः, पराक्रमः, वीर्य्यवत्त्वं, धाम *n.* (न्), वीरश्रीः *f.*, शौटीर्य्यं, शुटीर्य्यं, प्राधानिकं, प्राधान्यं, पौरुषं, साहसं, रणोत्साहः, जजौजस् *n.*, उत्साहवर्धनः, वीरः.

HERON, *s.* क्रौञ्चः, कङ्कः, कङ्कपक्षी *m.* (न्), वकः, दीर्घपाद् *m.*, आमिषप्रियः, लोहपृष्ठः, मत्स्यहारी *m.* (न्), प्रेयोपत्यः.

HERRING, *s.* हेरिङ्गनामा समुद्रीयमत्स्यभेदः.

HERS, *pron.* तस्याः gen. c. (तद्), अस्याः gen. c. (इदं), तदीयः -या -यं, or expressed by स्व in comp.

HERSELF, *pron.* सा एषा.

HESITANCY, *s.* सन्देहः, संशयः, विकल्पः, शङ्का, आशङ्का, चित्तास्थैर्य्यं, चलचित्तता.

To HESITATE, *v. n.* विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं), शङ्क् (c. 1. शङ्कते -ङ्कितुं), अभिशङ्क्, आशङ्क्, विशङ्क्, परिशङ्क्, विलस् (c. 1. -लसते -सितुं), विचर् (c. 10. -चारयति -यितुं), मनसा दोल (nom. दोलायते -यितुं) or आन्दोल (आन्दोलयति -यितुं), चिर (nom. चिरायति -ते, चिरयति -यितुं), सन्देहं कृ.

HESITATION, *s.* विकल्पः, शङ्का, सन्देहः, संशयः, आशङ्का, विकल्पितं, विचारणं, वितर्कः, चिन्ता, विशयः, द्वैधं, विचिकित्सा.—(In speaking) स्वरभेदः, स्वरभङ्गः, वाक्यस्खलनं, स्खलद्वाक्यं, गद्गदवाक् *f.*, गद्गदपदं, [illegible]नं; 'having a hesitation in the speech,' स्खलि[illegible] *m. f. n.* (च्), स्खलितवाक्यः -क्या -क्यं, स्खलद्वाक्यः -क्या -क्यं, भिन्नस्वरः -रा -रं, भग्नस्वरः -रा -रं.

HETEROCLITE, *a.* भिन्नविभक्तिः -क्तिः -क्ति, साधारणनियमबहिर्भूतः -ता -तं, विधिनिपातितः -ता -तं, साधारणविधिविपरीतः -ता -तं.

HETERODOX, *a.* विधर्म्मी -र्म्मिणी -र्म्मि (न्), वैधर्म्मिकः -की -कं, धर्म्मविपरीतः -ता -तं, धर्म्मविरुद्धः -द्धा -द्धं, सच्छास्त्रविरुद्धः -द्धा -द्धं, सत्पथविपरीतः -ता -तं, भिन्नधर्म्मा -र्म्मा -र्म्म (न्), भिन्नमतः -ता -तं, अशास्त्रीयः -या -यं, अवैधः -धी -धं, अपथगामी -मिनी -मि (न्), विपथगामी &c., अपथवर्त्ती -र्त्तिनी -र्त्ति (न्), वृष्णिः -ष्णिः -ष्णि.

HETERODOXY, *s.* कुदृष्टिः *f.*, मिथ्यादृष्टिः *f.*, कुपथः, विपथः, अपथः, कापथः, विधर्म्मः, असच्छास्त्रं.

HETEROGENEITY, *s.* विजातीयता, जातिभेदः, गुणविभिन्नता, वैवर्ण्यं, वैविध्यं.

HETEROGENEOUS, *a.* विजातीयः -या -यं, भिन्नजातीयः -या -यं, विविधः -धा -धं, नानाविधः -धा -धं, पृथग्विधः -धा -धं, विवर्णः -र्णा -र्णं.

To HEW, *v. a.* छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, कृत् (c. 6. कृन्तति, कर्त्तितुं), निकृत्, विकृत्, लू (c. 9. लुनाति, लवितुं), विशस् (c. 1. -शसति -सितुं); 'to hew in pieces,' खण्डं खण्डं छिद्, खण्डशः कृ or छिद्.

HEWED, *p. p.* छिन्नः -न्ना -न्नं, छिद्यमानः -ना -नं, छिन्नभिन्नः -न्ना -न्नं, व्यवछिन्नः -न्ना -न्नं, विशसितः -ता -तं, खनितः -ता -तं.

HEWER, *s.* छेत्ता *m.* (तृ), छेदी *m.* (न्), छेदकरः, विशसिता *m.* (तृ), छिद् in comp.; 'hewer of wood,' वनछिद्, काष्ठछिद् *m.*

HEXAGON, *s.* षट्कोणं -णः, षड्भुजः, षडस्रं -स्री, षट्कोणा मूर्त्तिः.

HEXAGONAL, *a.* षड्भुजः -जा -जं, षट्कोणः -णा -णं, षडस्रः -स्रा -स्रं.

HEXAMETER, *s.* षट्पदी श्लोकः, षट्पदविशिष्टः श्लोकः.

HEY, *interj.* किं, किमुत, किंस्वित्, ननु, स्वित्, अहो, आहा, हा.

HEYDAY, *interj.* हा, हाहा, आहा, अहो, आ, अहह.

HEYDAY, *s.* (Joy, hilarity) उल्लसता, परिहासः, हासिका, मुदा; 'heyday of youth,' यौवनप्रौढिः *f.*, अक्षतयौवनं, नवयौवनं.

HIATUS, *s.* विच्छेदः, छेदः, छिद्रं, भेदः, भङ्गः, अन्तरं.

HIBERNAL, *a.* हैमन्तः -न्ती -न्तं -न्तिकः -की -कं, हैमनः -नी -नं, शीतकालसम्बन्धी -न्धिनी -न्धि (न्).

HICCOUGH or HICCUP, *s.* हेक्का, हिक्का, प्राणन्ती, श्वासकाशः, हृल्लासः, यमला, गम्भीरा, अनुबन्धी.

To HICCOUGH or HICCUP, *v. n.* हिक्क् (c. 1. हिक्कति -ते -क्कितुं), हेक्कां कृ, हिक्कां कृ.

HID, HIDDEN, *p. p.* गुप्तः -प्ता -प्तं, गूढः -ढा -ढं, निगूढः -ढा -ढं, छन्नः -न्ना -न्नं, प्रच्छन्नः -न्ना -न्नं, छादितः -ता -तं, अन्तर्हितः -ता -तं, अन्तरितः -ता -तं, अपवारितः -ता -तं, निवारितः -ता -तं, निभृतः -ता -तं, स्थगितः -ता -तं, संवृतः -ता -तं, तिरोहितः -ता -तं, तिरस्कृतः -ता -तं; 'to be hidden,' गुह् in pass. (गुह्यते), गुप् in pass. (गुप्यते), तिरस्कृ in pass. (-क्रियते), रहस् (nom. रहायते); 'hidden behind the bushes,' विटपान्तरितः -ता -तं.

To HIDE, *v. a.* गुह् (c. 1. गूहति -ते, गूहितुं, गोढुं), निगुह्, विनिगुह्, छद् (c. 10. छादयति -यितुं), आच्छद्, समाच्छद्, प्रच्छद्, प्रतिच्छद्, सञ्छद्, गुप् (c. 1. गोपायति, गोप्तुं or in des. जुगुप्सते -प्सितुं), स्थग् (c. 10. स्थगयति -यितुं), अन्तर्धा (c. 3. -दधाति -धातुं), तिरोधा, अपिधा, पिधा, उपनिधा, अपवृ (c. 10. -वारयति -यितुं), संवृ, गोपनं कृ, निह्नु (c. 2. -ह्नुते -ह्नोतुं).

To HIDE, *v. n.* गुप्तः -प्ता -प्तं भू, अन्तरितः -ता -तं भू, गुप् in pass. (गुप्यते), तिरस्कृ in pass. (-क्रियते); 'he hides behind the bushes,' विटपान्तरितो भवति.

HIDE, *s.* (Skin of an animal) चर्म्म *n.* (न्), अजिनं, दृतिः *m.*, कृत्तिः *f.*, त्वक् *f.* (च्), पशुत्वक् *f.*, पशुचर्म्म *n.* (न्), पशुलोम *n.* (न्).

HIDE-AND-SEEK, *s.* बालानां क्रीडाविशेषो यत्र एकतमे गुप्तशरीरे सति तदन्वेषणार्थं बालकगण इतस्ततो धावति.

HIDE-BOUND, *a.* (Niggardly) दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः -ष्टिः -ष्टि, स्वल्पव्ययी -यिनी -यि (न्), कृपणः -णा -णं.—(Harsh, untractable) कर्कशः -शा -शं, कठिनः -ना -नं, प्रतीपः -पा -पं, अवशयः -श्या -श्यं.

HIDEOUS, *a.* करालवदनः -ना -नं, करालमुखः -खी -खं, करालाननः -ना -नं, करालः -ला -लं, उग्रदर्शनः -ना -नं, उग्रसदृशः -श्या -श्यं, भीमदर्शनः -ना -नं, घोरदर्शनः -ना -नं, घोराकृतिः -तिः -ति, घोररूपः -पी -पं, रौद्रदर्शनः -ना -नं, कुत्सितः -ता -तं, दुर्दर्शनः -ना -नं, कुरूपः -पी -पं, कदाकारः -रा -रं.

HIDEOUSLY, *adv.* सकरालवदनं, घोररूपेण, उग्ररूपेण, उग्रं

HIDEOUSNESS, *s.* करालता, उग्रता, घोरत्वं, रौद्रता, कुत्सितत्वं.

HIDER, *s.* गोपनकर्त्ता *m.* (र्तृ), गोपः -पकः, गोप्ता *m.* (प्तृ), छादयिता *m.* (तृ).

HIDING, *s.* गोपनं, गुप्तिः *f.*, मङ्गोपनं, छादनं, प्रच्छादनं, अन्तर्धानं, तिरोधानं, स्थगनं, अपवारणं, अपिधानं, पिधानं.

HIDING-PLACE, *s.* गुप्तिः *f.*, गुप्तिस्थानं, निभृतस्थानं, गूढस्थानं.

To HIE, *v. n.* त्वर् (c. 1. त्वरते -रितुं), सन्वर्, सत्वरं गम् (c. 1. गच्छति, गन्तुं) or आप्रि (c. 1. -अयति -तें -यितुं अभिप्रि, संप्रि.

HIERARCH, *s.* पौरोहितवर्गाधिपतिः *m.*, आचार्यवर्गाधिपतिः *m.*, पुरोहितगणपतिः *m.*, पुरोहितेश्वरः.

HIERARCHICAL, *a.* पुरोहिताधिपत्यसम्बन्धी -न्धिनी -न्धि (न्), पुरोहिताधिकारसम्बन्धी &c.

HIERARCHY, *s.* पुरोहिताधिपत्यं, पुरोहिताधिकारः, आचार्याधिपत्यं, धर्म्माध्यापकैश्वर्य्यं.

HIEROGLYPHIC, *s.* गूढाक्षरं, निगूढाक्षरं, बीजाक्षरं, गूढवर्णः, शब्दसूचकं निगूढचिह्नं.

HIEROGLYPHICAL, *a.* गूढाक्षरसम्बन्धी -न्धिनी -न्धि (न्), गूढाक्षरीयः -या -यं.

HIEROPHANT, *s.* महापुरोहितः, महायाजकः, महागुरुः *m.*, आचार्य्यः.

To HIGGLE, *v. n.* (Chaffer) पण् (c. 1. पणते -णितुं or पणायति -यितुं), पणं कृ, पणीकृ, तुच्छप्रकारेण क्रयविक्रयं कृ, क्षुद्रवाणिज्यं कृ.—(Hang back in bargaining) नैतावद् दित्सामीति क्रयसमये विलस् (c. 1. -लसते -सितुं).

HIGGLEDY-PIGGLEDY, *adv.* अस्तव्यस्तः -स्ता -स्तं, अधरोत्तरः -रा -रं, छिन्नविच्छिन्नः -न्ना -न्नं, आदिपश्चात्.

HIGGLER, *s.* क्षुद्रवाणिज्यकारी *m.* (न्), क्षुद्रवणिक् *m.* (ज्), दरिद्रसार्थवाहः.

HIGH, *a.* (Lofty) उच्चः -च्चा -च्चं, उन्नतः -ता -तं, उच्छ्रितः -ता -तं, समुन्नतः -ता -तं, समुच्छ्रितः -ता -तं, अभ्युच्छ्रितः -ता -तं, सोच्छ्रायः -या -यं, उच्छ्रायी -यिणी -यि (न्), प्रांशुः -शुः -शु, तुङ्गः -ङ्गा -ङ्गं, उत्तुङ्गः -ङ्गा -ङ्गं, उदयः -या -यं, उन्नतः -ता -तं, उन्नसः -सा -सं, ऊर्द्धः -र्द्धा -र्द्धं, उच्चरः -रा -रं, उन्नमः -मा -मं, दीर्घः -र्घा -र्घं; 'a high tree,' उच्चतरुः *m.*, दीर्घतरुः.—(Elevated in rank) उत्कृष्टः -ष्टा -ष्टं, उत्कृष्टपदस्थः -स्था -स्थं, प्रतिपन्नमान् -मती -मत् (त्), उन्नमपदस्थः -स्था -स्थं, अनघमः -मा -मं, अनीचः -चा -चं.—(Noble, of high family) महाकुलः -ला -लं -लीनः -ना -नं.—(Haughty) गर्व्वी -र्व्विणी -र्व्वि (न्), गर्व्वोद्धतः -ता -तं, उन्नतचेताः -ताः -नः (स्), उन्नद्धचेताः &c., उद्धतः -ता -तं, समुद्धतः -ता -तं, उत्सिक्तः -क्ता -क्तं.—(Capital, great, chief) उत्तमः -मा -मं, परमः -मा -मं, मुख्यः -ख्या -ख्यं, श्रेष्ठः -ष्ठा -ष्ठं, प्रधान in comp., महा in comp.—(As sound) उदात्तः -त्ता -त्तं, उच्चालः -ला -लं, कलोच्चालः -ला -लं; 'a high tone,' उदात्तः, उच्चस्वरः, तारः; 'in a high tone,' उदात्तस्वरेण, उच्चैःस्वरेण; 'high and low,' उत्तमाधमः -मा -मं, उत्कृष्टापकृष्टः -ष्टा -ष्टं, उत्तराधरः -रा -रं, उच्चावचः -चा -चं, उन्नतानतः -ता -तं, निम्नोन्नतः -ता -तं; 'the high and low,' उत्तमाधमौ *m.* du., उत्कृष्टापकृष्टौ *m.* du.; 'very high,' अत्युच्चः -च्चा -च्चं; 'higher and higher,' उत्तरोत्तरं; 'highest,' उत्तमः -मा -मं, परमः -मा -मं; 'a high price,' दुर्मूल्यं; 'a high wind,' प्रबलवायुः *m.*, प्रचण्डवायुः, अतिवातः; 'high ground,' उन्नतभूभागः; 'as high as an elephant,' गजद्वयसः -सी -सं, गजमात्रः -त्री -त्रं, गजदघ्नः -घ्नी -घ्नं, गजपरिमाणः -णा -णं.

HIGH, *adv.* उच्चैस्, उच्चकैस्, उच्चैस्तमां, उच्चं; 'on high,' ऊर्द्धे, ऊर्द्धं, उपरि; 'from on high,' उपरिष्टात्; 'to carry one's self high,' दृप् (c. 4. दृप्यति, दृप्तुं).

HIGH-BIRTH, *s.* कुलोत्कर्षः, कुलोत्कर्षं, कुलीनता, अभिजातता, आभिजात्यं.

HIGH-BLEST, *a.* अतिपुण्यवान् -वती -वत् (त्), अतिधन्यः -न्या -न्यं, महाभागः -गा -गं, परमसुखी -खिनी -खि (न्), सौभाग्यवान् &c.

HIGH-BLOWN, *a.* अत्याघ्मातः -ता -तं, अतिस्फीतः -ता -तं, अत्युच्छूनः -ना -नं.

HIGH-BORN, *a.* महाकुलजः -जा -जं, महाकुलप्रसूतः -ता -तं, सत्कुलजातः -ता -तं, सत्कुलीनः -ना -नं, कुलीनः -ना -नं, विशुद्धकुलभवः -वा -वं, श्रेष्ठकुलोद्भूतः -ता -तं, कुलश्रेष्ठी -ष्ठिनी -ष्ठि (न्), सदंशः -शा -शं, सदंशजातः -ता -तं, प्रधानवंशोद्भवः -वा -वं, महावंशीयः -या -यं, उन्नतवंशजातः -ता -तं, अभिजातः -ता -तं, अभिजनवान् -वती -वत् (त्).

HIGH-BUILT, *a.* उच्चैर्निर्म्मितः -ता -तं, उच्छ्रायी -यिणी -यि (न्).

HIGH-COLOURED, *a.* अतिरागी -गिणी -गि (न्), अतिरञ्जितः -ता -तं.

HIGH-DAY, *s.* उत्सवदिनं, उद्धर्षदिनं, शुभदिनं, पर्व्वाहः, सुदिनं.

HIGH-FED, *a.* अतिपुष्टः -ष्टा -ष्टं, सुपुष्टः -ष्टा -ष्टं, दृष्टपुष्टः -ष्टा -ष्टं.

HIGH-FLOWN, *a.* अतिगर्व्वितः -ता -तं, महागर्व्वी -र्व्विणी -र्व्वि (न्), स्फीतः -ता -तं.

HIGH-FLYING, *a.* अपरिमितः -ता -तं, अतिक्रान्तमर्य्यादः -दा -दं.

HIGH-HEAPED, *a.* अतिसञ्चितः -ता -तं, अत्याचितः -ता -तं, महाराशीभूतः -ता -तं.

HIGH-HUNG, *a.* ऊर्द्धबद्धः -द्धा -द्धं, उच्चैर्बद्धः -द्धा -द्धं.

HIGH-METTLED, *a.* सदीनसत्त्वः -त्त्वा -त्त्वं, महासत्त्वः -त्त्वा -त्त्वं, महातेजाः -जाः -जः (स्), तेजोवान् -वती -वत् (त्), गर्व्वितः -ता -तं, अतिमादवान् &c.

HIGH-MINDED, *a.* महामनाः -नाः -नः (स्), महामनस्कः -स्का -स्कं, महात्मा -त्मा -त्म (न्), महामतिः -तिः -ति, उदारचेताः -ताः -तः (स्), उदारचरितः -ता -तं, गर्व्वी -र्व्विणी -र्व्वि (न्).

HIGH-PRIEST, *s.* महायाजकः, महापुरोहितः.

HIGH-PRINCIPLED, *a.* धर्म्मशीलः -ला -लं, पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्).

HIGH-PRIZED, *a.* महामूल्यः -ल्या -ल्यं, महार्घः -र्घा -र्घं, बहुमतः -ता -तं.

HIGH-RED, *a.* अतिरक्तः -क्ता -क्तं, घनरक्तः -क्ता -क्तं, घनारुणः -णा -णं.

HIGH-ROAD, *s.* महापथः, महामार्गः, राजमार्गः, रथ्या, पथ्यापथः.

HIGH-SEASONED, *a.* सुवासितः -ता -तं, सुप्रयस्तः -स्ता -स्तं, सुसंस्कृतः -ता -तं.

HIGH-SPIRITED, *a.* सदीनसत्त्वः -त्त्वा -त्त्वं, महासत्त्वः -त्त्वा -त्त्वं, महातेजाः -जाः -जः (स्), महेच्छः -च्छा -च्छं, ऊर्ज्जिताश्रयः -या -यं; 'high-spirited speech,' ऊर्ज्जिताश्रयं वचनं.

HIGH-STREET, *s.* राजमार्गः, महामार्गः, प्रतोली, रथ्या, विशिखा; 'a town having a high street,' प्रतोलीकः.

HIGH-TREASON, *s.* राजशरीराभिद्रोहः, राजापथ्यकारित्वं.

HIGH-WROUGHT, *a.* महायत्नेन संस्कृतः -ता -तं or परिष्कृतः -ता -तं or कल्पितः -ता -तं.

HIGHEST, *a.* (Most lofty) उच्चतमः -मा -मं.—(Greatest) परमः -मा -मं, उत्तमः -मा -मं; 'a criminal in the highest degree,' महापातकी *m.* (न्).

HIGHLAND, *s.* पर्व्वतीयदेशः, अधित्यका, उन्नतदेशः.

HIGHLAND, *a.* पर्व्वतीयः -या -यं, पार्व्वतः -ती -तं.

HIGHLANDER, *s.* पार्व्वतीयजनः, पर्व्वतवासी *m.* (न्), पर्व्वतीयः.

Highly, *adv.* (With elevation) उच्चैस्, उच्चं.—(In a great degree, very) परमं, परं, भृशं, अत्यन्तं, अतीव, अति or सु prefixed; 'highly indignant,' अत्यमर्षी -र्षिणी -र्षि (न्); 'highly delighted,' परमानन्दी -न्दिनी -न्दि (न्); 'highly respectable,' परममान्यः -न्या -न्यं.

Highmost, *a.* उत्तमः -मा -मं, उच्चतमः -मा -मं, उच्चैस्तमः -मा -मं, सर्व्वोपरिस्थः -स्था -स्थं.

Highness, *s.* (Elevation) उच्चता, उन्नतिः *f.*, ऊर्द्ध्वत्वं.—(A title, your highness) भवान् *m.* (त्), भगवान् *m.* (त्), कुमारः.

Highway, *s.* राजमार्गः, राजपथः, महापथः, महामार्गः, नरपतिपथः, महावर्त्म *n.* (न्), वर्त्म *n.*, रथ्या, विशिखा, संसरणं, साधारणपथः, घण्टापथः; 'highway police,' मार्गपालः.

Highwayman, *s.* परिपन्थी *m.* (न्), पारिपन्थिकः, सारणिकघ्नः, पादविकघ्नः, दस्युः *m.*, होडा *m.* (डृ).

Hijjal, *s.* (Tree) निचुलः, हिज्जलः, इज्जलः, अम्बुजः.

Hilarity, *s.* आह्लादः, उल्लसता, उल्लासः, हर्षः, प्रहर्षः, आनन्दः, सानन्दता, प्रफुल्लता, मुदा, प्रहसनं, हासिका, आमोदः, कौतुकं, उत्सवः.

Hill, *s.* पर्व्वतः, गिरिः *m.*, शैलः, अद्रिः *m.*, भूधरः, अचलः, महीधरः, सानुमान् *m.* (त्); 'hill near a mountain,' पादः, प्रत्यन्तपर्वतः.

Hillock, *s.* क्षुद्रपर्व्वतः, वल्मीकं, वप्रः -प्री, मृत्तिकाचयः, वामलूरः, नाकुः *m.*, उद्[illegible]गः.

Hilly, *a.* पर्व्वतीयः -या -यं, पार्व्वतीयः -यी -यं, सपर्व्वतः -ता -तं, सगिरिः -रिः -रि, उच्चनीचः -चा -चं, विषमः -मा -मं.

Hilt, *s.* (Of a sword, &c.) त्सरुः *m.*, मुष्टिः *m.*, खड्गमुष्टिः, तलः, तालः, वारङ्गः.

Hilted, *a.* त्सरुमान् -मती -मत् (त्), मुष्टिविशिष्टः -ष्टा -ष्टं, दृढमुष्टिः -ष्टिः -ष्टि.

Him, *pron.* तं acc. *m.* (तद्), एतं acc. *m.* (एतद्), एनं acc. *m.* (इदं).

Himálaya, *s.* (Mountain) हिमालयः, हिमाद्रिः *m.*, हिमवान् *m.* (त्), हिमप्रस्थः, हिमः, तुषाराद्रिः *m.*, उदगद्रिः *m.*, गिरीशः, तुहिनशैलः.

Hind, *s.* (Female of a deer) मृगी, हरिणी, कुरङ्गी, एणी, मृगवधूः *f.*, समीची, रोहित् *f.*, पृषती.—(A boor) ग्राम्यजनः, वृषलः.—(A servant) दासः, भृत्यः.

Hind, hinder, *a.* पश्चिमः -मा -मं, जघन्यः -न्या -न्यं, अवरः -रा -रं, अपरः -रा -रं, पाश्चात्यः -त्या -त्यं, पश्चातीयः -या -यं.—(The hinder part) पृष्ठदेशः, पश्चाद्देशः, पश्चाद्भागः, पश्चिमभागः, पृष्ठं, नितम्बः; 'in the hinder part,' पश्चाद्भागे, अवरतस्, अवरस्तात्; 'hind quarter of an elephant,' अपरं; 'of a ship,' नावः पश्चिमभागः or पश्चाद्भागः.

To **hinder**, *v. a.* वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, प्रतिवृ, आवृ, रुध् (c. 7. रुणद्धि, रोद्धुं) प्रतिरुध्, निरुध्, संरुध्, अवरुध्, उपरुध्; बाध् (c. 1. बाधते -धितुं), विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, विघ्न (nom. विघ्नयति -यितुं), स्तम्भ् (c. 10. स्तम्भयति -यितुं), विष्टम्भ्, प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं).

Hinderance, *s.* विघ्नः, प्रत्यूहः, अन्तरायः, व्याघातः, विघातः, बाधः -धा, बाधकः -कता, विरोधः, अवरोधः, निरोधः, संरोधः, प्रतिरोधः, उपरोधः, रोधः -धनं, वारणं, निवारणं, आवरणं, स्तम्भः -म्भनं, विष्टम्भः, प्रतिष्टम्भः, प्रतिबन्धः -न्धकं -न्धकता, विष्कम्भः, प्रतिषेधः, हेठः.

Hindered, *p.p.* वारितः -ता -तं, निवारितः -ता -तं, रुद्धः -द्धा -द्धं, विरुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, उपरुद्धः -द्धा -द्धं, अवरुद्धः -द्धा -द्धं, बाधितः -ता -तं, विघ्नितः -ता -तं, विहतः -ता -तं, व्याहतः -ता -तं, प्रतिहतः -ता -तं, पराहतः -ता -तं, स्तम्भितः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः -ब्धा -ब्धं, प्रतिबद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, सार्गलः -ला -लं.

Hinderer, *s.* विरोधी *m.* (न्), वारकः, निवारकः, बाधकः, विघ्नकारी *m.* (न्), प्रतिबन्धकः, स्तम्भकरः -कारी *m.*, प्रतिबन्धकः.

Hindering, *part.* रुन्धन् -न्धती -न्धत् (त्), विरुन्धानः -ना -नं, रोधनः -नी -न.

Hindermost, *a.* पश्चिमः -मा -मं, जघन्यः -न्या -न्यं, पाश्चात्यः -त्या -त्यं, पश्चातीयः -या -यं, अवरः -रा -रं, अवरतमः -मा -मं, अवरतस् indec., अवरस्तात् indec.

Hindrance, *s.* *See* **Hinderance**.

Hinge, *s.* द्वारसन्धिः *m.*, सन्धिः *m.*, द्वारग्रन्थिः *m.*, केन्द्रं.

To **hint**, *v. a.* इङ्गितं कृ, सङ्केतं कृ, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, सूच् (c. 10. सूचयति -यितुं), आकूतं कृ.—(Suggest) उपन्यस् (c. 4. -अस्यति -असितुं).

Hint, *s.* इङ्गितं, इङ्गः, सङ्केतः, आकारः, आकूतं, मीलितं, अङ्गवैकृतं, भावः, सूचना, सूचितं.—(Suggestion) उपन्यासः; 'understanding a hint,' इङ्गितकोविदः.

Hinted, *p.p.* उद्दिष्टः -ष्टा -ष्टं, सूचितः -ता -तं.

Hip, *s.* (Joint of the thigh) कटिः *m.* -टी, कटः, श्रोणिः *f.* -णी, श्रोणिफलकं, कलत्रं, अङ्कः, जघनं, प्रोथः, कोलः, पालिः *f.*, वरारोहा, ककुद्मती, मेखलापदं.—(Lowness of spirits) विषादः, अवसादः.

Hippish, *a.* विषादी -दिनी -दि (न्), विषण्णः -ण्णा -ण्णं, दुर्मनाः -नाः -नः (स्).

Hippogriff, *s.* कविकल्पितः पक्षवान् अश्वविशेषः.

Hippopotamus, *s.* विदुः *m.*, करियादस् *n.*, शुण्डा, ग्राहः, अवहारः.

Hipshot, *s.* त्रुटितश्रोणिः -णिः -णि, विसन्धितकटिः -टिः -टि.

To **hire**, *v. a.* निरूपितकालं यावद् वेतनेन or मूल्येन ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), मूल्यं or वेतनं दत्त्वा सन्दिष्टकालं यावद् ग्रह् or प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं) or उपभुज् (c. 7. -भुनक्ति -भुंक्ते -भोक्तुं) or सेव् (c. 1. सेवते -वितुं), भट् (c. 1. भटति, टितुं), भृ (c. 1. भरति -ते, भर्त्तुं), भाटक (nom. भाटकयति -यितुं), परिक्री (c. 9. -क्रीणाति -क्रेतुं), आनिर्दिष्टकालाद् भृतिं दा.—(Hire labourers) मूल्यं दत्त्वा or प्रतिज्ञाय आविहितकालात् कर्म्मणि नियुज् or प्रयुज् or व्यापृ (c. 10. -पारयति -यितुं), कर्म्मकरान् उपनी (c. 1. -नयते -नेतुं).

Hire, *s.* (Act of hiring) निरूपितकालं यावद् वेतनेन or मूल्येन ग्रहणं, मूल्यं दत्त्वा आसन्दिष्टकालाद् ग्रहणं, प्रयोगः, वेतनदानं.—(Wages) भृतिः *f.*, भृत्या, भरणं, भरण्यं, भाटिः *f.*, भाटकः, वेतनं, मूल्यं, निर्वेशः, कर्म्मण्या, वस्त्रं, निष्क्रयः, भर्म्म *n.* (न्), भर्म्मं, विधा, विष्टिः *f.*, पणः, हात्रं, विरहिणी, वेचा; 'for hire,' निरूपितमूल्येन ग्रहणीयः -या -यं or प्रयोज्यः -ज्या -ज्यं, पण्यः -ण्या -ण्यं, साधारणः -णी -णं; 'working for hire,' भृतिभुक् *m. f. n.*, भरण्यभुक्.

Hired, *p. p.* आनिरूपितकालाद् वेतनेन गृहीतः -ता -तं, भृतः -ता -तं, कृतवेतनः -ना -नं, प्रकल्पितवेतनः -ना -नं, भाटकितः -ता -तं, भाटकीयः -या -यं; 'hired labourer,' भृतकः, भृतिभुक् *m.* (ज्); 'teacher,' भृतकाध्यापकः.

Hireling, *s.* भृतकः, भृतिभुक् *m.* (ज्), भरण्यभुक् *m.*, भृत्यः, वैतनिकः, वेतनार्थी *m.* (न्), वस्निकः, कर्म्मकरः.

Hirer, *s.* भृतिदाता *m.* (तृ), वेतनदाता *m.* (तृ), मूल्यदाता *m.*

Hirsute, *a.* प्रचुरलोमा -मा -म (न्), बहुलोमा -मा -म (न्), लोमशः -शा -शं.

His, *pron. poss.* तस्य gen. c. (तद्), अस्य gen. c. (इदं), तदीयः -या -यं or expressed by स्व in comp.; as, 'his house,' स्वगृहं.

To **hiss**, *v. a.* and *n.* (As a serpent, &c.) सर्पवत् श्वस् (c. 2. श्वसिति -तुं), सर्पनादं कृ, सर्पशब्दं कृ, सीत्कारं कृ, शीश्शब्दं कृ.—(Hiss off, show disapprobation by hissing) कर्कशशब्देन अप्रसादं सूच् (c. 10. सूचयति -यितुं) or अवज्ञास्पदं कृ.

Hiss, hissing, *s.* श्वासः, सर्पश्वासः, सर्पनादः, सर्पशब्दः, कर्कशशब्दः, सीत्कारः, सीत्कृतं, शीश्शब्दः, कर्कशशब्देन अप्रसादसूचनं.

Hist, *adv.* तूष्णीं भव, मौनीभव, निःशब्दो भव, वाचं यम.

HISTORIAN, *s.* ऐतिहासिकः, इतिहासरचकः, इतिहासलेखकः, पुरावृत्तरचकः, वृत्तरचकः, भूतरचकः, पुराभूतलेखकः, पुराणरचकः, पुराणोपाख्यानरचकः, शिष्टसमाचाररचकः, चरितलेखकः.

HISTORIC, HISTORICAL, *a.* ऐतिहासिकः -की -कं, इतिहासविषयः -या -यं, इतिहाससम्बन्धी -न्धिनी -न्धि (न्), पुरावृत्तविषयः -या -यं, वृत्तरचनासम्बन्धी &c., शिष्टसमाचारसम्बन्धी &c., पौराणिकः -की -कं.

HISTORICALLY, *adv.* इतिहासक्रमेण, इतिहासानुसारेण, पुराणोपाख्यानक्रमेण.

To HISTORIFY, *v. a.* इतिहासं लिख् (c. 6. लिखति, लेखितुं) or रच् (c. 10. रचयति -यितुं), पुरावृत्तानि रच्.

HISTORIOGRAPHER, *s.* इतिहासरचकः, इतिहासलेखकः, पुराणोपाख्यानरचकः, पुरावृत्तरचकः.

HISTORY, *s.* इतिहासः, पुरावृत्तं, उपाख्यानं, पुराणोपाख्यानं, पुरावृत्तोपाख्यानं, शिष्टसमाचारः, उदन्तः; 'writing of history,' इतिहासरचना, पुरावृत्तरचना, पुराभूतविवरणं, शिष्टसमाचारविरचना, उपाख्यानरचना, चरितलिखनं.

HISTRIONIC, HISTRIONICAL, *a.* नाटकीयः -या -यं, नाट्यसम्बन्धी -न्धिनी -न्धि (न्), रङ्गसम्बन्धी &c., रङ्गयोग्यः -ग्या -ग्यं, नाट्यशालायोग्यः -ग्या -ग्यं.

HIT, *s.* (Blow, stroke) आघातः, घातः, अभिघातः, प्रहारः, हतिः *f.*, आहतिः *f.*, ताडनं, पातः.—(Chance) दैवं, सङ्गतिः *f.*; 'good hit,' सुदैवं. शुभगतिः *f.*, सौभाग्यं, सम्पद् *f.*

To HIT, *v. a.* तड् (c. 10. ताडयति -यितुं), घितड्, प्रहृ (c. 1. -हरति -हर्तुं), हन् (c. 2. हन्ति -न्तुं), अभिहन्, निहन्, विहन्, आहन्, समाहन्, अभ्याहन्, तुद् (c. 6. तुदति -ते, तोत्तुं), आतुद्, वितुद्, व्यध् (c. 4. विध्यति -ते, व्यद्धुं), प्रतिव्यध्; 'to hit the mark,' लक्ष्यं व्यध्.—(Attain) प्राप् (c. 5. -आप्नोति -आप्तुं), गम् (c. 1. गच्छति, गन्तुं), या (c. 2. याति -तुं), इ (c. 2. एति -तुं), स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), आविश् (c. 6. -विशति -वेष्टुं); 'to hit upon,' आसद् (c. 10. -सादयति -यितुं), उपगम्, उपागम्.

To HIT, *v. n.* (Clash) परस्परं सङ्घट्ट (c. 1. -घट्टते -ट्टितुं), परस्परसमाघातं कृ.—(Succeed) सिध् (c. 4. सिध्यति, सेद्धुं), सम्पद् (c. 4. -पद्यते -पत्तुं).

HIT, *p. p.* ताडितः -ता -तं, हतः -ता -तं, आहतः -ता -तं, समाहतः -ता -तं, अभिहतः -ता -तं, प्रहृतः -ता -तं; 'hit upon,' आसादितः -ता -तं, विहितः -ता -तं; 'hit off,' उपपन्नः -न्ना -न्नं.

To HITCH, *v. n.* (Lay hold) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्तुं), अनुबन्ध् (c. 9. -बध्नाति -बन्धुं), आकृष् (c. 1. -कर्षति -क्रष्टुं).—(Be caught, held) धृतः -ता -तं भू, रुद्धः -द्धा -द्धं भू, बन्ध् in pass. (बध्यते), अनुबन्ध्, बद्धः -द्धा -द्धं भू, लग्नितः -ता -तं भू.

HITHE, *s.* घट्टः, उमः, गुल्मः, तरस्थानं, उत्तरणस्थानं.

HITHER, *adv.* इतस्, अत्र, इह, इहस्थाने, अस्मिन् देशे; 'come hither,' उपैहि, इत इतस्; 'hither and thither,' इतस्ततस्, इतश्चेतस्.

HITHER, *a.* ऐहिकः -की -कं, ऐहस्थानिकः -की -कं, उपस्थः -स्था -स्थं, उपगः -गा -गं, आसन्नतरः -रा -रं, नेदीयान् -यसी -यः (स्).

HITHERMOST, *s.* आसन्नतमः -मा -मं, समीपतमः -मा -मं, निकटस्थः -स्था -स्थं, सन्निहितः -ता -तं, अन्तिकः -का -कं, उपस्थः -स्था -स्थं, नेदिष्ठः -ष्ठा -ष्ठं.

HITHERTO, *adv.* अद्य यावत्, अद्यपर्य्यन्तं, तत्कालपर्य्यन्तं, एतत्कालपर्य्यन्तं, वर्त्तमानकालपर्य्यन्तं, आवर्त्तमानकालात्, तत्क्षणपर्य्यन्तं, एतत्क्षणपर्य्यन्तं, अद्यावधि.

HITHERWARD, *adv.* इतस्, इह, अत्र, इहस्थानं प्रति.

HIVE, *s.* मधुकोषः, करङ्कः, अण्वकः, चषालः, मधुमक्षिकाधारः, मधुकरवासः, मधुकरालयः, मधुकरपोषणस्थानं.

To HIVE, *v. a.* मधुकोषे निविश् (c. 10. -वेशयति -यितुं), करङ्क (nom. करङ्कयति -यितुं).

To HIVE, *v. n.* मधुकोषं निविश् (c. 6. -विशति, वेष्टुं), सङ्घशः करण्डं निविश्.

HO, HOA, *interj.* हो, अहो, हंहो, हं, हे, हौ, होहौ, है, अरे, अरेरे.

HOAR, *a.* धवलः -ला -लं, शुक्लः -क्ला -क्लं, श्वेतः -ता -तं, शुभ्रः -भ्रा -भ्रं, गौरः -रा -री -रं, विशदः -दा -दं.

HOARD, *s.* अतिसञ्चयः, निभृतसञ्चयः, गूढसञ्चयः, सञ्चयः, निचयः, चयः, प्रचयः, समुच्चयः, समुदायः, सङ्घातः, सञ्चयः, पुञ्जः, पूगः, गणः, समूहः, संहारः, सङ्ग्रहः, समाहारः, निर्हारः, निधानं, निधिः *m.*, राशिः *m.*; 'hoard of barbarians,' म्लेच्छगणः.

To HOARD, *v. a.* निभृतं सञ्चि (c. 5. -चिनोति -चेतुं) or समाचि, गूढसञ्चयं कृ, अतिसञ्चयं कृ, पुञ्जीकृ, राशीकृ.

HOARDED, *p. p.* सञ्चितः -ता -तं, समाचितः -ता -तं, पुञ्जीकृतः -ता -तं.

HOARDER, *s.* सञ्चयी *m.* (न्), अतिसञ्चयकारी *m.* (न्), गूढचयकारी *m.*

HOAR-FROST, *s.* नीहारः, तुषारः, तुषारकणः, प्रालेयं, हिमं, हिमानी, हैमं, तुहिनं, खजलं, खवाष्पः.

HOARINESS, *s.* धावल्यं, धवलता, शुक्लता, गौरता, वैशद्यं, शुक्लिमा *m.* (न्); 'of the hair,' केशधावल्यं, केशशुक्लता, केशपक्वता, पलितं, पलितत्वं.

HOARSE, *a.* रूक्षस्वरः -रा -रं, रूक्षाभिभाषी -षिणी -षि (न्), स्वरभग्नः -ग्ना -ग्नं, भग्नस्वरः -रा -रं, गम्भीरस्वरः -रा -रं, कलः -ला -लं.

HOARSELY, *adv.* रूक्षस्वरेण, गम्भीरस्वरेण, भग्नस्वरेण, रूक्षं, गभीरं.

HOARSENESS, *s.* स्वररूक्षता, स्वरगम्भीरता, स्वरभङ्गः, स्वरभग्नता, स्वरभेदः, कलत्वं -ता.

HOARY, *a.* शुक्लः -क्ला -क्लं, धवलः -ला -लं, श्वेतः -ता -तं, गौरः -रा -री -रं, शुभ्रः -भ्रा -भ्रं, विशदः -दा -दं.—(Gray-haired) पलितः -ता -लिन्नी -तं, पलितकेशः -शी -शं, शुक्लकेशः -शी -शं, धवलकेशः -शी -शं, पक्वकेशः -शी -शं.

HOAX, *s.* वञ्चनं -ना, प्रवञ्चना, छद्म *n.* (न्), कपटः -टं, प्रतारणं -णा.

To HOAX, *v. a.* वञ्च् (c. 10. वञ्चयते -ति -यितुं), प्रवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं), प्रतॄ, c. 10. (-तारयति -यितुं), व्यपदिश् (c. 6. -दिशति -देष्टुं).

HOAXED, *p. p.* वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, मोहितः -ता -तं.

HOB, *s.* (A clown) वृषलः, ग्राम्यजनः, प्राकृतजनः, जानपदः.

To HOBBLE, *v. n.* (Limp) खञ्ज् (c. 1. खञ्जति -ञ्जितुं), लङ्ग् (c. 1. लङ्गति -ङ्गितुं), वङ्क् (c. 1. वङ्कति -ङ्कितुं), खोर् (c. 1. खोरति -रितुं), खोल् (c. 1. खोलति -लितुं), खोड् (c. 1. खोडति -डितुं), खोट् (c. 1. खोटति -टितुं), गतिविकलः -ला -लं भू.

HOBBLE *s.* (Limping) लङ्गः, खञ्जता, पङ्गुता.—(Evil plight) दुर्दशा.

HOBBLER, *s.* खञ्जः, लङ्गगतिः, लङ्गगामी *m.* (न्), गतिविकलः.

HOBBLING, *s.* खञ्जत्वं, पङ्गुता, खोरता, लङ्गः, गतिवैकल्यं.

HOBBLINGLY, *adv.* खञ्जवत्, पङ्गुवत्, खोरवत्, लङ्गत्या.

HOBBY, *s.* (Species of hawk) श्येनभेदः, उत्क्रोशभेदः.—(Fancy) छन्दस् *n.*, चापलं, बुद्धिचापल्यं, निर्बन्धः, लहरी, अवलिप्तिः *m.*, रुचिः *f.*, अभिरुचिः *f.*, मनोरथः, प्रियद्रव्यं, प्रियवस्तु *n.*—(A stupid fellow) मूढः, मूर्खः, जडः, स्थूलजनः.

HOBBY-HORSE, *s.* क्रीडामृगः, क्रीडाश्वः, चर्म्ममृगः, क्रीडनकं, क्रीडाद्रव्य.

HOBGOBLIN, *s.* रात्रिचरः, रात्रिञ्चरः, रजनीचरः, क्षणदाचरः, नक्तंचरः -चारी *m.* (न्), निशाटः, भूतः, वेतालः, प्रेतः, पिशाचः, राक्षसः, असुरः, क्रव्याद् *m.*, कव्यैरः, अपदेवता.

HOBNAIL, *s.* अश्वपादुकाकीलः, अश्वपादुकाशङ्कुः *m.*, बृहत्कीलः.

HOBSON'S CHOICE, *s.* विकल्पाभावः, अविकल्पः, विकल्पं विना.

HOCK, *s.* (Kind of wine) मद्यविशेषः.—(Of quadrupeds) दानां पश्चिमजङ्घाया मध्यमसन्धिः or अरत्निरूपः सन्धिः.

To HOCK, *v. a.* पूर्व्वोक्तसन्धिशिरां छिद् (c. 7. छिनत्ति, छेत्तुं), पश्चिमजङ्घाशिरां छिद्.

HOCUS-POCUS, *s.* तन्त्रमन्त्रं, माया, कुहकः, जालं, मूलकर्म्म *n.* (न्).

HOD, *s.* लेपकारिभिः स्कन्धेन धृतं काष्ठमयं लेपपात्रं, लेपाधारः, विलेपभाजनं.

HODGE-PODGE, *s.* सन्निपातः, प्रकीर्णकं, सङ्कीर्णकं, नानाद्रव्यसमूहः.

HODIERNAL, *a.* अद्यतनः -नी -नं, वर्त्तमानदिवसीयः -या -यं.

HOE, *s.* खनित्रं, खात्रं, स्तम्बघ्नः, स्तम्बघनः, स्तम्बघातः, स्तम्बहननं -नी, स्तम्बहा *m.* (न्), आखनः -निकः, आखानं.

To HOE, *v. a.* खनित्रेण खन् (c. 1. खनति -ते -नितुं), खात्रेण भूमिं भिद् (c. 7. भिनत्ति, भेत्तुं) or दृ (c. 10. दारयति -यितुं), खनित्रेण कक्षान् उद्धृ (c. 1. -हरति -हर्त्तुं) or उत्खन्.

HOG, *s.* शूकरः, सूकरः, वराहः, कोलः, दंष्ट्री *m.* (न्), वक्रदंष्ट्रः, चक्रदंष्ट्रः, चक्ररदः, वक्रवक्त्रः, पोत्री *m.* (न्), स्थूलनासः, दीर्घरदः, मुखलाङ्गलः, भूदारः, किरः, किरिः *m.*, किटिः *m.*, बहुप्रजः, बह्वपत्यः, घृष्टिः *m.*, गृष्टिः *m.*, घोणी *m.* (न्), स्तब्धरोमा *m.* (न्), क्रोडः; 'village hog,' ग्राम्यः, विट्चरः.

HOG-HERD, *s.* शूकरपालः -लकः, शूकरपोषकः, वराहरक्षी *m.* (न्).

HOGGISH, *a.* शूकरीयः -या -यं, सौकरः -री -रं, वाराहः -ही -हं, शूकरोपमः -मा -मं, शूकरसगुणः -णा -णं, वराहसगुणः -णा -णं.

HOGGISHNESS, *s.* शूकरीयता, सौकर्य्यं, शौकर्य्यं, पशुत्वं, अतिलोभः.

HOGO, *s.* अतिस्वादः, तीक्ष्णस्वादः, सूक्ष्मस्वादः.

HOGSHEAD, *s.* द्रवद्रव्याणां परिमाणविशेषः.

HOGSTY, *s.* शूकरस्थानं, शूकरालयः, शूकरगृहं, शूकरवासः.

HOGWASH, *s.* शूकरखाद्यं भुक्तावशेषं or उच्छिष्टान्नं.

HOGWEED, *s.* पुनर्नवा, शोथघ्नी.

HOIDEN, *s.* प्रगल्भा स्त्री, निर्लज्जा स्त्री, पुंश्चली, स्वैरिणी, बन्धकी, असभ्या स्त्री, ग्रामिणी.

To HOIDEN, *v. n.* पूर्व्वोक्ता स्त्री यत्प्रकारेण तत्प्रकारेण चर् (c. 1. चरति -रितुं) or आचर् or वृत् (c. 1. वर्त्तते -र्त्तितुं).

To HOIST, *v. a.* उत्तुल् (c. 10. -तोलयति -यितुं), तुल्, उद्धृ (c. 1. -हरति -हर्त्तुं), उन्नी (c. 1. -नयति -नेतुं), उद्वट् (c. 10. -घाटयति -यितुं), उच्छ्रि (c. 1. -छ्रयति -यितुं, rt. श्रि), उद्यम् (c. 1. -यच्छति -यन्तुं), उत्था in caus. (-थापयति -यितुं, rt. स्था), उच्चीकृ, ऊर्द्ध्वीकृ.

HOISTED, *p.p.* उत्तोलितः -ता -तं, उद्धृतः -ता -तं, उच्छ्रितः -ता -तं, उद्वर्हितः -ता -तं, उद्वाहितः -ता -तं, उद्घाटितः -ता -तं, उद्यतः -ता -तं.

To HOLD, *v. a.* (Keep) धृ (c. 1. धरति, धर्त्तुं, c. 10. धारयति -यितुं), धा (c. 3. धत्ते, धातुं), रक्ष् (c. 1. रक्षति -क्षितुं); 'hold in the hand,' हस्तेन धृ.—(Maintain) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), धृ, सन्धृ, पाल् (c. 10. पालयति -यितुं); 'hold an opinion,' मतं धृ (c. 10. धारयति), मतम् अवलम्ब् (c. 1. -लम्बते -म्बितुं) or समालम्ब्.—(Possess) धा (c. 3. दधाति, धत्ते, धातुं), विधा, आधा, भृ, धृ (c. 10.), शील् (c. 10. शीलयति -यितुं), आप् (c. 5. आप्नोति, आप्तुं).—(Esteem) मन् (c. 4. मन्यते, मन्तुं); 'hold in high estimation,' बहु मन्; 'hold in contempt,' अवमन्, तृणाय मन्, लघूकृ, तुच्छीकृ, कदर्थीकृ.—(Detain) धृ, सन्धृ, रुध् (c. 7 रुणद्धि, रोद्धुं), निरुध्, अवरुध्.—(Hold in confinement) कारायां निरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं) or धृ.—(Hold back, withhold) निवृ (c. 10. -वारयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, उपसंहृ (c. 1. -हरति -हर्त्तुं), संहृ, विधृ.—(Contain) धा, आधा, धृ, भृ, आदा (c. 3. -ददाति -दत्ते -दातुं), ग्रह्, परिग्रह्; 'room to hold all,' सर्वेषां धारणे स्थानं.—(Take hold, lay hold) ग्रह्, परिग्रह्, सङ्ग्रह्, हस्तेन ग्रह्, धृ, हस्तेन धृ, परामृश् (c. 6. -मृशति -म्रष्टुं), हस्तेन अवलम्ब् (c. 1. -लम्बते -म्बितुं) or समालम्ब्.—(Celebrate as a festival) सेव् (c. 1. सेवते -वितुं), विधिवत् कृ, यथाविधि अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं) or पाल्.—(Carry on, perform) कृ, विधा, सम्पद् (c. 10. -पादयति -यितुं), निर्वह् (c. 10. -वाहयति -यितुं), अनुष्ठा.—(Hold out, extend) प्रसृ (c. 10. -सारयति -यितुं), प्रग्रह्.—(Hold out, offer) प्रयम् (c. 1. -यच्छति -यन्तुं), उपनी (c. 1. -नयति -नेतुं), उपन्यस् (c. 4. -अस्यति -असितुं), उपस्था in caus. (-स्थापयति -यितुं), उपहृ.—(Hold up, raise aloft) उच्चीकृ, उच्चैः कृ, ऊर्द्ध्वीकृ, उन्नम् (c. 10. -नमयति -यितुं), उच्छ्रि (c. 1. -छ्रयति -यितुं), उद्यम्.—(Hold up, sustain) धृ, सन्धृ, आलम्ब् (c. 1. -लम्बते, c. 10. -लम्बयति -यितुं), अवलम्ब्, समवलम्ब्, उत्तम्भ् (c. 10. -तम्भयति -यितुं, rt. स्तम्भ्), भृ.—(Hold one's tongue) जिह्वां रक्ष् or धृ.

To HOLD, *v. n.* (Stand, remain firm) स्था (c. 1. तिष्ठति, स्थातुं), स्थिरीभू.—(Last, endure) स्था, संस्था, चिरस्थायी -यिनी -यि भू, ध्रुवीभू.—(Refrain) आत्मानं संयम् (c. 1. -यच्छति -यन्तुं), आत्मानं यम्, विरम् (c. 1. -रमति -रन्तुं) with abl. c., निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. c., परिहृ (c. 1. -हरति -हर्त्तुं), संहृ.—(Adhere) अनुबन्ध् (c. 9. बध्नाति -बन्द्धुं or in pass. -बध्यते), अनुलग्नीभू, संलग्नीभू, अवलम्ब् (c. 1. -लम्बते -म्बितुं), अवलम्बी -म्बिनी -म्बि भू.—(Be dependent on) अधीनः -ना -नं भू, आश्रितः -ता -तं भू, अवलम्ब्.—(Hold off) विलम्ब्.—(Hold on) संस्था, पर्यवस्था, निर्बन्धं कृ.—(Hold out, resist) चिरेण सह् (c. 1. सहते, सोढुं), चिरकालेन प्रतिकृ.—(Hold together) संलग्नीभू, सम्बन्ध् in pass. (-बध्यते).

HOLD, *s.* (Act of holding) धृतिः *f.*, धरणं, धारणं, ग्रहणं, आग्रहः, सङ्ग्राहः.—(Taking hold) ग्रहणं, सङ्ग्रहणं, सङ्ग्राहः, ग्रहः, हस्तेन ग्रहणं, हस्तेन धृतिः *f.* or धरणं; 'letting go the hold,' स्रस्तहस्तः -स्ता -स्तं.—(Place of holding) वारङ्गः.—(Place of custody) कारा, कारागारं, बन्धनस्थानं, निरोधस्थानं, गुप्तिः *f.*—(Fortified place) दुर्गं, कोटिः *f.*—(Support) आलम्बः -म्बनं, अवलम्बनं, धारणं, आधारः, उपस्तम्भः, आग्रहः, सङ्ग्रहः.—(Influence) अधिकारः, भारः, गौरवं, वशः -शं.—(Hold of a ship) गुप्तिः *f.*, नौगुप्तिः *f.*, नौकोदरं, नौकाधोभागः.

HOLDER, *s.* धारी *m.* (न्), धारकः, धरः, धारणकर्त्ता *m.* (र्त्तृ), धारयः, ग्राहकः, ग्राही *m.* (न्).

HOLDFAST, *s.* (Any thing that takes hold) गाहकः -कं, ग्रहणी, धरः -री -रं, बन्धनी, कुडुपः.—(Parsimonious man) दृढमुष्टिः *m.*, गाढमुष्टिः *m.*, बद्धमुष्टिः *m.*, अमुक्तहस्तः.

HOLDING, *s.* धरणं, धारणं, ग्रहणं, आधानं, आदानं, रक्षणं.

HOLDING, *part.* धारी -रिणी -रि (न्), धारयन् -यन्ती -यत् (त्), धरः -रा -री -रं, आददानः -ना -नं, आदधानः -ना -नं; 'holding' may be expressed by हस्त in comp.; as, 'holding a stick,' दण्डहस्तः -स्ता -स्तं; 'holding a sword,' खड्गहस्तः -स्ता -स्तं.

HOLE, *s.* विवरं, बिलं, गर्त्तः, रन्ध्रं, छिद्रं, कुहरं, शुषिरं, शुषिः *f.* -षी, कूपः, अवटः -टिः *m.*, गुहा, विरोकं, रोकं, रुहकं, रोपं, सङ्कुः *m.*, मर्करा, भूकं, दूकं, निर्व्यथनं.—(Cave) गह्वरं, कन्दरः -रां, दरी, खातं, निर्दरिः *m.*, गुहा, शैलरन्ध्रं.—(Of a beast) ऋभ्रं, विवरं; 'of a serpent,' सर्पविवरं; 'rat-hole,' मूषिकविवरं; 'full of holes,' अनेकरन्ध्रः -न्ध्रा -न्ध्रं, सरन्ध्रः &c., बहुविवरः -रा -रं, बहुबिलः -ला -लं; 'one who picks holes in the character of others,' छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्).

HOLIDAY, *s.* *See* HOLYDAY.

HOLILY, *adv.* पुण्यं, पुण्यवत्, पुण्यशीलवत्, पवित्रं, पवित्रवत्, धर्म्मशी

लवत्, शुचिवत्, शौचेन.

HOLINESS, *s.* पुण्यता -त्वं, पुण्यशीलता, पवित्रता -त्वं, शुचिता -त्वं, शौचं, धर्म्मशीलता, साधुत्वं -ता, धर्म्मत्वं -ता, देवभक्तिः *f.*, पुण्यवत्त्वं, ब्रह्मवर्चसं, ब्रह्मण्यता, वृत्ताध्ययनर्द्धिः *f.*; 'his holiness,' भगवान् *m.* (त्).

HOLLO, *interj.* भो, भोः, भोस्, भोभो, हलहला, हे, है, अहो, हं, हंहो.

To HOLLO, *v. n.* हे, है, भो, हलहला इत्यादिशब्दान् कृ or इत्यादिशब्दैर् दूरस्थजनम् आह्वे (c. 1. -ह्वयति -ह्वातुं), उच्चैःस्वरेण दूरस्थं कञ्चिज्जनम् आह्वे, हलहला (nom. हलहलायते).

HOLLAND, *s.* (Country) हल्लण्डसंज्ञको देशः.

HOLLANDER, *s.* हल्लण्डीयः, हल्लण्डीयजनः, हल्लण्डदेशजः.

HOLLANDS, *s.* (Spirits) शुण्डा, सुरा -री, वारुणी, हाला.

HOLLOW, *a.* (Empty within) शून्यः -न्या -न्यं, शून्यमध्यः -ध्या -र्य्यं, शून्यगर्भः -र्भा -र्भं, शून्योदरः -रा -रं, शुषिरः -रा -रं, रिक्तमध्यः -ध्या -र्य्यं, रिक्तगर्भः -र्भा -र्भं, उत्तानः -ना -नं, वितानः -ना -नं, पुटाकारः -रा -रं, गर्भाकारः -रा -रं, उदराकृतिः -तिः -ति.—(In sound) मन्दः -न्दा -न्दं, मन्यरः -रा -रं, मन्द्रः -न्द्रा -न्द्रं, गभीरः -रा -रं, गम्भीरः -रा -रं.—(Worthless, unsubstantial) निःसारः -रा -रं, असारः -रा -रं, सारहीनः -ना -नं, निःसत्त्वः -त्त्वा -त्त्वं.—(Vain) मोघः -घा -घं, निरर्थकः -का -कं.—(False) असत्यः -त्या -त्यं, मिथ्यासत्यः -त्या -त्यं, वितथः -था -र्थं, कृत्रिमः -मा -मं, मिथ्या in comp.; 'a hollow reed,' शून्या.

HOLLOW, *s.* (Cavity, hole) विवरं, बिलं, कुहरं, गर्त्तः, कोष्ठः, शुषिरं, शून्यः, अवटः -टिः *m.*, कूपः, गुहा.—(Inner part) गर्भः, उदरं, अभ्यन्तरं, क्रोडं.—(Hollow ground) दरा -री, दरीभूः *f.*, कन्दरः -री, निम्नभूमिः *f.*, द्रोणी, अद्रिद्रोणी.—(Excavation) खातं, खातभूः *f.*—(Natural hollow) देवखातं.—(Cavern) गह्वरं, कन्दरः, गुहा, कुहरं.—(Canal) कुल्या, प्रणाली, सारणिः *f.*—(Hollow of a tree) कोटरः -रं, वृक्षभवनं, तरुक्रोडं, प्रान्तरं, निर्गूढः, चत्वालः. निष्कुहः; 'hollow of the hand,' पुटः, पुटितं, करकोषः; 'hollow of the ear,' कृपणः; 'hollow of the loins,' गर्त्तः, जघनकूपकौ *m.* du.; 'hollow of a boiler,' स्थालीबिलं.

To HOLLOW, *v. a.* शून्यीकृ, शुषिरीकृ, खन् (c. 1. खनति -ते -नितुं), उत्खन्, पुट् (c. 10. पुटयति -यितुं), पुटीकृ.

HOLLOWED, *p. p.* खातः -ता -तं, उत्खातः -ता -तं, पुटितः -ता -तं, शून्यीकृतः -ता -तं, शुषिरीकृतः -ता -तं.

HOLLOWNESS, *s.* शून्यता -त्वं, शुषिरता -त्वं, रिक्तता.—(Of sound) मन्दता, मन्द्रता, गभीरता, गम्भीरता -त्वं, गाम्भीर्य्यं.—(Worthlessness) निःसारता, असारता, मोघता, क्लीबता.—(Falsity) असत्यता, निःसत्यता, कृत्रिमता, कूटता, कापट्यं.

HOLLY, *s.* कण्टकितपत्रविशिष्टः सदाहरितो गुल्मभेदः.

HOLLYHOCK, *s.* नानावर्णपुष्पविशिष्ट ओषधिभेदः.

HOLM-OAK, *s.* चिरस्थायी महावृक्षभेदः.

HOLOCAUST, *s.* होमः, हुतं, हव्यं, हुतहोमं, आहुतं, आहवनीयं.

HOLPEN, *p. p.* उपकृतः -ता -तं, कृतोपकारः -रा -रं, कृतसाहाय्यः -य्या -र्य्यं.

HOLY, *a.* पुण्यः -ण्या -र्य्यं, पुण्यवान् -वती -वत् (त्), पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्), पवित्रः -त्रा -त्रं, धर्म्मशीलः -ला -लं, शुचिः -चिः -चि, शुचिमनाः -नाः -नः (स्), शुचिव्रतः -ता -तं, विमलः -ला -लं, अमलात्मा -त्मा -त्म (न्), निर्म्मलान्तःकरणः -णा -णं, शुद्धमतिः -तिः -ति, पवित्रमतिः -तिः -ति, शुद्धात्मा &c., शुद्धहृदयः -या -यं, धार्म्मिकः -की -कं, साधुः -धुः -ध्वी -धु; 'holy land,' पुण्यभूमिः *f.*, पुण्यभूः *f.*; 'holy writ,' श्रुतिः *f.*; 'holy place of pilgrimage,' तीर्थः -र्थं, पुण्यतीर्थं, क्षेत्रं, पुण्यस्थानं.

HOLYDAY, *s.* (Sacred day) पुण्याहं, पुण्यदिनं, पुण्यदिवसः.—(Festival) उत्सवः, उत्सवदिनं, पर्व्वाहः, उद्धर्षदिनं, आनन्ददिवसः, यात्रा, रासेरसः.—(Day on which there is intermission of study) अनध्यायः, अनध्यायदिवसः, अनध्यायमहोत्सवः, अस्वाध्यायतिथिः *m. f.*, विश्रामदिवसः; 'holyday folk,' यात्राजनः, यात्रालोकः.

HOLY-WATER, *s.* पुण्यजलं, पुण्योदकं, पुण्याम्बु *n.*, पुण्यवारि *n.*

HOMAGE, *s.* पूजा, प्रणामः, प्रणतिः *f.*, प्रणिपातः -पतनं, अर्च्चनं -ना, अर्च्चा, अभ्यर्च्चा, अभ्यर्च्चनं, नमस्कारः, मानं, सम्मानं, सत्कारः, पादवन्दनं, सेवा, सेवाञ्जलिः *m.*, आदरः, भक्तिः *f.*, प्रभुभक्तिः *f.*, प्रतीतिः *f.*, विनीतिः *f.*, उपासना, शेवं.

To HOMAGE, *v. a.* पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अर्च्च् (c. 1. अर्च्चति -र्चितुं, c. 10. अर्च्चयति -यितुं), प्रणिपत् (c. 1. -पतति -तितुं), उपास् (c. 2. -आस्ते -आसितुं), प्रणम् (c. 1. -णमति -णन्तुं), सत्कृ; 'he paid homage,' प्रणतवान्.

HOMAGER, *s.* पूजकः, प्रणामकृत् *m.*, प्रणिपातकारी *m.* (न्), सम्मानकृत् *m.*

HOME, *s.* स्वगृहं, गृहं, स्वस्थानं, स्वदेशः, स्ववासः, स्वविषयः, स्वगेहः, स्ववेश्म *n.* (न्), निजगृहं, निजालयः, निजगेहः, स्वभवनं, स्वनिलयः; 'devoted to home,' गृहारूढचेताः -ताः -तः (स्).

HOME, *adv.* गृहं प्रति, स्वगृहं प्रति; 'he went home,' गृहं ययौ.—(Close) निकटे; 'speech that strikes home,' सङ्गतवाक्यं, हृदयङ्गमवाक्य.

HOME-BORN, *a.* गृहजातः -ता -तं, स्वगृहजः -जा -जं, स्वदेशजः -जा -जं; 'home-born slave,' गृहजातो दासः, ज्ञातिदासः.

HOME-BRED, *a.* गृहजः -जा -जं, गृह्यः -ह्या -र्य्यं, आन्तर्वेश्मिकः -की -कं.

HOME-FELT, *a.* अन्तरस्थः -स्था -स्थं, अन्तरतमः -मा -मं, अन्तर्भूतः -ता -तं.

HOMELESS, *a.* निरालयः -या -यं, निरास्पदः -दा -दं, निराश्रयः -या -यं.

HOMELINESS, *s.* ग्राम्यता, ग्रामीयत्वं, गृह्यता, असभ्यता, नीचता, अश्लीलता, अशुद्धत्वं, अशिष्टत्वं.

HOMELY, *a.* ग्राम्यः -म्या -म्यं, ग्रामिकः -की -कं, ग्रामीयः -या -यं, ग्रामीणः -णा -णं, गृह्यः -ह्या -ह्यं, गृहजः -जा -जं, प्राकृतः -ती -तं, असभ्यः -भ्या -भ्यं, अश्लीलः -ला -लं, नीचः -चा -चं, अधमः -मा -मं, अशुद्धः -द्धा -द्धं, अशिष्टः -ष्टा -ष्टं, असंस्कृतः -ता -तं, अपरिष्कृतः -ता -तं; 'homely speech,' ग्राम्यं.

HOMELY, *adv.* ग्राम्यं, ग्राम्यप्रकारेण, असभ्यं, नीचं, गृह्यतस्.

HOME-MADE, *a.* गृहनिर्म्मितः -ता -तं, गृहकृतः -ता -तं, गृहोत्पन्नः -न्ना -न्नं.

HOME-SPUN, *a.* गृहजातः -ता -तं, गृहजः -जा -जं, गृह्यः -ह्या -र्य्यं.

HOME-STALL or HOME-STEAD, *s.* गृहं, वासस्थानं, वसतिः *f.*, आवासः.

HOMEWARD, *adv.* गृहं प्रति, स्वधामं प्रति, स्वस्थानं प्रति.

HOMICIDAL, *a.* नृहत्याकारी -रिणी -रि (न्), मनुष्यघाती -तिनी -ति (न्).

HOMICIDE, *s.* नृहत्या, मनुष्यहत्या, मनुष्यवधः, मनुष्यघातः.—(One who kills a man) नृघ्नः *m.* (न्), मनुष्यघातकः.

HOMILY, *s.* पूजाशालासु श्रावणीयं धर्म्मविषयं वाक्यं.

HOMOGENEAL, HOMOGENEOUS, *a.* समानजातीयः -या -यं, सजातीयः -या -यं, समजातिः -तिः -ति, सजातिः -तिः -ति, समभावः -वा -वं, समानभावः -वा -वं, समधर्म्मी -र्म्मी -र्म्म (न्), एकजातिः -तिः -ति, एकधर्म्मी &c. स्वभावीयः -या -यं.

HOMOGENEALNESS, HOMOGENEITY, HOMOGENEOUSNESS, *s.* समानजातिता, सजातिता, भावसमता, भावसमानता, जातिसमता.

HOMOLOGOUS, *a.* तुल्याकारः -रा -रं, तुल्यपरिमाणः -णा -णं, समपरिमाणः -णा -णं.

HOMONYMOUS, *a.* भिन्नार्थः -र्था -र्थं, सन्दिग्धार्थः -र्था -र्थं, द्व्यर्थः -र्था -र्थं.

समसंज्ञकः -का -कं, समनामा -मा -म (न्).

HOMONYMY, *s.* भिन्नार्थता, विभिन्नार्थता, अर्थभेदः, द्व्यर्थता, नामसमता.

HONE, *s.* शाणः -णी, शाणाश्म *n.* (न्), शानः, क्षुरधारातेजनप्रस्तरः.

HONEST, *a.* (Upright, just) सरलः -ला -लं, दक्षिणः -णा -णं, शुचिः -चिः -चि, न्यायाचारः -रा -रं, न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), न्याय्यः -य्या -य्यं, ऋजुः -जुः -जु, सच्चरितः -ता -तं, साक्षिकः -की -कं, शुद्धमतिः -तिः -ति, शुद्धात्मा -त्मा -त्म (न्), अजिह्मः -ह्मा -ह्मं, अकुटिलः -ला -लं, अशठः -ठा -ठं, अशठधीः -धीः -धि, मायाहीनः -ना -नं, अमायः -या -यं -यिकः -की -कं, अकपटः -टा -टं, निष्कपटः -टा -टं, कपटहीनः -ना -नं, निर्व्याजः -जा -जं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, अवक्रः -क्रा -क्रं, धार्म्मिकः -की -कं, दम्भरहितः -ता -तं, धर्म्मकारी -रिणी -रि (न्), भद्रः -द्रा -द्रं, साधुः -धुः -ध्वी -धु, सन् मती -सत् (त्), उत्तमः -मा -मं, सरलयायी -यिनी -यि (न्), क्षत्रणः -क्षणा -क्षणं, प्राञ्जलः -ला -लं, प्रगुणः -णा -णं.—(True) सत्यः -त्या -त्यं, सत्यकः -का -कं, सत्यशीलः -ला -लं, सत्यवृत्तः -त्ता -त्तं, सत्यवादी -दिनी -दि (न्).

HONESTLY, *adv.* सरलं, सारल्येन, न्यायेन, न्यायतस्, न्याय्यं, निष्कपटं, कपटं विना, निर्व्याजं, निर्व्यलीकं, अमायया, मायां विना, सरलवत्, शुचिवत्, अजिह्मं, सदाक्षिण्यं.

HONESTY, *s.* सारल्यं, सरलता, दाक्षिण्यं, शुचिता -त्वं, ऋजुता, आर्जवं, अमाया, मायाहीनता, अकपटः, अकापट्यं, कपटहीनता, अव्याजः, न्यायिता, न्यायाचारता, अजिह्मता, अकौटिल्यं, अशठता, निर्व्यलीकता, अवक्रता, अस्तेयं, अपैशुनं, भद्रता, साधुता, शुद्धत्वं, धार्म्मिकत्वं, सत्यता, सत्यशीलता, सत्यवादित्वं, नैर्मल्यं, विमलता, अदम्भानुपादानं.

HONEY, *s.* मधु *n.*, क्षौद्रं, पुष्पनिर्य्यासः, पुष्परसः, पुष्पसारः, पुष्पासवं, कुसुमासवं, माक्षिकं, क्षार्द्धं -र्द्धकं, सारघं, कापिशायनं; 'honey of flowers,' सवं; 'become honey,' मधुसाद्भूतः -ता -तं.

To HONEY, *v. n.* मधुरवचोभिः or मधुरवाक्यैः सान्त्वय् (c. 10. सान्त्वयति -यितुं).

HONEY-COMB, *s.* मधुकोषः, मधुवासः, मधुचक्रं, माक्षिकाश्रयं, मधुक्रमः, करञ्जः.

HONEY-MOON, *s.* आनन्दमासः, विवाहात् परं प्रथममासो यस्मिन् स्त्रीपुरुषौ प्रेममार्द्धं कुरुतः.

HONEY-SUCKLE, *s.* सुरभिगन्धविशिष्टो लताविशेषः.

HONEY-SWEET, *a.* मधुरः -रा -रं, मधुवत् स्वादुः -दुः -द्वी -दु, मधुसात् ind.

HONEY-TONGUED, *a.* मधुरभाषी -षिणी -षि (न्), मधुरवादी -दिनी -दि (न्).

HONIED, *a.* मधुमान् -मती -मत् (न्), मधुमयः -यी -यं, मधुरः -रा -रं.

HONORARY, *a.* सम्मानकरः -रा -रं, मानदः -दा -दं, यशस्यः -स्या -स्यं, यशस्वी -स्विनी -स्वि (न्), कीर्त्तिकरः -रा -रं, यशस्करः.—(Conferring honour only, without gain) सम्मानमात्रदः -दा -दं, कीर्त्तिमात्रकरः -री -रं, अलाभकरः -री -रं.

HONOUR, *s.* (Fame, reputation) कीर्त्तिः *f.*, यशस् *n.*, ख्यातिः *f.*, सुख्यातिः *f.*, विख्यातिः *f.*, प्रतिष्ठा, विश्रुतिः *f.*, समाख्या, प्रतिपत्तिः *f.*—(Reverence) सम्मानं, मानं, पूजा, अर्चनं -ना, अर्चा, अभ्यर्चा -र्चनं, नमस्कारः, सेवा, अर्हा, अर्हणं -णा, आदरः, सम्भावना, सत्कारः, आराधनं, पुरस्कारः, सम्भ्रमः, श्राद्धा.—(Dignity, honourable rank) उच्चपदं, उत्कृष्टता, उत्कृष्टपदं, कुलीनपदं, प्रतिपत्तिः *f.*, प्रधानपदं, प्रधानता, प्राधान्यं, श्रेष्ठत्वं, उन्नतिः *f.*, मर्य्यादा, अभिजातता, पूज्यता, मान्यता -त्वं, अभ्यर्हणीयता.—(Family honour) मर्य्यादा, कुलमर्य्यादा.

To HONOUR, *v. a.* पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, मन् (c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्, अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), अभ्यर्च्, समभ्यर्च्, समर्च्, सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), अर्ह् (c. 10. अर्हयति -यितुं), सम्भू (c. 10. -भावयति -यितुं), आदृ (c. 6. -द्रियते -र्दितुं), नमस्कृ, सत्कृ, पुरस्कृ, साराध् (c. 10. -राधयति -यितुं), श्रु in des. (शुश्रूषते -षितुं), अर्च् (c. 1. अर्चति -र्चितुं), मह् (c. 1. महति -हितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), पूजां कृ, सम्मानं कृ.—(Accept a bill) लेख्यपत्रं ग्रह् or स्वीकृ or आदृ.

HONOURABLE, *a.* पूज्यः -ज्या -ज्यं, पूजनीयः -या -यं, पूजयितव्यः -व्या -व्यं, सम्पूजनीयः -या -यं, सम्मान्यः -न्या -न्यं, मान्यः -न्या -न्यं, मानी -निनी -नि (न्), पूजार्हः -र्हा -र्हं, अर्चार्हः -र्हा -र्हं, अर्च्यः -र्च्या -र्च्यं, अर्हणीयः -या -यं, श्राद्धयः -द्ध्या -द्ध्यं, आदरणीयः -या -यं, पुरस्करणीयः -या -यं, मर्य्यादावान् -वती -वत् (त्), मर्य्यादान्वितः -ता -तं.—(Illustrious) ख्यातः -ता -तं, सुख्यातः -ता -तं, यशस्वी -स्विनी -स्वि (न्), महायशाः -शाः -शः (स्), कीर्त्तिमान् -मती -मत् (त्), प्रतिपत्तिमान् -मती -मत् (त्), विश्रुतः -ता -तं, प्रसिद्धः -द्धा -द्धं.—(Conferring honour) कीर्त्तिकरः -री -रं, यशस्करः -री -रं, यशस्यः -स्या -स्यं.—(Upright, equitable) सच्चरितः -ता -तं, न्यायाचारः -रा -रं, धार्म्मिकः -की -कं, शुचिः -चिः -चि, दक्षिणः -णा -णं, साक्षिकः -की -कं, शुद्धात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, निष्कपटः -टा -टं, विमलात्मा -त्मा -त्म (न्), अवक्रः -क्रा -क्रं, ऋजुः -जुः -जु, साधुः -धुः -ध्वी -धु.—(Noble) कुलीनः -ना -नं, उदारः -रा -रं, उदारचेताः -ताः -तः (स्).

HONOURABLY, *adv.* समानं, सम्मानपूर्व्वं, शुचिवत्, धार्म्मिकवत्, साधुवत्, उदारवत्, सौदार्य्यं, सत्कारपूर्व्वं, नमस्कारपूर्व्वं, श्राद्ध्यप्रकारेण, सुकीर्त्तिपूर्व्वं, सुयशसा, निर्व्यलीकं, सम्पूजनीयं.

HONOURED, *p. p.* पूजितः -ता -तं, सम्पूजितः -ता -तं, अर्चितः -ता -तं, अभ्यर्चितः -ता -तं, सम्मानितः -ता -तं, पुरस्कृतः -ता -तं, सेवितः -ता -तं, अर्हितः -ता -तं, सेव्यमानः -ना -नं, निषेव्यमाणः -णा -णं, आदृतः -ता -तं, अर्च्चितः -ता -तं, सत्कृतः -ता -तं, महितः -ता -तं, साराधितः -ता -तं, शुश्रूषितः -ता -तं, अनिन्दितः -ता -तं.—(Accepted as a bill) गृहीतः -ता -तं, स्वीकृतः -ता -तं, आदृतः -ता -तं; 'to be honoured,' पूज् in pass. (पूज्यते), मह (nom. महीयते).

HOOD, *s.* स्त्रीवस्त्रानुषङ्गं मस्तकाच्छादनं or मस्तकावरणं or मस्तकापिधानं, फणाकारं मस्तकाच्छादनं, शिरस्कं, शिरस्त्रं -स्त्राणं, शिरोवस्त्रं; 'of a snake,' फणः -णा -णं, भोगः, स्फेटा.

To HOOD, *v. a.* पृष्ठीक्रपिधानेन मस्तकम् आछद् (c. 10. -छादयति -यितुं), मस्तकावरणेन पिधा (c. 3. -दधाति -धातुं).

To HOODWINK, *v. a.* चक्षुषी वस्त्रेण रुध् (c. 7. रुणद्धि, रोद्धुं), नयने पिधानेन आवृ (c. 5. -वृणोति -वरितुं -रीतुं) or आछद् (c. 10. -छादयति -यितुं), नयनरोधं कृ.

HOOF, *s.* खुरः, खुरः, शफः -फं, वज्रकः -का, निघृष्यः, पुटः, विक्षः, रिक्षः; 'hoof of a cow,' गोखुरं, गोध्यदं; 'mark of a hoof,' खुरपदवी, खुरचिह्नं.

HOOFED, *a.* खुरी -रिणी -रि (न्), क्षुरी -रिणी -रि (न्), खुरयुक्तः -क्ता -क्तं.

HOOK, *s.* (Any thing bent that catches hold) आकर्षी -र्षिणी, अङ्कुशः, आकर्षणार्थं वक्रयन्त्रं or वक्रलोहः, ग्रहणी, धरणी.—(Fish-hook) वडिशं -शा -शी, वरिशी, वलिशं -शी, मत्स्यवेधनं -नी.—(Hook for driving an elephant) अङ्कुशः -शं, अङ्कूपः -पं, शृणिः *f.*—(Bill-hook) दात्रं.

To HOOK, *v. a.* (Fish) वडिशेन मत्स्यान् व्यध् (c. 4. विध्यति, व्यद्धुं) or धृ (c. 1. धरति, धर्त्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), धरणं कृ, ग्रहणं कृ.

HOOKED, *a.* (Bent in the form of a hook) वक्रः -क्रा -क्रं, अङ्कुशाकारः -रा -रं, अङ्कुशी -ङ्किनी -ङ्कि (न्), अनृजुः -जुः -जु, कुञ्चितः -ता -तं.

HOOP, *s.* (Any thing circular) चक्रं, चक्रवालं, वलयः -यं.—(For playing with) क्रीडाचक्रं, क्रीडावलयः.

To HOOP, *v. a.* (Bind with hoops) लोहवलयान् बन्ध् (c. 9. बध्नाति, बन्धं), लोहचक्रादिभिर् युज् (c. 10. योजयति -यितुं).—(Shout out) चित्कारं कृ, चित्कारशब्दं कृ, उच्चैःस्वरेण उद्गुप् (c. 10. -घोषयति -यितुं).

HOOPER, *s.* (A cooper) लोहवलयबन्धा *m.* (न्धृ), काष्ठभाण्डकारः.

HOOPING-COUGH, *s.* आक्षेपकः काशः, हूपशब्दपूर्वकः काशः, बालकानां काशः.

To HOOT, *v. n.* हू (c. 2. हौति, हवितुं), विहू, दीर्घैरुतं कृ, दीर्घरावं कृ, घूत्कृ, घूत्कारं कृ, चित्कारं कृ, उच्चैःस्वरेण उद्गुप् (c. 10. -घोषयति -यितुं); 'to hoot at,' हे, रे, अरे, धिक्, हूम्, घूत् इत्यादिशब्दैर् अवमानं or अवज्ञां or अप्रसादं सूच् (c. 10. सूचयति -यितुं) or इत्यादिशब्दैर् अवज्ञाशब्दं कृ.

HOOT, HOOTING, *s.* दीर्घरुतं, दीर्घरावः, रावः, घूत्कारः, घूत्कृतं, चित्कारः, हे, रे, धिक्, घूत् इत्यादिशब्दैर् अवमानसूचनं or अप्रसादसूचनं.

To HOP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -लितुं), नृत् (c. 4. नृत्यति, नर्त्तितुं), एकपादेन प्लु or वल्ग्.

HOP, *s.* (The plant) लताविशेषो यस्य पुष्पाणि यवरजेन सह संमृज्यन्ते तेन च यवसुरा उत्पद्यते.—(Jump) प्लवः, प्लुतं, वल्गितं, झम्पः, नृत्यं, नर्त्तनं, एकपादेन प्लुतं, वल्गितं.

HOPE, *s.* आशा, प्रत्याशा, आशंसा, आकांक्षा, आशाबन्धः, मनोरथः, अपेक्षा, व्यपेक्षा, प्रतीक्षा, सम्प्रतीक्षा, स्पृहा, निरोक्षा, उदीक्षणं, ईप्सितं, मनस्विता; 'hope of a good issue,' फलाकांक्षा; 'having one's hopes fulfilled,' पूर्णमनोरथः, आशाप्राप्तः; 'hopes whose fulfilment is delayed,' विलम्बितफला मनोरथाः; 'hope-inspiring,' आशाजननः -ना -नं.

To HOPE, *v. a.* and *n.* आशंस् (c. 1. -शंसते -सितुं), आकांक्ष् (c. 1. -कांक्षति -क्षितुं), प्रत्याकांक्ष्, प्रतीक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, व्यपेक्ष्, उदीक्ष्, स्पृह् (c. 10. स्पृहयति -यितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, आशां कृ, प्रत्याशां कृ, आशंसां कृ, आशास् (c. 2. शास्ते -शासितुं); 'I hardly hoped to see you again,' न खलु म आसीद् आशंसा यथा पुनरपि त्वां प्रेक्षिष्ये; 'I hope' may be expressed by the particle कच्चित्; as, 'I hope the fever does not pain you much,' कच्चित् त्वां नातिबाधते ज्वरः.

HOPEFUL, *a.* (Full of hope) आशावान् -वती -वत् (त्), आशान्वितः -ता -तं, आशायुक्तः -क्ता -क्तं, आशाधिष्ठः -ष्ठा -ष्ठं, आशाबद्धः -द्धा -द्धं, स्पृहयालुः -लुः -लु, आकांक्षी -क्षिणी -क्षि (न्), सप्रत्याशः -शा -शं, प्रत्याशी -शिनी -शि (न्), अपेक्षी -क्षिणी -क्षि (न्), अपेक्षकः -का -कं.—(Promising, exciting hope) आशाजननः -ना -नं, आशाकारी -रिणी -रि (न्).

HOPEFULLY, *adv.* सप्रत्याशं, साशंसं, आशापूर्वं, आशंसापूर्वं.

HOPEFULNESS, *s.* आशावत्त्वं, आशाधिष्ठत्वं, सप्रत्याशत्वं.

HOPELESS, *a.* आशाहीनः -ना -नं, निराशः -शा -शं, आशारहितः -ता -तं, गताशः -शा -शं, त्यक्ताशः -शा -शं, निःप्रत्याशः -शा -शं, हताशः -शा -शं.

HOPELESSLY, *adv.* निराशं, निःप्रत्याशं, आशां विना, गताशं.

HOPELESSNESS, *s.* नैराश्यं, निराशता, आशाहीनता, आशारहित्यं.

HOPPER, *s.* (One who hops) एकपादेन प्लुतकारी *m.* (न्), एकपादेन नर्त्तकः.—(In a mill) शस्त्याधारः, शस्त्यपात्रं.

HOPPING, *s.* एकपादेन नर्त्तनं or नृत्यं or प्लुतकरणं or वल्गितकरणं.

HORAL, HORARY, *a.* मौहूर्त्तिकः -की -कं, घटिकाविषयः -या -यं.

HORDE, *s.* अस्थिरवासिनां or पर्य्यटनकारिणां म्लेच्छपुरुषाणां समूहः or सङ्घः or वृहत्कुलं or वृहद्गणः, शबरगणः, किरातगणः.

HORIZON, *s.* दिङ्मण्डलं, मण्डलं, चक्रवालं, चक्रं, दिगन्तः, आकाशकक्षा, अम्बरान्तं -न्तः, चक्रपालः. 'The eastern horizon,' प्राची दिक्, प्राचीमूलं.

HORIZONTAL, *a.* अनुप्रस्थः -स्था -स्थं, अन्वायतनः -ना -नं, दिगन्तसमः -मा -मं, समः -मा -मं, समरेखः -खा -खं, समस्थः -स्था -स्थं, सपाटः -टा -टं; 'a horizontal line,' द्विज्यामार्गः, समरेखा; 'plane,' समानभूभागः.

HORIZONTALLY, *adv.* अनुप्रस्थं, अन्वायतनं, समं, समरेखं, समानरूपेण.

HORN, *s.* (Of an animal) शृङ्गं, विषाणः -णी -णं, कृणिका, काहलः -ला -लिका; 'of a buffalo,' गवलं.—(Wind-instrument) शृङ्गः, काहलः -ला; 'to blow a horn,' शृङ्गं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा.—(Of the moon) चन्द्रशिखा, चन्द्रशृङ्गं, चन्द्राग्रं.

HORN-BOOK, *s.* बालकस्य आरम्भपुस्तकं or आदिपुस्तकं or प्रथमपाठग्रन्थः.

HORNED, *a.* शृङ्गी -ङ्गिणी -ङ्गि (न्), शृङ्गिणः -णा -णं, विषाणी -णिनी -णि (न्), शृङ्गविशिष्टः -ष्टा -ष्टं; 'in the form of a horn,' शृङ्गाकारः -रा -रं; 'horned moon,' सिनीवाली.

HORNET, *s.* वृहद्भरलभेदः, वृहद्भृङ्गरोलः, विषशृङ्गी *m.* (न्), विषशूकः.

HORNLESS, *s.* अशृङ्गः -ङ्गा -ङ्गं, शृङ्गहीनः -ना -नं; 'hornless bull,' तूवरः.

HORN-OWL, *s.* उलूकभेदः, शृङ्गिणपेचकः, शृङ्गिकौशिकः.

HORN-PIPE, *s.* नृत्यविशेषः यस्मिन् नर्त्तको हस्तपादादि इतस्ततः क्षिप्रं सञ्चालयति, नाविकनृत्यं.

HORNY, *a.* शार्ङ्गः -ङ्गी -ङ्गं, शृङ्गमयः -यी -यं, शृङ्गगुणः -णा -णं.

HOROLOGE, HOROLOGY, *s.* घटी, यामघोषा, कालमापनयन्त्रं.

HOROSCOPE, *s.* जन्मपत्रं -त्रिका, जन्मनक्षत्रपत्रं, जन्मयोगपत्रं, जन्मकालग्रहः.

HORRIBLE, *a.* दारुणः -णा -णं, घोरः -रा -रं, सुभैरवः -वी -वं, भैरवः -वी -वं, रौद्रः -द्री -द्रं, भयङ्करः -री -रं, सुभयानकः -की -कं, भयानकः -की -कं, भीमः -मा -मं, उग्रः -ग्रा -ग्रं, भीषणः -णा -णं, त्रासकरः -रा -रं, भयावहः -हा -हं, विकटः -टा -टं, करालः -ला -लं, भीष्मः -ष्मा -ष्मं.—(In appearance) घोरदर्शनः -ना -नं, रौद्रदर्शनः -ना -नं, भीमदर्शनः -ना -नं.

HORRIBLY, *adv.* दारुणं, घोरं, भयानकं, सुभैरवं, रौद्रं, उग्रं, विकटं.

HORRID, *a.* घोरः -रा -रं, दारुणः -णा -णं, उग्रः -ग्रा -ग्रं, कुत्सितः -ता -तं, भयानकः -का -कं, भयङ्करः -री -रं, भीमः -मा -मं, भीषणः -णा -णं, रौद्रः -द्री -द्रं, भैरवः -वी -वं, विकटः -टा -टं, करालः -ला -लं.

HORRIDLY, *adv.* घोरं, दारुणं, उग्रं, कुत्सितं, अतिकुत्सितं, रौद्रं.

HORRIDNESS, *s.* घोरता, दारुणता, उग्रता, कुत्सितत्वं, भयानकत्वं, रौद्रता.

HORRIFIC, *a.* भैरवकारकः -का -कं, भैरवजनकः -का -कं, सुभयङ्करः -री -रं, सुभयानकः -का -कं, साध्वसकारी -रिणी -रि (न्).

HORRIFIED, *p. p.* भयसंहृष्टरोमा -मा -म (न्), साध्वसोपहतः -ता -तं.

To HORRIFY, *v. a.* भैरवं जन् (c. 10. जनयति -यितुं), ससाध्वसं -सां -सं कृ.

HORRIPILATION, *s.* रोमहर्षः -र्षणं, लोमहर्षणं, संहर्षः, उद्भर्षणं, रोमाञ्चः -ञ्चनं, रोमोद्गमः, रोमोद्भेदः, पुलकः, पुलकोद्गमः, उद्भूषणं.

HORROR, *s.* भैरवं, भयसंहर्षः, भयकम्पः, साध्वसं, भीषणं, भीष्मं, भीमं, घोरं, भयानकं, भयङ्करं, त्रासः, सन्त्रासः, परिकम्पः.

HORSE, *s.* अश्वः, हयः, तुरङ्गः -ङ्गमः, तुरगः, वाजी *m.* (न्), घोटकः, वाहः, वाह्यः, अर्व्वा *m.* (न्), सैन्धवः, सप्तिः *m.*, किल्वी *m.* (न्), प्रचेलकः, अभीशा *m.* (तृ), पीतिः *m.*, पीती *m.* (न्), पीतिः *m.*, परुष्टारः, मुखभुक् *m.* (ज्), मुखभोजी *m.* (न्), गन्धर्व्वः; 'a well-bred horse,' आजानेयः, कुलीनः, सिन्धुवारः, भूमिपश्चः, भूमिरञ्जकः; 'a well-trained horse,' विनीतः, साधुवाही *m.* (न्); 'a white horse,' कर्कः; 'a bay horse,' उकनाहः, कियाहः; 'a fleet horse,' जवनः, जवाधिकः, प्रजवी *m.* (न्); 'a good horse,' वल्गभः, हयोत्तमः; 'a chariot horse,' रथ्यः; 'a pack-horse,' पृष्ठ्यः, स्थौरी *m.* (न्), स्थुरी *m.*, स्थोरी *m.*; 'a horse for sacrifice,' मखः *m.*, अध्वमेधीयः; 'four-horsed carriage,' चतुरश्वो रथः.—

(Cavalry) आश्वं, आश्विकं, अश्वारूढाः *m. pl.*—(Support for towels, &c.) मार्ज्जनपटाधारः, वस्त्राधारः; 'relating to a horse,' अश्वीयः -या -यं, आश्विकः -की -कं, आश्वः -श्वी -श्वं.—(A number of horses,' अश्वीयं, आश्वं.

To HORSE, *v. a.* अश्वम् आरुह् in caus. (-रोपयति -यितुं), अश्वारूढं-ढां-ढं कृ.

HORSE-BACK, *s.* अश्वपृष्ठं, ऊर्द्वस्थितिः *f.*; 'on horse-back,' अश्वपृष्ठे loc. c.; 'going on horse-back,' तुरङ्गयायी *m.* (न्).

HORSE-BEAN, *s.* क्षुद्रशिम्बिकभेदः, शिम्बा, मुद्गः, माषः.

HORSE-BOAT, *s* अश्ववहनं, अश्ववहनयोग्या नौका.

HORSE-BREAKER, *s.* अश्वदमकः, अश्वविनेता *m.* (तृ), अश्वशिक्षकः. अश्वशिक्षानवीवी *m.* (न्).

HORSE-BREAKING, *s.* अश्वदमनं, अश्वशिक्षा, अश्वविनयः.

HORSE-CHESTNUT, *s.* (Tree) श्यामफलविशिष्टो वृक्षभेदः.

HORSE-CLOTH, *s.* अश्वास्तरणं, आस्तरः, अश्वपरिच्छोमः.

HORSE-COMB, *s.* अश्वमार्जनी, अश्वलोमशोधनी.

HORSE-DEALER, *s.* अश्वव्यापारी *m.* (न्), हयज्ञः, हेडावुष्कः, हेलावुष्कः, हयविद्याविशारदः.

HORSE-DRIVING, *s.* अश्वसारथ्यं, अश्वप्रेरणं, हयप्रेरणं.

HORSE-DUNG, *s.* अश्वशकृत् *n.*, अश्वपुरीषं, अश्वमलं, अश्वहद्मं.

HORSE-FACED, *a.* अश्वमुखः -खी -खं, अश्ववदनः -ना -नं, हयमुखः -खी -खं, तुरङ्गवक्त्रः -क्त्रा -क्त्रं, तुरङ्गाननः -ना -नं, तुरङ्गास्यः -स्या -स्यं.

HORSE-FLESH, *s.* अश्वमांसं, घोटकमांसं, तुरगमांसं.

HORSE-FLY, *s.* अश्वदंशकः, हयदंशी, अश्वमक्षिका.

HORSE-GUARDS, *s* अश्वारूढसैनिकाः *m. pl.*, राजशरीररक्षकम् अश्वारूढसैन्यं.

HORSE-HAIR, *s.* अश्वलोम *n.* (न्), अश्वरोम *n.* (न्), अश्ववालः.

HORSE-LAUGH, *s.* अट्टहासः, अतिहासः, अतिहसितं, महाहासः, आच्छुरितं, मोत्प्रासः.

HORSE-LEECH, *s.* अश्वदंशका जलौका, अश्वरक्तपायिनी.—(Farrier) अश्वचिकित्सकः, अश्ववैद्यः.

HORSEMAN, *s.* अश्वारूढः, अश्वारोहः -ही *m.* (न्), हयारूढः, हयारोहः, सादी *m.* (न्), अश्वसादी *m.* (न्), तुरगी *m.* (न्), तुरङ्गी *m.* (न्), अश्ववहः, अश्ववारः, सायी *m.* (न्), हयविद्याविशारदः.

HORSEMANSHIP, *s.* अश्वविद्या, हयविद्या, अश्वारोहणविद्या, हयज्ञता, हयारोहः, अश्वहृदयं

HORSE-MEAT, *s.* अश्वाहारः, अश्वभोजनं, अश्वखाद्यं, पशुखाद्यद्रव्यं.

HORSE-POND, *s.* अश्वतडागः, अश्वपुष्करिणी, अश्ववापी.

HORSE-RACE, *s.* अश्वचर्य्या, अश्वमार्गः, अश्वधावनं.

HORSE-RADISH, *s.* कुरुकन्दकः -कं, कन्दमूलभेदः.

HORSE-SHOE, *s.* अश्वखुरत्रं, अश्वखुरत्राणं, अश्वखुरबन्धनं, अश्वपादुका.

HORSE-STEALER, *s.* अश्वहारकः, वाजिहर्त्ता *m.* (र्तृ), अश्वमुक् *m.* (ष्).

HORSE-TRAPPINGS, *s.* आदानं, अश्वपरिच्छोमः, अश्वसज्जा, अश्वास्तरणं.

HORSE-WAY, *s.* अश्वपथः, अश्वमार्गः, अश्ववर्त्म *n.* (न्).

HORSE-WHIP, *s.* कशा, अश्वकशा, अश्वताडनी, अश्वप्रतोदः, प्रतिष्कशः, प्रतिष्कपः, चर्म्मदण्डः.

To HORSE-WHIP, *v. a.* कशया or चर्म्मदण्डेन तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं), कशाघातं कृ.

HORTATION, *s.* उपदेशः, उपदेशवाक्यं, प्रबोधनं, प्रबोधवाक्यं, मन्त्रणं.

HORTATORY, *a.* उपदेशकः -का -कं, प्रबोधकः -का -कं, आदेशकः -का -कं.

HORTICULTURAL, *a.* उद्यानविद्यासम्बन्धी -न्धिनी -न्धि (न्), उद्यानविषयः -या -यं.

HORTICULTURE, *s.* उद्यानविद्या, उद्यानकर्मण्यविद्या, उद्यानकर्मणं, उद्यानकरणविद्या, उद्यानकरणं, उद्यानकृषिकर्म्म *n.* (न्), पुष्पफलोत्पत्तिकर्म्म *n.* (न्).

HORTICULTURIST, *s.* उद्यानविद्, उद्यानकर्मज्ञः, उद्यानकर्मण्याजीवी *m.* (न्).

HORTULAN, *a.* उद्यानसम्बन्धी -न्धिनी -न्धि (न्).

HORTUS SICCUS, *s.* शुष्कोद्यानं, शुष्कौषधिपुस्तकं, शुष्कौषधिसङ्ग्रहः, शुष्कतृणादिसङ्ग्रहः, शुष्कौषधयः, *pl.*

HOSE, *s.* ऊर्णामयं पादत्राणं, ऊर्णापादत्रं, पादरक्षणं, जङ्घापरिधानं.

HOSIER, *s.* पूर्णीकृतपादत्रविक्रेता *m.* (तृ), ऊर्णापादत्रविक्रयी *m.* (न्).

HOSPITABLE, *a.* आतिथ्यः -थ्या -थ्यं, आतिथेयः -यी -यं, अतिथिसेवकः -का -कं, अतिथिपूजकः -का -कं, आतिथ्यकारी -रिणी -रि (न्), प्रियातिथिः -थिः -थि, वत्सलातिथिः -थिः -थि, सत्कारशीलः -ला -लं.

HOSPITABLY, *adv.* आतिथ्यपूर्व्वं, आतिथ्यं, सत्कारेण, सत्कारपूर्व्वं, आतिथेयं; 'to receive hospitably,' सत्कृ, आतिथ्यं कृ.

HOSPITAL, *s.* आरोग्यशाला, चिकित्साशाला, चिकित्सागारं, रोगप्रतीकारशाला, रोगोपचारशाला, रोगार्त्तलोकोपोषणस्थानं, दरिद्रलोकानां रोगचिकित्सनशाला, धर्म्मशाला.

HOSPITALITY, *s.* आतिथ्यं, अतिथित्वं, अतिथिक्रिया, आतिथ्यकर्म्म *n.* (न्), अतिथिसत्कारः, अतिथिसत्क्रिया, सत्कारः, सत्क्रिया, सत्कर्म्म *n.* (न्), सत्कृतिः *f.*, सत्कृतं, अतिथिसेवा, अतिथिपूजनं, मनुष्ययज्ञः, नृयज्ञः.

HOST, *s.* (Entertainer) सत्कारी *m.* (न्), सत्कृत् *m.*, आमन्त्रयिता *m.* (तृ), निमन्त्रणकृत् *m.*, निमन्त्रकः, भोजनदाता *m.* (तृ), आतिथ्यकृत् *m.*—(Army) चमूः *f.*, सेना, अनीकं, वाहिनी, अनीकिनी, वरूथिनी, योधसमूहः.—(A great number) समूहः, सङ्घः, सङ्घातः, गणः, कुलं, समवायः, समुदायः, निवहः, निकायः; 'a host of persons,' जनसमूहः, लोकसङ्घः, जनौघः; 'a host of enemies,' शत्रुनिकायः; 'a host of excellencies,' गुणग्रामः.

To HOST, *v. n.* (Lodge) वस (c. 1. वसति, वस्तुं), निवस्, अतिथिर् भू or अस्.—(Encounter in battle) युद्धे समागम् (c. 1. -गच्छति -गन्तुं) or सङ्गम्.

HOSTAGE, *s.* शरीरबन्धकः, बन्धकः, सन्धिनियमस्योपरि विश्वासार्थं त्यक्तः शरीरबन्धकः.

HOSTEL, HOSTELRY, *s.* उत्तरणस्थानं, उत्तरणगृहं, उपकारी -रिका.

HOSTESS, *s.* आतिथ्यकारिणी, सत्कारिणी, निमन्त्रणकारिणी, भोजनदात्री.

HOSTILE, *a.* वैरी -रिणी -रि (न्), विरुद्धः -द्धा -द्धं, विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, प्रतिकूलः -ला -लं, विपरीतः -ता -तं, अहितः -ता -तं, अहितकारी -रिणी -रि (न्), प्रातिपक्षः -क्षी -क्षं, विद्वेषी -षिणी -षि (न्), द्वेषी &c., द्वेषणः -णा -णं, विद्विषः -षा -षं, शात्रवीयः -यी -यं, द्रोहवृत्तिः -त्तिः -त्ति, अपकारी -रिणी -रि (न्), प्रतिरोधी -धिनी -धि (न्), पर्य्यवस्थाता -त्री -तृ (तृ), सवैरः -रा -रं; 'a hostile invasion,' शत्रुविग्रहः; 'to be hostile,' विपक्षीभू, प्रतिकूल (nom. प्रतिकूलयति -यितुं), विरुध् (c. 7. -रुणद्धि -रोद्धुं), वैर (nom, वैरायते), शत्रु (nom. शत्रूयति), द्विष् (c. 2. द्वेष्टि -ष्टुं), विद्विष्, पर्य्यवस्था (c. 1. -तिष्ठति -स्थातुं).

HOSTILELY, *adv.* शत्रुवत्, रिपुवत्, विरोधेन, विरुद्धं, विपरीतं, विपक्षवत्.

HOSTILITY, *s.* वैरिता, वैरभावः, वैरं, शत्रुता, रिपुता, विपक्षता, विरोधः, विरुद्धता, विद्वेषः, द्वेषः, शात्रवं, अरिता, प्रतिपक्षता, विद्विष्टता, अप्रीतिः *f.*, प्रतिबन्धं, परता -त्वं; 'natural hostility,' जातिवैरं.—(War, state of war) युद्धं, युद्धभावः, युद्धावस्था, विग्रहः, संग्रामः.

HOSTLER, *s.* अश्वपालः -लकः, अश्वरक्षकः, उत्तरणस्थाने अभ्यागतान् अश्वान् पालयति यो जनः.

HOT, *a.* (Contrary to cold) उष्णः -ष्णा -ष्णं, तप्तः -प्ता -प्तं, चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उष्णकः -ष्णका -ष्णकं, सन्तप्तः -प्ता -प्तं, उपतप्तः -प्ता -प्तं, तापी -पिनी -पि (न्), ओष्णः -ष्णा -ष्णं, ओष्कः -ष्का -ष्कं, ओष्का

-ष्मा -ष्म (न्), नैदाघः -घी -घं, अशिशिरः -रा -रं, अशीतः -ता -तं, तिग्मः -ग्मा -ग्मं, तीव्रः -व्रा -व्रं, तीक्ष्णः -क्ष्णा -क्ष्णं, खरः -रा -रं, ग्रीष्मः -ष्मा -ष्मं, घर्म्म in comp.; 'hot season, hot weather,' उष्णकालः, उष्णसमयः, ग्रीष्मः, ग्रीष्मकालः, निदाघः, निदाघकालः, उष्णागमः; 'hot water,' उष्णोदकं, घर्म्मोदकं, घर्म्मासु *n.*—(Hot to the taste) तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, खरः -रा -रं, कटुः -टुः -टु, उग्रः -ग्रा -ग्रं.—(Passionate) चण्डः -ण्डा -ण्डं, चण्डवान् -वती -वत् (त्), तीक्ष्णः -क्ष्णा -क्ष्णं, तिग्मः -ग्मा -ग्मं, उग्रः -ग्रा -ग्रं, शीघ्रकोपी -पिनी -पि (न्), रागी -गिणी -गि (न्), उष्णः -ष्णा -ष्णं.—(Impetuous) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), संरम्भी -म्भिणी -म्भि (न्), उत्तप्तः -प्ता -प्तं; 'to make hot,' तप् (c. 10. तापयति -यितुं); 'to be hot,' उष्णीभू, उष्म (nom. उष्मायते).

HOTBED, *s.* गोहयशकृदादिप्रक्षेपेण तप्तीकृतम् उद्यानस्थलं, उष्णस्थलं.

HOTCH-POTCH, *s.* नानाखाद्यद्रव्यसंयोगः, नानाशाकादिसम्मिश्रणं, सन्निपातः, प्रकीर्णकं.

HOTEL, *s.* उत्तरणशाला, उत्तरणगृहं, उत्तरणस्थानं, उपकारी -रिका, उपकार्य्या, औपकार्य्यं, प्रवासीयगृहं.

HOT-HEADED, *a.* साहसिकः -की -कं, साहसी -सिनी -सि (न्), उच्चण्डः -ण्डा -ण्डं, उत्तप्तः -प्ता -प्तं, संरम्भी -म्भिणी -म्भि (न्), शीघ्रकोपी -पिनी -पि (न्), तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्); 'hot-headed zeal,' उत्तापः.

HOT-HOUSE, *s.* उद्याने विदेशीयवृक्षरक्षणार्थं काचाच्छादितं तप्तगृहं or उष्णगृहं.

HOTLY, *adv.* तीक्ष्णं, तीव्रं, तिग्मं, सतैक्ष्ण्यं, चण्डं, प्रचण्डं, उच्चण्डं, उग्रं, उग्रतया, उत्तापेन, सोष्मं, उत्तप्तं, उष्णं.

HOT-MOUTHED, *a.* तीक्ष्णवादी -दिनी -दि (न्), उग्रमुखः -खी -खं, दुर्मुखः -खी -खं.

HOTNESS, *s.* उष्णता, औष्म्यं, तापः, तप्तत्वं, चण्डता, प्रचण्डता, अशिशिरता, तिग्मता, तैग्म्यं, तीक्ष्णता, निदाघः.—(To the taste) तिग्मता, तीक्ष्णता, तीव्रता, कटुता, उग्रता -त्वं.—(Ardor, vehemence) उत्तापः, उच्चण्डता, व्यग्रता, तीक्ष्णता, उष्मः, संरम्भः.—(Of temper) चण्डता, शीघ्रकोपित्वं.

HOTSPUR, *s.* साहसिकजनः, तीक्ष्णस्वभावो जनः, संरम्भी *m.* (न्).

HOVEL, *s.* कुटीरः, कुटेरः, कुटी, तृणकुटी, उटजः, मण्डपः, गोष्ठं.

To HOVEL, *v. a.* कुटीरे वस् (c. 1. वसति, वस्तुं) or निवस्, कुटीरम् अधिवस्.

HOVEN, *a.* उच्छूनः -ना -नं, प्रस्फुरितः -ता -तं, उत्थितः -ता -तं.

To HOVER, *v. n.* विहायसा or व्योममध्ये वृत् (c. 1. वर्त्तते -र्त्तितुं) or व्यावृत्, आकाशमध्ये मस्तकोपरि वृत्, प्रडीनम् अकृत्वा ऊर्द्ध्वं वियति विसृप् (c. 1. -सर्पति -सृप्तुं) or विचल् (c. 1. -चलति -लितुं), व्योममध्ये पक्षास्फालनं कृत्वा निश्चलो वृत्.—(Hesitate, waver) विलस् (c. 1. -लसते -सितुं), दोल (nom. दोलायते), आन्दोल (nom. आन्दोलयति -यितुं), विक्लृप् (c. 1. -कल्पते -ल्पितुं), विचर् (c. 10. -चारयति -यितुं), विशङ्क् (c. 1. -शङ्कते -ङ्कितुं).

HOUGH, *s.* जङ्घास्थिशिरा, जङ्घास्थिस्नायुः *m.* जङ्घासन्धिबन्धनं.

To HOUGH, *v. a.* जङ्घास्थिशिरां छिद् (c. 7. छिनत्ति, छेत्तुं).

HOUND, *s.* मृगयाकुक्कुरः, मृगव्यकुक्कुरः, मृगयार्थं कुक्कुरः, आखेटकाद्यर्थं श्वा *m.* (न्), आखेटिकः, मृगारिः *m.*, मृगदंशकः, वृकारिः *m.*, विश्वकद्रुः *m.*

To HOUND, *v. a.* मृगव्यकुक्कुरैर् अनुसृ (c. 1. -सरति -सर्त्तुं).

HOUR, *s.* घटिका, होरा, केरली, दिवसस्य चतुर्विंशभागः or चतुर्विंशतितमांशः, दिनांशः; 'an hour of forty eight minutes,' मुहूर्त्तः -र्त्तं; 'a space of twenty-four minutes,' दण्डः; 'half-an-hour,' अर्द्धघटिका; 'an hour and a half,' अर्द्धयामः.

HOUR-GLASS, *s.* यामनाली, वालुकायन्त्रं, कालपरिमापकयन्त्रं.

HOURI, *s.* दिव्याङ्गना, दिव्यकन्या, देवकन्या, स्वर्गकन्या, स्वर्वेश्या.

HOURLY, *adv.* प्रतिमुहूर्त्तं, मुहूर्त्ते मुहूर्त्ते, दण्डे दण्डे, प्रतिदण्डं.

HOUR-PLATE, *s.* मुहूर्त्तदण्डादिपरिमापकं मण्डलं, यामघोषा, घटीमुखं.

HOUSE, *s.* गृहं, गेहं -हः, वेश्म *n.* (न्), भवनं, आलयः, निलयः, आयतनं, निकेतः -तनं -तकं, निवेशनं, सदनं, मन्दिरं, वासः, संवासः, वासस्थानं, आगारः -रं, अगारः -रं, निवासः, निवासस्थानं, निवसतिः *f.*, वसितं, समावासः, आवसथः, निकाय्यः, अवस्थानं, वस्त्यं, उदवसितं, वास्तुः *m.* ओकस् *n.*, धाम *n.* (न्), छत्वरः, निशान्तं, कुटः -टी, शाला, सभा, स्थानं; 'house and land,' गृहक्षेत्रादि; 'a number of houses,' सद्मचितिः *f.*; 'house of confinement,' बन्धनगृहं, बन्धनागारं, बन्धनालयः; 'confined to the house,' गृहानुबद्धः -द्धा -द्धं.—(Family, race) कुलं, वंशः, कुटुम्बः, जातिः *f.*—(Family, household) गृहजनः, परिजनः, परिवारः, स्वजनः, कुटुम्बकं, स्त्रीपुत्रकन्यादि.

To HOUSE, *v. a.* गृहे निविश् (c. 10. -वेशयति -यितुं), गृहं प्रविश् (c. 10. -वेशयति -यितुं), वेश्मनि वस् (c. 10. वासयति -यितुं), आश्रयं दा, वासस्थानं दा.

HOUSE-BREAKER, *s.* गृहभेदकः, आगारभेदकः, भित्तिचौरः, वन्दिचौरः सन्धिचौरः, कारुचौरः, कुड्यच्छेदी, कपाटघ्नः, खानिलः, कुजम्भलः -म्भिलः.

HOUSE-BUILDER, *s.* गृहकारकः, गृहकारी *m.* (न्), गृहकर्म्मी *m.* (न्), गृहनिर्माता *m.* (तृ).

HOUSE-BURNER, *s.* गृहदाहकः, आगारदाहकः, गृहदाहनकृत् *m.*

HOUSE-BURNING, *s.* गृहदाहः -हनं, गृहदहनं, गृहप्लोषः, आगारदाहः.

HOUSEDOG, *s.* गृहकुक्कुरः, गृहरक्षकः श्वा *m.* (न्).

HOUSEDOOR, *s.* गृहद्वारं, गेहद्वारं.

HOUSEHOLD, *s.* गृहजनः, परिजनः, गृहपरिजनः, गृहपरिवारः, स्वजनः, परिवारः, अभिजनः, कुटुम्बकं.

HOUSEHOLD, *a.* गृह्यः -ह्या -ह्यं, गृहसम्बन्धी -न्धिनी -न्धि (न्), आवसथिकः -की -कं or expressed by गृह in comp.; as, 'household affairs,' गृहकार्य्यं, गृहकरणं, गृहव्यापारः; 'household utensils,' गृहोपस्करः; 'household gods,' गृह्या देवताः *f. pl.*, कुलदेवताः *f. pl.*; 'household bread,' गृहापूपः.

HOUSEHOLDER, *s.* गृहस्थः, गृहस्वामी *m.* (न्), गृहपतिः *m.*, गृहाधिकारी *m.* (न्), गृही *m.* (न्), गेही *m.* (न्), कुटुम्बी *m.* (न्), कौटुम्बिकः, गृहमेधी *m.* (न्), स्नातकः, ज्येष्ठाश्रमी *m.* (न्).

HOUSEHOLD-STUFF, *s.* गृहोपस्करः, गृहोपकरणं, गृहसामग्री -ग्र्यं.

HOUSEKEEPER, *s.* (Householder) गृही *m.* (न्), गेही *m.* (न्), गृहस्वामी *m.* (न्), गृहाधिकारी *m.* (न्), कुटुम्बी *m.* (न्).—(A woman who has the care of a family) गृहिणी, गेहिनी, कुटुम्बिनी, गृहमेधिनी.

HOUSEKEEPING, *s.* गृहव्यापारः, गृहकार्य्यं, गृहकरणं, गृहकर्म्म *n.* (न्), गार्हस्थ्यं, गृहस्थता.

HOUSELEEK, *s.* कुतृणं, गृहभित्तिरुह ओषधिभेदः.

HOUSELESS, *a.* गृहहीनः -ना -नं, गृहशून्यः -न्या -न्यं, निरालयः -या -यं, अनिकेतनः -ना -नं, अकेतनः -ना -नं, अलयः -या -यं, निराश्रयः -या -यं, अशरणः -णा -णं, निर्वासः -सा -सं.

HOUSEMAID, *s.* गृहदासी, गृहपरिष्कारिणी, गृहमार्जनी, दासी.

HOUSE-ROOM, *s.* गृहावस्थानं, वासस्थानं, निवासस्थानं, आवासः, वासः.

HOUSE-TOP, *s.* गृहपृष्ठं, गृहाग्रं, गृहशिखरं, गृहशृङ्गं.

HOUSE-WARMING, *s.* गृहप्रवेशः, नवगृहप्रवेशकाले उत्सवः, वास्तुप्रवेशः, वास्तुसंशमनं -नीयं.

HOUSEWIFE, *s.* गृहमेधिनी, गृहव्यापारकुशला, गृहकार्य्यदक्षा, गृहकर्म्मनिपुणा गृहिणी, गेहिनी.

HOUSEWIFERY, *s.* गृहव्यापारकुशलता, गृहकार्य्यदक्षता, गृहकर्म्मनिपुणता, गृहमेधित्वं, परिमितव्ययः.

HOUSING, *s.* (House-room) वासस्थानं, निवासस्थानं.—(Of a horse or elephant) आस्तरः -रणं, परिस्तोमः, वर्गः, आदानं.

HOW, *adv.* कथं, किं, केन प्रकारेण, केन रूपेण, किमु, कुतस्, किमुत; 'how much, how many, how little, how long, &c.,' कियान् -यती -यत् (त्) or कियत् indec., कतिः -तिः -ति or कति in comp.; as, 'how long?' कियत्कालं, कियतं कालं, कियता कालेन, कतिकालं; 'how long!' कियच्चिरं; 'how many sorts?' कतिविधः -धा -धं; 'how many times?' कतिकृत्वस्; 'for how much?' कियता मूल्येन; 'how far?' कियत्पर्य्यन्तं, किम्पर्य्यन्तं, कियदवधि; 'how much more,' किम्पुनर्, किमुत, किमु, किम्, कुतःपुनर्; 'how much less,' किमुत, किमु; 'how so?' किमिति, किमिव; 'how else,' अथकिम्; 'how wonderful,' किमाश्चर्य्यं; 'how do you do?' किं क्षेमम् अस्ति भवतः, किं कुशलम् अस्ति भवतः, कीदृशी स्थितिर् भवतः; 'how are we to act?' किम् अस्माभिः करणीयं; 'he knows not how to act,' यथाकार्य्यं न जानाति; 'how great is that darkness!' सोऽन्धकारः कियान् महान्; 'any how,' यथाकथञ्चित्, यथातथा, कथञ्चन, कथञ्चित्.

HOWBEIT, *adv.* तथापि, तथैव, तथाच, किञ्च, अपि, अपितु, किन्तु.

HOWDAH, *s.* (On the back of an elephant) वरण्डकः.

HOWEVER, *adv.* तथापि, किञ्च, अपितु, किन्तु, तु, परन्तु, पुनर्; 'in whatever manner,' यत्प्रकारेण.

HOWITZER, *s.* अन्तरग्निबलेन लोहगुलिकाप्रक्षेपकं युद्धयन्त्रं.

To HOWL, *v. n* रु (c. 2. रौति, रवितुं), विरु, दीर्घरावं कृ, दीर्घरुतं कृ, गर्ज् (c. 1. गर्जति -र्जितुं), भष् (c. 1. भषति -षितुं), रै (c. 1. रायति रातुं), रस् (c. 1. रसति -सितं), रद् (c. 1. रदति -दितुं), वाश् (c. 1. वाशते -शितुं).

HOWL, HOWLING, *s.* रावः, रुतं, दीर्घरावं, दीर्घरुतं, गर्जनं, रायणं, भाषः, भषणं, चुक्रनं, वाशितं, मुखघातः; 'making a howling,' दीर्घरावः-वी-वं.

HOWSOEVER, *adv.* यत्प्रकारेण, येन प्रकारेण, यथा यथा, यथातथा, तथापि

To HOX, *v. a.* जङ्घास्थिशिरां छिद् (c. 7. छिनत्ति, छेत्तुं).

HOY, *s.* वृहन्नौकाविशेषः, विशालनौका.

HUBBUB, *s.* कोलाहलः, कलकलः, कलरवः, रासः, हलहलाशब्दः, कालकौलः, तुमुलं, विप्लवः, कलहः.

HUCKABACK, *s.* नानारेखाङ्कितः क्षौमपटविशेषः.

HUCKLEBACKED, *a.* न्युब्जः -ब्जा -ब्जं, कुब्जः -ब्जा -ब्जं, वक्रकन्धरः -रा -रं

HUCKLEBONE, *s.* कट्वस्थि *n.*, कटास्थि *n.*, श्रोण्यस्थि *n.*, जघनास्थि.

HUCKSTER, *s.* द्युद्रूषाणिज्यकारी *m.* (न्), तुच्छवाणिज्यकृत्, कुत्सितवणिक् *m.* (ज्).

To HUCKSTER, *v. n.* तुच्छवाणिज्यं कृ, तुच्छप्रकारेण or नीचप्रकारेण or कुत्सितप्रकारेण वाणिज्यं कृ.

To HUDDLE, *v. a.* सम्मिश्रीकृ, अस्तव्यस्तीकृ, सङ्कुलीकृ, सङ्करीकृ, सम्मिश्र् (c. 10. -श्रयति -यितुं), सस्राध् (c. 1. -राधते -धितुं), अधरोत्तरीकृ, मंक्षुभ्.

To HUDDLE, *v. n.* सम्मिश्रीभू, सङ्कुलीभू, सङ्कीर्णीभू, सङ्करीभू, अस्तव्यस्तीभू, अधरोत्तरीभू, सस्राधीभू.

HUDDLE, *s.* अस्तव्यस्तता -त्वं, अधरोत्तरं, सङ्करः, सान्निर्य्यं, सङ्क्षोभः.

HUE, *s.* (Dye, colour) वर्णः, रागः, रङ्गः, छाया, छविः *f.*—(Hue and cry) जनरवः, बहुभिः कृता मंहृतिः, जनघोषणा.

HUFF, *s.* (Anger) क्रोधावेशः, क्रोधः, कोपः, रोषः, संरम्भः.—(Arrogance) दर्पः, दर्पावेशः, जाड्यं.—(One inflated with arrogance) दर्पाध्मातः, अतिगर्व्वितः, उद्धतः.

To HUFF, *v. a.* रुष् (c. 10. रोषयति -यितुं), कुप् (c. 10. कोपयति -यितुं).

To HUFF, *v. n.* दूष् (c. 1. दूषयति, दूषितुं), धृष् (c. 5. धृष्णोति, धर्षितुं), दर्पाध्मातः -ता -तं भू, भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), विकत्थ् (c. 1. -कत्थते -त्थितुं).

HUFFER, *s.* दाम्भिकः, भर्त्सनकारः, विकत्थी *m.* (न्), वर्षी *m.* (न्), शूरम्मन्यः.

HUFFISH, *a.* (Angry) क्रोधाविष्टः -ष्टा -ष्टं, कोपी -पिनी -पि (न्), सरोषः -षा -षं, सकोपः -पा -पं.—(Arrogant) दूप्तः -प्ता -प्तं, गर्व्वी -र्व्विणी -र्व्वि (न्), उद्धतः -ता -तं, वर्षी -र्षिणी -र्षि (न्), आत्मश्लाघी -घिनी -घि (न्).

HUFFISHLY, *adv.* सकोपं, सरोषं, सदर्पं, धृष्टवत्, गर्व्वितवत्.

HUFFISHNESS, *s.* सकोपत्वं, सरोषत्वं, क्रोधाविष्टता, गर्व्वित्वं, अहङ्कारः.

To HUG, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), समालिङ्ग्, आश्लिष् (c. 4. -श्लिष्यति -श्लेषुं), संश्लिष्, समाश्लिष्, परिष्वज् (c. 1. ष्वजते -ष्वक्तुं), परिरभ् (c. 1. -रभते -रब्धुं), बाहुभ्यां पीड् (c. 10. पीडयति -यितुं) or परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

HUG, *s.* आलिङ्गनं -ङ्गितं, आश्लेषः, परिष्वङ्गः, बाहूपपीडः, अङ्कपाली.

HUGGED, *p. p.* आलिङ्गितः -ता -तं, आश्लिष्टः -ष्टा -ष्टं, पीडितः -ता -तं.

HUGE, *a.* बृहन् -हती -हत् (त्), अतिवृहन् &c., सुबृहन् &c., महान् -हती -हत् (त्), अतिमहान् &c., सुमहान् &c., स्थूलः -ला -लं, अतिविशालः -ला -लं, बृहत्परिमाणः -णा -णं, अपरिमितः -ता -तं, वरीयान् -यसी -यः (स्), वरिष्ठः -ष्ठा -ष्ठं, गरिष्ठः -ष्ठा -ष्ठं.—(In body) महाकायः -या -यं, अतिकायः -या -यं, बृहत्कायः -या -यं, बृहच्छरीरः -रा -रं.

HUGELY, *adv.* सुमहत्, अतिमहत्, सुबृहत्, अत्यन्तं, अतिमात्रं, अपरिमितं.

HUGENESS, *s.* सुबृहत्त्वं, बृहत्त्वं, महत्त्वं, सुमहत्त्वं, अतिमहत्त्वं, स्थूलता, अतिविशालता, अपरिमितत्वं, सुविपुलता, कायबृहत्त्वं, बृहत्कायत्वं.

HUGGER-MUGGER, *s.* रहस् *n.*, गूढता, प्रच्छन्नता; 'in huggermugger,' रहसि, रहस्यं, निभृतं, प्रच्छन्नं, गुप्तं, उपांशु.

HULK, *s.* जीर्णनौका, गुणकूपकादिरहिता नौका, रज्जुकूपकादिहीनो नौकायाः स्थूलभागः.

HULL, *s.* (Integument) कञ्चुकः, आवेष्टनं, परिवेष्टनं, कोशः, कोषः, पुटः, त्वक् *f.* (च्).—(Of a ship) गुणकूपकादिभिन्नो नौकाभागः, नौकायाः स्थूलभागः or कायः.

HULLY, *a.* कोशवान् -वती -वत् (त्), तुषवान् &c., त्वग्युक्तः -क्ता -क्तं.

To HUM, *v. n.* गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), रु (c. 2. रौति, रवितुं), विरु, रणरणां कृ; 'to hum and haw,' भिन्नस्वरेण or स्खलितवाचा वद् (c. 1. वदति -दितुं).

HUM! *interj.* हुम्, हूम्, आ, आस्, हा, अहो, अहोवत्, नावत्, किं.

HUM, *s.* (Buzzing sound) कलः, कलरवः, कलकलः, कलस्वरः, रुतं, विरुतं, रावः, विरावः, गुञ्जनं, गुञ्जितं, मर्मरः, झङ्कारः, रणत्कारः; 'of bees,' अलिविरावः, अलिविरुतं.

HUMAN, *a.* मानुषः -षी -षं -षिकः -की -कं, मानवीनः -ना -नं, मानवीयः -या -यं, पौरुषः -षी -षं, पौरुषेयः -यी -यं, जनकीयः -या -यं, नारः -री -रं, मनुष्यजातीयः -या -यं, लौकिकः -की -कं; 'human nature,' पुरुषत्वं -ता, मनुष्यत्वं -ता, मानुष्यं, मानुषत्वं; 'human race,' मनुष्यजातिः *f.*, मनुष्यवर्गः, नृजातिः *f.*; 'human form,' नररूपं; 'human art,' मनुष्यकला; 'a human brute, पुरुषपशुः *m.*

HUMANE, *a.* परोपकारशीलः -ला -लं, परोपकारी -रिणी -रि (न्), परहितैषी -षिणी -षि (न्), परहितः -ता -तं, परहितकामः -मा -मं, उपकारपरः -रा -रं, दयालुः -लुः -लु, कृपालुः -लुः -लु, कारुणिकः -की -कं, सकरुणः -णा -णं, दयाशीलः -ला -लं, करुणाशीलः -ला -लं, करुणात्मा -त्मा -त्म (न्), करुणार्द्रः -र्द्रा -र्द्रं, अनुकम्पी -म्पिनी -म्पि (न्), सानुकम्पः -म्पा -म्पं, सञ्जातानुकम्पकः -का -कं, आपन्नरक्षणशीलः -ला -लं, दया-

वान् -वती -वत् (त्), सुहृदयः -या -यं, सुशीलः -ला -लं, दीनानुकम्पनः -ना -नं, सदयः -या -यं, सानुक्रोशः -शा -शं, क्षमावान् -वती -वत् (त्), अनृशंसः -सा -सं, करुणावेदी -दिनी -दि (न्).

HUMANELY, *adv.* सकरुणं, सकारुण्यं, सानुकम्पं, सदयं, दयाशीलत्वात्, सुशीलवत्, परहितेच्छया.

HUMANIST, *s.* शास्त्रज्ञः, शास्त्रव्युत्पन्नः, शब्दशास्त्रविद् *m.*, विद्वज्जनः.

HUMANITY, *s.* (Benevolence, compassion) दया, दयाशीलता, दयालुता, कारुण्यं, करुणा, करुणाशीलत्वं, अनुकम्पा, कृपा, परहितेच्छा, परोपकारशीलता, हितकाम्या, उपकारपरता, करुणार्द्रता, सानुकम्पता, आपन्नरक्षणं.—(Nature of man) पुरुषता -त्वं, मानुषता, मनुष्यता -त्वं, मानुष्यं, मानवत्वं, मानव्यं.

To HUMANIZE, *v. a.* शिष्टाचारान् or आर्य्यव्यवहारान् शिक्ष् (c. 10. शिक्षयति -यितुं) or शास् (c. 2. शास्ति, शासितुं), शिष्टीकृ, सुशीलीकृ, विनीतं -तां -तं कृ, सभ्यं -भ्यां -भ्यं कृ.

HUMANKIND, *s.* मनुष्यजातिः *f.*, नृजातिः *f.*, मनुष्यवर्गः, पुरुषवर्गः.

HUMANLY, *adv.* पुरुषवत्, मनुष्यवत्, नरवत्, मानुषवत्, मानुषप्रकारेण.

HUMBIRD OR HUMMING BIRD, *s.* कलरवकारी नानावर्णः सूक्ष्मपक्षिभेदः.

HUMBLE, *a.* नम्रबुद्धिः -द्धिः -द्धि, नम्रचेताः -ताः -तः (स्), नम्रः -म्रा -म्रं, विनम्रः -म्रा -म्रं, नम्रशीलः -ला -लं, विनतचेताः &c., विनतः -ता -तं, विनयी -यिनी -यि (न्), विनीतः -ता -तं, सविनयः -या -यं, निर्विण्णः -ण्णा -ण्णं, निर्विण्णचेताः &c., अगर्व्वः -र्व्वा -र्व्वं, गर्व्वहीनः -ना -नं, दर्पहीनः -ना -नं, दर्परहितः -ता -तं, दम्भरहितः -ता -तं, वीतदम्भः -म्भा -म्भं, निरहङ्कारः -रा -रं, अनहङ्कारी -रिणी -रि (न्), अनहङ्कृतः -ता -तं, निरहङ्कारी &c., निरभिमानः -ना -नं, अभिमानहीनः -ना -नं, अभिमानशून्यः -न्या -न्यं, अनभिमानी -निनी -नि (न्), अनुद्धतः -ता -तं, वश्यात्मा -त्मा -त्म (न्).—(Low) अपकृष्टः -ष्टा -ष्टं, नीचः -चा -चं, अधमः -मा -मं, प्राकृतः -ती -तं, कृपणः -णा -णं.

To HUMBLE, *v. a.* अपकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं), नम् (c. 10. नमयति -यितुं), अवनम्, नम्रीकृ, पत् (c. 10. -पातयति -यितुं), भंश् (c. 10. भंशयति -यितुं), अभिभू (c. 1. -भवति -वितुं), तिरोभू (c. 10. -भावयति -यितुं), दर्पं or गर्व्वं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or हृ (c. 1. हरति, हर्त्तुं).

HUMBLE-BEE, *s.* गुञ्जकृत् *m.*, ध्वनमोदी *m.* (न्), भृङ्गराजः, भ्रमरः.

HUMBLED, *p. p.* भग्नदर्पः -र्पा -र्पं, आत्तगर्व्वः -र्व्वा -र्व्वं, हृतगर्व्वः -र्व्वा -र्व्वं, अभिभूतः -ता -तं, पराभूतः -ता -तं, पातितः -ता -तं, नम्रीकृतः -ता -तं, आनतः -ता -तं.

HUMBLENESS, *s.* बुद्धिनम्रता, नम्रता, विनम्रता, नम्रशीलता, विनयः, विनीतिः *f.*, विनतिः *f.*, वश्यता, अनहङ्कारः, अगर्व्वः, गर्व्वहीनता, दर्पहीनता, अनभिमानता, अपकृष्टता.

HUMBLING, *s.* अभिभवः, अभिभूतिः *f.*, अपकर्षः -र्षणं, दर्पभङ्गः, मानभङ्गः, दर्पहरणं, नम्रीकरणं.

HUMBLING, *a.* दर्पहः -हा -हं, दर्पहरः -रा -रं, मानहरः -रा -रं.

HUMBLY, *adv.* सविनयं, नम्रचेतसा, नम्रं, विनम्रं, दर्पं विना, गर्व्वं विना, अगर्व्वेण, निरभिमानेन, अहङ्कारं विना, सनिर्वेदं, निर्विण्णं, अनुद्धतं, कृपणं.

HUMBUG, *s.* प्रतारणं -णा, कपटः -टं, व्याजः, प्रवञ्चना, छलं, कैतवं.

To HUMBUG, *v. a.* प्रतॄ (c. 10. -तारयति -यितुं), छल् (c. 10. छलयति -यितुं), मुह् (c. 10. मोहयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), अभिसन्धा (c. 3. -दधाति -धातुं).

HUM-DRUM, *a.* मन्दः -न्दा -न्दं, विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु, कष्टकरः -रा -रं, जडः -डा -डं.

HUMECTATION, *s.* क्लेदनं, आर्द्रीकरणं, आप्लावनं, तेमनं, समुन्दनं.

To HUMECTATE, *v. a.* क्लिद् (c. 10. क्लेदयति -यितुं), आप्लु (c. 10. -प्लावयति -यितुं), आर्द्रीकृ, उन्द् (c. 7. उनत्ति, उन्दितुं), समुन्द्, सरसीकृ.

HUMERUS, *s.* प्रगण्डः.

HUMID, *a.* आर्द्रः -र्द्रा -र्द्रं, सार्द्रः -र्द्रा -र्द्रं, तिमितः -ता -तं, स्तिमितः -ता -तं, सरसः -सा -सं, क्लिन्नः -न्ना -न्नं, उन्नः -न्ना -न्नं, समुन्नः -न्ना -न्नं, वोदः -दा -दं.

HUMIDITY, *s.* आर्द्रता, सार्द्रता, क्लेदः, संक्लेदः, क्लिन्नता, सरसता, तेमः, स्तेमः, तेमनं, समुन्दनं, समुन्नता.

HUMILIATING, *a.* दर्पहः -हा -हं, दर्पहरः -रा -रं, मानहरः -रा -रं.

HUMILIATION, *s.* मानभङ्गः, मानहानिः *f.*, दर्पभङ्गः, दर्पहरणं, अपकर्षः -र्षणं, अभिभवः, अभिभूतिः *f.*, नम्रता, नम्रीकरणं, विनतिः *f.*, दान्तिः *f.*, नियमनं, दमनं.

HUMILITY, *s.* विनयः, विनीतिः *f.*, विनतिः *f.*, नम्रता, विनम्रता, नम्रशीलता, बुद्धिनम्रता, अनहङ्कारः, अगर्व्वः, गर्व्वहीनता, दर्पहीनता, अनभिमानं, वश्यता, दैन्यं, दीनता, निर्वेदः, निर्विण्णता, अनौद्धत्यं, आनतिः *f.*, सन्नतिः *f.*, अपकृष्टता, कृपणता, कार्पण्यं.

HUMORIST, *s.* परिहासवेदी *m.* (न्), परिहासशीलः, रसिकः, रसज्ञः, वैहासिकः, हासकरः, विदूषकः, भण्डः, नर्म्मसचिवः, रागी *m.* (न्).

HUMOROUS, *a.* रसिकः -का -कं, रसी -सिनी -सि (न्), रसवान् -वती -वत् (त्), सरसः -सा -सं, परिहासशीलः -ला -लं, हासकरः -री -रं, हासजनकः -का -कं, हास्यः -स्या -स्यं, उपहास्यः -स्या -स्यं, प्रहासी -सिनी -सि (न्), विनोदी -दिनी -दि (न्), कौतुकी -किनी -कि (न्).

HUMOROUSLY, *adv.* सरसं, रसिकप्रकारेण, हास्यप्रकारेण, रसिकं, हास्यं, विनोदार्थं, परिहासपूर्व्वं.

HUMOROUSNESS, *s.* रसिकत्वं, रसवत्त्वं, सरसत्वं, परिहासशीलता, हास्यता, उपहास्यता, हासजनकता, विनोदकत्वं.

HUMOURSOME, *s.* (Peevish) वक्रभावः -वा -वं, वक्रशीलः -ला -लं.—(Full of whims) चपलप्रकृतिः -तिः -ति, चपलभावः -वा -वं, चलचित्तः -त्ता -त्तं, छन्दोवान् -वती -वत् (त्), नैकभावाश्रयः -या -यं.

HUMOUR, *s.* (Moisture) क्लेदः -दं, संक्लेदः, स्तेमः, तेमः, जलावसेकः, चिक्लिदं, समुन्दनं, स्नेहः, आर्द्रता.—(Fluid) रसः, जलं; 'of the body,' धातुः *m.*; 'disorder of the humours,' दोषः; 'vitiation of the three humours,' दोषत्रयं.—(Temper of mind) भावः, स्वभावः, शीलः, शीलता -त्वं, प्रकृतिः *f.*; 'good humour,' सद्भावः, सत्प्रकृतिः *f.*, सुशीलता, सुप्रकृतिः *f.*; 'bad humour,' असद्भावः, वक्रभावः; 'in a bad humour,' दुष्प्रकृतिः -तिः -ति, दुःशीलः -ला -लं, वक्रभावः -वा -वं.—(Whim) छन्दस् *n.*, छन्दं, मनोलौल्यं, बुद्धिलौल्यं, बुद्धिविलासः, बुद्धिचापल्यं, चापलं, तरङ्गः, लहरी, अखट्टिः *m.*—(Wit) रसः, रसिकता, रसिता, चित्रं, वैदग्ध्यं, कौतुकं.

To HUMOUR, *v. a.* अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुकूल (c. 10. -कूलयति -यितुं), सन्तुष् (c. 10. -तोषयति -यितुं), परितुष्, अनुरुध् (c. 4. -रुध्यते -ति -रोद्धुं), आराध् (c. 10. -राधयति -यितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), प्रमद् (c. 10. -मादयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), भज् (c. 1. भजति -ते, भक्तुं), लल् (c. 10. लालयति -यितुं), 'to humour one's inclination,' छन्दोऽनुवृत्.—(Suit) युज् (c. 4. युज्यते, c. 10. योजयति -यितुं).

HUMOURED, *p. p.* अनुवृत्तः -त्ता -त्तं, अनुरुद्धः -द्धा -द्धं, अनुगृहीतः -ता -तं, आराधितः -ता -तं, प्रसादितः -ता -तं, सन्तोषितः -ता -तं.

HUMOURING, *s.* (Indulging) अनुवर्त्तनं, अनुवृत्तिः *f.*, छन्दोनुवृत्तं, अनुरोधः -धनं, सन्तोषणं, तुष्टिकरणं, तुष्टिदानं, आराधनं, प्रसादनं, प्रीतिकरणं, तर्पणं.

HUMP, *s.* गडुः *m.*, स्थगुः *m.*, पृष्ठग्रन्थिः *m.*; 'of a bull, &c.,' ककुद् *f.*, ककुदः -दं, अंसकूटः; 'having a hump,' ककुद्मान् -द्मती -द्मत् (त्), ककुद्मी -द्मिनी -द्मि (न्), न्युब्जः -ब्जा -ब्जं.

HUMP-BACKED, *a.* कुब्जः -ब्जा -ब्जं कुब्जकः -का -कं, गडुः -डुः -डु, गडुरः -रा -रं, गडुलः -ला -लं, वक्रपृष्ठः -ष्ठा -ष्ठं, उच्चस्कन्धः -न्धा -न्धं.

HUNCH, *s.* (A hump) गडुः *m.*, स्थगुः *m.*—(A lump) पिण्डः, गण्डिका, घनः.

To HUNCH, *v. a.* अरत्निना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं).

HUNCH-BACKED, *a.* गडुपृष्ठः -ष्ठा -ष्ठं. *See* HUMP-BACKED.

HUNDRED, *a.* शतं, शतसंख्यकः -का -कं, एकशतसंख्यकः -का -कं, शतकः -का -कं, दशतिः *f.* The word शतं may be used with the nom. pl. or gen. pl.; as, 'a hundred ancestors,' शतं पितरः or शतं पितॄणां; or in comp., as, 'a hundred years,' वर्षशतं, शतवर्षं; 'a hundred and fifty,' साष्टिशतं; 'a hundred thousand,' लक्षं -क्षा; 'a hundred millions,' अर्बुदं; 'a hundred years old,' शतायुः -युः -युः (स).

HUNDRED, *s.* शतं, शतकः, दशतिः *f.*: 'by hundreds,' शतशस्.

HUNDREDTH, *a.* शततमः -मी -मं, शतः -ती -तं.

HUNGER, *s.* क्षुधा, क्षुत् *f.* (ध्), बुभुक्षा, जिघत्सा, अन्नलिप्सा, आहारलिप्सा, अशनाया -यितं, अन्नायी, क्षारिका; 'hunger and thirst,' क्षुत्पिपासा or -से *f.* du.

To HUNGER, *v. n.* क्षुध् (c. 4. क्षुध्यति, क्षोद्धुं), भुज् in des. (बुभुक्षति -ते -क्षितुं), घस् in des. (जिघत्सति -त्सितुं), अशन (nom. अशनायति -यितुं), अन्नं or आहारं लभ् in des. (लिप्सते -प्सितुं): 'to hunger after righteousness,' धर्माय क्षुध्.

HUNGER-BIT, HUNGER-BITTEN, *a.* क्षुधार्तः -र्ता -र्तं, क्षुत्पीडितः -ता -तं.

HUNGERED, *a.* क्षुधितः -ता -तं, बुभुक्षितः -ता -तं, क्षुधार्तः -र्ता -र्तं.

HUNGERLY, *a.* अन्नार्थी -र्थिनी -र्थि (न्), भोजनार्थी &c., आहारार्थी &c.

HUNGER-STARVED *a.* क्षुदपसन्नः -न्ना -न्नं, क्षुधावसन्नः -न्ना -न्नं, क्षुधार्दितः -ता -तं.

HUNGRY, *a.* क्षुधार्तः -र्ता -र्तं, क्षुधितः -ता -तं, क्षुत्पीडितः -ता -तं, क्षुधापीडितः -ता -तं, क्षुधातुरः -रा -रं, बुभुक्षितः -ता -तं, बुभुक्षुः -क्षुः -क्षु, जिघत्सुः -त्सुः -त्सु, आहारार्थी -र्थिनी -र्थि (न्), अन्नार्थी &c., अन्नलिप्सुः -प्सुः -प्सु, आहारलिप्सुः -प्सुः -प्सु, अशनायितः -ता -तं, क्षुधाव्याकुलः -ला -लं: 'hungry and thirsty,' क्षुत्पिपासितः -ता -तं, क्षुत्तृष्णोपपीडितः -ता -तं.—(Lean) कृशः -शा -शं, अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं.

HUNKS, *s.* कृपणः, कदर्यः, धनलोभी *m.* (न्), मितम्पचः.

To HUNT, *v. a.* and *n.* (Chase) मृग् (c. 10. मृगयते -यितुं), मृगयां कृ, आखिद् (c. 1. -खेटति -टितुं), परिकल् (c. 10. -कालयति -यितुं). (Pursue, follow after, search for) अनुसृ (c. 1. -सरति -सर्तुं), अनुधाव् (c. 1. -धावति -वितुं), पश्चाद्धाव्, अनुवृत् (c. 1. -वर्तते -र्त्तितुं), पश्चाद्वृत्, अन्विष् (c. 4. -इष्यति -एषितुं).

HUNT, *s.* (Chase) मृगया, मृगयां, खेटः -टं, आखेटः, आखोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराधिः *f.*—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

HUNTED, *p. p.* मृगितः -ता -तं, अनुसृतः -ता -तं, अनुधावितः -ता -तं, आखेटितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, अन्वेषितः -ता -तं.

HUNTER, *s.* (One who pursues wild animals) व्याधः, मृगयुः *m.*, लुब्धकः, मृगवधाजीवः, मृगजीवनः, आखेटकः, मृगादिपशुहन्ता *m.* (न्तृ), मौकरिकः, अन्ध्रः, खट्टिकः; 'with nets,' जालिकः.—(Horse) मृगयाश्वः.

HUNTING, *s.* मृगया, मृगव्यं, खेटः -टं, आखेटः, आखोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराधिः *f.*; 'hunting-knife,' कर्त्तरिका; 'hunting-dog,' आखेटकः श्वा *m.* (न्), मृगयाकुक्कुरः; 'hunting appointments,' मृगयावेशः.—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

HUNTING-HORN, *s.* मृगयाशृङ्गः, मृगव्यशृङ्गः, व्याधवादितं शृङ्गं or विषाणं.

HUNTRESS, *s.* व्याधी *f.*, व्याधस्त्री, आखेटकी, मृगयाकारिणी.

HUNTSMAN, *s.* मृगयाकारी *m.* (न्), मृगव्याकारी *m.*, मृगयुः *m.*, आखेटकः.

HUNTSMANSHIP, *s.* मृगयाविद्या, मृगव्यविद्या, आखेटविद्या.

HURDLE, *s.* काष्ठशलाकानिर्म्मितम् अपरोधकं or आवरणं, स्तम्भकरः.

HURDY-GURDY, *s.* कर्कशशब्दः सतन्त्रीवाद्यविशेषः.

To HURL, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, असं (c. 4. अस्यति, असितुं), प्रास्, ईर् (c. 10. ईरयति, -यितुं), उदीर्, समीर्, मुच् (c. 6. मुञ्चति, मोक्तुं) प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), अवसृज्, पत् (c. 10. पातयति -यितुं), प्रहृ (c. 1. -हरति -ते -हर्त्तुं), प्रेष् (c. 10. प्रेषयति -यितुं, pt. इष), उद्धुर् (c. 6. -गूरते -रितुं); 'to hurl stones,' शिलाप्रहरणं कृ; 'is hurled down,' निपात्यते.

HURL, *s.* (Throw) क्षेपः -पणं, असनं पातनं.—(Tumult) तुमुलं, कोलाहलः, विप्लवः, डिम्बः.

HURLED, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं, प्रास्तः -स्ता -स्तं, पातितः -ता -तं, ईरितः -ता -तं, विसृष्टः -ष्टा -ष्टं.

HURLER, *s.* क्षेपकः, क्षेप्ता *m.* (प्तृ), असिता *m.* (तृ), प्रासकः.

HURLING, *s.* क्षेपणं, असनं, पातनं: 'of stones,' शिलाप्रहरणं.

HURLY-BURLY, *s.* कोलाहलः, हलहलाशब्दः, कालकीलः -लकः, तुमुलं.

HURRAH, *exclam.* जयशब्दः, प्रशंसाशब्दः, आनन्दशब्दः.

HURRICANE, *s.* चक्रवातः, प्रभञ्जनः, उत्पातवातः, अतिवातः, वात्या, वात्यावेगः, चण्डवातः, प्रचण्डवायुः *m.*, वातालीं, वातरूपः, वातगुल्मः, झञ्झावातः, झञ्झा, जवानिलः, भूमिः *m.*, निर्घातः, पवनाघातः.

HURRIED, *a.* त्वरितः -ता -तं; 'spoken fast,' त्वरितोदितः -ता -तं, निरस्तः -स्ता -स्तं.

HURRIEDLY, *adv.* त्वरितं, सत्वरं, द्रुतं, शीघ्रं, अविलम्बितं, सरभसं.

To HURRY, *v. a.* त्वर (c. 10. त्वरयति -यितुं), सन्त्वर्. (Hurry along, drive, impel) कृष (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रेर् (c. 10. -ईरयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं).

To HURRY, *v. n.* त्वर (c. 1. त्वरते -रितुं), सन्त्वर्, अतित्वर्, शीघ्र (nom. शीघ्रायते), सत्वरं or शीघ्रं गम् (c. 1. गच्छति, गन्तुं) or चर् (c. 1. चरति -रितुं).

HURRY, *s.* त्वरा, सम्भ्रमः, संवेगः, आवेगः, वेगः, रभसः, क्षिप्रकारिता, त्वरितगतिः *f.*, आशुगमनं, शीघ्रता.—(Bustle) सम्भ्रमः, आकुलत्वं, व्यग्रता, व्यस्तता; 'in a hurry,' त्वरितः -ता -तं, सम्भ्रमी -मिणी -मि (न), सम्भ्रान्तः -न्ता -न्तं, आकुलः -ला -लं.

HURRY-SKURRY, *adv.* ससम्भ्रमं, सरभसं, सावेगं, व्याकुलं, सम्भ्रमेण.

To HURT, *v. a.* हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), विहिंस्, उपहिंस्, आहिंस्, क्षतं कृ, क्षतिं कृ, क्षण (c. 8. क्षणोति -णितुं), परिक्षण्, अपकृ, द्रोहं कृ, अर्द् (c. 10. अर्दयति -यितुं), समर्द्, पीड् (c. 10. पीडयति -यितुं), व्यथ (c. 10. व्यथयति -यितुं), रिष् (c. 1. रेषति, c. 4. रिष्यति, रेषितुं, रेष्टुं), क्षि (c. 5. क्षिणोति, c. 1. क्षयति, क्षेतुं), हन् (c. 2. हन्ति -न्तुं), विहन्, उपहन्, तुद् (c. 6. तुदति, तोत्तुं), नश् (c. 10. नाशयति -यितुं), दुष् (c. 10. दूषयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं); 'you hurt me by your sharp words,' तुदसि मे मर्म्माणि वाक्शरैः.

HURT, *s.* क्षतं, क्षतिः *f.*, परिक्षतं, हिंसा -सनं, अपकारः, अपकृतं, द्रोहः, अभिद्रोहः, अपायः, क्षयः, उपक्षयः, पीडा, व्यथा, आघातः, बाधः, नाशः, दोषः, विहेडः -ठनं, हानिः *f.*, रिष्टं.

HURT, *p. p.* क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, हिंसितः -ता -तं, विहिंसितः -ता -तं, अपकृतः -ता -तं, कृतापकारः -रा -रं, अर्दितः

-ता -तं, पीडितः -ता -तं, निपीडितः -ता -तं, व्यथितः -ता -तं, विहतः -ता -तं, दूषितः -ता -तं, रिष्टः -ष्टा -ष्टं.

HURTER, *s.* क्षतकारी *m.* (न्), अपकारी *m.*, हिंसकः, रेष्टा *m.* (ष्टृ).

HURTFUL, *a.* हिंसः -सा -सं, हिंसालुः -लुः -लु -लुकः -का -कं, हिंसात्मकः -का -कं, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, आपकरः -री -रं, क्षतिकारी &c., क्षतिजनकः -का -कं, अहितः -ता -तं, नृशंसः -सा -सं, शरारुः -रुः -रु, शारुकः -का -कं, घातुकः -का -कं, उपघातकः -का -कं, हानिजनकः -का -कं, बाधकः -का -कं, सबाधः -धा -धं, रिप्वः -प्वा -प्वं, अनिष्टजनकः -का -कं. द्रोही -हिणी -हि (न्).

HURTFULLY, *adv.* हिंसापूर्वं, हिंसया, क्षतपूर्वं, सक्षतं, हिंसं, हिंसप्रकारेण, अहितं, यथा हिंसा क्रियते तथा, यथा क्षतं जायते तथा.

HURTFULNESS, *s.* हिंसता -त्वं, हिंसालुता, क्षतिकारिता, अहितत्वं.

To HURTLE, *v. a.* समाहन् (c. 2. -हन्ति -न्तुं), परस्परसमाघातं कृ.—(Whirl) भ्रम् (c. 10. भ्रमयति -यितुं).

HURTLESS, *a.* अहिंसः -सा -सं, अनपकारी -रिणी -रि (न्).

HUSBAND, *s.* (Man married to a woman) पतिः *m.*, भर्त्ता *m.* (र्तृ), स्वामी *m.* (न्), वरः, वोढा *m.* (ढृ), विवोढा *m.*, वरयिता *m.* (तृ), कान्तः, परिणेता *m.* (तृ), परिणायकः, नाथः, दयितः, इष्टः, प्रियः -यतमः, धवः. उपयन्ता *m.* (न्तृ), परिग्रहीता *m.* (तृ), क्षेत्रिकः, हृदयेशः, प्राणेशः, जीवितेशः, प्राणनाथः, प्राणाधिनाथः, वेत्ता *m.* (त्तृ); 'husband and wife,' दम्पती *m.* du., जम्पती *m.* du., भार्य्यापती *m.* du., जायापती *m.* du.; 'a husband's brother,' देवा *m.* (वृ), देवः, देवरः, देवलः; 'a second husband,' दिधिषुः *m.* -षूः *m.*—(Economist) परिमितव्ययी *m.* (न्), अल्पव्ययी *m.*—(Cultivator) कृषकः, कृषिकारी *m.* (न्).

To HUSBAND, *v. a.* (Economize) परिमितव्ययं कृ, न व्ययीकृ, न विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं); 'to husband one's time,' न कालक्षेपं कृ.—(Cultivate) कृष् (c. 6. कृषति, क्रष्टुं).

HUSBANDLESS, *a.* पतिहीना, भर्त्रहीना, भर्त्रिरहिता, निर्नाथा, अनाथा.

HUSBANDLY, *a.* परिमितव्ययः -या -यं, गृहव्यापाराभिज्ञः -ज्ञा -ज्ञं.

HUSBANDMAN, *s.* (Cultivator, farmer) कृषकः, कृषिकः, कर्षकः, कार्षिकः, कार्षिकः, कृषीवलः, क्षेत्रकर्षकः, क्षेत्रिकः, क्षेत्री *m.* (न्), क्षेत्राजीवः, कृषिजीवी *m.* (न्), हालिकः, क्षेत्रपतिः *m.*, कर्षाजः, कीनाशः, आड्डिकः.—(Man of the third tribe) वैश्यः, विट् *m.* (ड्), जरुजः, ऊरव्यः, अर्य्यः, भूमिस्पृक् *m.* (ष्ट्).

HUSBANDRY, *s.* (Agriculture) कृषिः *f.*, कार्षिः *f.*, कृषिकर्म्म *n.* (न्), कृषिविद्या, कृषनं, वैश्यक्रिया, वैश्यवृत्तिः *f.*, हलभृतिः *f.*, कर्षणं, कृष्टिः *f.*, प्रमृतं.—(Frugality, economy) परिमितव्ययः, गृहकर्म्मनयः, गृहकर्म्मनिर्वाहविद्या.

HUSH, *exclam.* शान्तं, शान्तं-शान्तं, शब्दं मा कुरु, तूष्णीम्भव, मौनीभव, निःशब्दो भव, वाचं यम, वाग्रोधं कुरु, हूम्. नीचैस्.

To HUSH, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् (c. 10. सान्त्वयति -यितुं), शब्दशान्तिं कृ. शब्दरोधं कृ. निःशब्दीकृ.

To HUSH, *v. n.* शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, प्रसद् (c. 1. -सीदति -सत्तुं), शान्तीभू, निःशब्दीभू, मौनीभू, तूष्णीम्भू.

HUSHED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः -ता -तं.

HUSK, *s.* तुषः -षा, तुमः, त्वक् *f.* (च्), कञ्चुकः, कोशः, पुटः, आवेष्टनं; 'of corn,' धान्यत्वक् *f.* (च्), धान्यतुषः.——(Chaff) घुसं, बुषं, तुच्छं, तुच्छधान्यकं, धान्यकल्कं; 'rice in husk,' शुष्कालं.

To HUSK, *v. a.* निस्तुष (nom. निस्तुषयति -यितुं), निस्तुषीकृ, तुषीकृ, निस्त्वच (nom. निस्त्वचयति -यितुं), निस्त्वचीकृ, त्वच (nom. त्वचयति -यितुं), तुषं or त्वचं हृ (c. 1. हरति, हर्त्तुं).

HUSKED, *p. p.* (Stripped of the husk) निस्तुषितः -ता -तं, निस्तुषः -षा -षं, निस्त्वचः -चा -चं, तुषीकृतः -ता -तं.—(Having a husk) तुषरः -रा -रं, तुषवान् -वती -वत् (त्), त्वग्युक्तः -क्ता -क्तं.

HUSKY, *a.* (Having husks, consisting of husks) तुषः -षा -षं, बहुतुषवान् -वती -वत् (त्), तुषमयः -यी -यं, त्वक्प्रायः -यी -यं.—(Rough, harsh) रूक्षः -क्षा -क्षं, ककैशः -शा -शं; 'in sound,' रूक्षस्वरः -रा -रं.

HUSSAR, *s.* अश्वारूढः सैन्यः, अश्वारोही *m.* (न्), साही *m.* (न्).

HUSSY, *s.* पापीयसी, दासीपुत्री, वन्धकी, दुष्टा स्त्री.

HUSTINGS, *s.* काष्ठनिर्म्मितो मञ्चविशेषो यत्र नगरप्रतिनिधिवरणं क्रियते.

To HUSTLE, *v. a.* निरस (c. 4. -अस्यति -असितुं), निःसृ (c. 10. -सारयति -यितुं), निराकृ, बहिष्कृ, सबाध् (c. 1. -बाधते -धितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं).

HUSWIFE, *s.* गृहिणी, कुटुम्बिनी, गेहिनी, स्वामिनी, गृहमेधिनी, गृहव्यापारकुशला.

HUSWIFERY, *s.* गृहव्यापारकुशलता, गृहकार्य्यदक्षता, गृहकर्म्मनिपुणता, गृहमेधित्वं, परिमितव्ययः.

HUT, *s.* उटजः, कुटीरः, पर्णशाला, कुटेरः, कुटिरं, महोटजः, तृणौकस *n.*, तृणकुटी, कुट्टिमः, वेश्म *n.* (न्), कायमानं.

HUTCH, *s.* (Bin) धान्यकोष्ठकं, कुशूलः, पिटः.—(For rabbits) शशकाधारः, शशकरक्षणी.

HUZZA, *s.* जयशब्दः, जयनादः, आनन्दशब्दः, प्रणादः, जयध्वनिः *m.*, जयकोलाहलः, जयारवः, प्रशंसानादः.

To HUZZA, *v. n.* जयशब्दं कृ, प्रणादं कृ, जयप्रणादं कृ.

HYACINTH, *s.* सुगन्धपुष्प ओषधिभेदः, सुगन्धिकुसुमा.

HYBRID, *a.* सङ्कीर्णजातिः -तिः -ति, सङ्कीर्णजातीयः -या -यं, सङ्करजातः -ता -तं, सङ्कीर्णः -र्णा -र्णं.

HYDRA, *s.* जलव्यालः, जलभुजङ्गमः, कविकल्पितो बहुमस्तकविशिष्टो वृहन् जलव्यालः.

HYDRAULIC, HYDRAULICAL, *a.* जलचलनविषयः -या -यं, चलनजलसम्बन्धी -न्धिनी -न्धि (न्), जङ्गमजलसम्बन्धी &c.

HYDRAULICS, *s.* चलनजलविद्या, जङ्गमजलविद्या, जलचलनविषया विद्या.

HYDROCELE, *s.* कोषवृद्धिः *f.*, मुष्कवृद्धिः *f.*, कुरण्डः.

HYDROCEPHALUS, *s.* जलमस्तकः, उदकमस्तकः, मस्तकाध्मानं.

HYDRODYNAMICS, *s.* जलगुणविषया विद्या, जलशक्तिविषया विद्या.

HYDROGEN, *s.* जलकरः, जलजं, जलजो वायुः, जलजो वाष्पः.

HYDROGRAPHER, *s.* समुद्रवेलादिपत्रलेखकः, नदीसमुद्रादिपत्रलेखकः, समुद्रलेखकः, समुद्रालेख्यकृत् *m.*, वेलालेख्यकृत् *m.*

HYDROGRAPHICAL, *a.* समुद्रलिखनसम्बन्धी -न्धिनी -न्धि (न्).

HYDROGRAPHY, *s.* समुद्रलिखनं, समुद्रलिखनविद्या, नदीसमुद्रादिपत्रलिखनं, समुद्रवेलादिविवरणं.

HYDROMANCY, *s.* जलादिलक्षणात् शुभाशुभदर्शनं or भविष्यदनुमानं or अनागतवृत्तसूचनं or भाविविषयप्रदर्शनं.

HYDROMEL, *s.* जलसंमृष्टं मधु, जलमधु *n.*, जलमाक्षिकं, मधु *n.*

HYDROMETER, *s.* जलपरिमापकयन्त्रं, जलमापनी.

HYDROPATHY, *s.* शीतजलप्रयोगेण रोगचिकित्सा, जलोपचारः.

HYDROPHOBIA, *s.* जलकैरोगः, जलभयं, जलकैदंशनप्रयुक्तो जलभयरोगः.

HYDROPIC, HYDROPICAL, *a.* जलोदरी -रिणी -रि (न्), जलोदरीयः -या -यं.

HYDROPSY, *s.* जलोदरं -री, उदरी, उदकोदरं, आध्मानं जठरामयः.

HYDROSTATICS, *s.* स्थावरजलविषया or अजङ्गमजलविषया विद्या, जलादिद्रवद्रव्यधर्म्मविषया विद्या.

HYEMAL, *a.* शीतकालीनः -ना -नं, हैमनः -नी -नं -निकः -की -कं.

Hyena, *s.* तरक्षुः *m.*, तरक्षुकः, तरक्षः, तर्क्षुः *m.*, मृगाजीवः, मृगादनः, युयुक्कुरुः.

Hygrometer, *s.* क्लेदपरिमापकयन्त्रं, नेमपरिमापकः.

Hymen, *s.* विवाहाधिष्ठात्री देवता, विवाहाधिष्ठाता *m.* (तृ).

Hymeneal, *a.* वैवाहिकः -की -कं, विवाहीयः -या -यं, उद्वाहिकः -की -कं, पाणिग्रहणिकः -की -कं.

Hymn, *s.* स्तुतिगीतं, ईश्वरस्तुतिगीतं, स्तुतिगानं, गीतं, सङ्गीतं, गानं, भक्तिगानं, गाथा, गेयं, स्तोत्रिः *f.*, स्तोत्रं, सूक्तं; 'a chanter of hymns,' सुस्रयुः *m.*, गायकः, उद्गाता *m.* (तृ).

To hymn, *v. a.* (Celebrate in song) सङ्गीतद्वारेण स्तु (c. 2. स्तौति, स्तोतुं) or स्तुतिं कृ or प्रशंस् (c. 1. -शंसति -शंसितुं), उपवीण् (nom. उपवीणयति -यितुं).

To hymn, *v. n.* गै (c. 1. गायति, गातुं), उद्गै, प्रगै, सुस्र (nom. सुस्रायते), स्तुतिं पठ् (c. 1. पठति -ठितुं), स्तुतिपाठं कृ.

Hymned, *p. p.* उपगीतः -ता -तं, उपगीयमानः -ना -नं, स्तुतः -ता -तं, संस्तुतः -ता -तं, स्तूयमानः -ना -नं.

Hyp, *s.* विषादः, अवसादः, अवसन्नता, उद्वेगः, ग्लानिः *f.*, खेदः.

To hyp, *v. a.* विषद् (c. 10.-षादयति -यितुं), विषण्णीकृ, ग्लानीकृ, उद्विग्नीकृ.

LATTER, *a.* (Opposed to former) उत्तरः -रा -रं, अपरः -रा -रं, परः -रा -रं, अवरः -रा -रं, पश्चिमः -मा -मं, चरमः -मा -मं, जघन्यः -न्या -न्यं, पाश्चात्यः -त्या -त्यं, पश्चातीयः -या -यं, अन्तिमः -मा -मं, अन्त्यः -त्या -त्यं; 'the latter,' अपरं; 'former and latter,' पूर्व्वापरं.—(Last-mentioned) उत्तरोक्तः -क्ता -क्तं, अपरोक्तः -क्ता -क्तं.—(Modern) नूतनः -ना -नं, आधुनिकः -की -कं, अर्वाचीनः -ना -नं, अप्राचीनः -ना -नं; 'in the latter part of the day,' अपराह्णे, पराह्णे.

LATTERLY, *adv.* अव्यवहितपूर्व्वकाले, नूतनकाले, अर्वाक्, अर्वाङ्काले, अर्वाचीनकाले, अधुनातनकाले, इदानीन्तनकाले.

LATTICE, *s.* (Window) जालं -लिका, जालकः, गवाक्षजालं, वातायनं, प्रच्छदं, वधूशयनं.

LATTICE-WORK, *s.* जालकर्म्म *n.* (न्), जालं, व्यत्यस्तरेखाविशिष्टं कर्म्म.

LAUD, *s.* प्रशंसा, श्लाघा, स्तुतिः *f.*, स्तुतिवादः, वन्दना, यशोवर्णना, ईडा.

To LAUD, *v. a.* प्रशंस् (c. 1. -शंसति -सितुं), स्तु (c. 2. स्तौति, स्तोतुं), अभिष्टु, संस्तु, श्लाघ् (c. 1. श्लाघते -घितुं, c. 10. श्लाघयति -यितुं), कृत् (c. 10. कीर्त्तयति -यितुं), वन्द् (c. 1. वन्दते -न्दितुं).

LAUDABLE, *a.* श्लाघ्यः -घ्या -घ्यं, श्लाघनीयः -या -यं, प्रशंसनीयः -या -यं, प्रशस्यः -स्या -स्यं, प्रशस्तः -स्ता -स्तं, स्तुत्यः -त्या -त्यं, स्तोतव्यः -व्या -व्यं, स्तवनीयः -या -यं, वन्द्यः -न्द्या -न्द्यं, वन्दनीयः -या -यं, कीर्त्तनीयः -या -यं, वर्णनीयः -या -यं, ईड्यः -ड्या -ड्यं, गेयः -या -यं, उपलभ्यः -भ्या -भ्यं, प्रशंसार्हः -र्हा -र्हं, श्लाघार्हः &c., स्तवार्हः &c.

LAUDABLENESS, *s.* श्लाघ्यता, श्लाघनीयता, प्रशस्यत्वं, प्रशस्तता, वन्द्यता

LAUDABLY, *adv.* श्लाघनीयं, प्रशस्यं, यथा प्रशंसाम् अर्हति तथा.

LAUDANUM, *s.* अफेनरसः, अहिफेनरसः, खसरसरसः.

LAUDATION, *s.* प्रशंसनं, श्लाघाकरणं, स्तुतिकरणं, कीर्त्तनं, गुणोत्कीर्त्तनं.

LAUDATORY, *a.* स्तुतिमयः -यी -यं, स्तुतिरूपः -पा -पं, श्लाघामयः -यी -यं, प्रशंसामयः -यी -यं, प्रशंसाकरः -री -रं, स्तुतिपाठकः -का -कं, स्तावकः -का -कं, गुणप्रकाशकः -का -कं, कीर्त्तिप्रकाशकः -का -कं, वन्दारुः -रुः -रु.

LAUDED, *p.p.* प्रशंसितः -ता -तं, स्तुतः -ता -तं, अभिष्टुतः -ता -तं, श्लाघितः -ता -तं.

LAUDER, *s.* प्रशंसकः, स्तोता *m.* (तृ), स्तुतिपाठकः, वन्दी *m.* (न्), वर्णकः.

To LAUGH, *v. n.* हस् (c. 1. हसति -सितुं), प्रहस्, विहस्, सम्प्रहस्, स्मि (c. 1. स्मयते, स्मेतुं), हासं कृ, हसनं कृ, हास्यं कृ, तक् (c. 1. तकति -कितुं). कक्ष् (c. 1. कक्षति -क्षितुं), कख् or कक्ख् (c. 1. कखति -खितुं), 'to laugh violently,' अतिहस्, अत्यन्तं हस्, अतिहासं कृ, अट्टहासं कृ, महाहासं कृ, आच्छुरितं कृ; 'to laugh in one's sleeve,' अन्तर्हासं कृ, उच्चघनं कृ; 'to laugh at,' अवहस्, अपहस्, उपहस्, उत्स्मि, अभिस्मि, अवहासभूमिं कृ, अपहासास्पदं कृ. *See To* DERIDE.

LAUGH, *s.* हासः, हसनं, हसितं, हास्यं, हसः, विहसितं, प्रहसितं, परिहासः, प्रहासः, उपहसितं, स्मितं, हः, हा, हें; 'a horse-laugh,' अट्टहासः, अट्टहसितं, आच्छुरितं -तकं, अवच्छुरितं, सोत्प्रासः; 'an inward laugh,' अन्तर्हासः, उच्चघनं.

LAUGHABLE, *a.* हास्यः -स्या -स्यं, उपहास्यः -स्या -स्यं, अवहास्यः -स्या -स्यं, परिहास्यः &c., हासकरः -री -रं, हास्यजनकः -का -कं, हस्योत्पादकः -का -कं, तकः -क्या -क्यं.

LAUGHABLENESS, *s.* हास्यता -त्वं, उपहास्यता, हासजनकत्वं.

LAUGHABLY, *adv.* उपहास्यप्रकारेण, यथा हासो जायते तथाप्रकारेण.

LAUGHER, *s.* हासकः, हासी *m.* (न्), उपहासकः, परिहासकः, हासकर्त्री *m.* (र्त्तृ), हसनकृत्, प्रहसनकृत.

LAUGHING, *a.* हास्यमुखः -खी -खं, हास्यवदनः -ना -नं, सुहसाननः -ना -नं, स्मेरमुखः -खी -खं, हास्यप्रियः -या -यं.

LAUGHINGLY, *adv.* सहासं, सहास्यं, सहसितं, सस्मितं, परिहासेन, विहस्य.

LAUGHING-STOCK, *s.* हास्यास्पदं, उपहासस्थानं, उपहासास्पदं, अपहासास्पदं, हास्यभूमिः *f.*, अवहासभूमिः *f.*, उपहासभूमिः, उपहासविषयः, अवहासविषयः.

LAUGHTER, *s.* हासः, हसनं, हसितं, हास्यं, प्रहसितं, विहसितं, उपहसितं, प्रहासः, परिहासः, हसः; 'loud or violent laughter,' प्रहासः, प्रहसनं, अतिहासः, अतिहसितं, महाहासः, अट्टहासः, आच्छुरितकं. *See* LAUGH.

To LAUNCH, *v. a.* (A ship) नावं मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं) or स्थलाद् मुक्ता जलं प्रविश् (c. 10. -वेशयति -यितुं), स्थलस्थनावं चल् (c. 10. चालयति -यितुं) or प्रचल् or वह् (c. 10. वाहयति -यितुं) or भास् (c. 10. भासयति -यितुं).

To LAUNCH, *v. n.* जलं प्रविश् (c. 6. -विशति -वेष्टुं), मुच् in pass. (मुच्यते).

LAUNCH, *s.* नौमुक्तिः *f.*, नौमोचनं, स्थलस्थनौकामुक्तिः *f.*, जलप्रवेशनं.

LAUNCHED, *p.p.* स्थलमुक्तः -क्ता -क्तं, जलप्रवेशितः -ता -तं, जलप्रविष्टः -ष्टा -ष्टं.

LAUNDER, LAUNDRESS, *s.* वस्त्ररजकी, वस्त्रधावकी, वस्त्रनिर्णेजकी

LAUNDERER, *s.* रजकः, वस्त्ररजकः, वस्त्रधावकः, वस्त्रनिर्णेजकः.

LAUNDRY, *s.* वस्त्रधावनशाला, निर्णेकगृहं, वस्त्रमार्जनशाला.

LAUREATE, *a.* वक्ष्यमाणवृक्षपत्रशोभितः -ता -तं, लारेलाख्यवृक्षपत्रभूषितः -ता -तं, मानसूचकमालाभूषितः -ता -तं.

LAUREL, *s.* लारेलाख्यो वृक्षभेदः, श्यामवृक्षविशेषः.

LAURELLED, *s.* पूर्व्वोक्तवृक्षपत्रभूषितः -ता -तं, मालाभूषितः -ता -तं.

LAVA, *s.* ज्वालामुखीनिर्गतद्रवः, आग्नेयपर्व्वतनिर्गतद्रवः.

LAVATION, *s.* धावनं, प्रक्षालनं, स्नानं, मार्जनं, निर्णेकः, मलापकर्षणं.

LAVATORY, *s.* धावनस्थानं, धावनशाला, प्रक्षालनस्थानं, मार्जनशाला.

To LAVE, *v. a.* धाव् (c. 1. धावति -वितुं, c. 10. धावयति -यितुं), प्रधाव्, क्षल् (c. 10. क्षालयति -यितुं), प्रक्षल्, स्ना in caus. (स्नापयति, स्नपयति -यितुं).

To LAVE, *v. n.* स्ना (c. 2. स्नाति -तुं), जले निमज्ज् (c. 6. -मज्जति -ज्जितुं).

LAVEMENT, *s.* (Cluster) वस्तिः *m. f.*, नेत्रं. *See* CLYSTER.

LAVENDER, *s.* लावेन्दराख्यः सुगन्धीयौषधिभेदः or सुगन्धितृणभेदः.

LAVER, *s.* प्रक्षालनपात्रं, धावनपात्रं, जलाधारः, द्रोणी.

LAVISH, *a.* (Prodigal) अतिव्ययी -यिनी -यि (न्), अपव्ययी &c., व्ययशीलः -ला -लं, अपरिमितव्ययः -या -यं, मुक्तहस्तः -स्ता -स्तं, अपचेता -त्री -तृ (तृ), उत्सर्गी -र्गिणी -र्गि (न्), अत्युत्सर्गी &c., अतिदाता -त्री -तृ (तृ), अतित्यागी -गिनी -गि (न्), बहुप्रदः -दा -दं.—(Copious, unrestrained) अपरिमितः -ता -तं, अतिरिक्तः -क्ता -क्तं, अति prefixed, 'lavish expenditure,' अतिव्ययः, अपरिमितव्ययः.

To LAVISH, *v. a.* अपरिमितं or अपरिमाणेन व्यय् (c. 1. व्ययति, c. 10. व्याययति -यितुं. rt. इ) or व्ययीकृ, अपरिमितव्ययं कृ, अतिव्ययं कृ, मुक्तहस्तेन दा (c. 3. ददाति, दातुं) or विसृज् (c. 6. -सृजति -स्रष्टुं) or उत्सृज् or त्यज् (c. 1. त्यजति, त्यक्तुं) or अपचि (c. 5. -चिनोति -चेतुं) or वितॄ (c. 1. -तरति -रितुं -रीतुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

LAVISHED, *p. p.* व्ययितः -ता -तं, विसर्ज्जितः -ता -तं, अपचितः -ता -तं, मुक्तहस्तेन दत्तः -त्ता -त्तं or प्रदत्तः -त्ता -त्तं, अतिबाहुल्येन विक्षिप्तः -प्ता -प्तं or वितीर्णः -र्णा -र्णं.

LAVISHER, *s.* अतिव्ययी *m.* (न्), अपरिमितव्ययी *m.*, अत्युत्सर्गी *m.* (न्), अतिदाता *m.* (तृ).

LAVISHLY, *adv.* अतिव्ययेन, अपरिमितव्ययेन, महाव्ययेन, अपरिमितं, अपरिमाणेन, मुक्तहस्तेन, अत्युत्सर्गेण, अकार्पण्येन, अबाहुल्येन.

LAVISHMENT, LAVISHNESS, *s.* अतिव्ययः, अपरिमितव्ययः, अपव्ययः, महाव्ययः, अत्युत्सर्गः, अतिसर्जनं, अतित्यागः, अतिमोक्षणं, अतिदानं, मुक्तहस्तत्वं, बहुप्रदत्वं, अकार्पण्यं.

LAW, *s.* (Ordinance, decree, statute of a state) व्यवस्था, शासनं, विधिः *m.*, विधानं, नियमः, अनुशासनं, सूत्रं, निदर्शनं, नियोगः, राजाज्ञा, आदेशः, निदेशः, व्यवस्थापत्रं, शासनपत्रं, चोदना, उरूवाक्यं. —(The rules by which judicature is regulated, jurisprudence) धर्म्मः, स्मृतिः *f.*, व्यवहारः, आचारः, व्यवहारविधिः *m.*, व्यवहारशास्त्रं, धर्म्मशास्त्रं, धर्म्मविधिः *m.*; 'a code of laws,' धर्म्मसंहिता, धर्म्मशास्त्रं, व्यवहारविधिः *m.*; 'a work on law,' स्मृतिशास्त्रं; 'criminal law,' दण्डविधिः *m.*, दण्डनीतिः *f.*; 'administration of the law,' धर्म्मप्रणयनं, धर्म्माधिकरणं; 'court of law,' धर्म्मसभा, 'matter cognizable by law,' व्यवहारविषयः, व्यवहारपदं; 'to go to law,' विवादं गम् (c. 1. गच्छति, गन्तुं), विवद् (c. 1. -वदते -दितुं), व्यवह् (c. 1. -हरति -हर्त्तुं); 'knowledge of law,' धर्म्मज्ञानं; 'learned in the law,' धर्म्मज्ञः, स्मृतिशास्त्रज्ञः, व्यवहारपण्डितः; 'breaking a law,' व्यवस्थातिक्रमः, व्यवस्थालङ्घनं, व्यवस्थातिवर्त्तनं. —(Legal process) व्यवहारः, व्यवहारमार्गः.—(Rule of action) नियमः, विधिः *m.*, विधानं, मर्य्यादा, स्थितिः *f.*, कार्य्याकार्य्यनियमः, कर्त्तव्याकर्त्तव्यनियमः, विधिनिषेधनियमः.—(Principle, rule of science, &c.) नियमः, सूत्रं, विधिः *m.*, स्थितिः *f.*, तत्त्वं, उरूवाक्यं, न्यायः, उत्सर्गः.—(Conformity to law, right) धर्म्मः, धर्म्मानुसारः, न्यायः, नीतिः *f.*—(The law of works, considered as a yoke of bondage) कर्म्ममार्गः, प्रवृत्तिमार्गः, कर्म्मबन्धः -न्धनं.

LAW-BREAKER, *s.* व्यवस्थातिक्रमी *m.* (न्), व्यवस्थातिवर्त्ती *m.* (न्), व्यवस्थालङ्घी *m.* (न्), व्यवस्थाभेदी *m.*, व्यवस्थालोपी *m.*

LAWFUL, *a.* (Conformable to law) धर्म्यः -र्म्या -र्म्यं, धर्म्मानुसारी -रिणी -रि (न्), धर्म्मानुयायी -यिनी -यि (न्), धर्म्मशास्त्रसम्मतः -ता -तं, स्मृतिशास्त्रसम्मतः &c., धर्म्मशास्त्रानुमतः &c., धर्म्मशास्त्रानुरूपः -पा -पं, व्यवस्थानुसारी &c., राज्यनियमसम्मतः &c., व्यवहारानुसारी &c., व्यावहारिकः -की -कं, स्मृतिशास्त्रानुसारी &c., स्मार्त्तः -र्त्ती -र्त्तं, शास्त्रीयः -या -यं, आचारिकः -की -कं, आचारी -रिणी -रि (न्), न्यायानुसारी &c., राज्यव्यवस्थानुयायी &c., सौत्रः -त्री -त्रं.—(Constituted by law) धर्म्मशास्त्रप्रोक्तः -क्ता -क्तं, स्मृतिशास्त्रप्रोक्तः &c., व्यवहारविधिप्रोक्तः &c., स्मृत्युक्तः &c., स्मृतिशास्त्रविहितः -ता -तं, शास्त्रोक्तः &c.—(Not forbidden) अनिषिद्धः -द्धा -द्धं, शास्त्रानिषिद्धः -द्धा -द्धं, धर्म्माविरोधी -धिनी -धि (न्).—(Rightful) न्यायी -यिनी -यि (न्), न्याय्यः -य्या -य्यं, यथान्यायः -या -यं; 'lawful wife,' धर्म्मपत्नी; 'by lawful means,' धर्म्मोपायेन; 'lawful and unlawful food,' भक्ष्याभक्ष्यं.

LAWFULLY, *adv.* धर्म्मेण, धर्म्मतस्, धर्म्मानुसारेण -रात्, धर्म्मशास्त्रानुसारेण, स्मृतिशास्त्रानुसारेण, व्यवहारविध्यनुसारेण, व्यवस्थानुरूपेण, राज्यनियमानुरूपेण, न्यायतस्, न्यायानुसारेण, यथान्यायं, न्याय्यं.

LAWFULNESS, *s.* धर्म्यत्वं, धर्म्मानुसारित्वं, धर्म्मानुसारः, धर्म्मशास्त्रानुसारिता, स्मृतिशास्त्रानुयायिता, धर्म्मशास्त्रानुकूल्यं, न्यायानुसारः-रिता, न्याय्यत्वं.

LAWGIVER, *s.* स्मृतिकारः, व्यवस्थाकारः -रकः, विधिस्थापकः, विधिकर्त्ता *m.* (र्त्तृ), व्यवस्थाकर्त्ता *m.*, विधिप्रवर्त्तकः, व्यवस्थापकः, शासिता *m.* (तृ), विचारयिता *m.* (तृ), प्रयोजकः, शास्त्रकर्त्ता *m.*, धर्म्मशास्त्ररचकः, विधिदाता *m.* (तृ), विधिदायकः, विधायी *m.* (न्), विधायकः.

LAWLESS, *a.* (Not subject to law, said of persons) दुराचारः -रा -रं, अनाचारी -रिणी -रि (न्), आचारभ्रष्टः -ष्टा -ष्टं, निराचारः -रा -रं, आचारहीनः -ना -नं, आचारवर्जितः -ता -तं, निर्मर्य्यादः -दा -दं, अमर्य्यादः -दा -दं, मर्य्यादातिवर्त्ती -र्त्तिनी -र्त्ति (न्), मर्य्यादातिचारी &c., मर्य्यादातिक्रमी &c., अतिक्रान्तमर्य्यादः -दा -दं, त्यक्तमर्य्यादः -दा -दं, त्यक्तधर्म्मा -र्म्मा -र्म्म (न्), धर्म्मभ्रष्टः -ष्टा -ष्टं, कामाचारी &c., यथेष्टाचारी &c., स्वेच्छाचारी &c., कामवृत्तः -त्ता -त्तं, स्वैरगतिः -तिः -ति, अशिष्टः -ष्टा -ष्टं, अवशः -शा -शं, अनियतः -ता -तं, उच्छृङ्खलः -ला -लं, शास्त्रातिवर्त्ती &c., व्यवस्थातिवर्त्ती &c., व्यवस्थातिक्रमी &c.—(Contrary to law) धर्म्मविरुद्धः -द्धा -द्धं, स्मृतिविरुद्धः &c., व्यवहारविरुद्धः &c., व्यवस्थाविरुद्धः &c., धर्म्मरोधी -धिनी -धि (न्), अधर्म्यः -र्म्या -र्म्यं, अस्मार्त्तः -र्त्ती -र्त्तं, अव्यवस्थितः -ता -तं. *See* ILLEGAL.

LAWLESSLY, *adv.* धर्म्मविरोधेन, स्मृतिविरोधेन, व्यवहारविरुद्धं, आचारविरोधेन, दुराचारवत्, धर्म्मभ्रष्टवत्, अशिष्टवत्, अवशं, उच्छृङ्खलं.

LAWLESSNESS, *s.* दुराचारत्वं, आचारभ्रष्टता, मर्य्यादातिवर्त्तनं, मर्य्यादातिक्रमः, अमर्य्यादा, अनाचारः, व्यभिचारः, व्यतिक्रमः, कामाचारित्वं, कामवृत्तता, नियमातिक्रमः, व्यवस्थातिक्रमः, नियमातिवर्त्तनं, व्यवस्थातिवर्त्तनं, उच्छृङ्खलत्वं.

LAWN, *s.* (Space of ground covered with grass) तृणावृतो भूमिभागः, सतृणस्थलं, शाड्वलस्थलं, हरितस्थलं, तृणावृतस्थलं.—(Fine linen) अंशुकं, दुकूलं.

LAW-SUIT, *s.* अर्थः, विवादः, व्यवहारः, कार्य्यं, अक्षः, वादः, व्यवहरणं.

LAWYER, *s.* धर्म्मज्ञः, धर्म्मशास्त्रज्ञः, धर्म्मशास्त्रवेत्ता *m.* (त्तृ), स्मृतिशास्त्रज्ञः, व्यवहारपण्डितः, व्यवस्थापकः, व्यवस्थानिरूपकः, आचारज्ञः, व्यवहारसचिवः.

LAX, *a.* (Loose) शिथिलः -ला -लं, श्लथः -था -थं, प्रश्लथः -था -थं, विगलितः -ता -तं, स्रस्तः -स्ता -स्तं, अबद्धः -द्धा -द्धं.—(In morals) अनवस्थः -स्था -स्थं, दुराचारः -रा -रं, अनाचारी -रिणी -रि (न्), धर्म्मभ्रष्टः -ष्टा -ष्टं, कर्म्मभ्रष्टः &c., व्यभिचारी &c.—(In the bowels) मृदुकोष्ठः -ष्ठा -ष्ठं, अबद्धकोष्ठः -ष्ठा -ष्ठं.—(In discipline) अतीक्ष्णदण्डः -ण्डा -ण्डं, शिथिलदण्डः -ण्डा -ण्डं.

LAX, *s.* (Diarrhœa) सारणः, अतिसारः, प्रवाहिका, विरेकः.

LAXATIVE, *a.* मलावष्टम्भघ्नः -घ्नी -घ्नं, मलावरोधनाशकः -का -कं, सारकः -का -कं, कोष्ठविसंसनः -ना -नं, रेचकः -की -कं, विरेचकः -की -कं.

LAXATIVE, *s.* विसंसनं, रेचकः, मलसारकम् औषधीयद्रव्यं.

LAXITY, LAXNESS, *s.* (Looseness) शैथिल्यं, शिथिलता -त्वं, श्लथत्वं, प्रश्लथः, विसंसः, विस्रस्तता, अधृतिः *f.*, अबद्धता.—(In morals) अनवस्थितिः *f.*, अनवस्थता, व्यभिचारः, अनाचारः, आचारभ्रष्टता, मर्य्यादातिक्रमः, व्यतिक्रमः, इन्द्रियासंयमः.—(In discipline) दण्डातैक्ष्ण्यं, दण्डशैथिल्यं.—(Of the bowels) अतिसारः, सारणः, कोष्ठमृदुता.

To LAY, *v. a.* (Place, set) धा (c. 3. दधाति, धातुं), निधा, आधा, न्यस् (c. 4. -अस्यति -असितुं), स्था in caus. (स्थापयति -यितुं), निविश् (c. 10. -वेशयति -यितुं), आरुह् in caus. (-रोपयति -यितुं), ऋ in caus. (अर्पयति -यितुं), दा (c. 3. ददाति, दातुं), धृ (c. 1. धरति, धर्त्तुं), कृ; 'he lays the cup on the ground,' पात्रं भूमौ निदधाति or न्यस्यति; 'he lays the goat on his shoulders,' छागं स्कन्धे or स्कन्धेन करोति; 'lay your hand on my shoulder,' मत्स्कन्धे हस्तं देहि.—(Place in order) विन्यस्, विधा, संविधा, प्रतिविधा, विरच् (c. 10. -रचयति -यितुं), क्रमेण स्था.—(Beat down) पत् (c. 10. पातयति -यितुं), निपत्.—(Spread) आस्तॄ (c. 9. -स्तृणाति, c. 5. -स्तृणोति -स्तरितुं -रीतुं), विस्तॄ; 'to lay snares,' जालं विस्तॄ; 'he lays sacred grass over the ground,' भूमिं कुशैर् आस्तृणाति.—(Spread on a surface) लिप् (c. 6. -लिम्पति, लेप्तुं) with acc. and instr. c.—(Still, quiet, calm) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्.—(Lay a wager) पण् (c. 1. पणते -णितुं), विपण्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), पणं कृ, प्रतिज्ञां कृ.—(Lay eggs) अण्डानि सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु.—(Lay the blame) कस्मिंश्चिद् दोषम् आरुह् or क्षिप्, दोषारोपणं कृ, दोषप्रसङ्गं कृ.—(Apply) आधा, न्यस्, संयुज् (c. 10. -योजयति -यितुं), ऋ in caus.—(Impose) न्यस्, निविश्, नियुज्, आरुह् in caus.—(Lay a command) आदेशं कृ, आज्ञां कृ, जिषुज्.—(Lay an ambush) पराक्रमणार्थं सैन्यं निभृते स्था in caus.—(Lay a plot, scheme) कपटप्रबन्धं कृ, सङ्कल्पं कृ, उपायं प्रचिन्त् (c. 10. -चिन्तयति -यितुं) or घट् (c. 1. घटते -टितुं) or विधा or प्रयुज्.—(Lay siege) परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), रुध् (c. 7. रुणद्धि, रोद्धुं), अवरुध्, उपरुध्.—(Lay waste) उपद्रु (c. 1. -द्रवति -द्रोतुं), उपप्लु (c. 1. -प्लवते -प्लोतुं), बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, निर्दह् (c. 1. -दहति -दग्धुं), दह्, निर्जनीकृ.—(Lay aside) न्यस्, सव्यस्, त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, सन्त्यज्, हा (c. 3. जहाति, हातुं), अपहा, उत्सृज् (c. 6. -सृजति -स्रष्टुं), उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्, अवहृ (c. 1. -हरति -हर्त्तुं), अवमुच् (c. 6. -मुञ्चति -मोक्तुं); 'one who has laid aside his anger,' अस्तकोपः -पा -पं.—(Lay before) प्रसृ (c. 10. -सारयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), उपन्यस्, ऋ in caus.—(Lay by) सव्यस्, परिरक्ष् (c. 1. -रक्षति -क्षितुं), रक्ष्, निधा, निधिं कृ; 'he lays by the food left by the crows,' काकेभ्यः शिष्टं मांसं रक्षति.—(Lay down, deposit) न्यस्, उपन्यस्, प्रतिन्यस्, निक्षिप्, निधा, अवधा, न्यासीकृ.—(Lay down, give up) त्यज्, परित्यज्, विमुच्, विहा.—(Lay down, put down, cause to lie down) निधा, शी (c. 10. शाययति -यितुं), उपविश्, निविश्.—(Lay one's self down) शी (c. 2. शेते, शयितुं), संविश (c. 6. -विशति -वेष्टुं), शयनं कृ.—(Lay hold of) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), परिग्रह्,

सङ्ग्रह, हस्तेन ग्रह्, धृ (c. 1. धरति, धर्तुं), हस्तेन धृ.—(Lay in) सङ्ग्रह, सङ्ग्रहं कृ, सञ्चयं कृ, पर्य्याहारं कृ, सचि (c. 5. -चिनोति -चेतुं); 'lay in a store of grain,' धान्यसङ्ग्रहं कृ.—(Lay on) पत् (c. 10. पातयति -यितुं), प्रयुज्, नियुज्, युज् in caus.; 'lay on blows,' दण्डं पत्.—(Lay open) विवृ (c. 5. -वृणोति -णुते -वरितुं -रीतुं), अपवृ, प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकटीकृ, व्यक्तीकृ.—(Lay out money, expend) व्यय् (c. 10. व्ययति -यितुं, rt. इ), व्ययीकृ, विनियुज् (c. 7. -युंक्ते -योक्तुं), उपयुज्.—(Lay out, display) प्रमृ (c. 10. -मारयति -यितुं), प्रकाश्, प्रकटीकृ.—(Lay out, dispose in order) विन्यस्, विरच्, मृषय्यां -यां कृ, परिकॢप् (c. 10. -कल्पयति -यितुं), क्रमेण स्था.—(Lay one's self out) आत्मानं चेष्ट् (c. 1. चेष्टते -ष्टितुं), यत् (c. 1. यतते -तितुं), यत्नं कृ.—(Lay out, spread out) आस्तृ, विस्तृ.—(Lay to a ship) नौगतिरोधं कृ.—(Lay up) निधा (c. 3. or c. 10. -धापयति -यितुं). *See* LAY BY, LAY IN. 'A king should lay up treasure,' राज्ञा निधिर् निधातव्यः.—(To be laid up) रोगोपहतत्वात् शयनाद् उत्थातुं or शयनगृहाद् निर्गन्तुम् अक्षमः -मा भू.—(Lay the dust) मार्गरेणुं सिच् (c. 6. सिञ्चति, सेक्तुं) or संसिच्.—(Lay down life) प्राणान् त्यज् or मुच् or न्यस्.

To LAY, *v. n.* (Produce eggs) अण्डानि सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू or जन् (c. 10. जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं) or उत्पद् (c. 10. -पादयति -यितुं).

LAY, *s.* (Stratum, layer) स्तरः, आस्तरणं, आस्तरः, फलकः -कं, पुटः.—(Song) गीतं, गानं, कविता, काव्यं.

LAY, *a.* (Not clerical) गृहस्थसम्बन्धी -न्धिनी -न्धि (न्), गृहस्थी -स्थिनी -स्थि (न्), गार्हस्थिकः -की -कं, पुरोहितसम्बन्धिभिन्नः -न्ना -न्नं, पौरोहित्यभिन्नः -न्ना -न्नं, धर्म्मपदस्थभिन्नः -न्ना -न्नं, धर्म्मपदस्थातिरिक्तः -क्ता -क्तं, सामान्यलोकसम्बन्धी &c., साधारणलोकसम्बन्धी &c., धर्म्माधिकारदीक्षाहीनः -ना -नं, अज्ञातधर्म्माधिकारदीक्षः -क्षा -क्षं.

LAYER, *s.* (Stratum) आस्तरणं, आस्तरः, स्तरः फलकः -कं, पार्श्वियांशुपुटः; 'layer of rock,' शिलाफलकं.—(Young twig, shoot) पल्लवः, किशलयः, प्ररोहः.

LAY-FIGURE, *s.* चित्रकर्म्मणि प्रयुक्ता काष्ठनिर्म्मिता पुरुषाकारा मूर्त्तिः.

LAY-MAN, *s.* गृहस्थः, सामान्यलोकः, सामान्यजनः, साधारणलोकः, साधारणपदस्थः, सामान्यपदस्थः, दीक्षाहीनः, अदीक्षितः, अज्ञातदीक्षः.

LAY-STALL, *s.* पुरीषराशिः *m.*, शकृद्राशिः *m.*, अमेध्यराशिः, अवस्करचयः.

LAZAR, *s.* कुष्ठी *m.* (न्), श्वित्री *m.* (न्), दुष्टचर्म्मा *m.* (न्), त्वग्रोगी *m.* (न्), त्वग्रोगोपहतः, त्वग्व्याधियस्तः, चर्म्मरोगोपहतः, चर्म्मरोगदूषितः.

LAZAR-HOUSE, LAZARETTO, *s.* कुष्ठीशाला, त्वग्रोगदूषितशाला, त्वग्रोगिशाला, चर्म्मरोगिशाला, रोगप्रतीकारशाला, रोगसम्पर्ककदूषितानां or रोगसंसर्गदूषितानां रक्षणशाला.

LAZAR-LIKE, LAZARLY, *a.* त्वग्व्रणी -णिनी -णि (न्). *See* LAZAR.

LAZARONI, *s.* अलसजनः, अलसलोकः, दरिद्रजनः, निर्व्यापारजनः.

LAZILY, *adv.* अलसवत्, आलस्येन, सालस्यं, अलसं, मन्दं, मन्दं मन्दं, मन्दगत्या, समान्द्यं, अनुद्योगेन, जडवत्, सजाड्यं, जाड्येन.

LAZINESS, *s.* आलस्यं, अलसता -त्वं, मन्दता, मान्द्यं, अलसशीलता, आलस्यशीलता, अनुद्योगः -गिता, अनुद्योगशीलता, उद्योगद्वेषः, कार्य्यद्वेषः, उत्साहद्वेषः, उत्साहविमुखता, उद्योगवैमुख्यं, कर्म्मपराङ्मुखता, अव्यवसायः, कुण्ठता, अनुष्णता, जडता, जाड्यं, तन्द्रिका, तन्द्रालुता, क्लीवता, क्लैब्यं.

LAZULI, *s.* वैदूर्य्यं, विदूरजं. *See* LAPIS LAZULI.

LAZY, *a.* अलसः -सा -सं, आलस्यः -स्या -स्यं, आलस्यशीलः -ला -लं, मन्दः -न्दा -न्दं, मन्थरः -रा -रं, मन्दरः -रा -रं, अनुद्योगशीलः -ला -लं, उद्योगद्वेषी -षिणी -षि (न्), उद्योगविमुखः -खा -खं, उद्योगपराङ्मुखः -खा -खं, उत्साहविमुखः &c., अकर्म्मशीलः -ला -लं, निरुद्योगः -गा -गं -गी -गिनी -गि (न्), अनुद्योगः &c., निरुत्साहः -हा -हं -ही -हिनी -हि (न्), व्यवसायविमुखः &c., अव्यवसायी &c., अव्यवसायशीलः &c., मनाक्करः -री -रं, कुण्ठः -ण्ठा -ण्ठं, जडः -डा -डं, शीतः -ता -तं, अनुष्णः -ष्णा -ष्णं, क्लीवः -वा -वं, तन्द्रालुः -लुः -लु, मन्दगतिः -तिः -ति; 'a lazy fellow,' तुन्दपरिमृजः, तुन्दपरिमार्जिः, शीतकः.

LEA, LEY, *s.* यावसभूमिः *f.*, यवसीयभूमिः *f.*, यवसावृतो भूमिभागः.

LEAD, *s.* (The metal) सीसं, सीसकं, सोसपत्रकं, नागं, वप्रं, योगेष्टं, त्रपुः *n.*, त्रपुस् *n.*, यज्ञं, कुवङ्गं, पिच्चटं, शिरावृत्तं, तमरं, जडं, चीनं, बहुमलं, यामुनेष्टकं, परिपिष्टकं, सिन्दूरकारणं, तारशुद्धिकरं; 'red-lead,' सिन्दूरं -रिका, नागसम्भवं, नागजं, नागरक्तं, नागगर्भः, शोणं, सौभाग्यं, रक्तचूर्णं, रक्तपालुकं, रक्तरेणुः *m.*, शृङ्गारं, शृङ्गारभूषणं; 'marked with red-lead,' सिन्दूरतिलकः -का -कं.—(Plummet) लसः -सकः, लससीसकं.

To LEAD, *v. a.* (Conduct, guide) नी (c. 1. नयति, नेतुं), आनी, समानी, उपानी, गम् (c. 10. गमयति -यितुं), प्राप् (c. 10. -आपयति -यितुं), with two acc. c.—(Show the way) मार्गं or पथं दृश् (c. 10. दर्शयति -यितुं) or आदिश् (c. 10. -देशयति -यितुं) or निर्दिश्.—(Lead by the hand) हस्तेन नी.—(Direct) निर्दिश्, उपदिश्, उद्दिश्, आदिश्.—(Draw, entice, allure) आकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं), सङ्कृष्, कृष्, प्रलुभ् (c. 10. -लोभयति -यितुं), परिलुभ्—(Induce, influence) अनुनी, आनी, प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रेर् (c. 10. -ईरयति -यितुं), प्रोत्सह् (c. 10. -साहयति -यितुं), नियुज् (c. 10. -योजयति -यितुं), प्रयुज्.—(Pass time) कालं नी or वृत् (c. 10. वर्त्तयति -यितुं) or प्रवृत् or या in caus. (यापयति -यितुं) or गम् in caus.—(Lead forth, lead up) उद्धृ, उत्कृष्, प्रकृष्, उद्गम् in caus.—(Lead back) प्रत्यानी, निवृत् in caus.

To LEAD, *v. n.* (Go before) अग्रे or अग्रतः सृ (c. 1. सरति, सर्तुं) or गम् (c. 1. गच्छति, गन्तुं), पुरः or पुरतो गम् or चर् (c. 1. चरति -रितुं), अग्रे स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), मुख्यः -ख्या -ख्यं भू, मुख्यतो वृत् or स्था.—(Lead to, bring about) आवह् (c. 1. -वहति -वोढुं), उत्पद् (c. 10. -पादयति -यितुं).

LEAD, *s.* (Precedence, guidance) पुरोगतिः *f.*, अग्रगतिः *f.*, अग्रगमनं, पुरोगमनं, अग्रसरणं, अग्रयानं, प्राग्गमनं, पुरतःसरणं, पुरतोगमनं, नेतृत्वं, नायकत्वं, नयः -यनं, मुख्यत्वं -ता, प्रष्टृत्वं; to take the lead.' *See To* LEAD, *v. n.*

LEADED, *p. p.* or *a.* सीसकयुक्तः -क्ता -क्तं, सीसकावृतः -ता -तं, सीसकवद्धः -द्धा -द्धं.

LEADEN, *a.* सैसकः -की -कं, सीसमयः -यी -यं, सीसनिर्म्मितः -ता -तं.

LEADER, *s.* (Guide, conductor) नेता *m.* (तृ), नायकः, नेचः, विनेता *m.*, पथदर्शकः, मार्गदर्शकः, मार्गनिर्देष्टा *m.* (ष्टृ), पथनिर्देशकः, मार्गोपदेष्टा *m.*, मार्गोपदेशी *m.* (न्), उपदेष्टा *m.*, सञ्चारकः.—(Chief) मुख्यः, मुखरः, प्रमुखः, अधिपः, अधिष्ठाता *m.* (तृ), ईश्वरः, पतिः *m.*—(One who goes first) पुरोगः -गमः, पुरोगामी *n.* (न्), पुरोगतिः *m.*, अग्रगः, अग्रसरः, अग्रेसरः -रिकः, अग्रतःसरः, पुरःसरः, पुरस्सरः, अग्रगामी, प्रष्टः, शिरोवर्त्ती *m.* (न्), शिरस्यः.—(Of an army) सेनाग्रगः, सेनानीः *m.*, सेनापतिः *m.*, सेनाधिपः, सेनाध्यक्षः, दण्डनायकः, योधमुख्यः, वाहिनीपतिः *m.*, चमूपतिः *m.*; 'an able leader in war,' सांयुगीनः.—(Of a religious order or sect) आचार्य्यः, गुरुः *m.*

LEADERSHIP, *s.* नेतृत्वं, नायकत्वं, मुख्यता -त्वं, अधिष्ठातृत्वं, प्रमुखता.

LEADING, *part.* or *a.* (Preceding) अग्रगः -गा -गं, अग्रगामी -मिनी -मि (न्), पुरोगामी &c., प्राग्गामी &c., अग्रसरः -रा -रे, अग्रसरः -रा -रं, पुरःसरः -रा -रं, पुरोगः -गा -गं, पुरोगमः -मा -मं.—(Chief) मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्र्यः -ग्रा -ग्र्यं, अग्रियः -या -र्यं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः -ग्र्या -ग्र्यं, प्रधान in comp., परमः -मा -मं, परः -रा -रं, उत्तमः -मा -मं.—(Leading to, conducive to) आवहः -हा -हं, सम्पादकः -का -कं; 'leading to happiness,' सुखावहः -हा -हं, सुखोदर्कः -र्का -र्कं; 'road leading to the city,' नगरगामी मार्गः; 'leading note,' वादी *m.* (न्).

LEADING, *s.* (Guidance) नयः -यनं, नायः, नीतिः *f.*, नेतृत्वं, प्रणयनं.

LEADING-STRINGS, *s.* बालकालम्बनसूत्रं -त्राणि *n. pl.*, बालकालम्बः -म्बनं.

LEAD-WORT, *s.* (A plant) पाठा *m.* (न्), चित्रकः, वह्निः *m.*, अग्निः *m.*, अनलः, पावकः, दहनः, कृशानुः *m.*

LEADY, *a.* सीसकवर्णः -र्णा -र्णं, त्रापुषः -षी -षं, सैसकः -की -कं.

LEAF, *s.* (Of a tree, &c.) पत्रं -त्रकं, पर्णं, दलं -लः, पलाशं, छदः -दनं, अंशुकं, राणं, वातायं.—(Of a book, &c.) पत्रं -त्रकं, पत्रिका, फलकः, पुस्तकपत्रं.—(Of a door, table, &c.) कपाटः -टी -टं; 'the junction of two leaves,' कपाटसन्धिः *m.*—(Gold-leaf) सुवर्णपत्रं, सशपदपत्रं; 'fallen leaf of a tree,' प्रपर्णी; 'withered leaf,' शीर्णपर्णी; 'vein of a leaf,' पत्रशिरा, दलखसा; 'to strip off the leaves,' निष्पत्र (nom. निष्पत्रयति -यितुं), निष्पत्रीकृ.

To LEAF, *v. n.* सपत्रीभू, सपर्णीभू, स्फुटितपत्रः -त्रा -त्रं भू, प्ररूढपत्रः -त्रा -त्रं भू.

LEAFED, *a.* सपत्रः -त्रा -त्रं, सपर्णः -र्णा -र्णं, पत्रयुक्तः -क्ता -क्तं.

LEAFINESS, *s.* पत्रबाहुल्यं, बहुपर्णत्वं, पर्णबाहुल्यं, पत्रप्राचुर्यं, प्रचुरपत्रत्वं, सपर्णत्वं, सपत्रत्वं, सदलता.

LEAFLESS, *a.* निष्पत्रः -त्रा -त्रं, निष्पर्णः -र्णा -र्णं, अपत्रः -त्रा -त्रं, अपर्णः -र्णा -र्णं, अदलः -ला -लं, पत्रहीनः -ना -नं, पर्णशून्यः -न्या -न्यं, दलशून्यः -न्या -न्यं.

LEAFLESSNESS, *s.* निष्पत्रता, निष्पर्णता, अदलत्वं, पत्रहीनता, पर्णशून्यता.

LEAFLET, *s.* पत्रकं, क्षुद्रपत्रं, सूक्ष्मपत्रं, क्षुद्रपर्णं, सूक्ष्मपर्णं.

LEAF-STALK, *s.* पत्रमञ्जरी, पर्णमञ्जरी, पत्रनाली, पर्णनाली.

LEAFY, *a.* पर्णी -र्णिनी -र्णि (न्), पत्री -त्रिणी -त्रि (न्), पर्णसः -सा -सं, दलसः -सा -सं, बहुपत्रः -त्रा -त्रं, बहुपर्णः -र्णा -र्णं, प्रचुरपर्णः -र्णा -र्णं, सपत्रः -त्रा -त्रं, पर्णमयः -यी -यं, पर्णवान् -वती -वत् (त्); 'leafy hut,' पर्णोटजं.

LEAGUE, *s.* (Alliance, confederacy) सन्धिः *m.*, सन्धानं, साहित्यं, सहायता, सङ्घातः, सख्यः, सङ्घट्टनं, संयोगः, ऐक्यं, संयोजनं, समाहारः, समाहरणं, प्रतीहारः, सङ्गमः, समागमः, संसृष्टिः *f.*, परस्परोपकारप्रतिज्ञा, साङ्गं.—(The distance) क्रोशः, क्रोशयुगं, गव्यूतिः *f. m.*, गव्यूतं.

To LEAGUE, *v. n.* सन्धा (c. 3. -धत्ते -धातुं), सन्धिं कृ or विधा, सन्धानं कृ, साहित्यं कृ, सङ्घट्ट (c. 1. -घट्टते -ट्टितुं), संयुज् in pass. (-युज्यते), संहन् in pass. (-हन्यते), संहतः -ता -तं भू, सहितः -ता -तं भू, सम्मिल् (c. 6. -मिलति -मेलितुं).

LEAGUED, *p. p.* or *a.* सन्धितः -ता -तं, कृतसन्धिः -न्धिः -न्धि, कृतसख्यः -ख्या -ख्यं, सङ्घातवान् -वती -वत् (त्), सहितः -ता -तं, सहगतः -ता -तं, संयुक्तः -क्ता -क्तं, कृतसंसर्गः -र्गा -र्गं, संयोजितः -ता -तं, संहतः -ता -तं, संभृतः -ता -तं, मिलितः -ता -तं, स्वीकृतः -ता -तं; 'having leagued,' सम्भूय, मिलित्वा.

LEAGUER, *s.* सङ्गी *m.* (न्), संसर्गी *m.* (न्), सख्यी *m.* (न्), सहकारी *m.* (न्), सम्भूयकारी *m.*, परस्परोपकारी *m.*

LEAK, *s.* धारा, नौकातले छिद्रं or रन्ध्रं or सन्धिः *m.*, नौकापार्श्वे दारुभित्तिः *f.* or जलग्राहकच्छिद्रं or जलप्रवेशकच्छिद्रं.—(Oozing) धारा, स्रवः, द्रवः, स्यन्दः.

To LEAK, *v. n.* नौदारुच्छिद्रेण जलं प्रविश (c. 10. -वेशयति -यितुं) or जलं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or जलम् आदा (c. 3. -ददाति -दातुं), नौकापार्श्वे or नौकातले दारुरन्ध्रेण जलं प्रविश्.—(Ooze) रो (c. 4. रीयते -रेतुं), क्षर् (c 1. क्षरति -रितुं), स्यन्द् (c. 1. स्यन्दते -न्दितुं), स्रु (c. 1. स्रवति, स्रोतुं); 'water leaks from the jar,' जलं घटाद् रीयते.

LEAKAGE, *s.* यत्किञ्चिद् जलादि भाण्डच्छिद्रेण रीयते, द्रवः.

LEAKING, *s.* स्यन्दः -न्दनं, निस्यन्दः, द्रवः -वणं, क्षरणं, स्रावः, रयः, धारा.

LEAKY, *a.* सच्छिद्रः -द्रा -द्रं, छिद्री -द्रिणी -द्रि (न्), जर्जरीकः -का -कं, जर्जरः -रा -रं, सरन्ध्रः -न्ध्रा -न्ध्रं, दारुच्छिद्रेण जलग्राहकः -का -कं or जलादायी -यिनी -यि (न्).

To LEAN, *v. n.* (Incline, bend) नम् (c. 1. नमति, नन्तुं), अवनम, आनम, नम्रीभू.—(Bend out of the perpendicular) वहिर्लम् (c. 1. -लम्बते -म्बितुं), वहिःप्रलम्, तिर्यक् प्रलम्, वक्रीभू.—(Lean on, rest on) अवलम्, समालम्, अवलम्बनं कृ, संश्रि (c. 1. -श्रयति -ते -श्रयितुं), समाश्रि, उपाश्रि, निली (c. 4. -लीयते -लेतुं); 'she leans on the arms of Rāma,' एषा रामस्य बाहू संश्रयति or अवलम्बते.

LEAN, *a.* (Thin, meagre) कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, अमांसः -सा -सं, शुष्कमांसः -सा -सं, क्षीणः -णा -णं, अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं, तनुः -नुः -न्वी -नु, प्रतनुः &c., वितनुः &c., श्यामः -मा -मं, शीर्णः -र्णा -र्णं, शातः -ता -तं, शुष्काङ्गः -ङ्गी -ङ्गं.

LEAN, *s.* (That part of the flesh which consists of muscle without the fat) स्नायुः *m.*, स्नसा, मांसस्नायुः, मांसं, मेदोभिन्नः or वसाभिन्नो मांसभागः.

LEAN-FACED, *a.* कृशमुखः -खी -खं, क्षीणमुखः &c., क्षीणवदनः -ना -नं.

LEANING, *part.* or *a.* (Bending, deviating from the straight line) प्रणतः -ता -तं, आनतः -ता -तं, प्रवणः -णा -र्णं, वहिर्लम्बः -म्बा -म्बं, प्रलम्बः -म्बा -म्बं, नम्रः -म्रा -म्रं, वक्रः -क्रा -क्रं.—(Resting on) अवलम्बी -म्बिनी -म्बि (न्), अवलम्बनः -ना -नं, अवलम्बितः -ता -तं, संश्रितः -ता -तं, समाश्रितः -ता -तं, उपाश्रितः -ता -तं.

LEANNESS, *s.* कृशता -त्वं, कार्श्यं, परिकृशता, कृशाङ्गता, श्यामता, शरीरक्षीणता, मांसक्षीणता, क्षीणता, अमांसत्वं, अपुष्टता, विपुष्टता, तनुता -त्वं, तानवं, शरीरशोषणं, मांसशुष्कता, शुष्काङ्गता.

To LEAP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्, नृत् (c. 4. नृत्यति, नर्त्तितुं), क्रम्पं कृ, उत्प्लवं कृ, विस्फुल् (c. 6. -स्फुलति -लितुं); 'to leap up,' उत्प्लु, समुत्प्लु, उत्पत् (c. 1. -पतति -तितुं), प्रोत्पत्; 'to leap down,' अवप्लु; 'to leap over,' लङ्घ् (c. 10. लङ्घयति -यितुं), विलङ्घ्, उल्लङ्घ्, अभिलङ्घ्; 'to leap forth from,' प्रस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), प्रोत्पत्.

LEAP, *s.* प्लवः -वनं, प्लुतं, वल्गितं, क्रम्पः -म्पा, लङ्घनं, उत्प्लवनं, उत्प्लुतं, अवस्कन्दः, उत्पातः; 'going by leaps,' प्लुतगतिः -तिः -ति, प्लवगः -गा -गं.

LEAPED, *p. p.* प्लुतः -ता -तं, वल्गितः -ता -तं, लङ्घितः -ता -तं.

LEAPER, *s.* प्लवकः, प्लवः, प्लवनकारी *m.* (न्), क्रम्पी *m.* (न्), वल्गितकृत्.

LEAPING, *part.* प्लवमानः -ना -नं, प्लवः -वा -वं, वल्गन् -ल्गन्ती -ल्गत् (त्): 'leaping up,' उत्पातिष्णुः -ष्णुः -ष्णु, उत्प्लुत्य.

LEAPING, *s.* (The act) प्लवनं, प्लुतकरणं, क्रम्पकरणं; 'leaping up,' उत्प्लवनं, उत्पातनं; 'leaping down,' अवस्कन्दः; 'leaping over,' लङ्घनं, उल्लङ्घनं.

LEA

LEAP-YEAR, *s.* चतुर्थः संवत्सरो यस्मिन् अधिकदिवसो निवेश्यते, अधिकदिनयुक्तः संवत्सरः, अधिकदिवसवर्षः.

To LEARN, *v. a.* (Acquire knowledge of any thing by study, &c.) शिक्ष् (c. 1. शिक्षते -क्षितुं), उपशिक्ष्, अधी (c. 2. अधीते, अध्येतुं, rt. इ), अधिगम् (c. 1. -गच्छति -गन्तुं), पठ् (c. 1. पठति -ठितुं), अभ्यस् (c. 4. -अस्यति -असितुं), अध्ययनेन or अभ्यासेन विद्यां ग्रह् (c. 9. गृह्णाति, गृहीतुं) or लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति -आप्तुं) or अवाप्, अभ्यासं कृ, विद्याभ्यासं कृ, विद्यागमं कृ.—(Gain the knowledge of, become informed of) ज्ञा (c. 9. जानाति -नीते ज्ञातुं), परिज्ञा, अवगम्, उपलभ्, विज्ञप्तः -प्ता -प्तं भू, गृहीतार्थः -र्था -र्थं भू; 'to learn by heart,' अभ्यस्.

To LEARN, *v. n.* शिक्षां कृ, अध्ययनं कृ, अधिगमं कृ, अभ्यासं कृ, विद्याभ्यासं कृ, विद्याप्राप्तिं कृ, विद्याग्रहणं कृ, विद्यालब्धिं कृ, विद्यागमं कृ.

LEARNED, LEARNT, *p. p.* शिक्षितः -ता -तं, अधीतः -ता -तं, अधिगतः -ता -तं, अभ्यस्तः -स्ता -स्तं, पठितः -ता -तं, अवगतः -ता -तं, उपलब्धः -ब्धा -ब्धं; 'learnt by heart,' अभ्यस्तः -स्ता -स्तं, कण्ठस्थः -स्था -स्थं; 'to be learnt,' शिक्षितव्यः -व्या -व्यं, अभ्यस्यः -स्या -स्यं, अभ्यसनीयः -या -यं.

LEARNED, *a.* (Versed in literature and science) विद्वान् -दुषी -द्वत् (स्), पण्डितः -ता -तं, ज्ञानी -निनी -नि (न्), विद्यावान् -वती -वत् (त्), विद्याविशिष्टः -ष्टा -ष्टं, विद्यासम्पन्नः -न्ना -न्नं, कृतविद्यः -द्या -द्यं, विद्यालब्धः -ब्धा -ब्धं, सविद्यः -द्या -द्यं, लब्धविद्यः &c., वैद्यः -द्या -द्यं, ज्ञानवान् &c., विपश्चित् *m. f. n.*, प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः -ज्ञा -ज्ञं, प्रज्ञावान् &c., व्युत्पन्नः -न्ना -न्नं, कृतधीः -धीः -धि, अधीयानः -ना -नं, अधीती -तिनी &c., बहुश्रुतः -ता -तं, कोविदः -दा -दं, मनीषी -षिणी -षि (न्), बुद्धिमान् &c., धीमान् &c., बुधः -धा -धं, धीरः -रा -रं, संख्यायान् &c., कविः -विः -वयी -वि, सूरिः &c., सूरी -रिणी -रि (न्), कृती -तिनी -ति (न्), लब्धयशः -शाः -शें, अक्षरसम्पन्नः -न्ना -न्नं, साक्षरः -रा -रं, सारस्वतः -ती -तं, अध्ययनसम्पन्नः &c., विद्यावृद्धः -द्धा -द्धं, सन् सती सत्, नक्षदर्शी -र्शिनी -र्शि (न्), दीर्घदर्शी &c., दूरदर्शी &c.; 'a learned man,' विद्वज्जनः, पण्डितः, बुधः, सद्वैरसः; 'learned in the Vedas,' श्रोत्रियः, वेदविद्, वेदविद्वान् *m.* (स्), अनूचानः, छान्दसः.—(Conversant with, skilled in) अभिज्ञः -ज्ञा -ज्ञं, विज्ञः -ज्ञा -ज्ञं, विशारदः -दा -दं, विचक्षणः -णा -णं, निपुणः -णा -णं, कुशलः -ला -लं, प्रवीणः -णा -णं, चतुरः -रा -रं, वेत्ता -त्री -त्तृ (त्तृ), ज्ञः ज्ञा ज्ञं or विद् in comp.; as, 'learned in the law,' स्मृतिज्ञः &c., धर्मवेत्ता *m. f. n.*, 'learned in music,' गान्धर्वज्ञः.

LEARNEDLY, *adv.* पण्डितवत्, सपाण्डित्यं, पाण्डित्येन, प्राज्ञवत्, विद्वज्जनवत्, सविद्यं, वैदुष्येण, सज्ञानं, ज्ञानपूर्वं.

LEARNER, *s.* शिष्यः, विद्यार्थी *m.* (न्), अध्येता *m.* (तृ), अध्यायी *m.* (न्), शिक्षिताक्षरः, विद्याभ्यासकर्त्ता *m.* (र्तृ), अभ्यासकृत्.

LEARNING, *s.* (Knowledge of literature, erudition) विद्या, पाण्डित्यं, ज्ञानं, विज्ञानं, वैदुष्यं, विज्ञता, ज्ञातृत्वं, व्युत्पत्तिः *f.*, प्राज्ञत्वं, पण्डितता -त्वं, वेत्तृत्वं, विद्यासम्पत्तिः *f.*, अक्षरसम्पत्तिः *f.*, साक्षरता, अध्ययनसम्पत्तिः *f.*—(Literature) विद्या, शास्त्रं, अक्षरं, साहित्यं.—(Sacred learning) श्रुतिः *f.*, श्रोत्रियत्वं.—(Act of learning, acquisition of learning) शिक्षा, अध्ययनं, अभ्यासः, विद्याभ्यासः, विद्याप्राप्तिः *f.*, विद्यालब्धिः *f.*, विद्यार्जनं, विद्यागमः; 'cultivation of learning,' विद्यानुसेवनं; 'patronising learning,' विद्यानुपालनं; 'to affect great learning,' पण्डित (nom. पण्डितायते).

LEASE, *s.* (Of lands, houses, &c.) पट्टः, पट्टोलिका, कूटकीला, विहितकालं यावद् नियमितमूल्यम् अपेक्ष्य क्षेत्रगृहादीनां परहस्तसमर्पणं.

To LEASE, *v. a.* पट्टं दा, पट्टोलिकां दा, पट्टेन क्षेत्रगृहादि परप्रयोजनीयं दा, पट्टोलिकापूर्वं नियमितमूल्यम् अपेक्ष्य क्षेत्रगृहादि परप्रयोजनीयं दा or विसृज् (c. 6 -सृजति -सृष्टुं), आविहितकालाद् निरूपितमूल्यम् अपेक्ष्य क्षेत्रगृहादि परहस्ते भस् in caus. (-अर्पयति -यितुं).

LEASED, *p. p.* पट्टेन or पट्टलिखनपूर्वम् आविहितकालात् परहस्तसमर्पितः -ता -तं.

LEASEHOLD, *a.* पट्टेन or पट्टोलिकालिखनपूर्वम् अध्युषितः -ता -तं.

LEASH, *s.* (Leather thong) चर्मबन्धः -न्धनी, चर्मरज्जुः *m. f.*, बन्धनरज्जुः.—(Fierce, three) त्रयं, त्रिकं; 'a leash of hares,' शशकत्रयं.

To LEASH, *v. a.* चर्मरज्जुना or चर्मरज्ज्वा बन्ध् (c. 9. बध्नाति, बन्धुं).

LEASING, *s.* असत्यता, अनृतता, अलीकता, कापट्यं, मृषावादः. *See* FALSEHOOD.

LEAST, *a.* (Smallest) अल्पिष्ठः -ष्ठा -ष्ठं, कनिष्ठः -ष्ठा -ष्ठं, क्षुद्रतमः -मा -मं, क्षोदिष्ठः -ष्ठा -ष्ठं, कनीयान् -यसी -यः (स्), तनिष्ठः -ष्ठा -ष्ठं, तनीयान् &c., लघिष्ठः &c., स्तोकतमः -मा -मं, सूक्ष्मतमः -मा -मं, अतिक्षुद्रः -द्रा -द्रं, स्वल्पः -ल्पा -ल्पं, अवरः -रा -रं, अवरतमः -मा -मं, न्यूनः -ना -नं; 'least of all,' सर्वकनिष्ठः -ष्ठा -ष्ठं, सर्वकनीयान् &c., सर्वस्मात् क्षुद्रः -द्रा -द्रं; 'the least particle,' लेशः, लवः, कणः; 'not the least darkness is in that place,' तत्र अन्धकारस्य लेशो ऽपि नास्ति.

LEAST, *adv.* (In the least) मनाक्, किञ्चित्, अल्पिष्ठं, कनिष्ठं, लेशमपि, कियत्, सूक्ष्मं, स्तोकं; 'not in the least,' न मनाक्, न मनागपि, न किञ्चिदपि, न किमपि, न कियदपि, न सूक्ष्ममपि, न स्तोकमपि, न लेशमपि, अलेशं; 'three witnesses at least,' त्रयः साक्षिणः; 'at least, at any rate,' तावत्.

LEATHER, *s.* चर्म *n.* (न्), दृतिः *m.*, पशुत्वक् *f.* (च्), पशुचर्म *n.*, कृत्तिः *f.*, अजिनं, चर्म्म, शिपिः *f.*; 'a leather thong,' चर्मबन्धः -न्धनं, वरत्रा, वर्त्त्रा; 'covered with leather,' चर्मावृतः -ता -तं, चर्मावनद्धः -द्धा -द्धं, चर्मोच्छादितः -ता -तं.

LEATHER, *a.* चर्म in comp., चर्ममयः -यी -यं; 'a leather shoe,' चर्मोपानत्का; 'a leather band,' चर्मबन्धः. *See* LEATHERN.

To LEATHER, *v. a.* चर्मदण्डेन तड् (c. 10. ताडयति -यितुं) or ग्रह् (c. 1. -हरति -हर्त्तुं).

LEATHER-CUTTER, *s.* चर्मच्छिद् *m.*, चर्मच्छेदनकारी *m.* (न्), चर्मोपकर्त्री *m.*

LEATHER-DRESSER, *s.* चर्मकारः -रकः, चर्मकारी *m.* (न्), चर्मकृत्, चर्मारः.

LEATHERN, *a.* चार्मिकः -की -कं, चार्मः -र्म्मी -र्मं, चर्म्मी -र्म्मिणी -र्म्मि (न्), चर्ममयः -यी -यं, चर्मनिर्म्मितः -ता -तं, दार्ढ्यैः -यी -यं, अजिनीयः -या -यं, पशुत्वङ्मयः -यी -यं, चर्म in comp.; 'a leathern bottle,' दृतिः *m.*

LEATHER-SELLER, *s.* चर्मविक्रेता *m.* (तृ), चर्मविक्रयी *m.* (न्), चर्मविक्रयोपजीवी *m.*

LEATHERY, *a.* चर्मवद् दुःखभेद्यः -द्या -द्यं, चर्मसगुणः -णा -णं.

LEAVE, *s.* (Permission) अनुज्ञा, अनुमतिः *f.*, अभ्यनुज्ञा, अनुज्ञानं, समनुज्ञानं, अनुमोदनं; 'leave to depart,' अनुज्ञा; 'to give leave,' अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं), अनुज्ञां कृ or दा.—(Farewell) आमन्त्रणं, आप्रच्छनं; 'to bid farewell,' आमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्, आप्रच्छ् (c. 6. -पृच्छते -ति -प्रष्टुं).

To LEAVE, *v. a.* (Abandon, forsake) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, सन्त्यज्, हा (c. 3. जहाति, हातुं), अपहा, विहा, प्रहा, अपाहा, उत्सृज् (c. 6. -सृजति -सृष्टुं), विसृज्, अतिसृज्, व्यपसृज्, रह् (c. 10. रहयति -यितुं), विरह्, उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्, परिहृ (c. 1. -हरति -हर्त्तुं), वृज् (c. 10. -वर्जयति -यितुं), परिवृज्, विवृज्.—(Depart from)

अपगम् (c. 1. -गच्छति -गन्तुं), अपगम्, विगम्, अपया (c. 2. -याति -तुं), अपे (c. 2. अपैति -तुं), अपे, अपसृ (c. 1. -सरति -सर्त्तुं), प्रस्था (c. 1. -तिष्ठति -स्थातुं), विप्रस्था.—(Leave remaining, suffer to remain) शिष् (c. 10. शेषयति -यितुं), अवशिष्, परिशिष्, उच्छिष्, समवशिष्, उद्धृ (c. 10. -धारयति -यितुं), शिष्टं -ष्टां कृ, अवशिष्टीकृ; 'to be left remaining,' शिष् in pass. (शिष्यते), अवशिष्.—(Commit, trust to) सम् in caus. (-अर्पयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), न्यासीकृ.—(Bequeath) मृत्युपत्रेण प्रदा or मृत्युलेखेन दा.—(Leave off, desist from) विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विनिवृत् with abl. c., मुच् (c. 6. मुञ्चति, मोक्तुं), अवमुच्, अवसृज् अपास् (c. 4. -अस्यति -असितुं), व्युदस्, त्यज्, परित्यज्; 'the peacock leaves off dancing,' परित्यक्तनर्त्तनो मयूरः; 'it leaves off raining,' निर्वर्षति.—(Leave out) वृज्, अपास्, हा, अपाहा.—(Leave behind, distance) दूरीकृ, दय (nom. दययति -यितुं).

To LEAVE, *v. n.* (Cease, leave off) विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निवृत्, विनिवृत्, विगम् (c. 1. -गच्छति -गन्तुं), अपया (c. 2. -याति -तुं), शम् (c. 4. शाम्यति, शमितुं), विच्छिद् in pass. (-च्छिद्यते).

LEAVED, *a.* (Having leaves) पत्री -त्रिणी -त्रि (न्), पर्णी -र्णिनी &c., सपत्रः -त्रा -त्रं, सपर्णः -र्णा -र्णं, सदलः -ला -लं; '*two-leaved,' द्विपर्णः -र्णा -र्णं.

LEAVEN, *s.* किण्वः -ण्वं, नग्नहूः *m.*, मद्यः -द्यं, कारोत्तरः, कारोत्तमः, कादम्बरीबीजं.—(Any thing which works a change in the mass) विकारजनकं किञ्चित् वस्तु.

To LEAVEN, *v. a.* किण्वनिवेशनपूर्व्वम् अन्नरुत्सेकं or अन्नस्यार्पं जन् (c. 10. जनयति -यितुं), अन्नरुत्सेककरणार्थं किण्वं निविश् (c. 10. -वेशयति -यितुं) or प्रविश्.—(Taint, imbue) दुष् (c. 10. दूषयति -यितुं), रञ्ज् (c. 10. रञ्जयति -यितुं).

LEAVINGS, *s. pl.* (Any thing left, remnants) शिष्टं, अवशिष्टं, उच्छिष्टं, परिशिष्टं, शेषः -षं, परिशेषः, अवशेषः, उच्छेषणं, शेषभागः, परभागः, शेषखण्डः -ण्डं, उद्धन्नैः, जुष्टं, समुज्झितं.—(Of food) शेषान्नं, उच्छिष्टान्नं, भुक्तशेषः -षं, भुक्तावशेषः -षं, अन्नशेषः -षं, भुक्तसमुज्झितं, परभुक्तोज्झितं, भुक्तोच्छिष्टं, भक्षितशेषं, आदिष्टं, फेलवः, फेला -लिः -ली *f.*; 'one who eats leavings,' शेषभुक् *m.* (ज्), शेषभोजी *m.* (न्), उच्छिष्टभोजनः; 'eating leavings,' शेषभोजनं, उच्छिष्टभोजनं.—(Offal) मलं, विमांसं.

LECHER, *s.* लम्पटः, स्त्रीलम्पटः, कामुकः, कामुकजनः, व्यवायी *m.* (न्), रतार्थी *m.* (न्), सुरतार्थी *m.* (न्), स्त्रीपरः.

To LECHER, *v. n.* लम्पटवद् आचर् (c. 1. -चरति -रितुं), रतार्थी भू, कामुको भू.

LECHEROUS, *a.* कामुकः -का -कं, कामी -मिनी -मि (न्), कामनः -ना -नं, रतार्थी -र्थिनी -र्थि (न्), सुरतार्थी &c., कामासक्तः -क्ता -क्तं, व्यवायी -यिनी -यि (न्), सम्भोगी -गिनी -गि (न्), सम्भोगासक्तः &c., सम्भोगार्थी &c., भोगासक्तः &c., व्यवायपरायणः -णा -णं, स्त्रीपरः, स्त्रीरतः, स्त्रीव्यासङ्गी *m.* (न्), स्त्रीलम्पटः, स्त्रीव्यसनी *m.* (न्), तरलः -ला -लं, अभीरुः -रुका -रुकं, वियातः -ता -तं.

LECHEROUSLY, *adv.* लम्पटवत्, कामुकवत्, सकामं, रतासक्तवत्, कामपूर्व्वं.

LECHEROUSNESS, LECHERY, *s.* कामुकत्वं, लम्पटत्वं -ता, लाम्पट्यं, रतार्थित्वं, रतासक्तिः *f.*, कामासक्तिः *f.*, सम्भोगासक्तिः *f.*, व्यवायः -यित्वं, स्त्रीव्यसनं, स्त्रीव्यासङ्गः, वैयात्यं, हेला -लनं.

LECTION, *s.* (Reading) पाठः, अध्ययनं.—(Variety in copies of a manuscript) पाठान्तरं, पाठभेदः, पाठः, विरूपपाठः.

LECTOR, *s.* पाठकः, पठिता *m.* (तृ), अध्येता *m.* (तृ), अध्यायी *m.* (न्).

LECTURE, *s.* पाठः, निपाठः, पाठनं, पठनं, अध्यायः, अध्ययः -यनं, अध्यापनं, वादः, व्याख्यानं.—(Reprimand) वाग्दण्डः, वाक्शासनं, भर्त्सनवाक्यं.

To LECTURE, *v. a.* पठ् (c. 10. पाठयति -यितुं), अधी in caus. (अध्यापयति -यितुं, rt. इ), उपदिश् (c. 6. -दिशति -देष्टुं), पाठं कृ, अध्यापनं कृ.—(Reprove) प्रत्यादिश्, निन्द् (c. 1. निन्दति -न्दितुं), वाग्दण्डं कृ, निन्दावाक्यं कृ.

To LECTURE, *v. n.* पठ् (c. 1. पठति -ठितुं), अधी (c. 2. अधीते, अध्येतुं, rt. इ), वाक्यं यु (c. 10. आवयति -यितुं), पाठं कृ, अध्ययनं कृ.

LECTURED, *p. p.* अध्यापितः -ता -तं, पाठितः -ता -तं.—(Reprimanded) प्रत्यादिष्टः -ष्टा -ष्टं, निन्दितः -ता -तं, उपालब्धः -ब्धा -ब्धं.

LECTURER, *s.* पाठकः, अध्यापकः, पठिता *m.* (तृ), अध्येता *m.* (तृ), अध्यायी *m.* (न्), पाठकारी *m.* (न्), शिक्षकः, उपदेशकः, व्याख्याता *m.* (तृ), प्रवक्ता *m.* (क्तृ), वक्ता, वादी *m.* (न्), वाचकः, नागरः; 'in theology,' धर्म्मप्रवक्ता *m.*, धर्म्मभाणकः.

LECTURE-ROOM, *s.* पाठशाला, पाठगृहं, अध्ययनशाला, अध्ययनगृहं.

LECTURESHIP, *s.* पाठकत्वं, अध्यापकत्वं, प्रवक्तृत्वं, वक्तृत्वं, शिक्षकत्वं.

LED, *p. p.* नीतः -ता -तं, आनीतः -ता -तं, समानीतः -ता -तं; 'being led,' नीयमानः -ना -नं.—(Guided) सञ्चारितः -ता -तं.—(As life, time) नीतः -ता -तं, गमितः -ता -तं, यापितः -ता -तं, प्रवृत्तः -त्ता -त्तं.—(Led on by, headed by) पुरःसरः -रा -रं, पुरस्सरः -रा -रं, पुरोगमः -मा -मं, मुखः -खा -खं in comp.; as, 'led on by Karna,' कर्णमुखः -खा -खं, कर्णपुरोगमः -मा -मं &c.; 'having led,' नीत्वा.

LEDGE, *s.* (Stratum, layer) फलकः -कं, स्तरः, अस्तरः -रणं.—(Ridge, projecting part) कटकः -कं, कूटं, दन्तः -न्तकः.—(Row) आलिः -ली.—(Ledge of a rock) शिला, शिलाफलकं.

LEDGER, *s.* महागणनापुस्तकं, वृहद्गणनापुस्तकं, वाणिजपुस्तकं.

LEE, *s.* (Sediment). *See* LEES. (Calm or sheltered place) निर्वातस्थानं, निर्वातदेशः.—(Side opposite to that on which the wind blows) वाताभिमुखदिशा, वायुप्रतिमुखदेशः; 'under the lee of the land,' तीरोपान्ते.

LEE-WARD, *a.* or *adv.* (In the same direction as the wind) वातानुकूलः -ला -लं, वातानुलोमः -मा -मं, अनुवातं.—(In an opposite direction to the wind) प्रतिवातं, वाताभिमुखदिशि, वाताभिमुखं, वायुप्रतिमुखदिशि.

LEECH, *s.* रक्तपा, रक्तपायिनी, रक्तपाता, जलौका, जलूका, जलाकाः *f.* (स्), जलुका, जलोका, जलिका, जलौकसः -सा -सं, जलायुका, जलालुका, जलाधुका, जलालोका, जलोरगी, जलजन्तुका, जलसर्पिणी, जलाटनी, पटालुका, वाय्वीकाः *f.* (स्), वाय्वीकः, वारिक्रिमिः *m.*, वेधिनी, भ्रमणी, कारुण्डी.—(Physician) वैद्यः, चिकित्सकः, रोगहृत् *m.*, रोगज्ञानकः, भिषक् *m.* (ज्).

To LEECH, *v. a.* कित् in des. (चिकित्सति -त्सितुं), रोगशमनं कृ.

LEEK, *s.* कन्दः -न्दं, तीक्ष्णकन्दः, महाकन्दः, पलाण्डुः *m.*, सुकन्दकः, शाकः.

LEER, *s.* कटाक्षः, नेत्रकटाक्षः, अपाङ्गदर्शनं, कटाक्षवेक्षणं, कटाक्षावलोकनं, अपाङ्गप्रसरः, दृष्टिविक्षेपः, तिर्य्यक्प्रेक्षणं, साचिविलोकितं, काक्षः, वर्कराटः, कर्करादुः *m.*, विकूणनं, दृष्टिवाणः, कुस्मितं.

To LEER, *v. n.* कटाक्षेण दृश् (c. 1. पश्यति, द्रष्टुं), अपाङ्गाद् दृश् or ईक्ष् (c. 1. ईक्षते -क्षितुं), कटाक्ष (nom. कटाक्षयति -यितुं), कटाक्षावेक्षणं कृ, कटाक्षवीक्षणं कृ, अपाङ्गदर्शनं कृ, दृष्टिविक्षेपं कृ, साचि or तिर्य्यग् विलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं), कुस्मि (c. 1.

-समयते -समेतुं).

LEERED UPON, *p. p.* कटाक्षितः -ता -तं, कटाक्षावेक्षितः -ता -तं, कटाक्षेण दृष्टः -ष्टा -ष्टं, साचिविलोकितः -ता -तं, कुत्सितः -ता -तं.

LEERING, *part.* or *a.* लोलापाङ्गः -ङ्गा -ङ्गं, अपाङ्गदर्शी -र्शिनी -र्शि (न्), कटाक्षावलोकी -किनी -कि (न्), साचिदृष्टिः -ष्टिः -ष्टि, तिर्य्यग्दृष्टिः &c., कुत्स. &c. -रा -रं.

LEES, *s. pl.* मलं, उच्छिष्टं, शेषं, किट्टं, खलं, कल्कं, विनीयः.

LEFT, *p. p.* (Abandoned) त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, उत्सृष्टः -ष्टा -ष्टं, विमक्तितः -ता -तं, रहितः -ता -तं, विरहितः -ता -तं, हीनः -ना -नं, उज्झितः -ता -तं, समुज्झितः -ता -तं, प्रोज्झितः -ता -तं, विधुतः -ता -तं, वर्जितः -ता -तं, धृतः -ता -तं.—(Left remaining) शिष्टः -ष्टा -ष्टं, अवशिष्टः -ष्टा -ष्टं, अवशेषितः -ता -तं, शेषः -षा -षं, उच्छिष्टः -ष्टा -ष्टं, उद्वृत्तः -त्ता -त्तं, उद्वर्त्तः -र्त्ता -र्त्तं, उद्वरितः -ता -तं, अन्तरितः -ता -तं; 'to be left remaining,' शिष् in pass. (शिष्यते), अवशिष्.

LEFT, *a.* (Not right) वामः -मा -मं, सव्यः -व्या -व्यं, दक्षिणेतरः -रा -रं, प्रतिलोमः -मा -मं; 'the left,' सव्यं; 'left and right,' सव्यापसव्यं; 'the left hand,' वामहस्तः, वामपाणिः *m.*, सव्यः; 'the left arm,' वामबाहुः *m.*; 'the left shoulder,' वामस्कन्धः; 'the left side,' वामकुक्षिः *m.*, वामाङ्गं; 'that is on the left side,' वामस्थः -स्था -स्थं.

LEFT-HANDED, *a.* सव्यसाची -चिनी -चि (न्), वामहस्तसेवी -विनी -वि (न्), दक्षिणहस्तात् वामहस्तम् अधिकं व्यवहरति यः or या.

LEG, *s.* जङ्घा, प्रमृता, पादः, प्रज्ञा, टङ्का, टङ्कः, अंहिः *m.*, अंघ्रिः *m.*, अधमाङ्गं; 'relating to the leg,' जाङ्घिकः -की -कं; 'enlargement of the leg,' श्लीपदं; 'having a swelled leg,' कुम्भपादः *m.*, कुम्भपदी *f.*; 'long-legged,' दीर्घजङ्घः -ङ्घा -ङ्घं, ऊर्द्धजानुः -नुः -नु, ऊर्द्धजुः -जुः -जु, ऊर्द्धजः -ङ्गा -ङ्गं, दीर्घपादः -दा -दं, दीर्घपाद् *m. f. n.*

LEGACY, *s.* मृत्युलेखार्पितदानं, मृतपत्रार्पितदानं, मृत्युपत्रस्थदानं, मृतदानं, मृतलेखदानं, मृतपत्राङ्कितदानं, मुमूर्षुदानं, मुमूर्षुदत्तं, उत्तरदानं, मृतलेखस्थदानं, आसन्नमरणे दानं or प्रदानं.

LEGAL, *a.* (Conformable to law) धर्म्यः -र्म्या -र्म्यं, धर्म्यानुसारी -रिणी -रि (न्), स्मार्त्तः -र्त्ती -र्त्तं, व्यावहारिकः -की -कं, व्यवहारिकः &c., स्मृतिशास्त्रानुमतः -ता -तं, धर्म्मशास्त्रानुसारी &c., आचारिकः -की -कं; 'relating to the legal,' शास्त्रीयः -या -यं, राज्यव्यवस्थानुसारी &c., व्यवस्थानुरूपः -पा -पं, राज्यनियमानुसारी &c., न्यायानुसारी &c.—(Relating to law) स्मार्त्तः &c., व्यावहारिकः &c., व्यवहारसम्बन्धी &c., व्यवहारविषयः -या -यं, धर्म्म in comp., स्मृति in comp.—(Enjoined, permitted by law) स्मृत्युक्तः -क्ता -क्तं, शास्त्रोक्तः &c., स्मृतिशास्त्रविहितः -ता -तं, स्मृतिशास्त्रप्रोक्तः &c., राज्यनियमविहितः -ता -तं, व्यवहारविधिविहितः -ता -तं, धर्म्मानिषिद्धः -द्धा -द्धं, शास्त्रानिषिद्धः &c.—(According to the law of works, resting on works for salvation) कर्म्ममार्गी -र्गिणी -र्गि (न्), कर्म्ममार्गावलम्बी -म्बिनी -म्बि (न्), कर्म्ममार्गसेवी -विनी -वि (न्), कर्म्ममार्गाश्रयी -यिणी -यि (न्), कर्म्मशीलः -ला -लं; 'legal proceeding,' व्यवहारः; 'a written legal opinion,' पट्टोलिका; 'incorrect legal opinion,' अव्यवस्था. *See* LAW, LAWFUL.

LEGALIST, *s.* (One who relies on works for salvation) कर्म्ममार्गावलम्बी *m.* (न्), कर्म्ममार्गावलम्बी *m.*, कर्म्ममार्गाश्रयी *m.* *See* LEGAL.

LEGALITY, *s.* धर्म्यता, धर्म्मानुसारः -रित्वं, धर्म्मशास्त्रानुसारः -रिता, स्मृतिशास्त्रानुसारः -रिता, व्यवहारविधानुरूपता, राज्यव्यवस्थानुरूपता, व्यावहारिकत्वं. *See* LAWFULNESS.—(Reliance on works for salvation) कर्म्मावलम्बनं, कर्म्मनिष्ठा, कर्म्ममार्गसेवा, कर्म्ममार्गाश्रयणं.

To LEGALIZE, *v. a.* धर्म्यं -र्म्यां -कृ, शास्त्रसम्मतं -तां कृ, स्मृतिसम्मतं -तां कृ, धर्म्मसम्मतं -तां कृ, व्यवस्थागतं -तां कृ, विधिगतं -तां कृ, विहितं -तां कृ, विधिविहितं -तां कृ, अनुमन् (c. 4. -मन्यते -मन्तुं), अनुज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), व्यवस्था in caus. (-स्थापयति -यितुं).

LEGALIZED, *p. p.* व्यवस्थागतः -ता -तं, विधिगतः -ता -तं, धर्म्मसम्मतः -ता -तं.

LEGALLY, *adv.* धर्म्येण, धर्म्मतस्, धर्म्मानुसारेण -रात्, यथाधर्म्मं, न्यायतस्, न्यायानुसारेण, यथान्यायं, स्मृतिशास्त्रानुसारेण, धर्म्मशास्त्रानुसारेण. *See* LAWFULLY.

LEGATE, *s.* दूतः, राजदूतः, राजप्रतिनिधिः *m.*—(Pope's ambassador) रोमीयधर्म्मोपधेतर् दूतः or प्रतिनिधिः.

LEGATEE, *s.* मृतपत्रदानाधिकारी *m.* (न्), मृतलेखदानाधिकारी *m.*, मृतदानग्राही *m.*, मृतरिक्थभागी *m.*, मृतधनभागी *m.*, मृत्युपत्रस्थदानाधिकारी *m.*, उत्तराधिकारी *m.*, अंशभाक् *m.* (ज्).

LEGATION, *s.* दूत्यं, दौत्यं, दूतत्वं, दूतकर्म्म *n.* (न्), दूतक्रिया, दूतधर्म्मः.

LEGATOR, *s.* मृत्युलेखदानकारी *m.* (न्), मृत्युपत्रदानकारी, उत्तरदानकारी *m.*, मृत्युपत्रेण दानकारी *m.*, मृत्युकाले रिक्थप्रदाता *m.* (तृ).

LEGEND, *s.* पुरावृत्तकथा, पुराणकथा, प्राचीनकथा, पुरावृत्ताख्यानं, पुरावृत्तोपाख्यानं, पुरावृत्तं, लोककथा, जनकथा, कथा, आख्यानं, आख्यायिका, चरितं, चरितं, पुराणं, इतिहासः.—(Story of a saint or holy place) माहात्म्यं.

LEGENDARY, *a.* पुराणकल्पितः -ता -तं, पुराणोक्तः -क्ता -क्तं, पौराणिकः -की -कं, पुरावृत्तकथकः -का -कं, ऐतिहासिकः -की -कं, काथिकः -की -कं.

LEGENDARY, *s.* (Reciter of legends) पुरावृत्तकथिकः, पुराणकथकः, इतिहासवक्ता *m.* (क्तृ), ऐतिहासिकः.

LEGERDEMAIN, *s.* हस्तलाघवं, लघुहस्तत्वं, हस्तचापल्यं, इन्द्रजालः -लं, जालं, माया, कुहकः, कुहकवृत्तिः *f.*, कुमतिः *f.*, इन्द्रियमोहः.

LEGGED, *a.* (In composition) जङ्घः -ङ्घा -ङ्घं, पादः -दा -दं, पदः -दा -दं, पाद् *m. f. n.*; 'long-legged,' दीर्घजङ्घः &c.; 'two-legged,' द्विपदः &c.

LEGGINGS, *s.* स्थूलवस्त्रमयं जङ्घात्राणं or जङ्घारक्षणं, जङ्घोत्तरीयं.

LEGIBILITY, *s.* पठनीयता, पाठ्यता, पठनयोग्यता, पठनशक्यता, सुवाच्यता, स्पष्टाक्षरत्वं, स्पष्टता, व्यक्तता

LEGIBLE, *a.* पठनीयः -या -यं, पाठ्यः -ठ्या -ठ्यं, पठनयोग्यः -ग्या -ग्यं, पठनशक्यः -क्या -क्यं, सुवाच्यः -च्या -च्यं, स्पष्टाक्षरः -रा -रं, व्यक्ताक्षरः -रा -रं, सुस्पष्टः -ष्टा -ष्टं, अध्येतव्यः -व्या -व्यं, अध्ययनीयः -या -यं

LEGIBLY, *adv.* स्पष्टाक्षरैः, सुस्पष्टाक्षरेण, सुस्पष्टं, सुव्यक्तं.

LEGION, *s.* (Body of soldiers) सैन्यदलं, सैन्यगुल्मः, सैन्यव्यूहः, सैन्यसमूहः, योधसमूहः.—(Host) चमूः *f.*, सेना, वाहिनी.—(A multitude, great number) वृन्दं, समवायः, निवहः, बाहुल्यं, चक्रं.

LEGIONARY, *a.* वाहिनीसम्बन्धी -न्धिनी -न्धि (न्), चाक्रिकः -की -कं.

To LEGISLATE, *v. a.* व्यवस्थां कृ or विधा (c. 3. -दधाति -धातुं), नियमान् or विधीन् स्था in caus. (स्थापयति -यितुं) or रच् (c. 10. रचयति -यितुं) or प्रकृप् (c. 10. -कल्पयति -यितुं) or प्रशास् (c. 2. -शास्ति -शासितुं), व्यवस्था in caus.

LEGISLATION, *s.* व्यवस्थाकरणं, नियमस्थापना, विधिस्थापना, व्यवस्थारचना, -नं, व्यवस्थाप्रकल्पनं, विधिप्रकल्पनं, व्यवस्थाविधानं.

LEGISLATIVE, *a.* व्यवस्थाकारी -रिणी -रि (न्), व्यवस्थापकः -का -कं, नियमस्थापकः -का -कं, विधिस्थापकः -का -कं, नियमरचकः -का -कं, नियमविधायी -यिनी -यि (न्), व्यवस्थाविधायी, &c., स्मृतिकारी &c.

LEGISLATOR, *s.* व्यवस्थाकारः -रकः, व्यवस्थाविधायी *m.* (न्), विधिस्थापकः नियमस्थापकः, व्यवस्थारचकः, व्यवस्थापकः, धर्म्मशास्त्ररचकः, शासिता *m.* (तृ), शास्ता *m.* (स्तृ), प्रयोजकः.

LEGISLATURE, *s.* विधिस्थापनाधिकारिणी सभा, व्यवस्थाकरणाधिकारिणी सभा, व्यवस्थाविधायिनी सभा, विधिस्थापकसभा, व्यवस्थापकसभा.

LEGIST, *s.* *See* LAWYER.

LEGITIMACY, *s.* (Lawfulness of birth) औरसता -त्वं, उरस्यता -त्वं, धर्म्मेजत्वं, धर्म्मपत्नीजत्वं, धर्म्मपत्नीजन्म *n.* (न्), औरसजन्म *n.*, दम्पतिजन्म *n.*, दम्पतुद्भवः, सुजन्म *n.*, ज्ञात्यता -त्वं, वैधजन्म *n.*—(Genuineness) सत्यता, यथार्थता, अकृत्रिमता, अकल्पितत्वं, वास्तविकता.

LEGITIMATE, *a.* (Lawfully born) धर्म्मेजः -जा -जं, औरसः -सी -सं, उरस्यः -स्या -स्यं, धर्म्मपत्नीजः -जा -जं, दम्पतिजातः -ता -तं, सुजन्मा -न्मा -न्म (न्), ज्ञात्यः -त्या -त्यं, औरसजातः -ता -तं, विवाहजातः &c., विधिजातः &c., धर्म्यः -र्म्या -र्म्यं; 'a legitimate wife,' धर्म्मपत्नी; 'a legitimate son,' औरसः, उरस्यः, औरस्यः; 'daughter,' औरसी, उरस्या.—(Genuine, just, right) सत्यः -त्या -त्यं, वास्तवः -वी -वं, यथार्थः -र्था -र्थं, यथान्यायः -या -यं, न्याय्यः -य्या -य्यं, यथायोग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं.

To LEGITIMATE, *v. a.* औरसीकृ, औरसत्वं दा, औरससमं -मां कृ, धर्म्यं -र्म्यां कृ.

LEGITIMATELY, *adv.* धर्म्मेण, धर्म्मानुसारेण, यथाधर्म्मं, न्यायतस्, न्यायानुसारेण, यथान्यायं, युक्तं, उपयुक्तं, सम्यक्, यथायोग्यं, यथोचितं, समञ्जसं.

LEGITIMATION, *s.* औरसीकरणं, औरससमीकरणं, औरसाधिकारदानं.

LEGUME, LEGUMEN, *s.* शमी, सिम्बा, बीजकोशः, बीजगुप्तिः *f.*, पुटः.—(Pulse) शमीधान्यं, द्विदलं, त्रिपुटः, धान्यवीरः, सतीलकः.

LEISURABLE, *a.* सावकाशः -शा -शं, निर्व्यापारः -रा -रं, व्यापारशून्यः -न्या -न्यं, निष्कर्म्मकः -का -कं, निष्क्रियः -या -यं, कर्म्मरहितः -ता -तं, कार्य्यशून्यः -न्या -न्यं,

To MASSACRE, *v. a.* अतिनैष्ठुर्य्येण हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं) or निहन् or मृ (c. 10. मारयति -यितुं) or सूद् (c. 10. सूदयति -यितुं) or निसूद् or विनिसूद् or विशस् (c. 1. -शसति -सितुं) or निकृत् (c. 6. -कृन्तति -कर्त्तितुं).

MASSACRED, *p. p.* अतिनैष्ठुर्य्येण हतः -ता -तं or विनिहतः -ता -तं or घातितः -ता -तं or निषूदितः -ता -तं or विशसितः -ता -तं.

MASSIVENESS, MASSINESS, *s.* स्थूलता -त्वं, स्थौल्यं, स्थूलाकारता, गुरुत्वं, गुरुत्व-ता, सभारता त्वं, भारिता-त्वं, भारवत्त्वं, पिण्डाकारता, महत्त्वं, स्थानता.

MASSIVE, MASSY, *a.* स्थूलः -ला -लं, स्थूलाकारः -रा -रं, स्थूलरूपः -पा -पं, भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), सभारः -रा -रं, गुरुः -र्व्वी -रु, पिण्डितः -ता -तं, पिण्डाकारः -रा -रं, बृहन् -हती -हत् (त्), बृहत्परिमाणः -णा -णं, स्थूलपरिमाणः -णा -णं, स्थानः -ना -नं.

MAST, *s.* (Of a ship) कूपकः, कूपः, गुणवृक्षकः, गुणवृक्षः, नौकूपकः.

MAST-HEAD, *s.* गुणवृक्षकाग्रं, गुणवृक्षाग्रं, कूपकाग्रं.

MASTER, *s.* (One who rules or has servants under him) स्वामी *m.* (न्), प्रभुः *m.*, पतिः *m.*, ईश्वरः, ईशः, नाथः, अधिपतिः *m.*, अधिपः, अधिभूः *m.*, ईशितृ *m.* (तृ), नायकः, भर्त्ता *m.* (र्त्तृ), आर्य्यः, भरणः, भरण्युः *m.*, सेव्यः; 'master of a family,' कुलपतिः *m.*, कुटुम्बी *m.* (न्), कौटुम्बिकः; 'serving two masters,' उभयवेतनः -ना -नं, उभयस्वामिकः -का -कं; 'one's own master,' स्वाधीनः -ना -नं, स्वतन्त्रः -त्रा -त्रं.—(Owner) अधिकारी *m.* (न्), स्वामी *m.*, ईश्वरः, पतिः *m.*, प्रभुः *m.*, परिवृढः.—(Superintendent, director) अध्यक्षः, अधिष्ठाता *m.* (तृ) अधिकृतः, अधिकारी *m.*, अधिपतिः *m.*, अधिपः, अधीशः, नायकः, नेता *m.* (तृ); 'master of the horse,' अश्वाध्यक्षः; 'master of the house,' गृहपतिः, भवनपतिः; 'master of the mint,' टङ्कपतिः *m.*, रूप्याध्यक्षः; 'master of the sports,' केलिसचिवः, नर्म्मसचिवः.—(Chief, head) नायकः, पतिः *m.*, अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अग्रगः, अग्रणीः *m.*, मुखरः, श्रेष्ठः, मुख्य or प्रधान in comp.—(Teacher, director of a school) अध्यापकः.

शिक्षकः, शिक्षागुरुः *m.*, गुरुः *m.*, आचार्य्यः, शिक्षादाता *m.* (त्), विद्यादाता *m.*, विद्यागुरुः *m.*, आर्य्यः, उपाध्यायः, उपदेशकः, शिक्षाकरः. (Well skilled in) निपुणः, कुशलः, सम्पन्नः, व्युत्पन्नः, पण्डितः, कृती *m.* (न्), पारगतः.—(Of a ship) नौकाधिपतिः *m.*, नौपतिः *m.*

To MASTER, *v. a.* (Subdue) वशीकृ, स्ववशीकृ, स्वाधीनीकृ, जि (c. 1. जयति -ते, जेतुं), विजि, दम् (c. 10. दमयति -यितुं), आयत्तीकृ, पराभू, अभिभू, प्रभू.—(Make one's self master of a subject) वशीकृ, पारं गम् (c. 1. गच्छति, गन्तुं), सर्व्वतत्त्वानि ज्ञा (c. 9. जानाति, ज्ञातुं); 'you must master the Sanskrit language,' भवद्भिः संस्कृतवाक्यानि वशीकर्त्तव्यानि.

MASTER-BUILDER, *s.* प्रधानस्थपतिः *m.*, मुख्यस्थपतिः *m.*

MASTERED, *p. p.* वशीकृतः -ता -तं, स्ववशीभूतः -ता -तं, स्वहस्तगतः -ता -तं.

MASTER-KEY, *s.* प्रधानोद्घाटकयन्त्रं, अग्रकुञ्चिका, मुख्योद्घाटनं.

MASTERLY, *a.* अत्युत्तमः -मा -मं, अत्युत्कृष्टः -ष्टा -ष्टं, अनुपमः -मा -मं, अनुपमेयः -या -यं, निरुपमः -मा -मं, सर्व्वोत्तमः -मा -मं, सर्व्वोत्कृष्टः -ष्टा -ष्टं, सर्व्वजित् *m. f. n.*, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, असामान्यः -न्या -न्यं, अतुलनीयः -या -यं, सुनिपुणः -णा -णं, अतिकुशलः -ला -लं.

MASTERLY, *adv.* परमयुक्त्या, सुनिपुणवत्, अतिकुशलवत्, अत्युत्तमं, अत्युत्कृष्टं.

MASTERPIECE, *s.* अत्युत्तमकर्म्म *n.* (न्), अनुपमकर्म्म *n.*, अत्युत्कृष्टकर्म्म, उत्तमकर्म्म *n.*, परमकर्म्म *n.*, प्रधानकर्म्म *n.*, सर्व्वोत्कृष्टकर्म्म *n.*

MASTERSHIP, *s.* प्रभुत्वं -ता, स्वाम्यं, स्वामित्वं, आधिपत्यं, ऐश्वर्य्यं, अधिकारित्वं, भर्त्तृत्वं, प्रधानत्वं, प्राधान्यं, श्रेष्ठता, श्रैष्ठ्यं.

MASTER-STROKE, *s.* उत्तमकर्म्म *n.* (न्), परमकर्म्म *n.*, अत्युत्तमक्रिया.

MASTERY, *s.* (Dominion) ऐश्वर्य्यं, आधिपत्यं, प्रभुत्वं, ईशत्वं, स्वामित्वं, स्वाम्यं, अधिकारः, भर्त्तृता.—(Ownership) स्वाम्यं, अधिकारित्वं -ता, प्रभुता, स्वत्वं.—(Pre-eminence) श्रेष्ठत्वं, श्रैष्ठ्यं, प्रधानत्वं, प्राधान्यं, उत्कर्षः, उत्कृष्टता, मुख्यता, प्रकृष्टता, प्रभुत्वं, आधिक्यं, परमपदं.—(Victory) विजयः.—(Great skill) अतिकौशल्यं, अतिनैपुण्यं, अतिपाटवं, परमयुक्तिः *f.*, परमोत्कर्षः; 'to have the mastery,' प्रभू, अभिभू.

MASTICABLE, *a.* चर्व्यः -र्व्या -र्व्यं, चर्वणीयः -या -यं, चर्वितव्यः -व्या -व्यं.

To MASTICATE, *v. a.* चर्व (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), चर्वणं कृ, दन्तैः पिष (c. 7. पिनष्टि, पेष्टुं), विदंश (c. 1. -दशति -दंष्टुं).

MASTICATED, *p. p.* चर्वितः -ता -तं, कृतचर्वणः -णा -णं, दन्तपिष्टः -ष्टा -ष्टं.

MASTICATION, *s.* चर्वणं, चर्वणक्रिया, चर्वणकर्म्म *n.* (न्), दन्तपेषणं, पेषणं.

MASTICATORY, *a.* चर्वणसाधकः -का -कं, चर्वणोपयोगी -गिनी -गि (न्).

MASTICATORY, *s.* (Substance to be chewed) चर्वणौषधं, चर्व्यद्रव्यं, चर्व्यं.

MASTICH, MASTIC, *s.* मास्तिचाख्यो वृक्षनिर्यासः.—(Cement) लेपविशेषः.

MASTIFF, *s.* बृहत्कुक्कुरः, अतिसाहसशीलः कुक्कुरभेदः.

MASTLESS, *a.* कूपकहीनः -ना -नं, अकूपकः -का -कं, हृतकूपकः -का -कं.

MAT, *s.* कटः, किलिञ्जकः, पादपाशी, आस्तरणं, तृणपूली, तलाची, वटरः, वानं, चञ्चा.

To MAT, *v. a.* (Lay with mats) कटैर् आस्तृ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), कटान् विस्तृ, कटास्तरणं कृ.—(Interweave, entangle) संश्लिष् (c. 10. -श्लेषयति -यितुं), आश्लिष्, ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं); 'to mat the hair,' जटिलीकृ.

MATCH, *s.* (One who is equal to another in strength) तुल्यबलः -ला, तुल्यशक्तिः *m. f.*, समानबलः -ला, तुल्यविक्रमः -मा; 'to be a match for,' अलङ्कृ.—(One that tallies with another) यमः -मा -मं, यमकः -का -कं, यमलः -ला -लं, युग्मकः, समः -मा, समानः -ना, समकक्षः -क्षा, समानकक्षः -क्षा, समतोलः -ला.—(Union by marriage) विवाहसम्बन्धः, सम्बन्धः, विवाहः, प्रेमसम्बन्धः; 'scheming [illegible] सन्दर्भः.—(Contest) युद्धं, [illegible], समाह्वयः, [illegible].—(For lighting fires) [illegible] ज्वलतृणं, ज्वलनतृणं, अरणिः -णी *m. f.*

To MATCH, *v. a.* (Equal, make equal) समीकृ, समानीकृ, सदृशीकृ, समान (nom. समानयति -यितुं), उपमा (c. 2. -माति -तुं), प्रतिमा, तुल् (c. 10. तुलयति -यितुं), तुल्यीकृ.—(Show an equal) समं or तुल्यं or युग्मकं दृश् (c. 10. दर्शयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं), प्रतिमां or उपमां or उपमानं or प्रतिरूपं दृश्.—(Oppose as equal in contest) प्रतियुध् in caus. (-योधयति -यितुं), तुल्यबलं or तुल्यविक्रमं कञ्चित् पुरस्कृ.—(Adapt) युज् (c. 10. योजयति -यितुं), समायुज्.—(Give in marriage) विवाहार्थं दा or प्रदा.

To MATCH, *v. n.* (Correspond, tally) युज् in pass. (युज्यते), उपयुज्, तुल्यः -ल्या -ल्यं भू, तुल्यीभू, समीभू, समानीभू, सदृशीभू, अनुरूपः -पा -पं भू or अस्, प्रतिरूपीभू, उपमितः -ता -तं भू.—(Be united in marriage) विवाहसम्बन्धं कृ, प्रेमसम्बन्धं कृ.—(Be a match for) अलङ्कृ, अलम्भू, अलन्तमः -मा -मं भू.

MATCHED, *p. p.* (Equalled, evenly matched) तुल्यः -ल्या -ल्यं, तुल्यीभूतः -ता -तं, तुल्यबलः -ला -लं, तुल्यशक्तिः -क्तिः -क्ति, तुल्यविक्रमः -मा -मं, समतोलः -ला -लं, समानतोलः -ला -लं, समानकक्षः -क्षा -क्षं, सप्रतिमः -मा -मं, सप्रतिरूपः -पा -पं, उपमितः -ता -तं.—(Married) कृतविवाहः -हा -हं, कृतोपयमः -मा -मं.

MATCHLESS, *a.* अतुल्यः -ल्या -ल्यं, अनुपमः -मा -मं, निरुपमः -मा -मं, अप्रतिमः -मा -मं, अतुलनीयः -या -यं, अतुलः -ला -लं, निस्तुलः -ला -लं, अनुपमेयः -या -यं, अप्रतिमेयः -या -यं, अप्रतिरूपः -पा -पं, अगम्यरूपः -पा -पं, अद्वितीयः -या -यं, असदृशः -शी -शं, सर्व्वोत्तमः -मा -मं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, सर्व्वजित् *m. f. n.*, विषमः -मा -मं, अपूर्व्वः -र्व्वा -र्व्वं.

MATCHLESSLY, *adv.* अतुल्यं, अनुपमेयं, अप्रतिमेयं, निरुपमं, सर्व्वश्रेष्ठं.

MATCHLESSNESS, *s.* अतुल्यता, अनुपमेयता, अप्रतिमेयता, अनुपमता, अनौपम्यं.

MATCHLOCK, *s.* अन्तरग्निबलेन लोहगुलिकाप्रक्षेपणी सुषिरनाडी.

MATCH-MAKER, *s.* (Maker of matches for burning) शलाकाकारी *m.* (न्), ज्वलशलाकाकृत् *m.*—(Contriver of marriages) घटकः, विवाहघटकः, प्रेमघटकः, प्रेमविषये मध्यस्थः.

MATE, *s.* (Companion, associate) सहायः, सहचरः -री *f.*, सहवर्त्ती *m.* -र्त्तिनी *f.*, सहवासी *m.* -सिनी, सखा *m.* -खी *f.*, सहभावी *m.* -विनी *f.*, सङ्गी *m.* -ङ्गिनी *f.*, मित्रं.—(Husband) भर्त्ता *m.* (र्त्तृ), स्वामी *m.* (न्), पतिः *m.*—(Wife) स्त्री, वधूः *f.*, पत्नी, भार्य्या, जाया, वल्लभा, प्रिया, दयिता, प्रियतमा.—(The male or female of animals which associate for propagation) सहचरः *m.* -री *f.* In poetry the above words for husband and wife are used in this sense: 'the elephant's mate,' करिणी *f.*, हस्तिनी *f.*—(An assistant) सहकारी *m.* -रिणी *f.* (न्), सहायः; 'in a ship,' नौपतिसहायः.

To MATE, *v. a.* *See To* MATCH, *v. a.*

MATER-FAMILIAS, *s.* कुटुम्बिनी *f.*, गृहिणी, गेहिनी, स्वामिनी, कौटुम्बिकी.

MATERIAL, *a.* (Consisting of matter, not spiritual) भौतिकः -की -कं, आधिभौतिकः -की -कं, भूतात्मकः -का -कं, भूतमयः -यी -यं, पाञ्चभौतिकः -की -कं, पञ्चभूतात्मकः -का -कं, अनात्मीयः -या -यं, अनात्मिकः -की -कं, अपारमार्थिकः -की -कं, मूर्त्तिमान् -मती -मत् (त्), मूर्त्तः -र्त्ता -र्त्तं, द्रव्यमयः -यी -यं, विषयात्मकः -का -कं, प्राकृतिकः -की -कं,

प्राकृतः -ती -तं, घनः -ना -नं; 'the material world,' भूतसृष्टिः *f.*, भूतसर्गः, भूतसंसारः; 'material universe,' ब्रह्माण्डः -ण्डं; 'material body,' स्थूलशरीरं.—(Substantial) वास्तविकः -की -कं, वास्तवः -वी -वं, सारवान् -वती &c., मूर्त्तिमान् &c., घनः -ना -नं.—(Important) गुरुः -वी -रु, गुर्व्यः -र्वी -र्वं, गुरुप्रभावः -वा -वं, परमार्थः -र्थी -र्थं, चलघुः -घु -घु, मुख्यः -ख्या -ख्यं, आवश्यकः -की -कं, प्रधान in comp.; 'material cause,' उपादानं, उपादानकारणं, समवायिकारणं.

MATERIAL, *s.* साधनं, उपकरणं, द्रव्यं, साधनद्रव्यं, पदार्थः, वस्तु *n.*, मूर्त्तिः *f.*, सारः, घनः, मात्रा; 'materials, collectively,' साधनं -नानि *n. pl* सामग्र्यं -ग्री, द्रव्यसामग्र्यं, सम्भारः, द्रव्यसम्भारः, उपकरणसम्भारः, सज्जा, परिच्छदः; 'writing-materials,' लेखसाधनं, लिपिसज्जा; 'the material of cloth,' वस्त्रयोनिः *f.*

MATERIALISM, *s.* देहात्मवादः, अनात्मवादः, अनात्ममतं, लोकायतं, चार्वाकमतं.

MATERIALIST, *s.* देहात्मवादी *m.* (न्), अनात्मवादी *m.*, लौकायतिकः, लोकायतिकः, विषयी *m.* (न्), विषयायी *m.* (न्), चार्वाकमतावलम्बी *m.* (न्), चार्वाकमतधारी *m.*

MATERIALITY, *s.* भौतिकत्वं, आधिभौतिकत्वं, मूर्त्तिमत्त्वं, अनात्मिकत्वं.

MATERIALLY, *adv.* वस्तुतस्, अर्थतस्, सारतस्, प्रकृतितस्, पदार्थतस्, तत्त्वतस्, अवश्यं, विशेषतस्.

MATERIALNESS, *s.* *See* MATERIALITY. (Importance) गौरवं, गुरुत्वं.

MATERNAL, *a.* मातृकः -की -कं, मातृसम्बन्धी -न्धिनी -न्धि (न्), मातृयोग्यः -ग्या -ग्यं, मातृधर्म्मकः -का -कं; 'maternal affection,' अपत्यस्नेहः, वात्सल्यं; 'maternal duty,' मातृधर्म्मः.

MATERNITY, *s.* मातृत्वं -ता, मातृभावः, मातृकत्वं, मातृधर्म्मः, जननीत्वं.

MATHEMATIC, MATHEMATICAL, *a.* (Relating to mathematics) गणितसम्बन्धी -न्धिनी -न्धि (न्), गणितविषयः -या -यं, गणितविद्यासम्बन्धी &c., संख्यापरिमाणविद्यासम्बन्धी &c., रेखाबीजादिगणितविषयः -या -यं.—(According to the principles of mathematics) गणिततत्त्वानुसारी -रिणी &c., गणितानुरूपः -पा -पं, गणितविद्यानुसारी &c.

MATHEMATICALLY, *adv.* गणितविद्यानुसारेण, गणितानुरूपेण, गणितशास्त्रवत्.

MATHEMATICIAN, *s.* गणितविद्याज्ञः, संख्यापरिमाणविद्याज्ञः, रेखाबीजादिगणितविद् *m.*, गणितशास्त्रज्ञः, क्षेत्रपरिमापकविद्यावान् *m.* (त्), गणनाविद्याज्ञः, गणितज्ञः.

MATHEMATICS, *s. pl.* गणितं, गणितविद्या, संख्यापरिमाणविद्या, गणनाविद्या, रेखाबीजादिगणितं, रेखाबीजादिगणितविद्या, पाटीबीजादिगणितविद्या, रेखादिगणितं, बीजादिगणितं, गणितशास्त्रं, बीजादिगणितशास्त्रं, क्षेत्रादिपरिमाणविद्या, मानविद्या.

MATIN, *a.* (Relating to the morning) प्रातःकालिकः -की -कं, प्रातःकालीनः -ना -नं, औषिकः -की -कं, प्रगेतनः -नी -नं, वैयुष्टः -ष्टी -ष्टं.

MATINS, *s. pl.* प्रातःकृत्यं, प्रातर्भजनं, प्रातःस्मरणं, प्रातःपूजा.

MATRICE, *s.* (Womb) गर्भाशयः, योनिः *m. f.*, गर्भकोशः, जरायुः *m.*—(Of a type) मुद्राक्षरसंस्कारः, मुद्राक्षरगर्भः, मुद्राक्षराकारः.

MATRICIDE, *s.* (The act) मातृहत्या, मातृवधः, मातृघातः, जननीवधः.—(The killer) मातृहन्ता *m.* (न्), मातृहा *m.* (न्), मातृघातुकः, मातृघातकः, मातृघाती *m.* (न्), मातृघ्नः.

To MATRICULATE, *v. a.* संस्कारपूर्ब्बं or नामाभिलिखनपूर्ब्बं विद्यालयं प्रविश् (c. 10. -वेशयति -यितुं).

MATRICULATED, *p. p.* संस्कारपूर्ब्बं विद्यालयप्रवेशितः -ता -तं.

MATRICULATION, *s.* संस्कारपूर्ब्बं or नामाभिलेखनपूर्ब्बं विद्यालयप्रवेशनं.

MATRIMONIAL, *a.* वैवाहिकः -की -कं, उद्वाहिकः -का -कं, औद्वाहिकः -की -कं, उद्वाही -हिनी -हि (न्), विवाही &c., विवाहसम्बन्धी -न्धिनी &c., पाणिग्रहणिकः -की -कं.

MATRIMONIALLY, *adv.* विवाहनियमानुसारेण, विवाहरीत्यनुरूपेण, विवाहविधिवत्.

MATRIMONY, *s.* विवाहः, उद्वाहः, परिणयः, पाणिग्रहः -हणं, पाणिग्राहः, उपयमः, उपयामः, विवाहावस्था, विवाहितावस्था.

MATRIX, *s.* गर्भाशयः, गर्भकोशः, योनिः *m. f.* *See* MATRICE.

MATRON, *s.* कुटुम्बिनी, गृहिणी, गेहिनी, कौटुम्बिकी, जननी, मध्यमवयस्का, पुत्रवती, प्रजावती, पुत्रिणी, सुतिनी, पतिपुत्रवती, प्रौढा, प्रौढस्त्री, वीरा, पुरन्ध्री -न्ध्रिः *f.*, चयी, विज्ञाता.

MATRONLY, *a.* कुटुम्बिनीयोग्यः -ग्या -ग्यं, पुरन्ध्रियोग्यः &c., गृहिणीयोग्यः &c., पुत्रिणीयोग्यः &c., गम्भीरा, धीरा, मध्यमवयस्का.

MATTED, *p. p.* or *a.* (Laid with mats) कटी -टिनी -टि (न्), कटास्तीर्णः -र्णा -र्णं; 'matted hair,' जटा, सटा, जटिः, जुटकं, जूटः; 'having matted hair,' जटी -टिनी &c., जटिलः -ला -लं, जटावान् -वती -वत् (त्).

MATTER, *s.* (Body, substance, not spirit, that which is visible) मूर्त्तिः *f.*, वस्तु *n.*, द्रव्यं, अनात्मद्रव्यं, अनात्मा, अनात्मीयवस्तु *n.*, अनात्मिकवस्तु *n.*, भूतात्मकवस्तु *n.*, पाञ्चभौतिकवस्तु *n.*, मूर्त्तिमद्वस्तु *n.*, साकारवस्तु *n.*, घनवस्तु *n.*, घनद्रव्यं, घनः, दृश्यस्पृश्यवस्तु *n.*, सारः, विषयः, शरीरं.—(Cause of the material world or substratum of the universe) प्रकृतिः *f.*, प्रधानं, माया.—(Material cause, materials, that of which any thing is composed) साधनं, साधनवस्तु *n.*, साधनभूतवस्तु, प्रकृतिः *f.*, सारः, उपकरणं, कारणं, उपादानं, उपादानकारणं.—(Thing) द्रव्यं, वस्तु *n.*, अर्थः, पदार्थः.—(Subject) विषयः, प्रकरणं, वस्तु *n.*, अर्थः, पदं, प्रस्तावः, प्रसङ्गः, सारः, वृत्तान्तः, विधिः *m.*, आस्पदं; 'matter in hand,' प्रस्तुतं; 'an important matter,' परमार्थः, गुर्व्वर्थः; 'an unimportant matter,' लघ्वर्थः, लघुविषयः, अल्पविषयः, स्वल्पविषयः; 'matter of dispute,' विवादास्पदं, विवादविषयः, वादविषयः; 'what is the matter?' को वृत्तान्तः.—(Cause) प्रयोजनं, हेतुः *m.*, प्रयोगः, कारणं.—(Import, consequence) अर्थः, गौरवं, गुरुत्वं, प्रभावः; 'of no matter,' अनर्थकः -का -कं, निरर्थकः -का -कं, निष्प्रभावः -वा -वं, अगुरुः -रुः -रु.—(Business, affair) कर्म्म *n.* (न्), कार्य्यं, विषयः, व्यापारः, अर्थः, प्रयोगः.—(Pus, purulent matter) पूयं, पूयरक्तं, पूयशोणितं, दूष्यं, मलजं, क्षतजं, प्रसितं, अवक्लेदः.

To MATTER, *v. n.* (Be of importance) expressed by अर्थे in comp. or प्रभाव in comp.; as, 'it matters not,' निरर्थकं or अनर्थकं भवति; 'to matter but little,' लघ्वर्थः -र्थी -र्थं or अल्पार्थः -र्थी -र्थं or लघुप्रभावः -वा -वं भू; 'to matter greatly,' गुर्व्वर्थः -र्थी -र्थं or गुरुप्रभावः -वा -वं भू, प्रभ्.—(Form purulent matter) पूय् (c. 1. पूयते -यितुं), सपूयः -या -यं भू, पूयपूर्णः -र्णा -र्णं भू, पूयगर्भः -र्भा -र्भं भू.

MATTERY, *a.* (Purulent) पूययुक्तः -क्ता -क्तं, सपूयः -या -यं, पूयपूर्णः -र्णा -र्णं, पूयगर्भः -र्भा -र्भं, पूयस्रावी -विणी -वि (न्), पूयविशिष्टः -ष्टा -ष्टं.

MATTOCK, *s.* खनित्रं, खात्रं, शैलभित्तिः *f.*, पाषाणदारणः, टङ्कः, खसहननी.

MATTRESS, *s.* तूलिका, तूला -लो, आस्तरणं, वोरपट्टी, तूलादिनिर्म्मितम् आस्तरणं, आस्तरः, प्रस्तरः, संस्तरः, स्तरिमा *m.* (न्), शयनीयं.

To MATURATE, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पाकं कृ or जन् (c. 10. जनयति -यितुं), सपूयं -यां कृ.

To MATURATE, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वीभू, पूयपूर्णः -र्णा -र्णं भू.

सपूयः -या -यं भू, पूयगर्भः -र्भा -र्भं भू, पूय् (c. 1. पूयते -यितुं).

MATURATION, *s.* पाकः, परिपाकः, विपाकः, पचनं, पक्वता, परिपक्वता, पाचा -चिका, पक्वा, पूयत्वं, सपूयत्वं, पूयपूर्णता, पूयसंस्रावः, पूयस्रावः.

MATURATIVE, *a.* पाकलः -ला -लं, पाचलः -ला -लं, पाचनः -ना -नं, पचिष्णुः -ष्णुः -ष्णु, उत्पचिष्णुः &c., पक्वृः &c., पाककरः -रा -रं, पाकजनकः -का -कं, पूयजनकः -का -कं.

MATURE, *a.* पक्वः -क्वा -क्वं, सुपक्वः &c., परिपक्वः &c., पक्रिमः -मा -मं, विपक्रिमः -मा -मं, पाकिमः -मा -मं, पक्वतापन्नः -न्ना -न्नं, पक्वदशाप्राप्तः -प्ता -प्तं, पक्वदशापन्नः -न्ना -न्नं, परिणतः -ता -तं, पाकोन्मुखः -खा -खं, पक्वोन्मुखः -खा -खं; 'ready to drop,' विनाशोन्मुखः -खा -खं.—(Brought to perfection, complete) सम्पन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, सम्पूर्णः -र्णा -र्णं, प्रौढः -ढा -ढं; 'mature deliberation,' सुसमीक्षा -क्षणं, सुविचारः -रणा.

To MATURE, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पक्वं -क्वां कृ, पक्वीकृ, परिपक्वं -क्वां कृ, परिपक्वीकृ. पाकं कृ or जन् (c. 10. जनयति -यितुं), पक्वतां or परिपाकं कृ or जन्, परिणामं कृ or जन्, सिद्धं -द्धां कृ, सिद्धीकृ, साध् (c. 10. साधयति -यितुं), सम्पन्नं -न्नां कृ, सम्पद् (c. 10. -पादयति -यितुं).

To MATURE, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वः -क्वा -क्वं भू, पच् in pass. (पच्यते), परिपच्, पक्वतां or पक्वदशां or परिणामं या (c. 2. याति -तुं) or इ (c. 2. एति -तुं) or गम (c. 1. गच्छति, गन्तुं), परिणतः -ता -तं भू, पाकोन्मुखः -खा -खं भू, सिद्धः -द्धा -द्धं भू, सम्पन्नः -न्ना -न्नं भू.

MATURED, *p. p.* पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, परिणतः -ता -तं, पक्वतापन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, प्रौढः -ढा -ढं, सम्पन्नः -न्ना -न्नं, सम्पूर्णः -र्णा -र्णं.

MATURELY, *adv.* सपाकं, सपरिणामं, परिपक्वं, सम्पन्नं, सम्पूर्णं.—(With full deliberation) सुसमीक्ष्य, सुविमृश्य, सुविचार्य.

MATURESCENT, *a.* पाकोन्मुखः -खा -खं, आपक्वः -क्वा -क्वं, परिणामोन्मुखः &c., पचनिष्कल्पः -ल्पा -ल्पं, पचनिष्शेषः -षा -षं, पचनिष्शेष्यः -ष्या -ष्यं.

MATURITY, MATURENESS, *s.* पाकः, परिपाकः, पक्वता, पक्तिः *f.*, परिपक्वता, विपाकः, सुपक्वता, सुपक्तिः. परिणतिः *f.*, परिणामः, परिणतता -त्वं, पक्वभावः, पक्वदशा, पक्वावस्था, परिणतावस्था, पचा, पाचा -चिका, प्रौढिः *f.*, प्रौढता, सिद्धता, सिद्धिः *f.*, सम्पन्नता, सम्पूर्णता.

MATUTINAL, MATUTINE, *a.* प्रातःकालीनः -ना -नं, प्रातःकालिकः -की -कं, औषिकः -की -कं, ओषसः -सी -सं, उषस्यः -स्या -स्यं, प्रगेतनः -नी -नं, वैयुष्टः -ष्टी -ष्टं, प्रावोधिकः -की -कं, औदयिकः -की -कं, प्रातःकालसम्बन्धी -न्धिनी -न्धि (न्).

MAUDLIN, *a.* ईषन्मत्तः -त्ता -त्तं, मत्तकल्पः -ल्पा -ल्पं, मत्तदेशीयः -या -यं.

MAUL, *s.* वृहन्मुद्गरः, काष्ठमुद्गरः, स्थूलमुद्गरः, घनः.

To MAUL, *v. a.* स्थूलयेत्रेण तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रह् (c. 1. -हरति -र्हर्तुं वेत्राघातं कृ, वेत्राघातेन क्षतविक्षतीकृ.

MAULED, *p. p.* वेत्रादिप्रहारेण परिक्षतः -ता -तं or अतिक्षुण्णः -ण्णा -ण्णं.

MAUSOLEAN, *a.* चिताचूडकसम्बन्धी -न्धिनी -न्धि (न्), चैत्यसम्बन्धी &c.

MAUSOLEUM, *s.* चिताचूडकं, चैत्यं, चित्यं, चैत्रः, समाधिः *m.*

MAUVAISE-HONTE, *s.* सभाभीतिः *f.*, सभाकम्पः, जनभीतिः, लोकभीतिः, जनलज्जा.

MAW, *s.* पशूनां जठरः or उदरं.—(Of fowls) उपजठरः.

MAWKISH, *a.* विरसः -सा -सं, नीरसः -सा -सं, अरसिकः -का -कं.

MAWKISHLY, *adv.* विरसं, वैरस्येन, सवैरस्यं, रसं विना, अरसिकं.

MAWKISHNESS, *s.* विरसता -त्वं, वैरस्यं, अरसता, अरसिकत्वं, फल्गुता.

MAXILLAR, MAXILLARY, *a.* हनुसम्बन्धी -न्धिनी -न्धि (न्) हनु in comp.

MAXIM, *s.* सूत्रं, वचनं, वाक्यं, तत्त्वं, विधिः *m.*, विधानं, नियमः, स्थितिः *f.*, आदेशः, निदेशः, निर्देशः, कल्पः, न्यायः, नीतिः *f.*, क्रमः, चोदना, निगमः, सिद्धान्तः, मतं.

MAXIMUM, *s.* उत्तमसंख्या, परमसंख्या, अधिकसंख्या, उत्तमपरिमाणं.

MAY, *s.* (The month) वैशाखोत्तराङ्गं, ज्यैष्ठपूर्वाङ्गं, वैशाखः, माधवः, राधः, ज्यैष्ठः, शुक्रः, पञ्चममासः.

MAY, *v. auxil.* (Be possible) सम्भू, शक् in pass. (शक्यते), शक्यः -क्या -क्यं भू or expressed by the potential.—(Have liberty, be allowed) expressed by the potential; as, 'he may do that,' स तत् कुर्यात्. *See also* PERMITTED, ALLOWED, &c. (May be) स्यात्.

MAY-DAY, *s.* पृथ्वीकर्षणसमारम्भ्य प्रथमदिवसः.

MAY-POLE, *s.* क्रीडार्थविशेषो यत्परितो मण्डलनृत्यं क्रियते.

MAYOR, *s.* नगराध्यक्षः, पुराध्यक्षः, नगराधिकारी *m.* (न्).

MAYORALTY, *s.* नगराध्यक्षता -त्वं, पुराध्यक्षता, नगराधिकारः -रिता, नगराध्यक्षपदं, नगराध्यक्षाधिकारः.

MAYORESS, *s.* नगराधिकारिणी, नगराध्यक्षस्त्री, नगराध्यक्षपत्नी.

MAZE, *s.* (Labyrinth) गहनं, सुगहनस्थानं, दुर्निर्गमस्थानं, अशक्यनिर्गमः प्रदेशः, भ्रमजनकः प्रदेशः, दुर्गतिः *f.*—(Intricacy, perplexity) वक्रता, कौटिल्यं, विषमता, वैषम्यं, क्लिष्टता, काठिन्यं, दुःशोध्यता, व्यग्रता.

MAZY, *a.* गहनः -ना -नं, सुगहनः -ना -नं, दुर्निर्गमः -मा -मं, वक्रः -क्रा -क्रं, अतिवक्रः -क्रा -क्रं, भ्रमजनकः -का -कं, भ्रान्तिजनकः -का -कं, दुःशोध्यः -ध्या -ध्यं.

ME, *pron.* acc. c. मां; 'by me,' मया; 'to me,' मह्यं; 'of me,' मम.

MEACOCK, *s.* गेहशूरः, गेहनर्दी *m.* (न्), कापुरुषः, स्त्रीविधेयः.

MEAD, *s.* मधु *n.*, मधुपानीयं, मधुनीरं, मधुपयस् *n.*

MEAD, MEADOW, *s.* क्षेत्रं, केदारः, यवसस्थानं, शाद्वलस्थानं, गोचरः, गोप्रचारः; 'meadow-grass,' यवसः, क्षेत्रियं; 'relating to a meadow,' केदारः रौ -रं, क्षैत्रिकः -की -कं.

MEADOWY, *a.* यवसमयः -यी -यं, यवसीयः -या -यं, शाद्वलः -ला -लं.

MEAGER, MEAGRE, *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणः -णा -णं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, शुष्कमांसः -सा -सं, शुष्काङ्गः &c., क्षामः -मा -मं, क्षामशरीरः &c., अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं, तनुः -नुः -न्वी -नु, वितनुः &c., प्रतनुः &c., शातः -ता -तं. (Barren as soil) रूक्षः -क्षा -क्षं, वन्ध्यः -न्ध्या -न्ध्यं; 'a barren soil,' मरुस्थलं -लो.—(As style) विरसः -सा -सं, फल्गुः -ल्गुः -ल्गु.

MEAGERLY, *adv.* परिकृशं, सकार्श्यं, कार्श्येन, क्षीणतया, रूक्षं.

MEAGERNESS, MEAGRENESS, *s.* कृशता -त्वं, कार्श्यं, परिकृशता, कृशाङ्गता, क्षीणता, क्षामता, शरीरक्षीणता, मांसक्षीणता, शुष्कता, मांसशुष्कता, अपुष्टता, विपुष्टता, अमांसत्वं -ता, तनुता, शुष्काङ्गता, मांसहीनता, रूक्षता.

MEAL, *s.* (Flour) शक्तुः *m.*, क्षोदः, पिष्टं, चूर्णं, गोधूमचूर्णं, गोधूमक्षोदः, सपूपः, क्षोदितं, गुण्डिकः -का, समीदः; 'barley-meal,' यवक्षोदः.—(Repast) आहारः, भोजनं, भक्षणं, भक्षिका, अशनं, प्राशनं, अभ्याहारः, अन्नं; 'good meal,' सुभोजनं, इच्छाभोजनं; 'poor meal,' कुभोजनं; 'light meal,' लघ्वाहारः, अल्पाहारः, फलाहारः; 'morning meal,' प्रातर्भोजनं, प्रातरशनं, प्रातराशः; 'meal at noon,' माध्याह्निकं; 'at night, रात्रिभोजनं; 'meal supplied by another,' परान्नं; 'row or party at a meal,' पंक्तिः *f.*; 'to make a meal,' आहारं कृ, भोजनं कृ; 'one who has made a meal,' कृताहारः -रा -रं, कृतभोजनः -ना -नं; 'making one's meals at irregular hours,' विषमभोजनं; 'meal-time,' भोजनकालः, अन्नकालः.

MEALINESS, *s.* सचूर्णता -त्वं, क्षोदितत्वं, कोमलता, शक्तुपूर्णता, मृदुता.

MEALMAN, *s.* शक्तुविक्रयी *m.* (न्), चूर्णविक्रेता *m.* (तृ), क्षोदविक्रयोपजीवी *m.*

MEALY, *a.* चूर्णमयः -यी -यं, क्षोदमयः -यी -यं, सचूर्णः -र्णा -र्णं, शक्तुपूर्णः -र्णा -र्णं, कोमलः -ला -लं, मृदुलः -ला -लं, मसृणः -णा -णं.

MEALY-MOUTHED, *a.* मृदुभाषी -षिणी -षि (न्), कोमलमुखः -खी -खं, मृदुमुखः &c.

MEAN, *a.* (Base, low-minded) नीचः -चा -चं, हीनः -ना -नं, कृपणः -णा -णं, अपकृष्टः -ष्टा -ष्टं, निकृष्टः -ष्टा -ष्टं, कुत्सितः -ता -तं, क्षुद्रः -द्रा -द्रं, तुच्छः -च्छा -च्छं, हीनः -ना -नं, कदर्य्यः -र्य्या -र्य्यं, अनार्य्यः &c., जघन्यः -न्या -न्यं, खलः -ला -लं, दुष्टः -ष्टा -ष्टं, अधमः -मा -मं, प्राकृतः -ती -तं, पामरः -री -रं, अधमवृत्तिः -त्तिः -त्ति, जघन्यवृत्तिः &c., हीनवृत्तिः &c., पामरवृत्तिः &c., हीनवृत्तिः &c., कृपणवृद्धिः -द्धिः -द्धि, कु or का prefixed, as, 'a mean man,' कुपुरुषः, कापुरुषः.—(Low in rank or birth,' हीनजातिः -तिः -ति, अधमजातिः &c., अधमजातीयः -या -यं, अन्यजातीयः -या -यं, जघन्यजातिः &c., नीचजातिः &c., अकुलीनः -ना -नं, अकुलः -ला -लं, दुष्कुलीनः -ना -नं, अधमवर्णजातः -ता -तं.—(Contemptible, worthless,) गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, कुत्सितः -ता -तं, तुच्छः -च्छा -च्छं, निर्गुणः -णा -णं, तृणप्रायः -या -यं, क्षुल्लकः -का -कं, लघुः -घुः -घ्वी -घु, लघुप्रभावः -वा -वं.—(Middle, moderate in size) मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यपरिमाणः -णा -णं, मध्यमप्रमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c.—(Intermediate, intervening) मध्यः &c., मध्यमः &c., मध्यस्थः -स्था -स्थं, मध्यस्थितः -ता -तं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तर्गतः -ता -तं, व्यवहितः -ता -तं; 'in the mean time,' अनन्तरं -रे, तदनन्तरं, अत्रान्तरे, इतोमध्ये.—(In geometry or mathematics) मध्यः &c., मध्यमः &c., समः -मा -मं; 'mean anomaly,' मध्यकेन्द्रं; 'mean motion of a planet,' मध्यमगतिः *f.*

MEAN, *s.* (Middle place, middle rate, medium:) मध्यता -त्वं, समता, साम्यं, मध्यमपरिमाणं, सामान्यपरिमाणं, समपरिमाणं, सामान्यपक्षः, समपक्षः.—(Intervening time) मध्यकालः, अभ्यन्तरकालः, अन्तरकालः, कालान्तरं, कालाभ्यन्तरं, अन्तरं, अन्तर्गतकालः, मध्यान्तरं, मध्यावसरः, मध्यावधिः *m.*, अवधिः *m.*—(In geometry, &c.) समं, मध्यं.—(Instrument, means or medium through which any thing is done) साधनं, उपायः, कारणं, उपकरणं, करणं, द्वारं, द्वार् *f.*, अभ्युपायः, हेतुः *m.*, विधानं, कर्म्मसाधनं, कार्य्यसाधकं, कार्य्यसाधनं, सम्भवः, अङ्गं, उपचारः, योगः, गतिः *f.*, उपपत्तिः *f.*, साहाय्यं, साधनसामग्री -ग्यं, सामग्री, साहित्यं; 'by means of,' उपायेन, द्वारेण, द्वारा, हेतुना, हेतोः, कारणेन; 'by means of a lever,' उन्नोलनदण्डोपायेन or उन्नोलनदण्डद्वारेण -द्वारा; 'by lawful means,' धर्म्मोपायेन, धर्म्मोपायैः or expressed by the indecl. part.; as, 'by means of numerous experiments,' अनेकवारं परीक्ष्य; 'means of subsistence,' जीवनोपायः, जीवनहेतुः *m.*, उपजीवकं -विका, उपजीवनं; 'by all means, in all ways,' सर्व्वथा, सर्व्वथैव, सर्व्वप्रकारेण; 'by all means, certainly,' अवश्यं, अवश्यमेव; 'by any means,' कथमपि, कथञ्चन, कथञ्चित्, यथाकथञ्चित्, कथं कथमपि; 'by no means,' न कथञ्चन, न कथञ्चित्.—(Means, resources, income) विभवः, द्रव्यं, धनं, अर्थः, आयः, आगमः, धनागमः, सम्भवः, शक्तिः *f.*, बलं, सामर्थ्यं; 'according to one's means,' यथाविभवं, यथासम्भवं, यथाशक्ति, यथासामर्थ्यं; 'having small means,' अल्पधनः -ना -नं, अल्पविभवः -वा -वं.

To MEAN, *v. a.* (Intend) अभिप्रे (c. 2. अभिप्रेति -तुं, rt. इ), अभिप्रायं कृ, उद्दिश् (c. 6. -दिशति -देष्टुं), मनसा उद्दिश्, अभिसन्धा (c. 3. -दधाति -धातुं), इष् (c. 6. इच्छति, इषितुं), उपलक्ष् (c. 10. -लक्षयति -यितुं) or expressed by the des. form of a verb; as, 'to mean to do,' कृ in des. (चिकीर्षति -र्षितुं); 'to mean to go,' गम् in des. (जिगमिषति -षितुं); 'to mean to say,' वच् in des. (विवक्षति -क्षितुं), or by काम with the infin.; as, 'what do you mean to say?' किं वक्तुकामो ऽसि; 'what do you mean to do?' किं कर्त्तुकामो ऽसि; 'where do you mean to go?' कुत्र गन्तुकामो ऽसि.—(Signify, indicate) सूच् (c. 10. सूचयति -यितुं), उद्दिश्, निर्दिश्, बुध् (c. 10. बोधयति -यितुं), उद्बुध्.

To MEAN, *v. n.* (Have meaning) अर्थवान् -वती -वद् भू, सार्थः -र्था -र्थं भू, वच् in des. (विवक्षति -क्षितुं), अर्थं मृच् (c. 10. सूचयति -यितुं) or expressed by अर्थ *i.e.* signification, meaning) in comp.: as, 'a speech that means to convey censure,' निन्दार्थो वादः.

MEANDER, *s.* वक्रता, वक्रगतिः *f.*, वक्रिमा *m.* (न्), जिह्मता, जैह्म्यं, जिह्मगतिः *f.*, कुटिलता, कौटिल्यं, कुटिलगतिः *f.*, तिर्य्यक्त्वं, तिर्य्यग्गतिः *f.*, असमानगतिः, विसर्पणं, सर्पः -र्पणं, सर्पगतिः *f.*; 'of a river's bank,' रोधोवक्रता.

To MEANDER, *v. n.* विसृप् (c. 1. -सर्पति -सर्प्तुं), विसर्पणं कृ, वक्रं or जिह्मं गम् (c. 1. गच्छति, गन्तुं), कुटिलं or तिर्य्यग् या (c. 2. याति -तुं), सर्पवद् या.

MEANDERING, *part.* or *a.* वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, वक्रगतिः -तिः -ति, वक्रगामी -मिनी -मि (न्), जिह्मः -ह्मा -ह्मं, जिह्मगतिः &c., जिह्मगामी &c., कुटिलः -ला -लं, कुटिलगतिः &c., कुटिलगामी &c., तिर्य्यङ्तिरश्ची तिर्य्यक् (क्), तिर्य्यग्गतिः &c., तिर्य्यग्गामी &c., विसर्पी -र्पिणी &c., सर्पगतिः &c., वक्रतीरः -रा -रं, वक्ररोधाः -धाः -धः (स्), असमानगतिः &c., विषमगतिः &c.

MEANING, *s.* (Intention) अभिप्रायः, अभिप्रेतं, आशयः, उद्देशः, आकांक्षा, अर्थः, तात्पर्य्यं, आकूतं, इच्छा, छन्दः, छन्दस् *n.*, सङ्कल्पः, बुद्धिः *f.*, मतिः *f.*, मतं, इङ्गितं, उपलक्षितं, हृदयं, भावः.—(What is intended to be said) विवक्षितं, विवक्षा.—(Sense, signification) अर्थः, अभिप्रायः, विवक्षितं, विवक्षा, आकांक्षा, छन्दस् *n.*, विषयः; 'meaning or force of a word,' पदार्थः, भावार्थः, शक्तिः *f.*, विग्रहः; 'original meaning,' मुख्यार्थः, मुख्यत्वं, मूलार्थः; 'literal meaning,' अवयवार्थः, पदार्थः; 'metaphorical meaning,' गौणार्थः, गौणत्वं; 'latent or hidden meaning,' मर्म्म *n.* (न्), अन्तर्गर्भः; 'deep in meaning,' गूढार्थः -र्था -र्थं, निगूढार्थः -र्था -र्थं, गुर्व्वर्थगर्भः -र्भा -र्भं; 'having little meaning,' अल्पार्थः -र्था -र्थं, अल्पविषयः -या -यं.

MEANING, *part.* or *a.* अभिप्रेत्य, उद्दिश्य, अभिसन्धाय.—(Significant) अर्थवान् -वती -वत् (त्), सार्थः -र्था -र्थं, पूर्णार्थः -र्था -र्थं, अर्थान्वितः -ता -तं, साकूतः -ता -तं, उद्बोधकः -का -कं, वाचकः -का -कं.

MEANINGLESS, *a.* अर्थहीनः -ना -नं, निरर्थकः -का -कं, अनर्थकः -का -कं.

MEANINGLY, *adv.* सार्थं, साकूतं, अर्थवत्, पूर्णार्थतस्, गुर्व्वर्थतस्.

MEANLY, *adv.* (Poorly, in a low way) कृपणं, कार्पण्येन, सकार्पण्यं, कुत्सितं, दीनं, सदैन्यं, अपकृष्टं, निकृष्टं, कृपणवत्, निकृष्टवत्, खलवत्, अधमवत्, अधमप्रकारेण, जघन्यवत्, तुच्छवत्, कदर्य्यवत्, अनार्य्यवत्; 'meanly born,' हीनजातिः -तिः -ति, अधमजातिः &c. (Moderately) परिमितं, अभृशं.—(Contemptuously) सावमानं, अनादरेण, अश्लाघयं, लाघवेन, लघु.

MEANNESS, *s.* (Baseness, lowness) कृपणता -त्वं, कार्पण्यं, दीनता -त्वं.

दैन्यं, अपकृष्टता, निकृष्टता, नीचता, क्षुद्रता, अधमता, हीनता, तुच्छता, कदर्य्यता, अनार्य्यता, जघन्यता, खलता, दुष्टता, पामरता, अधमवृत्तिता, हीनवृत्तित्वं, मनोहीनता, बुद्धिकार्पण्यं, कृपणबुद्धित्वं, अनुदारता; 'of birth,' हीनजातित्वं, अधमजातित्वं, अकुलीनता, दुष्कुलीनता.—(Contemptibleness) गर्ह्यता, तुच्छत्वं, लघुता, लाघवं, कुत्सितत्वं, निर्गुणता.

Mean-spirited, *a.* कृपणबुद्धिः -द्धिः -द्धि, कृपणमतिः &c., हीनबुद्धिः &c.

Means, *s. pl.* (Resources) विभवः.—(Instrument) साधनं, उपायः. *See* Mean, *s.*

Meant, *p.p.* अभिप्रेतः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, विवक्षितः -ता -तं.

Meanwhile, *adv.* अनन्तरं -रे, तदनन्तरं, अत्रान्तरे, इतोमध्ये, अतोमध्ये, मध्यकाले, अभ्यन्तरकाले, यावत.

Measled, *a.* वक्ष्यमाणरोगग्रस्तः -स्ता -स्तं, गोयरोपहतः -ता -तं.

Measles, *s. pl.* रक्तस्फोटोत्पत्तिलक्षितो रोगविशेषः. The Mahratti words गोवर:, and शूभा, may perhaps be used.

Measurable, *a.* मेयः -या -यं, प्रमेयः -या -यं, परिमेयः -या यं, मापनीयः -या -यं, माप्यः -प्या -प्यं, मातव्यः -व्या -व्यं, परिमाणयोग्यः -ग्या -ग्यं.

Measure, *s.* मानं, प्रमाणं, परिमाणं, मात्रं, यौतुः *m.*, यौतवं, यौतवं, द्रुवयं, पाय्यं, 'of short measure,' अल्पप्रमाणः -णा -णं; 'measure of capacity,' प्रतीमाणं, प्रस्थः; 'of weight,' तुलामानं; 'of length,' अङ्गुलिमानं; 'of time,' कालपरिमाणं. The following are some of the measures of capacity: मुष्टिः *m.* = a handful, कुञ्जिः *f.* = 8 handfuls, कुडवः = 12 handfuls, प्रस्थः = 48 handfuls or 4 kudavas, खाढकः = 4 prasthas, द्रोणः = 4 ádhakas, खारी = 16 dronas, कुम्भः = 20 dronas, वाहः = 10 kumbhas, निकुञ्चकः = $\frac{1}{4}$ of a kudava, गोप्पदं = the measure of a cow's foot. The following are measures of weight: रक्तिका or रतिः = 2$\frac{4}{10}$ grains, गुञ्जा = 2$\frac{3}{10}$ grains, or $\frac{1}{8}$ of a másha, काकिणी = $\frac{1}{4}$ of a masha, माषः = 17 grains, पलं = 2 máshas, धरणः -णं = 10 palas, कर्षः or अक्षः = 16 máshas or 280 grains troy, तोलः = 210 grains, तुला = 100 palas or 145 ounces troy, भारः = 2000 palas, खारिः = 10 bháras. The following are measures of length: यवः = 1 barley-corn, अङ्गुलः = 8 barley-corns, प्रादेशः = 10 angulas or the span of the thumb and forefinger, वितस्तिः *f.* or गोकर्णः = 12 angulas or the span of the thumb and little finger, रत्निः -त्नी *m. f.* = 18 angulas or a cubit measured from the elbow to the end of the closed fist, अरत्निः *m.* = 21 angulas or a cubit measured from the elbow to the tip of the little finger, हस्तः = 24 angulas or a cubit measured from the elbow to the tip of the middle finger, गजः = 2 cubits or between 2 and 3 feet, व्यामः = a fathom or 3$\frac{1}{2}$ hastas or the space between the tips of the fingers of either hand when the arms are extended, काकिणी = $\frac{1}{4}$ of a dandá, दण्डः = a pole or 4 cubits, निवर्त्तनं = 200 square cubits or 20 rods, गोचर्म्म *n.* = a hide of land 300 feet long by 10 broad, क्रोशः = a kos or 4000 cubits, गव्यूतिः *m. f.* or गव्यूतं = 2 kos or 2000 dandas or 8000 cubits, योजनं = 4 kos. The following are measures of time, निमेषः or निमिषः = a twinkling of the eye, काष्ठा = 18 twinklings, कला = 30 kashthás or 8 seconds, क्षणः = 30 kalás or 4 minutes, दण्डः or घटिका = 6 kshanas or the 60th part of a day or 24 minutes, मुहूर्त्तः -र्त्तं = 12 kshanas or the

... a day or 30 muhúrtas, &c. ... short measures of time, &c. ... minute.—(Rule, standard by which any thing is measured) परिमाणं, प्रमाणं.—(Proportion) मानं, परिमाणं, प्रमाणं, मितिः *f.*, परिमितिः, तारतम्यं; 'according to measure,' प्रमाणतस्.—(Portion allotted) भागः, विभागः, अंशः.—(Degree) प्रमाणं, परिमाणं, पर्य्याप्तं, मात्रं; 'in some measure,' किञ्चित्, अल्पमात्रं, ईषत्.—(Limit) पर्य्याप्तं, अन्तः -न्तं, मर्य्यादा, सीमा; 'beyond measure,' अतिमात्रं, अतिमर्य्यादं, नितान्तं, अतिशयेन, अतीव, अति prefixed.—(Moderation) परिमितिः *f.*, परिमितता; 'in measure,' परिमितं.—(Quantity, measure of a vowel, &c.) मात्रा.—(Musical time) तालः, मात्रा; 'in musical measure,' स्वरबद्धः -द्धा -द्धं.—(Metre, measure of verse) छन्दः, छन्दस्, वृत्तं, वर्णवृत्तं, वेदः, पद्यं; 'false measure,' छन्दोभङ्गः.—(Means to an end, step) उपायः, उपचारः, साधनं, अभ्युपायः, योगः, प्रयोगः, युक्तिः *f.*, विधानं, क्रिया, कर्म्म *n.* (न), कार्य्यं, कारणं, करणं; 'noble measures,' सामोपचारः, सौम्योपचारः, सामोपायः, the four measures of war are 'causing dissension,' भेदः; 'force of arms,' दण्डः; 'bribery,' दानं; 'conciliation,' साम *n.* (न); 'to take measures,' उपायप्रयोगं कृ.—(Common measure in arithmetic, &c.) अपवर्त्तः; 'having no common measure,' निरपवर्त्तः -र्त्ता -र्त्तं.

To measure, *v. a.* मा (c. 2. माति, c. 3. मिमीते, c. 4. मायते, मातुं, c. 10. मापयति -यितुं), प्रमा, परिमा, तुल् (c. 10. तुलयति -यितुं), तूल् (c. 10. तूलयति -यितुं). मापनं कृ, परिमाणं कृ.—(Ascertain the degree or extent) मानं or परिमाणं निरूप् (c. 10. -रूपयति -यितुं) or ज्ञा (c. 9. जानाति, ज्ञातुं) or परीक्ष् (c. 1. -ईक्षते -क्षितुं), परिमाणनिरूपणं कृ.—(Compute) गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्. (Make a comparison of measurement) उपमा.—(Allot) विभज् (c. 1. -भजति -भक्तुं) or परिकल्प् (c. 10. -कल्पयति -यितुं).

To measure, *v. n.* (Be of a certain extent or size) expressed by परिमाण or परिमित or मित in comp.; as, 'a line which measures eight inches,' अष्टाङ्गुलपरिमिता रेखा; 'to measure an inch,' अङ्गुलपरिमितः -ता -तं भू, अङ्गुलमितः -ता -तं भू, अङ्गुलपरिमाणः -णा -णं भू.

Measured, *p. p.* मितः -ता -तं, प्रमितः -ता -तं, परिमितः -ता -तं, सम्मितः -ता -तं, उन्मितः -ता -तं, मापितः -ता -तं.—(Uniform) समानः -ना -नं, समः -मा -मं, धीरः -रा -रं.—(In music) तालबद्धः -द्धा -द्धं.—(Limited) मितः -ता -तं, परिमितः -ता -तं, निबद्धः -द्धा -द्धं, नियतः -ता -तं.

Measureless, *a.* अमेयः -या -यं, अपरिमेयः -या -यं, अप्रमेयः -या -यं, अमितः -ता -तं, अपरिमितः -ता -तं, अपरिमाणः -णा -णं.

Measurement, *s.* मापनं, परिमाणं, मितिः *f.*, परिमितिः *f.*, प्रमितिः *f.*, प्रमाणं, मानं, मानपरीक्षा, परिमाणपरीक्षा, माननिरूपणं, मापकरणं; 'rough measurement,' स्थूलमानं; 'exact measurement,' सूक्ष्ममानं.

Measurer, *s.* मापकः, परिमापकः, मापनकर्त्ता *m.* (र्त्तृ), मापनकृत्, माननिरूपकः, परिमाणनिरूपकः, परिमाणपरीक्षकः.

Measuring, *s.* मापनं; 'measuring-line,' प्रमाणसूत्रं; 'rod,' प्रमाणदण्डः.

Meat, *s.* (Flesh) मांसं, खाद्यमांसं, मांसाहारः, आमिषं, आमिषाहारः; 'butcher's meat,' सौनं, शौनं, सौनिकं, शौनिकं.—(Food) अन्नं, भोजनं, आहारः, खाद्यं, भक्ष्यद्रव्यं, खाद्यद्रव्यं; 'meat and drink,'

अन्नोदकं, अन्नजलं, अन्नपानं; 'seller of meat,' मांसिकः, सौनिकः, शौनिकः, कौटिकः, वैतंसिकः.

MEAT-OFFERING, *s.* नैवेद्यं, अन्ननिवेदनं, अन्नोपहारः, अन्नोपहरणं.

MECHANIC, MECHANICAL, *a.* (Pertaining to machines) यान्त्रः -न्त्री -न्त्रं, यान्त्रिकः -की -कं, यन्त्री -न्त्रिणी -न्त्रि (न्), यन्त्रीयः -या -यं, यन्त्रसम्बन्धी -न्धिनी &c., यन्त्रविषयः -या -यं, शिल्पिकः -की -कं. शिल्पी -ल्पिनी &c., यन्त्रविद्यासम्बन्धी &c., शिल्पविद्यासम्बन्धी &c.—(Constructed or performed by the rules of mechanics) यन्त्रविद्यानुसारी -रिणी &c., यन्त्रशास्त्रानुरूपः -पा -पं, शिल्पशास्त्रानुसारी &c., यन्त्रशास्त्रसिद्धः -द्धा -द्धं. शिल्पविद्याकृतः -ता -तं, यन्त्रविद्यानिबद्धः &c., शिल्पविद्यानिर्मितः -ता -तं, यौक्तिकः -की -कं; 'mechanical art,' शिल्पं, कला.—(Skilful in mechanical art) यन्त्रविद्यानिपुणः, शिल्पविद्याज्ञः, शिल्पकर्म्मकुशलः.—(Employed in mechanical pursuits) शिल्पी *m.* (न्), शिल्पकर्म्मकारी *m.*, शिल्पजीवी *m.*, शिल्पोपजीवी *m.* (न्), शिल्पिकः. -(Moving like a machine) यन्त्रगतिकः -का -कं, यन्त्रगतिः -तिः -ति, यन्त्रप्रायः -या -यं, यन्त्रतुल्यः -ल्या -ल्यं.

MECHANIC, *s.* (Artisan) शिल्पी *m.* (न्), शिल्पकारः, शिल्पकर्म्मकारः, शिल्पिकः, शिल्पोपजीवी *m.* (न्), शिल्पकर्म्मोपजीवी *m.*, कर्म्मकारः, कर्म्मारः, कारुः *m.* -रुकः.

MECHANICALLY, *adv.* यन्त्रविद्यानुसारेण, शिल्पविद्यानुसारेण, यन्त्रशास्त्रानुरूपेण, शिल्पिकं, शिल्पवत्.—(By the mere laws of motion) यन्त्रगतिमात्रौपम्यात्, यन्त्रतुल्यगत्या, अबुद्धिपूर्व्वं, अमतिपूर्व्वं.

MECHANICIAN, *s.* यन्त्रविद्याज्ञः, शिल्पशास्त्रज्ञः, यन्त्रविद्यानिपुणः.

MECHANICS, *s.* यन्त्रविद्या, शिल्पविद्या, यन्त्रशास्त्रं, शिल्पशास्त्रं, शिल्पिशास्त्रं, यान्त्रं, गतिविद्या, यन्त्रगतिविद्या, यन्त्रनिबन्धः.

MECHANISM, *s.* (Construction of a machine) यन्त्ररचना, यन्त्रविधानं, कला, युक्तिः *f.* *See* MACHINERY. (Action of a machine) यन्त्रचेष्टा, यन्त्रगतिः *f*, यन्त्रक्रिया, यन्त्रव्यापारः; 'a piece of mechanism,' कारूजः.

MECHANIST, *s.* यन्त्रनिर्म्माता *m.* (तृ), यन्त्रकर्त्ता *m.*, यन्त्रविद्यानिपुणः.

MECONIUM, *s.* (Of poppies) खसखसरसः, खसखसनिर्य्यासः, खसखसस्रावः. -(First faces of infants) सद्योजातबालकानां प्रथमोच्चारः.

MEDAL, *s.* मुद्रा, प्रतिष्ठामुद्रा, कीर्त्तिमुद्रा, कीर्त्तिदमुद्रा, मानसूचकमुद्रा, निदर्शनमुद्रा.

MEDALIST, *s.* (Person skilled in medals) मुद्राविद्याज्ञः, मुद्राविद् *m.*, मुद्रापरीक्षकः.—(One who has gained a medal) कीर्त्तिमुद्राधारी *m.* (न्), कीर्त्तिमुद्रावान् *m.* (त्).

MEDALLION, *s.* प्राचीनकालिकमुद्रा, प्राचीनमुद्रा, महामुद्रा.

To MEDDLE, *v. n.* (Interfere or intrude officiously) परकार्य्येषु चर्च् (c. 1. चर्चति -र्चितुं), परव्यापारचर्चां कृ, परनियोगचर्चां कृ, पराधिकारचर्चां कृ, अत्युपचारेण or अनधिकारपूर्व्वं परकार्य्याणि निरूप् (c. 10. -रूपयति -यितुं) or परकार्य्यनिरूपणं कृ or परकार्य्येषु व्यापृ in pass. (-प्रियते) or व्यापृतः -ता -तं भू, पराधिकारं प्रविश् (c. 6. -विशति -वेष्टुं), परकार्य्यप्रवेशं कृ, परव्यापारप्रवेशं कृ, चर्चां कृ.—(Have to do with) व्यापृ in pass., व्यापृतः -ता -तं भू.—(Handle) स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).

MEDDLER, *s.* परकार्य्यचर्चकः, पराधिकारचर्चकः, पराधिकारप्रवेशकः, परकार्य्यनिरूपकः, परचेष्टानिरूपकः, परकार्य्यव्यापारी *m.* (न्), पराधिकारव्यापारी *m.*, परव्यापारान्तरगामी *m.*

MEDDLESOME, *a.* पराधिकारचर्चाशीलः -ला -लं, परचेष्टानिरूपणशीलः &c.

MEDDLING, *a.* परकार्य्यचर्चकः -का -कं, परकार्य्यनिरूपकः -का -कं, पराधिकारप्रवेशकः -का -कं, पराधिकारव्यापारी -रिणी -रि (न्).

MEDDLING, *s.* पराधिकारचर्चा, अनधिकारचर्चा, पराधिकारप्रवेशः, परकार्य्यप्रवेशः, परव्यापारचर्चा, पराधिकारव्यापारः, परनियोगव्यापारः, परकार्य्यनिरूपणं, परचेष्टानिरूपणं, चर्चा.

To MEDIATE, *v. n.* मध्यस्थः -स्था -स्थं भू or अस्, मध्यवर्त्ती -र्त्तिनी -र्त्ति भू, माध्यस्थ्यं कृ, मध्ये वृत् (c. 1. वर्त्तते -र्त्तितुं) or स्था (c. 1. तिष्ठति, स्थातुं), मध्ये गम् (c. 1. गच्छति, गन्तुं), अन्तर्गम्.

To MEDIATE, *v. a.* माध्यस्थ्येन सन्धिं कृ or मन्त्र (c. 3. -दधाति -धातुं).

MEDIATE, *a.* मध्यस्थः -स्था -स्थं -स्थायी -यिनी यि (न्), मध्यवर्त्ती -र्त्तिनी &c., मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, अन्तर्गतः -ता -तं, अन्तर्वर्त्ती &c.

MEDIATELY, *adv.* अन्यद्वारेण, अन्यद्वारा, परद्वारेण, माध्यस्थ्येन, माध्यस्थ्येन, उपकरणद्वारेण, अनुरूपेण.

MEDIATION, *s.* माध्यस्थ्यं, माध्यस्थं, मध्यस्थत्वं -ता, मध्यवर्त्तित्वं, मध्यवर्त्तनं, मध्यस्थितिः *f.*, अन्तर्गमनं, अन्तरागमनं, अनुरूपं.

MEDIATOR, *s.* मध्यस्थः, मध्यवर्त्ती *m.* (न्), मध्यस्थायी *m.*, माध्यस्थः, मध्यस्थितः, चरपुरुषः.

MEDIATORIAL, *a.* मध्यस्थसम्बन्धी -न्धिनी -न्धि (न्), मध्यस्थविषयः -या -यं, माध्यस्थिकः -की -कं.

MEDIATORSHIP, *s.* मध्यस्थता -त्वं, माध्यस्थ्यं, मध्यस्थपदं, मध्यस्थाधिकारः, मध्यस्थकर्म्म *n.* (न्).

MEDICABLE, *a.* औषधोपचारसाध्यः -ध्या -ध्यं, वैद्योपचारसाध्यः &c., भेषजप्रयोगसाध्यः &c., औषधोपायसाध्यः &c., उपक्रमसाध्यः &c., वैद्योपक्रमसाध्यः &c., उपक्रमणीयः -या -यं, चिकित्स्यः -त्स्या -त्स्यं.

MEDICAL, *a.* वैद्यः -द्यी -द्यं, वैद्यकः -की -कं, वैद्यक्रियासम्बन्धी -न्धिनी -न्धि (न्), वैद्यकसम्बन्धी &c., वैद्यकविषयः -या -यं, चिकित्सासम्बन्धी &c., औषधीयः -या -यं, औषधोपचारसम्बन्धी &c., भेषजप्रयोगसम्बन्धी &c., आयुर्वेदसम्बन्धी &c., आयुर्वेदी -दिनी &c., आयुर्वेदमयः -यी -यं, वैद्यशास्त्रीयः -या -यं; 'medical science,' वैद्यकशास्त्रं, वैद्यशास्त्रं, आयुर्वेदः -दं; 'medical treatment,' वैद्योपचारः, औषधोपचारः, भेषजोपचारः, औषधप्रयोगः, भेषजप्रयोगः; 'medical man,' वैद्यः, चिकित्सकः, चिकित्साजीवी *m.* आयुर्वेदी.

MEDICALLY, *adv.* वैद्यकशास्त्रानुसारेण, वैद्यकधर्म्मानुसारेण, वैद्यशास्त्रमुद्दिश्य, वैद्योपचारमुद्दिश्य, उपचारोद्देशेन.

MEDICAMENT, *s.* औषधं, भेषजं, भैषज्यं, भेषज्यं, अगदः, औषधीयद्रव्यं, भेषजद्रव्यं, द्रव्यं, आयुर्द्रव्यं, आयुः *m.*, जारी, जाली, जीवनः, तालिका.

MEDICASTER, *s.* मिथ्याचिकित्सकः, दुश्चिकित्सकः, क्षुद्रवैद्यः, अशास्त्रवैद्यः.

To MEDICATE, *v. a.* (Impregnate with medicinal substances) औषधीकृ, औषधादिना मिश्र् (c. 10. मिश्रयति -यितुं) or संसृज् (c. 6. -सृजति -स्रष्टुं) or संस्कृ, औषधसंस्कृतं -तां कृ, औषधगुणकं -कां कृ, औषधगुणविशिष्टं -ष्टां कृ.—(Dose with drugs) औषधं दा, भेषजं दा, भिषज् (nom. भिषज्यति).

MEDICATED, *p. p.* औषधसंस्कृतः -ता -तं, औषधीयद्रव्यसंवृतः -ता -तं, औषधादिमिश्रितः -ता -तं.

MEDICATION, *s.* औषधसंस्कारः, औषधसंस्करणं, औषधीकरणं, औषधीयद्रव्यसंसर्गः, औषधीयद्रव्यमिश्रणं.

MEDICINAL, *a.* (Having healing properties) औषधीयः -या -यं, भैषजः -जी -जं, भेषजीयः -या -यं, औषधोपयोगी -गिनी -गि (न्). रोगान्तकः -का -कं, रोगशमकः -का -कं, रोगहरः -रा -रं, रोगहारी -रिणी &c., रोगघ्नः -घ्नी -घ्नं.—(Pertaining to medicine) औषधसम्बन्धी &c., भेषजसम्बन्धी &c.

MEDICINE, *s.* (Substance having the property of mitigating disease) औषधं, भेषजं, भैषज्यं, भेषज्यं, अगदः, औषधीयद्रव्यं, जायुः *m.*, रोगिवल्लभः; 'administering medicine,' औषधोपचारः, भेषजोपचारः, औषधप्रयोगः, भेषजप्रयोगः; 'mild medicines,' सामोपचारः, साम्योपचारः.—(The practice of medicine) वैद्योपचारः, चिकित्सा, उपचारः, उपचर्य्या, उपचार्य्यः, वैद्यक्रिया, उपक्रमः, वैद्योपक्रमः, रुक्प्रतिक्रिया, परानसा.—(Science of medicine) वैद्यकं, आयुर्वेदः -दं; 'a treatise on medicine,' वैद्यकशास्त्रं, वैद्यशास्त्रं; 'a compounder of medicines,' योगविद् *m.*

MEDIEVAL, *a.* मध्यकालीनः -ना -नं, मध्यकालिकः -का -कं.

MEDIOCRE, MEDIOCRAL, *a.* मध्यमः -मा -मं, मध्यः -ध्या -र्य्यं, मध्यमगुणः -णा -णं, मध्यमभावः -वा -र्यं, साधारणगुणः -णा -णं, अवरगुणः -णा -णं, अप्रधानगुणः -णा -णं, विगुणः -णा -णं, प्राकृतः -ती -तं.

MEDIOCRITY, *s.* मध्यमता, मध्यता, मध्यमभावः, मध्यमावस्था, मध्यमदशा, साधारण्यं, साधारणभावः, साधारणदशा, सामान्यता, मध्यममानं, मध्यमपक्षः. —(Moderation) परिमितता.

To MEDITATE, *v. n.* ध्यै (c. 1, ध्यायति, ध्यातुं), अनुध्यै, अभिध्यै, सन्ध्यै, प्रध्यै, चिन्त् (c. 10. चिन्तयति -यितुं), सञ्चिन्त्, विचिन्त्, भू (c. 10. भावयति -यितुं), मन्भ्, विमृश् (c. 6. -मृशति -शृष्टुं), मनसा विचर् (c. 10. -चारयति -यितुं), समाधा (c. 3. -धत्ते -धातुं), वितर्क् (c. 10. -तर्कयति -यितुं), ध्यानं कृ, अभिध्यानं कृ, अनध्यानं कृ, चिन्तां कृ, चिन्तापरः -रा -रं भू, ध्यानपरः -रा -रं भू, विचारणां कृ, विवेचनं कृ.—(Intend) मनः कृ, बुद्धिं कृ, मतिं कृ. *See To* INTEND.

To MEDITATE, *v. a.* प्रचिन्त् (c. 10. -चिन्तयति -यितुं), परिचिन्त्, चिन्त्, मन्त्र् (c. 10. मन्त्रयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं), कॢप्, मनसा परिकॢप् or कल्पनां कृ; 'to meditate a plan,' उपायचिन्तां कृ, उपायकल्पनां कृ; 'to meditate doing,' कृ in des. (चिकीर्षति -र्षितुं). *See To* INTEND.

MEDITATED, *p. p.* ध्यातः -ता -तं, चिन्तितः -ता -तं, प्रचिन्तितः -ता -तं, भावितः -ता -तं, मनोगुप्तः -प्ता -प्तं, कल्पितः -ता -तं, परिकल्पितः -ता -तं, घटितः -ता -तं; 'being meditated upon,' ध्यायमानः -ना -नं; अभिध्यायमानः -ना -नं; 'to be meditated upon,' ध्येयः -या -यं, ध्यानीयः -या -यं, ध्यातव्यः -व्या -व्यं.

MEDITATION, *s.* ध्यानं, अभिध्यानं, साध्यानं, अनध्यानं, समाधिः *m.*, समाधानं, चिन्ता, चिन्तनं, भावना, सम्भावनं -ना, ध्यानपरता, विचारणा -णा, विमर्शः, मनोगुप्तिः, आत्मैकाग्र्यता, ध्यामं *n.* (न्); 'religious and abstract meditation,' योगः, ध्यानयोगः, अनध्यानं, समाधिः *m.*, समाधियोगः, समाधानं; 'considered as one of the five sacraments,' जपयुतः; 'absorbed in meditation,' ध्याननिष्ठः -ष्ठा -ष्ठं, ध्यानस्थः -स्था -स्थं, ध्यानपरः -रा -रं, समाधिस्थः -स्था -स्थं, समाधिनिष्ठः &c., अधिरूढसमाधियोगः -गा -गं; 'posture suited to religious meditation,' ब्रह्मासनं.

MEDITATIVE, *a.* ध्यानशीलः -ला -लं, चिन्ताशीलः -ला -लं, ध्यानपरः -रा -रं, ध्यानतत्परः -रा -रं, चिन्तापरः -रा -रं, चिन्तापरायणः -णा -णं, चिन्तावान् -वती -वत् (न्), समाधिमान् -मती &c., ध्यानी -निनी -नि (न्), भावितात्मा -त्मा -त्म (न्), सञ्चिन्तः -न्ता -न्तं, ध्यायन् -यन्ती -यत् (न्), ध्यानयुक्तः -क्ता -क्तं.

MEDITERRANEAN, MEDITERRANEOUS, *a.* (Inclosed with land) भूवेष्टितः -ता -तं, भूमिवेष्टितः -ता -तं, भूमध्यस्थः -स्था -स्थं, भूवलयितः -ता -तं, भूवलयाङ्कितः -ता -तं.—(Remote from the sea, inland) समुद्रदूरस्थः -स्था -स्थं, मध्यदेशीयः -या -यं, मध्यदेशस्थः -स्था -स्थं, समुद्रासन्नीपः -पा -पं.

MEDIUM, *s.* (Means, instrument) साधनं, द्वारं, द्वार् *f.*, अङ्गं, हेतुः *m.*, कारणं, करणं, निमित्तं -त्तकं, निमित्तकारणं, योगः, कर्म्मसाधनं.—(Channel, vehicle) मार्गः, पथः, वाहनं, द्वारं, अङ्गं; 'through the medium of the ear,' श्रवणमार्गेण, श्रुतिमार्गेण, श्रवणद्वारेण, श्रवणद्वारा; 'the medium by which medicine is administered,' भेषजाङ्गं; 'air is the medium of sound,' वायुः शब्दवाहनं or शब्दवाहकः.—(Instrumentality) कारणत्वं -ता, कारकत्वं, हेतुता, निमित्तत्वं, साधकत्वं, कर्त्तृत्वं, करणत्वं.—(Middle place, mean) मध्यता -त्वं, समता, साम्यं, मध्यमपक्षः, सामान्यपक्षः.

MEDLEY, *s.* सङ्करः, नानाद्रव्यसाङ्कर्य्यं, सन्निपातः, द्रव्यसङ्कुलं, नानाद्रव्यसन्निपातः, सङ्कीर्णद्रव्यसमूहः, प्रकीर्णद्रव्यसमूहः, प्रकीर्णकं, सङ्कीर्णकं, सम्भिन्नद्रव्यसन्निपातः, नानासम्भिन्नद्रव्यसमूहः, नानाद्रव्यसम्भिन्नं.

MEDLEY, *a.* सान्निपातिकः -की -कं, सन्निपतितः -ता -तं, सङ्कीर्णः -र्णा -र्णं, प्रकीर्णः -र्णा -र्णं, सम्भिन्नः -न्ना -न्नं, अस्तव्यस्तः -स्ता -स्तं, छिन्नविच्छिन्नः -न्ना -न्नं, सङ्करीकृतः -ता -तं, नानाजातीयः -या -यं, सङ्करजातीयः -या -यं.

MEDULLAR, MEDULLARY, *a.* मज्जामसन्धी -न्धिनी -न्धि (न्), मेदोसन्धी &c., मज्जामयः -यी -यं, अस्थिसारसन्धी &c., मेदस्वी &c.

MEED, *s.* (Recompense) फलं, प्रतिफलं, प्रतिकृतिः *f.*, प्रतिक्रिया, पारितोषिकं.

MEEK, *a.* विनीतः -ता -तं, विनयी -यिनी -यि (न्), सौम्यः -म्या -म्यं, सौम्यवृत्तिः -त्तिः -त्ति, नम्रबुद्धिः -द्धिः -द्धि, नम्रवृत्तिः -त्तिः -त्ति, नम्रशीलः -ला -लं, नम्रचेताः -ताः -तः (स्), निर्विण्णः -ण्णा -ण्णं, निर्विण्णचेताः &c., मृदुस्वभावः -वा -र्यं, सविनयः -या -यं, सहनशीलः -ला -लं, विनतः -ता -तं, गर्व्वहीनः -ना -नं, दर्पहीनः -ना -नं, अगर्व्वः -र्व्वा -र्व्वं, निरहङ्कारः -रा -रं, दीनचेताः &c., अनुद्धतः -ता -तं, अनभिमानी -निनी &c., अनहङ्कारी &c., वश्यात्मा -त्मा -त्म (न्), वश्यः -श्या -श्यं, सुवश्यः &c.

MEEK-EYED, *a.* मृदुनेत्रः -त्रा -त्रं, मृदुलोचनः -ना -नं, सौम्यनेत्रः &c.

MEEKLY, *adv.* सविनयं, विनीतवत्, विनयात्, नम्रचेतसा, निर्विण्णचेतसा, नम्रं, विनम्रं, मृदुस्वभावेन, अगर्व्वेण, अनभिमानेन, अनहङ्कारेण, सनिर्वेदं, अनुद्धतं, सदैन्यं.

MEEKNESS, *s.* विनयः, विनीतता, विनीतिः *f.*, सौम्यता, नम्रता, निर्विण्णता, स्वभावमृदुता, बुद्धिनम्रता, नम्रशीलता, वश्यता, सुवश्यता, दीनता, दैन्यं, अगर्व्वः, गर्व्वहीनता, दर्पहीनता, अनभिमानं -नता, अनौद्धत्यं, माधुर्य्यं, शान्तिः *f.*, विनतिः, सहनशीलता.

MEET, *a.* (Proper, fit) युक्तः -क्ता -क्तं, उचितः -ता -तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, समञ्जसः -सा -सं, उपपन्नः -न्ना -न्नं, सङ्गतः -ता -तं.

To MEET, *v. a.* and *n.* (Come together, encounter) समागम् (c. 1. -गच्छति -गन्तुं), सङ्गम्, उपागम्, मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, समे (c. 2. समैति -नुं, rt. इ), आसद् (c. 10. -सादयति -यितुं), समासद्, प्रतिमुखं or अभिमुखं गम् or या (c. 2. याति -तुं), अभिया, उपाया, सम्मुखीभू.—(Go to meet) प्रतिगम्, प्रत्युद्गम्, अभिगम्, प्रत्युद्या, अभिया, प्रत्याया, प्रतिव्रज् (c. 1. व्रजति -जितुं), प्रतिवृत् (c. 1. -वर्त्तते -र्त्तितुं), अभिवृत्, प्रत्युद्गमं कृ; 'gone to meet,' प्रत्युद्गतः -ता -तं.—(Rise to meet) प्रत्युत्था (c. 1. -तिष्ठति -ष्ठितुं, rt. स्था); 'risen to meet,' प्रत्युत्थितः -ता -तं; 'rising to meet,' प्रत्युत्थानं.—(Assemble) समागम्, सङ्गम्, मिल्, सम्मिल्, एकत्र मिल्, एकत्र गम् or आगम्, समे समभ्ये, समावृत्, समूहीभू.—(Encounter in a hostile manner) संयुध् (c. 4. -युध्यते -योद्धुं), युद्धं कृ, युद्धाय समुपागम्, समाधानं कृ, युद्धारम्भं कृ, रणाभियोगं.—(Meet with, find) आसद्, अधिगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, समाप्, अवाप्, आप्, लभ् (c. 1. लभते

लभ्यं), विद् (c. 6. विन्दति, वेदितुं), अभिविद्; 'hard to meet with,' दुरासदः -दा -दं, दुरधिगमः -मा -मं, दुरधिगम्यः -म्या -म्यं, दुष्प्रापः -पा -पं, दुष्प्राप्यः -प्या -प्यं, दुर्लभः -भा -भं.—(In age) उपगम्, उपागम्, गम्, आप्, प्राप्, इ, अनुभू; 'they met with their death,' विनाशम् उपगताः.—(Meet as waters) सङ्गम्, सम्भु (c. 1. -भवते -भोतुं), सम्भेदं कृ.

MEETING, *s.* (Coming together) सङ्गमः, समागमः, सङ्गः, सङ्गतिः *f.*, सङ्गतं, मिलनं, मेलनं, सम्मिलनं, सम्मेलनं, मेलकः, संयोगः, योगः, एकत्र मिलनं, एकत्र गमनं.—(Assembly, convention) सभा, समाजः, मेला, मेलः, मेलकः, संसद् *f.*, सदस् *n.*, परिषद्, समज्या, मनुष्यसभा, गोष्ठी, समितिः *f.*, आस्थानं -नी, लोकसंघः, जनसमागमः, जनमेला, मण्डली, जनसमवायः, जनसमुदायः, जनसमूहः; 'dismissal of a meeting,' सभाविसर्जनं; 'person present at a meeting,' सभासद् *m.*, सभास्तारः, सभ्यः, सदस्यः.—(Confluence) सम्भेदः, सङ्गमः, सङ्गः.

MEETING-HOUSE, *s.* मनुष्यसभा, सभा, सभागृहं, सभास्थानं, सभामन्दिरं, समागमगृहं, समागमस्थानं.

MEETLY, *adv.* यथायोग्यं, यथोचितं, युक्तं, उपयुक्तं, उचितं, यथार्हं.

MEETNESS, *s.* योग्यता, युक्तता, उपयुक्तता, उचितत्वं, औचित्यं.

MEGALOSAURUS, *s.* महाभकरः, बृहन्भकरः.

MEGRIM, *s.* शिरोवेदना, शिरःपीडा, अर्द्धशिरःपीडा, अर्द्धमस्तकशूलः.

MEIOSIS, *s.* (Figure of rhetoric) न्यूनालङ्कारः, न्यूनीकरणालङ्कारः.

MELANAGOGUE, *s.* कृष्णापित्तघ्नं, कृष्णापित्तनाशकम् औषधं.

MELANCHOLIC, *s.* सदाविषादी *m.* (न्), नित्यविषादी *m.*, कुपितवायुग्रस्तः.

MELANCHOLILY, *adv.* सविषादं, अवसादेन, सोद्वेगं, सावसादं, उद्विग्नवत्.

MELANCHOLY, *a.* (Depressed in spirits) विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, विषादी -दिनी -दि (न्), उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), विमनाः &c., दुर्मनाः &c., अन्यमनाः &c., उन्मनाः &c., ग्लानमनाः &c., दीनमनाः &c., दीनमनस्कः -स्का -स्कं, विमनस्कः &c., दीनचेतनः -ना -नं, ग्लानः -ना -नं, ग्लानः -न्ना -न्नं, ग्लानः -ना -नं, खिन्नः -न्ना -न्नं, खेदयुक्तः -क्ता -क्तं, खेदी -दिनी &c., उदासीनः -ना -नं, चिन्तापरः -रा -रं, चिन्ताकुलः -ला -लं.—(Habitually depressed) सदाविषादी -दिनी &c., नित्यविषादी &c., सदाखेदी &c., नित्यविषण्णः &c., नित्यावसन्नः &c., सदावसन्नः &c., विषण्णवृत्तिः -त्तिः -त्ति, खेदवृत्तिः &c.—(Mournful, expressing or causing sorrow) विषादसूचकः -का -कं, खेदसूचकः -का -कं, विषादात्मकः -का -कं, खेदात्मकः -का -कं, शोकसूचकः -का -कं, शोकजनकः -का -कं, खेदजनकः -का -कं, दुःखकरः -रा -रं; 'to be melancholy,' विषद् (c. 1. -षीदति -षत्तुं), अवसद्, विषण्णीभू, खिद् in pass. (खिद्यते), ग्लै (c. 1. ग्लायति, ग्लातुं), उद्विग्नीभू, दुर्मनस् (nom. दुर्मनायते), उन्मनस्.

MELANCHOLY, *s.* विषादः, विषण्णता, अवसादः, अवसन्नता, खेदः, खिन्नता, उद्वेगः, उद्विग्नता, ग्लानिः *f.*, ग्लानिः *f.*, ग्लान्तिः *f.*, निर्विण्णता, निर्वेदः, दीनता, दैन्यं, उदासीनता, औदासीन्यं, उत्कण्ठा, चिन्तोद्विग्नता, चिन्ता, विषादवृत्तिः *f.*, विषण्णवृत्तित्वं, विमनस्कता, वैमनस्यं.

MELÉE, *s.* (Confused fight) रणसङ्कुलं, युद्धसङ्कुलं, सङ्कुलयुद्धं.

MELILOT, *s.* त्रिपर्णभेदः, त्रिपत्रन्विशिष्ट ओषधिप्रभेदः.

To MELIORATE, *v. a.* भद्रतरं -रां कृ, भद्रतरीकृ. *See To* IMPROVE.

Mythology, *s.* पुरावृत्तशास्त्रं, पुराणशास्त्रं, पुराणेतिहासः, इतिहासः, पुराणकथाविद्या, देवतादिकथाविषया विद्या, देवतोपाख्यानविषया विद्या, दैवताख्यानं.

N.

To nab, *v. a.* अकस्माद् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं).

Nacre, nacker, naker, *s.* शुक्तिपुटं, मुक्ताम्फोटः.

Nadir, *s.* अधःस्वस्तिकं, अधोबिन्दुः *m.*, अधरः, ब्रह्माण्डाधोभागः.

Nag, *s.* अश्वकः, अश्वः, घोटकः. *See* Horse. (Paramour) जारः.

Nága, *s.* (A demigod, having a human face with a serpent's shape. These fabulous beings are said to have sprung from Kadrú, the wife of Kaśyapa, and to have been created in order to people Pátála, or the infernal regions.) नागः, कादृवेयः, कद्रुपुत्रः, कद्रुसुतः. The chief of these beings is called शेषः, अनन्तः, यामुकिः *m.*, सर्पराजः. The following are some of the other principal Nágas: तक्षकः, पद्मः, महापद्मः, शङ्खः.

Naiad, *s.* जलदेवता, अप्सराः *f.* (स), अप्सरा, नदीदेवता, उदकयती.

Nail, *s.* (Of the finger) नखः, नखरः -रा -रं, करुहः, करजः, पाणिजः, पाणिरुहः, पाणिरुट् *m.* (ह्), करकाण्डकः, अङ्गुलीसम्भूतः, पुनर्भवः, पुनर्नवः, भुजाकाण्डः, कामाङ्कुशः; 'a pared nail,' खण्डकः.

—(Of iron, &c.) लोहकीलः -लकः, लौहकीलः -लकः, लोहशङ्कुः *m.*, कीलः -लकः, शङ्कुः *m.*

To nail, *v. a.* (Fasten with nails) कीलँ (c. 10. कीलयति -यितुं), कीलैर् बन्ध् (c. 9. बध्नाति, बन्द्धुं) or व्यध् (c. 4. विध्यति, व्यद्धुं), कीलबद्धं -द्धां कृ, कीलविद्धं -द्धां कृ, शङ्कुबद्धं -द्धां कृ.

Nailed, *p. p.* कीलितः -ता -तं, कीलबद्धः -द्धा -द्धं, शङ्कुप्रतिबद्धः &c.

Naive, *a.* सरलमतिः -तिः -ति, विमलार्थकः -का -कं, निर्व्याजः -जा -जं, दक्षिणः -णा -णं, मायाहीनः -ना -नं, वैलक्ष्यहीनः &c., निर्व्यलीकः -का -कं.

Naively, *adv.* सारल्येन, निर्व्याजं, अमायया, दाक्षिण्येन, अविलक्षितं.

Naivete, *s.* सारल्यं, सरलता, मायाहीनता, अमाया, अव्याजः, अवैलक्ष्यं, दाक्षिण्यं, निर्व्यलीकता, शुद्धमतित्वं, भावशुद्धता.

Naked, *a.* (Having no clothes) नग्नः -ग्ना -ग्नं, नग्नकः -का -कं, विवस्त्रः -स्त्रा -स्त्रं, निर्वस्त्रः &c., अवस्त्रः &c., वस्त्रहीनः -ना -नं, वस्त्ररहितः -ता -तं, वस्त्रशून्यः -न्या -न्यं, अवासाः -सा: -सः (स्), विवासाः &c., विवासः -सा -सं, दिग्वासाः &c., दिगम्बरः -रा -रं, व्यंशुकः -का -कं, विकोशः -शा -शं, विवसनः -ना -नं, वसनहीनः -ना -नं, आच्छादनहीनः -ना -नं, अपरिच्छन्नः -न्ना -न्नं, अपरिच्छदः -दा -दं, परिच्छदहीनः -ना -नं, वेशहीनः -ना -नं, अवधूतवेशः -शा -शं, गगणपरिधानः -ना -नं, अपरिधानः &c., कौशः -शा -शं, काकरूकः -का -कं.—(Open, uncovered, exposed) विवृतः -ता -तं, अनावृतः -ता -तं, अपवृतः -ता -तं, अनाच्छादितः -ता -तं.—(Unarmed) असज्जः -ज्जा -ज्जं, असज्जितः -ता -तं, असन्नद्धः -द्धा -द्धं.—(Unadorned) अभूषितः -ता -तं.—(Bare, mere) केवलः -ला -लं, मात्रकः -का -कं, मात्रं, शून्यः -न्या -न्यं, शुद्धः -द्धा -द्धं; 'it is not seen by the naked eye,' नेत्रमात्रेण or केवलनेत्रेण न दृश्यते; 'a naked woman,' नग्ना, नग्निका, कोटरी, क्रोटवी.

Nakedly, *adv.* (Without covering) वस्त्रेण विना, आच्छादनं विना, अपरिच्छन्नं, नग्नवत्.—(Barely) केवलं, मात्रेण, शून्यं.

Nakedness, *s.* नग्नता -त्वं, विवस्त्रत्वं, वस्त्रहीनता, वस्त्रशून्यता, वस्त्ररहित्यं, वसनहीनता, वेशहीनता, आच्छादनहीनता, अपरिच्छदं, नग्नभावः, नग्नावस्था.—(Bareness, openness) शून्यता, शुद्धता, विवृतत्वं, अनावृतत्वं.

Name, *s.* नाम *n.* (न्). नामधेयं -यः, संज्ञा, अभिधानं, अभिधा, अभिधेयं, आख्या, अभिख्या, आह्वा, आह्वयः, आह्वानं, आह्वायः, उपाधिः *m.*, अभिवचनं, लक्षणं, व्यपदेशः; 'bad name,' दुर्नाम *n.* (न्); 'family name,' कुलनाम *n.*, उपनाम, पद्धतिः -ती *f.*; 'name given at birth,' जन्मनाम *n.*; 'from the constellation,' नक्षत्रनाम *n.*; 'addressing by name,' नामग्रहः -हणं, सम्बोधनं; 'to address by name,' नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), नाम्ना अभिवद् (c. 1. -वदति -दितुं) or अभिवच् (c. 2. -वष्टि -क्तुं), सम्बोधनं कृ; 'giving a name,' नामकरणं; 'bearing the name of,' नामधारी -रिणी &c.; 'calling to mind the name of,' नामस्मरणं; 'forgetting the name,' नामविस्मृतिः *f.*; 'uttering the name of,' नामोच्चारणं; 'abusing by name,' नामापराधः; 'list of names,' नामावलिः *f.*; 'by name,' नाम्ना, नामतस्, नाम, नामधेयतस्; 'in my name,' मद्वचनात्, मम नाम्ना; 'what is his name?' किंनामधेयः सः; 'affix to the name of Brahmans,' शर्म्मा *m.* (न्), as विष्णुशर्म्मा.—(Reputation) प्रतिष्ठा, मर्य्यादा, कीर्त्तिः *f.*, ख्यातिः *f.*; 'one who has established a name,' लब्धप्रतिष्ठः -ष्ठा -ष्ठं; 'good name,' सुकीर्त्तिः *f.*, सत्कीर्त्तिः *f.*, सुख्यातिः *f.*; 'bad name,' कुकीर्त्तिः *f.*, दुष्कीर्त्तिः *f.*, अपकीर्त्तिः *f.*, अकीर्त्तिः, कुख्यातिः *f.*, अख्यातिः *f.*

अमर्य्यादा, कुप्रतिष्ठा.—(Celebrity, renown) यशस् *n.*, विश्रुतिः *f.*, ख्यातिः *f.*, विख्यातिः *f.*, प्रख्यातिः *f.*, परिख्यातिः, कीर्त्तिः *f.*, प्रसिद्धिः *f.*

To NAME, *v. a.* अभिधा (c. 3. -दधाति -धातुं), आख्या (c. 2. -ख्याति -तुं), कृत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्, संकृत्, परिकृत्, अनुकृत्, उदाहृ (c. 1. -हरति -हर्त्तुं), प्रचक्ष् (c. 2. -चष्टे), नाम कृ or दा, संज्ञां कृ; 'they named him Ráma,' तस्य नाम राम इति चक्रुः.—(Mention by name) नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), नामग्रहणं कृ, नाम्ना अभिवद् (c. 1. -वदति -दितुं), नामोदाहरणं कृ, सम्बुध् (c. 10. -बोधयति -यितुं), सम्बोधनं कृ, नामनिर्देशं कृ, नामोच्चारणं कृ, नामस्मरणं कृ.

NAMED, *p. p.* अभिहितः -ता -तं, आख्यातः -ता -तं, प्रोक्तः -क्ता -क्तं, संज्ञितः -ता -तं, उदाहृतः -ता -तं, प्रत्युदाहृतः -ता -तं, कीर्त्तितः -ता -तं, परिकीर्त्तितः -ता -तं, व्यपदिष्टः -ष्टा -ष्टं, स्मृतः -ता -तं, नामाभिहितः -ता -तं; the following may be used in composition: नामकः -का -कं, नामा -म्नी -म, अभिधानः -ना -नं, अभिधः -धा -धं, आख्यः -ख्या -ख्यं, आह्वः -ह्वा -ह्वं, आह्वयः -या -यं, नामधेयः -या -यं, संज्ञः -ज्ञा -ज्ञं; as, 'a king named Suvarna,' सुवर्णाख्यो राजा; 'in a city named Kánchanapur,' काञ्चनपुरनाम्नि नगरे; 'a prince named Súdraka,' शूद्रकनामा नृपतिः; 'named Vibhíshana,' विभीषणाभिधः or विभीषणाभिधानः; 'a woman named Chandrá,' चन्द्रानाम्नी स्त्री. Sometimes the adverb नाम is used as सुवर्णो नाम राजा, चन्द्रा नाम स्त्री.—(Having a name) संज्ञावान् -वती -वत् (त्), प्राप्तनामा -मा -म (न्), लब्धनामा &c., प्राप्ताभिधानः -ना -नं, नामधारी -रिणी -रि (न्), नामधारकः -का -कं; 'is named,' अभिधीयते, ख्यायते, आख्यायते.

NAMELESS, *a.* अनामकः -का -कं, नामहीनः -ना -नं, नामरहितः -ता -तं, अनभिधानः -ना -नं, अनामा -मा -म्नी -म (न्), अप्रसिद्धः -द्धा -द्धं.

NAMELY, *adv.* नाम, नामतस्, यथा, अथैतस्, अथात्, यथाक्रमं.

NAMESAKE, *s.* समनामकः, समनामधारी *m.* (न्), एकनामकः.

NAMING, *s.* (Giving a name) नामकरणं, नामस्थापनं.—(Mentioning by name) नामग्रहः -हणं, नामनिर्देशः, नामोच्चारणं.

NAP, *s.* (Short sleep) अल्पनिद्रा, अदीर्घनिद्रा, अदीर्घस्वप्नः, वामकुक्षिः *f.*—(Down) लोम *n.* (न्), रोम *n.* (न्).

To NAP, *v. n.* अल्पनिद्रां कृ, अदीर्घनिद्रां कृ, अल्पकालमात्रं स्वप् (c. 2. स्वपिति -तुं), अदीर्घकालं स्वप्.

NAPE, *s.* (Of the neck) मन्या, मन्याका, कन्धरः -रा, ग्रीवा, घाटः -टी -टिका, कृकाटिका, कलञ्जिका, सीमा *m.* (न्), पश्चाद्ग्रीवा शिरा.

NAPKIN, *s.* मुखमार्जनी, वदनमार्जनी, परर्क, नक्रूकः.

NAPLESS, *a.* लोमहीनः -ना -नं, निर्लोमा -मा -म (न्), अविद्यमानलोमा &c.

NAPPY, *a.* लोमशः -शा -शं, बहुलोमा -मा -म (न्), लोममयः -यी -यं.—(Frothy) फेनलः -ला -लं, फेनिलः -ला -लं.

NARBADÁ, *s.* (River, which rises in the Vindhyá mountain called Amrakúta, and runs westward about 750 miles into the gulf of Cambay below Baroche) नर्म्मदा, रेवा, सोमसुता, सोमोद्भवा, मेकलकन्यका, मेकलकन्यका, मेकलाद्रिजा, मेकला, पूर्व्वगङ्गा.

NARCOTIC, *a.* स्वप्नकारी -रिणी -रि (न्), स्वप्नकृत् *m. f. n.*, निद्राकारी &c., निद्राकृत् *m. f. n.*, निद्राजनकः -का -कं, उपशायी -यिनी &c., उपशमनकारी &c.

NARCOTIC, *s.* निद्राजनकम् औषधं, उपशमनं, ग्राही *m.* (न्), उपविषं.

NARD, *s.* जटिला, जटावती, जटामांसी, जटाला. *See* SPIKENARD.

To NARRATE, *v. a.* कथ् (c. 10. कथयति -यितुं), सङ्कथ्, आख्या (c. 2. -ख्याति -तुं), समाख्या, ख्या in caus. (ख्यापयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), आविद्, वर्ण् (c. 10. वर्णयति -यितुं), उपवर्ण्, अनुवर्ण्, संवर्ण्, शंस् (c. 1. शंसति -सितुं), श्रु (c. 10. श्रावयति -यितुं), आश्रु, संश्रु, निगद् (c. 1. -गदति -दितुं), अभिधा (c. 3. -दधाति -धातुं), धिवृ (c. 5. -वृणोति -वरितुं -रीतुं), कृत् (c. 10. कीर्त्तयति -यितुं), अनुकृत्, व्याहृ (c. 1. -हरति -हर्त्तुं), उदाहृ, आचक्ष् (c. 2. -चष्टे), समाचक्ष्, विचक्ष्, परिचक्ष्, प्रचक्ष्, निरूप् (c. 10. -रूपयति -यितुं), वद् (c. 1. वदति -दितुं), विवरणं कृ, कथां कृ.

NARRATED, *p. p.* कथितः -ता -तं, आख्यातः -ता -तं, समाख्यातः -ता -तं.

NARRATION, *s.* (Act of telling) कथनं, आख्यानं, उपकथनं, उपाख्यानं, ख्यापनं, वर्णनं -ना, शंसनं, प्रशंसनं, विवरणं, अनुकीर्त्तनं, व्याहरणं, निरूपणं; 'of a story,' कथोपकथनं, कथोपाख्यानं.—(A story) कथा. *See* the next.

NARRATIVE, *s.* कथा, उपाख्यानं, उपकथा, परिकथा, आख्यानं, आख्यायिका, कथानुबन्धः, कथाप्रबन्धः, प्रबन्धः, वृत्तान्तः, वार्त्ता, चरित्रं, गोष्ठी, इतिहासः.

NARRATIVE, *a.* कथिकः -की -कं, विवरणकारी -रिणी &c., कथनः -ना -नं.

NARRATOR, *s.* कथकः, कथिकः, उपकथकः, आख्यायकः, कथनकृत् *m.*

NARROW, *a.* (Not broad, contracted, confined) अविस्तीर्णः -र्णा -र्णं, अपरिसृतः -ता -तं, सङ्कटः -टा -टं, सङ्घाथ in comp., निरन्तरालः -ला -लं, सङ्कुचितः -ता -तं, सङ्कोचितः -ता -तं, संवृतः -ता -तं, निरुद्धः -द्धा -द्धं, संरुद्धः &c., संहतः -ता -तं, संहृतः -ता -तं. अविपुलः -ला -लं, तनुः -नुः -न्वी -नु, अपृथुः &c.—(Confined in space) अल्पावकाशः -शा -शं, अल्पपरिमाणः -णा -णं, अविततः -ता -तं, अनायतः &c., निरायतः &c.—(Limited) मितः -ता -तं, परिमितः -ता -तं, नियतः -ता -तं, संयतः -ता -तं.—(Of narrow views) अल्पदृष्टिः -ष्टिः -ष्टि, कृपणबुद्धिः &c. *See* NARROW-MINDED. (Stingy) कृपणः -णा -णं, अव्ययशीलः -ला -लं, अनुदारः -रा -रं, स्वल्पव्ययी -यिनी &c.—(Close, accurate) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः &c.—(Small) अल्पः -ल्पा -ल्पं, स्वल्पः &c.

To NARROW, *v. a.* सङ्कुच् (c. 1. -कोचति -चितुं), सङ्घाट् (c. 1. -याटते -टितुं), संवृ (c. 5. -वृणोति -वरितुं -रीतुं), कुञ्च् (c. 1. कुञ्चति -ञ्चितुं, c. 10. कुञ्चयति -यितुं), संहृ (c. 1. -हरति -हर्त्तुं), सङ्कटीकृ.—(Limit) परिमा (c. 2. -माति -तुं), संयम् (c. 1. -यच्छति -यन्तुं).

To NARROW, *v. n.* सङ्कुच् in pass. (-कुच्यते), सङ्कुचितः -ता -तं भू, सङ्कोचम् इ (c. 2. एति -तुं), सङ्कटीभू, सङ्घाधीभू.

NARROWED, *p. p.* सङ्कुचितः -ता -तं, सङ्कोचितः -ता -तं, संवृतः -ता -तं, आकुञ्चितः -ता -तं, संहतः -ता -तं, संहृतः &c., संरुद्धः -द्धा -द्धं.

NARROWLY, *adv.* (With little breadth) अविस्तीर्णं, अविस्तृतं, सङ्कटं, सङ्घाधं.—(Closely) सूक्ष्मं, अतिसूक्ष्मं, अभिनिवेशेन, स्वहितं.—(Nearly, all but) ईषदूनं, अल्पोनं, कृच्छ्रेण, कष्टेन.

NARROW-MINDED, *a.* कृपणबुद्धिः -द्धिः -द्धि, कृपणधीः -धीः -धि, कृपणचेताः -ताः -तः (स्), मितमतिः -तिः -ति, नितबुद्धिः &c., अनुदारशीलः -ला -लं.

NARROWNESS, *s.* सङ्घाधता, सङ्कटत्वं, अविस्तीर्णता, अविपुलता, अविस्तृतिः *f.*, सान्द्रत्वं, अल्पविस्तारः, अल्पविस्तृतिः *f.*, सङ्कुचितत्वं, सङ्कोचः, अपृथुता, तनुता -त्वं, तानवं.—(Of extent) अल्पपरिमाणं, मितता, परिमितता, अल्पावकाशः, अविततिः *f.*—(Poverty) कार्पण्यं, दीनता. (Illiberality) कृपणता, दैन्यं, अनुदारता.—(Of mind) बुद्धिकार्पण्यं, कृपणबुद्धित्वं, बुद्धिदीनता.—(Closeness) सूक्ष्मता, अतिसूक्ष्मता.

NASAL *a.* नस्यः -स्या -स्यं, नास्यः -स्या -स्यं, नासिकासम्बन्धी -न्धिनी &c., नासिक्यः -क्या -क्यं.—(In grammar) अनुनासिकः -का -कं.

सानुनासिकः -का -कं, सानुस्वारः -रा -रं; 'the nasal dot,' अनुस्वारः, अनुनासिकबिन्दुः.

NASAL, *a.* (Letter) अनुनासिकं, सानुनासिकं, अनुनासिकवर्णः.

NASTILY, *adv.* कुत्सितं, अशुद्धं, मलिनं, समलं, समालिन्यं, गर्हितं.

NASTINESS, *s.* मालिन्यं, मलिनता, समलता, मलं, अमेध्यता, कुत्सितत्वं, कौत्सित्यं, अशुद्धता, अपवित्रता, गर्ह्यता, गर्हितत्वं, बीभत्सजनकता.

NASTY, *a.* मलिनः -ना -नं, समलः -ला -लं, मलवान् -वती -वत् (न्), अशुद्धः -द्धा -द्धं, अमेध्यः -ध्या -ध्यं, कुत्सितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, बीभत्सजनकः -का -कं, अपवित्रः -त्रा -त्रं; 'nasty conversation,' कुत्सितवाक्यं.

NATAL, *a.* जन्मसम्बन्धी -न्धिनी &c., जन्मविषयः -या -यं, जन्म in comp.; as, 'natal day,' जन्मदिवसः; 'natal country,' जन्मभूमिः *f.*

NATATION, *s.* (Swimming) तरणं, सन्तरणं, प्लवः -वनं.

NATION, *s.* जातिः *f.*, लोकः, जनपदः, प्रजा, वर्गः, जनता, देशः, विषयः, राष्ट्रं, देशजनः, देशलोकः, देशवासिनः *m. pl.*, राष्ट्रनिवासिनः, विशेषदेशजनता.

NATIONAL, *a.* (Pertaining to a nation) दैशिकः -की -कं, देशीयः -या -यं, देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), जातीयः &c., राष्ट्रीयः &c., राष्ट्रिकः -की -कं, राष्ट्र्यः -या -यं, देश in comp.; 'national custom,' देशव्यवहारः, देशाचारः; 'national law,' देशधर्मः, जनपदधर्मः; 'national calamity,' राष्ट्रं, उत्पातः.—(Proud of one's own country) स्वदेशाभिमानी -निनी -नि (न्), स्वलोकाभिमानी &c., स्वराष्ट्राभिमानी &c. 'national pride,' देशाभिमानं.—(General) सामान्यः -न्या -न्यं, सर्वसामान्यः &c., साधारणः -णी -णं, सर्वजनीयः -या -यं.

NATIONALITY, *s.* स्वदेशाभिमानिता, स्वलोकाभिमानं, स्वराष्ट्राभिमानं.

NATIONALLY, *adv.* जातितस्, लोकतस्, देशधर्मानुसारेण, सामान्यतस्.

NATIVE, *a.* (Produced by nature, not artificial) सहजः -जा -जं, स्वाभाविकः -की -कं, स्वभावसिद्धः -द्धा -द्धं, स्वभावजः -जा -जं, प्रकृतिस्थः -स्था -स्थं, प्राकृतः -ती -तं, स्वयङ्कृतः -ता -तं, अकृत्रिमः -मा -मं, सांसिद्धिकः -की -कं; 'native salt,' स्वयङ्कृतम् अपरलवणं. *See* NATURAL. (Indigenous, not foreign) देशजः -जा -जं, देशोद्भवः -वा -वं, देशोत्पन्नः -न्ना -न्नं, स्वदेशजः &c., देश्यः -श्या -श्यं, दैशिकः -की -कं.—(Conferred by birth) जन्मप्राप्तः -प्ता -प्तं, जन्मसिद्धः -द्धा -द्धं, जन्मार्जितः -ता -तं.—(Natal) जन्म in comp., स्व in comp.; 'native country,' जन्मभूमिः *f.*, जन्मदेशः, जन्मवसुधा, स्वभूमिः *f.*, स्वराष्ट्रं, स्वविषयः, स्वदेशः, मूलायतनं, अभिजनः; 'native place,' जन्मस्थानं.

NATIVE, *s.* देशजः, देशोद्भवः, देशजातः, देशीयलोकः, देशीयजनः, देशलोकः, देशजनः, देशवासी *m.* (न्), राष्ट्रीयलोकः.

NATIVITY, *s.* जन्म *n.* (न्), जातिः *f.*, उत्पत्तिः *f.*, उद्भवः, सम्भवः, जनिमा *m.* (न्); 'astrological calculation of nativity,' जातकं; 'astrological record of it,' जन्मपत्रं -त्रिका; 'month of one's nativity,' जन्ममासः; 'name given at it,' जन्मनाम *n.* (न्), नक्षत्रनाम; 'star of one's nativity,' जन्मनक्षत्रं; 'sign,' जन्मराशिः *m.*, जन्मलग्नं.

NATRON, *s.* सर्जिः *f.*, सर्जिका, सर्जिकाक्षारः, मृत्तिकाक्षारः, क्षारः, कापोतः, सौवर्चलः, शुक्लिका, सुखवर्चकः.

NATTY, *a.* विनीतः -ता -तं, परिमृष्टपरिच्छदः -दा -दं.

NATURAL, *a.* (Pertaining to nature, effected by nature, innate, not acquired) स्वाभाविकः -की -कं, प्राकृतिकः -की -कं, नैसर्गिकः -की -कं, सांसिद्धिकः -की -कं, स्वभावसिद्धः -द्धा -द्धं, प्रकृतिसिद्धः &c., सहजः -जा -जं, साहजिकः -की -कं, सहजातः -ता -तं, अनार्जितः -ता -तं, निजः -जा -जं, स्वजः &c., अनार्जः &c., स्वभावजः &c., निसर्गजः &c., अनार्भवः -वा -वं, स्वयङ्कृतः -ता -तं, स्वः -स्वा -स्वं, प्रकृतिस्थः -स्था -स्थं, सांसिद्धिकः -की -कं, भाविकः -की -कं, प्राकृतः -ती -तं, औत्सर्गिकः -की -कं, अनारुत्पन्नः -न्ना -न्नं, औत्पत्तिकः -की -कं; 'natural friend,' सहजमित्रं, प्राकृतमित्रं; 'natural enemy,' सहजारिः *m.*—(According to nature) भावानुगः -गा -गं, स्वभावानुगः &c., भावानुलोमः -मा -मं, स्वभावयोग्यः -ग्या -ग्यं, स्वभावानुसारी -रिणी &c., अनुलोमः -मा -मं, प्रकृत्यनुलोमः &c.—(According to the natural course, regular, proper) यथायोग्यः -ग्या -ग्यं, योग्यः &c., यथाक्रमः -मा -मं, यथामार्गः -र्गा -र्गं, यथायुक्तः -क्ता -क्तं, यथान्यायः -या -यं.—(Not artificial) अकृत्रिमः -मा -मं, अकृतकः -का -कं, अयत्नकृतः -ता -तं, अप्रतिविधानः -ना -नं, दैवनिर्मितः -ता -तं; 'natural cave,' दैवगर्तः.—(Not forced, easy, unaffected) अक्लिष्टः -ष्टा -ष्टं, अप्रतियत्नकृतः -ता -तं, सुलभः -भा -भं, अविलक्षितः -ता -तं, वैलक्ष्यहीनः -ना -नं.—(According to reality, true) यथार्थः -र्थी -र्थं, सत्यः -त्या -त्यं, अकृत्रिमः -मा -मं, सरलः -ला -लं, प्रकृतः -ता -तं.—(Illegitimate) अनौरसः -सी, उपस्त्रीजातः -ता, जारजः -जा, अधिजातः -ता, विजातः -ता.—(Coming at the right time) यथाकालः -ला -लं, कालिकः -की -कं, कालोपयुक्तः -क्ता -क्तं, कालभूतः -ता -तं, अनपघाती -तिनी &c.; 'natural death,' सुमरणं.—(In Astronomy) सावनः -नी -नं; 'natural day,' सावनदिनं, सहोरात्रं; 'natural form,' स्वरूपं; 'natural temperament,' जन्मस्वभावः, जन्मप्रकृतिः *f.*, स्वभावः; 'natural history,' स्थावरजङ्गमविद्या स्थावरजङ्गमशास्त्रं, जडाजडविद्या; 'natural philosophy,' पदार्थविज्ञानं, पदार्थमात्रशास्त्रं.

NATURAL, *s.* (Idiot) यथाजातः, जडः, मूढः, न्यूनबुद्धिः *m.*

NATURALIST, *s.* स्थावरजङ्गमविद्याज्ञः, स्थावरजङ्गमविज्ञानी *m.* (न्), पदार्थविज्ञानी *m.*, पदार्थमात्रशास्त्रज्ञः.

NATURALIZATION, *s.* देशजाधिकारदानं, दैशिकाधिकारप्रतिपादनं.

To NATURALIZE, *v. a.* देशजाधिकारं दा, देशीयं -यां कृ, दैशिकं -कां कृ.—(Render familiar) अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासेन सुगमं -मां कृ.

NATURALLY, *adv.* (According to nature) स्वभावतस्, स्वभावेन -वात्, प्रकृतितस्, प्रकृत्या, भावतस्, स्वभावानुसारेण, जातितस्, जन्मतस्, गुणतस्.—(Regularly, according to the proper course) यथाक्रमं, यथायोग्यं, यथामार्गं.—(Not affectedly) यथार्थं, अवैलक्ष्येण.—(Not forcedly) अक्लिष्टं, अयत्नपूर्वं, सहजगत्या, सहजशाल्या.—(Spontaneously) स्वतस्, स्वयं; 'done naturally,' स्वयङ्कृतः -ता -तं; 'very naturally,' स्वभावेनैव.

NATURALNESS, *s.* स्वाभाविकत्वं, प्राकृतत्वं, सहजत्वं, अकृत्रिमता.—(Conformity to reality) यथार्थता, याथात्म्यं, सत्यता, अवैलक्ष्यं, सरलता, सारल्यं.

NATURE, *s.* (The goddess who is the material cause of the world and all created things. According to the Hindú mythology this goddess is unreal, and identified with Máyá or Illusion, and sometimes with the Śakti or personified energy, or wife of a deity. She is in an especial manner the prototype of the female sex. Hence the following names for her) प्रकृतिः *f.*, माया, महामाया, आदिमाया, मायादेवी, प्रधानं, शक्तिः *f.*, आदिशक्तिः *f.*, लिङ्गं, अविद्या, दुर्गा, लक्ष्मीः *f.*; 'the illusion practised by nature,' मायाजालं; 'sleight of nature,' मायालाघवं.—(Essence, essential properties which constitute a thing) भावः, स्वभावः, प्रकृतिः *f.*,

प्रकृतिभावः, निसर्गः, सर्गः, सृष्टिः *f.*, संसिद्धिः *f.*, रूपं, स्वरूपं, धर्म्मः, स्वधर्म्मः, सत्त्वं, वस्तु *n.*, वस्तुस्वभावः, निसर्गभावः, आत्मा, जातिस्वभावः, समीक्षा, तत्त्वं, गुणः; the three 'gunas' or properties of nature are, 1. 'existence or truth,' सत्त्वं; 2. 'foulness or passion,' रजस् *n.*; 3. 'darkness,' तमस् *n.*—(Natural disposition or temper of mind) स्वभावः, प्रकृतिः *f.*, शीलः -लता, सहजः -जं, सहजभावः, सहजशीलः; 'good-nature,' सद्भावः, सुशीलः, साधुशीलत्वं.—(Natural form) स्वरूपं, सहजरूपं, प्रकृतिः *f.*, निसर्गः.—(Established, regular course of things) मार्गः, रीतिः *f.*, क्रमः, प्रकृतिमार्गः, सृष्टेरीतिः *f.*, सृष्टिक्रमः.—(System of created things) सृष्टिः *f.*, सर्गः, जगत् *n.*, विश्वजगत् *n.*, भूमण्डलं, ब्रह्मसृष्टिः, विश्वं.—(Natural feelings, affections or qualities) स्वभावगुणाः *m. pl.*, प्रकृतिगुणाः *m. pl.*, स्वभावधर्म्माः, प्रकृतिधर्म्माः, प्रकृतिभावाः.—(Constitution, vital power of a body) जीवनशक्तिः *f.*, शक्तिः *f.*, जीवित्वशक्तिः *f.*, ओजस् *n.*, प्राणाः *m. pl.*, प्राणबलं, देहस्वभावः, शरीरस्थितिः *f.*—(Sort, kind) प्रकारः, जातिः *f.*, रूपं, रीतिः *f.*—(Law of action) विधिः *m.*, विधानं, नियमः, स्थितिः *f.*, धर्म्मः; 'by nature,' स्वभावेन, जात्या, जन्मतस्. *See* NATURALLY. 'Blind by nature,' जन्मान्धः -न्धा -न्धं, जात्यन्धः &c., गर्भान्धः &c.; 'offices of nature,' देहधर्म्माः, शरीरधर्म्माः; 'relieving nature,' मलविसर्गः, मलोत्सर्गः, मलमूत्रविसर्जनं.

NATURED, *a.* (Used in composition) expressed by स्वभावः -वा -वं, शीलः -ला -लं, प्रकृतिः -तिः -ति; as, 'good-natured,' सुशीलः -ला -लं; 'ill-natured,' दुष्प्रकृतिः -तिः -ति.

NAUFRAGE, *s.* (Shipwreck) नौभेङ्गः, नौभेदः, नौकाभङ्गः.

NAUGHT, *s.* न किञ्चित्, न किञ्चन, न किमपि, अवस्तु.—(In arithmetic) शून्यं, चः; 'to set at naught,' अवज्ञा (c. 9. -जानाति -ज्ञातुं), लघूकृ. *See To* CONTEMN.

NAUGHT, *adv.* न किञ्चित्, न किञ्चिदपि, न किमपि.

NAUGHT, *a.* निर्गुणः -णा -णं, असारः -रा -रं, विगुणः -णा -णं.

NAUGHTILY, *adv.* प्रतीपं, प्रतीपवत्, दुष्टं, दुष्टभावेन, प्रतीपशीलत्वात्.

NAUGHTINESS, *s.* प्रतीपता, विप्रतीपता, अवश्यता, दुष्टता, दुर्वृत्तता.

NAUGHTY, *a.* प्रतीपः -पा -पं, विप्रतीपः -पा -पं, अवश्यः -श्या -श्यं, अविनेयः -या -यं, मन्दचरित्रः -त्रा -त्रं, दुश्चरित्रः &c., दुष्टः -ष्टा -ष्टं, दुर्वृत्तः -त्ता -त्तं.

NAULAGE, *s.* तरमूल्यं, तरपण्यं, तारिकं, तार्य्यं, आतरः, आतारः.

NAUMACHY, *s.* नौयुद्धं, नौकायुद्धं, नाविकयुद्धं, नौयुद्धकौतुकं.

NAUSEA, *s.* (Sickness) वमनेच्छा, विवमिषा, उल्लेशः, उल्लेदः.—(Loathing, disgust) बीभत्सः -त्सं, विकृतं, वैकृतं, वैकृत्यं, विकारः, कुत्सा, विरक्तिः *f.*, निर्वेदः.

To NAUSEATE, *v. n.* (Be inclined to vomit) वम् in des. (विवमिषति -षितुं), वमनेच्छुः -च्छुः -च्छु भू, विवमिषुः -षुः -षु भू.

To NAUSEATE, *v. a.* वाध् in des. (बीभात्सते -त्सितुं), घृण् (c. 1. घृणते -णितुं).

NAUSEATED, *p. p.* बीभत्सेन परित्यक्तः -क्ता -क्तं.

NAUSEOUS, *a.* (Causing sickness) वमनोत्पादकः -का -कं, वमनेच्छाजनकः -का -कं.—(Disgusting) बीभत्सजनकः -का -कं, घृणाजनकः &c., कुत्साजनकः &c., कुत्सितः -ता -तं, विरसः -सा -सं, गर्हितः -ता -तं.

NAUSEOUSNESS, *s.* बीभत्सजनकता, कुत्सितत्वं, विरसता, वैरस्यं.

NAUTIC, NAUTICAL, *a.* नौचालनविद्यासम्बन्धी -न्धिनी -न्धि (न्), नौकाचालनविषयः -या -यं, नाविकः -की -कं; 'nautical person,' नाविकः, नौकाजीवी *m.* (न्).

NAVAL, *a.* (Pertaining to ships) नाविकः -की -कं, नाव्यः -व्या -व्यं, नौकासम्बन्धी -न्धिनी &c., नौकाविषयः -या -यं.—(Consisting of ships) नौकामयः -यी -यं, नौकात्मकः -का -कं, नौकारूपः -पा -पं.

NAVE, *s.* (Of a wheel) नाभिः -भी *f.*, चक्रनाभिः *f.*, पिण्डिः -ण्डी *f.*, पिण्डिका.—(Of a church) पूजाशालाया मध्यभागः.

NAVEL, *s.* नाभिः -भी *f. m.*, तुण्डिः -ण्डी *f. m.*, तुण्डिका, तुन्दिः -न्दी *f.*, तुन्दिका, नालः, उदरावर्त्तः, मध्यवृत्तं, मणिपूरः, समरा, अमला, भर्म्मी, नाभिकमलं; 'hollow or pit of the navel,' नाभ्यावर्त्तः, तुन्दकूपी -पिका; 'region of the navel,' नाभिचक्रं; 'having a prominent navel,' तुन्दी -न्दिनी &c., तुन्दिकः -का -कं, तुन्दितः -ता -तं, तुन्दिलः -ला -लं, तुन्दिभः -भा -भं, तुन्दिकरः -रा -रं, तुन्दवान् -वती &c., तुण्डिलः &c., तुण्डिभः &c., गोखः -खा -खं.

NAVEL-STRING, *s.* नाभिनालः, नालः; 'cutting of it,' नाभिच्छेदनं, नालच्छेदः.

NAVIGABLE, *a.* नौताय्यः -य्या -य्यं, नाव्यः -व्या -व्यं, नौकागम्यः -म्या -म्यं, नौगम्यः &c., नौगमनार्हः -र्हा -र्हं.

NAVIGABLENESS, NAVIGABILITY, *s.* नौताय्यता, नौगम्यता, नाव्यता -त्वं.

To NAVIGATE, *v. a.* and *n.* नौकया or नावा तॄ (c. 1. तरति -रितुं -रीतुं) or अतितॄ or सन्तॄ or प्लु (c. 1. प्लवते, प्लोतुं) or गम् (c. 1. गच्छति, गन्तुं) or गमनागमनं कृ, समुद्रतरणं कृ, नौकापर्य्यटनं कृ. नौभ्रमणं कृ, नौकायात्रां कृ.—(Direct a ship) नौकां वह् (c. 10. वाहयति -यितुं) or चल् (c. 10. चालयति -यितुं) or आनी (c. 1. -नयति -नेतुं).

NAVIGATION, *s.* (Act of passing on the water in ships) नौकया or नावा तरणं or सन्तरणं or गमनं or गमनागमनं or पर्य्यटनं or भ्रमणं or यात्रा, समुद्रतरणं, समुद्रगमनं, नौगमनं, नौकायात्रा, नौगमनागमनं, नौभ्रमणं, नौपर्य्यटनं.—(Directing ships) नौकाचालनं, नौचालनं, नौकानयनं, नौकावाहनं.—(The art or science) नाविकविद्या, नौचालनविद्या, नौकानयनविद्या, नौवाहनविद्या.

NAVIGATOR, *s.* (One who sails) नाविकः, महानाविकः, समुद्रगामी *m.* (न्), समुद्रयायी *m.*, समुद्रतरः.—(One who directs a ship) नौचालकः, नौकावाहकः, पोतवाहकः, नौकानेता *m.* (तृ), नौकानयनकृत् *m.*

NAVY, *s.* युद्धनौसमूहः, युद्धनौकासङ्घहः, वृहन्नौकासमूहः, नौसमूहः.

NAY, *adv.* न, नो, नहि.—(Nay more) पुनर्, किम्पुनर्, अधिकन्तु, इदं, किम् बहुना.—(Not only) न केवलं.

NEAP, *a.* (Low) नीचः -चा -चं, निम्नः -म्ना -म्नं; 'neap tide,' निम्नवेला, नीचवेला.

NEAR, *a.* (Not far distant) समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निकटस्थः -स्था -स्थं, समीपवर्त्ती -र्त्तिनी -र्त्ति (न्), निकटवर्त्ती &c., समीपस्थायी &c., आसन्नः -न्ना -न्नं, सन्निकृष्टः -ष्टा -ष्टं, सन्निहितः -ता -तं, प्रत्यासन्नः -न्ना -न्नं, उपानत्कः -का -कं, अन्तिकः -का -कं, उपस्थः -स्था -स्थं, उपस्थायी &c., अभ्यासः -सा -सं, अभ्याशः -शा -शं, अभ्यर्णः -र्णा -र्णं, उपनतः -ता -तं, आरातीयः -या -यं, अभ्यगः -गा -गं, उपकरवः -रवा -रवं, सङ्काशः -शा -शं, सकाशः &c., सनीडः -डा -डं, सविधः -धा -धं, सवेशः -शा -शं, सवेषः -षा -षं, समर्य्यादः -दा -दं, अदूरः -रा -रं, अदूरस्थः &c., अविदूरः -रा -रं, संसक्तः -क्ता -क्तं, अव्यवहितः -ता -तं, अपदानरः -रा -रं, अपटानरः -रा -रं; 'nearer,' आसन्नतरः -रा -रं, नेदीयान् -यसी -यः (स); 'nearest or very near,' आसन्नतमः -मा -मं, नेदिष्ठः -ष्ठा -ष्ठं, अन्तिकतमः -मा -मं, अन्तिमः -मा -मं.—(Closely connected) दृढसङ्गः -ङ्गा -ङ्गं, दृढसंसक्तः -क्ता -क्तं.—(Closely concerning or affecting one's interest) स्वार्थसम्बन्धी -न्धिनी &c., निकटसम्बन्धी &c., अन्तरङ्गः -ङ्गा -ङ्गं.—(Intimate) परिचितः -ता -तं, दृढसौहृदः -दा -दं.—(Stingy) कृपणः -णा -णं.

स्वल्पव्ययी -यिनी &c.—(Not rambling) अविस्तीर्णः -र्णा -र्णं; 'near at one's side,' पार्श्वस्थः &c.

NEAR, *adv.* समीपं -पतस्, निकटे, अन्तिकं, उपान्ते, अभितस्, आरात्, आसन्ने, सन्निकृष्टं, निकषा, अदूरे -रात् -रतस्, अविदूरे -रे -रात् -रतस्, सन्निधौ, सकाशे, also expressed by the prep. उप, *see* the next; 'near at one's side,' पार्श्वे -र्श्वतस्; 'situated near,' समीपस्थः -स्था -स्थं; 'going near,' समीपगः -गा -गं.—(Almost, within a little) प्रायस् -यशस्, भूयिष्ठं; 'a woman who is near her delivery,' आसन्नप्रसवा; 'one who is near his death,' आसन्नमृत्युः &c. *See* NEARLY.

NEAR, *prep.* उप, आ, अभि, प्रति; as, 'to go near,' उपगम् (c. 1. -गच्छति -गन्तुं) or उपागम् or अभिगम् or प्रतिगम्; 'brought near,' उपनीतः -ता -तं; 'near a mountain,' उपगिरि, उपगिरं; 'near the ear,' उपकर्णं; 'near the fire,' उपाग्नि; 'near the throat,' उपकण्ठं; 'near evening,' उपसन्ध्यं.

To NEAR, *v. a.* नेद् (nom. नेदयति -यितुं); 'come nearer to,' उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, अभिगम्. *See To* APPROACH.

NEARLY, *adv.* (At no distance) समीपं -पतस्, अदूरे -रं -रात् -रतस्. *See* NEAR, *adv.* (Closely) दृढं, गाढं; 'nearly connected,' दृढसम्बद्धः -द्धा -द्धं, गाढसम्बद्धः &c.—(Almost, within a little) प्रायस्, प्रायशस्, भूयिष्ठं, मनाक्, कल्पं, ईषदूनं, अल्पोनं; 'nearly finished,' समाप्तभूयिष्ठः -ष्ठा -ष्ठं; 'nearly dead,' मृतप्रायः -या -यं, मृतकल्पः -ल्पा -ल्पं, आसन्नमृत्युः -त्युः -त्यु, मुमूर्षुः -र्षुः -र्षु; 'the earth is nearly a sphere,' पृथिवी गोलप्राया; 'nearly cooked,' पचतिकल्पः &c.; 'nearly four,' उपचतुराः *m. pl.*

NEARNESS, *s.* (Closeness) समीपता, सामीप्यं, नैकट्यं, निकटता, समीपवर्त्तित्वं, निकटवर्त्तित्वं, आसन्नता, सन्निकृष्टता, सान्निध्यं, सन्निधिः *m.*, सन्निधानं, सन्निकर्षः -र्षणं, सन्निधं, प्रत्यासन्निः *f.*, प्रत्यासन्नता, आनन्तर्य्यं, अनन्तरं, उपस्थानं, अभ्यासत्वं.—(Closeness of connexion) दृढसम्बन्धः, दृढसंसक्तिः *f.*, दृढसंसर्गः, मुसंसर्गः.—(Intimacy) परिचयः, सुपरिचयः.—(Stinginess) कृपणता, कार्पण्यं, स्वल्पव्ययः.

NEAT, *a.* (Trim) विनीतः -ता -तं, परिमृष्टपरिच्छदः -दा -दं, सुरेखः -खा -खं, आकारशुद्धः -द्धा -द्धं.—(Clean) शुद्धः -द्धा -द्धं, श्लक्ष्णः -क्ष्णा -क्ष्णं, परिष्कृतः -ता -तं.

NEAT, *s.* (Cattle of the bovine genus) गवादिजन्तुः *m.*, गवादिपशुः *m.*

NEAT-HERD, *s.* गोपः, गोपालः, गोरक्षकः, गोचारकः, आभीरः.

NEATLY, *adv.* विनीतं, विनीतवत्, सपरिष्कारं, शुद्धं, श्लक्ष्णं, परिपाट्या, सुपरिपाट्या, परिष्कारपूर्व्वं.

NEATNESS, *s.* विनीतता -त्वं, शुद्धता, परिष्कारः, आकारशुद्धता, आकारशुद्धिः *f.*, परिमृष्टता, परिष्कृतता, शुद्धता, श्लक्ष्णता, परिपाटिः -टी, पारिपाट्यं.

NEBULA, *s.* (Opacity or film in the eye) शुक्लं, शुक्लपटलं.

NEBULOUS, *a.* मेघाच्छन्नः -न्ना -न्नं, मेघव्याप्तः -प्ता -प्तं, मेघाकीर्णः -र्णा -र्णं, बहुमेघः -घा -घं, साभ्रः -भ्रा -भ्रं, अभ्रियः -या -यं.

NECESSARIAN, *s.* दैववादी *m.* (न्), दैष्टिकः, दैवचिन्तकः, दैवैकवादी *m.*, अदृष्टवादी *m.*, दैवपरः.

NECESSARIES, *s. pl.* प्रतिदिनप्रयोजनीयद्रव्याणि *n. pl.*, प्रतिदिनप्रयोज्यद्रव्यसम्भारः, द्रव्यसम्भारः, उपकरणसम्भारः, उपकरणसामग्री; 'necessaries of life,' अन्नपानीयं, अन्नोदकं, अन्नवस्त्रं, अन्नाच्छादनं, क्षितू *m. du.*

NECESSARILY, *adv.* अवश्यं, अवशं, विवशं, अवश्यकं, अवश्यमेव, दैववशात्, दैववशतस्, कर्म्मवशतस्, कार्य्यवशात्, कार्य्यतस्, अनन्यगत्या, नूनं.

NECESSARY, *a.* (That must be, that cannot be otherwise) अवश्यकः -का -कं, आवश्यकः -की -कं, अवशः -शा -शं, अवश्यः -श्या -श्यं, विवशः -शा -शं, भवितव्यः -व्या -व्यं, भाव्यः -व्या -व्यं, अनन्यथासम्भवः -वा -वं, अनन्यथासाध्यः -ध्या -ध्यं, अनन्यथासिद्धः -द्धा -द्धं, अनन्योपायः -या -यं, अनन्यगतिकः -का -कं, अनिवार्य्यः -र्य्या -र्य्यं, नियतः -ता -तं.—(Requisite, needful, wanted) आकांक्षितः -ता -तं, अपेक्षितः -ता -तं, अवश्यकः -का -कं, अवश्यप्रापणीयः -या -यं, सर्वथा प्राप्यः -प्या -प्यं, अवश्योपयोगी -गिनी -गि (न्), अवश्यप्राप्यः -प्या -प्यं, प्रयोजनीयः -या -यं.—(Indispensable, necessary to be done) आवश्यकः -की -कं, अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यकरणीयः -या -यं, अवश्यभवितव्यः -व्या -व्यं, सर्वथा भवितव्यः &c. or भाव्यः -व्या -व्यं, अपरिहरणीयः -या -यं, अपरिहार्य्यः -र्य्या -र्य्यं; 'necessary act,' अवश्यकर्त्तव्यं.—(Acting from necessity) विधिवशः -शा -शं, विधिवशकारी &c., दैववशकारी &c., दैवाधीनः -ना -नं; 'the necessary consequence of acts,' कर्म्मवशः, कार्य्यवशः; 'it is necessary' may be expressed by the fut. pass. part., or by अर्ह्. *See* MUST.

NECESSARY, *s.* (Privy) शौचकूपः, पायुक्षालनवेश्म *n.* (न्), अवस्करः कदेमाटकः.—(A necessary thing). *See* NECESSARIES.

To NECESSITATE, *v. a.* (Make necessary) अवश्यकं -कां कृ, विवशं -शां कृ, विवशीकृ.—(Oblige, compel) अवश्यं कृ (c. 10. कारयति -यितुं) or प्रवृत् (c. 10. -वर्त्तयति -यितुं) or expressed by the causal form of any verb. *See* CONSTRAIN, COMPEL.

NECESSITATED, *p. p.* आवश्यकः -की -कं, विवशीकृतः -ता -तं. *See* CONSTRAINED.

NECESSITOUS, *a.* दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, दीनः -ना -नं, दुर्गतः -ता -तं.

NECESSITY, *s.* (Necessariness) अवश्यकता -त्वं, आवश्यकता, आवश्यकं, आवश्यं, अवश्यता -त्वं, विवशता, दैवश्यं, भवितव्यता, भाव्यता, अनन्यथासम्भवः, अनन्यगतिकत्वं, नियतिः *f.*, नियतत्वं -ता.—(Need, state of being requisite) प्रयोजनं, प्रयोगः, प्रयुक्तिः *f.*, उपयोगः, प्रयोजनीयता, आकांक्षा, अपेक्षा, सर्वथा प्रापणीयता.—(Occasion, cause) प्रयोजनं, हेतुः *m.*, निमित्तं, कार्य्यं; 'without any necessity,' प्रयोजनं विना, हेतुना विना; 'what necessity for this investigation?' एतया चर्च्चया किं प्रयोजनं.—(Indispensableness) कर्त्तव्यता, कार्य्यता, अवश्यकर्त्तव्यता, भवितव्यता, भाव्यता, कार्य्यवशः.—(Fate, fatality) दैवं, विधिः *m.*, दैवाधीनता, दैववशत्वं, दैवायत्तता, अदृष्टाधीनता, भवितव्यता, नियतिः *f.*—(Indigence) दरिद्रता, दारिद्र्यं, दीनता, दुर्गतिः *f.*

NECK, *s.* ग्रीवा, कन्धरा -रः, शिरोधिः *m. f.*, शिरोधरा, गलः, कण्ठः -ण्ठा -ण्ठी -ण्ठं, मस्तकमूलकं; 'back of the neck,' अवदुः *m. f.*, घाटा -टी -टः -टिका, कृकाटिका, कलघिका, सीमा *m.* (न्), पश्चाद्ग्रीवा; 'head and neck,' शिरोग्रीवं; 'of a pitcher, or any vessel,' कण्ठः; 'of the bladder,' वस्तिशिरस् *n.*; 'of a lute,' वीणादण्डः; 'of a horse,' निगालः; 'bending back the neck, उत्कन्धरं; 'belonging to the neck,' ग्रैवः -वी -वं, ग्रैवेयः -यी -यं.

NECK-CLOTH, NECKERCHIEF, *s.* कण्ठवस्त्रं, ग्रीवावस्त्रं, ग्रीवावेष्टनं, ग्रीवाचरणं, गलवस्त्रं, गलावेष्टनं, ग्रीवाचन्धनी, ग्रीवाभरणं, ग्रैवेयकं.

NECKED, *a.* ग्रीवः -वा -वं, कण्ठः -ण्ठा -ण्ठं in comp.; as, 'handsome-necked,' सुग्रीवः -वा -वं; 'long-necked,' दीर्घग्रीवः &c., दीर्घकण्ठः &c.

NECKLACE, *s.* माला -लिका, हारः, कण्ठमाला, सूत्रं, उरःसूत्रं -त्रिका, ग्रैवं -वेयं -यकं, कण्ठभूषा, कण्ठलता, लम्बनं, प्रालम्बिका, प्रलम्बः, तरलः,

ललन्तिका; 'of jewels,' मणिमाला, रत्नावली -लिः *f.*, मणिसरं; 'of pearls,' मुक्तावली -लिः *f.*, मुक्ताकलापः, मुक्ताप्रलम्बः, मुक्तालता; 'of gold,' हेमसूत्रकं, कनकसूत्रं; 'of beads,' अक्षमाला; 'of one string or row,' कण्ठिका; 'of a hundred strings,' देवच्छन्दः, शतयष्टिकः; 'of thirty-two strings,' गुच्छः; 'of thirty-four,' गुच्छार्द्धः.

NECROLOGY, *s.* मृतव्यक्तिविषरणं, मृतजनवृत्तान्तः, मृतजनपरिसंख्या.

NECROMANCER, *s.* श्मशानमन्त्रजापकः, प्रेतसिद्धिकर्त्ता *m.* (र्त्तृ). *See* MAGICIAN.

NECROMANCY, *s.* श्मशानमन्त्रजपनं, प्रेतसिद्धिः *f.*, भूतविद्या, भौतिकविद्या, पिशाचविद्या, कुविद्या. *See* MAGIC, *s.*

NECTAR, *s.* अमृतं, सुधा, सुधारसः, अमृतरसः, पीयूषं, पेयूषं, देवपेयं, लेह्यं, सोमः, पेन्वं, भक्ष्या, कक्षं, तः; 'of flowers,' मधु *n.*, पुष्पमधु, पुष्परसः, पुष्पनिर्यासः, पुष्पसारः, पुष्पभवः, मकरन्दः, मरन्दः, नलदा.

NECTAREAN, NECTAREOUS, NECTARINE, *a.* अमृतमयः -यी -यं, सुधामयः &c., अमृततुल्यः -ल्या -ल्यं, अमृतोपमः -मा -मं, अमृतप्रायः -या -यं.

NEED, *s.* (Want, occasion for something) प्रयोजनं, प्रयोगः, प्रयुक्तिः *f.*, उपयोगः -गिता, कार्य्यं, कारणं, निमित्तं, हेतुः *m.*, आकांक्षा, अपेक्षा; 'there is need of me,' मया प्रयोजनं; 'there is need of a straw,' तृणेन कार्य्यं; 'what need is there of sorrow?' शोकेन किं प्रयोजनं, शोकस्य कः क्रमः or expressed by किं alone, as किं शोकेन; 'according to need,' प्रयोजनवत्, अर्थवत्, यथाप्रयोजनं, यथाकार्य्यं, यथासम्भवं.—(Indigence, distress, difficulty) दारिद्र्यं, दरिद्रता, दीनता, निर्धनता, दुर्गतिः *f.*, दुःखं, अनुपपत्तिः *f.*, सङ्कटं, कष्टं, संकष्टं, कृच्छ्रं, क्लेशः, बाधः.

To NEED, *v. a.* and *n.* (Require) आकांक्ष् (c. 1. -कांक्षति -क्षितुं), आकांक्ष्, अभिकांक्ष्, अपेक्ष् (c. 1. -ईक्षते -क्षितुं), प्रार्थ् (c. 10. -अर्थयति -यितुं), अर्ह् (c. 1. अर्हति -र्हितुं), often expressed by प्रयोजनं, उपयोगः or कार्य्यं; as, 'the healthy need not a physician,' निरामयाणां चिकित्सकेन प्रयोजनं नास्ति; 'he needs me,' तस्य मया प्रयोजनं. *See* also *To* LACK, *v. a.* (Be necessary). *See* MUST.

NEEDED, *p. p.* आकांक्षितः -ता -तं, अपेक्षितः -ता -तं, प्रयोजनीयः -या -यं.

NEEDFUL, *a.* आकांक्षणीयः -या -यं, प्रयोजनीयः -या -यं, प्रयोजनार्हः -र्हा -र्हं, अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यप्राप्यणीयः -या -यं, अवश्योपयोगी -गिनी -गि (न्), अपेक्षणीयः -या -यं, प्रार्थनीयः &c., आकांक्षितः -ता -तं, अपेक्षितः -ता -तं; 'needful to be done,' अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यकार्य्यः -र्य्या -र्य्यं, अवश्यकरणीयः -या -यं; 'the one thing needful,' परमार्थः, परमप्रयोजनीयं.

NEEDINESS, *s.* दरिद्रता, दारिद्र्यं, निर्धनता, अधनता, दीनता, दैन्यं.

NEEDLE, *s.* सूचिः -ची *f.* -चिनी -चिका, सेवनी, कूर्चिका; 'eye of a needle,' सूचिरन्ध्रं, सूचिच्छिद्रं; 'point of one,' सूच्यग्रं.—(Magnetic needle) लोहकान्तः, अयस्कान्तमणिः *m.*, अयस्कान्तमणिशलाका.

NEEDLE-CASE, *s.* सूचिभाजनं, सूचिपात्रं, सूच्याधारः.

NEEDLE-MAKER, *s.* सूचिकारः -रकः, सूचिकरणोपजीवी *m.* (न्).

NEEDLE-WOMAN, *s.* सूचिका -की, सूचीशिल्पोपजीविनी.

NEEDLE-WORK, *s.* सूचिता, सूचिकर्म्म *n.* (न्), सूचिशिल्पकर्म्म, सूत्रकर्म्म.

NEEDLESS, *a.* निष्प्रयोजनः -ना -नं, निष्कारणः -णा -णं, अकारणः &c., अप्रयोजकः -का -कं, अप्रयोजनकः &c., अकारणकः &c., अहेतुकः &c., निरर्थकः &c., अनर्थकः &c., व्यर्थः -र्था -र्थं, क्रियर्थः -र्था -र्थं.

NEEDLESLY, *adv.* प्रयोजनं विना, निष्प्रयोजनं, अकारणं, निष्कारणं, कारणं विना, हेतुना विना, हेतुं विना, अहेतुकं, निरर्थकं, व्यर्थं.

NEEDLESNESS, *s.* अहेतुता -त्वं, अकारणत्वं, अकारणं, अप्रयोजकत्वं, अप्रयोजनं, निष्कारणत्वं, प्रयोजनाभावः, कारणाभावः.

NEEDS, *adv.* (Used with must) अवश्यं, अवश्यमेव. *See* MUST.

NEEDY, *a.* दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, अधनः -ना -नं, दीनः -ना -नं, दुर्गतः -ता -तं, अर्थहीनः -ना -नं, वित्तहीनः &c., अर्थी -र्थिनी -र्थि (न्).

NEFARIOUS, *a.* अतिदुष्टः -ष्टा -ष्टं, पापिष्ठः -ष्ठा -ष्ठं, अतिपापिष्ठः &c., अतिपापी -पिनी -पि (न्), दारुणः -णा -णं, घोरः -रा -रं, अघोरः -रा -रं, गर्ह्यः -र्ह्या -र्ह्यं, दुष्टतमः -मा -मं, अतिपातकी &c., महापातकी &c., अतिपापात्मा -त्मा -त्म (न्).

NEFARIOUSLY, *adv.* अतिदुष्टं, पापिष्ठं, दारुणं, घोरं, अघोरं, गर्हितं.

NEFARIOUSNESS, *s.* अतिदुष्टता, पापिष्ठता, दारुणता, घोरता, अतिगर्ह्यता.

NEGATION, *s.* निह्नवः, अपह्नवः, निह्नुतिः *f.*, अपह्नुतिः *f.*, अपलापः, प्रत्याख्यानं, अपवादः, अस्वीकारः, निषेधः, प्रत्यादेशः.—(In logic) अभावः according to one division it is of two kinds, 'universal negation,' संसर्गाभावः; 'relative or mutual negation,' अन्योन्याभावः; according to another division it is of four kinds, viz. 'extinction,' प्रध्वंसाभावः; 'antecedent non-existence,' प्रागभावः; 'reciprocal negation,' अन्योन्याभावः; 'simple non-existence,' अत्यन्ताभावः.

NEGATIVE, *a.* (Implying denial) अपलापी -पिनी -पि (न्), निह्नवसूचकः -का -कं, निह्नवार्थकः -का -कं, अपवादकः -का -कं, अस्वीकारसूचकः &c., निषेधसूचकः &c., निषेधार्थकः -का -कं.—(Implying absence, privative) अभावसूचकः -का -कं, अभावरूपः -पा -पं, अभावात्मकः -का -कं, अभावदर्शकः -का -कं, अकरणरूपः -पा -पं, अकरणात्मकः -का -कं, अननुज्ञानरूपः -पा -पं.—(Stopping by non-consent) निषेधद्वारा प्रतिबन्धकः -का -कं.

NEGATIVE, *s.* (Word) अस्वीकारसूचकशब्दः, निषेधसूचकशब्दः, अपलापसूचकशब्दः, निषेधार्थकशब्दः, अस्वीकारशब्दः.—(Proposition by which something is denied) अभावसूचकपक्षः, अभावसूचकवाक्यं, निषेधसूचकपक्षः, नास्तिपक्षः, अभावपक्षः.—(Right of preventing) निषेधाधिकारः, निषेधशक्तिः *f.*, प्रतिबन्धमामर्थ्यं.

To NEGATIVE, *v. a.* निषिध् (c. 1. -षेधति -धितुं), प्रतिषिध्, निषेधद्वारा प्रतिबन्ध् (c. 9. -बध्नाति -न्धुं), अपलप् (c. 1. -लपति -पितुं), निरस् (c. 4. -अस्यति -असितुं), निह्नु (c. 2. -हुते -होतुं), अपह्नु, निषेधं कृ.—(Disprove). *See* the word.

NEGATIVED, *p. p.* निषिद्धः -द्धा -द्धं, निषेधितः -ता -तं, निरस्तः -स्ता -स्तं.

NEGATIVELY, *adv.* अस्वीकारेण, सनिषेधं, सापलापं, सापवादं, अभावरूपेण.

To NEGLECT, *v. a.* (Omit) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, अतिचर् (c. 1. -चरति -रितुं), लङ्घ् (c. 10. लङ्घयति -यितुं), विलङ्घ्, उल्लङ्घ्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं), हा (c. 3. जहाति, हातुं), अपहा, अपास् (c. 4. -अस्यति -असितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), अतिसृज्, व्यपसृज्.—(Be careless about) प्रमद् (c. 4. -माद्यति -मदितुं), न अवधा (c. 3. -धत्ते -धातुं), अनवधानं कृ, प्रमादात् परित्यज्; 'he neglects his duty' स्वधर्म्मात् प्रमाद्यति.—(Not to perform) न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अननुष्ठानं कृ, न कृ.—(Forget to perform) विस्मृ (c. 1. -स्मरति -ते -स्मर्त्तुं), न स्मृ, अपस्मृ, विस्मरणात् परित्यज्.—(Disregard) उपेक्ष् (c. 1. -ईक्षते -क्षितुं), समुपेक्ष्, उपप्रेक्ष्, न सेव् (c. 1. सेवते -वितुं), असेवनं कृ.—(Slight) अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), अवधीर् (c. 10. -धीरयति -यितुं), अवगण् (c. 10. -गणयति -यितुं), अनादरं कृ,

स्वलीकृ; 'he neglects to honor the honorable,' पूज्यपूजाव्यतिक्रमं करोति.

NEGLECT, *s.* (Omission, forbearing to do any thing) त्यागः, परित्यागः, अननुष्ठानं, उपात्ययः, अतिपातः, पर्य्ययः, अनभ्यासः, अवक्रिया, लोपः, परिलोपः, अपासनं, उत्सर्जनं, अतिसर्जनं, अतिक्रमः, व्यतिक्रमः, अतिपत्तनं, लङ्घनं, विलङ्घनं, अतिचारः. —(Carelessness, inattention) प्रमादः, प्रमार्ज्जं, प्रमत्तता, अनवधानं.—(Forgetfulness) विस्मृतिः *f.*, विस्मरणं.—(Disregard) उपेक्षा, अनपेक्षा, अनवेक्षा, निरपेक्षा, उन्मेक्षा, उद्भावनं, अदर्शनं.—(Slighting) अवज्ञा, अवमानं, अनादरः, अमाननं, अवधीरणं, अवपालनं.

NEGLECTED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः &c., लुक्षितः -ता -तं, उल्लङ्घितः -ता -तं, अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, अपासितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, विसर्जितः -ता -तं, अननुष्ठितः -ता -तं, अमेलितः -ता -तं, उपेक्षितः -ता -तं, समुपेक्षितः -ता -तं, अनपेक्षितः -ता -तं, अवज्ञातः -ता -तं, अवधीरितः -ता -तं, अवमानितः -ता -तं, अवमतः -ता -तं, अवगणितः -ता -तं, अवपालितः &c., उद्भावितः &c., अरक्षितः, &c., अयत्नवः -वा -वं, स्वलीभूतः &c.

NEGLECTFUL, *a.* (Heedless, inattentive) अनवधानः -ना -नं, अनवहितः -ता -तं, समावधानः -ना -नं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), प्रमत्तः -त्ता -त्तं.—(Disregardful) उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, निर्य्यपेक्षः &c., मन्दादरः -रा -रं, अनादरकारी &c.

NEGLECTFULLY, *adv.* अनवधानेन, अनवहितं, प्रमादेन, सप्रमादं, निरपेक्षं, अनपेक्ष्यया, उपेक्षया, अनपेक्ष्य, मन्दादरं, अयत्नेन.

NEGLIGENCE, *s.* अनवधानं -नता, प्रमादः, प्रमार्ज्जं, प्रमत्तता, अनवहितत्वं, उपेक्षा, अनपेक्षा, अनवेक्षा, असमीक्षा, अव्यवसायः, वालिश्यं. *See* NEGLECT.

NEGLIGENT, *a.* अनवधानः -ना -नं, प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), अनवहितः -ता -तं, असमावधानः -ना -नं, उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, अव्यवसायी &c., मन्दादरः -रा -रं.

NEGLIGENTLY, *adv.* प्रमाद्यात्, प्रमादेन, प्रमादतस्, प्रमाद्यतस्, अनवधानात्, अनवधानेन, अवधानं विना, प्रमत्तवत्, असमीक्ष्य. *See* NEGLECTFULLY.

NEGOTIABLE, *a.* पणितव्यः -व्या -व्यं, पणायितव्यः &c., व्यवहर्त्तव्यः &c., व्यवहार्य्यः -र्य्या -र्य्यं, व्यवहारयोग्यः -ग्या -ग्यं, व्यवसायप्रेप्सुः &c.

To NEGOTIATE, *v. a.* पण् (c. 1. पणते -णितुं) or पणायति, c. 10. पणयति -यितुं), पणायां कृ, व्यवहृ (c. 1. -हरति -हर्त्तुं), व्यवसायं कृ.

NEGOTIATED, *p. p.* पणितः -ता -तं, पणायितः -ता -तं, व्यवहारितः -ता -तं.

NEGOTIATION, *s.* पणायाः, पणनं, व्यवहारः, व्यवसायः, घटना, प्रपञ्चनं.—(Pacification) शम *m.* (न), सन्धिकरणं, शमनं.

NEGOTIATOR, *s.* पणायाकृत्, पणिकः, आपणिकः, व्यवसायी *m.* (न्), व्यवहर्त्ता *m.* (र्त्तृ), व्यवहारी *m.* (न), कर्म्मकारो *m.*—(Pacificator) सामयिद् *m.*, सन्धिवित् *m.*, सन्धिविचक्षणः, सन्धिकुशलः, स्थेयः.

NEGRO, *s.* श्यामदेहः, श्यामशरीरः, श्यामाङ्गः, कृष्णदेहः, कृष्णाङ्गः.

To NEIGH, *v. n.* हेष् (c. 1. हेषते -षितुं) or हेष, हेष (c. 1. हेषते -षितुं), रेष् (c. 1. रेषते -षितुं), अश्ववद् रू (c. 2. रौति, -रवितुं) or नद् (c. 1. नदति -दितुं) or नादं कृ or चिक्कारं कृ.

NEIGH, *s.* हेषा, हेषा, हेषितं, रेषणं, रेषितं, ह्रेषा, अश्वनादः.

NEIGHBOR, *s.* प्रतिवासी *m.* (न्), निकटवासी *m.*, निकटवर्त्ती *m.* (न्), समीपवासी *m.*, निकटस्थः, समीपस्थः, समीपस्थायी *m.*, प्रतिवेशवासी *m.*, प्रतिवेशी *m.*, प्रतिवेशिकः, सामन्तवासी *m.*, समीपदेशनिवासी जनः, समीपगृहवासी *m.*, सामन्तः, अधिवासः, संस्थः, संस्थितः; 'a next-door neighbor,' निरन्तरगृहवासी *m.*, प्रातिवेश्यः; 'next but one,' अनुवेश्यः; 'one should love one's neighbor as one's self,' आत्मौपम्येन परस्मिन् दयां कुर्य्यात्.

NEIGHBOR, *a.* प्रतिवासी -सिनी -सि (न्). *See* NEIGHBORING.

To NEIGHBOR, *v. a.* निकटे or समीपे स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं) or वस् (c. 1. वसति, वस्तुं), स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).

NEIGHBORHOOD, *s.* (Vicinity, adjoining district) सामन्तदेशः, सामन्तं, समीपदेशः, समीपस्थानं, प्रतिवेशः, सन्निवेशः, अधिवासः, अन्तिकं, उपान्तं, निकर्षणः.—(State of being near, proximity) समीपता, सामीप्यं, निकटता, नैकट्यं, सन्निधानं, सान्निध्यं, सन्निधिः *m.*, सन्निधं, सन्निकर्षः, सन्निकृष्टता, आसन्नता, अन्तिकता, अन्तिकं, उपान्तं -न्तं, प्रत्यासन्नता, प्रत्यासत्तिः *f.*, सामन्तत्वं, निकटवर्त्तित्वं, समीपवर्त्तित्वं, संस्थानं, उपस्थानं, अभ्यासत्वं; 'in the neighborhood of the house,' गृहसन्निधाने, गृहोपान्ते.—(Inhabitants of the neighborhood) समीपवासिनः *m. pl.*, निकटवासिनः *m. pl.*, सामन्तवासिनः *m. pl.* प्रतिवासिनः *m. pl.*, समीपलोकाः *m. pl.*, तत्रत्यलोकाः *m. pl.*

NEIGHBORING, *a.* निकटवर्त्ती -र्त्तिनी -र्त्ति (न्), समीपवर्त्ती &c., निकटस्थः -स्था -स्थं, समीपस्थः &c., समीपस्थायी &c., समीपवासी &c., सामन्तवासी &c., प्रतिवासी &c., सामन्तस्थः &c., भ्रामन्तः -न्ती -न्तं, समीपः -पा -पं, आसन्नः -न्ना -न्नं, निकटः -टा -टं, अन्तिकः -का -कं, उपान्तः -न्ता -न्तं, उपान्तिकः -की -कं, सन्निहितः -ता -तं, अभ्यासः -सा -सं, अभ्याशः -शा -शं, अदूरस्थः &c., अदूरीस्थः &c.; 'neighboring district,' 'neighboring people.' *See* NEIGHBORHOOD.

NEIGHBORLINESS, *s.* सामन्तव्यवहारयोग्यता, संस्थव्यवहारयोग्यता, सामन्तजनाचारानुसरणं, उपकारशीलता, मित्रत्वं, हितता.

NEIGHBORLY, *a.* सामन्तव्यवहारयोग्यः -ग्या -ग्यं, संस्थव्यवहारयोग्यः &c., प्रतिवासयोग्यः &c., सामन्ताचारानुसारी -रिणी &c., उपकारशीलः -ला -लं, सुहृत्तः -ता -तं.

NEIGHING, *s.* हेषा, ह्रेषा, ह्रेषितं, ह्रेषा, रेषणं -षितं, ह्रेषितस्वनः, अश्वशब्दः, अश्वनादः, अश्वनिस्वनः.

NEITHER, *pron.* (Not either, not the one or the other) expressed by अन्यतरः -रा -रं or एकतरः -रा -रं or उभौ, or simply by the dual in conjunction with the negative न; as, 'neither of them can break the bow,' धनुर् भंक्तुम् एकतरो न शक्नोति or उभौ न शक्नुतः or simply न शक्नुतः.

NEITHER, *conj.* expressed by the negative न or न च, or by the prohibitive मा. Sometimes in conjunction with वा; as, 'he took neither food nor clothes for his journey,' पाथेयं भक्ष्यं वस्त्रं वा न जग्राह; 'take neither food nor clothes,' भक्ष्यं वस्त्रं वा मा गृहाण; 'do not eat the fruit neither touch it,' फलं मा खादत मा स्पृशत; 'he did not touch, neither did he smell,' नाम्मृशद् न चाजिघ्रत्.

NEM. CON. सर्व्वसम्मत्या, सर्व्वानुमत्या, सर्व्वस्वीकारेण.

NEOGAMIST, *s.* नवोढः -ढा, नववधूः *f.*, नवभार्य्या *f.*, नवपतिः *m.*

NEOLOGIC, NEOLOGICAL, *a.* (Pertaining to neology) नूतनन्यायसम्बन्धी -न्धिनी &c., नूतनमतसम्बन्धी &c.—(Employing new words, &c.) *See* the next.

NEOLOGIST, *s.* नूतनशब्दसेवी *m.* (न्), नूतनन्यायाश्रयी *m.*, नूतनमताश्रयी *m.*, नूतनन्यायसेवी *m.*

NEOLOGY, *s.* नूतनन्यायः, नूतनमतं, नूतनविद्या.—(Employment of new words, &c.) नूतनशब्दसेवनं, नूतनमताश्रयणं.

NEOPHYTE, *s.* नवश्राद्धः, नवशिष्यः, प्राथमकल्पिकः, नूतनशिष्यः.

NEOTERIC, *a.* नूतनः -ना -नं, नवः -वा -वं, नवीनः -ना -नं, इदानीन्तनः -नी -नं, आधुनिकः -की -कं, सर्वाचीनः -ना -नं.

NEPAL, *s.* (The country) नेपालः.—(Belonging to it, or produced in it) नैपालिकः -की -कं, नैपालः -ली -लं.

NEPENTHE, *s.* दुःखशमनं, दुःखहारकम् औषधं, उपशमनं.

NEPHEW, *s.* (Brother's son) भ्रातृजः, भ्रात्रीयः, भ्रातृपुत्रः, भ्रातृसुतः, भ्रातृव्यः.—(Sister's son) भागिनेयः, स्वस्रीयः, भगिनीपुत्रः, स्वसृपुत्रः, भगिनीसुतः, स्वसृसुतः.

NEPHRITIC, NEPHRITICAL, *a.* (Relating to the kidneys) मूत्रपिण्डसम्बन्धी -न्धिनी &c., वृक्कसम्बन्धी &c.—(Relieving disease of the kidneys) मूत्रपिण्डरोगहारी -रिणी &c., मूत्ररोगनाशकः -का -कं, वृक्करोगघ्नः -घ्नी -घ्नं.

NEPOTISM, *s.* (Fondness for nephews) भ्रातृव्यभागिनेयस्नेहः.—(Undue attachment for relations) पुत्रपौत्रादिपक्षपातः, कुलपक्षता, अपत्यातिस्नेहः, सन्तानातिस्नेहः, बान्धवातिस्नेहः.

NEREID, *s.* (Sea-nymph) समुद्रीयदेवी, सामुद्रदेवी, जलदेवी.

NERVE, *s.* (Organ of sensation, connected with the marrow of the brain and spine) मज्ञातन्तुः *m.*, ज्ञानतन्तुः, ज्ञानवाहिनी, चैतन्यवाहिनी, चैतन्यतन्तुः *m.*, शिरा, सिरा.—(Sinew, tendon) स्नायुः *m.*, सस्रा, शिरा, सिरा, धमनिः -नी *f.*, नाडिः -डी *f.*, वहीरः *m.*, रसालसा, सन्धिबन्धनं.—(Strength of body) शरीरदृढता, शरीरदार्ढ्यं, गात्रदार्ढ्यं, शरीरबलं, तेजस् *n.*, वीर्य्यं, ओजस् *n.*, ऊर्जः.—(Strength of mind) धैर्य्यं, धीरता -त्वं, धृतिः *f.*, मनःस्थैर्य्यं, बुद्धिवैभवं.

To NERVE, *v. a.* बलं or धैर्य्यं दा or वृध् (c. 10. वर्धयति -यितुं), सबलीकृ.

NERVELESS, *a.* निर्बलः -ला -लं, दुर्बलः -ला -लं, बलहीनः -ना -नं.

NERVOUS, *a.* (Pertaining to the nerves) मज्ञातन्तुसम्बन्धी -न्धिनी &c., मज्ञातन्तुसः -स्या -स्यं, मज्ञातन्तुगतः -ता -तं.—(Having the nerves affected, easily agitated) मज्ञातन्तुरोगी -गिणी &c., मज्ञातन्तुविकारी &c., शिरारोगी &c., धैर्य्यहीनः -ना -नं, कम्पशीलः -ला -लं, वेपनशीलः &c.—(Vigorous) वीर्य्यवान् -वती -वत् (त्), तेजोवान् &c., ओजस्वी &c., ऊर्जस्वान् &c., ऊर्जस्वलः -ला -लं, धीरः -रा -रं, दृढः -ढा -ढं, सुदृढः &c.

NERVOUSLY, *adv.* (With vigor) सवीर्य्यं, सधैर्य्यं, सबलं, धैर्य्येण.—(With weakness) धैर्य्येण विना, धैर्य्यं विना, सकम्पं, सवेपनं, कम्पशीलत्वात्.

NERVOUSNESS, *s.* (Vigor) वीर्य्यं, धैर्य्यं, धीरता -त्वं, तेजस् *n.*, ओजस् *n.*, दार्ढ्यं, दृढता, सुदृढता, ऊर्जः.—(Affection or weakness of the nerves, agitation) मज्ञातन्तुरोगः, मज्ञातन्तुविकारः, -रिता, धैर्य्यहीनता, अधृतिः *f.*, कम्पशीलता, वेपनशीलता.

NESCIENCE, *s.* अज्ञानं -नता, ज्ञानाभावः, ज्ञानहीनता, अबोधः, अज्ञता.

NESS. This termination, denoting state or quality, is expressed in Sanskrit by the affixes ता, त्वं, and यं, the last usually requiring Vriddhi of the first syllable of the noun; as, from 'idle,' अलस; 'idleness,' अलसता, अलसत्वं, आलस्यं.

NEST, *s.* (Of birds) नीडः -डं, कुलायः, पक्षिस्थानं, पक्षिगृहं, खगस्थानं, जालकं, सङ्कुरकः.—(Any abode, receptacle) गृहं, स्थानं, निधिः *m.*, निधानं, आशयः, आश्रयः; 'sitting in a nest,' कुलायनिलायः.

To NESTLE, *v. n.* पक्षिवत् स्वनीडम् आश्रि (c. 1. -श्रयति -यितुं) or समाश्रि or संश्रि, सुखेन or सुखम् आश्रि, यथासुखम् आश्रि or शी (c. 2. शेते, शयितुं) or अधिशी or संविश् (c. 6. -विशति -वेष्टुं) or उपविश् or निली (c. 4. -लीयते -लेतुं).

To NESTLE, *v. a.* (Cherish) पाल् (c. 10. पालयति -यितुं), पुष् (c. 10. पोषयति -यितुं).

NESTLING, *s.* कुलायस्थः or नीडस्थः पक्षिशावकः, कुलायस्थायी *m.* (न्).

NESTOR, *s.* (Sage old man) वृद्धस्मृतिः *m.*

NET, *s.* जालं, जालकं, जालायः, पाशः, पाशबन्धः -न्धं, वागुरा, उन्नाथः, कूटः, कूटयन्त्रं, वीतंसः, वितंसः, पक्षिबन्धनं, बन्धनं -नी; 'for deer,' मृगबन्धिनी -नं, पाशिली; 'for fish,' मत्स्यधानी, मत्स्यजालं, मत्स्यग्रहणी, मत्स्यग्रहणार्थं जालं, कुपिनी, पद्मराखेटः; 'maker of nets,' जालकारकः.

NET, *a.* (Clear, free from deductions) अशेषः -षा -षं, निरवशेषः &c., अभग्नः -ग्ना -ग्नं, अस्खलः -ला -लं, अन्यूनः -ना -नं, निरुद्धारः -रा -रं, शुद्धः -द्धा -द्धं.

To NET, *v. a.* (Make clear gain) अन्यूनं फलं लभ् (c. 1. लभते, लब्धुं).

NETHER, *a.* अधरः -रा -रं, अवरः -रा -रं, अधरस्थः -स्था -स्थं, अधःस्थः &c., अधोभवः -वा -वं, अधस्तनः -नी -नं, नीचस्थः &c., अधमः -मा -मं, अवमः &c., जघन्यः -न्या -न्यं; 'nether part,' अधोभागः; 'nether world,' अधोलोकः; 'nether garment,' अधोंशुकं, अन्तरीयं; 'nether sky,' नभस्तलं.

NETHERMOST, *a.* अवरः -रा -रं, अवरतमः -मा -मं, अधरतमः &c., नीचतमः &c.

NETTING, NET-WORK, *s.* जालं -लकं, जालकर्म्म *n.* (न्), जालप्रायः.

NETTLE, *s.* (A plant) पीतपर्णी.

To NETTLE, *v. a.* प्रकुप् (c. 10. -कोपयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), मन्तप् (c. 10. -तापयति -यितुं), कोपं जन (c. 10. जनयति -यितुं).

NETTLED, *p. p.* ईषत्कुपितः -ता -तं, ईषत्सन्तप्तः -प्ता -प्तं, व्यथितः -ता -तं.

NEURALGIA, *s.* मज्ञातन्तुवेदना, मज्ञातन्तुव्यथा, शिरावेदना.

NEUROLOGY, *s.* मज्ञातन्तुवर्णनं -ना, मज्ञातन्तुविद्या, शिरावर्णनं.

NEUROTOMY, *s.* मज्ञातन्तुच्छेदः -दनं, शिराव्यवच्छेदविद्या.

NEUTER, NEUTRAL, *a.* (Not adhering to either party, indifferent) अपक्षपाती -तिनी -ति (न्), विपक्षपातः -ता -तं, उभयपक्षसमानः -ना -नं, उभयपक्षसमः -मा -मं, उभयसामान्यः -न्या -न्यं, उभयसाधारणः -णी -णं, उभयपक्षभिन्नः -न्ना -न्नं, उदासीनः -ना -नं, उदासी &c., तटस्थः -स्था -स्थं, मध्यस्थः &c., समदर्शी &c., समदृष्टिः -ष्टिः -ष्टि, समबुद्धिः -द्धिः -द्धि, समभावः -वा -वं, समः -मा -मं.—(Neuter gender) क्लीबः -बं, नपुंसकः -कं, नपुंसकलिङ्गं, तृतीयप्रकृतिः *f.*, तृतीयाप्रकृतिः.

NEUTRALITY, *s.* माध्यस्थ्यं -स्थ्यं, मध्यस्थता -त्वं, तटस्थ्यं, तटस्थता -त्वं, उभयपक्षसमता, अपक्षपातः -तिता, विपक्षपातत्वं, उदासीनता, औदासीन्यं, औदास्यं, उभयसमता, उभयसाम्यं, उभयसामान्यं, उभयसाधारण्यं, समदृष्टिः *f.*, समता, साम्यं, समानता.

NEUTRALIZATION, *s.* (Act of destroying the peculiar properties of a body) विशेषगुणनाशः -शनं, विशेषधर्म्मनाशः -शनं, गुणविनाशनं, विशेषगुणप्रतीकारः.—(Act of reducing to a state of neutrality) उदासीनीकरणं, समीकरणं, उभयसमीकरणं.—(Rendering inefficient) निर्बलीकरणं, दुर्बलीकरणं.

To NEUTRALIZE, *v. a.* (Destroy the peculiar properties of) विशेषगुणान् नश् (c. 10. नाशयति -यितुं), विशेषगुणनाशनं कृ, विशेषधर्म्मनाशं कृ.—(Render neutral) उदासीनीकरणं, उभयसमीकरणं.—(Render inefficient) निर्बलीकृ, दुर्बलीकृ, बलं नश्.

NEUTRALIZED, *p. p.* नष्टगुणः -णा -णं, नष्टबलः -ला -लं, नष्टशक्तिः -क्तिः -क्ति.

NEUTRALIZER, *s.* विशेषगुणनाशकः, बलनाशकः, शक्तिनाशकः, गुणघ्नः.

NEUTRALLY, *adv.* उदासीनवत्, औदासीन्यपूर्व्वं, उभयसाम्येन, समदृष्ट्या

NEVER, *adv.* न कदाचित्, न कदापि, न कदाचन, न कर्हिचित्, न जातु, न जातुचित्, sometimes expressed by न; as, 'there never has been and never will be any one like him,' अनेन सदृशः कश्चिन् न भूतो न भविष्यति.

NEVERTHELESS, *conj.* तथापि, पुनर्, परन्तु, परं, किन्तु, अपितु, किञ्च.

NEW, *a.* नवः -वा -वं, नवीनः -ना -नं, नूतनः -ना -नं, नूलः -ला -लं, नव्यः -व्या -व्यं, अभिनवः -वा -वं, प्रतिनवः -वा -वं, प्रत्ययः -या -यं, तरुणः -णा -णं.—(Modern not ancient) आधुनिकः -की -कं, इदानीन्तनः -नी -नं, अधुनातनः -नी -नं, मद्यस्कालीनः -ना -नं, अप्राचीनः -ना -नं, अपुरातनः -नी -नं.—(Never occurring before) अभूतपूर्वः -र्वा -र्वं, अदृष्टपूर्वः &c., अश्रुतपूर्वः &c., अपूर्वः &c., अयथापूर्वः &c.—(Not habituated, not familiar) अनभ्यस्तः -स्ता -स्तं, अपरिचितः -ता -तं.—(Not before used) अप्रयुक्तः -क्ता -क्तं, अनुपभुक्तः &c.; 'new moon,' *See* MOON.

NEW-BORN, *a.* मद्योजातः -ता -तं, जातमात्रः -त्री -त्रं, नवोत्पन्नः -न्ना -न्नं.

NEW-COMER, *s.* आगन्तुकः, आगन्तुः *m.*, नवागतः, नवाभ्यागतः.

NEW-FANGLED, *a.* नवकल्पितः -ता -तं, नवसृष्टः -ष्टा -ष्टं, नूतनः -ना -नं.

NEWLY, *adv.* नवं, नूतनं, नवीनं, अभिनवं, प्रतिनवं, प्रत्ययं, सद्यस्.

NEWNESS, *s.* नवता -त्वं, नवीनता, नूतनता -त्वं, नव्यता, नाव्यं, अभिनवता, प्रतिनवता, प्रत्ययता. (State of not being known before) अपूर्वता -त्वं, अभूतपूर्वता.

NEWS, *s.* वार्त्ता, वृत्तान्तः, समाचारः, सन्देशः, सन्दिष्टं, संवादः, वृत्तं, वर्त्तमानं, प्रवृत्तिः *f.*, किंवदन्ती. वदन्तः -न्तकः, लोकवादः, लोकप्रवादः, जनवादः, जनश्रुतिः *f.*, वाचिकं, सूचना; 'What's the news?' का वार्त्ता; 'good news,' सुवार्त्ता, शुभवार्त्ता, शुभवृत्तान्तः; 'bad news,' दुर्वार्त्ता, अनिष्टवार्त्ता, अशुभवार्त्ता.

NEWSMONGER, *s.* वार्त्तायनः, वार्त्तावृत्तिः *m.*, समाचारवृत्तिः *m.*, वार्त्ताद्यवसायी *m.* (न्), वार्त्तावहनव्यापारी *m.*, वार्त्तिकः, कुशीलवः, समाचारव्यवसायी.

NEWSPAPER, *s.* समाचारपत्रं, वार्त्तापत्रं, वार्त्तिकपत्रं, संवादपत्रं.

NEWS-VENDER, *s.* समाचारपत्रविक्रेता *m.* (तृ), वार्त्तापत्रविक्रयी *m.*

NEWT, *s.* तृणगोधा -धिका, मृक्षगोधा -धिका, क्षुद्रगोधा.

NEW-TESTAMENT, *s.* नवीननियमः, नूतननियमः, नवनियमः.

NEW-YEAR'S DAY, *s.* वर्षप्रतिपद् *f.*, वत्सरप्रतिपद्, संवत्सरप्रतिपद्.

NEXT, *a.* (In time, &c.) अनन्तरः -रा -रं, निरन्तरः -रा -रं.—(Next in place, having nothing intervening) अव्यवधानः -ना -नं, अव्यवहितः -ता -तं, अनन्तरालः -ला -लं, निरन्तरालः -ला -लं, अपदान्तरः -रा -रं, सन्निहितः -ता -तं, पार्श्वस्थः -स्था -स्थं, अन्तिकः -का -कं, अन्तिमः -मा -मं. Next in time may also be expressed by परः -रा -रं or अनन्तरं: as, 'the next day,' परदिवसः, पराह्नः; 'the next world,' परलोकः -कं, लोकान्तरं; 'in the next world,' परत्र, प्रेत्य, अमुत्र; 'relating to the next world,' पारत्रिकः -की -कं, अमुत्रत्यः -त्या -त्यं, आमुष्मिकः -की -कं; 'the next moment,' क्षणान्तरं; 'next born,' अनन्तरजः -जा -जं; 'next of kin,' अनन्तरः -रा -रं; 'next but one,' एकान्तरः -रा -रं; 'next but two,' द्व्यन्तरः -रा -रं, द्व्येकान्तरः -रा -रं.

NEXT, *adv.* अनन्तरं, तदनन्तरं, प्रत्यनन्तरं, परं -रेण, परतस्, परस्तात्, ततः परं, अतः परं, अत ऊर्द्धं; 'next day,' परदिवसे, परेद्युस्; 'next moment,' क्षणान्तरे.

NIB, *s.* (Bill, beak) चञ्चुः *f.*, तुण्डः -ण्डिः *m.*, मुखः.—(Point) अग्रं, अग्रिः *m.*, अग्रभागः; 'of a pen,' कलमाग्रं.

NIBBED, *a.* अग्रिमान् -मती -मत् (त्), अग्रवान् -वती &c., साग्रः -ग्रा -ग्रं.

To NIBBLE, *v. a.* and *n.* अल्पाल्पशः or अल्पाल्पं चर्व् (c. 1. चर्वति -वितुं, c. 10. चर्वयति -यितुं) or दंश् (c. 1. दशति, दंष्टुं) or विदंश् or सन्दंश्, सम्मुखदन्तैर् अल्पाल्पं खाद् (c. 1. खादति -दितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), क्रमशः खाद् or भक्ष् (c. 10. भक्षयति -यितुं) or चर्वणं कृ. -(Carp at) दोषं or छिद्रम् अन्विष् (c. 4. -इष्यति -एषितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), छिद्रान्वेषं कृ, असूय (nom. असूयति).

NIBBLED, *p. p.* अल्पाल्पशः खादितः -ता -तं or चर्वितः -ता -तं or दष्टः -ष्टा -ष्टं, सम्मुखदन्तैर् जग्धः -ग्धा -ग्धं or लिखः -खा -खं or लूनः -ना -नं.

NICE, *a.* (Delicious, pleasant to the taste) स्वादुः -दुः -द्वी -दु, सुरसः -सा -सं, मिष्टः -ष्टा -ष्टं, सुस्वास्वादः -दा -दं, रुचिरः -रा -रं, रुचिकः -का -कं, रुच्यः -च्या -च्यं, रुचिकरः -रा -रं.—(Exact, accurate) सूक्ष्मः -क्ष्मा -क्ष्मं, अभ्रमः -मा -मं, समभ्रमः -मा -मं, सम्यक्-मीची -म्यक् (क्), शुद्धः -द्धा -द्धं.—(Judging with exactness or minuteness) सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी -र्शि (न्), कुशाग्रदृष्टिः &c., कुशाग्रीयमतिः -तिः -ति, कुशाग्रीयबुद्धिः -द्धिः -द्धि, कुशाग्रबुद्धिः &c.—(Over-exact) अतिसूक्ष्मः &c., अतिसूक्ष्मदृष्टिः -ष्टिः -ष्टि.—(Delicate, soft) कोमलः -ला -लं, पेलवः -वा -वं, मृदुः -दुः -दुः, सुकुमारः -रा -री -रं.—(Not coarse, fine) अस्थूलः -ला -लं, सूक्ष्मः &c., विरलः &c.—(Pleasing, agreeable) रुचिरः -रा -रं, सुभगः -गा -गं, रम्यः -म्या -म्यं, मनोरमः -मा -मं, सुन्दरः -रा -री -रं.

NICELY, *adv.* (Exactly, accurately) सूक्ष्मं, सौक्ष्म्येण, ससौक्ष्म्यं, सूक्ष्मरूपेण, सूक्ष्मत्वेन, अभ्रमा, समभ्रमं, सम्यक्.—(Well, in a good manner) सु prefixed, सुष्ठु; 'nicely done,' सुकृतः -ता -तं.

NICENESS, NICETY, *s.* (Delicacy, deliciousness) स्वादुता, सुरसत्वं, सौरस्यं, मिष्टता.—(Pleasantness) रुचिरता, रुच्यता, रम्यता, रमणीयता.—(Exactness) सूक्ष्मता -त्वं, सौक्ष्म्यं, सामभ्रम्यं, सम्यक्त्वं, शुद्धता.—(Over-exactness or scrupulousness) अतिसूक्ष्मता, अतिसौक्ष्म्यं.—(Delicacy of perception or judgment) सूक्ष्मदृष्टिः *f.* -ष्टित्वं, सूक्ष्ममतित्वं, कुशाग्रीयमतित्वं, कुशाग्रबुद्धित्वं.—(Delicacy of management) युक्तिः *f.*, सुयुक्तिः *f.*, लाघवं, सुनीतिः *f.*

NICHE, *s.* प्रतिमास्थानं, प्रतिमाधारः, प्रतिमानिकेतः -तनं.

NICK, *s.* (Of time) कालसन्धिः *m.*, कालयोगः, शुभकालः, शुभयोगः, सुयोगः, शुभलग्नं, शुभक्षणः, युक्तसमयः, उपयुक्तसमयः, उपयुक्तकालः, उचितसमयः, अवसरः *m.*—(Notch) छेदः, अवच्छेदः.

To NICK, *v. a.* (Touch at the right time) शुभलग्ने स्पृश् (c. 6. स्पृशति, स्प्रष्टुं) or सामन् (c. 10. -सादयति -यितुं, सुयुक्तिं कृ.—(Make a notch) अवच्छेदं कृ.

NICKNAME, *s.* उपाधिः *m.*, उपाधिनाम *n.* (न्), निन्दानाम *n.*, निन्दासूचकं नाम, तिरस्कारसूचकनाम, अपमानार्थकं नाम.

To NICKNAME, *v. a.* उपाधिं दा, उपाधिनाम कृ, तिरस्कारार्थं नाम दा.

To NICTATE, *v. n.* निमिष् (c. 6. -मिषति -मेषितुं), पक्ष्मवद् निमेषं कृ.

NICTATION, *s.* निमेषः, निमीलनं, पक्ष्मनिमेषः, पक्ष्मवद् निमेषः.

NICTITATING MEMBRANE, *s.* पक्ष्मणां चक्षुरावरणं, पक्ष्मनेत्रपटलं.

NIDIFICATION, *s.* नीडकरणं, नीडरचनं, कुलायरचना.

NIECE, *s.* (Brother's daughter) भ्रातृव्या, भ्रातृजा, भ्रातृपुत्री, भ्रातृसुता, भ्रातृकन्या.—(Sister's daughter) स्वसृव्या, भागिनेयी, स्वसृपुत्री, भगिनीसुता, भगिनीकन्या, स्वसृजा.

NIGGARD, *s.* कृपणजनः, अदाता *m.* (तृ), कदर्य्यजनः, गाढमुष्टिः *m.*

NIGGARD, NIGGARDLY, *a.* दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः &c., कृपणः -णा -णं, व्ययशङ्की -ङ्किनी -ङ्कि (न्), व्ययशङ्कितः -ता -तं, अल्पव्ययी &c.,

स्वल्पव्ययी &c., कदर्यः -र्या -र्यं, मात्सरः -रा -रं, ननुत्यागः -गा -गं, त्यागपराङ्मुखः -खा -खं, दानपराङ्मुखः &c., क्षुद्रः -द्रा -द्रं, अर्थपरः -रा -रं. *See* MISER, MISERLY.

NIGGARDLINESS, NIGGARDNESS, *s.* कृपणता, कार्पण्यं, कदर्यता -त्वं, व्ययशङ्का, स्वल्पव्ययः, दृढमुष्टित्वं, मात्सर्यं, दानपराङ्मुखता.

NIGGARDLY *adv.* सकार्पण्यं, कृपणवत्, स्वल्पव्ययेन, व्ययशङ्कया.

NIGH, NIGHLY, NIGHNESS. *See* NEAR, NEARLY, NEARNESS.

NIGHT, *s.* रात्रिः *f.*, निशा, रजनी, क्षणदा, क्षपा, शर्वरी, निर् *f.* (श्), त्रियामा, यामिनी, यामवती, नक्तं indecl. निशीथिनी, तमस्विनी, विभावरी, तमी -मा -मिः *f.*, निरातपा, निशीथ्या, निशीथः, शमनी, वासुरा, वाशुरा, श्यामा, शताक्षी, शात्वरी, शर्व्या, यामिः -मी -मिका *f.*, यामीरा, याम्या, दोषा; 'a dark night,' तमिस्रा, तामसी; 'a moonlight night,' ज्योत्स्नी; 'by night, in the night,' रात्रौ, निशायां, निशि, नक्तं, दोषा; 'a number of nights,' निशागणः, गणरात्रं, निशावृन्दं; 'coming on of night,' रात्रियोगः; 'end of night,' निशान्तः -न्तं, अपररात्रः, रात्रिविगमः; 'beginning of night,' निशादिः *f.*; 'every night,' प्रतिरात्रं, प्रतिनिशं, रात्रौ रात्रौ; 'day and night,' अहोरात्रं, अहर्निशं; 'night and day,' रात्रिन्दिवं, रात्र्यहनी *n. du.*; 'a night and two days,' पक्षिणी; 'a period of five nights,' रात्रकं; 'sitting up at night,' रात्रिजागरः -रणं; 'resting at night,' निशोपशायः; 'night attack,' सौप्तिकवधः, सौप्तिकं; 'last night,' गतरात्रिः *f.*

NIGHT-BLINDNESS, *s.* निशान्धता; 'affected with it,' निशान्धः -न्धा -न्धं, रात्र्यन्धः &c.

NIGHT-CAP, *s.* रात्रौ भृतं शिरोवेष्टनं or शिरोवस्त्रं, रात्रिशिरस्कं.

NIGHT-DEW, *s.* रात्रिजलं, निशाजलं, रजनीजलं, नैशासु *n.*, निशापुष्पं.

NIGHT-CLOTHES, NIGHT-DRESS, *s.* रात्रिवस्त्रं, रात्रिवसनं, रात्रिवेशः.

NIGHT-FALL, *s.* रजनीमुखं, निशादिः *f.*, रात्र्यारम्भः, रात्रियोगः, सन्ध्याकालः, दिनावसानं, प्रदोषः, प्रदोषकालः.

NIGHT-GOWN, *s.* रात्रिवस्त्रं, रात्रिवसनं, रात्रिवेशः, रात्रौ भृतं वस्त्रं.

NIGHT-HAG, *s.* रात्रिञ्चरी, रात्रिचरा -री, निशाचरा -री, रात्र्यटा.

NIGHTINGALE, *s.* वसन्तदूतः, मदनदूतः, कोकिलः, गातुः *m.*

NIGHTLY, *a.* नैशः -शी -शं, प्रादोषिकः -की -कं, रात्रिकृतः -ता -तं, रात्रिलः -ला -लं, शार्वरः -री -रं, प्रातिरात्रिकः -की -कं.

NIGHTLY, *adv.* (By night) रात्रौ, नक्तं, निशायां, निशि, दोषा.—(Every night) प्रतिरात्रं, प्रतिनिशं, रात्रौ रात्रौ, निशि निशि.

NIGHT-MAN, *s.* खलपूः *m.*, मलपूः *m.*, पुरीषवाहकः, पुरीषापकर्षी *m.*

NIGHTMARE, *s.* कुस्वप्नः, दुःस्वप्नः, अजीर्णप्रयुक्तस्वप्नः, स्वप्नकल्पितो हृदयदेशोपरिस्थो भारः, स्वप्नकल्पिता मिथ्यावासना or अपच्छाया.

NIGHTSHADE, *s.* (Prickly) कण्टकारी-रिका, निदिग्धिका, वृहती, धावनिका, दुःस्पर्शा, स्पृशी, व्याघ्री, कुली, प्रचोदिनी, क्षुद्रा, राष्ट्रिका.

NIGHT-WALKING, NIGHT-WANDERING, *a.* निशाचरः -रा -री -रं, रात्रिचरः &c., रात्रिञ्चरः &c., रजनीचरः &c., निशाचारी -रिणी -रि (न्), नक्तञ्चारी &c., नक्तञ्चरः &c.

NIGHT-WATCH, *s.* यामः, प्रहरः, रात्रियामः, रात्रिप्रहरः.

NIHILITY, *s.* अभावः, अवस्तुत्वं, नास्तित्वं, असत्ता -त्वं, शून्यता -त्वं.

NIMBLE, *a.* लघुः -घुः -घ्वी -घु, लघुगतिः -तिः -ति, द्रुतगतिः &c., त्वरितगतिः &c., लघुशरीरः -रा -रं, लघुदेहः -हा -हं, चपलाङ्गः -ङ्गा -ङ्गं, अङ्गचपलः -ला -लं, चपलदेहः -हा -हं, चपलगतिः &c., क्षिप्रगतिः &c., क्षिप्रकारी -रिणी -रि (न्), आशुकारी &c., तीक्ष्णकर्मी -र्मी -र्मि (न्), चपलः -ला -लं, चञ्चलः -ला -लं.

NIMBLE-FOOTED, *a.* लघुपादः -दा -दं, चपलपादः &c., पादचपलः -ला -लं.

NIMBLE-HANDED, *a.* लघुहस्तः -स्ता -स्तं, चपलपाणिः -णिः -णि, पाणिचपलः &c.,

NIMBLENESS, *s.* लघुता, लाघवं, शरीरलाघवं, लघुगतित्वं, द्रुतगतित्वं, अङ्गचापल्यं, देहचापल्यं, चापल्यं, द्रुतता, क्षिप्रता, शीघ्रता, चञ्चलता, चाञ्चल्यं.

NIMBLE-WITTED, *a.* चपलबुद्धिः -द्धिः -द्धि, क्षिप्रबुद्धिः &c., शीघ्रबुद्धिः &c.

NIMBLY, *adv.* सलाघवं, लाघवेन, लघु, लघुगत्या, द्रुतं, द्रुतगत्या, त्वरितं, त्वरितगत्या, चापल्येन, चपलं, चपलगत्या, अङ्गचापल्येन, क्षिप्रं, शीघ्रं.

NINE, *a.* नव *m. f. n. pl.* (न्), नवसंख्यकः -का -कं.

NINE-FOLD, *a.* नवगुणः -णा -णं, नवविधः -धा -धं, नवधा indecl.

NINETEEN *a.* नवदश *m. f. n. pl.* (न्), अनविंशतिः *f. sing.*, एकोनविंशतिः *f. sing.*, नवदशसंख्यकः -का -कं.

NINETEENTH, *a.* नवदशः -शी -शं, एकोनविंशः -शी -शं, अनविंशः &c., अनविंशतितमः -मी -मं, एकोनविंशतितमः &c.

NINETIETH, *a.* नवतः -ती -तं, नवतितमः -मी -मं.

NINETY, *a.* नवतिः *f. sing.*, नवतिसंख्यकः -का -कं; 'ninety-one,' एकनवतिः *f.*; 'ninety-two,' द्विनवतिः *f.*; 'ninety-three,' त्रयोनवतिः; 'ninety-four,' चतुर्णवतिः; 'ninety-five,' पञ्चनवतिः; 'ninety-six,' षण्णवतिः; 'ninety-seven,' सप्तनवतिः; 'ninety-eight,' अष्टानवतिः *f.*; 'ninety-nine,' अनशतं, एकोनशतं; 'above ninety years old,' दशमी *m.* (न्), दशमीस्थः, दशमीङ्गतः.

NINETY-FOLD, *a.* नवतिगुणः -णा -णं, नवतिविधः -धा -धं, नवतिधा indecl.

NINNY, NINNY-HAMMER, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, निर्बुद्धिः.

NINTH, *a.* नवमः -मी -मं, नावमिकः -की -कं.

NINTHLY, *adv.* नवमतस्, नवतस्, नवमस्थाने, नवमपदे.

To NIP, *v. a.* (Cut or pinch off with the ends of the fingers) अङ्गुल्यग्रैः or अङ्गुलिनखैर् अवच्छिद् (c. 7. -छिनत्ति -छेत्तुं) or अवकृत् (c. 6. -कृन्तति -कर्त्तितुं) or निकृत् or छिद् or पीड्.—(Bite off) दंश् (c. 1. दशति, दंष्टुं), विदंश्, सन्दंश्, अवदंश्.—(Pinch in general) पीड् (c. 10. पीडयति -यितुं), मथ् (c. 1. मथति, c. 9. मथ्नाति -थितुं), आर्द्रं -द्रीं -द्रं कृ, आर्द्रीकृ; as, 'to pinch with cold,' शीतेन पीड् शीतार्द्रीकृ, हिमार्द्रीकृ.—(Blast, destroy) नश् (c. 10. नाशयति-यितुं), दुष् (c. 10. दूषयति -यितुं), मृ (c. 10. मारयति -यितुं), विशृ (c. 10. -शारयति -यितुं), म्लानीकृ.

NIP, NIPPING, *s.* नखैर् अवच्छेदः or अवकृन्तनं or निकृन्तनं or कृन्तनं, हिमार्द्रीकरणं, शीतार्द्रीकरणं, हिमनाशः.

NIPPED, *p. p.* (With cold) हिमपीडितः -ता -तं, हिमार्द्रः -र्द्रा -र्द्रं, शीतार्द्रः &c., हिमदूषितः -ता -तं, हिमनाशितः &c.—(In general) पीडितः -ता -तं, मथितः &c.

NIPPERS, *s. pl.* सन्दंशः -शकं -शका, कङ्कमुखं.

NIPPLE, *s.* स्तनाग्रं, स्तनमुखं -खः, स्तनशिखा, कुचाग्रं, चूचुकः -कं, स्तनवृन्तः -न्तं, पिप्पलकं, नर्म्मठः, वृन्तं; 'the nipples,' पुरश्चन्दौ *m. du.*

NIT, *s.* लिक्षा, निक्षा, रिक्षा, दिक्षुः, यूकाण्डं.

NITRE, *s.* यवक्षारः, यवजः, तर्ष्यः, पाक्यः, तीक्ष्णः, तीक्ष्णरसः, यवलासः, यवाग्रजः.

NITROGEN, *s.* expressed in modern treatises by the word रूचकाकरः.

NITROUS, NITRY, *a.* यवक्षारीयः -या -यं, यवक्षारमयः -यी -यं, यवक्षारगुणकः -का -कं, यवक्षारोत्पादकः -का -कं.

NITTY, *a.* बहुलिक्षः -क्षा -क्षं, लिक्षापूर्णः -र्णा -र्णं, प्रचुरलिक्षः &c.

NIVEOUS, *a.* हिम्यः -म्या -म्यं, तुषारमयः -यी -यं, हिममयः &c.

No, *adv.* न, नो, नहि; 'or no,' न वा.

No, *a.* (None) usually expressible by न; as, 'no one,' न कश्चित् *m.*, न काचित् *f.*, न कोऽपि *m.*, न कापि *f.*, न कश्चन *m.*, न काचन *f.*; 'no thing,' न किञ्चित्, न किमपि, न किञ्चन; 'no other,' नान्यः -न्या -न्यत्; 'no where,' न क्वचित्, न क्वापि, न कुत्रचित्, न कुत्रापि; 'no more, not again,' न पुनर्; 'no great distance,' नातिदूरं. When 'no' is privative, it is expressed by निर्, अ, वि &c. prefixed, or by हीन, शून्य, वर्जित, रहित &c. affixed; as, 'having no fruit,' निष्फलः -ला -लं, अफलः &c., विफलः &c., फलहीनः -ना -नं, &c.

Nobility, *s.* (Antiquity of family, elevation of rank) महाकुलता, कुलीनता, महाकुलीनता, सत्कुलीनता, अभिजातता, आभिजात्यं, आभिजनं, कुलोत्कर्षः, कुलोत्कृष्टता, औत्कर्षं, कौलीनं, सद्वंशता, वंशोत्कर्षः.—(Elevation or greatness of mind) माहात्म्यं, महात्मता -त्वं, महिमा *m.* (न्), महत्त्वं, उदारता, औदार्य्यं, चित्तोदारता, महेच्छा, महानुभावः.—(Distinction, eminence) उत्कर्षः, उत्कृष्टता, औत्कर्षं, वैशिष्ट्यं, विशिष्टता, प्रधानता -त्वं, समुन्नतिः *f.*, प्रकर्षः, शिष्टता, श्रेष्ठत्वं, मेध्यता, मुख्यातिः *f.*—(Magnificence) प्रतापः, तेजस *n.*, श्रीः *f.*—(The nobility, noblemen collectively) कुलीनलोकः, कुलीनजनसमूहः, कुलीनजनाः *m. pl.*, शिष्टजनाः *m. pl.*, कुलीनसमूहः, राजन्यकं.

Noble, *a.* (Of ancient family, or elevated rank) कुलीनः -ना -नं, महाकुलीनः -ना -नं, महाकुलः -ला -लं, सत्कुलीनः -ना -नं, सद्वंशः -शा -शं, अभिजनवान् -वती -वत् (त्), अभिजातः -ता -तं, उत्कृष्टः -ष्टा -ष्टं, उत्कृष्टकुलजातः -ता -तं, महाकुलजः -जा -जं, महाकुलप्रसूतः -ता -तं, सत्कुलजातः -ता -तं, विशुद्धकुलभवः, वंशविशुद्धः -द्धा -द्धं, सद्वंशजातः -ता -तं, प्रधानवंशोद्भवः -वा -वं, महावंशीयः -या -यं, उन्नमवंशजातः -ता -तं, कुलश्रेष्ठी -ष्ठिनी -ष्ठि (न्), श्रेष्ठकुलोद्भूतः -ता -तं, कुलोत्तमः -ता -तं, कुलिकः -का -कं, कौलेयः -यी -यं, प्रतिपत्तिमान् &c.—(Great in mind) उदारः -रा -रं, उदारमनाः -नाः -नः (स्), उदारमतिः -तिः -ति, उदारधीः -धीः -धि, महात्मा -त्मा -त्म (न्), महामनाः &c., महामनस्कः -स्का -स्कं, माहात्मिकः -की -कं, महामतिः -तिः -ति, महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, महाशयः -या -यं, उन्नतमनाः &c.—(Distinguished, eminent, excellent) उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, अत्युत्कृष्टः &c., शिष्टः -ष्टा -ष्टं, विशिष्टः &c., उत्तमः -मा -मं, प्रमुखः -खा -खं, उन्नतः -ता -तं, समुन्नतः -ता -तं, प्रशस्तः -स्ता -स्तं, महान् -हती -हत् (त्), महाभागः -गा -गं, महाभागधेयः -या -यं, सेव्यः -व्या -व्यं.—(Illustrious) ख्यातः -ता -तं, विख्यातः -ता -तं, यशस्वी &c., महायशाः &c., श्रीमान् &c., सुप्रतिष्ठः -ष्ठा -ष्ठं, कीर्त्तिमान् &c.—(Magnificent) महाप्रतापः -पा -पं, महातेजाः &c., विभूतिमान् &c., श्रीमान् &c. 'Noble' may sometimes be expressed by ऋषभः or पुङ्गवः or व्याघ्रः or सिंहः or शार्दूलः or इन्द्रः in comp.; as, 'a noble or eminent man,' पुरुषर्षभः, पुरुषव्याघ्रः, नरपुङ्गवः, नरेन्द्रः &c.; 'a noble elephant,' गजेन्द्रः; 'noble nature,' सत्त्वं: 'noble on both sides,' मातृतः पितृतश्चाभिजनवान् &c.

Noble, nobleman, *s.* कुलीनजनः, कुलीनलोकः, शिष्टजनः, शिष्टलोकः, कुलीनपदस्थः, उच्चपदस्थः, उत्कृष्टपदस्थः, कुलश्रेष्ठी *m.* (न्), सत्कुलीनः, अभिजनवान् *m.* (त्), राजन्यः.

Noble-minded, *a.* उदारमनाः -नाः -नः (स्), उदारधीः -धीः -धि, उदारमनस्कः -स्का -स्कं, उदारचेताः &c., महात्मा -त्मा -त्म (न्), सम्भावितात्मा &c., महेच्छः -च्छा -च्छं.

Nobleness, *s.* महत्त्वं, महिमा *m.* (न्), उत्कर्षः, उत्कृष्टता, श्रेष्ठता, प्रधानता, उदारता, औदार्य्यं, उन्नतिः *f.*, समुन्नतिः. *See* Nobility.

Noblesse, *s.* कौलीन्यं, कौलीनं, कुलीनलोकः, कुलीनसमूहः, कुलीनसभा.

Nobly, *adv.* (With nobleness of birth) कुलीनं, कुलीनवत्, साधिजात्यं; 'nobly-born,' महाकुलप्रसूतः -ता -तं, सत्कुलजातः -ता -तं. *See* Noble, *a.* (With greatness of mind) सौदार्य्यं, औदार्य्येण, उदारवत्, समाहात्म्यं, माहात्म्येन, मनोमहत्त्वात्, महिम्ना, उदारचित्तत्वात्, उदारचेतसा, महेच्छया.—(Magnificently) महाप्रतापेन, महातेजसा, अतितेजसा, सप्रतापं, ऐश्वर्य्येण.

Nobody, *s.* न कश्चित् *m.*, न काचित् *f.*, न कोऽपि *m.*, न कापि *f.*, न कश्चन *m.*, न काचन *f.*

Nocent, *a.* हिंस्रः -स्रा -स्रं, हिंसालुः -लुः -लु, अपकारकः -का -कं.

Noctambulation, *s.* निद्राभ्रमणं, निद्रापरिभ्रमणं, निद्राचारः.

Noctambulist, *s.* निद्राचारी *m.* (न्), निद्राभ्रमणकृत्. *See* Night-walking.

Noctivagant, *a.* निशाचरः -रा -री -रं, नक्तचारी -रिणी &c. *See* Night-walking.

Nocturnal, *a.* नैशः -शी -शं, रात्रिकालिकः -की -कं, रात्रिसम्बन्धी -न्धिनी &c., रात्रिकालसम्बन्धी &c., दोषातनः -नी -नं, प्रादोषिकः -की -कं, शार्व्वरः -री -रं, रात्रीयः -या -यं, निशासम्बन्धीयः -या -यं.

To nod, *v. a.* or *n.* (Incline the head) शिरः or मस्तकं नम् (c. 1. नमति, नन्तुं, c. 10. नमयति -यितुं) or प्रणम् or अभिनम् or विनम् or आनम्.—(Make a sign by a motion of the head) मस्तकसङ्केतं कृ, शिरःसङ्केतं कृ, शिरसा सङ्केतं कृ or संज्ञां कृ or इङ्गितं कृ, शिरश्च चल् (c. 10. चालयति -यितुं).

Nod, *s.* (Inclination of the head) शिरःप्रणामः, मस्तकप्रणामः, शिरःप्रणतिः *f.*—(Sign made by a movement of the head) मस्तकसङ्केतः, शिरःसङ्केतः, शिरसा सङ्केतः or संज्ञा or इङ्गितं, मस्तकसन्देशः, शिरश्चालनं.

Nodated, *a.* ग्रन्थिमान् -मती -मत् (त्), ग्रन्थिलः -ला -लं.

Noddle, *s.* मस्तकः -कं, शिरस् *n.*, शीर्षकं, मुण्डकं.

Noddy, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, निर्बुद्धिः *m.*

Node, *s.* (In surgery) अस्थिगुल्मः, अध्यस्थि *n.*—(In astronomy) पातः, उपग्रहः; 'ascending node,' राहुः *m.*, स्वर्भानुः *m.*, विपुलुदः, सैंहिकेयः, तमस् *n.*; 'descending,' केतुः *m.*

Nodose, *a.* ग्रन्थिलः -ला -लं, ग्रन्थी -न्थिनी -न्थि (न्), बहुग्रन्थिः -न्थिः -न्थि.

Nodosity, *s.* ग्रन्थिलत्वं, ग्रन्थिमत्त्वं, सपर्व्वत्वं, ग्रन्थिपूर्णता.

Nodule, *s.* शर्करा, पिण्डः -ण्डं, घनः, लोष्टः -ष्टं -ष्टुः *m.*

Noise, *s.* शब्दः, महाशब्दः, अतिशब्दः, ध्वनिः *m.*, महाध्वनिः *m.*, स्वनः, महास्वनः, निःस्वनः, घोषः -र्षं -र्षा, महाघोषः, नादः, महानादः, स्वरः, महास्वरः, उच्चैःस्वरः, उच्चस्वरः, प्रघोषकः, प्रस्वानः, निर्घोषः, निनादः, रणत्कारः, क्वणः, संह्रादः, निह्रादः, रवः, रणत्कारः, रावः, उद्रावः, कोलाहलः, रासः, रावणं, तुमुलं, ध्वनः, वणः, उत्क्रोशः.—(Public talk) जनवादः, जनप्रवादः, जनरवः, जनश्रुतिः *f.*

To noise, *v. a.* (Spread by report) घुष् (c. 10. घोषयति -यितुं), विघुष्, प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, ख्या in caus. (ख्यापयति -यितुं), आख्या, विख्या, प्रचर् (c. 10. -चारयति -यितुं), प्रकटीकृ.

Noised abroad, *p. p.* घोषितः -ता -तं, विघोषितः -ता -तं, प्रचारितः -ता -तं, प्रकाशितः -ता -तं, प्रकटितः &c., प्रकटीकृतः &c., आख्यातः &c.

Noiseful, *a.* शब्दकारी -रिणी &c., ध्वनयन् -यन्ती -यत् (त्). *See* Noisy.

Noiseless, *a.* निःशब्दः -ब्दा -ब्दं, निश्शब्दः &c., अशब्दः &c., -ब्दा -ब्दं, नीरवः -वा -वं, अरवः -वा -वं, शब्दहीनः -ना -नं.

Noiselessly, *adv.* शब्देन विना, अशब्देन, निःशब्दं, निश्शब्दं.

Noisily, *adv.* महाशब्देन, अतिशब्देन, महास्वरेण, उच्चैःस्वरेण.

NOISINESS, *s.* महाशब्दकत्वं, महाशब्दः, महाशब्दकारित्वं, महाध्वनिः *m.* -निता, महानादः -दता, शब्दकारिता, शब्दवत्त्वं, सशब्दता, शब्दनत्वं.

NOISOME, *a.* (Noxious, destructive) मारकः -का -कं, मारात्मकः &c., प्राणनाशकः &c., मृत्युजनकः &c., क्षयकरः -रा -रं, विनाशकः &c., प्राणहरः -रा -रं, नृशंसः -सा -सं, शरारुः -रुः -रु, शारुकः -का -कं, घातुकः -का -कं, बाधकः &c., अनिष्टजनकः &c., अहितकारी -रिणी &c.—(Offensive to the smell) दुर्गन्धः -न्धा -न्धं, दुर्गन्धी -न्धिनी -न्धि (न्), पूतिगन्धिकः -का -कं, कुत्सितः -ता -तं.

NOISOMENESS, *s.* दुर्गन्धता -त्वं, दौर्गन्धिः *m.*, पूतिगन्धता, कुत्सितगन्धः, उग्रगन्धता, पूतिः *f.*, कुत्सितत्वं, कौत्सित्यं.

NOISY, *a.* शब्दकारः -री -रं, महाशब्दकारः -री -रं, महाशब्दकः -का -कं, महाशब्दी -ब्दिनी -ब्दि (न्), महास्वनः -ना -नं, महाध्वनिकः -का -कं, महाध्वनिकरः -री -रं, महानादी &c., महानादः -दा -दं, महास्वरकः -का -कं, अतिशब्दनः -ना -नं, अतिशब्दवान् -वती -वत् (त्), तुमुलकारी &c., तुमुलः -ला -लं, कोलाहलकारी &c. कोलाहलकृत् *m.f.n.*, घोररवः -वा -वं, मुखरः -रा -रं.—(Clamorous) घोषणः -णा -णं, घोषकरः -री -रं, महाघोषः -षा -षं, बहुघोषः -षा -षं.—(Sounding) शब्दनः -ना -नं, नादी &c., स्वनवान् &c., संह्रादी &c., स्वनन् -ननी -नत् (त्), ध्वनयन् &c.

NOMAD, NOMADIC, *a.* प्रचारानुसारवासी -सिनी &c., पशुचारणानुजीवी.

NOMENCLATOR, *s.* नामस्थापकः, नामबोधकः, नामख्यापकः.

NOMENCLATURE, *s.* शब्दसङ्ग्रहः, शब्दजालं, शब्दमाला, निघण्टुः *m.*

NOMINAL, *a.* (Pertaining to a name) नाममत्वी -त्विनी &c., नामविषयः -या -यं.—(Relating to words) शब्दः -ब्दी -ब्दं, शाब्दिकः -की -कं, वाचनिकः -की -कं, आभिधानीयकः -की -कं.—(Existing in name only) नामधारी -रिणी &c., नाममात्रधारी &c., नाममात्र *m.f.n.*, शब्दः -ब्दी -ब्दं, शाब्दिकः &c.—(Nominal verb). The grammatical symbol is क्विप्.

NOMINALLY, *adv.* नामतस्, नाम्ना, नाममात्रेण, शब्दतस्, शब्दमात्रेण.

To NOMINATE, *v. a.* (Give a name) नाम कृ or दा, संज्ञां कृ or दा.—(Designate by name) नाम निर्दिश् (c. 6. -दिशति -देष्टुं) or प्रदिश्.—(Appoint by name to an office) नाम निर्दिश्य नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or परिकॢप् (c. 10. -कल्पयति -यितुं) or प्रकॢप्.

NOMINATED, *p.p.* नामनिर्देशानन्तरं नियुक्तः -क्ता -क्तं or नियोजितः -ता -तं.

NOMINATION, *s.* (Act) नामनिर्देशानन्तरं नियोगः or नियोजनं.—(Power of nominating or appointing) नियोजनाधिकारः.

NOMINATIVE, *s.* (Case in grammar) कर्त्री *m.* (तृ), कर्तृकारकः, कर्तृवाचकः, प्रथमा, प्रथमा विभक्तिः.

NOMINATOR, *s.* नियोजकः, नामनिर्देशपूर्व्वं नियोजयिता *m.* (तृ), निर्देशकः.

NOMINEE, *s.* नियोजितः, नियुक्तः, अधिकृतः.

NON. A prefix expressed in Sanskrit by न or अन्.

NON-ACCEPTANCE, *s.* अपरिग्रहः, अग्रहणं, अप्रतिग्रहः, अस्वीकारः.

NONAGE, *s.* बाल्यं, बालदशा, व्यवहारायोग्यता, अप्राप्तव्यवहारत्वं.

NONAGENARIAN, *a.* दशमी *m.* (न्), दशमीस्थः, दशमीङ्गतः.

NON-APPEARANCE, *s.* अदर्शनं, अनुपस्थानं, अनुपस्थितिः *f.*, अविद्यमानता.

NON-ARRIVAL, *s.* अनागमः -मनं, अनभिगमनं, अनुपस्थानं.

NON-ATTAINMENT, *s.* अप्राप्तिः *f.*, अलाभः, अलब्धिः *f.*, अनवाप्तिः *f.*

NON-ATTENDANCE, *s.* अदर्शनं, दर्शनाभावः, अनुपस्थानं. *See* NON-APPEARANCE.

NON-ATTENTION, *s.* अनवधानं -नता, अनवहितत्वं, अलक्ष्यं.

NONCE, *s.* प्रयोजनं, अवसरः, वारः, समयः, उपयोगः.

NONCHALANCE, *s.* निरुत्सुकता, उदासीनता, जडता, अनपेक्षा, अनास्था.

NONCHALANT, *a.* निरुत्सुकः -का -कं, उदासीनः -ना -नं, अनपेक्षः -क्षा -क्षं, निरपेक्षः &c., जडः -डा -डं, अनभिलाषः -षा -षं, निःस्पृहः -हा -हं.

NON-COMMENCEMENT, *s.* अनारम्भः, अनारब्धिः *f.*, अनुपक्रमः.

NON-COMMISSIONED, *a.* अनधिकारवान् -वती -वत् (त्), अपदयुक्तः -क्ता -क्तं.

NON-COMPLIANCE, *s.* अननुरोधः -धनं, अस्वीकारः, अननुवृत्तिः *f.*

NON-CONDUCTOR, NON-CONDUCTING, *a.* अवाहकः -का -कं, अप्रापकः -का -कं, अनायकः -का -कं, अनेता -त्री -तृ (तृ).

NON-CONFORMIST, *s.* अननुरोधी *m.* (न्), अननुवर्त्ती *m.*, अननुसारी *m.*, अननुयायी *m.*, अननुकूलः.—(Dissenter from the established church) देशस्थापितधर्म्मविरोधी *m.* (न्), साधारणधर्म्मविरोधी *m.*, देशस्थापितधर्म्मविप्लवात्मा, मतान्तरावलम्बी *m.*, मतान्तरग्राही *m.*, मतान्तरधारी *m.*

NON-CONFORMITY, *s.* अननुरोधः -धनं, अननुवर्त्तनं, अननुसरणं, अस्वीकारः.—(Dissent) देशस्थापितधर्म्मविरोधः, देशस्थापितधर्म्मासम्मतिः *f.*, मतान्तरावलम्बनं, मतान्तरं.

NON-CONTACT, *s.* असंस्पर्शः, असम्पर्कः, अस्पृष्टिः *f.*, असंसर्गः.

NON-DELIVERY, *s.* असमर्पणं, अप्रतिपादनं, अप्रदानं, असम्प्रदानं.

NONDESCRIPT, *a.* अवर्णितः -ता -तं, अवर्णनीयः -या -यं, अलक्षणः -णा -णं.

NONE, *a.* न कश्चित् *m.*, न काचित् *f.*, न किञ्चित् *n.*, न को॰पि. न कापि *f.*, न किमपि *n.*, न कश्चन *m.*, न काचन *f.*, न किञ्चन *n.*, often expressed by न with another word; as, 'none other,' नान्यः -न्या -न्यत्.—(Not the least portion, not any, none at all) न किञ्चिदपि, न किमपि, न कियदपि, न मूल्लमपि, न स्तोकमपि, न लेशमपि, न मनागपि, अलेशं, अलेशमपि, अलवलेशं.

NON-ELECT, *a.* अवृतः -ता -तं, अवृत्तः -त्ता -त्तं, अनुद्धृतः -ता -तं.

NON-ENJOYMENT, *s.* अभोगः, असम्भोगः, अनुपभोगः, अभुक्तिः *f.*

NONENTITY, *s.* (Non-existence) अभावः, असम्भवः, असवः, असद्भावः, असत्त्वं, असत्ता, नास्तित्वं, नास्ति ind., अजीवः, अजीवित्वं, अजीवनिः *f.*, अवस्तुता -त्वं, अवर्त्तमानता, अवृत्तिता, अविद्यमानता, शून्यता.—(A nonentity) अपदार्थः, असत्पदार्थः, अलीकपदार्थः, अवस्तु *n.*, असद्वस्तु *n.*, असम्भवं, शून्यं.

NONES, *s. pl.* रोमीयपञ्जिकायां मासस्य पञ्चमो or सप्तमो दिवसः.

NONESSENTIAL, *a.* अनावश्यकः -की -कं, कर्त्तव्याकर्त्तव्यः -व्या -व्यं, कार्य्याकार्य्यः -र्य्या -र्य्यं, कृताकृतः -ता -तं, अनान्तरीयकः -का -कं.

NON-EXISTENCE, *s.* अभावः, असम्भवः, असद्भावः, नास्तित्वं. *See* NONENTITY.

NON-EXISTENT, *a.* अवर्त्तमानः -ना -नं, अविद्यमानः -ना -नं, असन् -सती -सत् (त्), असम्भवः -वा -वं, असम्भूतः -ता -तं, अभूतः -ता -तं, निःसत्त्वः -त्त्वा -त्त्वं, अधियमाणः -णा -णं.

NON-OBSERVANCE, *s.* अपालनं, अप्रतिपालनं, अरक्षणं, असेवनं.

NON-PAREIL, *a.* अनुपमः -मा -मं, अप्रतिमः &c., अद्वितीयः -या -यं.

NON-PERFORMANCE, *s.* अननुष्ठानं, अविधानं, अकरणं, अकर्म्म *n.* (न्).

NON-PLUS, *s.* अनुपायः, अगतिः *f.* -तित्वं, निरुपायत्वं, गतिहीनता, निरुत्तरत्वं, अनुत्तरत्वं, मोहः, व्यग्रता, कुण्ठता.

To NON-PLUS, *v. a.* निरुत्तरीकृ, अनुत्तरीकृ, निरुपायीकृ, गतिहीनं -नां कृ, मुह् (c. 10. मोहयति -यितुं), व्याकुलीकृ.

NON-PLUSED, *p. p.* निरुपायः -या -यं, गतिहीनः -ना -नं, उपायहीनः. निरुत्तरः -रा -रं, अनुत्तरः &c., हृतोत्तरः &c., कुण्ठितः -ता -तं.

NON-RESIDENCE, *s.* अवसतिः *f.*, अवासः, अनिवसनं, अनिवासः, अनवस्थितिः *f.*

NON-RESIDENT, *a.* अवासी -सिनी -सि (न्), स्वस्थानायासी &c., अनवस्थितः &c

NON-RESISTANCE, *s.* अप्रतीकारः, अप्रतिक्रिया, अप्रतिरोधः, अनिवारणं.

NON-RESUMPTION, *s.* अपुनरादानं, अपुनर्हरणं, अनपकर्म्म *n.* (न्).

NONSENSE, *s.* अनर्थकं, आनर्थक्यं, अनर्थकवाक्यं, अनर्थकभाषणं, निरर्थकवाक्यं, अबद्धं, असम्बद्धं, अवध्यं, असम्बद्धवाक्यं, अनिबद्धवाक्यं, असम्बद्धकथा, वृथाकथा, मृषार्थकं, अयाथार्थ्यं, जल्पितं, प्रलपितं, प्रलापः, अनर्थः, अर्थहीनवचनं; 'talking nonsense,' असम्बद्धप्रलापी -पिनी -पि (न्), अनिबद्धप्रलापी &c., अनर्थकवक्ता -क्त्री -क्तृ (क्तृ), जल्पकः -का -कं, जल्पाकः -का -कं, वाचालः -ला -लं, वाचाटः -टा -टं, बहुगर्ह्यवाक् *m.f. n.*

NONSENSICAL, *a.* अनर्थकः -का -कं, निरर्थकः -का -कं, अनर्थः -र्था -र्थं, अर्थहीनः -ना -नं, अर्थशून्यः -न्या -न्यं, अर्थरहितः -ता -तं, मृषार्थकः &c., वृथार्थकः &c., असम्बद्धः -द्धा -द्धं, असम्बद्धार्थः -र्था -र्थं, अबद्धः &c., अनिबद्धः &c., असङ्गतः -ता -तं, अयथार्थः -र्था -र्थं, अयुक्तिकः -का -कं, अभिधेयरहितः -ता -तं.

NONSENSICALLY, *adv.* निरर्थकं, सानर्थक्यं, असम्बद्धं, वृथा, मृषा.

NONSENSICALNESS, *s.* अनर्थकता, निरर्थकता, आनर्थक्यं, अर्थहीनता, अर्थाभावः, असङ्गतता, असम्बद्धता, अयाथार्थ्यं, अयुक्तिः *f.*

NON-SOLUTION, *s.* अलापनं, अव्याख्या -ख्यानं, अपरिशोधनं, अलापनिका.

NON-SUITED, *p.p.* अवसन्नः -न्ना -न्नं, अवसादितः -ता -तं, हीनः -ना -नं, अर्थाद्धीनः -ना -नं, हीनवादः -दा -दं, नष्टवादः -दा -दं, हतवादः; 'to be non-suited,' अर्थाद् हा in pass. (हीयते), अवसद् (c. 1. -सीदति -सत्तुं), नष्टवादः -दा -दं भू.

NON-SUPERINTENDENCE, *s.* अनधिष्ठानं, अनधिष्ठितिः *f.*, अनधिष्ठातृत्वं, अनधिकारः.

NOODLE, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, जडधीः *m.*

NOOK, *s.* कोणः, अस्रः, आरं, विविक्तस्थानं, गुप्तस्थानं.

NOON, NOON-DAY, NOON-TIDE, *s.* मध्याह्नः, मध्याह्नकालः, दिनमध्यं, दिवसमध्यं, दिवामध्यं, मध्यन्दिनं, उद्दिनं.

NOON, NOON-DAY, *a.* माध्याह्निकः -की -कं, माध्यन्दिनः -नी -नं.

NOOSE, *s.* पाशः, पाशबन्धः -न्धं -न्धनं, वागुरा, उन्माथः, कूटपाशः; 'for the neck,' गलपाशः; 'number of nooses,' पाश्या.

To NOOSE, *v. a.* पाश (nom. पाशयति -यितुं), पाशीकृ, पाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाशे or उन्माथे पत् (c. 10. पातयति -यितुं).

NOOSED, *p.p.* पाशितः -ता -तं, पाशीकृतः &c., पाशबद्धः -द्धा -द्धं.

NOR. *adv.* न, न च, sometimes expressed by the prohibitive मा, or sometimes simply by वा in conjunction with a negative. *See* NEITHER, *conj.*

NORMAL, *a.* (Regular) वैधिकः -की -कं, यथाविधिः -धिः -धि, यथाक्रमः -मा -मं.—(Relating to rudiments, teaching rudiments) मूलविद्यासम्बन्धी -न्धिनी &c., विद्योपक्रमसम्बन्धी &c., विद्यारम्भोपदेशकः -का -कं, मूलविद्याशिक्षकः -का -कं.

NORTH, *s.* उत्तरा, उत्तरदिक् *f.* (श्), उत्तरदिशा, उत्तराशा, उदीची, कौवेरी, सौम्या. Kuvera, according to the Hindús, is the Regent of the North.

NORTH, *a.* उत्तरः -रा -रं, उत्तरस्थः -स्था -स्थं, उदीचीनः -ना -नं, उदङ् -दीची -दक् (च्), कौवेरः -री -रं; 'north-road,' उत्तरापथः; 'north-country,' उदीच्यः.

NORTH-EAST, *s.* प्रागुत्तरा, प्रागुदीची, पूर्व्वोत्तरं -रा, ऐशानी, अपराजिता; 'north-eastwards,' प्रागुत्तरेण, पूर्व्वोत्तरेण; 'north-east of the city,' प्रागुत्तरेण नगरात्.

NORTH-EAST, NORTH-EASTERLY, NORTH-EASTERN, *a.* प्रागुत्तरः -रा -रं, पूर्व्वोत्तरः -रा -रं, प्रागुदङ् -दीची -दक् (च्), प्रागुदीचीनः -ना -नं, प्रागुत्तरस्थः -स्था -स्थं, पूर्व्वोत्तरस्थः &c.

NORTHERLY, NORTHERN, *a.* उत्तरदिश्यः -श्या -श्यं, उत्तरः -रा -रं, उदीचीनः -ना -नं, उत्तरसम्बन्धी -न्धिनी -न्धि (न्); 'in a northerly direction,' उत्तरदिशि.

NORTH-POLE, NORTH-STAR, *s.* ध्रुवः, मेरुः *m.*, औत्तानपादिः *m.*

NORTHWARD, *a.* उत्तरदिश्यः -श्या -श्यं, उत्तरदिक्स्थः -स्था -स्थं, उदङ्मुखः -खी -खं, उत्तरस्थः -स्था -स्थं.

NORTHWARDS, *adv.* उत्तरेण -रात्, उत्तरतस्, उत्तरदिशि, उत्तरत्र.

NORTH-WEST. *s.* वायवी, वायुकोणः, वायुदिशा.

NORTH-WEST, NORTH-WESTERLY, NORTH-WESTERN, *a.* वायुकोणस्थः -स्था -स्थं, वायुदिक्स्थः &c., वायवः -वी -वं, वायवीसम्बन्धी -न्धिनी -न्धि (न्).

NORTH-WIND, *s.* उत्तरवायुः *m.*, उत्तरदिग्वायुः *m.*, उत्तरदिक्पवनः.

NOSE, *s.* नासा -सिका, नसा, नस्या, घ्राणं, घोणा, गन्धवहा, गन्धवाहः, गन्धज्ञा, गन्धनाली, घ्रतिः *f.*, नाः *f.* (स्), नस्तः, नासिक्यं, नासिक्यकं, सिङ्घिनी, विकूणिका, तनुभस्त्रा, नक्रं, नकुटं, नर्कुटकं; 'aquiline nose,' शुकनासिका; 'having a sharp nose,' खरणसः -सा -सं, खरणाः -णाः -णः (स्); 'having a nose like a hoof,' खुरणसः -सा -सं, खुरणाः -णाः -णः (स्); 'having a flat nose,' नतनासिकः -का -कं, अवटीटः -टा -टं, अवनाटः -टा -टं, अवभ्रटः -टा -टं; 'having a prominent nose,' प्रलम्बघोणः -णा -णं; 'having a large nose,' उग्रनासिकः -का -कं; 'tip of the nose,' नासिकाग्रं, नासाग्रं; 'mucus of the nose,' नासिकामलं; 'running at the nose,' नासिकास्रावः, नासापरिस्रावः; 'thickening of the membrane of the nose,' नासानाहः; 'dryness of the nose,' नासाशोषः; 'breathing through the nose,' नासिकन्धमः -मा -मं; 'drinking through the nose,' नासिकन्धयः -यी -यं; 'led by the nose, as cattle, &c. नस्तितः, नस्तोतः, नस्योतः.

NOSE-BRIDLE, *s.* (Rein passed through the nose of an ox) नास्यं, नासिकारज्जुः *m.f.*

NOSE-CUT, *a.* छिन्ननासः -सा -सं, छिन्ननासिकः -का -कं, छिन्ननाः -नाः -नः (स्).

NOSED, *a.* (Having a nose). *See* under NOSE.

NOSEGAY, *s.* कुसुमस्तवकः, पुष्पस्तवकः, पुष्पगुच्छः -च्छकः, गुच्छः -च्छकः, गुत्सः -त्सकः, गुम्फः, गुलुञ्छः, समाली, कुटी, प्रकरः.

NOSELESS, *a* अनासिकः -का -कं, विनासिकः -का -कं, विनसः -सा -सं, गतनासिकः -का -कं, निर्नासिकः &c., नासिकाहीनः -ना -नं, नासिकाशून्यः -न्या -न्यं, विखः -खा -खं, विखुः -खुः -खु, विख्यः -ख्या -ख्यं, विख्रः &c., विख्रुः &c., विग्रः -ग्रा -ग्रं.

NOSOLOGY, *s.* रोगनिदानशास्त्रं, निदानविद्या, रोगवर्गकरणविद्या.

NOSOPOETIC, *a.* रोगकरः -रा -रं, व्याधिजनकः -का -कं, रोगोत्पादकः &c.

NOSTRIL, *s.* नासारन्ध्रं, नासिकारन्ध्रं, नासाग्ररन्ध्रं, नासाविवरं, नासिकाछिद्रं, नासापुटं, नासाविलं; 'air breathed through the nostrils,' स्वरः.

NOSTRUM, *s.* गूढौषधं, गुप्तौषधं, अप्रकाशितौषधं, मिथ्यौषधं.

NOT, *adv.* In absolute negation, denial, or refusal, 'not' is rendered by न, नो, ना, नहि. When prohibitive, by मा, मास्म, or sometimes by अलं or कृतं with instr. c. When privative, it is expressed by अ, अन्, निर्, वि prefixed; as, 'there is not,' नास्ति; 'he will not go,' न गमिष्यति; 'do not go,' मा गच्छ; 'do not grieve,' अलं शोकेन; 'not regardful,' अनपेक्षः -क्षा -क्षं, निरपेक्षः &c.; 'not at all,' अलेशं, न किञ्चिदपि; 'not so,' मैवं. In prohibitive phrases मा

may be used with the 3d pret., the augment being cut off; as, 'do not grieve' मा-शोचीः; 'do not fear,' मा-भैषीः. The interrogative 'is not?' is rendered by ननु.

NOTABLE, *a.* (Memorable) स्मरणीयः -या -यं, स्मरणार्हः -र्हा -र्हं.—(Remarkable, distinguished, notorious) विशिष्टः -ष्टा -ष्टं, विशेष in comp., प्रसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., ख्यातः -ता -तं, लोकख्यातः &c., उत्कृष्टः -ष्टा -ष्टं.

NOTABLENESS, *s.* स्मरणीयता, प्रसिद्धता, लोकप्रसिद्धता, विशिष्टता.

NOTABLY, *adv.* प्रसिद्धं, लोकप्रसिद्धं, स्मरणीयं, विशिष्टप्रकारेण.

NOTARY, *s.* कायस्थः, लेखकः, लिपिकारः, लिपिजीवी *m.* (न्), लेख्यपत्रप्रमाता *m.* (तृ), पत्रप्रमाणजीवी.

NOTATION, *s.* अङ्कनं, अङ्ककरणं, चिह्नकरणं.—(In music) प्रस्तरः.

NOTCH, *s.* छेदः, अवच्छेदः, चिच्छेदः, छिद्रं; 'of a bow,' अटनी -निः *f.*

To NOTCH, *v. a.* छिद् (c. 7. छिनत्ति, छेत्तुं), अवच्छिद्, छेदं कृ, अवच्छेदं कृ.

NOTCHED, *p. p.* अवच्छिन्नः -न्ना -न्नं, छिन्नः &c., सच्छेदः -दा -दं, सावच्छेदः &c.

NOTE, *s.* (Mark, token) चिह्नं, लक्षणं, अङ्कः -ङ्कं, लाञ्छनं, अभिज्ञानं, लक्ष्यं, कलङ्कः.—(Mark made as a memorandum) स्मरणार्थकचिह्नं, स्मरणचिह्नं, स्मरणं.—(Annotation, comment) टीका, भाष्यं, व्याख्या, टिप्पनी, वार्त्तिकं; 'with notes,' सटीकः -का -कं.—(Sound in music) स्वरः, मातृका, मूर्च्छना, कठः, क्वणः, विरिञ्चः, विरावः; 'a false note,' अपस्वरः, विस्वरः, अपक्वणः; 'a high note,' तारः; 'a cracked note,' काकस्वरः; 'key note,' वादी *m.* (न्). The notes in music are निषादः or नियदः or निषधः, ऋषभः, गान्धारः, षड्जः, मध्यमः, पञ्चमः, धैवतः, धर्षरः.—(Note of birds) रुतं, वाशितं, वाशनं.—(Notice, heed) अवेक्षा -क्षणं, अपेक्षा, मनोयोगः, लक्षं -क्ष्यं.—(Reputation) कीर्त्तिः *f.*, ख्यातिः *f.*, प्रतिष्ठा, यशस् *n.*, गौरवं; 'of little note,' अल्पकीर्त्तिः -र्त्तिः -र्त्ति, अल्पिष्टकीर्त्तिः &c. *See* NOTED. (Short letter) पत्रकं, पत्रं, लेखः, लेख्यं.—(Note of hand) पत्रलेख्यं.

To NOTE *v. a.* (Observe) लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, उपलक्ष्, अवेक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, अवेक्षां कृ, आलोक् (c. 10. -लोकयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), आलोच् (c. 10. -लोचयति -यितुं), आलोचनं कृ.—(Set down in writing, make a note of) अङ्क् (c. 10. अङ्कयति -यितुं), चिह्न् (c. 10. चिह्नयति -यितुं), स्मरणार्थकचिह्नं कृ, स्मरणपुस्तके or लेख्यपत्रे समारुह् in caus. (-रोपयति -यितुं) or आरुह्, अभिलिख् (c. 6. -लिखति -लेखितुं).

NOTE-BOOK, *s.* स्मरणपुस्तकं, स्मारकपुस्तकं, अङ्कनपुस्तकं.

NOTED, *p. p.* or *a.* (Observed) लक्षितः -ता -तं, आलक्षितः &c., उपलक्षितः &c., अवेक्षितः &c.—(Set down in writing) लेख्यारूढः -ढा -ढं, लेख्यारोपितः -ता -तं, स्मरणपुस्तकारोपितः &c.—(Celebrated) प्रसिद्धः -द्धा -द्धं, ख्यातः -ता -तं, विख्यातः &c. प्रथितः -ता -तं, विश्रुतः -ता -तं, लब्धशब्दः -ब्दा -ब्दं, लब्धप्रतिष्ठः -ष्ठा -ष्ठं.

NOTHING, *s.* (Not any thing) न किञ्चित्, न किमपि, न किञ्चन.—(Not any thing at all) न किञ्चिदपि, अलेशमपि, न कियदपि, न सूक्ष्ममपि, न स्तोकमपि.—(Non-existence, nonentity) अभावः, नास्तित्वं, नास्ति indec. असत्त्वं, अवस्तु *n.*, अवस्तुता, शून्यता -त्वं, शून्यं, असम्भवः, अविद्यमानता.—(Trifle, thing of no value) अल्पविषयः, स्वल्पविषयः, सुलघुविषयः, अल्पार्थविषयः; 'good for nothing,' व्यर्थः -र्था -र्थं, निरर्थकः -का -कं, किमर्थः -र्था -र्थं, अकिञ्चित्करः -रा -रं.

NOTHING, *adv.* न किञ्चित्, न किमपि, न किञ्चिदपि, न किञ्चन, अलेशमपि, अलेशम्, न कियदपि, न मनागपि, न मनाक्, असूक्ष्ममपि, अस्तोकमपि.

NOTHINGNESS, *s.* शून्यता, शून्यं, अवस्तुत्वं, नास्तित्वं, अभावः. *See* NONENTITY.

NOTICE, *s.* (Observation by the eye or other senses) अवलोकनं, आलोकनं, आलोचनं -ना, निरीक्षा, अवेक्षा -क्षणं, निरूपणं, दर्शनं, सन्दर्शनं, दृष्टिः *f.*, लक्षं.—(Regard, heed) अवेक्षा -क्षणं, अपेक्षा, प्रतीक्षा, अवधानं, मनोयोगः, विचारः.—(Intelligence, intimation) सन्देशः, निवेदनं, सूचना -नं, विज्ञप्तिः *f.*, उद्देशः, समुद्देशः -शनं, संवादः, बोधनं, बोधः.—(Mention) अभिधानं, कथनं, ग्रहणं, निर्देशः, उद्देशः.—(Proclamation) घोषः -षणं -णा, विघोषणं -णा, ख्यापनं; 'written notice,' घोषणापत्रं, निवेदनपत्रं, विज्ञापनपत्रं, सूचनपत्रं, बोधनपत्रं, प्रसिद्धिपत्रं.—(Respectful treatment) आदरः, सत्कारः, सत्क्रिया, मानं, सम्मानं, सम्भावना, पूजा, प्रतीतिः *f.*

To NOTICE, *v. a.* (Observe) लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, संलक्ष्, आलोक् (c. 10. -लोकयति -यितुं), अवलोक्, आलोच् (c. 10. -लोचयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, निरीक्ष्, अवेक्षां कृ.—(Heed) अवधा (c. 3. -धत्ते -धातुं), मनो धा, सावधानः -ना -नं भू, अवेक्ष्, अपेक्ष्.—(Mention) अभिधा (c. 3. -दधाति -धातुं), निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, कथ् (c. 10. कथयति -यितुं), निर्देशं कृ, उद्देशं कृ.—(Treat with attention or honor) सत्कृ, सम्मन् (c. 10. -मानयति -यितुं), सम्भू (c. 10. -भावयति -यितुं), आदृ (c. 6. -द्रियते -दर्तुं), आदरं कृ.

NOTICEABLE, *a.* लक्ष्यः -क्ष्या -क्ष्यं, लक्षणीयः -या -यं, आलक्ष्यः &c., अवेक्षणीयः &c., प्रतीक्षणीयः &c., प्रतीक्षणार्हः -र्हा -र्हं, निरूपणार्हः &c.

NOTICED, *p. p.* आलक्षितः -ता -तं, अवेक्षितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं.

NOTIFICATION, *s.* घोषणं -णा, विघोषणं -णा, विज्ञापनं -ना, विज्ञप्तिः *f.*, ज्ञप्तिः *f.*, ज्ञापनं, ख्यापनं, निवेदनं, आवेदनं, बोधनं, सूचनं -ना.—(Written notice). *See* under NOTICE.

NOTIFIED, *p. p.* विज्ञप्तः -प्ता -प्तं, विज्ञापितः -ता -तं, ज्ञप्तः &c., ज्ञापितः -ता -तं, निवेदितः &c., घोषितः &c., विघोषितः &c., प्रख्यातः &c., सूचितः &c.

To NOTIFY, *v. a.* ज्ञा in caus. (ज्ञापयति, ज्ञपयति -यितुं), विज्ञा, निविद् (c. 10. -वेदयति -यितुं), आविद्, बुध् (c. 10. बोधयति -यितुं), प्रख्या (c. 2. -ख्याति -तुं, caus. ख्यापयति -यितुं), ख्या, सूच् (c. 10. सूचयति -यितुं), घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, कृत् (c. 10. कीर्त्तयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं).

NOTION, *s.* बुद्धिः *f.*, मतिः *f.*, मनःकल्पना, बुद्धिकल्पना, कल्पना, बुद्धिकल्पितं, सङ्कल्पः, मनोगतं, मनसिजं, वासना, भावना, सम्भावना, बोधः, भासः, आभासः, प्रतिभासः; 'under the notion,' बुद्ध्या.—(Sentiment, opinion) मतं, मतिः *f.*, बुद्धिः *f.*

NOTIONAL, *a.* मनोगतः -ता -तं, मनसिजः -जा -जं, मनोजः &c., मनोभवः -वा -वं, काल्पनिकः -की -कं, मनःकल्पितः -ता -तं, सङ्कल्पजः -जा -जं, मनःसृष्टः -ष्टा -ष्टं.

NOTORIETY, NOTORIOUSNESS, *s.* प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, लोकप्रसिद्धता, प्रसिद्धत्वं, प्रकाशता, प्रकाशः, ख्यातिः *f.*, विख्यातिः *f.*, प्रख्यातिः *f.*, विश्रुतिः *f.*, लोकविश्रुतिः, प्राकट्यं, लौकिकता -त्वं, रूढिः *f.*, प्रथा, सम्प्रथा, प्रथितिः *f.*, सम्प्रतीतिः *f.*—(In a bad sense) याच्यता, कुकीर्त्तिः *f.*, कुख्यातिः *f.*, कुप्रतिष्ठा, कुप्रसिद्धिः *f.*

NOTORIOUS, *a.* प्रसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., लोकविश्रुतः -ता -तं, लोकप्रथितः -ता -तं, लोकविदितः &c., लोकसिद्धः &c., लौकिकः -की -कं, सार्वलौकिकः &c., ख्यातः -ता -तं, विख्यातः &c., प्रथितः &c., विश्रुतः &c., विज्ञातः &c., रूढः -ढा -ढं, प्रकटः -टी -टं, प्रकटितः -ता -तं.—(In a bad sense) ख्यातगर्हणः -णा -णं, याच्यः -च्या -च्यं, कुकी

धिमान् -मती -मत् (त्), कुख्यातः -ता -तं, कुख्यातिमान् &c., कुप्रसिद्धः &c.; 'a notorious offender,' महापातकी *m.* (न्).

NOTORIOUSLY, *adv.* प्रसिद्धं, लोकप्रसिद्धं, प्रकाशं, प्रकटं, ख्यातगर्हणं.

NOTUS, *s.* (South wind) दक्षिणवायुः, दक्षिणदिग्वायुः *m.*

NOTWITHSTANDING, *conj.* तथापि, परन्तु, परं, किन्तु, अथापि, तत्रापि, तदपि.

NOUGHT. *See* NAUGHT, NOTHING.

NOUN, *s.* नाम *n.* (न्), विशेष्यं, संज्ञा, सत्त्वं, द्रव्यवाचकः, पदार्थवाचकः, आख्या, शब्दः, सङ्केतशब्दः; 'noun of action,' कारकः, क्रिया; 'of agency,' कर्तृवाच्यं; 'animate,' प्राणिवाचकः; 'abstract,' भाववाचकः; 'collective,' समूहवाचकः; 'communicative,' अपादानवाच्यं; 'denominative,' क्रियावाचकः; 'ending in a vowel,' अजन्तः; 'gentile,' जातिवाचकः; 'inanimate,' अप्राणिवाचकः; 'instrumental,' कारणवाच्यं; 'inflected, or of any case,' कारकं; 'passive,' कर्मवाचकः, कर्मणिवाच्यशब्दः, सम्प्रदानवाच्यं; 'possessive,' अधिकरणवाच्यं; 'proper,' नामयाचकः; 'simple,' भाववाच्यं, लिङ्गं; 'verbal,' क्रियावाचकः.

To NOURISH, *v. a.* पुष् (c. 10. पोषयति -यितुं, c. 1. पोषति -पितुं, c. 9. पुष्णाति), परिपुष्, पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, अन्नेन सन्तृप् (c. 10. -तोषयति -यितुं) or तृप् or सन्तृप् (c. 10. -तर्पयति -यितुं) or तृप् or संवृध् (c. 10. -वर्धयति -यितुं) or वृंह् (c. 10. वृंहयति -यितुं) or आप्यै (c. 10. -प्याययति -यितुं) or जीव् (c. 10. जीवयति -यितुं), पोषणं कृ, पालनं कृ, पालनपोषणं कृ.

NOURISHABLE, *a.* पोषणीयः -या -यं, पोष्यः -ष्या -ष्यं, पालनीयः -या -यं, वृंहणीयः -या -यं, भरणीयः -या -यं, भरण्यः -ण्या -ण्यं, भार्यः &c., सम्भार्यः &c.

NOURISHED, *p. p.* पुष्टः -ष्टा -ष्टं, पोषितः -ता -तं, पुषितः &c., पालितः &c., प्रतिपालितः &c., भृतः -ता -तं, सम्भृतः &c., भरितः &c., वृंहितः &c.

NOURISHER, *s.* पोष्टा *m.* (ष्टृ), पोषयिता *m.* (तृ), पालयिता *m.*, प्रतिपालयिता *m.*, पालकः, भर्त्ता *m.* (र्त्तृ), पालनकर्त्ता *m.*, अन्नदाता *m.*, वृंहकः, अन्नदः.

NOURISHING, *a.* पोषकः -का -कं, पालकः -का -कं, प्रतिपालकः &c., पौष्टिकः -की -कं, पुष्टिदः -दा -दं, वृंहणः -णा -णी -णं, धातुपोषकः &c.

NOURISHMENT, *s.* (Act of nourishing) पोषः -षणं, पालनं, प्रतिपालनं, भरणं, भरिमा *m.* (न्), भृतिः *f.*, सम्भृतिः *f.*, आप्यायनं, वृंहणं, पुष्टिदानं, अन्नदानं.—(Food, aliment) आहारः, भोजनं, भक्ष्यं, खाद्यं, अन्नं, आहार्य्यं, अभ्याहार्य्यं, अभ्यवहारः, अभ्यवहार्य्यं, शरीरयात्रा, देहयात्रा, जीवनं -नकः, पौष्टिकं, भृतिः *f.*, सम्भृतिः *f.*, सम्भारः.

NOVEL, *a.* नवः -वा -वं, अभिनवः -वा -वं, नवीनः -ना -नं, नूतनः -ना -नं, नूत्नः -त्ना -त्नं, नव्यः -व्या -व्यं, प्रत्यग्रः -ग्रा -ग्रं, अपूर्वः -र्वा -र्वं, अभूतपूर्वः &c., अदृष्टपूर्वः &c., अश्रुतपूर्वः &c., अप्राचीनः -ना -नं, अद्भुतः -ता -तं, अलौकिकः -की -कं, विलक्षणः -णा -णं.

NOVEL, *s.* (Fictitious tale) कल्पितकथा, परिकथा, उपकथा, कथा, उपाख्यानं, आख्यानं, कृतार्थकथा, कृतार्थोपाख्यानं, मिथ्याकथा, प्रबन्धकल्पना.

NOVELTY, *s.* नवता, नवीनता, नूतनता -त्वं, नव्यता, नाव्यं, अभिनवता, प्रत्यग्रता, अपूर्वता -त्वं, अद्भुतत्वं, अलौकिकत्वं, विलक्षणता, वैलक्षण्यं.—(A novelty) नववस्तु *n.*, नूतनवस्तु *n.*, कौतुकं, आश्चर्य्यवस्तु.

NOVEMBER, *s.* मार्गशीर्षपूर्त्तिः, कार्त्तिकोत्तरार्द्धं, मार्गशीर्षः, मार्गशिरः, मार्गः, अग्रहायणः, आग्रहायणः, आग्रहायणिकः, सहाः *m.* (स्), कार्त्तिकः, कार्त्तिकिकः, बाहुलः, ऊर्जः.

NOVENNIAL, *a.* नववर्षीयः -या -यं, नववर्षीणः -णा -णं, नववार्षिकः -की -कं.

NOVERCAL, *a.* वैमात्रिकः -की -कं, वैमात्रीयः -या -यं, विमातृयोग्यः -ग्या -ग्यं.

NOVICE, *s.* नवशिष्यः, नवलात्रः, नूतनशिष्यः, नवीनशिष्यः, प्राथमकल्पिकः, शैघ्यः, क्रियाकारः, नवाभ्यासी *m.* (न्), नवीनाभ्यासी *m.*, नूतनाभ्यासी, विद्यारम्भकः.

NOVITIATE, *s.* (State) नवशिष्यत्वं, नवलात्रता -त्वं, नवलात्रदशा, नवाभ्यासित्वं, नूतनाभ्यासित्वं.—(Period of being a novice) नवाभ्यासकालः, नवीनाभ्यासित्वकालः, विद्यारम्भकालः.

NOW, *adv.* (At the present time) इदानीम्, अधुना, सम्प्रति, साम्प्रतं, अद्य, एतर्हि, इदमयं, वर्त्तमानकाले, तत्काले, सद्यस्काले, साम्प्रतकाले, अधुनातनकाले, प्रस्तुतकाले; 'now and then,' कदाचित्, कदापि, कदाचन, कर्हिचित्, जातु, काले काले, वारं वारं, अनुकालं; 'till now,' अद्यापि, अद्यावधि; 'from now,' अद्यारभ्य, अद्यप्रभृति, इतःपरं; 'just now,' अव्यवहितदीर्घकाले, नूतनकाले; 'it was but now,' नन्विदानीम्.—(As an inceptive or connective particle) अथ. अथो.—(After this) ततस्, अतस्.

NOW-A-DAYS, *adv.* साम्प्रतकाले, अधुनातनकाले, वर्त्तमानकाले, अद्य.

NO WAY, NO WAYS, NO WISE, *adv.* न कथञ्चन, न कथञ्चित्, न कथमपि, न मङ्क्षपा, न मङ्क्षयैव.

NOWHERE, *adv.* न क्वापि, न कुत्रापि, न क्वचित्, न कुत्रचित्.

NOXIOUS, *a.* हिंसः -सा -सं, हिंसकः -का -कं, हिंसालुः -लुः -लु, हिंसात्मकः -का -कं, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, अनिष्टकारी &c., अहितकारी &c., नृशंसः -सा -सं, शरारुः -रुः -रु, शारुकः -का -कं, दंशेरः -रा -रं, घातुकः -का -कं, उपघातकः &c., नंशुकः &c., अपायजनकः &c., दूष्टः -ष्टा -ष्टं, दूषकः -का -कं, बाधकः -का -कं, कुत्सितः -ता -तं.

NOXIOUSNESS, *s.* हिंसता, अपकारकत्वं, दूषकता, दुष्टता, घातुकत्वं.

NOZZLE, *s.* नासाग्रं, नासिकाग्रं, नस्तः, प्रोथः -थं, पोत्रं, मुखं, अग्रं; 'nozzled as an ox,' नस्तितः.

NUBILE, *a.* विवाह्यः -ह्या -ह्यं, विवाहयोग्यः -ग्या -ग्यं, उद्वाह्यः &c.

NUBILOUS, *a.* साभः -भा -भं, अभ्रियः -या -यं, समेघः -घा -घं, मेघाकीर्णः -र्णा -र्णं, मेघाच्छन्नः -न्ना -न्नं, मेघाच्छादितः -ता -तं. *See* CLOUDY.

NUCLEUS, *s.* समुच्चयास्पदं, सञ्चयास्पदं, हृदयं, गर्भः, बीजं.

NUDATION, *s.* नग्नीकरणं, विवस्त्रीकरणं, निर्वस्त्रीकरणं.

NUDE, *a.* नग्नः -ग्ना -ग्नं, विवस्त्रः -स्त्रा -स्त्रं, निर्वस्त्रः &c. *See* NAKED.

To NUDGE, *v. a.* घट्ट् (c. 10. घाटयति -यितुं), अरत्निना तड् (c. 10. ताडयति -यितुं).

NUDITY, *s.* नग्नता -त्वं, विवस्त्रत्वं, वस्त्रशून्यता, अपरिच्छदं. *See* NAKEDNESS.

NUGACITY, *s.* अनर्थकत्वं -ता, मोघता, निष्फलता, लाघवं, लघुता.

NUGATORY, *a.* (Vain) निरर्थकः -का -कं, अनर्थकः -का -कं, तृणप्रायः -या -यं, व्यर्थः -र्था -र्थं.—(Of no force) मोघः -घा -घं, निष्फलः -ला -लं, विफलः &c., फलहीनः -ना -नं, अनिष्पन्नः -न्ना -न्नं, निर्बलः -ला -लं, प्रभावहीनः &c., निष्प्रभावः &c., लुप्तः -प्ता -प्तं, निष्प्रमाणः &c.

NUISANCE, *s.* कष्टं, बाधा, बाधकः, पीडा, व्यथा, विडम्बना, कण्टकः -कं, उत्पातः; 'public nuisance,' लोककण्टकः; 'domestic,' गृहोत्पातः.

NULL, *a.* मोघः -घा -घं, व्यर्थः -र्था -र्थं, अनिष्पन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं, निरर्थकः -का -कं, अनर्थकः -का -कं, निष्फलः -ला -लं, विफलः -ला -लं, निष्प्रभावः -वा -वं, निर्बलः -ला -लं, निर्जीवः -वा -र्वं, वृथा indec. मुधा indec.

To NULLIFY, *v. a.* मोघीकृ, व्यर्थीकृ, अधरीकृ, निष्फलीकृ, निष्फल (nom. निष्फलयति -यितुं), विफलीकृ, लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोप-

यति -यितुं), खगइ् (c. 10. खगडयति -यितुं), निर्बलीकृ, निष्प्रभावीकृ, मुधा कृ, वृथा कृ.

Nullity, *s.* (Want of force) मोघता, व्यर्थता, निरर्थकता, अनर्थकता, ज्ञानशैथ्यं, अनिष्पन्नता, लुप्तता, निष्फलता.—(Nonentity) अभावः, नास्तित्वं, अवस्तु *n.*, शून्यता.

Numb, *a.* सुप्तः -प्ता -प्तं, सुप्तवत् *m.f.n.* (च्), जडः -डा -डं, स्तब्धः -ब्धा -ब्धं, स्तब्धचेष्टः -ष्टा -ष्टं, स्तम्भितचेष्टः &c., कुण्ठः -ण्ठा -ण्ठं, गतिशक्तिहीनः -ना -नं, स्पन्दनरहितः -ता -तं, स्तम्भितचेतनः -ना -नं, अचेतनः -ना -नं, चैतन्यरहितः &c.; 'with cold,' शीताकुलः -ला -लं.

To numb, *v. a.* जडीकृ, स्तब्धीकृ, चैतन्यं स्तम्भ् (c. 10. स्तम्भयति -यितुं, c. 5. स्तभ्नोति, स्तम्भितुं), चैतन्यस्तम्भं कृ, चेतनास्तम्भनं कृ, चैतन्यं हृ (c. 1. हरति, हर्तुं), त्वक्सुप्तिं कृ, शीताकुलीकृ.

Numbed, *p. p.* सुप्तः -प्ता -प्तं, जडीकृतः -ता -तं. *See* Numb, *a.*

Number, *s.* संख्या.—(Assemblage of two or more units) राशिः *m.*, संख्या; 'even number,' समसंख्या; 'odd,' विषमसंख्या; 'whole number,' अभिन्नं; 'five in number,' पञ्चसंख्यः -ख्या -ख्यं, पञ्चसंख्यकः -का -कं.—(Amount) संख्या, गणना, परिगणना, समुदायः, परिमाणं.—(Multitude, collection) गणः, समूहः, समवायः, भङ्गः, सङ्घातः, सञ्चयः, वृन्दं, सङ्ग्रहः, स्तोमः, राशिः *m.*, पुञ्जः, पूगः; 'a number of young women,' तरुणीगणः; 'a number of men,' पुरुषसमूहः, पुरुषसमवायः.—(A great number, many) बाहुल्यं, बहुत्वं, बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, बहुसंख्यकः -का -कं, अनेकः &c., प्रचुरः -रा -रं; 'in great number,' बहुशस्, अनेकशस्.—(Figure, arithmetical sign) अङ्कः, संख्या.—(Science of numbers) अङ्कविद्या, गणनाविद्या, गणितं, व्यक्तं; 'table of numbers,' अङ्कपत्रं, अङ्कजालं, सारणी.—(Verse) पद्यं, छन्दस् *n.*, कविता, पद्यरचना.—(In grammar) वचनं; 'singular number,' एकवचनं; 'dual,' द्विवचनं; 'plural,' बहुवचनं, अनेकवचनं.

To number, *v. a.* (Count) संख्या (c. 2. -ख्याति -तुं), परिसंख्या, सम्परिख्या, गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्, अङ्क् (c. 10. अङ्कयति -यितुं), कल् (c. 10. कलयति -यितुं), गणनां कृ, गणीकृ.—(Affix a number) अङ्क्, अङ्कं स्था in caus. (स्थापयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

Numbered, *p. p.* संख्यातः -ता -तं, गणितः -ता -तं, अङ्कितः &c., कलितः &c., गणीभूतः -ता -तं, गणीकृतः -ता -तं, परिगणितः &c.

Numberer, *s.* संख्याकृत् *m.*, गणकः, अङ्कगणकः, गणनाकारी *m.* (न्).

Numbering, *s.* गणनं -ना, परिगणनं -ना, संख्यानं, संख्याकरणं, गणितं.

Numberless, *a.* असंख्येयः -या -यं, असंख्यः -ख्या -ख्यं, अगणनीयः -या -यं, अगण्यः -ण्या -ण्यं, असंख्यातः -ता -तं, गणनातीतः -ता -तं, कोट्यब्धिः -धिः -धि.

Numbles, *s. pl.* (Entrails of a deer) मृगान्त्रं, मृगान्त्राणि *n. pl.*

Numbness, *s.* त्वक्सुप्तिः *f.*, त्वक्स्वापः, सुप्तिः *f.*, स्वापः, जडता, जाड्यं, चैतन्यस्तम्भः, चेतनास्तम्भः, चैतन्यस्तब्धता, चैतन्यराहित्यं, गतिशक्तिहीनता, कुण्ठता, भिद्रं.

Numerable, *a.* संख्येयः -या -यं, गणनीयः -या -यं, गण्यः -ण्या -ण्यं, गणेयः -या -यं, गणितव्यः -व्या -व्यं, परिगणनीयः -या -यं.

Numeral, *a.* (Pertaining to or consisting of numbers) सांख्यः -ख्यी -ख्यं, संख्यात्मकः -का -कं, संख्याविषयः -या -यं, संख्यासम्बन्धी -न्धिनी &c., संख्यावाचकः &c., गणनासम्बन्धी &c., अङ्की -ङ्किनी &c., अङ्कात्मकः &c.

Numeral, *s.* (Figure) अङ्कः, संख्या, संख्याचिह्नं, गणनाचिह्नं.

Numerally, *adv.* संख्यानुसारात् -रेण, यथासंख्यं, संख्यावत्.

Numerary, *a.* अमुकसंख्यासम्बन्धी -न्धिनी &c., अमुकसंख्यः -ख्या -ख्यं.

Numeration, *s.* संख्यानं, संख्यता, गणना, परिगणना, संख्यापरिमाणं.

Numerator, *s.* (Of a fraction) अंशः, लवः, भागः, हारः, हारकः; 'numerator and denominator together,' राशिः *m.*

Numerical, *a.* सांख्यः -ख्यी -ख्यं, यथासंख्यः -ख्या -ख्यं, संख्यापेक्षकः -का -कं, संख्योद्देशकः -का -कं, संख्यासम्बन्धी &c. *See* Numeral, *a.*

Numerically, *adv.* यथासंख्यं, संख्यामपेक्ष्य, संख्यामुद्दिश्य, यथागणनं; गणनां कृत्वा, संख्यां कृत्वा or गणयित्वा.

Numerous, *a.* बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, बहुसंख्यकः -का -कं, बहुसंख्यः -ख्या -ख्यं, महासंख्यः &c., अनेकः -का -कं, प्रचुरः -रा -रं, भूरिः -रिः -रि, भूयिष्ठः -ष्ठा -ष्ठं, भूयान् -यसी -यः (स्), नैकः -का -कं, पुष्कलः -ला -लं, प्राज्यः -ज्या -ज्यं, विपुलः -ला -लं.

Numerously, *adv.* बहुशस्, अनेकशस्, बाहुल्येन, सङ्ख्यशस्.

Numerousness, *s.* बहुत्वं, बाहुल्यं, अनेकत्वं -ता, अनैक्यं, बहुसंख्यत्वं.

Numismatic, *a.* मुद्राविषयः -या -यं, नाणकविषयकः &c., मुद्रासम्बन्धी &c.

Numismatics, *s.* मुद्राविद्या, नाणकविद्या, मुद्राविषयका विद्या.

Numskull, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, अल्पबुद्धिः, जडधीः.

Nun, *s.* मठनियासिनी, मठवासिनी, संसारत्यागिनी, लोकत्यागिनी, सङ्गपरित्यागिनी, सद्मवासिनी, तपस्विनी, वैरागिणी, तपोनिष्ठा, तपस्यासक्ता, धर्म्मभगिनी, ब्रह्मचारिणी, यौगिनी.

Nuncio, *s.* रोमीयधर्म्माध्यक्षसकाशात् दूतः, महाधर्म्माध्यक्षदूतः.

Nuncupative, nuncupatory, *a.* साक्षात् कथितः -ता -तं, अलिखितः &c.

Nunnery, *s.* धर्म्मभगिनीमठः, तपस्विनीमठः, ब्रह्मचारिणीमठः.

Nuptial, *a.* वैवाहिकः -की -कं, उद्वाहिकः -का -कं, औद्वाहिकः -की -कं, पाणिग्रहणिकः -की -कं, विवाहीयः -या -यं, विवाही -हिनी -हि (न्), उद्वाही &c., विवाहसम्बन्धी &c., विवाह in comp.; 'nuptial feast,' विवाहमहोत्सवः; 'nuptial gift,' यौतकं, औद्वाहिकं, पारिणाय्यं, हरणं, मुदायः -यं.

Nuptials, *s. pl.* विवाहः, उद्वाहः, परिणयनं, विवाहविधिः *m.*, विवाहक्रिया, विवाहसंस्कारः, पाणिग्रहणं.

Nurse, *s.* धात्री, धात्रेयी -यिका, अङ्कपाली, उपमाता *f.* (तृ), मातृका, प्रतिपालिका, पालयित्री, धन्या, पयः *f.*—(In sickness) उपचारकर्त्री, उपचारिका, रुग्नपरिचारिका, रोगार्त्तपालिका, रोगसेविका.—(Fosterer, cherisher) पालकः, प्रतिपालकः, पालयिता *m.* (तृ), पोषकः, पोष्टा *m.* (ष्टृ).

To nurse, *v. a.* (Foster, take care of a child, &c.) पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, अङ्के पाल्, क्रोडे पाल्, पुष् (c. 1. पोषति, c. 9. पुष्णाति, c. 10. पोषयति -यितुं) or परिपुष्, क्रोडीकृ, अङ्कीकृ.—(Attend upon a sick person) रोगिणम् उपचर् (c. 1. -चरति -रितुं) or परिचर् or पाल् or प्रतिपाल् or सेव् (c. 1. सेवते -वितुं) or उपसेव्.—(Suckle) दुग्धं or स्तन्यं or स्तनं दा (c. 3. ददाति, दातुं) or पा in caus. (पाययति -यितुं) or धे in caus. (धापयति -यितुं), स्तनदानेन or स्तन्यदानेन पुष् or पाल्.—(Nourish, cherish) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, पाल्.

Nursed, *p. p.* पालितः -ता -तं, अङ्के पालितः -ता -तं or प्रतिपालितः &c., पोषितः -ता -तं, पुष्टः -ष्टा -ष्टं, भरितः -ता -तं. —(In sickness, &c.) उपचरितः -ता -तं.

Nursery, *s.* बालस्थानं, बालगृहं, बालकस्थानं, पालनस्थानं, पोषणस्थानं.

Nursery-man, *s.* पुष्पाजीवी *m.* (न्), पुष्पशाकोत्पत्तिजीवी *m.* (न्).

Nursing, *s.* पालनं, अङ्कपालनं, अङ्कपालिका, प्रतिपालनं, पोषणं, भरणं, चुलुम्पः, लालनं, क्रोडीकरणं.—(In sickness, &c.) उपचारः.

NURSLING, *s.* स्तनन्धयः -या, स्तनपः -पा -पाः *m.*, स्तनपायी *m.* (न्), बालः.

NURTURE, *s.* (Nourishment, food) आहारः, भक्ष्यं, शरीरयात्रा, भृतिः *f.*, सम्भृतिः *f.*, पौष्टिकं.—(Education, bringing up) शिक्षा, उपदेशः, अभ्यासः, पुष्टिः *f.*, पोषः -षणं, पालनं, प्रतिपालनं, भरिमा *m.* (न्).

To NURTURE, *v. a.* (Nourish) पुष् (c. 10. पोषयति -यितुं), परिपुष्, पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्तुं), पालनं कृ, पोषणं कृ.—(Educate) शिक्ष् (c. 10. शिक्षयति -यितुं), विनी (c. 1. -नयति -नेतुं).

To NUSTLE, *v. a.* अङ्के पाल् (c. 10. पालयति -यितुं), अङ्कीकृ, क्रोडीकृ.

NUT, *s.* खाद्यबीजगर्भेण अखाकृति दृढफलं or घनफलबीजं.

NUTANT, *a.* प्रणतशिराः -राः -रः (स्), अवनतशिराः &c., नतशिराः &c.

NUT-BROWN, *a.* पूर्णोरुफलवत् श्यावः -वा -वं or श्यामः -मा -मं.

NUT-CRACKERS, *s. pl.* सन्दंशः, सन्दंशकं, सन्दंशका.

NUTMEG, *s.* जातिकोशं, जातिफलं, जातिः -ती *f.*, जातीकोशं, जातीकोषं, जातीफलं, समुद्गजं, पुन्नागः, द्विधात्मकं, लघु, तुखं. *See* MACE.

NUTRIMENT, *s.* (Food) आहारः, भोजनं, पौष्टिकं. *See* NOURISHMENT.

NUTRITION, *s.* (Act) पोषणं, पुष्टिः *f.*, पोषः, आप्यायनं. *See* NOURISHMENT.

NUTRITIOUS, NUTRITIVE, *a.* पौष्टिकः -की -कं, पुष्टिदः -दा -दं, पोषकः -का -कं, धातुपोषकः &c., धातुवर्धकः -का -कं, पुष्टिकरः -री -रं, पुष्टिकारकः -का -कं, पुष्टिजनकः &c., धातुभृत् *m. f. n.*, बलवर्धकः &c., बलवर्धनः -ना -नं, बृंहणः -णा -णी -णं.

NUTSHELL, *s.* बीजकत्वचः -चं, बीजकचुकः, बीजपुटः.

NUX-VOMICA, *s.* (Poisonous fruit) वरखरा.

NYCTALOPS, *s.* रात्रिदृष्टिः *m. f.*, निशादृष्टिः *m. f.*, रात्रिदृक् *m.* (श्).

NYCTALOPY, NYCTALOPIA, *s.* रात्रिदृष्टिः *f.*, निशादृष्टिः *f.*

NYMPH, *s.* अप्सराः *f.* (स्), अप्सरा, जलवनदेवता, जलदेवता, वनदेवता, जलदेवी, वनदेवी, जलवनदेवी, नदीदेवता, यक्षिणी, विद्याधरी.—(Beautiful woman, lass) सुन्दरी, मुग्धा, प्रमदा, तन्वङ्गी, कन्या.

NYMPH-LIKE, *a.* अप्सरायोग्यः -ग्या -ग्यं, अप्सरस्तुल्यः -ल्या -ल्यं.

NYMPHOMANIA, *s.* (A disease) अतिचरणा.

O.

O! *exclam.* (Vocative) भोः, भोस्, भो, भोभो, हे.—(To inferiors) रे, अरे, अरेरे, है, अहो.—(Expressive of surprise, grief, anger, &c.) आ, आः, हा, अहह, अहहा, हन्त, अहो, अहोवत्.

OAF, *s.* स्थूलबुद्धिः *m.*, स्थूलजनः, मन्दबुद्धिः, जडबुद्धिः, मूर्खः, मूढः, चर्चरः.

OAFISH, *a.* स्थूलस्वभावः -वा -वं, मन्दस्वभावः &c., अबुद्धिः -द्धिः -द्धि.

OAK, *s.* सिन्दूरः, सिन्दूरवृक्षः, वनवृक्षभेदः, वन्यपादपभेदः, वनराजिः.

OAKEN, *s.* सिन्दूरकाष्ठमयः -यी -यं, सिन्दूरवृक्षनिर्म्मितः -ता -तं.

OAKUM, *s.* जीर्णरज्जुखण्डः, शणखण्डः, खण्डितरज्जुः *m. f.*, शणभूचकं.

OAR, *s.* क्षेपणिः -णी *f.*, क्षिपणिः -णी, अपणी, नौकादण्डः, नौदण्डः, अरित्रं, अरित्रं, तरदण्डः, तरित्रः.

OARED, *a.* दण्डवान् -वती -वत् (त्), दण्डी -ण्डिनी -ण्डि (न्); 'four-oared,' चतुर्दण्डवान् &c., चतुर्दण्डी &c.

OARSMAN, *s.* नौकादण्डधरः -धारी *m.* (न्), नौदण्डचालकः.

OASIS, *s.* मरुभूमिमध्यगतं शाद्वलस्थलं, मरुमध्यस्थं शाद्वलस्थानं.

OAT, *s.* ओट्संज्ञकः शस्यभेदः or धान्यभेदः.

OATEN, *a.* पूर्णोरुशस्यमयः -यी -यं, पूर्णोरुधान्यचूर्णमयः &c.

OATH, *s.* शपथः, शापः, शपः -पनं, अभिशापः, परिशापः, दिव्यं, सत्यं, समयः, प्रत्ययः, अभीषङ्गः, अभिषङ्गः, परिग्रहः, क्रिया; 'to take an oath,' शप् (c. 1. शपति -ते, c. 4. शप्यति -ते, शप्तुं), अभिशप्, शपथं कृ, शपथं शप्; 'he took an oath,' शपथं शेपे; 'to administer an oath,' शप् (c. 10. शापयति -यितुं); 'made to take an oath,' शापितः -ता -तं; 'with an oath,' सशपथं, शपथपूर्व्वं, शपथपुरःसरं.

OATH-BREAKING, *s.* शपथभङ्गः, दिव्यभङ्गः, मिथ्याशपथः, मिथ्यादिव्यं.

OAT-MEAL, *s.* ओट्संज्ञकशस्यचूर्णं, पूर्णोरुधान्यचोदः.

OBDURACY, *s.* स्तब्धचित्तता, चित्तस्तब्धता, स्तब्धता, कठिनचित्तत्वं, चित्तकाठिन्यं, कठिनता, दृढता, दार्ढ्यं, अननुतापशीलता, अनुतापविमुखता, आग्रहः, आग्रहशीलता, पापाग्रहः, पापात्यागः.

OBDURATE, *a.* स्तब्धचित्तः -त्ता -तं, कठिनचित्तः &c., दृढचित्तः &c., अननुतापशीलः -ला -लं, अनुतापविमुखः -खा -खं, अनुतापपराङ्मुखः -खा -खं, दुराग्रही -हिणी -हि (न्), पापाग्रही &c., पापात्यागी &c.

OBDURATELY, *adv.* स्तब्धचित्तत्वात्, कठिनचित्तत्वात्, सकाठिन्यं.

OBEDIENCE, *s.* आज्ञानुवर्त्तनं, आज्ञानुसरणं, आज्ञाकरणं, आज्ञापालनं, आज्ञानुवृत्तिः *f.*, आज्ञानुकूलता, आज्ञानुकूल्यं, आज्ञाग्राहित्वं, आज्ञाधारणं, आज्ञाधीनता, आज्ञानुरोधः, आज्ञासेवनं, आदेशकरणं, निदेशकरणं, आज्ञापरता, आज्ञानुविधायिता, वशता, वश्यता, शुश्रूषा -षणं, अनुवर्त्तनं, अनुवृत्तिः *f.*, अनुकूलता, आनुकूल्यं, वशवर्त्तनं, मान्यता, आज्ञामाननं, वशीभूतता.

OBEDIENT, *a.* आज्ञानुवर्त्ती -र्त्तिनी -र्त्ति (न्), आज्ञापालकः -का -कं, आज्ञाधीनः -ना -नं, आज्ञानुयायी &c., आज्ञानुसारी &c., आज्ञाकरः -री -रं, आज्ञाकारी &c., आदेशकारी &c., निदेशकारी &c., आदेशकरः &c., वचनकरः &c., वचस्करः &c., आज्ञासेवी &c., आज्ञापरः -रा -रं, अनुशासनपरः &c., वशः -शा -शं, वश्यः -श्या -श्यं, वशवर्त्ती &c., वशानुगः -गा -गं, शुश्रूषुः -षुः -षु, आज्ञावहः -हा -हं, आज्ञावाहकः -का -कं, आज्ञासम्पादकः &c., आज्ञासम्पादी &c., आज्ञाधारी &c., अनुवर्त्ती &c., अनुविधायी &c., विधायी &c., अनुकूलः -ला -लं, सेवी &c., आज्ञाग्राही &c., वचनग्राही &c., निदेशग्राही &c., आज्ञयः -या -यं, अधीनः -ना -नं; 'obedient to a parent,' पितृवाक्परः -रा -रं, पितृवचनकरः -रा -रं, पितृवशः -शा -शं, पितृवशानुगः &c.

OBEDIENTLY, *adv.* शुश्रूषया, सानुवर्त्तनं, आज्ञानुवर्त्तनपूर्व्वं, सानुकूल्यं, आज्ञानुसारेण -रतस्, आज्ञानुवर्त्तनेन, यथादिशं, यथादेशं, यथाज्ञं, यथानुज्ञं.

OBEISANCE, *s.* नमस्कारः, प्रणामः, प्रणतिः *f.*, प्रणिपातः, प्रणिपतनं, नमस् indecl., नमस्या, सन्नतिः *f.*, नतिः *f.*, नमनं, विनयः, विनीतिः *f.*, उपसङ्ग्रहः; 'from inferiors to superiors,' अञ्जलिः *m.*, अञ्जलिकर्म्म *n.* (न्), अञ्जलिबन्धनं, वन्दनं; 'from a Brahman,' आशीर्वादः; 'from an inferior to a religious preceptor, Guru, &c.,' अभिवादनं, अभिवन्दनं; 'from Hindús of inferior caste,' दण्डवत्; 'to an idol, &c.,' वन्दनं.—(Profound obeisance with all the members of the body) साष्टाङ्गप्रणामः, साष्टाङ्गनमस्कारः, अष्टाङ्गपातः, अष्टाङ्गप्रणामः; 'to make obeisance,' नमस्कृ, प्रणम् (c. 1. -णमति -णन्तुं), शिरसा प्रणम्, कार्य्य प्रणम्, प्रणिपत् (c. 1. -पतति -पितुं), साष्टाङ्गपातं प्रणिपत्; 'having made obeisance,' प्रणम्य.

OBELISK, *s.* सूच्याकारः स्तम्भः, दीर्घप्रस्तरमयः स्तम्भविशेषः.

OBERRATION, *s.* भ्रमणं -णा, परिभ्रमणं, पर्य्यटनं, इतस्ततो भ्रमणं.

OBESE, *a.* मेदस्वी -स्विनी -स्वि (न्), पीनः -ना -नं, पीवरः -रा -रं, स्थूलः -ला -लं, स्थूलकायः -या -यं, मांसलः -ला -लं.

OBESENESS, OBESITY, *s.* मेदस्विता, मेदोवृद्धिः *f.*, स्थूलता, पीनता.

To OBEY, *v. a.* आज्ञां or वचनं अनुवृत् (c. 1. -वर्त्तते -वर्त्तितुं), यथादिशम् अनुज्ञा (c. 1. -तिशति -ज्ञातुं), यथाज्ञं विधा (c. 3. -दधाति -धातुं) or कृ, शु in des. (शुश्रूषते -षितुं), अनुविधा in pass. (-धीयते), अनुरुध् in pass. (-रुध्यते), सेव् (c. 1. सेवते -वितुं), उपसेव्, आज्ञां or

वचनं प्रतीष् (c. 6. -इच्छति -इषितुं) or सम्प्रतीष्, उपचर् (c. 1. -चरति -रितुं), उपाचर्, उपास् (c. 2. -आस्ते -आसितुं), पर्युपास्, सनुपास्, अभ्युपे (c. 2. अभ्युपैति -तुं, rt. इ), मन् (c. 10. मानयति -यितुं), आज्ञां पाल् (c. 10. पालयति -यितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or प्रतिग्रह् अनुकूल (nom. अनुकूलयति -यितुं), उपजीव् (c. 1. -जीवति -वितुं), आज्ञानुवर्त्तनं कृ.—(Submit to the control of another) परवशीभू, परवशं गम् (c. 1. गच्छति, गन्तुं).

OBEYED, *p. p.* श्रुतधितः -ता -तं, यथादिष्टम् अनुष्ठितः -ता -तं or विहितः -ता -तं, मानितः -ता -तं, पर्युपासितः -ता -तं, सेवितः -ता -तं.

To OBFUSCATE, *v. a.* मलिनीकृ, तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, कलुषीकृ, मलिन (nom. मलिनयति -यितुं).

OBFUSCATED, *p. p.* मलिनीकृतः -ता -तं, तिमिरीकृतः &c., कलुषीकृतः &c.

OBFUSCATION, *s.* कलुषीकरणं, मलिनीकरणं, निष्प्रभता, सान्धकारता.

OBIT, *s.* मृतक्रिया, मृतकर्म्म *n.* (न्), अन्वयकर्म्म *n.* *See* OBSEQUIES.

OBITUARY, *s.* (List of the dead) मृतसंख्यापत्रं, मृतपरिसंख्या, मृतनामावलिपत्रं.—(Account of the dead) मृतवर्णनं -ना, मृतचरितं, मृतविवरणं.

OBJECT, *s.* (That about which any power or faculty is employed, or by which something is presented to the mind) विषयः, अर्थः, इन्द्रियार्थः, गोचरः, पात्रं, भाजनं, भूमिः *f.*, आस्पदं, स्थानं. The first four of these words refer properly to objects of sense, of which five are given, viz. 'form,' रूपं; 'sound,' शब्दः; 'odour,' गन्धः; 'flavor,' रसः; 'touch,' स्पर्शः. The other words are used elegantly in composition, thus, 'an object of confidence,' विश्वासपात्रं, विश्वासभूमिः *f.*, विश्वासास्पदं, विश्वासस्थानं; 'of affection,' स्नेहभूमिः *f.*, प्रीतिपात्रं; 'of favor,' प्रसादभूमिः *f.*; 'of compassion,' कृपापात्रं, दयाभाजनं; 'of disgrace,' अभिभवास्पदं; 'of blame,' निन्दापात्रं, निन्दाविषयः; 'of praise,' स्तुतिभाजनं; 'of honor,' मानभाजनं; 'of charity or liberality,' दानपात्रं; 'of dispute or litigation,' व्यवहारविषयः, व्यवहारस्थानं; 'of taxation,' शुल्कस्थानं; 'deserving object of charity, &c.,' सुपात्रं, पात्रं; 'undeserving,' कुपात्रं, अपात्रं; 'visible object,' चक्षुर्विषयः.—(Purpose, end, that to which the mind is directed) अभिप्रायः, आशयः, अभिप्रेतं, अर्थः, विषयः, उद्देशः, तात्पर्यं, कार्यं, कार्यवस्तु *n.*, प्रयोजनं, प्रयोगः, अभिसन्धिः *m.*, प्राप्तिर्यं, इष्टं, पदार्थः, लक्ष्यं, लक्ष्यं, हेतुः *m.*, निमित्तं, अवभूमिः; 'accomplishment of one's object,' स्वार्थसिद्धिः *f.*, कार्यसिद्धिः *f.*, इष्टसिद्धिः *f.*, कृतार्थता, चरितार्थता, इष्टावाप्तिः *f.*, आशाप्राप्तिः *f.*; 'one who has accomplished his object,' कृतार्थः -र्था -र्थं, चरितार्थः &c., प्राप्तार्थः &c., कृतकृत्यः -त्या -त्यं, आशाप्राप्तः -प्ता -प्तं; 'I have gained my object,' कृतार्थोऽस्मि, चरितार्थोऽस्मि; 'one's own private object or end,' स्वार्थः, स्वहितं, स्वसाधनं; 'highest object,' परमार्थः; 'important object,' गुरर्थः; 'the four objects of human pursuit collectively,' चतुर्वर्गः, चतुष्टयं; these are 'virtue,' धर्मः; 'wealth,' अर्थः; 'love,' कामः; 'final beatitude,' मोक्षः; 'the three objects without the last,' त्रिवर्गः, त्रिवर्गं; 'with what object,' किमर्थं, किमुद्दिश्य.—(In grammar) कर्म्म *n.* (न्), कर्म्मपदं.

To OBJECT, *v. a.* or *n.* वाध् (c. 1. वाधते -धितुं), बाधार्थं हेतुं वद् (c. 1. वदति -दितुं), विरुद्धहेतुं वद्, बाधां कृ, बाधार्थं वचनं वद्, विरुद्धवचनं वद्, अपवद्, विवदद्, विपरीतं वद्, अवरीकृ, वितण्ड् (c. 1. -तण्डते -ण्डितुं), पर्य्युदस् (c. 4. -अस्यति -असितुं), निरस्, विरोधार्थं वचनं वद्, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, न सम्मन् (c. 4. -मन्यते -मन्तुं), न अनुमन्, न प्रतिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), न अनुमुद् (c. 1. -मोदते -दितुं), न स्वीकृ, अस्वीकारं कृ, असम्मतिं कृ, असम्मतः -ता -तं भू, अननुमोदनं कृ, उद्ग्राहं कृ, परवाक्यं खण्ड् (c. 10. खण्डयति -यितुं), व्याघातं कृ, आपत्तिं कृ.

OBJECTED TO, *p. p.* पर्य्युदस्तः -स्ता -स्तं, अपवादितः -ता -तं, अस्वीकृतः -ता -तं.

OBJECTION, *s.* बाधा -धः -धकं, विरुद्धहेतुः *m.*, बाधार्थकहेतुः *m.*, विरुद्धवचनं, उद्ग्राहः, कक्षा, अपवादः, शङ्का, आशङ्का, अपवादः, विपरीतवचनं, वाक्यखण्डनं, वाक्यविरोधः, व्याघातः, प्रतिबन्धः, आपत्तिः *f.*, विप्रतिपत्तिः *f.*, प्रत्यवायः, वितण्डा, आक्षेपः, पर्य्युदासः; 'making an objection,' विरुद्धहेत्ववादः, कक्षावादः; 'settling an objection,' समाधिः *m.*, समाधानं.

OBJECTIONABLE, *a.* बाध्यः -ध्या -ध्यं, बाधनीयः -या -यं, सबाधः -धा -धं, परिहरणीयः -या -यं, परिहार्य्यः -र्य्या -र्य्यं, वर्जनीयः -या -यं, वर्ज्यः -र्ज्या -र्ज्यं, अपवाद्यः -द्या -द्यं, सदोषः -षा -षं, प्रतिषेधार्हः -र्हा -र्हं, निषेधार्हः &c., शङ्कनीयः -या -यं, आशङ्कनीयः &c., प्रतिबन्धार्हः &c.: 'objectionable person or thing,' परिहारः.

OBJECTIONABLENESS, *s.* बाध्यता, सबाधत्वं, बाधः, सदोषता.

OBJECTIVE, *a.* (Pertaining to the object) स्वाधारस्थितः -ता -तं, स्वाधारनिष्ठः -ष्ठा -ष्ठं, विषयाश्रितः -ता -तं, विषयनिष्ठः &c., पदार्थाश्रितः -ता -तं, विषयसम्बन्धी -न्धिनी &c., पात्रनिष्ठः &c., पात्रसम्बन्धी &c.—(In grammar) कर्म्मपदविषयः -या -यं.

OBJECTOR, *s.* बाधकः, विरुद्धहेतुवादी *m.* (न्), कक्षावादी, अपवादकः.

To OBJURGATE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), उपालभ् (c. 1. -लभते -लब्धुं), आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), समाक्रुश् भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), क्षिप् (c. 6. क्षिपति, क्षेप्तुं), अवक्षिप्, आक्षिप्, अधिक्षिप्, धिक्कृ.

OBJURGATION, *s.* निन्दा, उपालम्भः, तिरस्कारः, भर्त्सनवाक्यं, निर्भर्त्सनं, क्षेपः, अवक्षेपः, धिक्कारः, परीवादः.

OBJURGATORY, *a.* निन्दकः -का -कं, निन्दार्थकः -का -कं, तिरस्कारार्थकः &c.

OBLATION, *s.* (Offering to the gods, &c.) बलिः *m.*, उपहारः, देवोपहारः, उपहरणं, हुतं, हव्यं, होमः, हुतहोमं, आहुतिः *f.*, आहवनं -वनं, हवनं, उपायनं, देवोपायनं, कव्यं, निर्वपणं, अवदानं, सत्रं, चरुः *m.*, प्रयागः, इष्टिः *f.*, वैतानं, वितानः -नं, सवः, पाकौरः, कुरुहपाय्यः.—(Of eatable articles, &c.) नैवेद्यं, निवेदनं.—(Of curds) पृषदाज्यं.—(Of rice-milk and sugar) परमान्नं, पायसः.—(A respectful oblation of rice, &c. with water) अर्घ्यं, अर्घः; 'the presentation of it,' अर्घदानं.—(Oblation to all the deities) वैश्वदेवं, वैश्वदेवकर्म्म *n.*—(To the manes) कव्यं. *See* MANES. (To the gods and manes) हव्यकव्यं; 'dressed oblation,' हव्यपाकः; 'grand and extraordinary oblation,' महाबलिः *m.*, महानैवेद्यं; 'proper for an oblation,' हव्यः -व्या -व्यं; 'to make an oblation to fire,' अनले होमं कृ.

OBLECTATION, *s.* आनन्दः, आह्लादः, हर्षः, प्रमोदः, मदः.

To OBLIGATE, *v. a.* बन्ध् (c. 9. बध्नाति, बन्धुं), निबन्ध्, बद्धं -द्धां -द्धं कृ, नियमेन बन्ध्, नियमपूर्व्वं or प्रतिज्ञापूर्व्वं, बन्ध्.

OBLIGATION, *s.* (Binding power, as of a vow, promise, debt, &c., incumbency) अवश्यकता -त्वं, आवश्यकता, अवश्यकर्त्तव्यता -त्वं, अवश्यकार्य्यता, कर्त्तव्यता, विधेयता, अवश्यभावः, आवश्यं, भारः, ऋणं; 'under the obligation of a debt,' ऋणी -णिनी -णि (न्); 'free from obligation,' अनृणी &c., अवतीर्णः -र्णा -र्णं, उत्तीर्णः

&c., ऋणमुक्तः -क्ता -क्तं; 'religious obligation,' व्रतं, यमः, नियमः, विधयः; 'under a religious obligation,' व्रती &c., व्रतस्थः -स्था -स्थं; 'observing or taking on one's self a religious obligation,' व्रताचरणं, व्रतसङ्ग्रहः; 'violating it,' व्रतलोपः -पनं. —(Engagement, compact) नियमः, समयः, प्रतिज्ञा -ज्ञानं, संविद् *f.*, संस्कारः, उपगमः, अभ्युपगमः, अभ्युपायः, सन्धा, सन्धानं, सन्धिः *m.*, संश्रवः.—(Bound state) बद्धता, निबद्धता.—(Favor, any act by which a person becomes bound to another) उपकारः, अनुग्रहः, उपकृतं, सुकृतं, हितं, प्रियं, उपचारः, कृतोपकारः; 'to lay under an obligation,' उपकृ, उपकारेण बद्धं-द्धां कृ, उपकारबद्धं-द्धां कृ.

OBLIGATORY, *a.* अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यः -श्या -श्यं, अवश्यकार्य्यः -र्य्या -र्य्यं, अवश्यमनव्यः -व्या -व्यं, अवश्यमाननीयः -या -यं, अवश्यपालनीयः -या -यं.

To OBLIGE, *v. a.* (Constrain, compel). Expressed by the causal form usually in conjunction with बलात् or बलेन or बलात्कारेण; as, 'to oblige a man to do any thing,' बलेन पुरुषं किञ्चित् कृ in caus. (कारयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं); 'to oblige to pay,' दा in caus. (दापयति -यितुं); 'to oblige to go,' बलेन गम् (c. 10. गमयति -यितुं); 'he obliged me to take the book,' शास्त्रं मां ग्राहयामास. The root अर्ह् is sometimes used in this sense. *See To* COMPEL. (Bind) बन्ध् (c. 9. बध्नाति, बन्द्धुं), निबन्ध्.—(By a compact or agreement) नियमेन or नियमपूर्व्वं or प्रतिज्ञापूर्व्वं बन्ध्.—(By a favor or kindness) उपकारेण बन्ध् or बद्धं -द्धां कृ, उपकारबद्धं -द्धां कृ.—(Favor, do a favor to) अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुग्रहं कृ, अनुरुध् (c. 4. -रुध्यति -ते -रोद्धुं), उपकृ, उपकारं कृ, साहाय्यं कृ, हितं कृ, प्रियं कृ; 'to be obliged.' *See* the next.

OBLIGED, *p. p.* (Compelled) expressed by the pass. part. of the causal form. *See* COMPELLED, CONSTRAINED. (Bound) बद्धः -द्धा -द्धं; 'by a favor,' उपकारबद्धः &c.—(Favored, indebted) अनुगृहीतः -ता -तं, उपकृतः -ता -तं; 'I am obliged to you for your advice,' अनुगृहीतोऽस्मि or अनुगृहीतोऽहं तवोपदेशेन.

OBLIGING, *a.* (Having the disposition to do favors) उपकारशीलः -ला -लं, उपकारी -रिणी -रि (न), परोपकारी &c., उपकारबुद्धिः -द्धिः -द्धि, अनुग्राही &c., अनुरोधी &c., अनुकूलः -ला -लं, प्रियङ्करः -रा -रं, मृशीलः -ला -लं.

OBLIGINGLY, *adv.* उपकारशीलत्वात्, उपकारबुद्ध्या, सानुग्रहं, अनुग्रहेण, अनुरोधेन, सानुकूल्यं, प्रीत्या, मृशीलत्वत्, मृशीलत्वात्.

OBLIGINGNESS, *s.* उपकारशीलता, परोपकारशीलता, परोपकारिता, अनुग्रहः, अनुग्रहशीलता, अनुरोधः, अनुकूलता, सानुकूल्यं, मृशीलता.

OBLIQUE, *a.* (Not direct) वक्रः -क्रा -क्रं, वक्रिमः -मा -मं, कुटिलः -ला -लं, जिह्मः -ह्मा -ह्मं, विजिह्मः &c., तिर्य्यङ् -र्य्यग् यंक (च), अमरलः -ला -लं, अनृजुः -जुः -जु, वक्री -क्रिणी -क्रि (न), विषमः -मा -मं, (As language, &c.) वक्रः -क्रा -क्रं, अस्पष्टः -ष्टा -ष्टं, उपरोधी &c.; 'oblique speech,' वक्रोक्तिः *f.*, वक्रभणितं.—(In grammar) कारकविभक्तिकः -का -कं; 'oblique case,' कारकं, कारकविभक्तिः *f.*, कारकं.—(Oblique vision) वक्रदृष्टिः *f.*; 'having it,' वक्रदृष्टिः -ष्टिः -ष्टि, तिर्य्यग्दृष्टिः &c.

OBLIQUELY, *adv.* वक्रं, कुटिलं, तिर्य्यक्, तिरस्, जिह्मं, विजिह्मं, अमरलं.

OBLIQUENESS, OBLIQUITY, *s.* वक्रता, कुटिलता, कौटिल्यं, जिह्मता, तिर्य्यक्त्वं, अमरलता, अमारल्यं, अनृजुता -त्वं, विषमता; 'of vision,' वक्रदृष्टिः *f.*, दृष्टिवक्रता, वक्रदृष्टित्वं, तिर्य्यग्दृष्टित्वं.—(Deviation from moral rectitude) विमार्गगमनं, विपथगमनं, उत्पथगमनं, कुपथगमनं, सत्पथभ्रंशः, सत्पथत्यागः, असदाचारः, व्यभिचारः.

To OBLITERATE, *v. a.* अपमृज् (c. 2. -मार्ष्टि -ष्टुं), व्यामृज्, प्रमृज्, अवमृज्, व्यामृश् (c. 6. -मृशति -ष्टुं), अवमृश्, व्यामर्षं कृ, अवमर्षणं कृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, विनश् (c. 10. -नाशयति -यितुं), उन्मूल् (c. 10. -मूलयति -यितुं); 'is obliterated from the memory,' विस्मार्य्यते.

OBLITERATED, *p. p.* अपमृष्टः -ष्टा -ष्टं, व्यामृष्टः &c., उन्मृष्टः &c., उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं, चितीर्णः -र्णा -र्णं.

OBLITERATION, *s.* मार्जना, अपमार्जना, व्यामर्षः, अवमर्षणं, लोपः.

OBLIVION, *s.* विस्मृतिः *f.*, विस्मरणं, असम्मृतिः *f.*, असरणं, स्मृतिनाशः, स्मृतिहानिः *f.*, व्यामोहः.—(Remission of offences) दोषविस्मरणं, सकलापराधमोचनं.

OBLIVIOUS, *a.* (Causing forgetfulness) विस्मारकः -का -कं, विस्मृतिजनकः -का -कं, विस्मृतिकारकः &c.—(Forgetful) विस्मरणशीलः -ला -लं.

OBLIVIOUSNESS, *s.* विस्मरणशीलता, विस्मृतिः *f.* *See* FORGETFULNESS.

OBLONG, *a.* आयतः -ता -तं, आयतिमान् -मती -मत् (त्), दीर्घचतुरस्रः -स्रा -स्रं, दीर्घचतुरस्राकारः -रा -रं, दीर्घाकारः &c.

OBLONG, *a.* (The figure) आयतः -तं, दीर्घचतुरस्रः -स्रं.

OBLOQUY, *s.* निन्दा, परीवादः, परिभाषणं, अपवादः, निन्दोक्तिः *f.*, परूषोक्तिः *f.*, दुर्वाक्यं, दुरुक्तं, वाच्यता, तिरस्कारः.

OBMUTESCENCE, *s.* मौनं, अभाषणं, वाक्स्तम्भः, वाग्रोधः, गतवाक्त्वं.

OBNOXIOUS, *a.* (Liable, subject) योग्यः -ग्या -ग्यं, अधीनः -ना -नं, वशः -शा -शं, अर्हः -र्हा -र्हं, उपयुक्तः -क्ता -क्तं, पात्रं in comp., आस्पदं in comp., विषय in comp., अधिकारी -रिणी &c.; 'obnoxious to punishment,' दण्डयोग्यः &c., दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डनीयः -या -यं, दण्डार्हः -र्हा -र्हं; 'to disease,' रोगाधीनः -ना -नं, रोगपात्रं, रोगास्पदं; 'to death,' मरणाधीनः &c., मरणपात्रं; 'to blame,' निन्दाविषयः -या -यं.—(Odious, offensive) द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, द्वेषी &c., अप्रियः -या -यं, विप्रियः &c., अनिष्टः -ष्टा -ष्टं, असन्तोषकरः -रा -रं, अप्रीतिकरः &c.

OBNOXIOUSLY, *adv.* द्वेषणीयं, अप्रियं, विप्रियं, व्यलीकं, विरुद्धं.

OBNOXIOUSNESS, *s.* (Liability) योग्यता, अधीनता, वशता.—(Odiousness) द्वेष्यता, द्वेषणीयता, अप्रियता, अनिष्टता.

OBSCENE, *a.* अवाच्यः -च्या -च्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, अशुद्धः -द्धा -द्धं, अवचनीयः -या -यं, अनर्थ्यः -र्था -र्थं, अपवित्रः -त्रा -त्रं, कुत्सितः -ता -तं, बीभत्सः -त्सा -त्सं, दुरुक्तः -क्ता -क्तं, कुत्स्याः -त्स्या -त्स्यं; 'obscene word,' अपशब्दः, दुर्वचनं.—(Ill-omened) अशुभः -भा -भं, अमङ्गलः -ला -लं, अभद्रः -द्रा -द्रं, अमङ्गलसूचकः -का -कं.

OBSCENELY, *adv.* अवाच्यं, गर्हितं, गर्हणीयं, अशुद्धं, कुत्सितं.

OBSCENENESS, OBSCENITY, *s.* अवाच्यता, गर्ह्यता, अशुद्धता -त्वं, कुत्सितत्वं, बीभत्सता; 'of language,' दुर्वचनं, दुर्वाक्यं, दुर्भाषणं, दुरुक्तिः *f.*, अपशब्दः.

OBSCURATION, *s.* (Act) कलुषीकरणं, तिमिरीकरणं, मलिनीकरणं, प्रकाशहरणं, कान्तिहरणं.—(State) निष्प्रभता, सान्धकारता, तेजःक्षयः, तेजोहानिः *f.*, प्रभाक्षयः, प्रकाशक्षयः.—(Of a planet) अस्तः -स्तं.

OBSCURE, *a.* (Dark, dim) निष्प्रभः -भा -भं, निःप्रभः &c., अप्रभः &c., मलिनः -ना -नं, मलिनप्रभः &c., निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, अप्रकाशः -शा -शं, सान्धकारः -रा -रं, सतिमिरः -रा -रं, तमस्वी -स्विनी -स्वि (न्), दुर्दृशीः -शी -शि.—(Not easily understood, not clear) गूढः -ढा -ढं, गूढार्थः -र्था -र्थं, गूढार्थकः -का -कं, निगूढः

-ढा -ढं, दुर्ज्ञेयः -या -यं, दुर्गमः -मा -मं, दुर्बोधः -धा -धं, बोधागम्यः -म्या -म्यं, व्याख्यागम्यः &c., अव्याख्येयः -या -यं, अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, अस्फुटः -टा -टं, गहनार्थः &c., कठिनः -ना -नं.—(Not noted) अप्रसिद्धः -द्धा -द्धं, अख्यातः -ता -तं, अविख्यातः &c., अल्पप्रतिष्ठः -ष्ठा -ष्ठं, अल्पकीर्त्तिः -र्त्तिः -र्त्ति.

To OBSCURE, *v. a.* (Darken) निष्प्रभीकृ, तिमिरीकृ, मलिनीकृ, तिमिर (nom. तिमिरयति -यितुं), मलिन (nom. मलिनयति -यितुं), प्रलुट् (c. 10. -लोटयति -यितुं), कलुषीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं), प्रकाशं हृ, कान्तिं हृ, प्रभां हृ, प्रकाशक्षयं कृ.—(With clouds) मेघावृतं -तां कृ, मेघाच्छन्नं -न्नां कृ.—(Make difficult to be understood) गूढीकृ, निगूढीकृ, दुर्ज्ञेयं -यां कृ, दुर्गमीकृ, अस्पष्टीकृ.

OBSCURED, *p. p.* तमोवृतः -ता -तं, नष्टप्रभः -भा -भं, मलिनप्रभः &c., हतप्रभः &c., क्षीणप्रभः &c., नष्टप्रकाशः -शा -शं, हतप्रकाशः &c., तमोभूतः -ता -तं, कलुषीकृतः -ता -तं, नष्टतेजाः -जाः -जः (स्), नष्टतेजस्कः -स्का -स्कं, हततेजाः &c., नष्टकान्तिः -न्तिः -न्ति, क्षीणकान्तिः &c., विगततेजाः &c., मलिनितः -ता -तं, मलिनः -ना -नं, क्षततेजाः &c., क्षतप्रभः &c., क्षतकान्तिः &c., क्षतौजाः &c., हतौजाः &c., हतज्योतीः -तीः -तिः (स्), अरोकः -का -कं.

OBSCURELY, *adv.* (Darkly) सान्धकारं, निष्प्रभं, सतिमिरं, अप्रकाशं.—(Not clearly) अस्पष्टं, अव्यक्तं, गूढं, निगूढं, दुर्ज्ञेयं.

OBSCURITY, OBSCURENESS, *s.* (Darkness) निष्प्रभता, सान्धकारता, तिमिरं, तमिस्रं, तमस् *n.*, अन्धकारः, तेजोहीनता, तेजोहानिः *f.*, अप्रकाशत्वं, अल्पप्रकाशः, प्रभाहीनता, प्रभाहानिः *f.*, अवतमसं.—(Darkness of meaning) गूढार्थता, गूढता, निगूढता, दुर्ज्ञेयता, दुर्बोधता, अस्पष्टता, अव्यक्तता -त्वं, गहनता, दुर्गमता, बोधागम्यता, व्याख्यागम्यता, अव्याख्या -ख्यानं.—(State of being unknown to fame) अप्रसिद्धिः *f.*, अप्रसिद्धता, अख्यातिः *f.*, अविख्यातिः *f.*, अल्पप्रतिष्ठा, अल्पकीर्त्तिः *f.*, कीर्त्तिन्यूनता, कीर्त्यभावः.

To OBSECRATE, *v. a.* निर्बन्धेन प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), विनयेन प्रार्थ्.

OBSECRATION, *s.* निर्बन्धपूर्ब्बं प्रार्थनं or प्रार्थना, विनयेन प्रार्थनं.

OBSEQUIAL, *a.* और्द्ध्वदेहिकः -की -कं, आन्तकर्म्मिकः -की -कं, उत्तरक्रियासम्बन्धी -न्धिनी -न्धि (न्), अन्त्येष्टिसम्बन्धी &c., अन्त्येष्टियोग्यः -ग्या -ग्यं.

OBSEQUIES, *s. pl.* उत्तरक्रिया, उत्तरकर्म्म *n.* (न्), उत्तरकार्य्यं, प्रेतक्रिया, प्रेतकर्म्म *n.*, प्रेतकृत्यं, प्रेतकार्य्यं, प्रेतसंस्कारः, अन्त्यकर्म्म *n.*, अन्त्यक्रिया, अन्तकर्म्म *n.*, अन्त्येष्टिः *f.*, अन्त्येष्टिक्रिया, शवकर्म्म *n.*, मृतकर्म्म *n.*, मृतक्रिया, मृतकार्य्यं, मृतसंस्कारः, और्द्ध्वदेहिका -कं, मृतसत्क्रिया, अन्तसत्क्रिया, मृतकं, श्राद्धं, श्राद्धादिकर्म्म *n.*, पारलौकिकं, अशुभकर्म्म *n.*, अशुभकार्य्यं. The श्राद्धं consists of obsequial oblations to the manes of deceased ancestors. *See* MANES; 'monthly obsequies,' अन्वाहार्य्यं -र्य्यकं, अनुहार्य्यः, मासिकं.

OBSEQUIOUS, *a.* अत्यनुकूलः -ला -लं, अत्यनुरोधी -धिनी -धि (न्) वशंवदी &c., छन्दोनुवर्त्ती &c., छन्दोनुरोधी &c., अनुवर्त्ती &c., अनुविधायी &c., वशंवदः -दा -दं, वशानुगः -गा -गं, विनतः -ता -तं, नम्रः -म्रा -म्रं, आज्ञाकारी &c.

OBSEQUIOUSLY, *adv.* अत्यनुकूलं, अत्यनुरोधेन, छन्दोनुरोधपूर्ब्बं.

OBSEQUIOUSNESS, *s.* अत्यनुकूलता, अत्यानुकूल्यं, अत्यनुरोधः -धनं, छन्दोनुरोधः, छन्दोनुवृत्तिः *f.*, छन्दोनुवर्त्तनं, छन्दोनुवृत्तं.

OBSERVABLE, *a.* दृश्यः -श्या -श्यं, दर्शनीयः -या -यं, दृष्टिगोचरः -रा -रं, लक्ष्यः -क्ष्या -क्ष्यं, आलोकनीयः -या -यं, प्रेक्ष्यः -क्ष्या -क्ष्यं, प्रेक्षणीयः -या -यं.—(That may be practised) अवहार्य्यः -र्य्या -र्य्यं, अवहरणीयः -य्या -य्यं.

OBSERVANCE, *s.* (Act of keeping or performing) पालनं, रक्षणं, सेवनं, निषेवनं, धारणं, आचरणं, अनुष्ठानं.—(Practising) आचरणं, अनुष्ठानं, करणं, विधानं, अभ्यासः, निषेवनं.—(Following) अनुसारः, अनुसरणं.—(Custom, practice) व्यवहारः, आचारः, चर्य्या, चरितं, रीतिः *f.*—(Religious observance) व्रतं, नियमः, यमः, नियामः, विधिः *m.*, विधानं.—(Respect) आदरः, सत्कारः, मानं.

OBSERVANT, *a.* (Taking notice) निरीक्षकः -का -कं, प्रेक्षकः -का -कं.—(Keeping, practising, following) पालकः -का -कं, निषेवकः -का -कं, अनुष्ठायी -यिनी -यि (न्), धारी &c., अनुसारी &c., आस्थितः -ता -तं, निष्ठितः -ता -तं, आश्रितः -ता -तं.—(Of orders) आज्ञापालकः.—(Of benefits received) कृतवेदी &c., कृतज्ञः -ज्ञा -ज्ञं.

OBSERVATION, *s.* (Act of looking at or taking notice) निरीक्षणं, निरीक्षा, अवेक्षणं, अवेक्षा, अवलोकनं, आलोकनं, आलोचनं, निरूपणं, सन्दर्शनं, दृष्टिः *f.*, लक्ष्यं, लक्षं.—(Result of taking notice) लिखितं, चर्चा. *See* NOTE, NOTICE; 'in one's observation,' प्रत्यक्षे -क्षतस्.

OBSERVATORY, *s.* तारागृहं, ग्रहनक्षत्रादिदर्शनस्थानं.

To OBSERVE, *v. a.* and *n.* (See, look at) दृश् (c. 1. पश्यति, द्रष्टुं), अनुदृश्, प्रतिदृश्, अभिदृश्, परिदृश्, प्रदृश्, सम्प्रदृश्, सन्दृश्, लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, संलक्ष्, उपलक्ष्, समुपलक्ष्, ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, वीक्ष्, प्रेक्ष्, निरीक्ष्, अवेक्ष्, प्रत्यवेक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, उदीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक्, अवलोक्, विलोक्, आलोच् (c. 10. -लोचयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), विलोकनं कृ, अवलोकनं कृ.—(With the intellect) उपलभ् (c. 1. -लभते -लब्धुं), विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), विभू (c. 10. -भावयति -यितुं), विभावनं कृ, अनुभू.—(Keep, perform, practise) पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, परिपाल्, अनुपाल्, सम्पाल्, अभिपाल्, रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, आचर् (c. 1. -चरति -रितुं), समाचर्, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, समास्था, समुपास्था, विधा (c. 3. -दधाति -धातुं), सेव् (c. 1. सेवते -वितुं), निषेव्, उपसेव्, समासेव्; 'observe propriety,' विनयं रक्ष्.—(Utter, make a remark) वाक्यं वद् (c. 1. वदति -दितुं) or प्रवद्, चर्चां कृ.—(Adhere to) आश्रि (c. 1. -श्रयति -यितुं), अवलम्ब् (c. 1. -लम्बते -म्बितुं), उपास् (c. 2. -आस्ते -आसितुं).

OBSERVED, *p. p.* (Noticed by the eye) दृष्टः -ष्टा -ष्टं, ईक्षितः -ता -तं, निरीक्षितः -ता -तं, प्रेक्षितः -ता -तं, आलोकितः -ता -तं, आलोचितः -ता -तं, निरूपितः -ता -तं.—(Kept, performed) पालितः -ता -तं, आचरितः &c., अनुष्ठितः &c., सेवितः &c., निषेवितः &c., अनुसृतः &c.

OBSERVER, *s.* (Looker on) प्रेक्षकः, वीक्षकः, प्रेक्षणिकः, द्रष्टा *m.* (ष्टृ), दर्शी *m.* (न्), आलोचकः. *See* OBSERVANT.

OBSERVINGLY, *adv.* सुनिरूपणपूर्ब्बं, चर्चया, मनोयोगेन, सावधानं.

OBSOLETE, *a.* अव्यवहारितः -ता -तं, निरुक्तः -क्ता -क्तं, नैरुक्तः -क्ती -क्तं, कालानारितः -ता -तं, गतकालिकः -का -कं, लुप्तः -प्ता -प्तं, अप्रचलः -ला -लं, अप्रचलितः -ता -तं, अचलितः -ता -तं, अप्रचरितः -ता -तं, अव्यवहार्य्यः -र्य्या -र्य्यं, अनुपस्थितः -ता -तं, अनुपलब्धः -ब्धा -ब्धं, विकटः -टा -टं.

OBSOLETENESS, *s.* अव्यवहार्य्यता, अव्यवहारितत्वं, लुप्तता. अप्रचलितत्वं, अप्रचारः, लोपः, अनुपस्थितिः *f.*, अनुपलब्धिः *f.*

OBSTACLE, *s.* विघ्नः, अन्तरायः, व्याघातः, प्रत्यूहः, प्रतिबन्धः -न्धकं, रोधः -धनं, अवरोधः, उपरोधः, विरोधः, संरोधः, निरोधः, स्तम्भः -म्भनं, प्रतिष्टम्भः, विष्टम्भः, विघातः -तं, विष्कम्भः, बाधा -धः -धकः, व्यवधानं, विष्कम्भः; 'removal of obstacles,' विघ्नसिद्धिः *f.*, विघातसिद्धिः *f.*,

विघ्ननाशः -शनं, विघ्नहरणं; 'causing obstacles,' विघ्नकरः -रा -रं, विघ्नकारी -रिणी -रि (न्).

Obstetric, *a.* प्रसवकर्म्मसम्बन्धी -न्धिनी &c., सूतिकर्म्मसम्बन्धी &c., गर्भमोचनसम्बन्धी &c., गर्भमोचनविषयकः -का -कं, सावकः -विका -कं.

Obstetrics, *s.* प्रसवकर्म्म *n.* (न्), प्रसवकार्य्यं, गर्भमोचनविद्या.

Obstinacy, obstinateness, *s.* स्तब्धता, स्तब्धिः *f.*, स्तब्धतित्वं, धैर्य्यं, धीरता -र्त्वं, निर्बन्धः, दृढता, दार्ढ्यं, कठिनता, काठिन्यं, धृतिः *f.*, जडता, माढ्यं, अवश्यता, अविनेयता, स्थैरिता, स्थैरता, प्रतीपता, दुष्टता, आग्रहः, दुराग्रहः, दुर्मदः, अभिनिवेशः, निर्बन्धशीलता, हठः; 'in adhering to belief,' श्रद्धामाढ्यं.

Obstinate, *a.* स्तब्धः -ब्धा -ब्धं, निर्बन्धशीलः -ला -लं, स्तब्धमतिः -तिः -ति, धीरः -रा -रं, दृढः -ढा -ढं, कठिनः -ना -नं, जडः -डा -डं, अवश्यः -श्या -श्यं, अविनेयः -या -यं, दुराग्रही -हिणी -हि (न्), आग्रही &c., स्थैरी &c., स्थैरः -रा -रं, प्रतीपः -पा -पं, दुष्टः -ष्टा -ष्टं.—(Difficult of cure) कृच्छ्रसाध्यः -ध्या -ध्यं, दुःखसाध्यः &c., दुःसाध्यः &c.. दुरुपचारः -रा -रं,

Obstinately, *adv.* निर्बन्धेन, सनिर्बन्धं, धैर्य्येण, सधैर्य्यं, सदार्ढ्यं, सजाड्यं, सकाठिन्यं, दुराग्रहेण, प्रतीपवत्, स्थैरवत्, दुष्टवत्.

Obstipation, *s.* मलावरोधः, मलावष्टम्भः, मलस्तम्भः, मलस्तम्भिः *f.*

Obstreperous, *a.* (Vociferous) उच्चैःस्वरकारी -रिणी -रि (न्), तुमुलकारी &c., बहुघोषः -षा -षं, कोलाहलकारी &c.—(Perverse) प्रतीपः -पा -पं.

Obstreperously, *adv.* उच्चैःस्वरेण, बहुघोषेण, कोलाहलेन, सकोलाहलं.

Obstreperousness, *s.* घोषणत्वं, बहुघोषत्वं, तुमुलकारित्वं, प्रतीपता.

To obstruct, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, उपरुध्, विरुध्, संरुध्, स्तम्भ् (c. 10. स्तम्भयति -यितुं, c. 9. स्तभ्नाति, स्तब्धिं), विष्टम्भ्, प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), बाध् (c. 1. बाधते -धितुं), विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, विघ्न (nom. विघ्नयति -यितुं), वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, आवृ, समावृ, प्रतिवृ, प्रतिविघ्, (c. 1. -वेधति -वेद्धुं), रोधं कृ, अवरोधं कृ, गतिरोधं कृ, प्रतिबन्धं कृ, निराकृ.

Obstructed, *p. p.* रुद्धः -द्धा -द्धं, प्रतिरुद्धः &c., विरुद्धः &c., निरुद्धः &c., उपरुद्धः &c., स्तब्धिः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः &c., प्रतिबद्धः &c., विहतः -ता -तं, प्रतिहतः -ता -तं, पराहतः -ता -तं, बाधितः -ता -तं, विघ्नितः -ता -तं, वारितः -ता -तं, निवारितः -ता -तं, अमरितः -ता -तं, मार्गेलः -ला -लं.

Obstructer, *s.* विघ्नकारी *m.* (न्), रोधकः, अवरोधकः, प्रतिबन्धकः, बाधकः.

Obstruction, (Act) रोधः -धनं, स्तम्भनं, प्रतिबन्धनं, विघ्नकरणं, वारणं, आवरणं.—(Impediment) विघ्नः, रोधः, प्रतिरोधः, उपरोधः, संरोधः, निरोधः, प्रतिबन्धः, स्तम्भः, विष्टम्भः, प्रतिष्टम्भः, हेडः. *See* Obstacle, Hinderance. (In any organ of the body) नाहः, आनाहः, अवरोधः, निबन्धः.

Obstructive, obstructing, obstruent, *a.* विघ्नकारी -रिणी &c., विघ्नकरः -री -रं, प्रतिरोधी &c., विरोधी &c., रोधकः -का -कं, अवरोधकः &c., प्रतिरोधकः &c., विघाती &c., व्याघातकः -का -कं, विष्टम्भी &c., सापरोधिकः -की -कं, वारकः -का -कं, निवारकः &c., निराकरिष्णुः -ष्णुः -ष्णु, विघ्नुः -घ्नुः -घ्नु, व्याघातजनकः -का -कं, बाधकः -का -कं, प्रतिबन्धकः -का -कं, विघ्नजनकः &c., प्रतिबन्धकारी &c., प्रतिबन्धकः &c.

To obtain, *v. a.* आप (c. 5. आप्नोति, आप्तुं), प्राप्, सम्प्राप्, अवाप्, समवाप, समाप, लभ (c. 1. लभते, लब्धुं), उपलभ्, अर्ज (c. 10. अर्जयति -यितुं, c. 1. अर्जति -र्जितुं), उपार्ज, आमद (c. 10. -मादयति -यितुं), समामद, अधिगम (c. 1. -गच्छति -गन्तुं), गम, सम्पद् (c. 10. -पादयति -यितुं), प्रतिपद् (c. 4. -पद्यते -ति -पत्तुं), आपद्, अभिपद्, समापद्, इ (c. 2. इति -तुं), अभी, भू (c. 1. भवति, भवितुं), विद् (c. 6. विन्दति, वेत्तुं, वेदितुं), अभिविद्, प्रतिविद्, आविश् (c. 6. -विशति -वेष्टुं), समाविश्, अश् (c. 5. अश्नुते, अशितुं), समश्, उपाश्, स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).

To obtain, *v. n.* (Be in use, be established) प्रचलीभू, प्रचलितः -ता -तं भू, प्रचर् (c. 1. -चरति -रितुं), प्रचल् (c. 1. -चलति -लितुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), स्थापितः -ता -तं भू, प्रसिद्धीभू, प्रचलीभू, प्रभू, संस्था (c. 1. -तिष्ठति -स्थातुं).

Obtainable, *a.* प्राप्यः -प्या -प्यं, प्रापणीयः -या -यं, प्राप्यः -प्या -प्यं, लभ्यः -भ्या -भ्यं, उपलभ्यः &c., आसादनीयः -या -यं, आसाद्यः -द्या -द्यं, समासाद्यः &c., अधिगम्यः -म्या -म्यं, अधिगमनीयः -या -यं, अधिगमाप्यः -प्या -प्यं; 'easily obtainable,' सुलभः -भा -भं, सुप्राप्यः -प्या -प्यं, सुसाध्यः -ध्या -ध्यं; 'difficultly,' दुर्लभः &c., दुःप्राप्यः &c., दुष्प्राप्यः &c., दुःसाध्यः &c., दुष्प्रापः -पा -पं, दुरापः -पा -पं; 'with exertion,' यत्नलभ्यः &c.

Obtained, *p. p.* प्राप्तः -प्ता -प्तं, आप्तः &c., अवाप्तः &c., लब्धः -ब्धा -ब्धं, उपलब्धः &c., अर्जितः -ता -तं, उपार्जितः -ता -तं, आसादितः -ता -तं, समासादितः -ता -तं, अधिगतः -ता -तं, आपन्नः -न्ना -न्नं, विन्नः -न्ना -न्नं, भावितः -ता -तं, भूतः -ता -तं, लब्धिमान् -मा -मं, सम्पन्नः &c., सम्पादितः -ता -तं, अभिरम्भितः -ता -तं.

Obtainer, *s.* प्रापकः, लब्धा *m.* (ब्धृ), उपार्जकः, सम्पादकः.

Obtainment, *s.* प्राप्तिः *f.*, सम्प्राप्तिः *f.*, आप्तिः *f.*, प्रापणं, आपत्तिः *f.*, लब्धिः *f.*, लाभः, आसादनं, समासादनं, अर्जनं, उपार्जनं, प्रतिपत्तिः *f.*, सम्पादनं, अधिगमः.

To obtest, *v. a.* विनयेन प्रार्थ् (c. 10. प्रार्थयति -यितुं) or याच् (c. 1. याचति -चितुं).

Obtestation, *s.* अञ्जलिकर्म्मपूर्व्वं प्रार्थनं, विनयेन प्रार्थनं, अभ्यर्थना.

To obtrude, *v. a.* धर्षेण or बलेन or परानिच्छया प्रविश् (c. 10. -वेशयति -यितुं) or प्रभृ (c. 10. -सारयति -यितुं) or अनधिकारपूर्व्वं प्रविश्.—(Urge upon another with unreasonable importunity) अतिनिर्बन्धेन अनिच्छन्तं जनं किञ्चिद् ग्रह् (c. 10. ग्राहयति -यितुं), अतिनिर्बन्धपूर्व्वम् उपस्था in caus. (-स्थापयति -यितुं) or उपह (c. 1. -हरति -हर्त्तुं) or प्रदा.

To obtrude, *v. n.* धर्षेण or बलेन or परानिच्छया प्रविश् (c. 6. -विशति -वेष्टुं), अनाहूतः प्रविश् or आविश् or आगम् (c. 1. -गच्छति -गन्तुं) or आक्रम् (c. 1. -क्रामति -क्रमितुं) or अभिक्रम्.

Obtruded, *p. p.* धर्षेण or परानिच्छया प्रवेशितः -ता -तं or प्रसारितः &c.

Obtrusion, *s.* धर्षेण or परानिच्छया प्रवेशः -शनं, अनधिकारपूर्व्वं प्रवेशनं, अनाहूतप्रवेशनं, अनाहूतागमनं.

Obtrusive, *a.* परानिच्छया प्रवेशकः -का -कं, धृष्टः -ष्टा -ष्टं.

To obtund, *v. a.* घनीकृ, अतीक्ष्णीकृ, अतीव्रीकृ, स्थूलीकृ, जडीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं), विरुग्नीकृ, तेजोहीनं -नां कृ.

Obtuse, *a.* (Blunt, not acute) अतीक्ष्णः -क्ष्णा -क्ष्णं, अतीव्रः -व्रा -व्रं, अनयः -या -यं, निरयः &c., अप्रखरः -रा -रं, धाराहीनः -ना -नं, तेजोहीनः &c., घनः -ना -नं, स्थूलः -ला -लं, निश्लेजाः -जाः -जः (स्), 'obtuse angle,' बहिर्लग्नकोणः.—(Dull, stupid) जडः -डा -डं, मन्दः -न्दा -न्दं, स्थूलः -ला -लं, मूढः -ढा -ढं, मन्दबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, मन्दमतिः -तिः -ति, जडमतिः &c.. अविदग्धः -ग्धा -ग्धं.

Obtuse-angled, obtuse-angular, *a.* बहिर्लग्नः -ग्ना -ग्नं, बहिर्लग्नकोणः -णा -णं.

Obtusely, *adv.* अतीक्ष्णं, अतीव्रं, अप्रखरं, स्थूलवत्, जाड्येन, सजाड्यं, जडवत्.

OBTUSENESS, *s.* (Bluntness) अतीक्ष्णता, अतीव्रता, निरग्रता, धारा-हीनता, तेजोहीनता, घनता, स्थूलता.—(Of intellect) जडता, जाड्यं, स्थूलता, स्थूलबुद्धित्वं, मूढता, मन्दता, मन्दमतित्वं, बुद्धिमान्द्यं, अविदग्धता.

To OBUMBRATE, *v. a.* प्रच्छद् (c. 10. -छादयति -यितुं), तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, छायां कृ. *See To* OBSCURE.

To OBVIATE, *v. a.* यॄ (c. 10. वारयति -यितुं), निषृ, विनिषृ, प्रतिषृ, आवृ. रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, विरुध्, अवरुध्, प्रतिरुध्, उपरुध्, निवृत् (c. 10. -वर्त्तयति -यितुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), परिच्छिद्, बाध् (c. 1. बाधते -धितुं), प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, निरस् (c. 4. -अस्यति -असितुं), परिहृ (c. 1. -हरति -हर्त्तुं).

OBVIATED, *p. p.* वारितः -ता -तं, निवारितः -ता -तं, रुद्धः -द्धा -द्धं, अव-रुद्धः &c., बाधितः -ता -तं, परिहृतः &c., अपहृतः &c., निवृत्तः -त्ता -त्तं.

OBVIOUS, *a.* स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, व्यक्तः -क्ता -क्तं, सुव्यक्तः &c., सुस्पष्टः &c., प्रत्यक्षः &c., अभिव्यक्तः &c., भिन्नार्थः &c., प्रकाशः -शा -शं, सुप्रकाशः &c., सुग्राह्यः -ह्या -ह्यं, स्फुटः -टा -टं, सुज्ञेयः -या -यं, सुगमः -मा -मं, सुगोचरः -रा -रं.—(To the eye) दृष्टिगोचरः -रा -रं, नयनगोचरः &c., दृष्टः -ष्टा -ष्टं, सुदृशीः -शी -शि, सुलक्ष्यः &c., समक्षः -क्षी -क्षं, प्रत्यक्षः -क्षा -क्षं; 'obvious danger,' दृष्टं.

OBVIOUSLY, *adv.* स्पष्टं, सुस्पष्टं, स्पष्टार्थतस्, व्यक्तं, सुव्यक्तं, प्रकाशं, सुप्रकाशं, प्रत्यक्षतस् -क्षेण, साक्षात्, स्फुटं, प्रादुस्.

OBVIOUSNESS, *s.* स्पष्टता, सुस्पष्टता, व्यक्तता, सुव्यक्तता -त्वं, स्पष्टार्थता -त्वं, सुग्राह्यता, सुज्ञेयता, सुगमता, प्रत्यक्षता, प्रकाशता, सुप्रकाशता, स्फुटता, सुगोचरता, सुलक्ष्यता

OCCASION, *s.* (Opportunity, favorable season) अवसरः, अवकाशः, समयः, प्रस्तावः, प्रसङ्गः, प्रसरः, कालः, कालयोगः, कार्य्यकालः, वारः, मन्धिः *m.*, कालसन्धिः *m.*, सन्धिवेला, वेला, स्थानं; 'according to the occasion,' यथावसरं, यथावकाशं, यथाप्रसङ्गं, प्रसङ्गवशात्; 'suitable to the occasion,' प्रस्तावसदृशः -शी -शं, प्रास्ताविकः -की -कं, प्रस्तावयोग्यः -ग्या -ग्यं; 'on this particular occasion,' इह समये.—(Incident, event) वृत्तं, भूतं, सम्भवः, सङ्गतं, सङ्गतिः *f.*, समुपागतं, समुपस्थितं, घटना -नं; 'as occasion may be,' यथा-सम्भवं.—(Need) प्रयोजनं, प्रयोगः, प्रयुक्तिः *f.*, उपयोगः -गिता, कार्य्यं, कारणं; 'there is no occasion for me,' मया न प्रयोजनं; 'there is occasion for a straw,' तृणेन प्रयोजनं or कार्य्यं.—(Accidental cause) प्रयोजनं, हेतुः *m.*, कारणं, निमित्तं, उपाधिः *m.*

To OCCASION, *v. a.* उत्पद् (c. 10. -पादयति -यितुं), समुत्पद्, उपपद्, सम्पद्, जन् (c. 10. जनयति -यितुं), सञ्जन्, साध् (c. 10. साधयति -यितुं), भू (c. 10. भावयति -यितुं), उद्भू, कृ, निमित्त (nom. निमित्तायते), कारणीभू, निमित्तीभू.

OCCASIONAL, *a.* (Occurring at times, but not regular) कादाचित्कः -त्की -त्कं, अनित्यः -त्या -त्यं, विरलागतः -ता -तं, विरलः -ला -लं, अनु-कालः -ला -लं, क्वाचित्कः -त्की -त्कं, काहिंचित्कः &c., अनियतः -ता -तं, आगन्तुकः -का -कं, अनियतकारणकः -का -कं.—(Produced or occurring on some special occasion) नैमित्तिकः -की -कं, प्रास-ङ्गिकः -की -कं, प्रास्ताविकः -की -कं, सामयिकः &c., प्रसङ्गप्राप्तः -प्ता -प्तं, प्रसङ्गोत्पन्नः -न्ना -न्नं, प्रसङ्गागतः -ता -तं, प्रसङ्गोपस्थितः -ता -तं, प्रसङ्गकारणकः -का -कं.

OCCASIONALLY, *adv.* (From time to time) कदाचित्, कदापि, कदाचन, काहिंचित्, काले काले, वारं वारं, जातु, अनुकालं, अनुवेलं. —(According to the exigence) यथाप्रसङ्गं, यथावसरं, प्रसङ्गानु-सारेण, प्रसङ्गानुरूपेण, प्रसङ्गवशात्.

OCCASIONED, *p. p.* उत्पादितः -ता -तं, उत्पन्नः -न्ना -न्नं, जनितः -ता -तं, जातः -ता -तं, प्रयुक्तः -क्ता -क्तं, प्रयोजितः -ता -तं, उद्भवः -वा -वं, प्रभवः -वा -वं, प्रवृत्तः -त्ता -त्तं, उदितः -ता -तं, समुदितः -ता -तं, निमित्तकः -का -कं, हेतुकः -का -कं, कारणकः -का -कं; 'misery occasioned by crime,' पापप्रयुक्तं दुःखं, पापनिमित्तकं दुःखं; 'fever occasioned by fasting,' उपवासप्रयुक्तो ज्वरः.

OCCIDENT, *s.* पश्चिमदिक् *m.* (श्), पश्चिमदिशा, पश्चिमा, प्रतीची.

OCCIDENTAL, *a.* पश्चिमः -मा -मं, प्रतीचीनः -ना -नं, प्रत्यङ्-ञ्ची -ञ्चि (ञ्च्).

OCCIPUT, *s.* मस्तकपृष्ठं, शिरःपृष्ठं, मस्तकस्य पश्चाद्भागः.

OCCULT, *a.* गूढः -ढा -ढं, गूढार्थः -र्था -र्थं, गूढार्थकः -का -कं, निगूढः -ढा -ढं, गुप्तः -प्ता -प्तं, गुह्यः -ह्या -ह्यं, निभृतः -ता -तं, दुर्ज्ञेयः -या -यं, अज्ञातः -ता -तं, अप्रिदितः -ता -तं, अप्रसिद्धः -द्धा -द्धं, अगम्यः -म्या -म्यं, दुर्गम्यः &c.

OCCULTATION, *s.* (In astronomy) समागमः.

OCCULTNESS, *s.* गूढता, गुप्तता, निगूढता, गुह्यता, दुर्ज्ञेयता, अप्रसिद्धिः *f.*

OCCUPANCY, *s.* अधिकारः, अधिकृतिः *f.*, आधिकारख्यं, भोगः, परिभोगः, भुक्तिः *f.*, आवेशः -शनं, समावेशः, आक्रमणं.

OCCUPANT, *s.* अधिकारी *m.* (न्), भोक्ता *m.* (क्तृ), परिभोक्ता *m.*, भोगी *m.*, (न्), परिभोगी *m.*, शाली *m.* (न्), भोगकारी *m.* (न्).

OCCUPATION, *s.* (Act of taking possession) परिग्रहः -हणं, आवेशनं, समावेशनं, आक्रमणं, अधिकारकरणं, भोगकरणं, अधिवासः -सनं, अधि-ष्ठानं.—(Possession). *See* OCCUPANCY. (Employment, business) व्यापारः, कार्य्यं, कर्म्म *n.* (न्), व्यवसायः, व्यवहारः, उद्योगः, उद्यमः, प्रवृत्तिः *f.*, प्रवर्त्तनं, वृत्तिः *f.*, कार्य्योद्योगः, कर्म्मोद्योगः, चरितं, व्यवस्था; 'daily or settled occupation,' नित्यकर्म्म *n.*, नित्यकृत्यं. —(Something to be done) करणीयं, कार्य्यं, करणीयं, कृत्यं; 'customary morning occupations,' उचितानि प्रभातकरणीयानि.—(Vocation, trade, profession) वृत्तिः *f.*, वर्त्तनं, जीवनवृत्तिः *f.*, जीविका, उपजीविका, उपजीवनं, जीवनोपायः, आजीवनार्थं.—(Office, appointed duty) नियोगः, नियुक्तिः *f.*, स्वकर्म्म *n.*, स्वधर्म्मः, प्रकरणं; 'approved occupation,' अवदानं, अपदानं.

OCCUPIED, *p. p.* (Possessed, tenanted) भुक्तः -क्ता -क्तं, परिभुक्तः &c., आविष्टः -ष्टा -ष्टं, समाविष्टः &c., अध्युषितः -ता -तं, अध्यासितः -ता -तं, अधिष्ठितः -ता -तं, आश्रितः -ता -तं, अधिगतः -ता -तं.—(Employed, engaged) व्यापृतः -ता -तं, व्यापारी -रिणी -रि (न्), व्यवसायी &c., प्रवृत्तः -त्ता -त्तं, सव्यापारः -रा -रं, कर्म्मनिष्ठः -ष्ठा -ष्ठं, कर्म्मरतः -ता -तं, कर्म्मी &c., कर्म्मोद्युक्तः -क्ता -क्तं, कार्य्यवान् -वती -वत् (त्), क्रियावान् &c.; 'in reading,' अध्ययनरतः &c. *See* ENGAGED; 'to be occupied,' व्यापृ in pass. (-प्रियते) with loc. c., वृत् (c. 1. वर्त्तते -र्त्तितुं) with loc. c.; 'he is occupied in the affairs of others,' परकार्य्येषु व्याप्रियते; 'in penance,' तपसि व्याप्रियते.

OCCUPIER, *s.* *See* OCCUPANT, *s.*

To OCCUPY, *v. a.* (Take possession) आविश् (c. 6. -विशति -वेष्टुं), प्रथमभोगं कृ, आक्रम् (c. 1. -क्रामति -क्रमितुं), अध्याक्रम्.—(Possess, hold) धृ (c. 10. धारयति -यितुं), भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उपभुज्, परिभुज्, धा (c. 3. धत्ते, धातुं), शील् (c. 10. शीलयति -यितुं), भोगं कृ, परिभोगं कृ.—(Take up, pervade) व्याप् (c. 5. -आप्नोति -आप्तुं), पॄ (c. 10. पूरयति -यितुं), व्यतिक्रम्.—(Tenant) अध्यास् (c. 2. -आस्ते -आसितुं), समध्यास्, अधिवस् (c. 1. -वसति -वस्तुं), अध्यावस्, आश्रि (c. 1. -श्रयति -ते -यितुं), अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), वासं कृ.—

(Employ) व्यापृ (c. 10. -पारयति -यितुं), प्रवृत् (c. 10. -वर्तयति -यितुं), प्रयुज् (c. 7. -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), उपयुज्, कार्य्ये नियुज्. —(Occupy one's self) व्यापृ in pass. (-प्रियते), व्यापृतः -ता -तं भू or अस्; 'do not occupy yourself with the affairs of others,' मा परकार्य्येषु व्यापृतो भूः.

To OCCUPY, *v. n.* व्यापारं कृ, व्यवसायं कृ, व्यवहारं कृ, वाणिज्यं कृ.

To OCCUR, *v. n.* (Meet, come to) उपस्था (c. 1. -तिष्ठति -स्थातुं), समुपस्था, आगम् (c. 1. -गच्छति -गन्तुं), उपागम्, समुपागम्.—(Arise, be found) उत्पद् (c. 4. -पद्यते -पत्तुं), विद् in pass. (विद्यते), जन् in pass. (जायते), वृत् (c. 1. वर्त्तते -र्त्तितुं), संवृत्.—(Take place, happen) घट् (c. 1. घटते -टितुं), सम्पद्, समापद्, उपपद्, उपस्था, उपस्थितः -ता -तं भू, आपद् (c. 1. -पतति -तितुं), निपत्, सम्भू, भू.—(Suggest itself to the mind) स्फुर् (c. 6. स्फुरति -रितुं).

OCCURRED, *p. p.* उपस्थितः -ता -तं, समुपस्थितः &c., उपागतः -ता -तं, समुपागतः &c., आगतः -ता -तं, उत्पन्नः -न्ना -न्नं, समुत्पन्नः &c., वृत्तः -त्ता -त्तं, संवृत्तः &c., घटितः -ता -तं, सम्भूतः &c.

OCCURRENCE, *s.* वृत्तं, उत्पन्नं, समुत्पन्नं, उत्पत्तिः *f.*, समुत्पत्तिः *f.*, उपागतं, उपागमः, समुपागतं, उपस्थितं, समुपस्थितं, सङ्गतं, सङ्गतिः *f.*, सम्भवः, भूतं, सङ्भूतं, घटना -नं, समुदयः, उपस्थानं, उपस्थितिः *f.*; 'of rare occurrence,' विरलागतः -ता -तं, दुर्लभः -भा -भं, चिरचेष्टितः -ता -तं, चिरलब्धः -ब्धा -ब्धं.

OCEAN, *s.* समुद्रः, अर्णवः, महार्णवः, सागरः, महासागरः, जलनिधिः *m.*, उदधिः *m.*, महोदधिः *m.*, पयोनिधिः *m.*, जलधिः *m.*, अब्धिः *m.*, असुधिः *m.*, तोयनिधिः *m.*, तोयधिः *m.*, पाथोधिः *n.*, वारिधिः *m.*, वारिनिधिः *m.*, वारान्निधिः *m.*, वार्द्धिः *m.*, अपान्निधिः *m.*, कीलालधिः *m.*, सलिलनिधिः *m.*, पयोधिः *m.*, पयोधाः *m.* (स्), अम्भोधिः *m.*, अम्भोनिधिः *m.*, नीरधिः *m.*, नीरनिधिः *m.*, असुराशिः *m.*, अम्भोराशिः *m.*, वारिराशिः *m.*, नदीपतिः *m.*, सरित्पतिः *m.*, सपात्राथः, सिन्धुनाथः, जलपतिः *m.*, यादःपतिः *m.*, यादसाम्पतिः *m.*, सिन्धुः *m.*, उदन्वान् *m.* (न्), सरस्वान् *m.* (न्), रत्नाकरः, पारावारः, पारापारः, दूरपारः, सकूपारः, द्वीपवान् *m.* (न्), महाकच्छः, धरणीप्रपः, तरीषः, स्तिभिः *m.*, धेनुः, दभ्रः, मीरः, तीर्थराजः; 'the southern ocean,' दक्षिणार्णवः; 'ocean-bound,' सागरान्तः -न्ता -न्तं, समुद्रमेखलः -ला -लं, समुद्रवलयः -या -यं, समुद्रान्तः -ना -नं, अर्णवमेखलः &c.; 'ocean-king,' जलनिधिनाथः; 'ocean of trouble,' दुःखसागरः; 'of business,' कार्य्याब्धिः *m.*; 'of misery,' व्यसनार्णवः. Seven oceans are fabled to exist by the Hindús, viz. 'the ocean of salt,' लवणोदः; 'of syrup or sugar-cane juice,' इक्षुरसोदः; 'of spirituous liquor,' सुरोदः; 'of ghee or clarified butter,' घृतोदः; 'of milk,' क्षीरोदः; 'of curds,' दध्युदः; 'of pure water,' शुद्धोदः; 'churning of the ocean,' समुद्रमन्थनं. The mountain मन्दरः is fabled to have been used by the Suras and Asuras in the churning of the ocean after the deluge, for the recovery or production of fourteen sacred things. These were, 1. 'the goddess Lakshmí,' लक्ष्मीः, 2. 'the jewel of Krishna,' कौस्तुभः, 3. 'the tree of paradise,' पारिजातः, 4. 'spirituous liquor personified as a nymph,' वारुणी -रुणी, 5. 'the physician of the gods,' धन्वन्तरिः *m.*, 6. 'the moon,' चन्द्रः, 7. 'the cow of plenty,' कामधेनुः *f.*, कामदुघा, कामदुक् *f.* (-दुह्), 8. 'the elephant of Indra,' ऐरावतः, 9. 'the horse of Indra,' उच्चैःश्रवस् *m.* (स्), 10. 'nymph of Indra's heaven,' अप्सराः *f.* (स्), 11. 'a deadly poison,' विषं, हलाहलः -लं, हालहालं, हालहलं, कालकूटः -टं, 12. 'nectar or ambrosia,' अमृतं, 13. 'Indra's bow,' इन्द्रधनुस्, 14. 'conch,' शङ्खः. The mountain Mandara is also called इन्द्रकीलः.

OCEAN, OCEANIC, *a.* सामुद्रः -द्री -द्रं, सामुद्रिकः -की -कं, समुद्रीयः -या -यं, समुद्रियः -या -यं, सैन्धवः -वी -वं, समुद्रसम्बन्धी -न्धिनी &c., महासागरसम्बन्धी &c.

OCHER, OCHRE, *s.* रक्तोपलं, सुवर्णी, सुवर्णगैरिकं.

OCHLOCRACY, *s.* अधमवर्गाधिपत्यं, अधमवर्गप्रभुत्वं, अधमलोकप्रभुत्वं.

OCTAGON, *s.* अष्टकोणः -णं, अष्टांसं, अष्टभुजः, अष्टकोणाकृतिः *f.*

OCTAGONAL, OCTANGULAR, *a.* अष्टकोणः -णा -णं, अष्टांसयः -या -यं, अष्टांसः -सा -सं, अष्टभुजः -जा -जं, अष्टभुजविशिष्टः -ष्टा -ष्टं.

OCTAVE, *s.* अष्टकं, अष्टमी; 'division of an octave,' श्रुतिः *f.*

OCTAVO, *a.* अष्टपत्रकः -का -कं, अष्टफलकः -का -कं, अष्टकः -का -कं.

OCTENNIAL, *a.* (Happening every eight years) प्रत्यष्टाब्दिकः -का -कं, अष्टवर्षिकः -की -कं, अष्टवर्षीणः -णा -णं.—(Lasting eight years) अष्टवर्षस्थायी -यिनी -यि (न्), वर्षाष्टकस्थायी.

OCTOBER, *s.* आश्विनोत्तरार्द्धं, कार्त्तिकपूर्व्वार्द्धं, आश्विनः, इषः, आश्वयुजः, कार्त्तिकः, बाहुलः, ऊर्जः, कार्त्तिकिकः.

OCTOGENARIAN, OCTOGENARY, *a.* अशीतिकः -का -कं, अशीतिवयस्कः -स्का -स्कं.

OCTOPETALOUS, *a.* अष्टदलः -ला -लं, अष्टदलयुक्तः -क्ता -क्तं.

OCTUPLE, *a.* अष्टगुणः -णा -णं, अष्टविधः -धा -धं, अष्टकः -का -कं.

OCULAR, *a.* चाक्षुषः -षी -षं, प्रत्यक्षः -क्षा -क्षं, नेत्रसम्बन्धी -न्धिनी -न्धि (न्), चक्षुःसम्बन्धी &c.; 'ocular demonstration or proof,' प्रत्यक्षप्रमाणं, चक्षुःप्रमाणं, चाक्षुषप्रमाणं, चाक्षुषज्ञानं, प्रत्यक्षं.

OCULARLY, *adv.* चक्षुषा, चाक्षुषप्रमाणेन, प्रत्यक्षेण, प्रत्यक्षप्रमाणेन.

OCULIST, *s.* चक्षुर्वैद्यः, नेत्रवैद्यः, नयनवैद्यः, चक्षूरोगचिकित्सकः.

ODD, *a.* (Not even) विषमः -मा -मं, असमः -मा -मं, अयुग्मः -ग्मा -ग्मं, अयुगः -गा -गं, अयुगलः -ला -लं, अयुक् *m. f. n.* (ज्).—(Remaining over a specified number) विवक्षितसंख्यातिरिक्तः -क्ता -क्तं.—(Strange, singular) विलक्षणः -णा -णं, असङ्गतः -ता -तं, अपरूपः -पा -पं, अद्भुतः -ता -तं, अपूर्व्वः -र्व्वा -र्व्वं, चित्रः -त्रा -त्रं, विचित्रः &c. (Uncommon) असामान्यः -न्या -न्यं, असाधारणः -णी -णं; 'game of odd and even,' मुष्टिद्यूतं.

ODDITY, ODDNESS, *s.* (State of being not even) विषमता, वैषम्यं, असमता, असाम्यं, विषमभावः, असमभावः, अयुग्मता.—(Strangeness) वैलक्षण्यं, विलक्षणता, विलक्षणभावः, असङ्गतत्वं, असङ्गतिः *f.*, अपरूपता, अद्भुतता -त्वं, अपूर्व्वता.—(Odd thing) कौतुकं,

ODDLY, *adv.* (Unevenly) विषमं, असमं, वैषम्येन.—(Strangely) असङ्गतं, विलक्षणं, सवैलक्षण्यं, अद्भुतं, विचित्रं, चित्रं, अपूर्व्वं.

ODDS, *s.* (Inequality, difference) न्यूनाधिकं, न्यूनाधिकभावः, वैषम्यं, विषमता, तारतम्यं.—(Superiority) आधिक्यं, श्रेष्ठता, विशिष्टता, वैशिष्ट्यं.

ODE, *s.* गीतं, गेयं, गानं, स्तोत्रं, काव्यं, कविता.

ODIOUS, *a.* (Hateful) द्वेष्यः -ष्या -ष्यं, द्वेषार्हः -र्हा -र्हं, विद्वेषणीयः -या -यं, विद्वेष्यः &c., गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, कुत्सितः -ता -तं, द्वेषयोग्यः -ग्या -ग्यं, कुत्सितः -ता -तं, कुत्सनीयः -या -यं, द्वेषपात्रं, द्वेषभाजनं, द्वेषास्पदं, द्वेषविषयः, घृण्यः -ण्या -ण्यं, अप्रियः -या -यं.—(In a high degree) अतिद्वेष्यः &c., अतिगर्हितः -ता -तं, अत्यप्रियः -या -यं.—(Causing hatred, invidious) द्वेषजनकः -का -कं, द्वेषोत्पादकः &c., द्वेषावहः -हा -हं, द्वेषकारकः &c., अमूयाजनकः &c.

ODIOUSLY, *adv.* द्वेषणीयं, विद्वेषणीयं, गर्हणीयं, गर्हितं, कुत्सितं.

Odiousness, *s.* द्वेष्यता, द्वेषणीयता, विद्वेष्यता, गर्ह्यता, द्वेषार्हत्वं.

Odium, *s.* (Hatred) द्वेषः, विद्वेषः, प्रद्वेषः, द्वेष्यता, विद्विष्टता, जनविद्वेषः, गर्हा, घृणा.—(Invidiousness) द्वेषजनकता, अभ्यूजनकता -त्वं.

Odontalgy, *s.* दन्तशूलः, दन्तवेदना, दन्तव्यथा, दन्तपीडा.

Odorate, *a.* उग्रगन्धः -न्धा -न्धं -न्धी -न्धिनी -न्धि (न्), तीक्ष्णगन्धः &c.

Odoriferous, odorous, *a.* गन्धवान् -वती -वत् (त्), गन्धी -न्धिनी -न्धि (न्), सुगन्धः -न्धा -न्धं, गन्धवहः -हा -हं, सुगन्धः -न्धा -न्धं, सौगन्धिकः -की -कं, सुगन्धिकः -का -कं, सुवासिकः -का -कं, सवासः -सा -सं, सामोदं -द -द, सामोदी &c., सुरभिः -भिः -भि, सुगन्धिः &c., परिमलयुक्तः -क्ता -क्तं, परिमलविशिष्टः -ष्टा -ष्टं, परिमली &c., सपरिमलः -ला -लं.

Odoriferously, *adv.* सुगन्धं, सुगन्धेन, सामोदं, सवासं, सपरिमलं, सुरभि.

Odoriferousness, *s.* सुगन्धता, सुगन्धता, सौगन्ध्यं, सामोदत्वं, सपरिमलत्वं.

Odour, *s.* गन्धः, वासः; 'fragrant odour,' सुगन्धः, सुगन्धिः *m.*, सौगन्ध्यं. सुवासः, सौरभ्यं, सामोदः, मोदः, वासः, परिमलः; 'bad odour,' दुर्गन्धः, दौर्गन्ध्यिः *m.*, दौर्गन्ध्यं, कुत्सितगन्धः; 'bad odour, disfavor,' अरुचिः *f.*, अदृष्टिः *f.*, कुदृष्टिः *f.*

Œconomical, œconomy. *See* Economical, economy.

Œcumenical, *a.* सार्वलौकिकः -की -कं, विश्वलौकिकः &c., सर्वसाधारणः -णी -णं.

Œsophagus, *s.* अन्नवाहिस्रोतस् *n.*, अन्नमार्गः, अन्नपथः.

Of, *prep.* expressed generally by the genitive case; as, 'of me,' मम; 'of him,' तस्य; 'of that man,' तस्य पुरुषस्य. It is frequently expressed by the crude form of a noun in the first member of a compound; as, 'best of all,' सर्वश्रेष्ठः -ष्ठा -ष्ठं; 'lord of men,' नरपतिः *m.*; 'made of wood,' काष्ठनिर्मितः -ता -तं. When it denotes 'out of,' 'from amongst,' it is expressed by मध्यात् or मध्ये, affixed to the gen. c., or crude form; as, 'of all men,' सर्वपुरुषमध्यात् or सर्वपुरुषाणां मध्यात् or मध्ये. It may sometimes be rendered by the abl. c., in phrases where 'from' may be substituted in English; as, 'of a child, or from childhood,' बाल्यात्; 'of a race of kings, or descended from a race of kings,' राजकुलात् प्रसूतः or राजकुलप्रसूतः. It may even be rendered by the instr. c., in phrases where 'by' may be substituted in English; as, 'hospitably entertained of the king,' *i.e.* 'by the king,' राज्ञा सत्कृतः. Where 'of' denotes 'property,' 'possession,' 'connexion with,' 'belonging to,' &c., it may either be expressed by the use of such words as सम्बन्धी -न्धिनी &c., विषयः -या -यं, विषयकः &c., or by the gen. case, as in some of the foregoing examples. Very frequently an adjective compound involves some of these senses of the preposition; as, 'a bird of a red color,' रक्तवर्णः पक्षी; 'a man of great valor,' महावीर्यः पुरुषः; 'a woman of great wealth,' महाधना स्त्री. For the other senses of this preposition, *see* 'by,' 'from,' 'out,' 'among.' 'Of late,' अर्वाक्, अर्वाङ्काले, नूतनकाले; 'of old, पुरा, पुरस्तात्, पूर्वं, प्राङ्काले; 'son of a grandson,' प्रपौत्रः; 'pupil of a pupil,' प्रशिष्यः.

OVERHEARD, *p.p.* आकर्णितः -ता -तं, अकस्माद् आकर्णितः &c., श्रुतः -ता -तं.

To OVERJOY, *v. a.* अत्यन्तम् आनन्द् (c. 10. -नन्दयति -यितुं) or प्रहृष् (c. 10. -हर्षयति -यितुं), अतिशयेन प्रहृष्.

OVERJOY, *s.* अत्यानन्दः, परमानन्दः, परमहर्षः, परमाह्लादः.

OVERJOYED, *p. p.* परमहृष्टः -ष्टा -ष्टं, परमसंहृष्टः &c., परमानन्दितः -ता -तं, परमाह्लादितः -ता -तं, हर्षाकुलः -ला -लं, हर्षविह्वलः -ला -लं, रोमाञ्चितः -ता -तं, हर्षरोमाञ्चितः -ता -तं, पुलकितः -ता -तं, हर्षपुलकितः -ता -तं, उल्लासितः -ता -तं, उल्लसितः -ता -तं, उल्लासी -सिनी -सि (न्), परमप्रीतः -ता -तं, हृष्टचित्तः -त्ता -त्तं, प्रहृष्टः &c., प्रहृष्टमनाः -नाः -नः,

(स्), अतिहर्षयुक्तः -क्ता -क्तं, अतितुष्टः &c.; 'to be overjoyed,' परमम् आनन्दं (c. 1. -नन्दति -न्दितुं), परमानन्दं कृ.

OVERLAID, *p. p.* आच्छन्नः -न्ना -न्नं, पिहितः -ता -तं, पिनद्धः -द्धा -द्धं; 'with gold,' सुवर्णेपत्रपिनद्धः -द्धा -द्धं.

OVERLARGE, *a.* अतिबृहन् -हती -हत् (त्), अतिमहान् -हती &c., अतिस्थूलः -ला -लं, अतिविपुलः &c., एकान्तस्थूलः &c., एकान्तरिक्तः -क्ता -क्तं.

To OVERLAY, *v. a.* (An infant) शय्यास्तरणभारेण पीडयित्वा शिशुप्राणघातं कृ.—(Cover, spread over) छद् (c. 10. छादयति -यितुं), आच्छद्, पिधा (c. 3. -दधाति -धातुं), अपिधा.—(Oppress with too great a weight) अतिभारेण पीड् (c. 10. पीडयति -यितुं).

To OVERLEAP, *v. a.* लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, लङ्घनं कृ, उत्प्लु (c. 1. -प्लवते -प्लोतुं).

OVERLENIENT, *a.* अतिमृदुः -दुः -दुी -दु, एकान्तमृदुः &c.

To OVERLOAD, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं) or आरुह् in caus. (-रोपयति -यितुं), अतिभाराक्रान्तं -न्तां कृ, अत्यन्तं or अतिशयेन पॄ (c. 10. पूरयति -यितुं), अतिपूर्णं -र्णां कृ.

OVERLOADED, *p. p.* अतिभाराक्रान्तः -न्ता -न्तं, अतिभारार्तः -र्ता -र्तं, अतिभारी -रिणी -रि (न्), अतिपूर्णः -र्णा -र्णं, अतिपूरितः &c. *See* OVERBURDENED.

OVERLOADING, *s.* अतिभारन्यासः, अतिभारारोपणं, आक्रमः -मणं.

To OVERLOOK, *v. a.* (View from a high place) उन्नतस्थानाद् अवलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं) or निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or अवेक्ष् or अभिवीक्ष्.—(Superintend, preside over) अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), कार्य्यावेक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, कार्य्याणि अवेक्ष्, अध्यक्षः -क्षा -क्षं भू.—(Let pass, excuse) उपेक्ष्, अवमृज् (c. 6. -मृजति -मार्ष्टुं), मुच् (c. 6. मुञ्चति, मोक्तुं), क्षम् (c. 1. क्षमते -ति, क्षन्तुं), दोषाच्छादनं कृ, दोषक्षालनं कृ, उपेक्षां कृ, उपेक्षणं कृ.

OVERLOOKED, *p. p.* (Viewed from above) उन्नतस्थानाद् or उन्नतप्रदेशाद् अवलोकितः -ता -तं.—(Superintended) अधिष्ठितः -ता -तं, अवेक्षितः -ता -तं.—(Passed over, excused) उपेक्षितः -ता -तं, अवसृष्टः -ष्टा -ष्टं.

OVERLOOKER, *s.* अवेक्षिता *m.* (तृ), अध्यक्षः, उपदृष्टा *m.* (ष्टृ), कार्य्यद्रष्टा.

OVERMUCH, *a.* अति or अतिशय prefixed, अधिकः -का -कं, अत्यन्तः -न्ता -न्तं, एकान्तः -न्ता -न्तं, अतिमात्रः -त्रा -त्रं, अतिमर्य्यादः -दा -दं, अतिरिक्तः -क्ता -क्तं.

OVERMUCH, *s.* अतिबाहुल्यं, आधिक्यं, अधिकता, अतिरिक्तता, एकान्तत्वं.

OVERMUCH, *adv.* अति prefixed, अतिशयेन, अत्यन्तं, अतिमर्य्यादं, एकान्ततस्.

OVER-OFFICIOUS, *a.* अत्युपचारी -रिणी -रि (न्), अत्युपकारी &c., अत्युपचारः &c.

To OVERPASS, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -रितुं).

OVERPAST, *p. p.* अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, गतः -ता -तं.

To OVERPAY, *v. a.* अतिमूल्यं or अधिकमूल्यं दा (c. 3. ददाति, दातुं).

OVERPLUS, *s.* उद्धर्षः, उद्धर्षं, अवशिष्टं, उच्छिष्टं, शिष्टं, परभागः.

To OVERPOWER, *v. a.* अभिभू, पराभू, पराजि (c. 1. -जयते -जेतुं), निर्जि, दम् (c. 10. दमयति -यितुं), प्रदम्, आक्रम् (c. 1. -क्रामति -क्रमितुं), पराक्रम्, वशीकृ. *See To* OVERCOME.

OVERPOWERED, *p. p.* पराजितः -ता -तं, आक्रान्तः -न्ता -न्तं. *See* OVERCOME.

To OVERRATE, OVERPRIZE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), अधिकमूल्यं or अतिमूल्यं कृ.

To OVERREACH, *v. a.* अतिसन्धा (c. 3. -दधाति -धातुं), अभिसन्धा, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, प्रतॄ (c. 10. -तारयति -यितुं).

OVERREACHED, *p. p.* अतिसंहितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

OVERREACHING, *s.* अतिसन्धानं, अतिसन्धिः *m.*, प्रलम्भः, प्रतारणं -णा.

OVERRIPE, *a.* अतिपक्वः -क्वा -क्वं, कालप्ररूढः -ढा -ढं, विनाशोन्मुखः &c.

To OVERRULE, *v. a.* अधिकृ, प्रभू, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), विनियम् (c. 1. -यच्छति -यन्तुं), नियम्, संनियम्, संयम्, यम्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, अधिकारं कृ.

OVERRULER, *s.* अधिकारी *m.* (न्), अधिष्ठाता *m.* (तृ), प्रभुः *m.*, अनुशास्ता.

To OVERRUN, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), अधिक्रम्, उपद्रु (c. 1. -द्रवति -द्रोतुं), उपद्रवं कृ, उपप्लवं कृ.

OVERRUN, *p. p.* आक्रान्तः -न्ता -न्तं, आक्रमितः -ता -तं, उपद्रुतः -ता -तं, उपप्लुतः &c., आकीर्णः -र्णा -र्णं, आस्तीर्णः &c., व्याप्तः -प्ता -प्तं.

To OVERSEE, *v. a.* उपदृश् (c. 1. -पश्यति -द्रष्टुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), कार्य्यावेक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).

OVERSEER, *s.* अध्यक्षः, उपदृष्टा *m.* (ष्टृ), अवेक्षिता *m.* (तृ), कार्य्यावेक्षिता *m.*, अधिष्ठाता *m.*, अधिकर्म्मिकः, कार्य्यद्रष्टा *m.*, कार्य्याधीक्षः, अधिकारी *m.* (न्), अधिकृतः; of a village,' स्थायुकः.

To OVERSET, *v. a.* पर्यस् (c. 4. -अस्यति -असितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), आक्षिप् (c. 10. -क्षेपयति -यितुं), निपत् (c. 10. -पातयति -यितुं), अधः कृ.

To OVERSET, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं). *See To* UPSET.

To OVERSHADOW, *v. a.* छायया छद् (c. 10. छादयति -यितुं) or प्रच्छद् छायां कृ, छायावृतं -तां कृ, वितानीकृ.

OVERSHADOWED, *p. p.* छायावृतः -ता -तं, छायाच्छादितः &c., छायाच्छन्नः -न्ना -न्नं.

To OVERSHOOT, *v. a.* लक्ष्यम् अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or लक्ष्यं (c. 10. लक्षयति -यितुं) or उल्लङ्घ्, लक्ष्यातिक्रमं कृ, लक्ष्योल्लङ्घनं कृ, लक्ष्यातिक्षेपं कृ.

OVERSIGHT, *s.* (Error) दृष्टिदोषः, भ्रमः, भ्रान्तिः *f.*, प्रमादः.

To OVERSLEEP, *v. a.* अतिशयेन or अतिदीर्घं or सुदीर्घं स्वप् (c. 2. स्वपिति, स्वप्तुं), अतिनिद्रां कृ, अतिस्वापं कृ.

To OVERSPREAD, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), आच्छद् (c. 10. -छादयति -यितुं), आवृ (c. 5. -वृणोति -वरितुं -रीतुं), समावृ, अवतन् (c. 5. -तनोति -नितुं), वितन्, वितानीकृ, अवकॄ (c. 6. -किरति -करितुं -रीतुं), समवकॄ, आकॄ, पॄ (c. 10. पूरयति -यितुं).

OVERSPREAD, *p. p.* आक्रान्तः -न्ता -न्तं, समाक्रान्तः &c., आच्छादितः -ता -तं, आच्छन्नः -न्ना -न्नं, प्रच्छादितः &c., आवृतः -ता -तं, आकीर्णः -र्णा -र्णं, आस्तीर्णः &c., व्याप्तः -प्ता -प्तं, संवीतः &c., परिवीतः &c., पूरितः &c., गाहितः &c., श्रितः &c., वितानीकृतः &c., पूर्णः -र्णा -र्णं.

To OVERSTATE, *v. a.* अतिशयेन or यथाधिक्येन वद् (c. 1. वदति -दितुं), अत्युक्तिं कृ, अतिशयोक्तिं कृ.

To OVERSTEP, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, अभिलङ्घ्.

OVERSTOCK, *s.* अतिसञ्चयः, अधिकसञ्चयः, अतिसम्भारः, अतिसङ्ग्रहः.

To OVERSTOCK, *v. a.* अतिशयेन सम्भृ (c. 1. -भरति -भर्त्तुं) or उपसञ्चि (c. 10. -चययति -यितुं) or पॄ (c. 10. पूरयति -यितुं), अतिसम्भारं कृ, अतिसञ्चयं कृ, अधिकसम्भारं कृ, अतिपूर्त्तिं कृ, अधिकपूर्त्तिं कृ.

OVERSTOCKED, *p. p.* अतिसम्भृतः -ता -तं, अतिपूरितः -ता -तं, अतिपूर्णः -र्णा -र्णं.

To OVERSTRAIN, *v. n.* अतियत्नं कृ, अतिप्रयत्नं कृ, अतिशयेन यत् (c. 1. यतते -तितुं).

OVERT, *a.* प्रकाशः -शा -शं, स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, विस्पष्टः -ष्टा -ष्टं, अभिव्यक्तः &c., विवृतः -ता -तं, प्रकटः -टा -टं, अगूढः -ढा -ढं, आविर्भूतः &c., प्रत्यक्षः -क्षा -क्षं.

To OVERTAKE, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, भू (c. 1. भरति, भर्तुं), ग्रस् (c. 1. ग्रसते -सितुं), आक्रम् (c. 1. -क्रामति -क्रमितुं), पश्चाद्धावन् or पश्चाद् अनुधाव्य आक्रम् or आक्रमणं कृ.—(Come upon unexpectedly) अकस्माद् आसद् (c. 10. -सादयति -यितुं) or प्राप्.

OVERTAKEN, *p. p.* प्राप्तः -प्ता -प्तं, सम्प्राप्तः -प्ता -प्तं, ग्रस्तः -स्ता -स्तं, धृतः -ता -तं, गृहीतः -ता -तं, आक्रान्तः -न्ता -न्तं, आक्रमितः -ता -तं.—(Come upon suddenly) अकस्माद् आसादितः -ता -तं.

To OVERTASK, OVERTAX, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं) or ऋ in caus. (अर्पयति -यितुं), अधिकभारं न्यस्.

To OVERTHROW, *v. a.* (Defeat) पराजि (c. 1. -जयते -जेतुं), विजि, निर्जि, जि, पराहन् (c. 2. -हन्ति -न्तुं), अभिभू, पराभू, पराम् (c. 4. -अम्यति -असितुं), दम् (c. 10. दमयति -यितुं), प्रदम्, पर्यामृश् (c. 6. -मृशति -ष्टुं), वशीकृ.—(Turn upside down, upset, subvert) पर्यस्, पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप् (c. 10. क्षेपयति -यितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं), पत् (c. 10. पातयति -यितुं), निपत्.—(Destroy, &c.). *See* OVERTURN.

OVERTHROW, *s.* (Defeat) पराजयः, अपजयः, जयः, पराभवः, अभिभवः, अभिभूतिः *f.*, परिभवः.—(Ruin, destruction) नाशः, विनाशः, प्रणाशः, क्षयः, ध्वंसः, विध्वंसः, प्रध्वंसः, उच्छेदः, समुच्छेदः, सादः -दनं घातः, विघातः, भङ्गः, भेदः, व्यसनं; 'of an army,' बलव्यसनं.—(Upsetting, subverting) पर्यासः, पर्यसनं, परिवर्त्तनं, पातनं, निपातनं.

OVERTHROWN, *p. p.* पराजितः -ता -तं, जितः &c., पराभूतः &c., अभिभूतः &c., पराहतः &c., पराक्तः -क्ता -क्तं, उपास्तः &c., नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, विनाशितः &c., हतः &c., भग्नः -ग्ना -ग्नं, पातितः -ता -तं, निपातितः &c., ध्वंसितः &c., ज्ञातव्यसनः -ना -नं.

OVERTLY, *adv.* प्रकाशं, स्पष्टं, विस्पष्टं, व्यक्तं, प्रकटं, आविस्, प्रादुस्, अगूढं, प्रत्यक्षं -क्षेण -क्षतस्.

OVERTURE, *s.* (Opening) विवृतिः *f.*, विवरणं, प्रकाशः -शनं.—(Proposal) उपन्यासः, निवेदनं, प्रसङ्गः, अभिधानं; 'secret overture,' उपजपः -जापः.—(Musical or dramatic prelude) पूर्वरङ्गः, प्रस्तावना, प्रकरणं, उपोद्घातः, नान्दी; 'player or speaker of it,' नान्दीवादी, नान्दीकरः.

To OVERTURN, *v. a.* परावृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्, अपवृत्, पर्यस् (c. 4. -अस्यति -असितुं), पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप् (c. 10. -क्षेपयति -यितुं), पत् (c. 10. पातयति -यितुं), निपत्, उत्सद् (c. 10. सादयति -यितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं), अधोमुखीकृ, अधरोत्तरीकृ, अधः कृ, न्युब्जीकृ.—(Destroy, &c.) नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, ध्वंस (c. 10. ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं), सद्.

OVERTURN, *s.* पर्यासः, पर्यसनं, परिवर्त्तनं, परावर्त्तनं, पातनं, निपातनं, उत्सादनं, क्षोभः, संक्षोभः, ध्वंसः, ध्वंसनं, प्रध्वंसः. *See* OVERTHROW.

OVERTURNED, *p. p.* पर्यस्तः -स्ता -स्तं, पराक्षिप्तः -प्ता -प्तं, परावर्त्तितः -ता -तं, परिवर्त्तितः &c., परावृत्तः -त्ता -त्तं, अपवृत्तः &c., पातितः &c., निपातितः &c., उत्सादितः &c., संक्षोभितः &c., अधःकृतः &c., ध्वंसितः &c. *See* OVERTHROWN.

OVERTURNING, *s.* परावर्त्तनं, परिवर्त्तनं, पर्यसनं, उत्सादनं. *See* OVERTURN.

To OVERVALUE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), अधिकमूल्यं or अतिमूल्यं कृ or स्था in caus. (स्थापयति -यितुं).

OVERWEENING, *a.* अत्यभिमानी -निनी -नि (न्), अतिमानी &c., अत्यहङ्कारी &c., अत्यहंयुः -युः -यु, आत्मश्लाघी &c.

OVERWEENINGLY, *adv.* अत्यभिमानेन, अत्यहङ्कारेण, अत्यभिमानपूर्वं.

OVERWEIGHT, *s.* अतिभारः, अधिकभारः, भाराधिक्यं, अतिशयभारः.

To OVERWHELM, *v. a.* (Crush, beat down) अवमृद् (c. 9. -मृद्नाति -मर्दितुं), प्रमृद्, आमृद्, अवपत् (c. 10. -पातयति -यितुं), निपत्, पुष् (c. 10. पोषयति -यितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), सम्पिष्, विनिष्पिष्.—(Overspread) आछद् (c. 10. छादयति -यितुं), समाछद्, आवृ (c. 5. -वृणोति -वरितुं -रीतुं), समावृ, आक्रम् (c. 1. क्रामति -क्रमितुं), अवकृ (c. 6. -किरति -करितुं -रीतुं), समवकृ, अवाकृ; 'he overwhelms them with arrows,' तान् अवाकिरति शरैः.—(Immerge, submerge) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, अवगाह् (c. 10. -गाहयति -यितुं), समाप्लु (c. 10. -प्लावयति -यितुं, c. 1. -प्लवते), समभिप्लु, अभिप्लु, परिप्लु, अभिपरिप्लु, उपप्लु, विप्लु, समाप्लुतं -तां कृ, परिप्लुतं -तां कृ, समभिप्लुतं &c. कृ. मग्नं -ग्नां कृ.

OVERWHELMED, *p. p.* मर्दितः -ता -तं, अवमर्दितः &c., अवपातितः &c., मम्पिष्टः -ष्टा -ष्टं, आच्छन्नः -न्ना -न्नं, आच्छादितः -ता -तं, आवृतः -ता -तं, आक्रान्तः -न्ता -न्तं, समाक्रान्तः &c., आकीर्णः -र्णा -र्णं, मग्नः -ग्ना -ग्नं, निमग्नः &c., प्रमग्नः &c., गाहितः &c., अभिप्लुतः &c., अभिपरिप्लुतः &c., समभिप्लुतः &c., उपप्लुतः &c., परिप्लुतः &c., समाप्लुतः &c., सम्प्लुतः &c., उपद्रुतः &c., ग्रस्तः -स्ता -स्तं, परिगतः &c., आकुलः -ला -लं; 'with care,' चिन्तामग्नः &c., चिन्ताकुलः &c.; 'with shame,' ह्रीपरिगतः &c.

OVERWHELMING, *part.* or *a.* अवमर्दी -र्दिनी -र्दि (न्), उपप्लवी &c., विप्लवकारी &c., उपप्लवकारकः -का -कं.

OVERWISE, *a.* अतिप्राज्ञः -ज्ञा -ज्ञं, अतिज्ञानी -निनी -नि (न्), एकान्तप्राज्ञः &c., अतिपण्डितः -ता -तं, पण्डितम्मन्यः -न्या -न्यं.

To OVERWORK, *v. a.* अतिशयेन or एकान्ततः or अधिकम् आयस् (c. 10. -यासयति -यितुं), अत्यायासं or अतिक्लेशं कृ or दा.

OVERWORK, *s.* अत्यायासः, अतिक्लेशः, एकान्तक्लेशः, अतिश्रमः.

OVERWORKED, *p. p.* अत्यायासितः -ता -तं, अतिक्लेशितः &c., अतिक्लिष्टः -ष्टा -ष्टं.

OVERWROUGHT, *a.* अतिसंस्कृतः -ता -तं, अतिपरिष्कृतः &c., अतिसिद्धः -द्धा -द्धं.

OVERZEALOUS, *a.* अत्युत्सुकः -का -कं, अत्यासक्तः -क्ता -क्तं, अतिव्ययः -या -यं, अत्युद्यमः -मा -मं, अतिचण्डः -ण्डा -ण्डं, अत्युत्कण्ठितः &c.

OVIFORM, *a.* अण्डाकारः -रा -रं, अण्डाकृतिः -तिः -ति, अण्डरूपः -पा -पं.

OVIPAROUS, *a.* अण्डजः -जा -जं, अण्डजनकः -का -कं, अण्डप्रजः -जा -जं, अण्डप्रसूः -सूः -सु, अण्डोत्पादकः -का -कं, द्विजः -जा -जं, द्विजन्मा -न्मा -न्म (न्), द्विजातिः -तिः -ति, अयोनिजः &c.; 'any oviparous animal,' द्विजः, द्विजातिः &c.

To OWE, *v. a.* (Owe money) धृ (c. 10. धारयति -यितुं) with acc. and dat.; as, 'he owes a hundred pieces of money to Devadatta,' देवदत्ताय शतं मुद्रा धारयति; 'he repaid me the money which he owed me,' धारयन् मह्यं धनूनि प्रायच्छत्.—(Be indebted) ऋणी -णिनी -णि भू, ऋणवान् -वती -वत् भू, ऋणवद्भः -द्भा -द्भं भू, ऋणं कृ.—(Be obliged) अनुगृहीतः -ता -तं भू; 'I owe you many thanks for your advice,' अनुगृहीतोऽस्मि तवोपदेशेन. The sense of 'owe' may be expressed by the fut. pass.

part.; as, 'I owe him money,' मया तस्मै धनं प्रतिदेयं or प्रतिदातव्यं, or by changing the construction of the sentence thus, 'I owe my deliverance to you,' भवान् मम रक्षाकारणम् इति ज्ञातव्यं. *See* the next word.

Owing, *part.* (Due) देयः -या -यं, प्रतिदेयः -या -यं, दातव्यः -व्या -व्यं, प्रतिदातव्यः &c., दानीयः -या -यं, शोधनीयः -या -यं.—(Following as effect and cause) प्रयुक्तः -क्ता -क्तं, जनितः -ता -तं, उत्पादितः &c., उद्भवः -वा -वं, प्रभवः &c., कारणभूतः -ता -तं; 'my deliverance is owing to you,' भवान् मम रक्षाकारणं or मम रक्षणं भवत्प्रयुक्तं.—(Imputable) आरोपणीयः -या -यं, अध्यारोपणीयः -या -यं, सम्बन्धनीयः &c.

Owl, *s.* उलूकः, ऊलूकः, पेचकः, कौशिकः, वायसारातिः *m.*, दिवान्धः, दिवाभीतः, निशाटः, निशाचरः, नक्तञ्चरः, निशादर्शी *m.* (न्), नक्तञ्चारी *m.* (न्), रजनीचरः, काकभीरुः *m.*, काकरूकः, घूकः, वक्रनासिकः, रक्तनासिकः.

Owl-light, *s.* ईषत्प्रकाशः, मन्दप्रकाशः, मन्दप्रभा, निशादिः *m.*

Own, *a.* स्वः स्वा स्वं, आत्म in comp., स्व in comp., स्वकीयः -या -यं, आत्मीयः -या -यं, स्वीयः -या -यं, स्वकः -का -कं, निजः -जा -जं, नैजः -जी -जं प्रातिस्विकः -की -कं, आत्मसम्बन्धी -न्धिनी -न्धि (न्), आत्माधीनः -ना -नं, आत्मभूतः -ता -तं; 'my own,' मदीयः -या -यं; 'thy own,' त्वदीयः -या -यं; 'our own,' अस्मदीयः -या -यं; 'of one's own self or own accord,' स्वयं.—(Belonging to no other) अनन्यसम्बन्धी &c., अनन्यस्वामिकः -का -कं, अनन्याधीनः -ना -नं, अनन्यवर्ती &c. Compounds with स्व and आत्म, are most frequent to express 'own,' as applicable to the first, second, or third person; thus, 'one's own act,' स्वकर्म्म *n.* (न्), आत्मकर्म्म, स्वयकृतं; 'one's own son,' स्वपुत्रः, आत्मजः, स्वजः; 'own nature,' स्वभावः; 'own fancy,' स्वच्छन्दस् *n.*; 'own duty,' स्वधर्म्मः; 'own country,' स्वदेशः; 'own caste or tribe,' स्वजातिः *f.*; 'own family,' स्वकुलं; 'own advantage,' स्वार्थः, आत्महितं; 'for one's own sake,' आत्मार्थे -र्थं; 'one's own wife,' स्वकीया, स्वीया, स्वभार्य्या; 'to make one's own,' आत्मसात्कृ.

To own, *v. a.* (Have the legal right to) अधिकारी -रिणी -रि भू or अस्, स्वामी &c. भू, ईश्वरः -रा -री -रं भू; 'to own land,' क्षेत्राधिकारी &c. भू, क्षेत्रस्वामी &c. भू; or expressed by the use of अस् or भू with the gen. c., or with मदीयः -या -यं, आत्मीयः -या -यं, स्वकीयः -या -यं, आत्माधीनः -ना -नं, स्वाधीनः &c.; as, 'I own that land,' तत् क्षेत्रं मदीयम् अस्ति or आत्माधीनं or मम भवति; 'the king owns this money,' इदं धनं राजाधीनम् अस्ति. *See To* belong. (Acknowledge to belong to one's self, claim to one's self) स्वीकृ, आत्मसात्कृ, स्वीयमिति वद् (c. 1. वदति -दितुं), मनेति वद्, स्वत्वम् अभिमन्, स्वत्वं ज्ञा (c. 10. ज्ञापयति -यितुं, c. 9. जानाति) or अभिज्ञा or बुध् (c. 10. बोधयति -यितुं), स्वकीयं -यां कृ, आत्मीयं -यां कृ.—(Confess, acknowledge) स्वीकृ, अङ्गीकृ, उरीकृ, अनुयह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह्, अभिमन् (c. 4. -मन्यते -मन्तुं), अभिज्ञा (c. 9. -जानाति -ज्ञातुं), प्रतिज्ञा, प्रत्यभिज्ञा, समभिज्ञा, अनुभाष् (c. 1. -भाषते -षितुं), स्वीकारं कृ.

Owned, *p. p.* (Confessed, acknowledged) स्वीकृतः -ता -तं, अङ्गीकृतः &c., अभिज्ञातः -ता -तं, प्रतिज्ञातः &c.—(The legal right vested in) स्वत्वविशिष्टः -ष्टा -ष्टं; 'owned by me,' मत्स्वत्वविशिष्टः &c.

Owner, *s.* अधिकारी *m.* -रिणी *f.* (न्), स्वामी *m.* -मिनी *f.* (न्), ईश्वरः -रा -री, पतिः *m.*, प्रभुः *m.*, अधिभूः *m.*, अधिपः, ईशिता *m.* (तृ), नेता *m.* (तृ), नायकः, परिवृढः, भरद्वहः; 'of cattle,' गवीश्वरः; 'of land,' क्षेत्राधिकारी *m.*

Ownership, *s.* स्वाम्यं, स्वामित्वं, स्वत्वं, अधिकारः -रिता -त्वं, प्रभुत्वं -ता, ईश्वर्य्यं, नायकत्वं.

Owning, *s.* (Confession) स्वीकारः, स्वीकरणं, अङ्गीकारः, अङ्गीकरणं.

Ox, *s.* (Male of the bovine genus) गौः *m.* (गो), वृषभः, वृषः, ऋषभः, बलीवर्दः, उक्षा *m.* (न्), वहतः -तिः -तुः *m.*, ककुद्मान् *m.* (त्), अनड्वान् *m.* (दुह्), शक्करः, शाक्करः, धाकः, वित्सनः; 'stupid as an ox,' गोमूढः; 'relating to an ox,' औक्षः -क्षी -क्षं.—(Draft ox) शङ्कुः.

Oxen, *pl.* गावः *m. pl.*; 'herd of oxen,' गोकुलं, गोवृन्दं, औक्षकं, गोसमूहः, पशुगणः, गव्या, गोत्रा, पाशवं, उक्षणां संहतिः *f.*, गवां व्रजः; 'yoke of oxen,' गोयुगं, गोगोयुगं; 'property in oxen,' गोधनं; 'carriage drawn by oxen,' गोयानं.

Ox-fly, *s.* गोमक्षिका, गोमशकः.

Oxyd, oxide, *s.* रीतिः *f.*; 'of iron,' सारं; 'of mercury,' रसभस्म *n.* (न्).

To oxydate, oxydize, *v. a.* जारणं कृ, साधनं कृ, भस्मीकृ, आतचनं कृ, प्रतीवापं कृ; 'oxydized iron,' सारणं.

Oxydation, *s.* जारणं, साधनं, आतचनं, प्रतीवापः, भस्मीकरणं.

Oxygen, *s.* The word used in modern treatises is अम्लकरः.

Oyez, oyes, शृणुत शृणुत आर्य्याः.

Oyster, *s.* शुक्तिः *f.*, शुक्तिका, तोयशुक्तिका, पटोलकः, पुष्टिका, मुक्तास्फोटः, मुक्तागारं, मुक्ताप्रसूः *f.*; 'oyster-shell,' शुक्तिपुटं, शुक्तिपेशी.

Oyster-woman, oyster-wench, *s.* शुक्तिविक्रयिणी, शुक्तिविक्रेत्री.

P.

Pabular, pabulous, *a.* पौष्टिकः -की -कं, पोषकः -का -कं, पुष्टिकरः &c.

Pabulum, *s.* भोजनं, आहारः, भोज्यं, भक्ष्यं, पौष्टिकं. *See* Food.

Pace, *s.* (A step) पदपातः, पादपातः, पदक्रमः, पदन्यासः, पादन्यासः, पदविक्षेपः, पादविक्षेपः, पदनिक्षेपः, पदक्रमः, पदं, क्रमः.—(Gait) गतिः, गमनं, चारः, चरणं, चलनं, अयनं.—(Of horses) धारः -रा, चारः, वारकः पदविक्षेपः, अयनं; 'a horse with a good pace,' सुखायनः, सुखचारः. A horse's paces are, 'walk,' आस्कन्दितं; 'trot,' धौरितकं; 'sidling,' रेचितं; 'gallop,' वल्गितं; 'vaulting,' प्लुतं.—(Of an elephant) गजव्रजं.—(Degree of celerity) क्रमः, पदक्रमः, गतिवेगः; 'a quick pace,' द्रुतपदं; 'at a good pace,' चित्रपदक्रमं; 'going at a quick pace,' द्रुतगामी -मिनी -मि (न्), द्रुतक्रमः -मा -मं, अविलम्बितक्रमः &c.

To pace, *v. n.* क्रम् (c. 1. क्रामति, c. 4. क्राम्यति, क्रमितुं), क्रमे क्रमे चल् (c. 1. चलति -लितुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं) or गम् (c. 1. गच्छति, गन्तुं) or पदन्यासं कृ; 'to pace up and down,' इतस्ततः क्रम् or चल् or भ्रम् (c. 4. भाम्यति, भमितुं), परिक्रमं कृ; 'pacing to and fro,' चङ्क्रम्यमाणः -णा -णं.

To pace, *v. a.* पदन्यासेन मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

Paced, *a.* (Having a particular gait) गति in comp., गतिक in comp.; as, 'slow-paced,' मन्दगतिः -तिः -ति, मन्दगतिकः -का -कं.

Pacific, pacificatory, *a.* शमकः -का -कं, शान्तिकः -की -कं, शमी -मिनी -मि (न्), शमकारी &c., शमकारकः -का -कं, उपशमकः &c., प्रशमकः &c., शान्तिकरः -रा -रं, शान्त्यात्मकः &c., सामोपचारकः &c., सामोपायकः &c.

Pacification, *s.* शमनं, प्रशमनं, उपशमनं, शान्तिः *f.*, उपशान्तिः *f.*, प्रशान्तिः *f.*, शान्तिकरणं, सान्त्वनं -ना, साम *n.* (न्), सामोपचारः,

सामोपायः, सामोपायप्रयोगः, कलहशान्तिः *f.*, विग्रहशान्तिः, क्रोधशान्तिः, क्रोधहरणं.—(Making peace) सन्धिकरणं, ऐक्यकरणं.—(Peace made) सन्धिः *m.*

PACIFICATOR, PACIFIER, *s.* सन्धिकर्त्री *m.* (र्त्तृ), शमकः. *See* PACIFIC.

PACIFIED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, उपशान्तः &c., प्रशान्तः &c., कृतशान्तिः -न्तिः -न्ति, शान्तक्रोधः -धा -धं, गतक्रोधः &c.; 'to be pacified,' शम् (c. 4. शाम्यति, शमितुं), प्रसद् (c. 1. -सीदति -सत्तुं), तुष् (c. 4. तुष्यति, तोषुं).

To PACIFY, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, अभिशान्त्व्, परिशान्त्व्, प्रसद् (c. 10. -सादयति -यितुं), अभिप्रसद्, साम् (c. 10. सामयति -यितुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, परितुष्, सम्परितुष्.

PACK, *s.* (Bundle, bale) भाण्डकं, भाण्डं, भारः, कूर्चः, पोटलिका, पोट्टली, गुच्छः -च्छकः, वासनं, वरण्डः -ण्डकः.—(Of hounds or dogs) श्वगणः, कुक्कुरगणः, श्वसंघः, कुक्कुरसमूहः, शुनीरः; 'one who keeps a pack of hounds,' श्वागणिकः.—(Number of persons) गणः, जनसमूहः, संघः, सङ्घटं, सङ्घः.—(Heap) राशिः *m.*, सङ्घटः, सञ्चयः, वृन्दं, समवायः.

To PACK, *v. a.* (Bundle up, press together) पुट् (c. 10. पुटयति -यितुं), पुटीकृ, सम्पुटीकृ, वासनीकृ, भाण्डीकृ, कूर्चीकृ, कूर्चं कृ, गुच्छीकृ, पोटलिकां कृ, कोशीकृ.—(In a box) भाण्डे निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं), कोशे or कोषे निविश् or निधा.—(Put together or unite with fraudulent design) कुकर्म्मसम्पादनार्थं संयुज् (c. 10. -योजयति -यितुं) or सङ्गम् (c. 10. -गमयति -यितुं) or सङ्कीकृ.—(A jury or assembly of any kind) स्वार्थसम्पादनार्थं स्वपक्षपातिनो धर्म्मसभां प्रविश् or स्वपक्षपातिनः सभ्यपदे or सभासदधिकारे नियुज्.—(Pack off, dismiss) प्रस्था in caus. (-स्थापयति -यितुं), अपसृ (c. 10. -सारयति -यितुं).

To PACK, *v. n.* (Be pressed together, or bundled together) पुटीभू, सम्पुटीभू, वासनीभू.—(Be placed in a box) भाण्डस्थः -स्था -स्थं भू, कोषस्थः &c. भू.—(Depart in haste) त्वरितम् अपगम् (c. 1. -गच्छति -गन्तुं).

PACKAGE, *s.* भाण्डकं, भाण्डं, वासनं, वरण्डः -ण्डकः, कूर्चः, पोटलिका.

PACK-CLOTH, *s.* वासनं, वासनपटः, वेष्टनं, वेष्टनपटः.

PACKED, *p. p.* (Bound together in a bundle) पुटीकृतः -ता -तं, सम्पुटीकृतः &c., कूर्चीकृतः &c.—(In a box) भाण्डस्थः -स्था -स्थं, वासनस्थः &c., भाण्डीकृतः &c., वासनीकृतः &c.

PACKET, *s.* (Small package) कूर्चः, पोटलिका, पोट्टली, समुद्गकः.—(Ship employed in carrying despatches) पत्रवाहिनी नौः, राजपत्रवाहका नौः, लेखहारिणी नौका, वेगवती नौका; 'steam-packet,' वाष्पीयनौः *f.*

PACK-HORSE, *s.* स्थूरी *m.* (न्), स्थौरी *m.*, स्थुरी *m.*, स्थोरी *m.*, पृष्ठ्यः.

PACK-SADDLE, *s.* पर्य्याणं, पर्य्ययणं, पल्यनं, पल्यानं.

PACK-THREAD, *s.* शणसूत्रं, सणसूत्रं, सनसूत्रं, शणतन्तुः *f.*, पवित्रकं.

PACT, PACTION, *s.* समयः, नियमः, संविद् *f.*, उपगमः, सङ्केतः.

PACTIONAL, PACTITIOUS, *a.* सामयिकः -की -कं, साङ्केतिकः -की -कं.

PACTOLUS, *s.* (A fabulous river) अक्षुः *m.*, अक्षुनदी.

PAD, *s.* (An easy paced horse) सुखायनः, सुखचारः.—(Foot-pad) मार्गिकाग्रः, पादचिकाग्रः, परिपन्थी *m.* (न्), पारिपन्थिकः.—(Bolster, cushion) उपधानं -नीयं, विष्टरः, स्तिस्तरः, बालिशं, आस्तरणं, उपबर्हः, अजिनं, पट्टः, पटः.—(Hair or other soft substance) लोमादि मृदुवस्तु *n.*

To PAD, *v. a.* (Stuff or furnish with hair or other soft substance) लोमादिमृदुवस्तुना आस्तृ (c. 5. -स्तृणोति -स्तरितुं -रीतुं), मृदुलोमादिना पॄ (c. 10. पूरयति -यितुं) or युज् (c. 10. योजयति -यितुं) or समायुज्.

To PAD, *v. n.* (Travel slowly) क्लमे क्लमे or शनैः शनैर् व्रज् (c. 1. व्रजति -जितुं).

PADDED, *p. p.* or *a.* मृदुलोमादिपूरितः -ता -तं, मृदुवस्तुपूरितः -ता -तं.

PADDING, *s.* मृदुलोमादि *n.*, लोमादिमृदुवस्तु *n.*, पूरणं, भरणं.

To PADDLE, *v. n.* (Beat the water with an oar) नौकादण्डेन जलं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or तड् (c. 10. ताडयति -यितुं), जलक्षेपणं कृ.—(Play in the water) जले क्रीड् (c. 1. क्रीडति -डितुं), जलक्रीडां कृ.—(Finger) अङ्गुलिचेष्टां कृ, अङ्गुलिव्यापारं कृ.

To PADDLE, *v. a.* (Propel by a paddle) नौकादण्डेन चल् (c. 10. चालयति -यितुं).

PADDLE, *s.* (Oar) नौकादण्डः, क्षेपणिः -णी *f.*, क्षिपणिः -णी *f.*, अरित्रं, नौचालनी. *See* OAR.—(Blade of the oar) क्षेपणिफलकं.

PADDLE-BOX, *s.* क्षेपणिकोशः, क्षेपणिकोषः, क्षेपण्याधारः.

PADDLE-WHEEL, *s.* क्षेपणिचक्रं, नौचालनचक्रं, नौचालनी.

PADDOCK, *s.* वाटी, वाटिका, वाटः -टं, चियीतः, प्राचीरपरिवृतं क्षेत्रं.

PADLOCK, *s.* तालकं, तालः -लं, तालयन्त्रं, प्रतितालौ, द्वारकीलः.—(Clasp) कुडुपः.

To PADLOCK, *v. a.* तालकेन बन्ध् (c. 9. बध्नाति, बन्धुं), तालचक्रं -क्रां कृ.

PÆAN, PEAN, *s.* जयगानं, जयशब्दः, जयध्वनिः *m.*, जयगीतं.

PAGAN, *s.* देवतार्चकः, देवतापूजकः, प्रतिमापूजकः, मूर्त्तिपूजकः, देवतासेवी *m.* (न्), असद्धर्म्मसेवी *m.* (न्), असद्धर्म्मावलम्बी *m.* *See* IDOLATER.

PAGAN, *a.* प्रतिमापूजकसम्बन्धी -न्धिनी -न्धि (न्), मूर्त्तिपूजकसम्बन्धी.

PAGANISM, *s.* प्रतिमापूजा, मूर्त्तिपूजा, देवतार्चा, देवतार्चनं -ना, मूर्त्तिसेवा -वनं, असद्धर्म्मावलम्बनं. *See* IDOLATRY, HEATHENISM.

PAGE, *s.* (Of a book) पृष्ठं, फलकः -कं, पत्रं, पत्रिका.—(Boy attendant) पार्श्वानुचरः, पार्श्वपरिचरः, बालसेवकः, बालानुचरः.

To PAGE, *v. a.* पृष्ठाङ्कनं कृ, पत्राङ्कनं कृ, पृष्ठसंख्याङ्कनं कृ.

PAGEANT, *s.* (Statue in show, &c.) शोभामूर्त्तिः *f.*, शोभाप्रतिमा.—(Show, spectacle) कौतुकं, चमत्कारः, चमत्कृतिः *f.*, चमत्करणं, आडम्बरं, प्रेक्षा, प्रेक्षणं, शोभा, यात्रा.

PAGEANT, *a.* कौतुकी -किनी -कि (न्), आडम्बरी &c., चमत्कारकः -का -कं, शोभनः -ना -नं, अतिशोभनः &c., यात्रिकः -की -कं.

PAGEANTRY, *s.* कौतुकं, चमत्कारः, आडम्बरं, शोभा. *See* PAGEANT, *s.*

PAGINAL, *a.* पृष्ठ्यः -ष्ठ्या -ष्ठ्यं, पुस्तकपत्रसम्बन्धी &c.

PAGODA, *s.* देवतामन्दिरं, देवताभवनं, देवतायतनं, देवमन्दिरं.

PAID, *p. p.* शोधितः -ता -तं, परिशोधितः &c., परिशुद्धः -द्धा -द्धं, अपाकृतः -ता -तं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, विगणितः -ता -तं, निस्तारितः -ता -तं, निरादिष्टः -ष्टा -ष्टं, गृहीतवेतनः -ना -नं,

PAIL, *s.* पात्रं, भाजनं, काष्ठपात्रं, जलपात्रं, जलभाजनं; 'for milk,' दोहनं -नी, गोदोहनी, दुग्धभाण्डं. *See* MILK-PAIL.

PAIN, *s.* दुःखं, पीडा, वेदना -नं, व्यथा, आधिः *f.*, तापः, सन्तापः, परितापः, बाधा, विबाधा, आबाधा, यातना, कृच्छ्रं, कष्टं, क्लेशः, खेदः, उद्वेगः, यन्त्रणं, दुर्ब्भं, दुःखितं, असुखं, तोदः -दनं, रायणं, विधानकं, विरावानं, प्रसूतिर्ज्ञ, आमनस्यं, आमानस्यं, अमानस्यं, आभीलं; 'bodily pain as opposed to mental,' शरीरपीडा, वेदना, कृच्छ्रं, व्याधिः *m.*; 'pain in the head,' शिरोवेदना, शिरःपीडा, शिरोरोगिः *f.*; 'in the teeth,' दन्तवेदना; 'sharp pain,' शूलः -लं, तीव्रवेदना; 'creeping or flying pain,' वेगः; 'rheumatic pains in the bones,' अस्थिशूलः -लं; 'in the loins,' कटिवेदना; 'pains of hell,'

, यात्र्ययातना; 'of labor,' प्रसववेदना, गर्भवेदना, ; 'of death,' प्राणान्तवेदना; 'suffering pain,' दुःखभागी -गिनी -गि (न्), दुःखभोगी &c., दुःखी &c.; 'accession of pain,' दुःखसंयोगः; 'causing pain,' पीडाकरः -रा -रं, दुःखकरः &c.; 'act of causing pain,' पीडाकरणं, पीडनं; 'freed from pain,' दुःखातीतः -ता -तं.—(Mental pain, disquietude) मनोदुःखं, मनःपीडा, मनस्तापः, मनोव्यथा, मानसी व्यथा, चित्तवेदना, चित्तोद्वेगः, आधिः *m.*—(Pains, toil, effort) यत्नः, प्रयत्नः, कष्टं, आयासः, प्रयासः, उद्योगः, उत्साहः, व्यवसायः, चेष्टा, उद्यमः, श्रमः, परिश्रमः, क्लेशः, आस्था; 'to take pains,' यत् (c. 1. यतते -तितुं), प्रयत्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, घट् (c. 1. घटते -टितुं), उद्योगं कृ, यत्नं कृ, उत्साहं कृ.—(Penalty) दण्डः, साहसं, शिष्टिः *f.*, शिक्षा.

To PAIN, *v. a.* पीड् (c. 10. पीडयति -यितुं), आपीड्, उपपीड्, दुःख् (c. 10. दुःखयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), तप् (c. 10. तापयति -यितुं), सन्तप्, परितप्, उपतप्, बाध् (c. 1. बाधते -धितुं), उद्विज् (c. 10. -वेजयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं, क्लेशुं), अर्द् (c. 10. अर्दयति -यितुं), दुःखं कृ or दा, पीडां कृ, व्यथां कृ.

PAINED, *p. p.* पीडितः -ता -तं, दुःखितः -ता -तं, व्यथितः &c., आर्तः -र्ता -र्तं in comp., दुःखार्तः &c., दुःखी -खिनी -खि (न्), दुःखान्वितः -ता -तं, दुःखोपेतः &c., बाधितः -ता -तं, तापितः &c., सन्तापितः &c., तप्तः -प्ता -प्तं, सन्तप्तः &c., उद्वेजितः &c., क्लेशितः &c., क्लिष्टः &c., आतुरः -रा -रं, अर्दितः &c., अभ्यर्दितः &c., अनुभूतवेदनः -ना -नं, कृच्छ्रगतः &c., क्लेशी &c., कष्टी &c., कष्टः -ष्टा -ष्टं, आधिमान् -मती -मत् (त्), दूनः -ना -नं, सव्यथः -था -थं, सवेदनः -ना -नं; 'being pained,' पीड्यमानः -ना -नं, तप्यमानः &c., आतप्यमानः &c., क्लिश्यमानः &c., धूपायितः -ता -तं; 'to be pained,' पीड् in pass. (पीड्यते), दुःख (nom. दुःखायते, दुःखीयति), दुःखार्तीभू, व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ्, तप् in pass. (तप्यते), परितप्, सन्तप्, क्लिश् (c. 4. क्लिश्यते).

PAINFUL, *a.* (Causing pain) पीडाकरः -रा -रं, दुःखकरः -रा -रं, पीडाकारकः -का -कं, पीडाजनकः -का -कं, दुःखजनकः &c., दुःखदः -दा -दं, दुःखप्रदः -दा -दं, दुःखावहः -हा -हं, वेदनाकारकः -का -कं, वेदनाजनकः &c., व्यथाकरः &c., व्यथकः -का -कं, कष्टकरः &c., कष्टकारकः &c., कष्टावहः -हा -हं, क्लेशकरः &c., क्लेशदः &c., क्लेशावहः -हा -हं, क्लेशकः -का -कं, बाधकः -का -कं, उद्वेजकः -का -कं, सन्तापकः -का -कं, दूदः -दा -दं.—(Full of pain) दुःखमयः -यी -यं, दुःखी -खिनी -खि (न्), क्लेशी &c., सबाधः -धा -धं, सव्यथः -था -थं, सवेदनः -ना -नं.—(Requiring labor or toil) कष्टसाध्यः -ध्या -ध्यं, श्रमसाध्यः &c., दुःसाध्यः &c., दुष्करः -रा -रं, कठिनः -ना -नं.

PAINFULLY, *adv.* (With pain) सव्यथं, सवेदनं, सबाधं, सदुःखं, सक्लेशं, सोद्वेगं, सकष्टं, दुःखपूर्वं.—(With toil) श्रमेण, सश्रमं, सायासेन, सायासं, कृच्छ्रेण, सकृच्छ्रं.

PAINFULNESS, *s.* दुःखकारकत्वं, पीडाजनकत्वं, कष्टकारकत्वं, दुःखिता, सदुःखत्वं, दुःखं, सक्लेशत्वं, सोद्वेगता, कष्टं, सकष्टत्वं, सकष्टता.

PAINLESS, *a.* दुःखहीनः -ना -नं, दुःखरहितः -ता -तं, व्यथाहीनः -ना -नं, दुःखशून्यः -न्या -न्यं, निर्दुःखी -खिनी -खि (न्), निर्व्यथः -था -थं.

PAINS, *s. pl.* यत्नः, प्रयत्नः, उद्योगः, कष्टं. *See* PAIN.

PAINSTAKER, *s.* उद्योगी *m.* (न्), उत्साही *m.*, उद्यमी *m.*, व्यवसायी.

PAINSTAKING, *a.* कृतप्रयत्नः -त्ना -त्नं, कृतयत्नः &c., प्रयत्नवान् -वती -वत् (त्), यत्नशीलः -ला -लं, प्रयत्नशीलः -ला -लं, उद्योगशीलः &c., उद्यमशीलः &c., उद्योगी -गिनी -गि (न्), व्यवसायी &c., कृतश्रमः -मा -मं, प्रसितः -ता -तं. *See* INDUSTRIOUS.

To PAINT, *v. a.* (Draw in colors) चित्र् (c. 10. चित्रयति -यितुं), लिख् (c. 6. लिखति, लेखितुं), आलिख्, अभिलिख्.—(Cover or besmear with color) रञ्ज् (c. 10. रञ्जयति -यितुं), वर्ण् (c. 10. वर्णयति -यितुं), लिप् (c. 6. लिम्पति, लेपुं), रञ्जेण लिप्, रञ्जनं कृ.—(Describe) वर्ण्, अनुवर्ण्, उपवर्ण्, संवर्ण्, वर्णनं कृ, विलिख्.

PAINT, *s.* रङ्गः, वर्णकः -का, चित्रं, लेपः, विलेपः, रञ्जनलेपः, रञ्जनं.

PAINTED, *p. p.* चित्रितः -ता -तं, चित्रगतः -ता -तं, चित्रार्पितः -ता -तं, आलिखितः &c., अभिलिखितः &c., आलेख्यगतः &c., आलेख्यसमर्पितः &c., वर्णितः -ता -तं, वर्णगतः &c., रञ्जितः &c., चित्रः -त्रा -त्रं; 'painted on the surface,' चित्रतलः -ला -लं.

PAINTER, *s.* चित्रकरः, चित्रकारः, चित्रलेखकः, चित्रलिख् (ख्), चित्रकृत् *m.*, चित्रकः, चित्रकर्मविद् *m.*, रङ्गजीवः -वी *m.* (न्), रञ्जकः, वर्णी *m.* (न्), वर्णचारकः, वर्णाटः, लेखकः, आलेखकः, आलेख्यकृत् *m.*, पटकारः, तौलिकः, तौलिकिकः; 'painter's brush,' तूलिः *f.*, तूलिका, ईषिका, वर्त्तिका.

PAINTING, *s.* (The act) चित्रलिखनं, चित्रलेखनं, चित्रलिपिः *f.*, लिपिः *f.*, आलेखनं, लेखनं, लिखनं, चित्रकरणं, रञ्जनं, वर्णनं.—(The art or business) चित्रकर्म्म *n.* (न्), चित्रविद्या, चित्रक्रिया.—(A painting or picture) चित्रलेखा, चित्रं, आलेख्यं, चित्रलिखितं, चित्रगतं.—(Painting the body) पत्रलेखा, पत्राङ्कुलिः *f.*, पत्रावली -लिः *f.*, वर्णः,

PAIR, *s.* मिथुनं, द्वयं, द्वन्द्वं, युगं, युग्मं, युगलं, यमलं, यामलं, यमः, यमकं, युतकं; 'a pair of doves,' पारावतमिथुनं; 'a pair of oxen,' गोमिथुनं, गोयुगं; 'a pair of birds,' पक्षिणोर् मिथुनं, पक्षिमिथुनं, पक्षिद्वयं; 'a married pair,' दम्पती *m.* du., भार्य्यापती *m.* du., स्त्रीपुरुषौ. The word द्वन्द्व is used to denote that form of grammatical combination which unites two or more words of similar or opposite signification; thus, 'hand and foot,' पाणिपादं; 'affection and hatred,' रागद्वेषौ *m.* du.

To PAIR, *v. n.* (Suit, fit) युज् in pass. (युज्यते), संयुज्, उपयुज्.—(Be joined in pairs) स्त्रीपुरुषवत् or दम्पतिवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or संयुज्, मैथुनार्थं सङ्गम्, मैथुनं कृ.

To PAIR, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), युज्, संयोगं कृ, मिथुनसंयोगं कृ, मैथुनार्थं संयुज्.

PALACE, *s.* राजगृहं, राजमन्दिरं, नृपगृहं, नृपमन्दिरं, राजवेश्म *n.* (न्), नृपवेश्म *n.*, राजधाम *n.* (न्), नृपधाम *n.*, राजभवनं, राजसदनं, राजप्रासादः, राजहर्म्यं, राजवसतिः *f.*, नृपतिवसतिः *f.*, राजशाला, राजधानी, प्रासादः, हर्म्यं, मन्दिरं -रा, भवनं, सौधं, अट्टालः -लिका, विमानं, शाला, विशिरं, विच्छर्दकः, माडिः *m.*, उपकार्य्यी, उपकारी -रिका; 'palace-court,' राजसभा; 'palace-yard,' राजाङ्गनं.

PALÆSTRA, *s.* मल्लभूः *f.*, मल्लभूमिः *f.*, यष्टिराट् *m.* (ज्), मल्लयात्रा.

PALANKEEN, PALANQUIN, *s.* शिबिका, डयनं, डलकं, याप्ययानं, नरयानं, प्रवहणं, इत्या, शिरस्का.

PALATABLE, *a.* रुचिकरः -री -रं, रुच्यः -च्या -च्यं, आस्वाद्यः -द्या -द्यं, स्वादुः -दुी -दु, सुरसः -सा -सं, सरसः -सा -सं, रसिकः -का -की -कं, मुखप्रियः -या -यं.

PALATABLENESS, *s.* रुच्यता -त्वं, आस्वाद्यता, स्वादुता, सरसता, रसिकत्वं.

PALATAL, PALATIAL, PALATIC, *a.* (Pertaining to the palate) तालव्यः -व्या -व्यं, तालुसम्बन्धी &c.; 'a palatal letter,' तालव्यं.

PALATE, *s.* तालु *n.*, तालुका, काकुदं -दः; 'soft palate,' शुष्किका,

शूना, सूना, अलिजिह्वा, अधोजिह्विका. *See* UVULA.

PALATIAL, *a.* राजप्रासादीयः-या-यं, प्रासादीयः &c., राजगृहयोग्यः-ग्या-ग्यं. राजमन्दिरयोग्यः &c.

PALAVER, *s.* चाटूक्तिः *f.*, चाटुकारः, सान्त्वोक्तिः *f.*, मधुरवाक्यं, मिथ्योक्तिः.

To PALAVER, *v. a.* चाटूक्त्या सान्त्व् (c. 10. सान्त्वयति -यितुं), मिथ्या सान्त्व्.

PALE, *a.* पाण्डुः -ण्डुः -ण्डु, पाण्डुरः -रा -रं, पाण्डरः -रा -रं, विपाण्डुरः &c., विवर्णः -र्णा -र्णं, गतवर्णः &c., नीरक्तः -क्ता -क्तं, रागहीनः -ना -नं; 'pale in color,' पाण्डुवर्णः &c.; 'having a pale face,' विवर्णवदनः -ना -नं.—(Dim, not bright) मन्दप्रभः -भा -भं, हततेजाः -जाः -जः (स्), मन्दच्छायः -या -यं, निस्तेजाः &c., हतकान्तिः -न्तिः -न्ति, न्यूनकान्तिः &c., न्यूनप्रभः &c., मलिनप्रभः &c., म्लानतेजाः &c., म्लानकान्तिः &c.—(Light in color) expressed by ईषत्, आ, श्वेत; as, 'pale red,' ईषद्रक्तः -क्ता -क्तं, आरक्तः &c., श्वेतरक्तः &c.; 'pale blue,' आनीलः -ला -लं, श्वेतनीलः &c.

PALE, *s.* (Stake) शङ्कुः *m.*, कीलः, स्थाणुः *m.*, शल्यं, शूलं.—(Inclosure, limit) आवरणं, वृतिः *f.*, वेष्टनं, आवेष्टनं, अवरोधकं, वारणं, वरणः, वलयः.

To PALE, *v. a.* शङ्कुवलयेन परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

PALE-EYED, *a.* पाण्डुनेत्रः -त्रा -त्रं, पाण्डुनयनः &c., न्यूनप्रभाक्षः &c.

PALE-FACED, *a.* विवर्णवदनः -ना -नं, पाण्डुमुखः -खी -खं, म्लानवदनः &c.

PALENESS, *s.* पाण्डुता -त्वं, पाण्डुरता -त्वं, पाण्डुवर्णः, पाण्डुरागः, विवर्णता, वैवर्ण्यं, मुखवैवर्ण्यं, नीरक्तता, रागहीनता.—(Dimness) प्रभाहानिः *f.*, तेजोहानिः *f.*, न्यूनप्रभा, न्यूनकान्तिः *f.*

PALETTE, *s.* *See* PALLET.

PALFREY, *s.* स्त्रीलोकारोहणयोग्यः क्षुद्रघोटकः.

PALINDROME, *s.* अनुलोमविलोमश्लोकः, मुरजबन्धः.

PALING, *s.* शङ्कुपंक्तिः *f.*, आवरणं, आवारः, वारणं -णी, कटघ्ननं.

PALISADE, *s.* दुर्गपरिगता स्तम्भपंक्तिः or शङ्कुपंक्तिः शङ्कुवलयः, यष्टिवलयः, स्तम्भवलयः, दुर्गावरोधका स्तम्भपंक्तिः, दुर्गावरोधकं.

PALISH, *a.* ईषत्पाण्डुः -ण्डुः -ण्डु, आपाण्डुः &c., आपाण्डुरः -रा -रं.

PALL, *s.* (Mantle of state) राजप्रावारः, राजकीयप्रावारः.—(Cloak) प्रावारः, प्रच्छदपटः, आच्छादनपटः.—(For a dead body) शवाच्छादनं.

To PALL, *v. n.* विरसीभू, विरसः -सा -सं भू, अरुचिरः -रा -रं भू.

To PALL, *v. a.* विरसीकृ, अरुचिं or बीभत्सं जन् (c. 10. जनयति -यितुं).

PALLADIUM, *s.* पुरदेवता, नगरदेवता.—(Defence) रक्षा -क्षणं.

PALLET, *s.* (Board for mixing colors) वर्णपत्रं -त्रः, रङ्गपत्रं.—(Small bed) खट्वा, क्षुद्रखट्वा, तल्पः, क्षुद्रतल्पः.

To PALLIATE, *v. a.* (As a fault, crime, &c.) दोषं or पापं शम् (c. 10. शमयति -यितुं) or उपशम् or छद् (c. 10. छादयति -यितुं) or आच्छद् or मृज् (c. 2. मार्ष्टि -ष्टुं), पापशमनं कृ, दोषमार्जनं कृ, दोषच्छालनं कृ, पापापनोदनं कृ, पापाच्छादनं कृ, न्यूनीकृ.

PALLIATED, *p. p.* शमितः -ता -तं, आच्छादितः -ता -तं, न्यूनीकृतः &c.

PALLIATION, *s.* (Of a fault or crime) पापशमनं, पापशान्तिः *f.*, दोषाच्छादनं, पापशान्तिः *f.*, पापमार्जनं, दोषच्छालनं, दोषप्रक्षालनं, पापापनोदनं, पापापनुत्तिः *f.*, दोषन्यूनीकरणं, उपशमः, उपशमनं, लघूकरणं, उपशान्तिः *f.*

PALLIATIVE, *a.* (Extenuating) पापशमनः -ना -नं, दोषशमकः -का -कं, दोषाच्छादकः &c.—(Mitigant) शान्तिकः -की -कं. *See* MITIGANT.

PALLIATIVE, *s.* (That which extenuates) पापशमनं, दोषशमनं, शान्तिकं.—(That which mitigates pain) वेदनाशान्तिकं, वेदनाशमकम् औषधं, क्लेशापहं, शूलघ्नं, उपशमनं.

PALLID, *a.* पाण्डुः -ण्डुः -ण्डु, पाण्डुवर्णः -र्णा -र्णं, पाण्डुरः -रा -रं, विपाण्डुरः -रा -रं, विवर्णः -र्णा -र्णं &c. *See* PALE.

PALLOR, *s.* पाण्डुता -त्वं, पाण्डुरता -त्वं, विवर्णता. *See* PALENESS.

PALM, *s.* (Of the hand) तलः -लं, हस्ततलः -लं, करतलः -लं, तालः -लिका, प्रतलः, प्रहस्तः, प्रपाणिः *m.*, चपेटः, चपटः, चपटः, फलेरीकं, अलघुधः, गोछालः; 'the palms joined,' संहतलः, सिंहतलः, संहततलः; 'the hollowed palm,' प्रसृतः, प्रसृतिः *f.*, चुलुकः; 'the hollowed palms joined,' अञ्जलिः *m.*; 'having the palms hollowed and placed one above the other in sign of reverence,' कृताञ्जलिः -लिः -लि, कृताञ्जलिपुटः -टा -टं, बद्धाञ्जलिः &c.—(Tree) तालः, तृणद्रुमः, दीर्घतरुः *m.*, दीर्घद्रुः *m.*, गुच्छपत्रः, लेख्यपत्रकः, द्रुमश्रेष्ठः, द्रुमवरः, दुरारोहः; 'date-palm,' खर्जूरः -री -खर्जूरवृक्षः; 'cocoa-nut palm,' नारिकेलः &c. *See* COCOA-NUT. 'Palm-leaf,' तालपत्रं, तालपर्णं; 'fibres,' तालजटा, तालप्रलम्बं; 'spirituous juice of the palm,' ताली, तालकी.

To PALM, *v. a.* (Conceal in the palm) करतले गुप्, करतलगुप्तं -प्तां कृ, हस्ततलस्थं -स्थां कृ.—(Impose by fraud) छल् (c. 10. छलयति -यितुं), छलेन प्रचलीकृ, वस् (c. 10. वञ्चयते -ति -यितुं), प्रतृ &c.

PALMA-CHRISTI, *s.* (Castor-oil tree) एरण्डः -ण्डकः, उरुवूकः, उरुवुकः, रुवूकः, रुवुकः, रुचुकः, रुवुः *m.*, रूचकः, अडखकः, अडखनः, अडखरः, व्याघ्रपुच्छः, गन्धर्वहस्तकः, चक्षुः *m.*, मखः, अमखः, आमखः, वर्धमानः, पञ्चाङ्गुलः.

PALMATE, PALMATED, *a.* हस्ततलाकारः -रा -रं, करतलाकृतिः -तिः -ति.

PALMER, *s.* तालपत्रभृत् कार्पेटिकविशेषः or याचिकविशेषः.

PALMER-WORM, *s.* लोमावृतः कीटविशेषः or कृमिप्रभेदः.

PALMIFIED, *a.* जालपादः -दा -दं, जालपाद् *m. f. n.*, जालाकारपादः &c.

PALMISTER, *a.* हस्तरेखादिनिरीक्षणाद् दैवकथकः or शुभाशुभदर्शकः, करतलरेखानिरीक्षणेन भविष्यत्सूचकः, सामुद्रिकः, सामुद्रविद् *m.*, हस्तरेखाविद्.

PALMISTRY, *s.* हस्तरेखादिनिरीक्षणाद् दैवकथनं or शुभाशुभदर्शनं, करतलरेखादिनिरीक्षणेन भविष्यत्सूचनं, हस्तरेखाविद्या, हस्तसामुद्रिकं, सामुद्रविद्या.

PALMY, *a.* (Bearing or abounding with palms) तालवान् -वती -वत् (त्), तालावृतः -ता -तं, तालसङ्कीर्णः -र्णा -र्णं.—(Flourishing) समृद्धः -द्धा -द्धं, वर्धिष्णुः -ष्णुः -ष्णु, श्रीमान् -मती &c., अधिकर्द्धिः -र्द्धिः -र्द्धि.

PALMYRA, *s.* (Tree) तृणद्रुमः, तृणराजः, आसवद्रुः *m.*, महोन्नतः. *See* PALM.

PALPABILITY, PALPABLENESS, *s.* स्पृश्यता, स्पर्शनीयता, स्पर्शेन्द्रियग्राह्यता, स्पर्शगोचरता.—(Clearness) व्यक्तता, प्रत्यक्षता.

PALPABLE, *a.* (Perceptible by the touch) स्पृश्यः -श्या -श्यं, स्पर्शनीयः -या -यं, स्पर्शेन्द्रियग्राह्यः -ह्या -ह्यं, स्पर्शगोचरः -रा -रं, स्पर्शवेद्यः -द्या -द्यं, स्पर्शज्ञेयः -या -यं, त्वगिन्द्रियज्ञेयः &c., सूचीभेद्यः -द्या -द्यं.—(Gross, thick) स्थूलः -ला -लं, घनः -ना -नं; 'palpable darkness,' घनान्धकारः.—(Plain, clear) व्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, प्रत्यक्षः -क्षा -क्षं, सुगमः &c.

PALPABLY, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, सुस्पष्टं, प्रत्यक्षतस्, प्रत्यक्षेण, स्फुटं, प्रादुस्.

To PALPITATE, *v. n.* स्पन्द् (c. 1. स्पन्दते -न्दितुं), प्रतिस्पन्द्, परिस्पन्द्, कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, वेप् (c. 1. वेपते -पितुं), स्फुर् (c. 6. स्फुरति -रितुं), क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), उच्छ्वस् (c. 2. -श्वसिति -तुं, rt. श्वस्), पिट् (c. 1. पेटति -टितुं); 'my heart palpitates,' वेपते मे हृदयं.

PALPITATING, *part.* स्पन्दमानः -ना -नं, वेपमानः -ना -नं, कम्पमानः -ना -नं, स्फुरितः -ता -तं, उच्छ्वासी -सिनी -सि (न्).

PALPITATION, *s.* स्पन्दनं, प्रतिस्पन्दनं, वेपनं, वेपथुः *m.*, कम्पः -म्पनं,

स्फुरणं, क्षोभः; 'of the heart,' हृदयवेपनं, हृदयकम्पः, हृल्लासः.

PALSICAL, PALSIED, *a.* पक्षाघाती -तिनी -ति (न्), पक्षवायुग्रस्तः -स्ता -स्तं कम्पवायुग्रस्तः &c., अर्द्धाङ्गवायुग्रस्तः &c.

PALSY, *s.* (Paralysis) स्तम्भः, संस्तम्भः, विष्टम्भः, अवष्टम्भः, खापः, सुप्तिः *f.* —(Hemiplegia) पक्षाघातः, पक्षवायुः *m.*, अर्द्धाङ्गवायुः *m.*, अर्द्धाङ्गं, भङ्गः.—(Shaking palsy) कम्पवायुः *m.*, कम्पवातः.

To PALSY, *v. a.* स्तम्भं or खापं जन् (c. 10. जनयति -यितुं), स्तम्भीकृ, जडीकृ.

PALTRINESS, *s.* तुच्छता, लघुता, लाघवं, असारता, कुत्सितत्वं, क्षुद्रता.

PALTRY, *a.* तुच्छः -च्छा -च्छं, लघुः -घुः -घ्वी -घु, क्षुद्रः -द्रा -द्रं, कुत्सितः -ता -तं, असारः -रा -रं, सारहीनः -ना -नं, तृणप्रायः -या -र्यं, लघुप्रभावः -वा -र्वं, क्षुल्लकः -का -कं, अपकृष्टः -ष्टा -ष्टं, अधमः -मा -मं, or expressed by कु prefixed; as, 'a paltry action,' कुकर्म्म *n.* (न्).

To PAMPER, *v. a.* परमान्नेन तृप् (c. 10. तर्पयति -यितुं) or सन्तृप् or पृ (c. 10. पूरयति -यितुं) or परिप or भृ (c. 3. बिभर्त्ति, c. 1. भरति, भर्त्तुं) or संवृध् (c. 10. -वर्धयति -यितुं) or पुष् (c. 10. पोषयति -यितुं) or आप्यै (c. 10. -प्याययति -यितुं), अत्यन्तं पुष् or आप्यै.

PAMPERED, *p. p.* अतिपुष्टः -ष्टा -ष्टं, सुपुष्टः &c., अतिपोषितः -ता -तं, सुपोषितः &c., दृढपुष्टः &c., परमान्नपोषितः &c., परमान्नभृतः &c.

PAMPERING, *s.* अतिपोषणं, परमान्नपोषणं, परमान्नसंवर्धनं, भरणं, अतिभरणं, परमान्नभृतिः *f.*, आप्यायनं, सुपोषणं.

PAMPHLET, *s.* पत्रिका, पुस्तकं -की, क्षुद्रपुस्तकं, लघुपुस्तकं.

PAN, *s.* पात्रं, भाजनं, भाण्डं, आधारः, कटाहः, पिठरः, स्थाली, कन्दुः -न्दूः *m. f.*, खेदनी -निका; 'frying pan,' अङ्गारपिं, भाष्टः, भृजीपं.

PANACEA, *s.* सर्व्वरोगशमकभेषजं, सर्व्वरोगघ्नभेषजं, सर्व्वरोगप्रतीकारकम् औषधं, सर्व्वौषधिचूर्णं, त्रैलोक्यचिन्तामणिः *m.*

PAN-CAKE. *s.* कन्दुपक्वपिष्टकः, अङ्गारीपक्वपिष्टकः, भृष्टपिष्टकः.

PANCRATIC, PANCRATICAL, *a.* मल्लयुद्धकुशलः -ला -लं, मल्लयुद्धनिपुणः -णा -णं.

PANCRATIUM, *s.* मल्लयुद्धं, मल्लक्रीडा, बाहुयुद्धं, बाहुप्रहरणं.

PANDECT, *s.* विद्यासङ्ग्रहः.—(Of laws) संहिता, स्मृतिशास्त्रसंहिता.

PANDEMIC, *a.* सार्व्वलौकिकः -की -कं, सर्व्वव्यापकः -का -कं, सर्व्वजनव्यापकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, विश्वजनीनः -ना -नं, सर्व्वसाधारणः -णी -णं.

PANDEMONIUM, *s.* पिशाचसभं, सर्व्वपिशाचसभा, सर्व्वभूतसभा.

PANDER, *s.* विटः, कुट्टाकी *m.* (न्), रतताली *m.* (न्), सञ्चारकः, दूतः, वेश्याचार्य्यः, कौट्टिन्यकर्त्ता *m.* (तृ), सन्धानकर्त्ता *m.*, लाम्पट्यप्रयोजकः.

To PANDER, *v. a.* or *n.* परकामान् सम्पद् (c. 10. -पादयति -यितुं) or प्रयुज् (c. 10. -योजयति -यितुं), कौट्टिन्यं कृ, लाम्पट्यं प्रयुज्.

PANDERING, PANDERISM, *s.* कौट्टिन्यं, विटकर्म्म *n.* (न्), लाम्पट्यप्रयोजकत्वं.

PANDICULATION, *s.* जृम्भणं, विजृम्भणं, हाधिका. *See* YAWNING.

PANDIT, *s.* (Learned Brahman) पण्डितः. *See* PUNDIT.

PANE, *s.* (Of glass) काचशिला, काचमयसमानशिला.

PANEGYRIC, *s.* स्तुतिवादः, स्तुतिवाक्यं, प्रशंसावादः, स्तुतिपाठः, वन्दिपाठः, स्तुतिः *f.*, गुणस्तुतिः *f.*, गुणोत्कीर्त्तनं, गुणगानं, स्तोत्रं, छाधा, वन्दना, वर्णना. *See* ENCOMIUM.

PANEGYRICAL, *a.* स्तुतिमयः -यी -यं, प्रशंसकः -का -कं, प्रशंसाकरः -रा -रं, गुणवर्णकः -का -कं, गुणख्यापी -पिनी -पि (न्). *See* LAUDATORY.

PANEGYRIST, *s.* स्तुतिपाठकः, वन्दी *m.* (न्), वन्दिजनः, स्तोता *m.* (तृ), वर्णकः.

PANEL, *s.* (Of a door) कपाटः -टी -टं, द्वारकपाटः, कवाटः -टा -टं, द्वारशाखा.—(Whole body of the jury) ज्ञापितप्रमाणपुरुषगणः, स्वेयगणः.

PANG, *s.* व्यथा, यातना, वेदना, शूलः -लं, अतिवेदना, अतिव्यथा; 'of childbirth,' गर्भवेदना, प्रसववेदना.

PANIC, *s.* (Sudden fright) आकस्मिकभयं, आकस्मिकत्रासः, सकस्माद्भयभयं, निष्कारणभयं, विद्रवः, विप्लवः, त्रासः; 'general panic in a country,' पाकः; 'struck with panic,' भयविप्लुतः -ता -तं; 'as an army,' विप्लः -प्ला -प्लं, विप्लवः -ला -लं, समुत्विप्लः &c., समुत्विप्लवः &c.—(Sort of seed or grain) अणुः *m.*, प्रियङ्गुः -ङ्गूः *f.*, कङ्गुः -ङ्गूः *f.*, कङ्गुनी; 'field of it,' अणव्यं.

PÁNINI, *s.* (The grammarian) पाणिनिः *m.*, पाणिनः, दाक्षीपुत्रः, दाक्षेयः, शालातुरीयः, शालातुरीयः; 'connected with him,' पाणिनीयः -या -र्यं.

PANJÁB, *s.* (The country) पञ्चनदः, वाहीकः; 'the Chenáb river,' चन्द्रभागा.

PANNEL, *s.* (Kind of saddle) पर्य्याणं.—(Of a door). *See* PANEL.

PANNIER, *s.* (Basket) करण्डः, डल्लकं, डल्लकं, कण्डोलः, पेटकः.

PANOPLIED, *a.* संवर्म्मितः -ता -तं, कवचसंवृतः -ता -तं, कृतसन्नाहः -हा -हं.

PANOPLY, *s.* सर्व्वाङ्गकवचः -चं, सर्व्वशरीरवर्म्म *n.* (न्), सर्व्वाङ्गावरणत्वचौ.

PANORAMA, *s.* चतुर्दिग्दर्शकचित्रं, सर्व्वदिग्दर्शकचित्रं.

To PANT, *v. n.* (Palpitate) स्पन्द्, परिस्पन्द्, कम्प्, विकम्प्, वेप्, उच्छ्वस्.—(Have the breast heave with difficult respiration) कृच्छ्रेण श्वस् (c. 2. श्वसिति -तुं), कृच्छ्रेण श्वासप्रश्वासं कृ, उद्गतं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), प्राणकृच्छ्रोपहतः -ता -तं भू.—(Long for) अभिलष्, आकांक्ष्, अभिवाञ्छ् &c.

PANT, *s.* स्पन्दनं, प्रतिस्पन्दनं, कम्पः -म्पनं, वेपनं, उद्गमः.

PANTALOON, *s.* (Kind of trowsers) अशिथिलकञ्चुकविशेषः, जङ्घाच्छादनयोग्यम् अशिथिलवस्त्रं, जङ्घापरिधानं.—(Buffoon) भण्डः, विदूषकः.

PANTHEISM, *s.* जगदीश्वरमतं, जगदीश्वरवादः, अद्वैतमतं, अद्वैतवादः, अभेदमतं, अभेदवादः, विराट्स्वरूपमतं.

PANTHEIST, *s.* जगदीश्वरवादी *m.* (न्), जगदीश्वरमतावलम्बी *m.*, जगदीश्वरमताश्रयी *m.*, अद्वैतवादी *m.*, अभेदवादी *m.*, अद्वैतमतावलम्बी *m.*

PANTHEISTIC, PANTHEISTICAL, *a.* जगदीश्वरमतसम्बन्धी -न्धिनी &c., जगदीश्वरमतविषयकः -का -कं, अद्वैतमतसम्बन्धी &c., अद्वैतमतविषयकः &c.

PANTHEON, *s.* सर्व्वदेवतामन्दिरं, सर्व्वदेवालयं, सर्व्वदेवतायतनं, सर्व्वदेवभवनं.

PANTHER, *s.* द्वीपी *m.* (न्), अतिक्रूरशीलो वनमार्जारभेदः or क्षुद्रव्याघ्रभेदः.

PANTING, *s.* उच्छ्वासः, दुःश्वासः, श्वासकृच्छ्रं, प्राणकृच्छ्रं, उद्गमः, स्पन्दनं.

PANTING, *part.* उच्छ्वसन् -सती &c., कृच्छ्रेण श्वसन् &c., स्पन्दमानः -ना -नं, कम्पमानः &c. *See* GASPING, HEAVING.

PANTOMIME, *s.* (One that represents by dumb show) मुग्धाभिनयी *m.* (न्), मुग्धाभिनेता *m.* (तृ), मुग्धनर्त्तकः, मुग्धनाटकः, केवलाभिनयी *m.* (न्), हस्तपादादिसञ्चालनमात्रेण अभिनयी *m.* or अभिनेता *m.*, रङ्गावतारी *m.*—(Representation by dumb show) मुग्धनाट्यं, मुग्धनृत्यं, मुग्धाभिनयः, हस्तपादादिसञ्चालनं, हस्तपादादिसञ्चालनाभिनयः, लास्यं, ताण्डवं.

PANTOMIME, PANTOMIMIC, *a.* मुग्धनाट्यसम्बन्धी &c., मुग्धाभिनयविषयकः &c.

PANTRY, *s.* कोष्ठः -ष्ठकं, खाद्यद्रव्यागारः -रं, खाद्यकोष्ठकं, कुटिः -टी *m. f.*

PAP, *s.* (Nipple) स्तनाग्रं, स्तनमुखः -खं, कुचाग्रं.—(Breast) स्तनः, कुचः, कुचतटं; 'the paps,' स्तनौ *m.* du.—(Soft food for infants) बालकपोषणयोग्यं मृदुखं, मृदाहारः, मृदुखाद्यं, बालकाहारः.

PAPA, *s.* पिता *m.* (तृ), तातः &c. *See* FATHER.

PAPAL, *a.* रोमीयधर्म्मौषधिप्रतिसम्बन्धी -न्धिनी &c., रोमीयधर्म्माध्यक्षसम्बन्धी.

PAPAVEROUS, *a.* खसखसगुणोपेतः -ता -तं, खसखसतुल्यगुणः -णा -णं.

PAPER, *s.* (The substance) कार्पासं, कार्पासिकपत्रं.—(For writing) पत्रं, लिखनपत्रं, लेखनपत्रं, लेख्यपत्रं.—(Written sheet) पत्रं, पत्रकं,

पत्रिका, लेखः.—(Document, deed) पत्रं -त्री, लेख्यं, लेख्यपत्रं, साधनपत्रं, लेख्यप्रसङ्गः.

PAPER, *a.* (Made of paper) कार्पासिकः -की -कं, कार्पासः -सी -सं.

To PAPER, *v. a.* चित्रकार्पासेन or कार्पासिकपत्रेण छद् (c. 10. छादयति -यितुं) or आछद् or आस्तृ (c. 5. -स्तृणोति -स्तरितुं, -रीतुं).

PAPER-MAKER, *s.* कार्पासकृत्, कार्पासकारः, कार्पासिकपत्रकृत्.

PAPESCENT, *a.* मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं.

PAPILIO, *s.* चित्रपतङ्गः, पतङ्गः. *See* BUTTERFLY.

PAPILLARY, PAPILLOUS, *a.* स्तनाग्रसदृशः -शी -शं, कुचाग्रोपमः -मा -मं.

PAPIST, *s.* रोमीयधर्म्मावलम्बी *m.* (न्), रोमीयधर्म्मनिष्ठितः, रोमीयधर्म्मस्थः. रोमीयमतधारी *m.* (न्).

PAPPY, *a.* मज्जामयः -यी -यं, मज्जावान् -वती -वत् (त्), मज्जागुणकः -का -कं, समज्जः -ज्जा -ज्जं, मृदुः -दुी -दु, आर्द्रमृदुः &c., कोमलः -ला -लं.

PAPULÆ, *s. pl.* दद्रुः *m.*, स्वर्ज्जूः *f.*, वरटी, वरणकः, रक्तस्फोटः.

PAPULOSE, PAPULOUS, *a.* दद्रुणः -णा -णं, सस्फोटः -टा -टं.

PAR, *s.* (State of equality) समता, साम्यं. समभावः, समानता, तुल्यता, साम्यता; 'that is at par,' समानकक्षः -क्षा -क्षं, समकक्षः &c.; 'that is above par,' अधिकोत्तरः -रा -रं.

PARABLE, *s.* दृष्टान्तः, दृष्टान्तरूपकथा, उत्प्रेक्षा, उपमा, समासोक्तिः *f.*, समासोक्तिरूपकथा, निदर्शनं, उदाहरणं, हितोपदेशः.

PARABOLA, *s.* (A conic section) समकल्पिच्छेदः.

PARABOLIC, PARABOLICAL, *a.* (Allegorical, expressed by parable) दृष्टान्तरूपः -पा -पं, दृष्टान्तोक्तः -क्ता -क्तं, दार्ष्टान्तिकः -की -कं.—(Having the form of a parabola) समकल्पिच्छिन्नाकारः -रा -रं.

PARABOLICALLY, *adv.* दृष्टान्तरूपेण, दृष्टान्ततस्, दृष्टान्तपूर्व्वं.

PARACENTRIC, PARACENTRICAL, *a.* मण्डलत्यागी -गिनी -गि (न्).

PARADE, *s.* (Ostentation) कौतुकं, दम्भः, आडम्बरं. *See* the word. —(Place for military exercise) खलूरिका, प्रेक्षणं.—(Military exercise) अस्त्रशिक्षा, योग्या, युद्धाभ्यासः, शस्त्राभ्यासः, सैन्यव्यायामः. —(Procession) यात्रा, सैन्ययात्रा.

To PARADE, *v. a.* (Exhibit ostentatiously) दम्भार्थं or कौतुकार्थं or प्रेक्षार्थं दृश् (c. 10. दर्शयति -यितुं) or प्रदृश् or प्रकाश्.—(Marshal soldiers) सैन्यान् अस्त्रशिक्षार्थं or युद्धाभ्यासार्थं व्यूह् or विन्यस्.

To PARADE, *v. n.* (Go about in military procession) प्रेक्षार्थं or अस्त्रशिक्षार्थं यात्रां कृ.

PARADIGM, *s.* (Example) प्रतिमा, प्रतिरूपं, उपमा.—(In grammar) निदर्शनाप्रदर्शितविभक्तिः *f.*, निदर्शनाप्रदर्शितक्रियारूपं.

PARADISE, *s.* स्वर्गः, आनन्दलोकः, आनन्दभुवनं, नन्दनं, सुखलोकः, सुखभुवनं, सुखाधारः, सुखदं, सुखधाम *n.* (न्), अमर्त्यभुवनं, स्वर्लोकः, त्रिदिवः -वं, दिवं, द्यौः *f.* (दिव्), द्यौ *f.* (द्यो), नाकः, अपरलोकः, त्रायिपः, ऋभुक्षः, वैकुण्ठं; the last word refers properly to the paradise of Vishnu, that of Indra is स्वर्गः.

PARADISIACAL, *a.* स्वर्गीयः -या -यं, स्वर्ग्यः -र्ग्या -र्ग्यं, स्वर्गयोग्यः -ग्या -र्ग्यं, आनन्दलोकसम्बन्धी -न्धिनी &c., स्वर्गसम्बन्धी &c.

PARADOX, *s.* लोकविरुद्धाभासः, असत्याभासः, अयुक्ताभासः, लोकविरुद्धमतं.

PARADOXICAL, *a.* (Said of opinions) लोकमतविरुद्धः -द्धा -द्धं, अयुक्ताभासरूपः -पा -पं.—(Of persons) लोकविरुद्धाभासवादी *m.* (न्), लोकविरुद्धाभाससेवी *m.* (न्), लोकविरुद्धमतावलम्बी *m.*, अयुक्ताभासवादी *m.*

PARAGON, *s.* (Model) प्रतिमा, प्रमाणं, प्रमाता *m.* (तृ), उपमा, प्रतिरूपं, उत्तमप्रमाणं.—(An unequalled object) अनुपमवस्तु *n.*, निरुपमवस्तु *n.*, अद्वितीयवस्तु *n.*, अप्रतिरूपवस्तु.

PARAGRAPH, *s.* परिच्छेदः, विच्छेदः, खण्डः, लेखपरिच्छेदः, लेखखण्डः, वाक्यपरिच्छेदः, वाक्यखण्डः, वार्त्ता.

PARALIPOMENA, *s.* शेषग्रन्थः, उपग्रन्थः, परिशिष्टं, उत्तरखण्डः.

PARALLAX, *s.* (In astronomy) शीघ्रः, लम्बनं, स्थानभेदः.

PARALLEL, *a.* (In geometry) एकदिङ्मुखसमान्तरः -रा -रं, एकदिग्गतसमान्तरः -रा -रं, समान्तरः -रा -रं, सरलसमान्तरः -रा -रं; 'two parallel lines,' एकदिग्गतसमान्तररेखाद्वयं, सरलसमान्तररेखाद्वयं, सरलरेखाद्वयं.—(Like, similar) समः -मा -मं, समानः -ना -नं, तुल्यः -ल्या -ल्यं, सदृशः -शी -शं, अनुरूपः -पा -पं, समभावः -वा -वं, समरूपः -पा -पं.

PARALLEL, *s.* (A line equidistant from another) समान्तररेखा; 'of latitude,' स्पष्टपरिधिः *m.*, अक्षवृत्तं, अक्षांशवृत्तं.—(Likeness, conformity) सादृश्यं, सदृशता, सारूप्यं, अनुरूपता, आनुरूप्यं, समरूपता, समता, साम्यं, समानता.—(Comparison) उपमा, औपम्यं.

PINNACLE, *s.* शिखरं, गृहशिखरं, शृङ्गं, अग्रं, प्रासादशृङ्गं, प्रासादाग्रं, कलसः, वडभिः *f.*, शिखा, पृष्ठं, तल्पः, लासकः.

PINNED, *p. p.* कीलितः -ता -तं, कीलायितः &c., कीलकबद्धः -द्धा -द्धं.

PINT, *s.* अर्द्धकुडवः, द्रवद्रव्याणां परिमाणविशेषः.

PIONEER, *s.* पारश्वधः -धिकः, आटविकः, स्थाणुच्छेदकः, स्थाणुच्छिद् *m.*, स्तम्भच्छेदकः, स्तम्भापकर्षी *m.* (न्), मार्गशोधकः, सैन्यपथशोधकः.

To PIONEER, *v.* स्थाणुस्तम्भादिछेदेन सैन्यमार्गं शुध् (c. 10. शोधयति -यितुं), सैन्यमार्गशोधनार्थं स्थाणुस्तम्भादि छिद् (c. 7. छिनत्ति, छेत्तुं) or अपनी (c. 1. -नयति -नेतुं).

PIOUS, *a.* धार्मिकः -की -कं, धर्मशीलः -ला -लं, धर्मी -र्मिणी -र्मि (न्), धर्मात्मा -त्मा -त्म (न्), भक्तिमान् -मती -मत् (त्), ईश्वरभक्तिमान् &c., ईश्वरभक्तः -क्ता -क्तं, ईश्वरपूजकः -का -कं, पूजाशीलः &c., पूजकः -का -कं, पुण्यशीलः &c., पुण्यात्मा &c., भजनशीलः &c., ईश्वरसेवी &c., शुचिः -चिः -चि, शुचिव्रतः -ता -तं, व्रती &c., धर्माचारी &c., धर्मिष्ठः -ष्ठा -ष्ठं, ईश्वरमनस्कः -स्का -स्कं, पूजाभनस्कः &c., ईश्वरपरायणः -णा -णं, देवपूजकः &c., देवभक्तिनिष्ठः &c., भक्तिनिष्ठः &c., धर्मनिष्ठः &c., भक्तिप्रवणः&c., धर्मप्रवणः &c., भक्तिपरायणः &c., धर्मनिबन्धी &c., परमार्थिपरायणः &c., परमार्थी &c.; 'for pious purposes,' धर्मार्थं.—(Proceeding from piety) धर्मप्रयुक्तः -क्ता -क्तं, धर्ममूलकः -का -कं, भक्तिमूलकः &c., ईश्वरभक्तिमूलः -ला -लं.

PIOUSLY, *adv.* धार्मिकवत्, धर्मशीलत्वात्, ईश्वरभक्त्या, भक्त्या, पुण्यशीलत्वात्, पुण्यं, भक्तिगुह्या, पूजाशीलत्वात्, देवपूजकवत्.

PIP, *s.* (Of fruit) बीजं, बीजकं.—(Spot) बिन्दुः *m.*, चिह्नं, अङ्कः.

To PIP, *v. n.* पक्षिशावकवत् कूज् (c. 1. कूजति -जितुं), कूजितं कृ.

PIPE, *s.* (Musical instrument) वंशः -शी, वेणुः *m.*, सानेयी -यिका, मानिका, मुरली, ध्वनिनाला, षिवरनालिका, दर्दुरः, सुषिरं, नन्दः.—(Tube) नालः -लिः *f.* -ली -लं, नाडिः -डी *f.*, प्रणालिका, प्रणालः -ली, सुषिः *f.*—(Iron pipe) लोहनालः.—(Water pipe) सारणी -णिः *f.*, प्रणालः -ली -लिका.

To PIPE, *v. n.* (Play on a pipe) वंशीं or वेणुं ध्मा (c. 1. धमति, ध्मातुं) or प्रध्मा or वद् (c. 10. वादयति -यितुं) or प्रवद्.—(Cry) उच्चस्वरेण क्रुश् or क्रन्द् or रुद्.

PIPER, *s.* वेणुध्मः, वेणुवादः -दकः, वंशवादकः, वांशिकः, वंशीधरः.

PIPKIN, *s.* क्षुद्रभाण्डं, क्षुद्रपिठरः, क्षुद्रस्थाली.

PIQUANCY, *s.* उग्रता, कटुता, तिग्मता, तीव्रता, तीक्ष्णता, रसिकता, सरसत्वं.

PIQUANT, *a.* (Pungent) उग्रः -ग्रा -ग्रं, कटुः -टुः -टु, तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं, खरः -रा -रं, प्रखरः -रा -रं, उष्णः -ष्णा -ष्णं, चण्डः -ण्डा -ण्डं. (Seasoned, having flavor) सुसंस्कृतः -ता -तं, मिष्टः -ष्टा -ष्टं, सरसः -सा -सं, रसिकः -की -कं.

PIQUANTLY, *adv.* तीक्ष्णं, उग्रं, तिग्मं, प्रखरं, कटु, सरसं.

PIQUE, *s.* ईषत्कोपः, ईषद्वैरक्यं, ईषद्विरक्तिः *f.*, ईषद्रोषः, ईषद्विद्वेषिः.

To PIQUE, *v. a.* (Offend slightly) ईषत् कुप् (c. 10. कोपयति -यितुं) or प्रकुप् or रुष् (c. 10. रोषयति -यितुं), ईषत्कोपं or ईषद्वैरक्यं जन्.—(Stimulate, excite) उत्तप्, उत्तिज्, प्ररुच्, प्रवृत्, उत्सह्, प्रोत्सह्.—(Pique one's self) आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं), अभिमन् (c. 4. -मन्यते -मनितुं), विकत्थ् (c. 1. -कत्थते -त्थितुं); 'to pique one's self on one's learning,' पण्डितंमन्यः -न्या -न्यं भू or अस्; 'on one's good looks,' दर्शनीयमानी &c. भू.

PIQUED, *p. p.* ईषत्कुपितः -ता -तं, ईषद्रुषितः &c., ईषद्विरक्तः -क्ता -क्तं.

PIQUET, *s.* मेनारक्षाः -क्षकः, उपरक्षणं. *See* PICKET.

PIRACY, *s.* समुद्रीयचौर्यं, समुद्रीयलुण्ठनं, समुद्रीयापहारः, समुद्रीयापहरणं, समुद्रीयमाहसं, समुद्रीयस्तेयं, समुद्रीयदस्युत्वं.—(Of printed books, &c.) मुद्रितवाग्यहारः, ग्रन्थलिखितापहारः, वाग्यहरणं, मुद्रितशब्दचौर्यं.

PIRATE, *s.* समुद्रयायी दस्युः *m.*, समुद्रीयदस्युः *m.*, समुद्रगामी साहसिकः or अपहारकः or अपहारी, समुद्रीयसाहसिकः, समुद्रीयचौरः, समुद्रीयलुण्टाकः.—(Ship) साहसिकनौः *f.*, साहसिकनौका.—(Of printed books, &c.) मुद्रितवाग्यहारकः, ग्रन्थलिखितापहारी *m.* (न्), वाग्यहारकः, शब्दचोरः, मुद्रितशब्दचौरः, पुस्तकापहारी *m.*

To PIRATE, *v. a.* or *n.* अपहृ (c. 1. -हरति -हर्तुं), अभिहृ, लुण्ट् (c. 1. लुण्टति -टितुं).

PIRATED, *p. p.* अपहृतः -ता -तं, अनधिकारपूर्वं हृतः -ता -तं.

PIRATICAL, *a.* साहसिकः -की -कं, साहसी -सिनी -सि (न्), अपहारकः -का -कं, साहसार्थकः -का -कं, अपहारार्थकः &c., साहसैकरसिकः -का -कं.

PISCATION, *s.* मत्स्यबन्धनं, मत्स्यग्रहणं, मत्स्यधरणं, मत्स्यघातनं.

PISCATORIAL, PISCATORY, *a.* मात्सिकः -की -कं, मात्स्यिकः &c., मात्स्यः -त्स्यी -त्स्यं, मीनरः -रा -रं, मत्स्यसम्बन्धी &c., मत्स्यविषयकः -का -कं, मत्स्यग्रहणसम्बन्धी &c.

PISCES, *s.* (Sign of the Zodiac) मीनः, मीनराशिः *m.*, मीनलग्नं, झषः.

PISCINAL, *a.* मीनालयसम्बन्धी &c., मत्स्यालयसम्बन्धी &c.

PISCIVOROUS, *a.* मत्स्याशी -शिनी -शि (न्), मत्स्याशनः -ना -नं, मत्स्यादः -दा -दं, मत्स्यभुक् *m. f. n.* (ज्), मत्स्यभोजी &c., मत्स्याहारी &c.

PISMIRE, *s.* (Emmet) पिपीलिका, पुत्तिका.

To PISS, *v. a.* मूत्र् (c. 10. मूत्रयति -यितुं), अवमूत्र्, मिह् (c. 1. मेहति, मेढुं), मूत्रं कृ, मूत्रोत्सर्गं कृ, मूत्रत्यागं कृ, प्रस्रावं कृ, मूत्रप्रस्रावं कृ, मूत्रप्रस्रवणं कृ.

PISS, *s.* मूत्रं, मेहः, प्रस्रावः, वस्तिमलं. *See* URINE, *s.*

PISTIL, *s.* स्त्रीकेसरः, स्त्रीकेसरः, गर्भकेसरः, पुष्पगर्भतन्तुः *m.*

PISTOL, *s.* गुलिकाप्रक्षेपणी हस्तनाडिः -डी, सूक्ष्मगुलिप्रक्षेपणी.

PISTON, *s.* यन्त्रस्तम्भः, यन्त्रनालस्तम्भः, नालस्तम्भः, यन्त्राङ्गं.

PIT, *s.* (Cavity, hole) गर्तः, षिवरं, षिलं, अवटः -टिः *m.*, कुहरं, कूपः, गुहा, कुण्डं, मन्थिका.—(Of the stomach) मणिपूरं, नाभिपुटं, उदरमूलं, जठरमूलं.—(Of the arm) कक्षः, खण्डिकः, बाहुमूलं, भुजकोटरः, दोर्मूलं.—(Of a theatre) अङ्गनं, रङ्गाङ्गणं.

To PIT, *v. a.* (With little hollows) सूक्ष्मकूपकैः अङ्क् (c. 10. अङ्कयति -यितुं) or चिह्न् (c. 10. चिह्नयति -यितुं), सूक्ष्मकूपाङ्कितं -तां कृ.—(Set in competition) प्रतियोधनाय or परस्परयोधनाय एकत्र स्था in caus. (स्थापयति -यितुं), प्रतियुध् in caus.

PITAPAT, *s.* or *adv.* पटपटा, पटपटाशब्दः, कटकटा.

PITCH, *s.* (Resinous substance used for calking boats, &c.) शितिसारकः, तिन्दुः *m.*, तिन्दुकी, अग्निवल्लभः, वह्निवल्लभः, यक्षधूपः, सर्ज्जरसः, तीक्ष्णतैलं, रालः, अरालः.—(Mineral pitch) *See* BITUMEN.—(Point of elevation) अग्रं, शिखरं, मौलिः, पदं, 'highest pitch,' उच्चमाग्रं, उच्चमपदं, उच्चता.—(Degree) परिमाणं, पर्य्यन्तं, क्रमः; 'to such a pitch,' एतावत्पर्य्यन्तं, एतावत्.—(Of a hill) उत्सङ्गः, कटकः.—(Of a note or voice) स्वरः.

To PITCH, *v. a.* (Cast, throw) क्षिप्, प्रक्षिप्, अस्, प्रास्, पत् in caus.—(Fix a tent, camp, &c.) शिविरं निविश् (c. 10 -वेशयति -यितुं) or स्था in caus. (स्थापयति -यितुं) or रुह् in caus (रोपयति -यितुं) or समावस् in caus.—(A note or the voice) स्वर् (c. 10. -स्वरयति -यितुं), स्वरस्थितिं कृ.—(Smear with pitch) तिन्दुना लिप् or अभ्र्, तिन्दुलिप्तं -प्तां कृ, अरालाक्तं -क्तां कृ.

To PITCH, *v. n.* (Light, settle) अध्यास्, निली, निषद्, अवस्था, संस्था, अवरुह्, अवपत्, आपत्, निपत्, अवत्, उड्, अधो गम्.—(Encamp) निविश्, उपविश्, शिविरे वस् or समावस् or अध्यास्.—(Fall headlong) अधोमुखः पत्, अधोमुखेन पत्, अवाङ्मुखेन पत्, अवाक् पत्.—(Pitch upon). *See To* CHOOSE.

PITCHED, *p. p.* (Fixed, set) स्थापितः -ता -तं, रोपितः &c., निवेशितः &c.

—(Thrown) क्षिप्तः-प्ता-प्तं, अस्तः-स्ता-स्तं.—(As a note) स्वरितः-ता-तं.

Pitcher, *s.* कुम्भः, कलशः-शी-शं, घटः, कुण्डः-डी-णिडका, उदकपात्रं, उदपात्रं, जलपात्रं, उदकभाण्डं, मृत्पात्रं, मृद्भाण्डं-ण्डकं, मृत्कांस्यं, मृद्भाजनं, मृण्मयपात्रं, जलभाजनं, मृत्भाण्डकं, आलुः *f.*, आरुः *m.*, पुटग्रीवः, मणिकं, कर्करी, अलिञ्जरः, गलन्तिका; 'half of a broken pitcher,' कपालः-लं; 'bottom of a pitcher,' मूर्ध्नयग्रहः.

Pitch-fork, *s.* शूलः-लं, द्विशिखशूलं, द्व्यग्रशूलः.

Pitchy, *a.* (Covered with pitch) अरालाक्तः-क्ता-क्तं, तिन्दुलिप्तः-प्ता-प्तं, तीक्ष्णतैलमयः-यी-यं.—(Resembling it) अरालगुणकः-का-कं, तिन्दुगुणकः &c., तीक्ष्णतैलोपमः-मा-मं.—(Dark as pitch) अतिकृष्णः-ष्णा-ष्णं, अतिश्यामः-मा-मं, अतितामसः-सी-सं.

Pit-coal, *s.* खनिजाङ्गारः, आकरजाङ्गारः, आकरोद्भवाङ्गारः.

Piteous, *a.* (Deserving or exciting pity) करुणोत्पादकः-का-कं, दयाजनकः &c., अनुकम्पाजनकः &c., अनुकम्प्यः-म्पा-म्पं, अनुकम्पनीयः-या-यं, करुणारसोत्पादकः &c., करुणायोग्यः-ग्या-ग्यं, दयायोग्यः &c., करुणः-णा-णं, कारुणिकः-की-कं; 'piteous accents,' करुणस्वरः, करुणशब्दः.—(Wretched) दीनः-ना-नं, कृपणः-णा-णं, दुःखान्वितः-ता-तं.—(Compassionate). *See* Pitiful.

Piteously, *adv.* करुणं, यथा दया or करुणा जायते or उत्पद्यते तथाप्रकारेण, अनुकम्पनीयं, सकरुणं.

Piteousness, *s.* करुणोत्पादकत्वं, दयाजनकत्वं, अनुकम्पता, करुणायोग्यता, दयायोग्यता, कारुण्यं, दीनता.

Pit-fall, *s.* गूढकूपः, अन्धकूपः, लब्धकूपः, गूढगर्त्तः.

Pith, *s.* (Of plants, &c.) सारः, मज्जा, गर्भः, साररसः.—(Essence) सारः-रता, सारांशः, वस्तु *n.*, सारवस्तु *n.*, मूलवस्तु *n.*, रसः, साररसः, सत्त्वं, मूलं, पदार्थः, तत्त्वं, तत्त्वार्थः, निर्म्माणं, निकरः, गर्भः, मर्मः.—(Essential extract) निर्यासः, रसः, मर्मः-र्मं.—(Energy, spirit, vigor) सत्त्वं, सारः, सारता, वीर्य्यं, तेजस् *n.*, प्रभावः, शक्तिः *f.*, बलं.

Pithily, *adv.* सारतस्, सारेण, ससत्त्वं, सत्त्वतस्, सवीर्य्यं, वीर्य्यतस्.

Pithiness, *s.* सारता-त्वं, सारवत्त्वं, सारपूर्णता, ससारत्वं, सत्त्वपूर्णता, ससत्त्वता, सत्त्ववत्त्वं, मज्जा, मज्जावत्त्वं, वीर्य्यं, वीर्य्यवत्त्वं.

Pithless, *a.* असारः-रा-रं, निःसारः &c., निस्सारः &c., सारहीनः-ना-नं, गतसारः-रा-रं, सत्त्वहीनः &c., निःसत्त्वः-त्त्वा-त्त्वं, वीर्य्यहीनः &c., सारवर्जितः-ता-तं, फल्गुः-ल्गुः-ल्गु, विरसः-सा-सं, निरसः &c., रसहीनः &c., वितानः-ना-नं, सारभङ्गः-ङ्गा-ङ्गं.

Pithy, *a.* (Having pith) सारवान्-वती-वत् (त्), ससारः-रा-रं, सारपूर्णः-र्णा-र्णं, सारमयः-यी-यं, ससत्त्वः-त्त्वा-त्त्वं, मज्जावान् &c., मज्जामयः &c., सगर्भः-र्भा-र्भं, सरसः-सा-सं, रसिकः-का-कं, रसवान् &c.—(Forcible, energetic) ससत्त्वः-त्त्वा-त्त्वं, सत्त्ववान् &c., वीर्य्यवान् &c., सप्रभावः-वा-वं, तेजोवान् &c.

Pitiable, *a.* अनुकम्प्यः-म्प्या-म्प्यं, अनुकम्पनीयः-या-यं, दयायोग्यः-ग्या-ग्यं, करुणायोग्यः &c., घृणायोग्यः &c., अनुकम्पायोग्यः &c., दयाविषयः, दयापात्रं, दयाभाजनं.—(Wretched) दीनः-ना-नं, कृपणः-णा-णं, अतिदुःखी-खिनी-खि (न्), अतिदुःखान्वितः-ता-तं.

Pitiableness, *s.* अनुकम्पता, अनुकम्पनीयता-त्वं, दयायोग्यता.

Pitiably, *adv.* करुणं, अनुकम्पनीयं. *See* Piteously,

Pitied, *p. p.* अनुकम्पितः-ता-तं, घृणितः-ता-तं, दयितः-ता-तं.

Pitiful, *a.* (Compassionate) कारुणिकः-की-कं, करुणः-णा-र्णं, सकरुणः-णा-र्णं, करुणाशीलः-ला-लं, दयालुः-लुः-लु, दयावान्-वती-वत् (त्), सदयः-या-यं, दयायुक्तः-क्ता-क्तं, दयामयः-यी-यं, दयाविशिष्टः-ष्टा-ष्टं, दयान्वितः-ता-तं, दयापूर्णः-र्णा-र्णं, दयाढ्यः-ढ्या-ढ्यं, दयासम्पन्नः-न्ना-न्नं, दयार्द्रः-र्द्रा-र्द्रं, दयार्द्रचित्तः-त्ता-त्तं, दयार्द्रमनस्कः-स्का-स्कं, दयारूपः-पा-पं, करुणामयः &c., कृपामयः &c., कृपावान् &c., कृपालुः &c., सानुकम्पः-म्पा-म्पं, घृणावान् &c., घृणी &c., घृणाशीलः &c., हृदयालुः &c., हृदयवान् &c. The following are phrases for a pitiful person: दयासागरः, दयानिधिः *m.*, दयाकरः, करुणासागरः, करुणानिधिः *m.*, अनाथनाथः, अनाथबन्धुः *m.*, दीननाथः, दीनबन्धुः *m.*, दीनवत्सलः.—(Exciting pity) *See* Piteous.—(Miserable, wretched) दीनः-ना-नं, कृपणः-णा-णं, तुच्छः-च्छा-च्छं, क्षुद्रकः-का-कं.

Pitifully, *adv.* सदयं, सानुकम्पं, सकारुण्यं, सकरुणं, करुणं, दयापूर्णं, दयापुरःसरं. *See* Piteously.

Pitifulness, *s.* दयालुता-त्वं, कारुण्यं, सकरुणता, दयार्द्रता, करुणार्द्रता, सानुकम्पता, कृपालुता, दया, कृपा

Pitiless, *a.* निर्दयः-या-यं, अदयः-या-यं, दयाहीनः-ना-नं, दयारहितः-ता-तं, निष्करुणः-णा-णं, अकरुणः-णा-णं, निष्कृपः-पा-पं, कृपाहीनः-ना-नं, निर्घृणः-णा-णं, वीतघृणः &c., निर्घृणः-रा-रं, क्रूरः-रा-रं.

Pitilessly, *adv.* निर्दयं, निष्करुणं, निष्कृपं, निर्घृणं, निर्घृणं, क्रूरं.

Pitilessness, *s.* निर्दयत्वं दयाहीनता, दयाशून्यता, निष्करुणत्वं, क्रूरता.

Pittance, *s.* (Small quantity allowed) अल्पांशः, अत्यल्पांशः, अल्पभागः, अल्पवेतनं, परिमितवेतनं, अल्पमूल्यं.—(Allowance of food, &c., barely sufficient for the day) दिननिर्वाहः, दिनचर्य्या, ग्रासाच्छादनं, अन्नाच्छादनं.

Pitted, *p. p.* (With small hollows) मृत्सकूपाङ्कितः-ता-तं, त्वक्कूपकचिह्नितः-ता-तं.—(For combat) परस्परयोधनार्थं or परस्परजयार्थम् एकत्र स्थापितः-ता-तं or एकत्रीकृतः &c., विजिगीषार्थम् एकत्रीकृतः &c.

To pitter-patter, *v. n.* पटपटा (nom. पटपटायते), पटपटाशब्दं कृ.

Pituitary, *a.* कफोत्पादकः-का-कं, कफकरः-री-रं, श्लेष्मजनकः &c.

Pituitous, *a.* कफमयः-यी-यं, श्लेष्मलः-ला-लं, कफगुणकः-का-कं.

Pity, *s.* दया, करुणा, अनुकम्पा, कृपा, घृणा, कारुण्यं, करुणारसः, अनुक्रोशः, माया, करुणः, अनुग्रहः; 'full of pity,' दयायुक्तः-क्ता-क्तं. *See* Pitiful.—(Ground of pity, cause of grief) दयाहेतुः *m.*, दुःखहेतुः *m.*, दुःखकारणं.

To pity, *v. a.* अनुकम्प् (c. 1. -कम्पते -म्पितुं), समनुकम्प् with acc. c., दयां कृ, अनुकम्पां कृ, करुणां कृ, कृपां कृ, दय् (c. 1. दयते -यितुं), with gen. c., करुणा (nom. करुणायते), कृपा (nom. कृपायते), अनुकृपा.

Pivot, *s.* परिवर्त्तनकीलः-लकः, विवर्त्तनकीलः-लकः.

Pizzle, *s.* चर्म्मदण्डः-ण्डं, स्नायुदण्डः. पशूनां मूत्रशुक्रादिमार्गः.

Placability, placableness, *s.* शाम्यता-त्वं, सान्त्वनीयता-त्वं, आराध्यता, आराधनीयता, सुखाराध्यता, सान्त्वनशक्यता.

Placable, *a.* शाम्यः-म्या-म्यं, सान्त्वनीयः-या-यं, आराध्यः-ध्या-ध्यं, सुखाराध्यः &c., आराधनीयः-या-यं, शमनीयः &c., सुखशाम्यः &c., सान्त्वनशक्यः-क्या-क्यं, सान्त्वनयोग्यः-ग्या-ग्यं, तोषणीयः-या-यं, प्रसादनीयः &c., प्रसाद्यः-द्या-द्यं.

Placard, *s.* लोकसेवितस्थाने स्थापितं प्रकटनपत्रं or घोषणपत्रं or विघोषणपत्रं or विज्ञापनपत्रं or बोधनपत्रं.

To placard, *v. a.* लोकसेवितस्थाने प्रकटनपत्राणि or घोषणपत्राणि स्था in caus. (स्थापयति -यितुं).

Place, *s.* (Particular portion of space) स्थानं, स्थलं-ली, देशः, प्रदेशः, भूः *f.*, भूमिः *f.*, निलयः-यं, विष्वग्यं; 'in one place,' एकत्र; 'in many places,' बहुत्र; 'in both places,' उभयत्र; 'from

various places,' नानादिग्देशात् -शेभ्यः.—(Situation) स्थानं, अवस्थानं, पदं, आस्पदं, पदविः -वी *f.*, भूमिः *f.*, स्थितिः *f.*; 'place of residence,' वासस्थानं, निवासस्थानं, वसतिः *f.*, निवसतिः *f.*—(Rank) पदं, आस्पदं, पदविः *f.*; 'highest place,' उत्तमपदं, परमपदं.—(Passage of a book) स्थलं, देशः, एकदेशः.—(Proper place of) स्थानं, शाला; 'place for dancing,' नृत्यस्थानं, नृत्यशाला; 'in its proper place,' स्थाने, स्वस्थाने; 'out of place,' अस्थाने, अपदे.—(Office, post) पदं, पदविः -वी *f.*, अधिकारः, अधिकारपदं, स्थानं, स्थलं, आस्पदं, नियोगः; 'out of place, dismissed from place,' पदच्युतः -ता -तं, स्थानभ्रष्टः -ष्टा -ष्टं, पदभ्रष्टः &c., अधिकारभ्रष्टः &c., च्युताधिकारः -रा -रं, स्थलच्युतः &c.; 'having no place,' अपदः -दा -दी -दं, अस्थानः -ना -नं.—(Room, stead) स्थानं, स्थलं, भूमिः *f.*; 'in the place of,' स्थाने, स्थले, भूमौ; 'she stands in the place of a friend,' सखीभूमौ वर्त्तते; 'in the place of a parent,' पितृस्थाने.—(Ground, cause) आस्पदं, स्थानं, हेतुः *m.*, कारणं; 'place for doubt,' शङ्कास्पदं; 'for fear,' भयस्थानं, भयहेतुः *m.*—(Room, space) अवकाशः, अवसरः, प्रसरः.—(Degree in order of proceeding) क्रमः, पदं or expressed by adverbial affixes; as, 'in the first place,' प्रथमतस्, पूर्व्वतस्, प्रथमं, प्रथमपदे; 'in the second place,' द्वितीयतस्, द्वितीयपदे; 'in the third place,' तृतीयतस्, तृतीयपदे; 'in the fourth place,' चतुर्थतस्, तुरीयतस्, चतुर्थपदे; 'in the last place,' अन्ततस्; 'in the next place,' पुनर्, पुनश्च, परं, परञ्च, अपरं, अपरञ्च.—(To give place) स्थानं or पदं त्यज् (c. 1. त्यजति, त्यक्तुं), अवसृ (c. 1. -सरति -सर्त्तुं), पन्थानं or मार्गं त्यज्.—(To take place). *See To* HAPPEN.

To PLACE, *v. a.* (Put, set) स्था in caus. (स्थापयति -यितुं), न्यस् (c. 4. -अस्यति -असितुं), विन्यस्, धा (c. 3. दधाति, धातुं), निधा, आधा, समाधा, निविश् (c. 10. -वेशयति -यितुं), विनिविश्, रुह् in caus. (रोपयति -यितुं) आरुह्, धृ (c. 1. धरति, धर्त्तुं), दा (c. 3. ददाति, दातुं), कृ (c. 8. करोति, कर्त्तुं), with acc. of the thing placed, and loc. or instr. or gen. of the thing on which it is placed; as, 'he places his hand in the serpent's mouth,' हस्तं सर्पमुखे न्यस्यति; 'let not the burden be placed on such as me,' न मद्विधे न्यस्यतां भारः; 'having placed the goat on his shoulder,' स्कन्धे or स्कन्धेन छागं कृत्वा; 'he places his hand on my shoulder,' मत्स्कन्धे हस्तं ददाति; 'having placed his knee on my shoulder,' मत्स्कन्धस्य जानु दत्त्वा; 'having placed the end of a straw in water,' तृणाग्रं जलान्तः कृत्वा; 'to place near,' सन्निधा, उपन्यस्, 'to place over,' अधिकृ, अधिष्ठा.—(Establish, fix) प्रतिष्ठा, अवस्था, संस्था, विधा.—(In any office, &c.) पदे or अधिकारे नियुज् (c. 10. -योजयति -यितुं) or विनियुज्.—(Place out, invest) निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रयोगं कृ.

PLACED, *p. p.* स्थापितः -ता -तं, न्यस्तः -स्ता -स्तं, विन्यस्तः &c., निवेशितः -ता -तं, विनिवेशितः &c., आहितः &c., विहितः &c., उपहितः &c., प्रणिहितः &c., रोपितः &c., निक्षिप्तः -प्ता -प्तं; 'placed near,' उपन्यस्तः -स्ता -स्तं, सन्निहितः -ता -तं; 'placed over,' अधिकृतः -ता -तं, अधिष्ठितः -ता -तं; 'placed upon or on,' रोपितः -ता -तं, आरूढः -ढा -ढं, स्थः -स्था -स्थं in comp.; 'placed on the fire,' अग्निष्ठः -ष्ठा -ष्ठं; 'on the arm,' दोःस्थः -स्था -स्थं; 'on a dish,' पात्रस्थः &c.; 'placed in any office or post,' पदनियुक्तः -क्ता -क्तं, पदारूढः -ढा -ढं, अधिकारारूढः &c., अधिकारस्थः &c., अधिकारस्थितः -ता -तं, स्थानारूढः &c.

PLACENTA, *s.* गर्भपरिस्रवः, गर्भवेष्टनं, गर्भपरिवेष्टनं.

PLACER, *s.* स्थापकः, स्थापयिता *m.* (तृ), रोपकः, विधायी *m.* (न्).

PLACID, *a.* शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, उपशान्तः &c., शान्तमनस्कः -स्का -स्कं, शान्तचित्तः -त्ता -त्तं, शान्तात्मा -त्मा -त्म (न्), उपशान्तात्मा &c., उपशमशीलः -ला -लं, प्रसन्नचेताः -ताः -तः (स्), प्रसन्नः -न्ना -न्नं, प्रसादचित्तः &c., सुप्रसादः -दा -दं, निराकुलचित्तः &c., सुसमाहितः &c., अचण्डशीलः -ला -लं, जितक्रोधः -धा -धं, जितरोषः -षा -षं, अक्रोधः -धा -धं, विनीतः -ता -तं, सौम्यः -म्या -म्यं, सम्भ्रमहीनः -ना -नं, सुमनस्कः &c., अन्तर्वेगहीनः -ना -नं; 'in countenance,' सुप्रसन्नमुखः -खा -खी- खं, प्रसादमुखः &c.

PLACIDLY, *adv.* शान्त्या, शान्तं, चित्तशान्त्या, चित्तप्रसादेन, प्रसन्नचेतसा, सुप्रसादेन, सप्रसादं, शान्तचेतसा, प्रशान्तचेतसा, निराकुलचेतसा, निराकुलं.

PLACIDNESS, PLACIDITY, *s.* शान्तता, प्रशान्तता, शान्तिः *f.*, प्रशान्तिः *f.*, उपशान्तिः *f.*, उपशान्तता, शमः, उपशमः, चित्तशान्तिः *f.*, शान्तचित्तत्वं, प्रसादः, प्रसन्नता, सुप्रसादः, चित्तप्रसादः, निराकुलता, अव्याकुलता, सौम्यता, अक्रोधः, असम्भ्रमः, सौमनस्यं.

PLAGIARISM, *s.* शब्दचौर्य्यं, काव्यचौर्य्यं, ग्रन्थचौर्य्यं, वागपहारः, हरणं, पुस्तकचौर्य्यं, पुस्तकापहारः -हरणं.

PLAGIARIST, PLAGIARY, *s.* (Literary thief) शब्दचोरः, काव्यचौरः, काव्यचोरः, वागपहारी *m.* (न्), वागपहारकः, पुस्तकापहारी *m.*, अननुज्ञाध्यायी *m.*, कुम्भिलः, चन्द्ररेणुः *m.*

PLAGUE, *s.* मारी -रिः *f.*, मारकः, मारः, मरकः, महामारी, महाव्याधिः *m.*, तीक्ष्णं, प्रतीवापः.—(Great calamity) उत्पातः, विनिपातः, विनिहितः, अरिष्टं, अरिष्टापातः, अनर्थः, अनर्थापातः, उपप्लवः, उपद्रवः.—(Pest) कण्टकः, दूषकः, शल्यं.

To PLAGUE, *v. a.* (Infest with pestilence) मारीग्रस्तं -स्तां कृ, मारीपीडितं -तां कृ, मारकग्रस्तं -स्तां कृ.—(Harass) बाध्, परिबाध्, प्रबाध्, अधिबाध्, पीड्, अभिपीड्, तप्, व्यथ्, क्लिश्, दुःख्.

PLAGUING, PLAGUY, *a.* बाधकः -का -कं, क्लेशकः -का -कं, क्लेशकरः -रा -रं, क्लेशदः -दा -दं, दुःखकरः &c., पीडकः -का -कं, तापकः -का -कं.

PLAIN, *a.* (Even, level) समः -मा -मं, समानः -ना -नं, सपाटः -टा -टं, श्लक्ष्णः -क्ष्णा -क्ष्णं, अरूक्षः -क्षा -क्षं.—(Neat) विनीतः -ता -तं, आकारशुद्धः -द्धा -द्धं.—(Void of ornament) अभूषितः -ता -तं, अनलङ्कृतः &c., अनलङ्कारः -रा -रं, निरलङ्कारः &c., अलङ्कारहीनः -ना -नं, निर्भूषणः -णा -णं, भूषणहीनः -ना -नं.—(Artless, simple) निर्व्याजः -जा -जं, निष्कपटः -टा -टं, कपटहीनः -ना -नं, अमायिकः -की -कं, अमायः -या -यं, मायाहीनः -ना -नं, सरलः -ला -लं, दक्षिणः -णा -णं, छलहीनः -ना -नं.—(Open, frank, honest) अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, निर्व्यलीकः -का -कं, निर्व्याजः -जा -जं, विमलः -ला -लं, सरलः -ला -लं, सरलमतिः -तिः -ति, सरलबुद्धिः -द्धिः -द्धि, शुद्धः -द्धा -द्धं, शुद्धमतिः -तिः -ति, श्लक्ष्णः -क्ष्णा -क्ष्णं, सात्त्विकः -की -कं.—(Mere, bare) केवलः -ला -लं, शुद्धः -द्धा -द्धं, मात्रकः -का -कं, मात्र in comp.—(Clear, intelligible) स्पष्टः -ष्टा -ष्टं, विस्पष्टः &c., स्पष्टार्थः -र्था -र्थं, सुस्पष्टः &c., व्यक्तः -क्ता -क्तं, अभिव्यक्तः &c., सुव्यक्तः &c., स्फुटार्थः &c., सुबोधः -धा -धं, सुगम्यः -म्या -म्यं, सुगमः -मा -मं, सुगः -गा -गं, सुग्राह्यः -ह्या -ह्यं, भिन्नार्थः -र्था -र्थं, अगूढः -ढा -ढं, अगूढार्थः -र्था -र्थं, विशदः -दा -दं, विमलः -ला -लं.—(Evident, manifest) प्रत्यक्षः -क्षा -क्षं, स्फुटः -टा -टं, प्रस्फुटः &c., प्रकाशः -शा -शं, सुप्रकाशः &c., प्रकटः -टी -टं, स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, समक्षः -क्षी -क्षं, सुदृश्यः -श्या -श्यं, साविष्कारः -रा -रं, प्रसिद्धः -द्धा -द्धं, पुरःस्फुरन् -रन्ती -रत् (त्), उल्बणः -णा -णं.—(Not figurative) अव्यञ्जनः -ना -नं, निर्व्यञ्जनः

&c., व्यञ्जनहीनः -ना -नं.—(Not seasoned) अव्यञ्जनः -ना -नं, व्यञ्जनशून्यः -न्या -न्यं, असंस्कृतः -ता -तं, अनुपस्कृतः &c., उपस्करहीनः -ना -नं.—(Not beautiful, not handsome) असुन्दरः -रा -री -रं, कुरूपः -पा -पं, कुरूपी -पिणी -पि (न्), साधारणरूपः &c., मध्यमरूपः &c., कुदृश्यः -श्या -श्यं.—(Fair, unobstructed) समः -मा -मं, असबाधः -धा -धं, निर्विघ्नः -घ्ना -घ्नं, अरुद्धः -द्धा -द्धं, निरवरोधः -धा -धं.

PLAIN, *s.* (Level land) समभूमिः *f.*, समभूभागः, समभूः *f.*, समस्थलं -ली, समस्थानं, सपाटभूः *f.*, पाटः, समं, आजिः *f.*

PLAIN, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, अगूढं. *See* PLAINLY.

To PLAIN, *v. a.* समीकृ, समस्थलीकृ, सपाटीकृ, समतलीकृ.

PLAIN-DEALING, *a.* न्यायाचारी -रिणी -रि (न्), सरलाचारी &c., सरलकर्म्मा -र्म्मी -र्म्म (न्), शुद्धाचारी &c., समाचारी &c., शुचिकर्म्मा &c., ऋजुः -जुः -जु, ऋजुकर्म्मा &c., निर्व्याजकर्म्मा &c., निर्व्याजाचारी &c.

PLAIN-DEALING, *s.* ऋजुता, आर्जवं, निर्व्याजाचारः, निष्कपटाचारः, सारल्यं.

PLAINLY, *adv.* (Clearly, intelligibly) स्पष्टं, सुस्पष्टं, स्पष्टार्थं -र्थतस्, व्यक्तं, सुव्यक्तं, भिन्नार्थं -र्थतस्, अगूढं, अगूढार्थतस्; 'too plainly,' अतिव्यक्तं,सुव्यक्तं.—(Evidently, manifestly) प्रत्यक्षतस्-क्षेण, प्रकाशं, सुप्रकाशं, स्पष्टं, व्यक्तं,स्फुटं, प्रकटं, साविष्कारं, साक्षात्, प्रादुस्, आविस्.—(Without disguise or cunning) निर्व्याजं, अव्याजेन, व्याजेन विना, कपटं विना, अमायया, मायां विना, कपटव्यतिरेकेण, सरलं, सारल्येन, सदाक्षिण्यं, छलेन विना.—(Neatly, without ornament) विनीतं, विनीतवत्, सपरिष्कारं, अलङ्कारं विना, भूषणं विना; 'plainly dressed,' विनीतवेशः -शा -शं.—(Frankly, honestly) अवक्रं, अजिह्मं, निर्व्यलीकं, निर्व्याजं, निष्कपटं, न्यायतस्, सरलवत्, शुचिवत्, समं.

PLAINNESS, *s.* (Levelness) समता, साम्यं, समानता, श्लक्ष्णता.—(Neatness) विनीतता -त्वं, विनयः, आकारशुद्धता; 'of dress,' वेशविनीतत्वं.—(Want of ornament) अभूषितत्वं, अनलङ्कृतत्वं, अलङ्कारहीनता भूषणहीनता, भूषणाभावः, अलङ्काराभावः.—(Artlessness, simplicity) अव्याजः, अकापट्यं, अमाया, अव्याजहीनता, कपटाभावः, निर्व्याजत्वं, कपटहीनता, सरलता, सारल्यं, दाक्षिण्यं, आनौज्जवं.—(Frankness, honesty) सारल्यं,अवक्रता,ऋजुता, आर्जवं, शुचिता, अकपटः, न्यायिता, निर्व्यलीकता, विमलता,शुद्धता-त्वं.—(Clearness) व्यक्तता-त्वं, सुव्यक्तत्वं, स्पष्टता, सुस्पष्टत्वं, व्यक्तिः *f.*, अभिव्यक्तिः *f.*, सुबोधता, सुगम्यता, भिन्नार्थत्वं, अगूढता -त्वं, विशदता, वैशद्यं, प्रत्यक्षता, स्फुटता -त्वं, प्रकाशता, प्राकट्यं, प्रसिद्धता, सुदृश्यता.—(Ugliness) कुरूपता, असौन्दर्य्यं.

PLAIN-SPOKEN, *a.* स्पष्टवाक् *m. f. n.* (च्), स्पष्टवक्ता -क्त्री -क्तृ (क्तृ), व्यक्तवाक् &c.

PLAINT, *s.* (Complaint) विलापः, विलपनं, विलापेन स्वार्थनिवेदनं.—(In law) पूर्व्वपक्षपादः, भाषापादः -दं, पूर्व्ववादः, अभियोगः.

PLAINTIFF, *s.* वादी *m.* (न्), पूर्व्ववादी *m.*, अग्रवादी *m.*, पूर्व्ववादकः, परिवादी *m.*, परिवादकः, क्रियावादी *m.*, कारणवादी *m.*, अर्थी *m.* (न्), विवादार्थी *m.*, अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), कार्य्यी *m.* (न्), पूर्व्वावेदकः, व्यवहर्त्ता *m.* (र्त्तृ); 'plaintiff and defendant,' अर्थिप्रत्यर्थिनौ *m. du.*

PLAINTIVE, *a.* (Complaining) विलापी -पिनी -पि (न्), परिदेवी &c., परिदेवकः -का -कं, विलपनकारी &c —(Expressing sorrow) शोकसूचकः -का -कं, खेदसूचकः &c., दुःखबोधकः &c., शोकार्थकः -का -कं.

PLAINTIVELY, *adv.* विलापेन, सविलपनं, सपरिदेवनं, करुणं.

PLAIT, *s.* (Fold) ऊर्म्मिः *m. f.*, ऊर्म्मी -र्म्मिका, व्यावर्त्तनं, तरङ्गः, पुटः, चूर्णः.—(Braid) वेणिः -णी, प्रवेणिः, कबरः -री, धम्मिल्लः, केशग्रन्थिः *m.*

To PLAIT, *v. a.* (Braid, fold) ग्रन्थ्, वेणीकृ, वेणीरूपेण ग्रन्थ् or रच्, आवृत्, पुटीकृ, वे.

PLAN, *s.* (Scheme, project) उपायः, कल्पना, सङ्कल्पः, निश्चितं, कल्पितं, अनुसन्धानं, प्रयोगः, प्रयुक्तिः *f.*, युक्तिः *f.*, व्यवसायः, अपदेशः, व्यपदेशः, अभिप्रायः, उद्देशः, बुद्धिः *f.*, मन्त्रणा, चिन्ता; 'a good plan,' सुयुक्तिः *f.*, सुकल्पना.—(Draught, representation on paper) सूत्रं, सूत्रपातः, आलेख्यं, वस्तु *n.*, वस्तुमार्गः.—(Mode of construction) कल्पना, कृतिः *f.*, कला.

To PLAN, *v. a.* (Devise) मनसा कॢप् or परिकॢप्, उपायं कॢप्, मन्त्र्, प्रचिन्त्, परिचिन्त्, अनुसन्धा, घट्, व्यवसो, आलोच्.—(Form a draught) सूत्रपातं कृ, आलिख् (*c.* 6. -लिखति -लेखितुं), आलेख्यं कृ.

To PLANCH, PLANCHED. *See To* PLANK, PLANKED.

PLANE, *a.* (Level) समः -मा -मं, समानः -ना -नं, समतलः -ला -लं.

PLANE, *s.* (In geometry, a level, surface) समं, समतलं, समपृष्ठं, पाटः, तलं; 'a plane figure,' क्षेत्रं.—(The tool) तक्षणी, त्वक्षणी, तक्षणयन्त्रं.

To PLANE, *v. a.* (Make smooth) समीकृ, श्लक्ष्णीकृ.—(Pare with a carpenter's plane) तक्ष् (*c.* 1. तक्षति-क्षितुं), त्वक्ष् (*c.* 1. त्वक्षति-क्षितुं).

PLANED, *p. p.* तष्टः -ष्टा -ष्टं, तक्षणयन्त्रेण श्लक्ष्णीकृतः &c.

PLANET, *s.* ग्रहः, भगन् ग्रहः, तारा, तारका -कं, ज्योतिस् *n.*, ज्योतिषी, ज्योतिष्कः, खेचरः, खगः, गगनेचरः, गगनाध्वगः, विहगः, खोल्कः, नक्षत्रं, ऋक्षः, ध्रुवद् *m.*, ध्रुवस् *m.*, भं; 'minor planet,' उपग्रहः; 'the planets collectively,' ग्रहगणः, ज्योतिर्गणः, ग्रहमण्डलं, भगणो ग्रहाः *m. pl.*; 'the nine planets,' नवग्रहाः *m. pl.* These, according to the Hindús, are 1. the sun, सूर्य्यः; 2. the moon, चन्द्रः; 3. Mercury, बुधः; 4. Venus, शुक्रः; 5. Mars, मङ्गलः; 6. Jupiter, गुरुः *m.*; 7. Saturn, शनिः *m.*; 8. the ascending node, राहुः *m.*; 9. the descending node, केतुः *m.* The two last are considered to be minor planets. The other names of the planets will be found under each separate head of Mercury, &c.—(Auspicious planet) शुभग्रहः, सुग्रहः, सौम्यग्रहः; of these there are four, viz. Mercury, Venus, Jupiter, and the Moon.—(Inauspicious planet) कुग्रहः, अशुभग्रहः, पापग्रहः; of these there are five, viz. Mars, Saturn, the Sun, and the two nodes. 'Planet at its apex,' तुङ्गी *m.* (न्); 'motion of the planets,' ग्रहचारः; 'motion in their orbits,' गतिः *f.*; 'passage of a planet,' सङ्क्रमः, सङ्क्रान्तिः *f.*; 'conjunction,' सङ्गमः; 'aspect,' ग्रहदशा; 'influence,' ग्रहयोगः, ग्रहावेशः; 'unpropitious influence,' ग्रहपीडा, ग्रहबाधा; 'propitious influence,' ग्रहानुकूल्यं, ग्रहबलं; 'worship of the planets,' ग्रहपूजा; 'propitiation of them,' ग्रहशान्तिः *f.*, ग्रहसाधनं; 'sacrifice in propitiation of them,' ग्रहयागः, ग्रहयज्ञः, ग्रहमखः; 'presents made to Bráhmans for propitiating them,' ग्रहदानं; 'incantations to render them propitious,' ग्रहजपः; 'ascertainment of their aspect,' ग्रहसाधनं; 'calculations or tables for determining their position,' ग्रहसारणी; 'diagram representing their aspect,' ग्रहकुण्डली; 'meeting of the seven planets under one sign,' सप्तग्रहसङ्गमः.

PLANETARY, *a.* ग्रह in comp., ग्रहसम्बन्धी &c., ग्रहविषयकः -का -कं, नाक्षत्रिकः -की -कं, नाक्षत्रः -त्री -त्रं, तारकी -किणी -कि (न्) 'planetary influence,' ग्रहावेशः; 'planetary conjunction.'

PLANET-STRUCK, *a.* ग्रहपीडितः -ता -तं, ग्रहोपहतः &c., ग्रहाविष्टः -ष्टा -ष्टं.

PLANING, *s.* तक्षणं, त्वक्षणं, श्लक्ष्णीकरणं, समीकरणं.

PLANK, *s.* फलकः -कं, काष्ठफलकः -कं, दारुफलकः, दीर्घकाष्ठं, दीर्घदारुः *m.*, सृक्कदारुः *m.*, काष्ठं, किलिञ्चः, कटः.

To PLANK, *v. a.* फलकैः or दीर्घकाष्ठैः or काष्ठफलकैर् आस्तृ (c. 9. -स्तृणाति -स्तरितुं -रीतुं), फलक (nom. फलकायति -यितुं), सफलकीकृ.

PLANKED, *p. p.* फलकास्तीर्णः -र्णा -र्णं, फलकी-किनी-कि (न्), सफलकः &c.

PLANNED, *p. p.* कल्पितः -ता -तं, परिकल्पितः &c., मनसा कल्पितः &c., मन्त्रितः &c., प्रचिन्तितः &c., घटितः &c., विहितः &c.

PLANNING, *s.* उपायकल्पना, उपायपरिकल्पना, अनुसन्धानं, घटनं.

PLANT, *s.* उद्भिद् *m. f. n.*, ओषधिः -धी *f.*, औषधिः -धी *f.*, उद्भिज्जं, उद्भिदं, पल्लवः -वं, अङ्कुरः, प्ररोहः, रोहः, शाकः; 'gramineous,' तृणं.

To PLANT, *v. a.* (Put in the ground for growth) रुह् in caus. (रोपयति -यितुं), निरुह्, निखन् (c. 1. -खनति -नितुं), रोपणं कृ.—(Fix, set, place) स्था in caus., प्रतिष्ठा, न्यस्, विन्यस्, धा, निधा, निविश्, रुह् or आरुह् in caus.; 'to plant the foot,' पादं न्यस्. (Plant a colony) वस् in caus. (वासयति -यितुं).

PLANTAIN, *s.* (Tree) कदली -लः, कदलकः, रम्भा, तृणसारा, गुच्छफला, ततपत्री, मोचा, मोचकः, अंशुमत्फला, काष्ठीला, वारणबुषा, वारणबुसा, वारणवल्लभा, वारबुषा; 'the fruit,' कदलीफलं, मोचं, मोचाटः, रम्भा; wild plantain tree,' काष्ठकदली; 'mixture of sugar and milk with plantains and spices,' शिखरिणी.

PLANTATION, *s.* (Act of planting) रोपणं, आरोपणं, आरोपः.—(Place planted) वृक्षवाटिका, वृक्षवाटी, वाटः -टी -टिका, कृत्रिमवनं, उपवनं, वनं, कर्म्मारः, शाकटं or शाकिनं in comp.; as, 'a plantation of sugar canes,' इक्षुशाकटं, इक्षुशाकिनं.

PLANTED, *p. p.* रोपितः -ता -तं, आरोपितः &c., निखातः -ता -तं, न्यस्तः -स्ता -स्तं, विन्यस्तः &c., स्थापितः -ता -तं.

PLANTER, *s.* रोपयिता *m.* (तृ), आरोपयिता *m.*, रोपकः, आरोपकः, रोपणकृत् *m.*, आरोपणकृत्; 'of trees,' वृक्षरोपयिता *m.*, वृक्षरोपकः.—(Owner of a plantation) वाटिकापतिः *m.*, वाटिकेश्वरः.

PLASH, *s.* वर्त्मरुकः, क्षुद्रजलौघः, क्षुद्रजलगुल्मः, पङ्कगुल्मः.

To PLASH, *v. n.* जले or पङ्के क्रीड् (c. 1. क्रीडति -डितुं).

PLASHY, *a.* अनूपः -पा -पं, जलाढ्यः -ढ्या -ढ्यं, जलपङ्कमयः -यी -यं.

PLASTER, *s.* (For covering a wall, &c.) लेपः, विलेपः, चूर्णलेपः, कर्करलेपः, सुधा, उदपेषः.—(For a wound) उपनाहः, उपदेहः, अनुलेपनं.

To PLASTER, *v. a.* लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, आलिप्, विलिप्, प्रलिप्, उपलिप्, दिह् (c. 2. देग्धि -ग्धुं), लेपनं कृ, अनुलेपनं कृ, विलेपनं कृ, प्रलेपनं कृ, उपनाहनं कृ.

PLASTERED, *p. p.* लिप्तः -प्ता -प्तं, अनुलिप्तः &c., उपलिप्तः &c., आलिप्तः &c., प्रलिप्तः &c., दिग्धः -ग्धा -ग्धं, निदिग्धः &c., उपचितः &c.; 'with cement,' सुधालिप्तः &c., सुधाधवलितः &c., सुधामयः -यी -यं.

PLASTERER, *s.* लेपकः, प्रलेपकः, विलेपकः, लेपकरः, विलेपनकृत *m.*, सुधाजीवी *m.* (न्).

PLASTERING, *s.* लेपनं, विलेपनं, अनुलेपनं, उपलेपः -पनं, लिपिः *f.*, पुस्तं.

PLASTIC, *a.* रूपकारी -रिणी -रि (न्), रूपकरः -रा -रं, आकारदः -दा -दं, आकारकरः -रा -रं, मूर्त्तिदः &c., कल्पकः -का -कं, कल्पनक्षमः -मा -मं.

To PLAT, *v. a.* (Weave) ग्रन्थ्, उद्ग्रन्थ्, वे, स्वच्, तक्ष्, गुम्फ्.

PLAT, *s.* (Of ground). *See* PLOT.

PLATE, *s.* (Vessel from which food is eaten) पात्रं, भोजनपात्रं, शरावः, भाजनं, भाण्डं.—(Wrought silver, &c.) कोशः, कोषः, सुवर्णरूप्यादिमयभाण्डानि *n. pl.*—(Flat piece of metal) पत्रं, फलकः -कं; 'gold plate,' सुवर्णपत्रं; 'copper-plate,' ताम्रपत्रं.—(Plate of metal for engraving or inscription) पट्टः -ट्टं, पत्रं, फलकं; 'copper-plate,' ताम्रपट्टं, ताम्रफलकं; 'a plate of copper on which a grant or edict is inscribed,' शासनपत्रं, पट्टः.

To PLATE, *v. a.* रूप्यपत्रपिनद्धं -द्धां कृ, राजतीकृ, राजतान्वितं -तां कृ.

PLATED, *p. p.* or *a.* राजतान्वितः -ता -तं, रक्षितः -ता -तं, राजतपत्रपिनद्धः -द्धा -द्धं, रूप्यप्रतिबद्धः -द्धा -द्धं, रूप्यपत्रोपेतः -ता -तं.

PLATFORM, *s.* मञ्चः, मञ्चकः, शिबिका, कर्णीवंशः, इन्द्रकोषः; 'for any particular ceremony,' मञ्चमण्डपः.—(Plan). *See* the word.

PLATINUM, *s.* No Sanskrit equivalent. शुभ्रादिनं may be used.

PLATOON, *s.* (Particular array of soldiers) पङ्क्तिः *m.*

PLATTER, *s.* शरावः, पात्रं, भाजनं, भोजनपात्रं, बृहत्पात्रं.

PLAUDIT, *s.* प्रशंसा, प्रणादः, जयशब्दः, धन्यवादः, प्रशंसाशब्दः.

PLAUSIBILITY, *s.* सत्याभासः -सत्वं, प्रमाणाभासः -सत्वं, सत्यसदृक्षता -त्वं, सत्यसादृश्यं, सत्यसन्निभता.

PLAUSIBLE, *a.* सत्यसदृक्षः -क्षा -क्षं, सत्यसन्निभः -भा -भं, सत्यसदृशः -शी -शं, सत्याभासरूपः -पा -पं, सत्याभासात्मकः -का -कं, प्रमाणाभासरूपः &c., सव्याजः -जा -जं, ग्राह्यः -ह्या -ह्यं, ग्रहणीयः -या -यं, वाच्यतो दर्शनीयः -या -यं or सदृश्यः -श्या -श्यं or रमणीयः -या -यं.—(Using plausible arguments) आभासवादी -दिनी -दि (न्).

PLAUSIBLY, *adv.* सत्याभासपूर्वं, प्रमाणाभासपूर्वं, प्रमाणाभासेन, सत्यसादृश्येन, सत्यसदृशं, सत्यसन्निभं, सव्याजं.

To PLAY, *v. n.* (Frolic, sport) क्रीड् (c. 1. क्रीडति -ते -डितुं), आक्रीड्, विक्रीड्, संक्रीड्, परिक्रीड्, अनुक्रीड्, दिव् (c. 4. दीव्यति -ते, देवितुं), खेला (nom. खेलायति), रम् (c. 1. रमते, रन्तुं), विद्ध (c. 1. -हरति -हर्त्तुं), विलस् (c. 1. -लसति -सितुं), तेव् (c. 1. तेवते -वितुं), लल् (c. 1. ललति -लितुं), कुर्द् or कूर्द् (c. 1. कूर्दते -र्दितुं), क्रीडां कृ, खेलां कृ.—(Play as a child) कुमार् (c. 10. कुमारयति -यितुं) or कुमाल्, कुड् (c. 6. कुडति -डितुं), कुमारवत् क्रीड्.—(Play at dice or any game) दिव्, प्रदिव्, प्रतिदिव्, अक्षैः or अक्षान् दिव्, अक्षैः क्रीड्, ग्रह् (c. 1. गृह्णते -हितुं), अक्षादिक्रीडां कृ, द्यूतक्रीडां कृ, अक्षद्यूतं कृ.—(On a musical instrument) वद् (c. 10. वादयति -यितुं), संवद्, वादित्रं वद्.—(Act in any character) अभिनयं कृ, नद्, often expressed by a nominal verb; as, 'he plays the king,' राजायते; 'he plays the lion,' सिंहायते; 'he plays the fool,' मूर्खायते.—(Move about, wanton) इतस्ततश् चल् (c. 1. चलति -लितुं) or सृ (c. 1. सरति, सर्त्तुं), विलस्.—(Operate, be in action or motion) चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, चल्.

To PLAY, *v. a.* (Put in action or motion) प्रवृत् (c. 10. -वर्त्तयति -यितुं), चल् (c. 10. चालयति -यितुं), सञ्चल्, सृ (c. 10. सारयति -यितुं), चर् (c. 10. चारयति -यितुं), सञ्चर्.—(A musical instrument) वादित्रं or तूर्य्यं वद् (c. 10. वादयति -यितुं) or संवद् or मूर्च्छ् (c. 10. मूर्च्छयति -यितुं); 'a finger-instrument,' सृ or चल्.—(Represent dramatically) अभिनी (c. 1. -नयति -नेतुं), नट् (c. 10. नाटयति -यितुं), रूप् (c. 10. रूपयति -यितुं), अभिनयं कृ.—(Perform, act, do) कृ, विधा (c. 3. -दधाति -धातुं), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था.

PLAY, *s.* क्रीडा -डनं, खेला -लनं, केलिः *m. f.*, देवनं, विलासः, विलसनं -सितं, लीला, विनोदः, परिहासः, परीहासः, विहारः, क्रीडाकौतुकं, कौतुकं, नर्म्म *n.* (न्), कूर्दनं, कुर्दनं, तेवनं, खेलितं; 'play of fancy,'

बुद्धिविलासः; 'in play,' परिहासेन, लीलया, विलासेन; 'play of children,' बालक्रीडा, बाललीला; 'game of play,' रासः, रासेरकः. —(Playing at dice, &c.) अक्षादिक्रीडा, अक्षक्रीडा, द्यूतक्रीडा, अक्षद्यूतं, द्यूतं, पणपूर्विका क्रीडा, देवनं.—(Action, operation) चेष्टा, चेष्टितं, प्रवृत्तिः *f.*, प्रवर्त्तनं, क्रिया, व्यवसायः, व्यापारः.—(Motion) चलनं, चरणं, सञ्चलनं, चरणं, सञ्चरणं, चारः, सरणं, स्खलितं, स्खलिका, स्खेल्या.—(Room for free motion) अवकाशः, प्रसरः, अवसरः, चेष्टापर्य्याप्तस्थलं-स्थानं.—(Drama, dramatic composition) नाटकः, प्रकरणं, रूपं -पकं.—(Dramatic show) प्रेक्षणं, प्रेक्षा, कौतुकं.

PLAY-DAY, *s.* क्रीडादिवसः, क्रीडनदिनं, विश्रामदिवसः, अनध्यायदिवसः, अनध्यायतिथिः *m. f.*, अस्वाध्यायतिथिः *m. f.*

PLAYED, *p. p.* क्रीडितः -ता -तं.—(As an instrument) वादितः -ता -तं, प्रवादितः &c.—(Set in motion) चालितः -ता -तं, सञ्चालितः &c., सारितः &c., सञ्चारितः &c.—(Acted) अभिनीतः -ता -तं.—(Performed) कृतः -ता -तं, अनुष्ठितः &c.

PLAYER, *s.* (One who sports) क्रीडकः, क्रीडाकारी *m.* (न्), देवकः, देवी *m.*, खेलाकारी *m.*—(Actor) नटः, कुशीलवः, रङ्गाजीवः, रङ्गजीवकः, अभिनेता *m.* (तृ), रङ्गावतारकः, नर्त्तकः; 'manager of a company of players,' सूत्रधारः, मारिषः.—(At dice, &c.) द्यूतक्रीडकः, अक्षक्रीडकः, अक्षदेवी *m.* (न्), अक्षद्यूतः, अक्षद्यूः *m.*, देवी *m.* —(On an instrument of music) वाद्यवादकः, भाराउवादकः.

PLAY-FELLOW, PLAY-MATE, *s.* सहक्रीडकः, सहदेवी *m.* (न्), सहदेवकः.

PLAYFUL, *a.* क्रीडावान् -वती -वत् (त्), क्रीडाशीलः -ला -लं, लीलाशीलः -ला -लं, क्रीडापरः -रा -रं, लीलापरः -रा -रं, लीलाखेलः -ला -लं, विलासी -सिनी -सि (न्), क्रीडामक्तः -क्ता -क्तं, विनोदी &c., सलीलः -ला -लं, लीलावान् &c., केलिकः -का -कं, केलिपरः &c., खेलापरः -रा -रं, कलाकेलिः -लिः -लि, कौतुकी &c., कृतकौतुकः -का -कं, अभिलुलितः -ता -तं, चञ्चलः -ला -लं, क्रीडापरायणः -णा -णं, क्रीडकः -का -कं; 'playful anger,' क्रीडाकोपः.

PLAYFULLY, *adv.* विलासेन, सकौतुकं, लीलया, परिहासेन, क्रीडापूर्व्वं.

PLAYFULNESS, *s.* क्रीडाशीलता, सलीलत्वं, सविलासत्वं, चञ्चलता, क्रीडासक्तिः *f.*, क्रीडापरता, लीलापरता, लीलासक्तता.

PLAY-GROUND, *s.* क्रीडास्थानं, केलिस्थानं, क्रीडारामः, नेवनं, निकषैणः.

PLAY-HOUSE, *s.* नाटकशाला, रङ्गशाला, नाटकमन्दिरं, नृत्यशाला, रङ्गः.

PLAY-THING, *s.* क्रीडनकं, क्रीडाद्रव्यं, खेलनी, क्रीडावस्तु *n.*, क्रीडामृगः.

PLEA, *s.* (Excuse) छद्म *n.* (न्), उत्तरं, अपदेशः, अपदेशः, उपदेशः, निमित्तं, कारणं.—(In law) उत्तरं, उत्तरवादः, उत्तरपादः; 'special plea,' कारणोत्तरं, प्राङ्न्यायः; 'false plea,' अपार्थकरणं; 'raising a plea,' ध्वनीकरणं.

To PLEAD, *v. n.* उत्तरं वद् (c. 1. वदति -दितुं), उत्तरं कृ or दा, निमित्तं वद्, अपदेशं कृ, अपदिश् (c. 6. -दिशति -देष्टुं), अपदेशं कृ.—(Supplicate earnestly) विनयेन प्रार्थ् (c. 10. -अर्थयति -यितुं), विनयेन स्वार्थं निविद् (c. 10. -वेदयति -यितुं).

To PLEAD, *v. a.* (Adduce in proof) प्रमाणीकरणार्थम् उपन्यस् (c. 4. -अस्यति -असितुं), हेतुम् or निमित्तम् उपन्यस् हेतूपन्यासं कृ, निमित्तोपन्यासं कृ.—(Alledge in excuse) व्यपदेशार्थं वद् (c. 1. वदति -दितुं) or उपन्यस्, अपदेशार्थं वद्.—(Plead the cause of another) परार्थं वद्, परार्थम् उत्तरं वद्.

PLEADABLE, *a.* व्यपदेशार्थं or प्रमाणीकरणार्थम् उपन्यसनीयः -या -यं or उपन्यास्यः -स्या -स्यं.

PLEADED, *p. p.* व्यपदेशार्थं or प्रमाणीकरणार्थम् उपन्यस्तः -स्ता -स्तं.

PLEADER, *s.* उत्तरवादी *m.* (न्), हेतुवादी *m.*, निमित्तवादी *m.*—(For another) परार्थं वादी *m.* or उत्तरवादी *m.*

PLEADING, *s.* उत्तरवादः, हेतुवादः, निमित्तवादः, व्यपदेशकरणं, छद्मकरणं, प्रमाणीकरणार्थं or व्यपदेशार्थं हेतूपन्यासः or निमित्तोपन्यासः.

PLEASANT, *a.* रम्यः -म्या -म्यं, रमणीयः -या -यं, प्रियः -या -यं, सुप्रियः -या -यं, मनःप्रियः &c., मनोरमः -मा -मं, रामः -मा -मं, अभिरामः -मा -मं, मनोभिरामः -मा -मं, मनोज्ञः -ज्ञा -ज्ञं, सुभगः -गा -गं, अभिमतः -ता -तं, यथाभिमतः -ता -तं, सुखः -खा -खं, सुखदः -दा -दं, सुखावहः -हा -हं, सुखप्रदः -दा -दं, सुखकरः -रा -रं, सुखदायकः -का -कं, यथासुखः -खा -खं, काम्यः -म्या -म्यं, कमनीयः -या -यं, कान्तः -न्ता -न्तं, नन्दकः -का -कं, आनन्ददः -दा -दं, आनन्दकरः &c., हर्षकः &c., हर्षणः -णा -णं, हर्षकरः &c., हर्षावहः -हा -हं, मोदकः -का -कं, मधुरः -रा -रं, रुचिकरः &c., रुचिरः -रा -रं, रुच्यः -च्या -च्यं, प्रशस्तः -स्ता -स्तं, तुष्टिकरः &c., हृदयङ्गमः -मा -मं, हृद्यः -द्या -द्यं, मुरभिः -भिः -भि, मनोरञ्जकः &c., मनोरञ्जनः &c., चोक्षः -क्षा -क्षं, चोक्षः -क्षी -क्षं.

PLEASANTLY, *adv.* सुखेन, सुखं, यथासुखं, सुखरूपेण, रम्यं, रमनीयं, मनोरमं, सुभगं, यथाभिमतं, प्रियं, सुप्रियं, मधुरं, रुचिरं.

PLEASANTNESS, *s.* रम्यता, रमणीयता, अभिरामता, प्रियता, सुप्रियता, काम्यत्वं, कान्तता, अभिमतत्वं, सुखत्वं, सौख्यं, सुखदायकत्वं.

PLEASANTRY, *s.* विनोदः, विनोदवाक्यं, विनोदोक्तिः *f.*, नर्म्मोक्तिः *f.*, नर्म्मभाषणं, परिहासः, परीहासः, हासिका.

To PLEASE, *v. a.* (Gratify) सुख् (c. 10. सुखयति -यितुं), मन्तुष् (c. 10. -तोषयति -यितुं), परितुष्, प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं), तृप्, प्रमुद्, रम्, ह्लाद्, आह्लाद्, हृष्, विनुद् (c. 10. -नोदयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), आराध् (c. 10. -राधयति -यितुं), सभाज्, सुखं कृ or दा, प्रीतिं कृ or दा; 'anxious to please,' अनुग्रहकातरः -रा -रं.—(Approve itself to) रुच् (c. 1. रोचते -चितुं) with dat. or gen. of the person, शुभ् (c. 1. शोभते -भितुं), अभिमतः -ता -तं भू, अनुमतः -ता -तं भू, प्रियः -या -यं भू; 'that pleases me,' तत् मह्यं or मम रोचते, तत् मया or मम अनुमतं or अभिमतं. *See To* LIKE.

To PLEASE, *v. n.* (Choose) रुच् (c. 1. रोचते -चितुं, c. 10. रोचयति -यितुं), इष् (c. 6. इच्छति, एषितुं); 'as you like,' यथा भवते रोचते, यथाकामं. *See To* LIKE, *v. n.*—(Condescend, as a word of ceremony) कृपां or दयां कृ. Usually expressed by the 2d or 3d person of the rt. अर्ह्, or by the use of तावत्, or some other particle; as, 'Be pleased to speak to me,' मां वक्तुम् अर्हसि or अर्हति भवान्: 'please to go,' गच्छ तावत्.

PLEASED, *p. p.* प्रीतः -ता -तं, प्रीतात्मा -त्मा -त्म (न्), तुष्टः -ष्टा -ष्टं, सन्तुष्टः &c., परितुष्टः &c., हृष्टः &c., हृष्टचित्तः -त्ता -त्तं, प्रहृष्टः -ष्टा -ष्टं, प्रमुदितः -ता -तं, मोदितः &c., मुदितः &c., आह्लादितः &c., प्रह्लादितः &c., आनन्दितः &c., अभिरूचितः &c., तृप्तः -प्ता -प्तं, रममाणः -णा -णं, प्रतीतः -ता -तं: 'in mind,' प्रीतमनाः -नाः -नः (स्).

PLEASING, *a.* रम्यः -म्या -म्यं, मनोरमः -मा -मं, रमणीयः -या -यं, सुभगः -गा -गं, नन्दकः -का -कं, मोदकः &c., कमनीयः -या -यं, रुचिरः -रा -रं, रोचिष्णुः -ष्णुः -ष्णु, चन्दकः -का -कं, मञ्जुलः -ला -लं, मनोज्ञः -ज्ञा -ज्ञं, मनोनुकूलः -ला -लं, मनआपः -पा -पं, मनोरञ्जकः &c. *See* PLEASANT, *a.*—(To the eye) चक्षुष्यः -ष्या -ष्यं, सुदृश्यः -श्या -श्यं, चारुरूपः -पा -पी -पं, दृश्यः &c. *See* BEAUTIFUL.—(To the ear) सुखश्रवः -वा -वं, श्रोत्रसुखः -खा -खं, श्रुतिसुखः &c; श्रोत्राभिरामः -मा -मं, सुचारुस्वनः -ना -नं, मञ्जुस्वनः &c., सुश्राव्यः -व्या -व्यं; 'pleasing language,' चाटुः -टु *m. n.*, चाटूक्तिः *f.*

PLEASINGLY, *adv.* सुभगं, रमणीयं, रम्यं, मनोरमं, सुख or चारु or मञ्जु in comp.; as, 'singing pleasingly,' चारुस्वनः -ना -नं, सुखस्वनः &c., मञ्जुस्वनः &c.

PLEASURABLE, *a.* रम्यः -म्या -म्यं, रमणीयः -या -यं, सौख्यीयः -या -यं, सुखावहः -हा -हं, भोगवान् -वती -वत् (त्). *See* PLEASANT.

PLEASURE, *s.* (Gratification, enjoyment) प्रीतिः *f.*, सुखं, सौख्यं, आनन्दः, तुष्टिः *f.*, मनोषः, परितोषः, तोषः, हर्षः, मोदः, आमोदः, प्रमोदः, आह्लादः, प्रह्लादः, रतिः *f.*, उल्लासः, अभिरुचिः *f.*, नन्दः, ह्लादः, मुदा, मुद् *f.*, विलासः, कुतूहलं, कौतुकं, शर्म *n.* (न्), उत्साहः; 'intense pleasure,' परमानन्दः, अत्यानन्दः, रोमहर्षः -र्षौ, पुलकः, रोमाञ्चः; 'in pleasure and pain,' सुखदुःखयोः loc. du.—(Liking, friendship for) रुचिः *f.*, अभिरुचिः *f.*, इच्छा, अभिमतता, अनुरक्तिः *f.*, अभिलाषः, अभिलषितं, छन्दं, छन्दस् *n.*; 'one's own pleasure,' स्वेच्छा; 'at one's pleasure,' स्वेच्छया, स्वेच्छातस्, कामतस्, यथाकामं, कामं, अनुकामं.—(Sensual pleasure) विषयभोगः, विषयकामः, विषयसुखं, विषयानुरागः, कामः, भोगः.—(Sexual pleasure) रतिः *f.*, सुरतं, रतं, भोगः, भोगविलासः.—(Cause of pleasure) सुखहेतुः *m.*, सुखकारणं; 'goddess of pleasure,' रङ्गदेवता.

PLEASURE-BOAT, *s.* क्रीडानौका, केलिनौका, विलासनौका.

PLEASURE-GROUND, *s.* उद्यानं, क्रीडोद्यानं, आरामः, क्रीडारामः, क्रीडावनं, विलासवनं, क्रीडाकाननं, विलासकाननं, केलिकाननं, केलिवनं, प्रमदवनं, किलोद्यानं, तेयनं.

PLEASURE-HOUSE, *s.* केलिगृहं, क्रीडागृहं, विलासगृहं, विलासमन्दिरं.

PLEASURIST, *s.* भोगासक्तः, विषयासक्तः, विषयसेवी *m.* (न्), केलिनागरः, केलिपरः, विषयी *m.* (न्), वैषयिकः, भोगपरायणः.

PLEBEIAN, *a.* प्राकृतः -ती -तं, दुष्कुलीनः -ना -नं, अकुलीनः -ना -नं, लौकिकः -की -कं, साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, अधरवर्णः -र्णा -र्णी, अधमवर्णः &c., अन्यवर्णः &c., अधमजातीयः -या -यं, अन्यजातीयः -या -यं, पामरः -री -रं.

PLEBEIAN, *s.* प्राकृतजनः, पृथग्जनः, निहीनजनः, इतरजनः, अकुलीनजनः, वृषलः, अपमद्यः, नीचजनः, पामरजनः.

PLECTRUM, *s.* कोणः, शारिका, परिवादः, रणः.

PLEDGE, *s.* (Any thing deposited as a security) न्यासः, निक्षेपः, आधिः *m.*, आधानं, उपन्यासः, बन्धकः, उपनिधिः *m.*, उपनिक्षेपः, उपनिधानं, औपनिधिकं, अन्वाधिः *m.*, पणः, परिपणनं, आधमनं, आधीकरणं; 'counter-pledge,' प्रतिपाणं.—(Any thing deposited as security for the repayment of something borrowed) गृहीतस्य द्रव्यस्योपरि विश्वासार्थम् अधमर्णेनोत्तमर्णे न्यस्तं आधिः; 'act of depositing a pledge,' आधीकरणं.—(Hostage) बन्धकः, शरीरबन्धकः.—(Token) अभिज्ञानं.

To PLEDGE, *v. a.* आधीकृ, न्यस् (c. 4. -अस्यति -असितुं), प्रतिन्यस्, उपन्यस्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपनिक्षिप्, निधा (c. 3. -दधाति -धातुं), आधा, पण् (c. 1. पणते -णितुं), परिपण्, न्यासीकृ.—(Pledge one's self, pledge one's word) प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), प्रतिज्ञां कृ, प्रतिज्ञाबद्धः -द्धा -द्धं भू, वचनबद्धः -द्धा -द्धं भू, अङ्गीकृ, अरीकृ.

PLEDGED, *p.p.* आधीकृतः -ता -तं, न्यस्तः -स्ता -स्तं, उपन्यस्तः &c., निक्षिप्तः -प्ता -प्तं, परिपणितः -ता -तं, न्यासीकृतः -ता -तं.—(Promised) प्रतिज्ञातः -ता -तं, अङ्गीकृतः &c., अभ्युपेतः &c.; 'that has pledged his word,' कृतप्रतिज्ञः -ज्ञा -ज्ञं, प्रतिज्ञाबद्धः -द्धा -द्धं, वचनबद्धः &c., दत्तप्रतिज्ञः &c., दत्तवचनः &c.

PLEDGET, *s.* (In surgery) पिचेङ्गिका, पट्टः -ट्टकः, आवेष्टनं, दशलिका.

PLEIADS, PLEIADES, *s. pl.* कृत्तिका, बहुलाः *f. pl.*

PLENARY, *a.* सम्पूर्णः -र्णा -र्णं, परिपूर्णः &c., निःशेषः -षा -षं.

PLENILUNAR, PLENILUNARY, *a.* पूर्णचन्द्रसम्बन्धी &c., पूर्णेन्दुसम्बन्धी &c.

PLENIPOTENCE, *s.* पूर्णसामर्थ्यं, सामर्थ्यपूर्णता, पूर्णशक्तित्वं, शक्तिपूर्णता.

PLENIPOTENT, *a.* पूर्णशक्तिः -क्तिः -क्ति, पूर्णशक्तिमान् -मती -मत् (त्).

PLENIPOTENTIARY, *s.* पूर्णशक्तियुक्तः, पूर्णशक्तिविशिष्टः, पूर्णशक्तिकः.

PLENIST, *s.* पूर्णतावादी *m.* (न्), पूर्णत्ववादी *m.*

PLENITUDE, *s.* पूर्णता, सम्पूर्णता -त्वं, परिपूर्णता -त्वं, पूर्तिः *f.*, आपूर्तिः *f.*, पुष्कलता, विपुलता, समृद्धिः *f.*, सामृद्धं, प्राचुर्यं, उत्सेकः.

PLENTEOUS, PLENTIFUL, *a.* बहुलः -ला -लं, बहुः -हुः -ह्वी -हु, प्रचुरः -रा -रं, पुष्कलः -ला -लं, विपुलः -ला -लं, समृद्धः -द्धा -द्धं, परिपूर्णः -र्णा -र्णं, भूरिः -रिः -रि, अतिरिक्तः -क्ता -क्तं, उद्रिक्तः &c., उत्सिक्तः &c., उपचितः &c.

PLENTEOUSLY, PLENTIFULLY, *adv.* बाहुल्येन, बहुशस्, प्राचुर्येण, प्रचुरं, पुष्कलं, विपुलं, वैपुल्येन, भूरिशस्, भूरि, बहु, अनेकशस्, अतिरिक्तं, उद्रेकेण.

PLENTEOUSNESS, PLENTIFULNESS, *s.* बाहुल्यं, प्राचुर्यं, पुष्कलत्वं. *See* next.

PLENTY, *s.* बाहुल्यं, बहुत्वं -ता, प्राचुर्यं, प्रचुरता -त्वं, वैपुल्यं, विपुलता, पुष्कलता, समृद्धिः *f.*, सामृद्धं, वृद्धिः *f.*, समृद्धता, प्रभूतता, उद्रेकः, अतिरेकः, उत्सेकः, अतिरिक्तता, उत्सिक्तता, स्फीतिः *f.*, स्फातिः *f.*; 'time of plenty or abundance of corn, &c.,' सुभिक्षं, धान्यसमृद्धिः *f.*; 'cow of plenty,' कामदा, कामदुघा, कामधुक् *f.* (ह्). *See* PHILOSOPHER'S STONE.

PLEONASM, *s.* शब्दातिशयः, शब्दबाहुल्यं, शब्दाधिक्यं, स्वार्थे, मात्रं.

PLEONASTIC, *a.* स्वार्थे -र्थी -र्थं, अतिरिक्तः -क्ता -क्तं, अतिरिक्तशब्दः -ब्दा -ब्दं.

PLEONASTICALLY, *adv.* शब्दबाहुल्येन, शब्दाधिक्येन, स्वार्थतस्.

PLETHORA, *s.* रक्तपित्तं -त्तः, पित्तरक्तं, असृपित्तं, रक्तातिशय्यं, रक्ताधिक्यं, अतिपुष्टिः *f.*

PLETHORIC, *a.* रक्तपित्तरोगी -गिणी -गि (न्), अतिपुष्टिशीलः -ला -लं, अतिपुष्टः -ष्टा -ष्टं, अतिशयपुष्टः -ष्टा -ष्टं.

PLEURISY, *s.* (Disease of the chest) उरोग्रहः, वक्षोग्रहः.

PLEURITIC, *a.* उरोग्रहरोगी -गिणी -गि (न्), उरोग्रही &c., वक्षोग्रही &c.

PLIABILITY, PLIANCY, *s.* सुनम्यता, सुनमनीयत्वं, नमनशीलता, आनम्यता, आयम्यता, मृदुता, मार्दवं, कोमलता, शिथिलता, शैथिल्यं, अदृढता.

PLIANT, PLIABLE, *a.* सुनम्यः -म्या -म्यं, सुखनम्यः &c., सुनमनीयः -या -यं, नमनशीलः -ला -लं, आनम्यः &c., नम्यः &c., नमनीयः &c., आयम्यः &c., मृदुः -दुः -द्वी -दु, कोमलः -ला -लं, शिथिलः -ला -लं, अदृढः -ढा -ढं.

To PLIGHT, *v. a.* *See To* PLEDGE.

PLIGHT, *s.* (Condition) अवस्था, दशा, स्थितिः *f.*, भावः, वृत्तिः *f.*, गतिः *f.*; 'bad plight,' दुर्दशा, दुःस्थितिः *f.*, दुर्गतिः *f.*; 'in bad plight,' दुर्दशाग्रस्तः -स्ता -स्तं, दुःस्थः -स्था -स्थं.—(Gage). *See* PLEDGE.

PLIGHTED, *p. p.* परिपणितः -ता -तं, न्यस्तः -स्ता -स्तं, उपन्यस्तः &c., प्रतिज्ञातः -ता -तं, कृतप्रतिज्ञः -ज्ञा -ज्ञं; 'in marriage,' प्रतिज्ञाविवाहितः &c., वाग्दत्तः -त्ता -त्तं.

PLINTH, *s.* प्राकारमूलं, भित्तिमूलं, प्राकारतलं, स्तम्भमूलं, स्तम्भतलं.

To PLOD, *v. n.* मन्दं मन्दं निरन्तरायासेन or अविरतक्लेशेन भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or अविरतश्रमेण आयस् (c. 4. -यस्यति -यसितुं), अतिमात्रेण नित्यश्रमं कृ or नित्यायासं कृ or नित्यकष्टं कृ or नित्यक्लेशं कृ or नित्यप्रवृत्तिं कृ.

PLODDER, *s.* अतिमात्रेण निरन्तरायासी *m.* (न्) or अविरतायासी *m.* or निरन्तरश्रमी or नित्यश्रमी *m.* (न्) or नित्योद्योगी *m.* (न्) or नित्य-

व्यवसायी, आयासाध्ययनी *m.* (न्), अनाध्यायी *m.*, आयासच्यासङ्गी *m.*, आयासगामी *m.*, पिपीलिकाधर्म्मी *m.* (न्)

PLODDING, *s.* अतिमान्द्यपूर्णो निरन्तरायासः or अविरतायासः, अतिमान्द्येन नित्यश्रमः or नित्योद्योगः or नित्यव्यवसायः, आयासाध्ययनं, अनाध्ययनं, पिपीलिकाधर्म्मः.

PLODDING, *a.* अतिमान्द्यपूर्णो निरन्तरायासी -सिनी -सि (न्) or नित्यश्रमी &c.

PLOT, *s.* (Complicated scheme, deep-laid stratagem) कपटप्रबन्धः, छलप्रबन्धः, कापट्यप्रबन्धः, उपायप्रबन्धः, कूटप्रबन्धः, कल्पना, उपायकल्पना, सङ्कल्पः, उपायप्रयोगः, प्रयोगः, युक्तिः *f.*, अपदेशः, व्यपदेशः, मन्त्रणा, उपायः.—(Scheme of mischief) कुसङ्कल्पः, कुकल्पना, कुमन्त्रणा, कुकर्म्मसम्पादनार्थं or द्रोहसम्पादनार्थं कपटप्रबन्धः.—(Of a drama, &c.) वस्तु *n.*; 'secondary plot,' प्रतिमुखं; 'good plot,' सुवस्तु; 'a play with a plot composed by Kálidása,' कालिदासग्रथितवस्तुनाटकः.—(Of ground) स्थलं -ली -ला, भूमिभागः, भूभागः, भूप्रदेशः, भूमिप्रदेशः, भूमिः *f.*, वसुधा.

To PLOT, *v. a.* or *n.* (Form a scheme) मनसा उपायप्रबन्धं कृप् (c. 10. कल्पयति -यितुं) or प्रचिन् (c. 10. -चिन्तयति -यितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), मन्त्र् (c. 10. मन्त्रयते -यितुं), सम्मन्त्र्, उपायकल्पनां कृ, कपटप्रबन्धं कृ, उपायप्रबन्धं कृ, सङ्कल्पं कृ.—(Form a scheme of mischief) कुसङ्कल्पं कृ, कुकर्म्मसम्पादनार्थं कपटप्रबन्धं कृ or उपायकल्पनां कृ, द्रोहकरणार्थं कुमन्त्रणां कृ or सम्मन्त्रणां कृ.—(Plot against) द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), अभिद्रुह्, द्रोहं चिन् or प्रचिन्, कपटप्रबन्धेन द्रोहं कृ.

PLOTTER, *s.* कपटप्रबन्धकारी *m.* (न्), उपायकल्पकः, उपायचिन्तकः, द्रोहचिन्तकः, कुमन्त्रणाकृत्, कुकल्पनाकृत् *m.*, कुसङ्कल्पकारी *m.* (न्).

PLOUGH, *s.* हलं, लाङ्गलं, गोदारणं, सीरः, शीरः, हालः, गोकीलः, गोकिलः, कृतान्तं, कर्षणी, आकर्षणी, राधरङ्कः, कुलालः; 'body of a plough,' फालः, फलं, निरीशं, निरीषं, कूटकं; 'the share,' *see* PLOUGHSHARE; 'the pole or shaft,' ईषा, ईशा, लाङ्गलदण्डः; 'the yoke,' युगं, कुशः; 'pin of it,' युगकीलकः; 'tie of it,' योक्त्रं, योत्रं, आबन्धः; 'handle of a plough,' ईषादण्डः, ईशादण्डः; 'relating or belonging to a plough,' हालिकः -की -कं, लाङ्गलिकः &c., सैरिकः -की -कं; 'to hold, drive or follow the plough,' लाङ्गलं or हलं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or भृ or धृ or यह् (c. 10. वाहयति -यितुं) or चल् (c. 10. चालयति -यितुं).

To PLOUGH, *v. a.* हलेन or लाङ्गलेन कृष् (c. 1. कर्षति, क्रष्टुं) or कर्षणं कृ, लाङ्गलेन भूमिं दृ (c. 10. दारयति -यितुं) or भिद् (c. 7. भिनत्ति, भेत्तुं), हल् (c. 1. हलति -लितुं, c. 10. हलयति -यितुं), हलहतिं कृ, लाङ्गलहतिं कृ, हलहतं -तां कृ, हलकृष्टं -ष्टां कृ.

To PLOUGH, *v. n.* (Drive a plough) लाङ्गलं or हलं यह् (c. 10. वाहयति -यितुं) or चल् (c. 10. चालयति -यितुं).

PLOUGHABLE, *a.* कर्षणीयः -या -यं, कृषियोग्यः -ग्या -ग्यं, सीत्यः -त्या -त्यं, हल्यः -ल्या -ल्यं, हलहतियोग्यः &c.

PLOUGH-BOY, *s.* बालकृषकः, बालकर्षकः, बालहालिकः.

PLOUGHED, *p.p.* कृष्टः -ष्टा -ष्टं, कर्षितः -ता -तं, हलकृष्टः &c., फालकृष्टः &c., फालकर्षितः &c., सीत्यः -त्या -त्यं, शीत्यः &c., हल्यः -ल्या -ल्यं; 'twice-ploughed,' द्विगुणाकृतः -ता -तं, द्वितीयाकृतः &c., द्विहल्यः &c., द्विसीत्यः -त्या -त्यं, द्वयाकृतः -ता -तं, सद्याकृतः &c.; 'thrice-ploughed,' त्रिसीत्यः &c., त्रिगुणाकृतः &c., तृतीयाकृतः &c., त्रिहल्यः &c.; 'ploughed by two ploughs,' हलद्वयेन कृष्टः &c. or वाहितः; 'a ploughed field,' फालकृष्टक्षेत्रं, फालकृष्टं, हल्यक्षेत्रं; 'land ploughed after sowing,' बीजाकृतः -ता -तं, उप्तकृष्टः -ष्टा -ष्टं.

PLOUGHER, *s.* कृषकः, कर्षकः, कर्षी *m.* (न्), हालिकः, सैरिकः.

PLOUGH-GEAR, *s.* हलोपकरणं, लाङ्गलोपकरणं, लाङ्गलसामग्री, हलसज्जा.

PLOUGH-HANDLE, *s.* ईषादण्डः, ईशादण्डः, ईषायष्टिः *m. f.*

PLOUGHING, *s.* कर्षणं, कृषिः *f.*, कार्षिः *f.*, उत्कर्षणं, प्रकर्षणं, सङ्कर्षणं, लाङ्गलकर्षणं, भूमिकर्षणं, क्षेत्रकर्षणं, भूमिदारणं, हलहतिः *f.*, हलभृतिः *f.*, लाङ्गलग्रहणं, उत्कर्षणं.

PLOUGH-LAND, *s.* हल्यक्षेत्रं, हल्यभूमिः *f.*, फालकृष्टं, हल्यं, सीत्यं, शीत्यं, हालिकं, हालिकक्षेत्रं, लाङ्गलिकं. *See* PLOUGHED.

PLOUGH-MAN, *s.* हालिकः, लाङ्गलिकः, लाङ्गली *m.* (न्), लाङ्गलग्रहः, हलधरः, लाङ्गलधरः, हलभृत् *m.*, लाङ्गलभृत् *m.*, हलवाहकः, कृषिकः, कृषकः, कर्षकः, कृषिजीवी *m.* (न्), कर्षी *m.* (न्), कार्षकः -षिका, कृषीवलः, क्षेत्रकर्षकः, भूमिकर्षकः, सैरिकः, शैरिकः.

PLOUGH-SHARE, *s.* फालः, कृषिकः -का, कृषकः, फलं, जित्या, कुशी, कूटकं.

PLOUGH-TAIL, *s.* लाङ्गलपृष्ठं, लाङ्गलस्य पश्चाद्भागः or पश्चिमभागः.

To PLUCK, *v. a.* (Pull off, out or from) उत्कृष् (c. 1. -कर्षति -क्रष्टुं), निष्कृष्, कृष्, उद्धृ (c. 1. -हरति -हर्तुं), निर्हृ, हृ, उत्पद् (c. 10. -पाटयति -यितुं), उत्पाटनं कृ.—(As the hair) लुच् (c. 1. लुचति -चितुं), उल्लुच्, अवलुच्, केशान् उत्पद्, केशोत्पाटनं कृ, केशोल्लुचनं कृ.—(As feathers, &c.) पक्षान् or पक्षौन् उत्पद् or निष्कृष् or निर्हृ or हृ, पक्षोत्पाटनं कृ, निष्पक्षीकृ, निष्पक्षीकृ, निष्पक्षीकृ.—(Gather by plucking) अङ्गुलिभिर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं) or चि or अवचि or लू or छिद्.—(Pluck up) उत्पद्, उद्धृ, समुद्धृ, उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, उच्छिद्, उत्खन्.

PLUCK, *s.* (Of an animal) पशोर् हृदयकृदादि *n.*—(Mettle, courage) वीर्य्यं, सत्त्वं, साहसं, पौरुषं.

PLUCKED, *p.p.* हृतपक्षः -क्षौ -क्षौ, उद्धृतपक्षः &c., हृतलोमा -मा -म (न्).

PLUCKER, *s.* उत्पाटयिता *m.* (तृ), उत्पाटी *m.* (न्), उद्धर्त्ता *m.* (र्तृ).

PLUCKING, *s.* उत्पाटः -टनं, उत्कर्षणं, निष्कर्षणं, उद्धरणं.—(As of hair) उल्लुचनं, अवलुचनं.—(Gathering) चयः -यनं, अवचयः, ग्रहणं.

PLUG, *s.* रोधनी, निरोधनी, स्तम्भनी, पिधानं

To PLUG, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, स्तम्भ् (c. 10. स्तम्भयति -यितुं), पिधा (c. 3. -दधाति -धातुं).

PLUM, *s.* (Fruit) अम्रफलभेदः.—(Sum of one hundred thousand) लक्षं -क्षा, लक्ष्यं; 'one who is worth a plum,' लक्षाधीशः.

PLUMAGE, *s.* पक्षः, पर्णः, पक्षिपर्णः *m. pl.*, पक्षिपक्षाणि *n. pl.*, पतत्रं, पिच्छं, गरुत् *m.*; 'of a peacock,' गुच्छः -च्छकः, चूर्णं; 'having good or beautiful plumage,' सुपर्णः -र्णी -र्णं, सुपक्षी -क्षिणी -क्षि (न्), सुपक्षवान् -वती -वत् (त्), चारुपर्णः &c., चारुपक्षी &c.

PLUMB, *s.* लक्षः -क्षकः, लक्षसीसकं, ससीसकसूत्रं. *See* PLUMMET.

PLUMB, *a.* लक्षः -क्षा -क्षं, लक्षरूपः -पा -पं, ऋजुः -जुः -जु.

To PLUMB, *v. a.* (Adjust with a line) सूत्र् (c. 10. सूत्रयति -यितुं), सूत्रेण समायुज् (c. 10. -योजयति -यितुं) or युज्.—(Sound depth) सूत्रेण वेधपरिमापणं कृ or गाम्भीर्यपरिमापणं कृ.

PLUMBEAN, PLUMBEOUS, *a.* सीसमयः -यी -यं, सीसगुणकः -का -कं, सैसकः &c.

PLUMBER, *s.* सीसकारः -रकः, सीसकर्त्ता *m.* (र्तृ), सीसकव्यापारी *m.*

PLUMB-LINE, *s.* लक्षसीसकं, लक्षसूत्रं. *See* PLUMB, *s.*

PLUM-CAKE, *s.* चिपिटापूपः, चिपिटिकः, शुष्कफलपूरितापूपः.

PLUME, *s.* (Feather) पक्षः, पर्णः, पिच्छं.—(Feather worn as ornament, crest) शेखरः, चूडा, शिखा, किरीटः, मुकुटं, नीलिः *m. f.*

To PLUME, *v. a.* (Adjust feathers) पक्षान् or पर्णान् रच् (c. 10. रचयति -यितुं) or विरच्.—(Strip of feathers) पक्षान् or पर्णान् उत्कृष् or निष्कृष् or हृ or उत्पद्, निष्पक्षीकृ. *See To* PLUCK.—(Pride one's self) अभिमन् (c. 4. -मन्यते -मनितुं); आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं); 'to plume one's self on one's learning,' पण्डितम्मन्यः -न्या -न्यं भू or अस्.

PLUMELESS, *a.* पक्षहीनः -ना -नं, चूडाहीनः &c., अपक्षः -क्षा -क्षं.

PLUMIGEROUS. *a.* पक्षवान् -वती -वत् (त्), पक्षी -क्षिणी -क्षि (न्), सपक्षः -क्षा -क्षं.

PLUMIPED, *a.* सपक्षपादः -दा -दं, सपर्णपादः &c., सपक्षचरणः &c.

PLUMMET, *s.* लम्बः -म्बकः, लम्बमीसकं, ससीमकसूत्रं, सीमालक्षितसूत्रं, सीसलग्नसूत्रं, मूत्रलग्नसीसकं, लम्बसूत्रं, लम्बकसूत्रं.

PLUMOSE, PLUMOUS, *s.* सपक्षः -क्षा -क्षं, सपिञ्छः -च्छा -च्छं, पक्षवान् -वती -वत् (त्), पिञ्छिलः -ला -लं. *See* FEATHERED.

PLUMP. *a.* पीवरः -रा -रं, पीनः -ना -नं, घनः -ना -नं, घनमांसः -सा -सं, उन्नतमांसः &c., उन्नतः -ता -तं, पुष्टः -ष्टा -ष्टं, परिपुष्टः &c., मांसपुष्टः &c., स्थूलमांसः &c., सुललितः -ता -तं, सुललितमांसः &c., आप्यानः -ना -नं, स्थूलः -ला -लं, उच्छ्रनः -ना -नं, तुन्दी -न्दिनी -न्दि (न्), तुन्दिकः -का -कं, स्फीतः -ता -तं, स्फातः &c., फुल्लः -ल्ला -ल्लं.

PLUMP, *adv.* अकस्मात्, आकस्मिकशब्देन, आस्फोटनशब्देन.

To PLUMP, *v. a.* आप्यै (c. 10. -प्याययति -यितुं), स्थूलीकृ, पीवरीकृ, स्फाय् (c. 10. स्फाययति -यितुं), पुष्प् (c. 10. पोषयति -यितुं), उच्छ्रनीकृ, शूनीकृ.

To PLUMP, *v. n.* अकस्मात् or आकस्मिकशब्देन or आस्फोटनशब्देन पत् (c. 1. पतति -तितुं), अतिभारेण पत्.

PLUMPLY, *adv.* सुष्ठ्वङ्गं, सुस्पष्टं, अतिष्ठ्वङ्गं, व्यक्तार्थतस्, अवक्रं.

PLUMPNESS, *s.* घनता, स्थूलता -त्वं, पीवरत्वं, पीनत्वं, पुष्टता, सुपुष्टता, पुष्टिः *f.*, सुपुष्टिः *f.*, स्फीतिः *f.*, स्फीतता -त्वं, स्फातिः *f.*, फुल्लता, आप्मानं, उन्नतिः *f.*

PLUM-PUDDING, *s.* चित्रापूपः, चित्रवोल्लिका, मोदकादिपूरितवोल्लिका.

PLUMY, *a.* सपक्षः -क्षा -क्षं, पक्षविशिष्टः -ष्टा -ष्टं. *See* FEATHERED.

PLUNDER, *s.* लोप्त्रं, लोप्त्रं, लुभं, लोटः -टं, लुण्ठनं, लुण्ठा, लुण्टनं, लुण्टा, हरणं, अपहारः, अभियहः, धनापहारः -हरणं, नष्टाभिसूत्रं, होटं.

To PLUNDER, *v. a.* धनद्रव्यादि हृ (c. 1. हरति, हर्तुं) or अपहृ or अभिहृ, लुण्ठ् (c. 1. लुण्ठति -ण्ठितुं) or लुण्ट् or लुण्ड् or रुण्ड् or रुण्ट्, चुर् (c. 10. चोरयति -यितुं), विलुप् (c. 6. -लुम्पति -लोप्तुं), लुप्, कल् (c. 10. कालयति -यितुं), प्रकल्, साहसेन or साहसपूर्व्वम् अपहृ.

PLUNDERED, *p. p.* हृतधनः -ना -नं, हृतद्रव्यः -व्या -व्यं, हृतस्वः -स्वा -स्वं, अपहृतस्वः &c., लुण्ठितः -ता -तं, साहसेन or साहसपूर्व्वम् अपहृतः -ता -तं, लुप्तः -प्ता -प्तं, होटः -टा -टं.

PLUNDERER, *s.* अपहारकः, अपहारी *m.* (न्), हारकः, हारी *m.*, अपहर्त्ता *m.* (र्तृ), लुण्ठाकः, लुण्टनकृत् *m.*, साहसेन or साहसपूर्व्वम् अपहारी *m.*, साहसिकः.

PLUNDERING, *s.* अपहारः, अपहरणं, हरणं, धनापहारः, लुण्ठनं, लुण्टनं.

To PLUNGE, *v. a.* (Immerse) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, प्लु (c. 10. प्लावयति -यितुं), आप्लु, अवगाह् (c. 10. -गाहयति -यितुं), जलं प्रविश् in caus., जले निविश्, ज्ञा in caus.

To PLUNGE, *v. n.* (Dive) मज्ज् (c. 6. मज्जति -ज्जितुं, मंक्तुं), निमज्ज्, अवगाह् (c. 1. -गाहते -हितुं -गाढुं), अवगाह्, विगाह्, आप्लु (c. 1. -प्लवते -प्लोतुं), जलमध्ये प्रविश्, जलान्तः प्रविश्, जलं प्रविश्, जलान्तःप्रवेशं कृ, जलान्तःप्लवनं कृ, ज्ञा.

PLUNGE, PLUNGING, *s.* मज्जनं, निमज्जनं, प्लवनं, आप्लवः, आप्लावः -वनं, अवगाहनं, विगाहः -हनं, गाहनं, जलप्रवेशः, जलान्तःप्लवनं, जलान्तःप्रवेशः, निष्णानं; 'of an elephant,' निर्वाणं.

PLUNGED, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः &c., मज्जितः -ता -तं, निमज्जितः &c., प्लवमग्नः &c., गाहितः -ता -तं, अवगाहितः &c., अवगाढः -ढा -ढं, विगाढः &c., आप्लुतः -ता -तं, निवेशितः &c., अभिनिवेशितः &c., निविष्टः -ष्टा -ष्टं, अभिनिविष्टः &c., लीनः -ना -नं, निर्वाणः -णा -णं; 'in a sea of sorrow,' शोकसागरमग्नः &c., शोकसागरावगाढः -ढा -ढं. *See* IMMERSED.

PLUNGEON, *s.* (The Diver bird) प्लवः, प्लावी *m.* (न्).

PLUNGER, *s.* गाहिता *m.* (तृ), अवगाहिता *m.*, मंक्ता *m.* (क्तृ), निमंक्ता *m.*

PLURAL, *a.* अनेकः -का -कं, बहुः -हुः -ह्वी -हु, बहुलः -ला -लं.—(Plural number, in grammar) अनेकवचनं, बहुवचनं.

PLURALITY, *s.* अनेकत्वं -ता, अनेकं, बहुत्वं -ता, बाहुल्यं, अनेकसंख्यत्वं: 'of gods,' देवबहुत्वं; 'of wives,' भार्यात्वं.

PLUS, *s.* (In Algebra) धनं, स्वं.

PLUSH, *s.* स्थूलदुकूलं, घनदुकूलं, घनलोमयद् दुकूलं.

PLUTO, *s.* (God of the infernal regions) यमः. *See* YAMA.

PLUTUS, *s.* (God of wealth) कुबेरः, धनपतिः *m.* *See* KUVERA.

PLUVIAL, PLUVIOUS, *a.* वृष्टिमान् -मती -मत् (त्), वर्षुकः -का -कं, वर्षिकः -की -कं, वार्षिकः &c., वृष्टिमयः -यी -यं, प्रचुरवृष्टिः -ष्टिः -ष्टि, बहुवृष्टः &c.

PLUVIAMETER, *s.* वृष्टिमापनयन्त्रं, वृष्टिमापकः, वृष्टिमापनी.

To PLY, *v. a.* (Lay on) क्षिप् in caus. (अर्पयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), न्यस्, आधा, धा, पत् in caus.; 'to ply with repeated blows,' पुनः पुनः पत्, मुहुर्मुहुः पत् or दण्डपातनं कृ.—(Employ diligently) यत्नतः or निर्बन्धेन प्रयुज् or उपयुज् or प्रवृत्.—(Keep in motion) प्रयत्नतस् or अधिरतं चल् (c. 10. चालयति -यितुं), or सञ्चल्.—(Urge, press perseveringly) निर्बन्धेन प्रत्युपस्था (c. 1. -तिष्ठति -ष्ठातुं) or उपस्था or आक्रम् (c. 1. -क्रामति -क्रमितुं); 'with entreaties,' अतिनिर्बन्धेन प्रार्थ् or सम्यर्थ् or प्रार्थनं कृ.

To PLY, *v. n.* (Be steadily employed) अनालस्येन or अतन्द्रितम् or अधिरतं व्यापृ in pass. (-प्रियते) or व्यापृतः -ता -तं भू or निरतः -ता -तं भू or प्रवृत् or यत्, अधिरतयत्नं कृ.

PLY, *s.* (Fold) ऊर्म्मिः *m. f.*, ऊर्म्मी -र्म्मिका, व्यावर्त्तनं, तरङ्गः, पुटः.

PNEUMATIC, PNEUMATICAL, *a.* (Consisting of air) वायुमयः -यी -यं, वायुरूपः -पा -पं.—(Pertaining to air) वायवः -वी -वं, वायुसम्बन्धी -न्धिनी -न्धि (न्), वायुविषयकः -का -कं, वायु in comp.—(Moved or played by air) वायु in comp., वायुसञ्चारितः -ता -तं, वायुप्रादितः -ता -तं; 'pneumatic instrument,' वायुयन्त्रं, वायुयाथं.

PNEUMATICS, *s. pl.* वायुविद्या, वायुधर्म्मविद्या, वायुगुणविद्या, वायुशास्त्रं, वायुगुणविषयका विद्या.

PNEUMONIA, *s.* (Inflammation of the lungs) फुप्फुसदाहः.

PNEUMONIC, *a.* फुप्फुससम्बन्धी &c., फुप्फुसविषयकः -का -कं.

To POACH, *v. a.* (Boil eggs slightly) अण्डानि तप्तजलान्तः कृत्वा ईषत् पच् (c. 1. पचति, पक्तुं) or क्वथ् or अर्द्धसिद्धानि कृ.—(Steal or pocket game) धनपक्ष्यादि or जङ्गलपक्ष्यादि चुर् or गूढलोभान्तः कृत्वा अपहृ. *See* the next.

To POACH, *v. n.* कूटयन्त्रेण धनपक्षिणो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), कूटोपायेन जङ्गलपक्ष्यादि ग्रह् or चुर् (c. 10. चोरयति -यितुं) or अपहृ (c. 1. -हरति -हर्तुं), जाङ्गलजन्तुचौर्य्यं कृ, वन्यजन्तुहरणं कृ, वन्यजन्तुस्तेयं कृ, मृगयाचौर्य्यं चर्.

POACHER, *s.* कौटिकः, कौढकिकः, कौटिलिकः, कूटयन्त्रेण वनपक्षिग्राहकः, कूटोपायेन वन्यजन्तुहारी *m.* (न्) or जाङ्गलपक्षपहारकः, जाङ्गलचौरः, मृगयाचौरः, वनचौरः, मृगयाचोरः, वैतंसिकः.

POACHING, *s.* कूटयन्त्रेण वनपक्षिग्रहणं, कूटोपायेन जाङ्गलपक्षिग्रहणं or जाङ्गलजन्तुहरणं, मृगयाचौर्यं, जाङ्गलचौर्यं, वन्यजन्तुचौर्यं, वन्यजन्तुस्तेयं, वनचौर्यं, वनस्तेयं.

POCK, *s.* रक्तवटी, रक्तवटी, वटी, वरटी, रक्तस्फोटः, सूक्ष्मस्फोटः -टकः, स्फोटः -टकः, पिस्फोटः, सिध्मं, सिध्म *n.* (न्), गुटिका.

POCKET, *s.* वस्त्रान्तःस्थकोषः, वस्त्रस्थकोषः, वस्त्रान्तरस्थकोषः, कोषः, कोशः, आधारः.

To POCKET, *v. a.* कोषान्तः कृ, कोषे or कोशे निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं), वस्त्रान्तर्गतं -तां कृ, कोषान्तः स्था in caus. (स्थापयति -यितुं), कोषस्थं -स्थां कृ.—(Put up with) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते, क्षन्तुं).

POCKET-BOOK, *s.* कोषस्थपुस्तकं, कोषगतपुस्तकं, कोषपुस्तकं.

POCKETED, *p. p.* कोषान्तःकृतः -ता -तं, कोषान्तः स्थापितः -ता -तं, कोषनिवेशितः &c., कोषगतः -ता -तं, कोषान्तर्गतः &c., कोषान्तर्हितः &c., कोषगुप्तः -प्ता -प्तं.

POCKET-HANDKERCHIEF, *s.* नासामार्जनी, नासिकामार्जनी, मुखमार्जनी, नस्कः, वरकं.

POCKET-HOLE, *s.* कोषच्छिद्रं, कोशच्छिद्रं, वस्त्रान्तःस्थकोषच्छिद्रं.

POCKET-MONEY, *s.* क्षुद्रद्रव्यक्रयणार्थं वारे वारे दत्तं धनं.

POCKY, *a.* रक्तवटीपूर्णः -र्णा -र्णं, रक्तस्फोटविशिष्टः -ष्टा -ष्टं.

POD, *s.* बीजकोशः, बीजगुप्तिः *f.*, सिक्था -क्थिः -क्थी *f.*, शिक्षा क्षिः -क्षी *f.*, शिक्षिका, शमिः *f.*, शमी, पुटः; 'grain in pods,' शमीधान्यं.

PODAGRICAL, *a.* वातकी -किनी -कि (न्), वातरोगी -गिणी &c., वातिकः -की -कं, वातुलः -ला -लं, सन्धिवायुरोगी &c., सन्धिवायुग्रस्तः -स्ता -स्तं.

PODDED, *a.* सिक्थियुक्तः -क्ता -क्तं, शिक्षीयुक्तः &c., शमियुक्तः &c.

POEM, *s.* काव्यं, कविता, कवनं, काव्यबन्धः; 'interspersed with prose,' खण्डकाव्यं.

POESY, *s.* (Art of composing poems) कविता, काव्यविद्या, काव्यरचनविद्या, काव्यलेखनविद्या, काव्यरचना, श्लोकरचना, कविताशक्तिः *f.*, कविकर्म्म *n.* (न्), रसविद्या, रसज्ञता.—(Metrical composition) कविता, काव्यं, व्यञ्जनावृत्तिः *f.* *See* POETRY.

POET, *s.* कविः *m.*, काव्यरचकः, कवितारचकः, पद्यरचकः, काव्यकर्त्ता *m.* (र्त्तृ), कविताकर्त्ता *m.*, रसज्ञः, वप्रा *m.* (प्र), भविनः, वागीशः; 'a quasi poet,' कविकल्पः; 'a ready poet,' शीघ्रकविः *m.*

POETASTER, *s.* कुकविः *m.*, कविकल्पः, कविदेशीयः, कविदेश्यः.

POETESS, *s.* काव्यकर्त्री, कविताकर्त्री, काव्यरचका.

POETIC, POETICAL, *a.* (Relating to poetry, suitable to it) कवितासम्बन्धी -न्धिनी &c., कवितायिषयः -या -यं, काव्यरचनयोग्यः -ग्या -ग्यं, काव्ययोग्यः &c.—(Possessing the beauties of poetry) रसिकः -का -कं, सरसः -सा -सं, रसी -सिनी &c., रसवान् -वती -वत् (न्), काव्यरसवान् &c., कविता or काव्य in comp.; as, 'poetical genius,' कविताशक्तिः *f.*—(Expressed in poetry or measure) श्लोकबद्धः -द्धा -द्धं, पद्यरूपः -पा -पं, श्लोकरूपः &c., काव्यरूपः -पा -पं. कवितारूपः &c., कविनामयः -यी -यं, श्लोकमयः &c., छन्दोरूपः &c., छन्दोबद्धः &c.

POETICALLY, *adv.* कवितायोग्यं, कवितारूपेण, पद्यरूपेण, कवितापूर्व्वं, छन्दोनुसारेण, काव्यरसपूर्व्वं, सरसं.

POETICS, *s.* काव्यशास्त्रं, कविताशास्त्रं, रसशास्त्रं, पद्यशास्त्रं,

To POETIZE, *v. n.* काव्य रच् (c. 10. रचयति -यितुं), काव्यरचनां कृ, कवितां कृ.

POET-LAUREATE, *s.* चन्दी *m.* (न्), चन्दाङ्गः *m.*, राजचन्दी *m.*, राजस्तुतिपाठकः.

POETRY, *s.* (Metrical composition, verse) कविता -त्वं, काव्यं, कवनं, पद्यं.—(Art or practice of composing in verse) कविता -त्वं, काव्यरचना, श्लोकरचना, काव्यविद्या, काव्यरचनविद्या, कविकर्म्म *n.* (न्), कवितायिद्या, रसविद्या, रसज्ञता.—(Poetical works) काव्यशास्त्रं, पद्यशास्त्रं, साहित्यं.

POIGNANCY, *s.* तीक्ष्णता, तीव्रता, तिग्मता, उग्रता -त्वं, कटुता, मार्म्मिकत्वं.

POIGNANT, *a.* तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, उग्रः -ग्रा -ग्रं, कटुः -टुः -टु, मरुन्तुदः -दा -दं, मर्म्मस्पृक् *m. f. n.* (ग्), मर्म्मभेदी -दिनी -दि (न्), मार्म्मिकः -की -कं.

POINT, *s.* (Sharp end) अग्रं, शिखा, शिखरं, आणिः *m.*, आणिः *m.*, अंशुः *m.*, अग्रांशुः *m.*, मुखं, कण्टकः, शलाका; 'of a needle,' सूच्यग्रं, कण्टकः; 'of the foot,' पादाग्रं, प्रपदं.—(Of a blade, &c.) धारा -रं, कोटिः *f.*, अग्रिः *f.*, पालिः -लीं *f.* -लिका, अणिः *m.*, शिखरं, अग्रं; 'a sharp point,' तीक्ष्णाग्रं.—(Of land, head-land) भूमिनासिका, उदग्रभूमिः *f.*, उदग्रस्थलं, भूशलाका.—(Sting, wit of an epigram, &c.) दंशः, उपदंशः, मर्म्म *n.* (न्), रसः, रहस्यं.—(Of space or time) अणुः *m.*, परमाणुः *m.*, सन्धिः *m.*—(Of the compass) दिक् *f.* (श्), दिशा, ककुभ् *f.*, काष्ठा, आशा, हरित् *f.*, दिग्विभागः; 'intermediate point,' विदिक् *f.*, प्रदिक् *f.*, अपदिशं.—(Dot) बिन्दुः *m.*, शून्यं, विप्रुट् *f.* (ष्), अङ्कः, चिह्नं.—(Mark in punctuation) चिह्नं, विश्रामचिह्नं, विरामचिह्नं.—(Particular subject, case under discussion) विषयः, अर्थः, पदं, स्थलं, आस्पदं, प्रकरणं, प्रसङ्गः, प्रस्तावः; 'being to the point,' प्रासङ्गिकः -की -कं, प्रास्ताविकः &c.; 'on this point at least,' अत्र तावत्.—(Aim, object) लक्ष्यं, लक्ष्यं, अर्थः, आशयः, उद्देशः, अभिप्रायः.—(Characteristic mark, as of a horse, &c.) लक्षणं, विशेषणं, गुणः.—(Degree, pitch) पर्य्यन्तं, अन्तः -न्तं, परिमाणं, पदं, आस्पदं, पर्य्यायः, क्रमः; 'highest point,' उच्चमपदं, परमपदं, परमास्पदं; 'to such a point,' एतावत्पर्य्यन्तं, एतावत्; 'to what point?' किम्पर्य्यन्तं, कियत्पर्य्यन्तं; 'to that point,' तदन्तं, तत्पर्य्यन्तं.—(Critical moment) सन्धिः *m.*, कालसन्धिः *m.*, समयः; 'on the point of, at the point of,' उद्यतः -ता -तं, उद्युक्तः -क्ता -क्तं, उन्मुखः -खा -खं, or expressed by the desiderative or other forms of adjective, thus, 'on the point of dying, at the point of death,' मरणोन्मुखः -खा -खं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, आसन्नमरणः -णा -णं, मृतप्रायः -या -यं, मृतकल्पः -ल्पा -ल्पं, मृत्यावस्थः -स्था -स्थं; 'on the point of going,' गमनोद्यतः -ता -तं, गन्तुमुद्यतः &c., गमनोन्मुखः &c., जिगमिषुः -षुः -षु, गन्तुकामः -मा -मं; 'on the point of bringing forth,' प्रसवोन्मुखी, आसन्नप्रसवा, आसन्नप्रसवकाला; 'he is on the point of rising,' उत्थातुमुद्यतोऽस्ति, उत्थातुमिच्छति.—(Point of view) दृष्टिः *f.*—(Punctilio, nicety) सूक्ष्मता, सौक्ष्म्यं.

To POINT, *v. a.* (Sharpen to a point) तीक्ष्णाग्रीकृ, तीक्ष्णीकृ, तीक्ष्णधारीकृ, शिताग्रीकृ, निशो (c. 4. -श्यति -शातुं), तिज् (c. 10. तेजयति -यितुं), सायीकृ.—(Direct towards, aim at) लक्षीकृ, उद्दिश्, समुद्दिश्, निर्दिश्, अभिसन्धा, लक्ष्; 'pointing to,' उद्दिश्य.—(Punctuate) विश्रामचिह्नानि or विरामचिह्नानि अङ्क् (c. 10. अङ्कयति -यितुं) or कृ.—(Point out, show by the finger, &c.) प्रदिश्

(c. 6. -दिशति -देष्टुं), निर्दिश्, उद्दिश्, विनिर्दिश्, सन्दिश्, आदिश्, अङ्गुल्या निर्दिश् or प्रदिश् or दृश् (c. 10. दर्शयति -यितुं) or प्रदृश् or सूच् (c. 10. सूचयति -यितुं) or संसूच्; point out the way,' मार्गम् आदेशय.

To POINT, *v. n.* (With the finger) अङ्गुलिनिर्देशं कृ, अङ्गुल्या निर्दिश् or प्रदिश्. *See* the last.—(Have direction or aim) उद्दिश्, उद्देशकः -का -कं भू, उद्देशं कृ, लक्ष्यीकृ or expressed by दिश्य or मुख or अग्र in comp.; as, 'to point towards the south,' दक्षिणदिश्यः -श्या -श्यं भू, दक्षिणमुखः &c. भू, दक्षिणाग्रः &c. भू.

POINT-BLANK, *a.* or *adv.* समसूत्रः -त्रा -त्रं, एकसूत्रः &c., समरेखः -खा -खं, क्षितिजैकसूत्रः &c., समसूत्रेण, एकसूत्रेण.

POINTED, *p. p.* or *a.* (Have a sharp end) तीक्ष्णाग्रः -ग्रा -ग्रं, शिताग्रः &c., साग्रः &c., तीक्ष्णशिखः -खा -खं, ज्ञातशिखः &c., अंशुमान् -मती -मत् (न्), तीक्ष्णांशुमान् &c., शिखावलः -ला -लं, शिखाधरः -रा -रं, शितः -ता -तं, निशितः &c., शैक्ष्यः -क्ष्या -क्ष्यं.—(Epigrammatical, keen, witty) रसिकः -का -कं, सरसः -सा -सं, रसवान् &c., मार्मिकः -की -कं, मर्मैस्पृक् *m. f. n.* (ञ्), अरून्तुदः -दा -दं, दंशकः -का -कं; 'pointed words,' वागसिः *f.*—(Pointed out) निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः &c., प्रदिष्टः &c., सूचितः -ता -तं, अङ्गुलिनिर्दिष्टः &c.

POINTEDLY, *adv.* अनुक्तमुद्दिश्य, उद्दिश्य, उद्देशपूर्वं, सममर्मभेदं.

POINTEDNESS, *s.* रसिकता -त्वं, सरसता, दंशकता -त्वं, मार्मिकत्वं.

POINTER, *s.* निर्देशकः, देशकः, प्रदेशकः, निर्देष्टा *m.* (ष्टृ), निदेष्टा *m.*, निर्देशी *m.* (न्), प्रदेशी *m.*, देशी *m.*, दर्शकः, प्रदर्शकः, सूचकः.—(Dog) वनपक्षिनिर्देशको मृगयाकुक्कुरः, वन्यपक्षिनिर्देशने शिक्षितो मृगयाश्वा *m.* (न्).

POINTING, *s.* निर्देशः -शनं, अङ्गुलिनिर्देशः, निदेशः, सूचनं, अङ्गुलिप्रदर्शनं.

POINTLESS, *a.* (Having no point or edge) निरग्रः -ग्रा -ग्रं, अग्रहीनः -ना -नं, धाराहीनः &c., अतीक्ष्णः -क्ष्णा -क्ष्णं.—(Destitute of wit) विरसः -सा -सं, अरसिकः -का -कं, रसहीनः &c., फल्गुः -ल्गुः -ल्गु.

POISE, *s.* (Weight) भारः, तुला, तोलः.—(Balance, equilibrium) भारतुल्यता, भारसमता, भारसाम्यं, समतौल्यं, समतोलः, तुल्यता, तुलासाम्यं.

To POISE, *v. a.* समभारीकृ, तुल्यभारीकृ, समतोलीकृ, समीकृ, तुल्यीकृ, तुल् (c. 10. तुलयति -यितुं).

POISON, *s.* विषं, गरं-रः, गरलं, गरदं, भृगरं, जीवनाधातं, जाङ्गुलं, जाङ्गुलं, हलाहलं -लः, हालाहलं, हालहालं, हालहलं, हलहलं, हाहलं -लः, कालकूटं -टः, कलाकुलं, काकोलं -लः, सौराष्ट्रिकं, सौराष्ट्रिकं, दारदः, प्रदीपनः, ब्रह्मपुत्रः, शौक्लिकेयः, वत्सनाभः, धूलकं, निदः, क्ष्वेडः; 'administering poison,' विषप्रयोगः, विषविधानं, विषदानं; 'taking poison,' विषभक्षणं; 'worthy of death by poison,' विष्यः -ष्या -ष्यं; 'yielding poison,' विषदः -दा -दं; 'removing or curing poison,' विषघ्नः -घ्नी -घ्नं, विषनाशी -शिनी -शि (न्), विषघाती &c., विषहरः -री -रं, विषापहः -हा -हं, गरघ्नः &c.; 'art of curing poisons,' विषविद्या, विषनाशनविद्या; 'curer of poisons,' विषवैद्यः, विषभिषक् *m.* (ज्), जाङ्गुलिकः, जाङ्गुलिः *m.*, गारुडिकः; 'charm against poison,' गारुडः -डं.

To POISON, *v. a.* (Infect with poison) विषाक्तं -क्तां कृ, विषयुक्तं -क्तां कृ, विषेण दुष् (c. 10. दूषयति -यितुं), विषदिग्धं -ग्धां कृ.—(Administer poison, kill by it) विषं दा, विषप्रयोगं कृ, विषेण हन् or मृ in caus., विषदानेन हन्.—(Poison one's self, take or eat poison) विषं भुज् or भक्ष् or खाद्, विषेण or विषप्रयोगेण आत्मानं हन्.—(Corrupt, taint) दुष्, सन्दुष्, लिप्, नश् in caus.

POISONED, *p. p.* or *a.* (Infected with poison) विषाक्तः -क्ता -क्तं, विषदिग्धः -ग्धा -ग्धं, विषलिप्तः -प्ता -प्तं, विषदूषितः -ता -तं; 'a poisoned arrow,' दिग्धः, लिप्तकः.—(Killed by poison) विषमारितः -ता -तं, विषनाशितः &c.

POISONER, *s.* विषदः, विषदायी *m.* (न्), गरदः, गरदायी *m.*, तीक्ष्णरसदायी.

POISONING, *s.* विषप्रयोगः, विषदानं, विषविधानं, विषेण मारणं.

POISONOUS, *a.* विषालुः -लुः -लु, गरली -लिनी -लि (न्), विषमयः -यी -यं, सविषः -षा -षं, विषधरः -रा -रं, विषगुणकः -का -कं, विषधर्मकः -का -कं, विषदः -दा -दं, सगरः -रा -रं, तीक्ष्णविषः -षा -षं, विषपूर्णः -र्णा -र्णं, विषभुजः -जा -जं, दूषकः -का -कं, विष in comp.; as, 'poisonous snake,' विषभुजङ्गः.

POISONOUSLY, *adv.* सविषं, सगरं, सगरलं, सदूषणं, दूषकप्रकारेण.

POISONOUSNESS, *s.* विषालुता, सविषत्वं, सगरत्वं, विषपूर्णता, दूषकत्वं.

POITREL, *s.* उरस्त्राणं, वक्षस्त्राणं, उरश्छदः, वक्षस्कं.

To POKE, *v. a.* (Thrush, push against, stick) तड् (c. 10. ताडयति -यितुं), दण्डादि प्रसारयित्वा तड् or आहन् (c. 2. -हन्ति -न्तुं) or अभ्याहन् or प्रहृ (c. 1. -हरति -हर्तुं), प्रसृ (c. 10. -सारयति -यितुं), प्रविश् (c. 10. -वेशयति -यितुं), ताडनं कृ, आघातं कृ, प्रहारं कृ.—(Search for, grope for, with a long instrument) दण्डादि प्रसारयित्वा परामृश् (c. 6. -मृशति- ष्टुं) or अन्विष् (c. 4. -इष्यति -इषितुं).

To POKE, *v. n.* (Grope) तमः प्रविश्य परामृश् or परिमृश्, अन्धकारे दण्डादि प्रसारयित्वा अन्विष् or निरूप्.—(Dawdle, trifle) विलम्बेन किञ्चित् कृ, विलम्ब्. *See To* PEDDLE.

POKE, *s.* ताडनं, आघातः, प्रहारः, अभिघातः, आहतिः *f.*, दण्डप्रसारणं.

POKER, *s.* शलाका, लोहशलाका, अङ्गारचालनशलाका, अङ्गारचालकः, अङ्गारचालकदण्डः, अङ्गारोत्थापकः.

POLAR, *a.* ध्रुवसम्बन्धी -न्धिनी -न्धि (न्), मेरुसम्बन्धी &c., ध्रुवविषयकः -का -कं, ध्रुवस्थः -स्था -स्थं, केन्द्रस्थः &c., ध्रुवनिकटस्थः &c.; 'polar star,' ध्रुवः, औत्तानपादिः *m.*, उत्तानपादजः, नक्षत्रनेमिः *m.*, ध्रुतिकरः, ज्योतीरथः; 'polar circle,' कदम्बभमण्डलं; 'polar distance,' ध्रुवज्याचापांशः.

POLARITY, *s.* ध्रुवाभिसरणशीलता, ध्रुवाभिगमनशीलता, ध्रुवाभिजिगमिषा, ध्रुवाभिमुखशीलता, ध्रुवाभिमुखता, केन्द्राभिमुखता.

POLARY, *a.* ध्रुवाभिसरणशीलः -ला -लं, ध्रुवाभिगमनशीलः &c., ध्रुवाभिजिगमिषुः -षुः -षु, ध्रुवाभिगामी -मिनी -मि (न्), ध्रुवाभिसारी &c., ध्रुवाभिमुखशीलः &c.

POLE, *s.* (Long piece of wood) दण्डः -ण्डं, यष्टिः *m. f.*, दीर्घकाष्ठं, काष्ठं; 'for carrying burdens,' भारयष्टिः *m. f.*, विहङ्गिका; 'raised on a pole,' उद्गतः -ता -तं.—(Of a carriage) धूः *f.* (धुर्), धुरा, धूर्वी, कूबरः, युगन्धरः, यानमुखं.—(Of a plough) ईषा, ईशा, हलदण्डः, लाङ्गलदण्डः.—(The measure) दण्डः.—(In astronomy) ध्रुवः, मेरुः *m.*, केन्द्रं; 'north pole,' उत्तरध्रुवः, ध्रुवः, मेरुः *m.*, उत्तरार्धं; 'south pole,' दक्षिणध्रुवः, कुमेरुः *m.*, दक्षिणार्धं; 'elevation of the pole,' ध्रुवोन्नतिः *f.*; 'pole of the ecliptic,' कदम्बः.

POLE-AXE, *s.* परशुः *m.*, कुठारः, दीर्घयष्टिलग्नपरशुः *m.*, दीर्घटङ्कः.

POLE-CAT, *s.* पूतिशारिका, लोमशमार्जारः, गन्धमार्जारः, गन्धोनुः *m.*, पूतिका, जाहकः, मृगचैटकः, कस्तूरीमृगः, गाधसह्योची *m.* (न्), खट्टाशः -शी.

POLEMIC, POLEMICAL, *a.* विवादी -दिनी -दि (न्), विवादात्मकः -का -कं, वादानुवादात्मकः -का -कं, वादानुवादैकः -का -कं, वादानुवादी &c.,

वादप्रतिवादी &c., विसंवादी &c., विप्रतिपत्तिकः -का -कं.

Polemic, polemical, *s.* वादानुवादशीलः, वादानुवादप्रियः, वादानुवादकुशलः, विवादप्रियः, विवादकुशलः, वादरतः, वादानुवादकारी *m.* (न्), वादविवादकर्त्ता *m.* (र्तृ).

Polemics, *s.* धर्म्मविषयो वादानुवादः or विवादः or विसंवादः.

Pole-star, *s.* (Fabled as the son of Uttánapáda, and grandson of the first Manu) ध्रुवः, औत्तानपादिः *m.*, उत्तानपादजः. *See* Polar, *a.*

Police, *s.* (Government of a city or town) नगरव्यवस्था, नगरव्यवस्थितिः *f.*, नगरानुशासनं, नगरकार्य्यानुशासनं.—(Internal regulation of a kingdom) राष्ट्रानुशासनं, देशानुशासनं, देशकार्य्यानुशासनं, राष्ट्रव्यवस्था, देशव्यवस्था, राष्ट्रव्यवस्थितिः *f.*—(Body of police-officers) नगररक्षिणः *m. pl.*, नगररक्षकाः *m. pl.*, नगररक्षिपुरुषाः *m. pl.*, नगरपालाः *m. pl.*, नगरपालकाः *m. pl.*, नगररक्षिगणः, नगरपालगणः, नगरपालवर्गः; 'rural police,' ग्रामरक्षिणः *m. pl.*, ग्रामरक्षकाः *m. pl.*, ग्रामपालाः; 'highway police,' मार्गपालाः -लकाः, मार्गरक्षकाः *m. pl.*

Police-magistrate, *s.* दण्डनायकः, दण्डप्रणेता *m.* (तृ), दण्डाधिकारी *m.* (न्).

Police-man, police-officer, *s.* नगररक्षी *m.* (न्), नगररक्षकः, नगररक्षिपुरुषः, नगरपालः -लकः, आरक्षकः, राजपुरुषः.

Policy, *s.* (Art or manner of governing or managing public affairs) नीतिः *f.*, नीतिविद्या, नयः, नयनं, नयप्रयोगः, राजनीतिः *f.*, राजनयः, राज्यशासनरीतिः *f.*, राज्यनयनं, राज्यनयनरीतिः *f.*, राज्यनिर्व्वाहरीतिः *f.*, राज्यव्यवहारमार्गः, राज्यानुशासनमार्गः; 'good policy,' सुनीतिः *f.*, सुनयः; 'bad policy,' दुर्नीतिः *f.*, दुर्नीतं, दुर्नयः, दुर्नीतिः &c.—(Prudence or skill in the management of public affairs) नीतिकौशल्यं, नीतिकुशलता, नीतिचातुर्य्यं, राज्यनयनयुक्तिः *f.*, राज्यकरणयुक्तिः *f.*, राज्यशासनयुक्तिः *f.*, राज्यचातुर्य्यं, राज्यकौशल्यं, नीतिज्ञता.—(In the management of affairs generally, prudence) व्यवहारयुक्तिः *f.*, व्यवहारचातुर्य्यं, व्यवहारदक्षता, व्यवहारकौशल्यं, कर्म्मनिर्व्वाहयुक्तिः *f.*; 'good policy,' सुयुक्तिः *f.*; 'prudential policy,' समीक्ष्यकारित्वं, सुविमृश्यकारित्वं, समीक्षापुरःसरं उपायप्रयोगः.

To polish, *v. a.* (Make smooth and glossy) तिज् (c. 10. तेजयति -यितुं), परिष्कृ, निशा (c. 10. निशापयति -यितुं, rt. तप्), कान्तिं दा, स्निग्धीकृ, श्लक्ष्णीकृ, मृज् (c. 2. मार्ष्टि -ष्टुं), प्रमृज्.—(Refine, make polite) परिष्कृ, संस्कृ, शिष्टीकृ, सभ्यं -भ्यां कृ, सभ्यतां or शिष्टतां जन् (c. 10. जनयति -यितुं) or दा.

Polish, *s.* (Glossiness) कान्तिः *f.*, शोभा, स्निग्धता, स्नैग्ध्यं, श्लक्ष्णता.—(Finish) परिष्कारः, परिष्कृतिः *f.*, संस्कारः, संस्कृतिः *f.*—(Refinement) शिष्टता, परिष्कारः, सभ्यता, सभाचातुर्य्यं, सुजनता, सौजन्यं, शिष्टाचारसम्पन्नता, सभ्याचारसम्पन्नता.

Polished, *p. p.* (Made glossy) परिष्कृतः -ता -तं, तेजितः -ता -तं, निशप्तः -ता -तं, स्निग्धीकृतः &c., श्लक्ष्णीकृतः &c., मृष्टः -ष्टा -ष्टं, प्रमृष्टः &c., निशितः -ता -तं, निशातः -ता -तं, उज्ज्वलितः -ता -तं—(Refined) परिष्कृतः -ता -तं, संस्कृतः &c., शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, शिष्टाचारसम्पन्नः -न्ना -न्नं, सभ्याचारसम्पन्नः &c., अग्राम्यः -म्या -म्यं.

Polisher, *s.* परिष्कर्त्ता *m.* (र्तृ), परिष्कारकः, तेजकः, कान्तिदः, कान्तिदायकः, निर्णेजकः, मार्जकः, सम्मार्जकः.

Polishing, *s.* परिष्कारः, परिष्कृतिः *f.*, संस्कारः, तेजनं, श्लक्ष्णीकरणं.

Polite, *a.* (Refined in manners) शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, शिष्टाचारी -रिणी -रि (न्), सभ्याचारी &c., सभ्यशीलः -ला -लं, शिष्टाचारसम्पन्नः -न्ना -न्नं, सभ्याचारसम्पन्नः &c., सुजनः -ना -नं, विनीतः -ता -तं, विनयवान् -वती -वत् (न्), सविनयः -या -यं, अग्राम्यः -म्या -म्यं.—(Courteous, obliging) सुशीलः -ला -लं, आदरशीलः &c., वन्दारुः -रुः -रु, दक्षिणः -णा -णं, अनुनयी &c., सानुनयः -या -यं, अनुरोधी &c., अनुकूलः -ला -लं, प्रियंवदः -दा -दं, अभिवादकः -का -कं, शक्रुः -क्रुः -क्रु, सत्कारी &c.

Politely, *adv.* सभ्यवत्, शिष्टवत्, विनीतवत्, सविनयं, सानुनयं, सुशीलवत्, सदाक्षिण्यं, सभ्याचारानुसारेण, शिष्टाचारानुसारात्.

Politeness, *s.* (Refinement of manners) शिष्टता, सभ्यता, सभ्यशीलता, शिष्टाचारित्वं, सभ्याचारित्वं, विनीतता -त्वं, विनयः, सुजनता, सौजन्यं, अग्राम्यता.—(Courteousness) सुशीलता, आदरशीलता, दाक्षिण्यं, अनुनयः, आनन्दनं, अनुरोधः, अनुकूलता.—(Polite behaviour) शिष्टाचारः, शिष्टाचरणं, सभ्याचारः, सभ्याचरणं.

Politic, *a.* (Skilful in managing public affairs) नीतिकुशलः -ला -लं, नीतिज्ञः -ज्ञा -ज्ञं, नीतिविज्ञाज्ञः -ज्ञा -ज्ञं, नीतिविशारदः -दा -दं, नीतिदक्षः -क्षा -क्षं, नीतिमान् -मती -मत् (न्), नीतिविद् *m. f. n.*, नयविद्, नीतिचतुरः -रा -रं.—(Skilful in the management of affairs generally) व्यवहारकुशलः -ला -लं, व्यवहारदक्षः -क्षा -क्षं, कर्म्मनिर्व्वाहकुशलः -ला -लं, कुशलः -ला -लं, विचक्षणः -णा -णं, निपुणः -णा -णं.—(Wise, well devised, adapted to its end) सुनीतः -ता -तं, सुयुक्तः -क्ता -क्तं, सुप्रयुक्तः &c., सुघटितः &c., सम्यङ्नीतः &c., यौक्तिकः -की -कं, सुसमीक्ष्य or सुविमृश्य or सुसमीक्षापूर्व्वं कृतः -ता -तं, अर्थसम्पादकः -का -कं, अर्थसाधकः -का -कं, कार्य्यसाधकः &c., अर्थकरः -रा -री -रं, हितः -ता -तं.

Political, *a.* नीतिसम्बन्धी -न्धिनी &c., नीतिविद्यासम्बन्धी &c., राजनीतिसम्बन्धी &c., राज्यनयनसम्बन्धी &c., राज्यव्यवहारसम्बन्धी &c., नीतिविषयकः -का -कं, राजनीतिविषयः -या -यं, राजकीयः -या -यं, नीति or देश or राष्ट्र or राज्य in comp.; as, 'political lore,' नीतिविद्या, नीतिशास्त्रं; 'political rights,' देशाधिकारः, पौरजनाधिकारः.

Political economy, *s.* नीतिविद्या, देशपोषणविद्या, देशपालनविद्या, राष्ट्रपालनविद्या, राष्ट्रपोषणविद्या, राज्यव्यवस्थाविद्या, राज्यनिर्व्वाहविद्या, राज्यकर्म्मनयः -यनं.

Politically, *adv.* नीतिमपेक्ष्य, नीतिविद्यामपेक्ष्य, राज्यव्यवस्थामपेक्ष्य.

Politician, *s.* नीतिज्ञः, नीतिकुशलः, नीतिविद् *m.*, नीतिवेदी *m.* (न्), नीतिविशारदः, नीतिविज्ञाज्ञः, राजनीतिकुशलः, राजनीतिविशारदः, नयविशारदः.

Politics, *s.* (Science of government) नीतिः *f.*, नीतिविद्या, नयः, राजनीतिः *f.*, राजनीतिविद्या, नीतिशास्त्रं, राजनीतिशास्त्रं, राज्यनयनविद्या, राज्यशासनविद्या.—(Political or public affairs) राज्यविषयाः *n. pl.*, राज्यकर्म्माणि *n. pl.*, राज्यकार्य्याणि *n. pl.*, देशव्यवहारः, राष्ट्रव्यवहारः.

Polity, *s.* (System of government) राज्यनीतिः *f.*, राज्यरीतिः *f.*, राज्यनीतिरूपं, राज्यव्यवस्था, राज्यस्थितिः *f.*, राज्यनियमः, राज्यविधिः *m.*, राज्यप्रवृत्तिः *f.*, राज्यकरणनियमः, नीतिः *f.*, दण्डनीतिः *f.*

Poll, *s.* (Head) मुण्डः -ण्डं -ण्डकं, शिरस् *n.*, शीर्षं, मस्तकः -कं.—(Entry of the names of electors) नामाभिलेखनं, नामलिखनं, नामलेखनं, नामारोपणं, नामसमारोपणं.—(List of names) नामावलिः -लीं *f.*, नामपरिसंख्या.

To poll, *v. a.* (Cut off the hair) केशान् छिद् or लू or लावय्.—(Enter names of electors, &c., in a list) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. or आरुह् or अभिलिख् or लिख्

POLLARD, *s.* छिन्नाग्रवृक्षः, छिन्नाग्रद्रुमः, लूनाग्रवृक्षः, लूनाग्रतरुः *m.*

POLLED, *p. p.* (Lopped) छिन्नः -न्ना -न्नं, लूनः -ना -नं.—(Registered as the names of voters) नामावलिपत्रारोपितः -ता -तं. -भिलिखितः -ता -तं.

POLLEN, *s.* (Of a flower) परागः, रजस् *n.*, पुष्परजस् *n.*, पुष्पंरणुः *m.*, पांशुः *m.*; 'laden with pollen,' परागवान् -वती -वत् (त्), परागी -गिणी -गि (न्).

To POLLUTE, *v. a.* दुष् (c. 10. दूषयति -यितुं), सन्दुष्, प्रतिदुष्, मलिनीकृ, मलिन (nom. मलिनयति -यितुं), कलुषीकृ, कलुष (nom. कलुषयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, दिह् (c. 2. देग्धि -ग्धुं), मलेन दुष् or लिप् or अङ्क् (c. 7. अनक्ति, अंक्तुं), कलङ्क (nom. कलङ्कयति -यितुं), ममलीकृ, अमेध्येन लिप्, अमेध्यीकृ, मलीमसीकृ, अपवित्रीकृ.—(Taint with guilt) दुष्, भंश् (c. 10. भंशयति -यितुं), भष्टीकृ, भष्टं -ष्टां कृ.—(A virgin) कन्यां दुष् or धृष् (c. 10. धर्षयति -यितुं).

POLLUTED, *p. p.* दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं, मलदूषितः &c., मलिनितः -ता -तं, मललिप्तः -प्ता -प्तं, लिप्तः &c., अमेध्यलिप्तः &c., अमेध्याक्तः -क्ता -क्तं, कलुषितः -ता -तं, कलुषीकृतः &c., मलीमसः -सा -सं, ममलः -ला -लं, मलवान् -वती -वत् (त्), कलङ्कितः -ता -तं.—(As a virgin) दूषिता, भष्टा, धर्षिता

POLLUTER, *s.* दूषकः, दूषणः, कलुषकारी *m.* (न्), मलावहः, अशौचकृत्

POLLUTION, *s.* (The act) दूषणं, मलदूषणं, मललेपनं, मलिनीकरणं, कलुषीकरणं, अमेध्यदूषणं, अमेध्यलेपः, अपवित्रीकरणं.—(The state) मलिनत्वं, मालिन्यं, ममलता -त्वं, अमेध्यता -त्वं, मलदूषितत्वं, अमेध्यलिप्तता, अमेध्याक्तत्वं, अशुचित्वं, अशौचं -चत्वं, अपवित्रता -त्वं, दुष्टता -त्वं.—(Nocturnal) स्वप्नदोषः, स्वप्नावस्था, स्वप्नमधे शुक्रपातः.

POLTROON, *s.* कापुरुषः, कुपुरुषः, क्लीबः, कातरः, हतकः, कृपणः, भीरुजनः, निर्वीर्यः, धैर्यहीनः, शौर्यहीनः, अधीरः.

POLTROONERY, *s.* क्लीबता, कापुरुषत्वं, अपौरुषं, कातरता, भीरुता.

POLYANDROUS, POLYANDRIST, *s.* बहुभर्तृका, बहुपतिका, अनेकभर्तृका.

POLYANDRY, *s.* बहुभर्तृत्वं, बहुभर्तृधारणं, अनेकपतिधारणं.

POLYCHORD, *a.* बहुतन्त्री -न्त्रिणी -न्त्रि (न्), बहुतन्तुः -न्तुः -न्तु, अनेकतन्त्री &c.

POLYGAMIST, *s.* (Practiser of polygamy) बहुभार्यः, अनेकभार्यः, बहुपत्नीकः, दारी *m.* (न्), अनेकस्त्रीकः.—(Defender of it) बहुपत्नीवादी *m.* (न्).

POLYGAMY, *s.* बहुपत्नीत्वं, बहुभार्यत्वं -ता, अनेकभार्यता, सापत्न्यं.

POLYGENOUS, *a.* बहुविधः -धा -धं, अनेकविधः &c., बहुप्रकारः -रा -रं.

POLYGLOT, *a.* बहुभाषः -षा -षं, अनेकभाषः -षा -षं.

POLYGLOT, *s.* बहुभाषग्रन्थः, अनेकभाषग्रन्थः, बहुभाषपुस्तकं.

POLYGON, *s.* बहुकोणः -णी, बहुभुजः, बह्वस्रं -स्री, अनेकास्रं -स्री, बहुकोणाकृतिः *f.*, बह्वस्राकृतिः *f.*, बहुकोणा मूर्तिः.

POLYGONAL, POLYGONOUS, *a.* बहुकोणः -णा -णं, बहुभुजः -जा -जं, बह्वस्रः -स्रा -स्रं, अनेकास्रः -स्रा -स्रं.

POLYMATHY, *s.* बहुविद्याज्ञानं, ए.नेकविद्याज्ञानं, बहुशास्त्रज्ञानं.

POLYPETALOUS, *a.* बहुदलः -ला -लं, अनेकदलः &c., बहुदली -लिनी &c.

POLYPHAGOUS, *a.* बहुभक्षः -क्षा -क्षं, बहुखादकः -का -कं, बह्वाशी -शिनी &c.

POLYPHONOUS, *a.* बहुस्वरः -रा -रं, बहुस्वनः -ना -नं, बहुध्वनिः -निः -नि.

POLYPUS, *s.* बहुपादः, बहुपाद् *m.*, अनेकपाद्, बहुमूलः, अनेकमूलः

POLYSPERMOUS, *a.* बहुबीजः -जा -जं, प्रचुरबीज, &c., अनेकबीजः &c.

POLYSYLLABIC, *a.* बह्वक्षरः -रा -रं, अनेकाक्षरः &c., बह्वक्षरी -रिणी -रि (न्).

POLYSYLLABIC, *s.* बह्वक्षरं, बह्वक्षरशब्दः, अनेकाक्षरशब्दः.

POLYTHEISM, *s.* बहुदेवमतं, बहुदेवपदः, अनेकदेवमतं, अनेकवादः.

POLYTHEIST, *s.* बहुदेवमतावलम्बी *m.* (न्), अनेकदेववादी *m.*, अनेकवादी *m.*

POMANDER, *s.* भावितं, वासितं, वासितचूर्णं, सुगन्धिचूर्णं.

POMATUM, POMADE, *s.* विलेपनं, सुगन्धिलेपः, गात्रानुलेपनी, यज्ञकर्दमः.

POMEGRANATE, *s.* (The tree) दाडिमः -मी, दाडिमः, दालिमः, डालिमः, करकः, रक्तबीजः, शुकवल्लभः, फलशाडवः, मणिबीजः, मधुबीजः, सत्फलः, कुचफलः, सुनीलः, पिण्डीरः, नीरसः.—(Its fruit) दाडिमं, दालिमं, दाडिमफलं.

POMMEL, *s.* (Knob) पिण्डः, गण्डः, गुल्मः, आभोगः.—(Of a saddle) पर्य्याणपिण्डः, पर्य्याणवहिःस्थपिण्डः, पर्य्याणगुल्मः.

To POMMEL, *v. a.* तड् (c. 10. ताडयति -यितुं), चेत्राघातं कृ, दण्डाघातं कृ.

POMP, *s.* (Procession) यात्रा, यात्राप्रसङ्गः.—(Show) आडम्बरं, ऐश्वर्य्यं, शोभा, प्रतापः, अतिप्रतापः, अतिशोभा, दम्भार्थं शोभा or तेजस् *n.*, चमत्कारः, कौतुकं. *See* PARADE, PAGEANTRY.

POMPOUS, *a.* (Displaying pomp, showy) महाप्रतापः -पा -पं, अतिप्रतापी -पिनी -पि (न्), अतिशोभनः -ना -नं, आडम्बरी &c., कौतुकी &c.—(Ostentatious) दाम्भिकः -की -कं, दम्भी &c., दम्भार्थकः -का -कं, साटोपः -पा -पं, अतिगर्व्वितः -ता -तं, दर्पाध्मातः &c., गर्व्वितः &c., गर्व्वितवाक्यः -क्या -क्यं, विकत्थनः -ना -नं.

POMPOUSLY, *adv.* (Magnificently) अतिप्रतापेन, अतिशोभानापूर्व्वं, साडम्बरं.—(Ostentatiously) दम्भार्थं, सदम्भं, दम्भपूर्व्वं, सगर्व्वं, गर्व्वितप्रकारेण, लोकदर्शनार्थं, विकत्थनपूर्व्वं, साटोपं.

POMPOUSNESS, *s.* (Magnificence) ऐश्वर्य्यं, सप्रतापत्वं. *See* POMP.—(Ostentatiousness) दम्भः, दाम्भिकत्वं, साटोपत्वं, गर्व्वितत्वं, विकत्था, दर्पाध्मातता.

POND, *s.* तडागः, जलाशयः, जलाधारः, सरस् *n.*, ह्रदः, खातं, सरोवरः -रं, क्रीडासरोवरः, वापी -पिः *f.*, कासारः, पुष्करिणी, सरसी, पद्माकरः, मीनगोधिका; 'a natural pond,' अखातं, दैवखातकं; 'an oblong pond,' दीर्घिका.

To PONDER, *v. a.* and *n.* मनसा विचर् (c. 10. -चारयति -यितुं) or विगण् (c. 10. -गणयति -गितुं), चिन्त् (c. 10. चिन्तयति -यितुं), विचिन्, सञ्चिन्, ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, अभिध्यै, सन्ध्यै, भू (c. 10. भावयति -यितुं), विभू, सम्भू, विमृश् (c. 6. मृशति -मर्ष्टुं), परिमृश्, चिन्तकं (c. 10. -तकंयति -यितुं), अनुतर्क्.

PONDERABLE, *a.* (That may be weighed) तुलायोग्यः -ग्या -ग्यं, तुलनीयः -या -यं.—(To be pondered) चिन्यः -न्या -न्यं, चिन्तनीयः -या -यं.

PONDERATION, *s.* (Act of weighing) तुलाधारणं.—(Act of pondering) सुविचारणं -णा, सुचिन्तनं, विगणनं -ना, सम्भावना

PONDERED, *p. p.* चिन्तितः -ता -तं, सुविचारितः &c., विगणितः &c., सुचिन्तितः &c.

PONDEROSITY *s.* भारित्वं, सभारत्वं, अतिभारित्वं, गुरुता, अतिगुरुता -त्वं, गरिमा *m.* (न्), भारवत्त्वं.

PONDEROUS, *a.* भारी -रिणी -रि (न्), अतिभारी &c., सभारः -रा -रं, भारवान् -वती -वत् (त्), गुरुः -रुी -रु, अतिगुरुः &c.

PONDEROUSLY, *adv.* अतिभारेण, सभारेण, सभारं, सगौरवं, अतिगुरु.

PONIARD, *a.* कट्टारः, कृपाणी, शुङ्गः *m.*, छुरिका, असिपुत्रिका, कर्त्तरी.

To PONIARD, *v. a.* कट्टारेण व्यध् (c. 4. विध्यति -द्धुं), छुर् (c. 6. लुरति -रितुं).

PONTAGE, *s.* सेतुकरः, सेतुशुल्कः -ल्कं, सेतुदेयं.

PONTIFF, *s.* प्रधानधर्म्माध्यक्षः, प्रधानधर्म्माधिकारी *m.* (न्), मुख्यधर्म्माध्यक्षः, महाधर्म्माध्यक्षः, महाधर्म्माधिकारी *m.* (न्), प्रधानयाजकः, मुख्यपुरोहितः, महायाजकः.

PONTIFICAL, *a.* प्रधानधर्म्माध्यक्षसम्बन्धी -न्धिनी &c., प्रधानयाजकीयः -या -यं.

PONTIFICATE, *s.* प्रधानधर्म्माध्यक्षस्य पदं or अधिकारः, धर्म्माध्यक्षता -त्वं.

PONTOON, *s.* सेतुबन्धने प्रयुक्तम् तरालुः or तरान्धुः; 'bridge,' तरालुबद्धसेतुः.

PONY, *s.* क्षुद्रघोटकः, क्षुद्राश्वः, क्षुद्रशरीरी घोटकः or अश्वः.

POOL, *s.* तडागः, जलाशयः, जलाधारः, पल्वलं, कुण्डं, सरस् *n.*, ह्रदः, कासारः, पुष्करिणी, निपानं, परिवापः, कूपं.

POOP, *s.* नावः पश्चिमभागः or पश्चाद्भागः, नौपृष्ठं, नौकापृष्ठं.

POOR, *a.* (Destitute of money or property) दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, अधनः -ना -नं, धनहीनः &c., अल्पधनः &c., निर्धनकः -का -कं, क्षीणधनः -ना -नं, धनशून्यः -न्या -न्यं, दीनः -ना -नं, अर्थहीनः &c., विभवहीनः &c., द्रव्यहीनः &c., द्रव्यशून्यः &c., विभवहीनः &c., अल्पद्रव्यः -व्या -व्यं, निःस्वः -स्वा -स्वं, गतार्थः -र्था -र्थं, दुर्गतः -ता -तं, अनर्थः -र्था -र्थं, निष्किञ्चनः -ना -नं, निःकाञ्चनः &c., अकाञ्चनः &c., निष्किञ्चनः &c., दारिद्र्यग्रस्तः -स्ता -स्तं, दरिद्रितः -ता -तं, दरिद्रायकः -का -कं, दरिद्रिता -त्री -तृ (तृ), कृपणः -णा -णं, अधन्यः -न्या -न्यं, दुराढ्यः -ढ्या -ढ्यं, किंधान् -धती -धत् (त्); 'to be poor,' दरिद्रा (c. 2. दरिद्राति -द्रितुं), दरिद्रीभू.—(Paltry, mean, inferior) तुच्छः -च्छा -च्छं, कृपणः -णा -णं, कुत्सितः -ता -तं, गर्हितः &c., निर्गुणः -णा -णं, विगुणः &c., क्षुद्रकः -का -कं, अधमः -मा -मं, जघन्यः -न्या -न्यं, खलः -ला -लं, तृणप्रायः -या -यं, अनुत्तमः -मा -मं, or expressed by दुर्, कु, कल्प, पाश, देशीय in comp.; as 'a poor poet,' कुकविः *m.*, कविकल्पः &c.; 'a poor grammarian,' कुवैयाकरणः, वैयाकरणपाशः; 'poor fare,' कदन्नं.—(Wretched, pitiable) दीनः -ना -नं, कृपणः -णा -णं, दुर्बलः -ला -लं, अनुकम्प्यः -म्प्या -म्प्यं, दुःस्थी -स्थिनी &c., दुःस्थान्वितः &c., घराकः -की -कं; 'poor wretch,' तपस्वी *m.* (न्), कृपणजनः.—(As soil) रूक्षः -क्षा -क्षं, ईरिणः -णा -णं.—(Word of endearment) प्रियः -या, दयितः -ता, वत्सः -त्सा.

POOR-HOUSE, POOR-ASYLUM, *s.* धर्म्मशाला, दरिद्रशाला, दरिद्रालयः -यं, दरिद्राश्रयः, दरिद्रगृहं.

POORLY, *a.* (Somewhat indisposed) अस्वस्थः -स्था -स्थं, ईषदस्वस्थः &c., ईषद्रोगी -गिणी -गि (न्). असुस्थः -स्था -स्थं, ईषद्रोगार्तः -र्ता -र्तं.

POORLY, *adv.* (Without wealth, in indigence) दारिद्र्येण, सदारिद्र्यं, दरिद्रवत्, निर्धनवत्, कृपणं, दीनं, सदैन्यं, धनेन विना.—(With little success) असिद्धियुक्तं, असिद्धा, सिद्धिं विना, फलं विना, निष्फलं.

POORNESS, *s.* (Want of money or property) दरिद्रता, दारिद्र्यं, दारिद्र्, निर्धनता -त्वं, अधनता, धनहीनता, धनशून्यता, दीनता, दैन्यं, अर्थहीनता, विभवहीनता. *See* POVERTY.—(Meanness, paltriness) तुच्छता, कृपणता, कार्पण्यं, निर्गुणता, खलता.—(Barrenness, unproductiveness) रूक्षता, शुष्कता -त्वं, निष्फलता, विफलता -त्वं, अफलदत्वं, अफलोत्पादकता.

POOR-SPIRITED, *a.* कृपणबुद्धिः -द्धिः -द्धि, दीनबुद्धिः &c., दीनमनस्कः -स्का -स्कं.

POP, *s.* (Sharp, sudden sound) स्फुटकारः, स्फुट् indecl., आकस्मिकशब्दः, पटशब्दः, क्वणितं, आकस्मिकध्वनिः *m.*, अकस्मात्क्वणितं.

To POP, *v. n.* (Enter suddenly) अकस्मात् प्रविश् (c. 6. -विशति -वेष्टुं) or निविश्, आकस्मिकध्वनिपूर्व्वं प्रविश्, आकस्मिकप्रवेशं कृ.—(Pop out) अकस्मात् or आकस्मिकध्वनिपूर्व्वं निर्गम् (c. 1. -गच्छति -गन्तुं) or निर्गतः -ता -तं भू; 'in and out,' गमनागमनं कृ.—(Make a sudden sound) स्फुट् शब्दं कृ, आकस्मिकध्वनिं कृ, अकस्मात् क्वण् (c. 1. क्वणति -णितुं) or ध्वन्, पट् शब्दं कृ.

To POP, *v. a.* (Cause to enter suddenly) अकस्मात् प्रविश् (c. 10. -वेशयति -यितुं) or निविश्, आकस्मिकध्वनिपूर्व्वं प्रविश्.—(Cause to issue suddenly, pop out) अकस्मात् निर्गम् (c. 10. -गमयति -यितुं) or निःसृ (c. 10. -सारयति -यितुं).

POP, *adv.* स्फुटकारेण, स्फुट् शब्देन, अकस्मात्, आकस्मिकध्वनिपूर्व्वं.

POPE, *s.* रोमीयधर्म्माध्यक्षः, रोमीयधर्म्माधिपतिः *m.*, महाधर्म्माध्यक्षः.

POPINJAY, *s.* शुकः, कीरः. *See* PARROT.

POPISH, *a.* रोमीयधर्म्माध्यक्षसम्बन्धी &c., रोमीयधर्म्मसम्बन्धी &c.

POPLAR, *s.* दीर्घवृक्षः, दीर्घतरुः *m.*, दीर्घपादपः, दीर्घद्रुमः.

POPPY, *s.* खसखसः; 'its juice,' खसखसरसः; 'seed,' लिक्षा, लिक्ष्या.

POPULACE, *s.* लोकाः, प्रजा, सामान्यलोकाः -काः *m. pl.*, साधारणलोकाः -काः *m. pl.*, प्राकृतलोकाः, प्राकृतजनाः *m. pl.*, अवरजनाः, अवरलोकाः *m. pl.*, अवरवर्गाः *m. pl.*

POPULAR, *a.* (Pertaining to the common people) लौकिकः -की -कं, साधारणलोकसम्बन्धी &c., सामान्यलोकसम्बन्धी &c., लोक or जन in comp.; 'courting popular favor,' लोकरञ्जनं, जनरञ्जनं, लोकानुरञ्जनं.—(Prevailing among the people, general) लौकिकः -की -कं, सार्व्वलौकिकः &c., लोकसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., लोकरूढः -ढा -ढं, रूढः &c., लोकसम्मतः -ता -तं, लोकमतः &c., लोक or जन in comp.; 'popular usage or custom,' लोकव्यवहारः, जनव्यवहारः, लोकाचारः, जनाचारः, लौकिकाचारः, लोकमर्य्यादा, जनमर्य्यादा, जनरीतिः *f.*, लौकिकरीतिः *f.*, लोकरीतिः *f.*, लोकप्रवाहः; 'popular rumour or report,' लोकप्रवादः, जनप्रवादः, लोकवादः, जनवादः, लोकवार्त्ता, जनवार्त्ता, जनश्रुतिः *f.*, जनरवः, लोकवदन्ती, जनवदन्ती; 'popular story,' लोककथा, जनकथा; 'popular accusation,' जनापवादः; 'odium,' जनविद्वेषः; 'tumult,' प्रकृतिक्षोभः; 'apprehension or acceptation,' लोकग्रहः; 'conforming to popular opinion,' लोकानुसरणं, लौकिकानुसरणं, गतानुगमनं; 'one who does so,' लोकानुसारी *m.* (न्), गतानुगतिकः.—(Suitable to common people) सामान्यलोकयोग्यः -ग्या -ग्यं, सामान्यलोकोपयोगी -गिनी -गि (न्), सर्व्वलोकयोग्यः &c., साधारणः -णी -णं.—(Pleasing to the people, enjoying the favor of people) लोकप्रियः -या -यं, सर्व्वलोकप्रियः &c., जनप्रियः &c., लोकानुकूलः -ला -लं, लोकग्राह्यः -ह्या -ह्यं, सर्व्वप्रियः &c., सकलप्रियः &c.

POPULARITY, *s.* लोकप्रीतिः *f.*, जनप्रीतिः *f.*, लोकप्रियता, सर्व्वलोकप्रीतिः *f.*, लोकानुकूल्यं, लोकानुकूलता, जनानुकूल्यं, जनानुकूलता, जनप्रियता, सर्व्वप्रियता. लोकानुरागः, जनानुरागः, लोकरञ्जनं, लोकसम्मानं, लोकग्राह्यता; 'desire of it,' लोकरञ्जनेच्छा, लोकानुरञ्जनैषा.

POPULARLY, *adv.* लोकतस्, लोकयोग्यं, लौकिकप्रकारेण, लोकरञ्जनार्थं.

To POPULATE, *v. a.* (People) सजनीकृ, सजनं -नां कृ, जनविशिष्टं -ष्टां कृ, वस् in caus.

To POPULATE, *v. n.* प्रजोत्पत्तिं कृ, प्रजोत्पादनं कृ, प्रजावृद्धिं कृ or जन्, प्रजन् (c. 4. -जायते -जनितुं), प्रजाम् उत्पद् (c. 10. -पादयति -यितुं).

POPULATION, *s.* प्रजा, प्रजासंख्या, जनसंख्या, लोकसंख्या, जनाः *m. pl.*, जनता, देशजनता, देशजनाः *m. pl.*, देशप्रजा, लोकाः, देशलोकाः.

POPULOUS, *a.* बहुप्रजः -जा -जं, बहुजनः -ना -नं, प्रचुरजनः &c., प्रचुरपुरुषः -षा -षं, प्रचुरप्रजः &c., जनसङ्घाधः -धा -धं, प्रजाबहुलः -ला -लं, जनपदायुतः -ता -तं, वासितः -ता -तं.

POPULOUSNESS, *s.* बहुप्रजत्वं, प्रजाप्राचुर्य्यं, प्रजाबाहुल्यं, बहुजनत्वं, जनबाहुल्यं, लोकबाहुल्यं, पुरुषप्राचुर्य्यं, पुरुषबाहुल्यं.

PORCELAIN, *s.* कौलालकं, मृण्मयभाण्डानि *n. pl.*, मृद्भाण्डानि *n. pl.*, मार्त्तिकं.

PORCH, *s.* देहली -लिः *f.*, द्वारमण्डपः -पं, वातायनं, द्वारप्रकोष्ठकं, निष्काशः; 'side seat of a portico,' मृगासनं; 'portico before a temple,' सभामण्डपः -पं.

PORCUPINE, *s.* शल्यकण्ठः, शल्य, -ल्यकः, शलाका, शल्लकी *m.* (न्), श्वाविद् *m.* (ध्), कण्टकागारः, सेधा; 'his quills,' शललं-ली, शलः-लं.

PORE, *s.* (Of the skin) रोमकूपः, तनुकूपः, रोमरन्ध्रं, लोमरन्ध्रं, लोमकूपः, स्वेदद्वारं, स्वेदमार्गः.—(Small spiracle) सूक्ष्मरन्ध्रं.

To PORE, *v. n.* (Read books with fixed application) बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां or अनन्यदृष्ट्या ग्रन्थान् अधी (c. 2. अधीते, अध्येतुं, rt. इ), अत्यभिनिवेशेन or अभिनिविष्टचेतसा or अनन्यमनसा ग्रन्थाध्ययनं कृ, अनन्यदृष्टिर् अध्ययनं कृ.

PORK, *s.* शूकरमांसं, सूकरमांसं, वराहमांसं, वाराहं, शौकरं.

PORKER, *s.* शूकरः, वराहः, पचनयोग्यः शूकरशावकः, क्षुद्रशूकरः.

POROUS, *a.* (Having interstices in the skin) रोमकूपयुक्तः -क्ता -क्तं, रोमकूपविशिष्टः -ष्टा -ष्टं, रोमकूपमयः -यी -यं, सरोमकूपः -पा -पं.—(Having minute spiracles) सूक्ष्मरन्ध्रयुक्तः -क्ता -क्तं, सूक्ष्मरन्ध्रपूर्णः -र्णा -र्णं, सूक्ष्मरन्ध्रविशिष्टः -ष्टा -ष्टं, सरन्ध्रः -न्ध्रा -न्ध्रं.—(Having interstices for exudation) विरलावयवकः-का-कं, शिथिलावयवकः &c., द्रावकावयवकः &c., स्वेदमार्गविशिष्टः -ष्टा -ष्टं.

POROUSNESS, POROSITY, *s.* सरोमकूपत्वं, रोमकूपपूर्णता, सूक्ष्मरन्ध्रपूर्णता, बहुरन्ध्रपूर्णता, सूक्ष्मरन्ध्रबाहुल्यं, सरन्ध्रता, विरलावयवत्वं, शिथिलावयवत्वं, द्रावकावयवत्वं.

PORPOISE, *s.* शिशुकः, शिशुमारः, उलुपी *m.* (न्), चुलुकी *m.* (न्), अम्बुकूर्म्मः, अम्बुकीशः, सीरकः, वाःकिटिः *m.*, जलशूकरः, वारिशूकरः, समुद्रीयशूकरः.

PORRIDGE, *s.* जूषं, यूषः -षं, जुष्ककः, मन्थः, चूर्णधान्यमन्थः.

PORRINGER, *s.* जूषपात्रं, यूषपात्रं, पात्रं, भाजनं, भाण्डं.

PORT, *s.* (Harbour, haven) नौकाशयः, नौकाश्रयः, आशयः, आश्रयस्थानं, उत्तरणस्थानं, खातं, उत्तरणखातं, नौकोत्तरणयोग्यं खातं, नौबन्धनखातं, नौबन्धनयोग्यं खातं, नौरक्षणस्थानं; 'reaches the desired port, इष्टस्थानं or इष्टदेशं गच्छति.—(Gate) द्वारं.

PORTABILITY, *s.* वाह्यता, सुवाह्यता, सुवहनीयता, हस्तवाह्यत्वं, लघुता.

PORTABLE, *a.* सुवाह्यः -ह्या -ह्यं, वाह्यः &c., वहनीयः -या -यं, सुवहनीयः &c., सुखवाह्यः &c., अनायासवाह्यः &c., सुखवहनीयः &c., हस्तवाह्यः &c., सहजवाह्यः &c., लघुः -घुः -घ्वी -घु.

PORTAL, *s.* द्वारं, द्वार *f.*, उपद्वारं, प्रतीहारः, प्रवेशद्वारं, मुखं.

PORTCULLIS, *s.* नगरद्वारोपरिस्थो जङ्गमकपाटः तेन च शत्रोरागमनकाले पातितेन द्वारवर्त्म रुध्यते, द्वारवर्त्मरोधनयन्त्रं.

To PORTEND, *v. a.* अग्रे सूच् (c. 10. सूचयति -यितुं), पूर्व्वे or पूर्व्वं दृश् (c. 10. दर्शयति -यितुं) or प्रदृश्, अनिष्टं सूच् or आविद् (c. 10. वेदयति -यितुं), पूर्व्वचिह्नं or पूर्व्वलक्षणं दा, पूर्व्वलक्षणेन भविष्यत् सूच् or अनिष्टसूचनं कृ or भाविव्यसनसूचनं कृ, भाविक्षयं or उत्पातं or विनिपातं शंस् (c. 1. शंसति -सितुं), कुलक्षणं दा.

PORTENT, *s.* (Omen) पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, शकुनं, भाविसूचकचिह्नं, भविष्यत्सूचकचिह्नं.—(Omen of ill, prodigy) उत्पातः, उपसर्गः, विनिपातः, व्यतीपातः, अद्भुतं, अरिष्टं, दुर्लक्षणं, अवलक्षणं, दुश्चिह्नं, अवचिह्नं, अपशकुनं, उपप्लवः, उपलिङ्गं, उपद्रवः, अत्याहितं, उपाकृतं, अजन्यं, विनिहतः, अशुभलक्षणं, अनिष्टसूचकचिह्नं, भाविव्यसनसूचकं or भाविक्षयसूचकं चिह्नं, कुलक्षणं; 'ceremonies to avert portents,' अद्भुतशान्तिः *f.*

PORTENTOUS, *a.* उत्पातशंसी -सिनी -सि (न्), विनिपातशंसी &c., औत्पातिकः -की -कं, औपसर्गिकः -की -कं, अनिष्टशंसी &c., अनिष्टसूचकः -का -कं, अनिष्टावेदी &c., अशुभशंसी &c., अशुभसूचकः &c., भविष्यत्सूचकः &c., अभद्रसूचकः &c., अद्भुतशंसी &c., अद्भुतसूचकः &c., अद्भुतः -ता -तं, अत्याहितः &c., शाकुनः -नी -नं, शाकुनिकः -की -कं.

PORTENTOUSLY, *adv.* सोत्पातं, अद्भुतं, उत्पातपूर्व्वं, दुर्लक्षणेन, कुलक्षणेन.

PORTER, *s.* (Gate-keeper) द्वारपालः, द्वारी *m.* (न्), द्वाररक्षकः, द्वाःस्थः, द्वारस्थः, द्वाराध्यक्षः, दौवारिकः, द्वारिकः, प्रतिहारः, प्रतीहारः -री *f.*, द्वाःस्थितः, द्वाःस्थितदर्शकः, दर्शकः.—(Carrier of burdens) भारवाहः -हकः, भारवाही *m.* (न्), भारवाहिकः, भारिकः, भारी *m.* (न्), भारहरः, भारहारी *m.*, भारहारकः, वोढा *m.* (दृ).

PORTERAGE, *s.* (Cost of carriage) वहनमूल्यं, वाहनमूल्यं, भारवाहनमूल्यं.—(Business of a porter) भारवाहनं, भारिककर्म्म *n.* (न्).

PORTFOLIO, *s.* पत्राधारः, पृथुपत्राधारः, महापत्राधारः, वृहत्पत्राधारः.

PORTHOLE, *s.* नौपार्श्वछिद्रं, नौपार्श्वमुखं, नौपार्श्ववातायनं.

PORTICO, *s.* वरण्डः, द्वारप्रकोष्ठकं, वहिर्द्वारप्रकोष्ठकं, द्वारमण्डपः -पं, देहली -लिः *f.*, निष्काशः, वरण्डकः, वातायनं, पिण्डः, द्वारपिण्डः.

PORTION, *s.* (Part) अंशः, भागः, विभागः, खण्डः -ण्डकः, अवयवः, अङ्गं, भिन्नं, छेदः, भित्तं, शकलः -लं.—(Portion allotted, share) विभागः, अंशः, भागः, भाजितं, भाज्यं, वण्टः -ण्टकः, उद्धारः.—(Share of an estate) ऋक्थांसः, ऋक्थभागः, रिक्थभागः, पैतृकरिक्थभागः, दायः, उद्धारः, औद्धारिकं.—(Wife's fortune) स्त्रीधनं, यौतकं, यौतुकं, युतकं, शुल्कः, औद्वाहिकं, अध्यावाहनिकं, कन्याधनं, परिबर्हं.

To PORTION, *v. a.* (Parcel out) विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, वण्ट् (c. 10. वण्टयति -यितुं), विभागशः or अंशांशि क्लृप् or परिक्लृप् or विन्यस्, अंश्, व्यंस्.—(Endow) यौतकं or शुल्कं or वृत्तिं दा, प्रतिष्ठां कृ, प्रतिष्ठा.

PORTIONABLE, *a.* विभाज्यः -ज्या -ज्यं, भाज्यः &c., वण्टनीयः &c., औद्धारिकः &c.

PORTIONED, *p. p.* (Divided out) विभक्तः -क्ता -क्तं, प्रविभक्तः &c., संविभक्तः &c., अंशितः -ता -तं, परिकल्पितः &c.—(Endowed) प्रतिष्ठितः -ता -तं, गृहीतशुल्कः -ल्का -ल्कं, गृहीतयौतकः &c.

PORTIONING, *s.* विभागः, विभाजनं, प्रविभागः, विभागकरणं, भाजनं, अंशनं, उद्धारविभागः, विभागकल्पना, वण्टनं.

PORTIONLESS, *a.* अनंशः -शा -शं, अंशहीनः -ना -नं, शुल्कहीनः -ना -नं.

PORTLINESS, *s.* उदरविस्तारः, कायविस्तारः, शरीरगौरवं, शरीरस्थूलता, स्थूलशरीरत्वं, स्थूलकायत्वं, शरीरवृहत्त्वं.

PORTLY, *a.* (Dignified in mien) गौरवशाली -लिनी -लि (न्), साटोपगामी &c., गौरवगतिः -तिः -ति, गौरववृत्तिः &c.—(Bulky, corpulent) विस्तीर्णोदरः -रा -रं, विस्तीर्णकायः -या -यं, पृथूदरः -रा -रं, स्थूलकायः &c., वृहत्कायः &c., स्थूलशरीरः &c.

PORTMANTEAU, *s.* चर्म्ममयं वस्त्रपात्रं or वस्त्रभाजनं, वस्त्राधारः.

PORTRAIT, *s.* प्रतिमा, प्रतिमानं, उपमा, उपमानं, उपमितिः *f.*, प्रतिमूर्त्तिः *f.*, प्रतिकृतिः *f.*, चित्रलेखा, आलेख्यं, चित्राकृतिः *f.*, चित्रं, प्रतिच्छन्दः -न्दकं, प्रतिच्छाया, जीवितव्यक्तिप्रतिमा.

PORTRAIT-PAINTER, *s.* उपमाता *m.* (तृ), चित्रलेखकः, चित्रकारः, चित्रकरः, चित्रलिक् *m.* (ख्), आलेख्यकृत् *m.*, उपमानकृत् *m.*, प्रतिमानकृत् *m.*

PORTRAIT-PAINTING, *s.* चित्रलिखनं, चित्रलेखनं, उपमानकरणं, रूपकरणं.

To PORTRAY, *v. a.* (Paint) आलिख्, विलिख्, लिख्, चित्र्, वर्ण्, उपवर्ण्.—(Describe) वर्ण्, अनुवर्ण्, उपवर्ण्, निरूप्.

PORTRAYED, *p. p.* वर्णितः-ता-तं, आलिखितः &c., चित्रितः &c., चित्रगतः &c.

PORTRESS, PORTERESS, *a.* दौवारिकी, द्वारपालका, प्रतीहारी, द्वाररक्षकी.

To POSE, *v. a.* निरुत्तरीकृ, वाग्रोधं कृ, उत्तररोधं कृ, वाक्यरोधं कृ, प्रतिवाक्यरोधं कृ, वाक्यखण्डनं कृ, उपमर्दं कृ, बाध् (c. 1. बाधते -धितुं), मुह् (c. 10. मोहयति -यितुं), विमुह्, शल्यं कृ.

POSED, *p. p.* निरुत्तरः -रा -रं, निरुत्तरीकृतः -ता -तं, बाधितः -ता -तं,

मोहितः -ता -तं, विमोहितः &c., कुण्ठितः &c., इतिकर्त्तव्यतामूढः -ढा -ढं.

Poser, *s.* उपमर्दकः, बाधकः, वाग्रोधकः, मोहकः, विमोहकः.

Position, *s.* (Situation) स्थानं, स्थितिः *f.*, अवस्थितिः *f.*, संस्थानं, पदं, आस्पदं, पदविः -वी *f.*—(Attitude) अङ्गस्थितिः *f.*, शरीरस्थितिः *f.*, आकारः; 'of the feet,' पदन्यासः, पादविन्यासः.—(Principle laid down, proposition advanced) पक्षः, प्रतिज्ञा, फक्किका, प्रमेयं, प्रतिज्ञेयं, प्रतिज्ञातं, भाषा, हेतुः *m.*, पूर्व्वपक्षः, उपन्यासः, अर्थः; 'false position,' हेत्वाभासः, पक्षाभासः, आभासः, मिथ्याहेतुः *m.*—(State, circumstances) अवस्था, स्थितिः *f.*, दशा, संस्थितिः *f.*, भावः, वृत्तिः *f.*, गतिः *f.*

Positive, *a.* (Explicit, express, direct) स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, व्यक्तः -क्ता -क्तं, सुव्यक्तः &c., सुस्पष्टः &c., अवक्रः -क्रा -क्रं, अवक्रार्थः -र्था -र्थं, असन्दिग्धार्थः &c., अगूढः -ढा -ढं, अगर्भितः -ता -तं, प्रत्यक्षः -क्षा -क्षं.—(Peremptory, definite) नियतः -ता -तं, अवश्यकः -का -कं, आवश्यकः -की -कं, सुनियतः -ता -तं, निश्चितः &c., सुनिश्चितः &c., निर्णीतः &c., अवैकल्पिकः -की -कं, अविकल्पकः -का -कं, —(Absolute, real, existing in fact) वास्तवः -वी -वं, वास्तविकः -की -कं, तथ्यः -थ्या -थ्यं, सत्यः -त्या -त्यं, यथार्थः -र्था -र्थं, सन् सती सत् (त्), विद्यमानः -ना -नं, भूतः -ता -तं, तात्त्विकः -की -कं; 'positive charge,' तत्त्वाभियोगः.—(Settled by arbitrary appointment, not inbred) नियोगसिद्धः -द्धा -द्धं, नियोगप्रयुक्तः -क्ता -क्तं, नियोगहेतुकः -का -कं, अभावसिद्धः &c., अस्वाभाविकः -की -कं, अनैसर्गिकः -की -कं, असहजः -जा -जं, बहिर्जातः -ता -तं.—(Confident, sure) दृढनिश्चयः -या -यं, कृतनिश्चयः &c., जातनिश्चयः &c., निश्चितमनाः -नाः -नः (स्), निश्चितमनस्कः -स्का -स्कं, निश्चयी -यिनी -यि (न्), बद्धनिश्चयः -या -यं, दृढमतिः -तिः -ति, निःसंशयः -या -यं, निःसन्देहः -हा -हं.—(Confident in assertion) दार्ढ्येन स्वमतवादी &c., or स्वमताग्रही &c., मताग्रही &c., स्वमताभिमानी &c., मताभिमानी &c., दृढोक्तिः -क्तिः -क्ति, उक्तनिर्वाही &c., प्रोक्तनिर्वाही &c.

Positively, *adv.* (Expressly) स्पष्टं, सुस्पष्टं, व्यक्तं, सुव्यक्तं, स्पष्टार्थतस्, अवक्रं, असन्दिग्धं.—(Peremptorily, definitely) नियतं, सुनियतं, अवश्यं, अवश्यमेव, निश्चितं, सुनिश्चितं, विकल्पेन विना.—(Absolutely, really) वस्तुतस्, तत्त्वतस्, यथार्थतस्, तथ्यं, सत्यं, सत्यमेव.—(Confidently, surely) निश्चयेन, दृढनिश्चयेन, दृढनिश्चयपूर्व्वं, सुनिश्चयेन, सुनिश्चयपूर्व्वं, दार्ढ्येन, दृढं, सुदृढं.—(Dogmatically) स्वमताग्रहेण, मताग्रहेण, मताभिमानेन, दृढोक्त्या.

Positiveness, *s.* (Reality of existence) वास्तविकत्वं, तथ्यता, यथार्थत्वं, सत्ता, सत्त्वं, विद्यमानता, सत्यता -त्वं.—(Peremptoriness) दृढनिश्चयः -यत्वं, सुनिश्चयत्वं, दृढता, सुदृढता, दार्ढ्यं, अवक्रता, सुस्पष्टता, नियतत्वं, सुनियतत्वं, दृढनिर्णयः, सुनिर्णीतत्वं.—(Dogmaticalness) स्वमताग्रहः, मताग्रहः, मताभिमानं, दृढोक्तिः *f.*

PROVISORY, *a.* (Conditional) सापेक्षिकः -की -कं, सप्रतिबन्धः -न्धा -न्धं

PROVOCATION, *s.* (Act of exciting anger) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं, क्रोधोत्पादनं, कोपोत्पादनं, क्रोधोद्दीपनं, क्रोधोत्तेजनं.—(Cause of anger) कोपकारणं, क्रोधकारणं, कोपहेतुः *m.*—(Act of exciting) उत्तेजनं, उद्दीपनं, उद्बोधनं, प्रवर्चनं.

PROVOCATIVE, *a.* उद्दीपकः -का -कं, अग्निवर्धकः &c., क्षुधाजनकः &c.

PROVOCATIVE, *s.* अग्निवर्धनं, रोचकः -कं, रुचकं, प्रदीपनं, खर्जिका.

To PROVOKE, *v. a.* (Excite to anger) प्रकुप् (c. 10. -कोपयति -यितुं), कुप्, क्षुप् (c. 10. क्षोभयति -यितुं), कोपं or क्रोधं जन् or उत्पद् or उद्दीप् or उत्पद् (c. 10. -पादयति -यितुं), कोपोत्पादनं कृ, क्रोधोत्तेजनं कृ, क्रोधोद्दीपनं कृ.—(Excite) उद्दीप् (c. 10. -दीपयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् in caus., प्रवृत् in caus., प्ररुच् in caus.—(Challenge) आह्वे, समाह्वे, उपाह्वे.

PROVOKED, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः &c., कुपितः &c., कोपितः &c., उपजातकोपः -पा -पं, जातकोपः &c., इद्धमन्युः -न्युः -न्यु, इद्धक्रोधः -धा -धं, उद्दीप्तमन्युः &c., कोपदीप्तः -प्ता -प्तं, उत्पन्नमन्युः &c., उत्तेजितः -ता -तं, उद्दीपितः &c., उत्तापितः &c., उत्तप्तः -प्ता -प्तं, सन्तप्तः &c., सन्तापितः &c.

PROVOKING, *part.* or *a.* प्रकोपजनकः -का -कं, कोपजनकः &c., क्रोधजनकः &c., प्रकोपकः -का -कं, क्रोधोत्पादकः &c., क्रोधोद्दीपकः &c., कोपोद्दीपकः &c., क्रोधोत्तेजकः &c., उत्तेजकः &c., उद्दीपकः &c., उद्बोधकः &c.

PROVOKINGLY, *adv.* यथा कोपो जायते तथा, यथा क्रोध उद्दीप्यते तथा.

PROVOST, *s.* अध्यक्षः, अधीक्षः, अधिकारी *m.* (न्), अधिपतिः, श्रेष्ठी *m.*

PROW, *s.* नौकाग्रं, नौकाग्रभागः, नौपूर्वभागः, नौकोद्यभागः.

PROWESS, *s.* पराक्रमः, विक्रमः, सुविक्रमः, शौर्यं, वीर्यं, सुवीर्यं, रणशौर्यं, रणोत्साहः, पौरुषं, कृतपौरुषं, अतिशक्तिता, जनौजस् *n.*, प्रौढिः *f.*, कर्म्मीदारं; 'personal prowess,' बाहुवीर्यं; 'gained by one's own prowess,' स्वहस्तार्जितः -ता -तं, स्वभुजोपार्जितः &c.; 'man of great prowess,' सुपराक्रमी *m.* (न्), सुविक्रमी *m.*, पराक्रान्तः, अतिशक्तिमान् *m.* (त्); 'to show prowess,' पराक्रम् (c. 1. -क्रामति -क्रमति -मितुं), विक्रम्.

To PROWL, *v. n.* मांसार्थं or आमिषार्थं भ्रम् (c. 4. भ्राम्यति, भ्रमितुं) or परिभ्रम्, मांसान्वेषणार्थं भ्रम् or पर्यट् (c. 1. -अटति -टितुं).

PROWLER, *s.* मांसार्थं भ्रमणकारी *m.* (न्) or परिभ्रमणकारी *m.*, परिभ्रमी *m.*

PROWLING, *s.* मांसार्थं or मांसान्वेषणार्थं भ्रमणं or परिभ्रमणं or पर्यटनं.

PROXIMATE, *a.* समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निरन्तरः -रा -रं, सन्निहितः -ता -तं, निरन्तरालः -ला -लं, उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), आसन्नः -न्ना -न्नं, अन्तिकः -का -कं, उपश्लिष्टः -ष्टा -ष्टं, संसक्तः -क्ता -क्तं, सन्निकृष्टः -ष्टा -ष्टं, समीपगः &c. *See* NEAR, NEXT; 'proximate cause,' उपादानकारणं, उपादानं.

PROXIMATELY, *adv.* समीपतस्, सन्निहितं, सन्निकृष्टं, निरन्तरालं, अनन्तरालं.

PROXIMITY, *s.* समीपता, सामीप्यं, सन्निकर्षः, सन्निकृष्टता, सन्निधिः *m.*, सान्निध्यं, सन्निधानं, सन्निधं, अन्तिकं -कता, उपस्थानं, उपस्थितिः *f.*, नैकट्यं, प्रत्यासन्निः *f.*, प्रत्यासन्नता, संसक्तिः *f.*, संसर्गः, उपश्लेषः, आनन्तर्यं, तादर्थ्यं. *See* NEARNESS.

PROXY, *s.* (Agency of another who acts as substitute) प्रतिनिधित्वं -ता.—(Person who acts) प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तः -स्तकः; 'by proxy,' प्रतिनिधिद्वारा, प्रतिनिधिद्वारेण; 'one who signs a paper by proxy,' लेखनिकः.

PRUDE, *s.* मिथ्याविनीता, अत्यन्तविनयनिष्ठा, विनयाभिमानिनी, अतिविनीताम्मन्या, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारिणी, अत्याचारसेविनी, मुद्रीडिताम्मन्या, अतिविनयसेविनी, अत्यन्तविनीता.

PRUDENCE, *s.* पूर्व्वविचारः -रणा, परिणामदृष्टिः *f.*, पूर्व्वसमीक्षा, प्रसमीक्षा, समीक्षा -क्षणं, समीक्ष्यकारिता -त्वं, विमृश्यकारिता, परिणामदर्शनं, दीर्घदृष्टिः, सदसद्विवेकः, विनयः, विनीतता, नीतिः *f.*, नीतिज्ञता, प्राज्ञता, प्रज्ञता, विज्ञता, विवेकः, मनस्विता, विचारशीलता, पूर्व्वापरविचारः, मतिमत्त्वं, बुद्धिः *f.*, मनीषा, हिताहितविवेकः, पूर्व्वचिन्ता, चिन्ता, कार्य्यचिन्ता, परिवेदना, सावधानता, पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, विमर्शः, विवेचना, पूर्व्वविवेचना.

PRUDENT, *a.* परिणामदर्शी -र्शिनी -र्शि (न्), पूर्व्वविचारशीलः -ला -लं, दीर्घदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, समीक्ष्यकारी -रिणी &c., विमृश्यकारी &c., समीक्षाकारी &c., प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., विज्ञः &c., मनस्वी -स्विनी &c., मतिमान् -मती -मत् (त्), बुद्धिमान् &c., प्रज्ञावान् &c., मनीषी -षिणी &c., परिवेदी -दिनी &c., परिवेदकः -का -कं, बुधः -धा -धं, सुबोधः -धा -धं, विनीतः &c., विनयवान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, पूर्व्वापरविचारी &c., विचारशीलः -ला -लं, सदसद्दर्शी &c., सदसद्विवेकी &c., दूरदर्शी &c., हिताहितविवेकी &c., पूर्व्वचिन्तकः -का -कं, पूर्व्वचिन्ताशीलः &c., कार्य्यचिन्तकः &c., धीरः -रा -रं, सावधानः -ना -नं, कृतावधानः -ना -नं, कृतधीः -धीः -धि, प्रयतः -ता -तं.

PRUDENTIAL, *a.* पूर्व्वविचारप्रयुक्तः -क्ता -क्तं, पूर्व्वसमीक्षाप्रयुक्तः &c., प्रसमीक्षाप्रयुक्तः &c., मतिचारः -रा -रं, सविवेकः -का -कं.

PRUDENTLY, *adv.* सविचारं, समीक्षापूर्व्वं, प्रसमीक्ष्य, सुसमीक्ष्य, सुविमृश्य, परिणामदर्शनात्, परिणामदृष्ट्या, पूर्व्वविचारेण, सावधानं, सपरिवेदनं, प्राज्ञवत्, विज्ञवत्.

PRUDERY, *s.* मिथ्याविनयः, मिथ्यालज्जा, एकान्तविनयः, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारनिष्ठा, विनयाभिमानं, अतिसूक्ष्मशीलता, अतिसूक्ष्मता, अतिविनीतता.

PRUDISH, *a.* मिथ्याविनीतः -ता -तं, एकान्तविनीतः &c., अत्यन्तविनीतः &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, विनयाभिमानी -निनी &c. *See* PRUDE, *s.* PRECISE, *a.*

To PRUNE, *v. a.* क्षुद्रपल्लवान् or निरर्थकविटपान् अवच्छिद् (c. 7. -छिनत्ति -छेत्तुं) or अवकृत् (c. 6. -कृणत्ति -कर्त्तितुं) or लू (c. 9. लुनाति लवितुं) or लुप् (c. 6. लुम्पति, लोप्तुं).

PRUNED, *p. p.* छिन्नपल्लवः -वा -वं, छिन्नविटपः -पा -पं, लूनविटपः &c.

PRUNER, *s.* विटपच्छिद् *m.*, पल्लवच्छिद् *m.*, निरर्थकविटपच्छेत्ता *m* (तृ).

PRUNING, *s.* पल्लवावच्छेदः, विटपावच्छेदः, निरर्थकविटपावकर्त्तनं.

PRUNING-HOOK, PRUNING-KNIFE, *s.* पल्लवच्छेदनी, विटपच्छेदनी, पल्लवकर्त्तनी.

PRURIENCE, PRURIENCY, *s.* कण्डूतिः *f.*, कण्डूः *f.*, कण्डूः *f.*, कण्डूया, कण्डूयनं.—(Longing desire for any thing) अतिस्पृहा, अत्यन्तस्पृहा, अतिशयेच्छा, अत्यभिलाषः.

PRURIENT, *a.* कण्डूलः -ला -लं, कण्डूतिमान् -मती -मत् (त), सकण्डूतिः -तिः -ति.

PRURIGO, *s.* कण्डूः *f.*, कण्डुः *f.*, खर्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f.*

To PRY, *v. a.* सूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं), सूक्ष्मं निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or दृश् (c. 1. पश्यति, द्रष्टुं), सूक्ष्मदर्शनं कृ, सूक्ष्मम् अन्विष् (c. 4. -इष्यति -एषितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), सूक्ष्मान्वेषणं कृ, सूक्ष्मानुसन्धानं कृ, सूक्ष्मं चर्च् (c. 1. चर्चयति -यितुं), सूक्ष्मचर्चां कृ, चर्चां कृ, अनधिकारचर्चां कृ, मर्म्मान्वेषणं कृ, सूक्ष्मगवेषणं कृ, मर्म्मगवेषणं कृ.

PRYING, *s.* सूक्ष्मनिरूपणं, सूक्ष्मनिरीक्षणं, सूक्ष्मदर्शनं, सूक्ष्मदृष्टिः *f.*, सूक्ष्मान्वेषणं, सूक्ष्मानुसन्धानं, सूक्ष्मचर्चा, अनधिकारचर्चा, चर्चा, मर्म्मान्वेषणं.

PSALM, *s.* गीतं, स्तुतिगीतं, गानं, स्तुतिगानं, स्तोत्रं, सङ्गीतं, सद्गीतं, ईश्वरस्तुतिगीतं, भक्तिगीतं, भक्तिगानं, धर्म्मगीतं.

PSALMIST, *s.* गीतरचकः, स्तुतिगीतरचकः, स्तोत्ररचकः, गीतकारः, गीतकविः *m.*

PSALMODY, *s.* स्तुतिगानं, स्तोत्रगानं, स्तोत्रगीतिः *f.*, ईश्वरस्तुतिगानं.

PSALMOGRAPHY, *s.* गीतरचनं, स्तुतिगीतरचनं, स्तोत्ररचनं, गीतकरणं.

PSALTER, *s.* गीतपुस्तकं, गीतसंहिता, गीतसंहारः, स्तोत्रपुस्तकं, खिलं.

PSEUDO. A prefix expressed in Sanskrit by मिथ्या, मृषा, कृत्रिम कु &c. prefixed, or कल्प, देशीय &c. affixed; as, 'a pseudo-poet,' मिथ्याकविः *m.*, कुकविः, कविकल्पः, कविदेशीयः; pseudology,' मिथ्यावादः, मृषावादः; 'pseudo-morphous,' कृत्रिमरूपः -पा -पं; 'pseudonymous,' कृत्रिमनामा &c.

PSHAW, *exclam.* धिक्, थै, अवे, अरे, रै, किम्, हुम्, अपैहि.

PSYCHOLOGICAL, *a.* आत्मतत्त्वविषयः -या -यं, अध्यात्मविषयकः -का -कं.

PSYCHOLOGY, *s.* आत्मतत्त्वविद्या, अध्यात्मविद्या, अध्यात्मशास्त्रं.

PUBERTY, PUBESCENCE, *s.* यौवनं, यौवनावस्था, तारुण्यं, तारुण्यावस्था, तरुणत्वं, युवत्वं, यौवनकालः, प्रौढता, प्रौढिः *f.*, प्रौढदशा; 'attained to puberty,' प्राप्तयौवनः -ना -नं, प्राप्तयौवनकालः -ला -लं; 'not attained to it,' अप्राप्तयौवनः &c.

PUBESCENT, *a.* प्राप्तयौवनः -ना -नं, अङ्कुरितयौवनः &c., प्राप्ततारुण्यः -ण्या -ण्यं.

PUBLIC, *a.* (Pertaining to the community) सर्व्वसम्बन्धी -न्धिनी -न्धि (न्), सर्व्वलोकसम्बन्धी &c., प्रजासम्बन्धी &c., लोक in comp., प्रजा in comp. (General, common to many,) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्व्वसाधारणः &c., सर्व्वसामान्यः &c., सार्व्वलौकिकः -की -कं, लौकिकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, सर्व्वजनीयः -या -यं, विश्वजनीनः &c., विश्वजनीयः -या -यं, सर्व्वः -र्व्वा -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सर्व्वीयः -या -यं, लोक or जन in comp., (Commonly known or current) प्रसिद्धः -द्धा, लोकप्रसिद्धः &c., सर्व्वप्रसिद्धः &c., जनप्रसिद्धः &c., सर्व्वजनप्रसिद्धः &c., सर्व्वलोकप्रसिद्धः &c., जगत्प्रसिद्धः &c., देशप्रसिद्धः &c., लोकविश्रुतः -ता -तं, सर्व्वत्र प्रथितः -ता -तं or प्रथितः -ता -तं, लोक or जन in comp., *see* POPULAR.—(Open to all) प्रकाशः -शा -शं, सर्व्वप्रकाशः &c., सर्व्वलोकप्रकाशः &c., प्रकटः -टा -टं, सर्व्वप्रकटः &c., लोकप्रकाशः &c., अविविक्तः -क्ता -क्तं; 'public sale,' प्रकाशविक्रयः प्रकाशक्रयः; 'public benefit,' लोकोपकारः; 'public business,' लोकव्यवहारः व्यवहारः; 'public odium,' जनविद्वेषः; 'public property,' गणद्रव्यं; 'public feeling,' लोकचित्तं, प्रकृतिचित्तं.

PUBLIC, *s.* लोकः, सर्व्वलोकः, सर्व्वजनाः *m. pl.*, प्रजा, प्रजालोकः; 'for the benefit of the public,' प्रजार्थं, लोकार्थं, लोकोपकारार्थं; 'in public,' प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, सर्व्वप्रकाशं, लोकसाक्षात्, लोकसम्मुखं; 'in public and in private,' प्रकाशं विविक्तं च, प्रकाशम् एकान्ततश्च; 'regard for the public or public opinion,' लोकलज्जा, जनलज्जा.

PUBLICAN, *s.* (Collector of tribute or toll) करग्रहः, करग्राही *m.* (न्), करसंग्राही *m.*, शुल्कग्राही *m.*—(Retailer of beer and spirits) शौण्डिकः, शुण्डी *m.* (न्), यवसुरादिविक्रयी *m.* (न्) शुण्डादिविक्रेता *m.* (तृ) सुराविक्रयी *m.*

PUBLICATION, *s.* (The act) प्रकाशनं, प्रकटनं, प्रकटीकरणं, प्रसिद्धीकरणं, प्रकाशीकरणं.—(A published book) प्रकाशितपुस्तकं, प्रसिद्धपुस्तकं.

PUBLIC-HOUSE, *s.* शुण्डास्थानं, मद्यस्थानं, पानगोष्ठिका, शुण्डापानं, शुण्डा, मदिरागृहं, मदिराशाला, सापानं, यवसुरादिविक्रयस्थानं, शुण्डादिविक्रयस्थानं, सुराविक्रयस्थानं.

PUBLICITY, *s.* प्रकाशता, लोकप्रकाशता, लोकप्रकाशः, जनप्रकाशः, प्रकाशः, प्राकट्यं, लोकप्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, प्रसिद्धता, लोकप्रसिद्धता -त्वं, लोकविश्रुतिः *f.*, विश्रुतिः, जनप्रसिद्धिः *f.*, प्रख्यातिः *f.*, विख्यातिः *f.*, ख्यातिः *f.*, लौकिकता -त्वं, स्फुटता, व्यक्तता, स्पष्टता.

PUBLICLY, *adv.* (Openly, before the world) प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, लोकप्रकाशं, सर्व्वप्रकाशं, प्रसिद्धं, अविविक्तं; 'publicly and privately,' *see* PUBLIC, *s.*—(Without concealment) व्यक्तं, सुव्यक्तं, स्पष्टं, स्फुटं, साक्षात्, प्रादुस्, आविस्, साविष्कारं, अगूढं.

PUBLIC-SPIRITED, PUBLIC-MINDED, *a.* लोकोपकारशीलः -ला -लं, लोकोपकारबुद्धिः -द्धिः -द्धि, लोकार्थबुद्धिः &c., जनार्थबुद्धिः &c., लोकार्थी -र्थिनी -र्थि (न्), जनार्थी &c., लोकहितेच्छुः -च्छुः -च्छु, लोकहितः -ता -तं, सर्व्वजनहितैषी &c., साधारणजनहितेच्छुः &c.

PUBLIC-SPIRITEDNESS, *s.* लोकोपकारशीलता, लोकोपकारबुद्धिः *f.*, लोकहितेच्छा.

To PUBLISH, *v. a.* (Make generally known) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), प्रसिद्धीकृ, ख्या in caus. (ख्यापयति -यितुं), प्रख्या, विख्या, आख्या, घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, प्रचर् (c. 10. -चारयति -यितुं), विज्ञा in caus. (-ज्ञापयति -ज्ञपयति -यितुं). घुष् (c. 10. घोषयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), निर्विद् (c. 10. -वेदयति -यितुं), विद्, आविष्कृ, प्रादुष्कृ.—(Publish a book) पुस्तकं प्रकाश् or प्रसिद्धीकृ.—(Put into circulation) प्रचलीकृ, प्रचल् (c. 10. -चलयति -यितुं), प्रचर्.

PUBLISHED, *p.p.* प्रकाशितः -ता -तं, प्रकटीकृतः -ता -तं, प्रकटितः -ता -तं, प्रसिद्धीकृतः &c., ख्यापितः -ता -तं, घोषितः &c., विघोषितः &c., आघोषितः &c., विज्ञापितः &c., प्रख्यातः -ता -तं, प्रचलीकृतः &c., प्रचारितः &c., आविष्कृतः &c., प्रादुष्कृतः &c., प्रथितः &c.,

PUBLISHER, *s.* प्रकाशकः, प्रकाशयिता *m.* (तृ), ख्यापकः, विज्ञापकः, प्रसिद्धकर्त्ता *m.* (र्त्तृ), आविष्कर्त्ता *m.*, प्रादुष्कर्त्ता *m.*

To PUCKER, *v. a.* संकुच् (c. 1. -कोचति -चितुं), कुच् (c. 1. कुचति -चितुं), आकुच्, संदृ (c. 1. -हरति -हर्त्तुं), पुटीकृ, सम्पुटीकृ, सङ्कोचं कृ.

PUCKER, PUCKERING, *s.* पुटः, पुटीकरणं, सङ्कोचः -चनं, कुचनं, आकुचनं.

PUDDER, *s.* तुमुलं, कोलाहलः, सम्भ्रमः, विप्लवः, व्यग्रता, व्यस्तता.

PUDDING, *s.* पोलिका, पोलिका; 'plum-pudding,' *see* the word.

PUDDLE, *s.* वर्षरूकः, पङ्कजलौघः, कर्दमजलौघः, सपङ्कजलौघः, पङ्कजलगुल्मः, मलिनजलौघः, समलजलौघः, पङ्कगुल्मः.

To PUDDLE, *v. a.* समलीकृ, पङ्किलीकृ, कलुषीकृ, आविलीकृ. *See* MUDDLE.

PUDENCY, PUDICITY, *s.*, *see* MODESTY.

PUDENDUM, PUDENDA, *s.* (Of a woman) भगं, योनिः *f.*, अधोरङ्गं, अधोपरं, अधोवशः, अधस्, अधस्तात्, उपस्थः, गुह्याङ्गं, रतिकुहरं, रतिमन्दिरं, रतिगृहं. *See* PRIVITY.

PUERILE, *a.* बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालयोग्यः -ग्या -ग्यं, शिशुयोग्यः &c., बालधर्म्मकः -का -कं, बालबुद्धिः -द्धिः -द्धि.

PUERILITY, *s.* बालिश्यं, बालेयत्वं -ता, बालकीयता, बालयोग्यता.

PUERPERAL, *a.* प्रासूतिकः -की -कं, प्रसवसम्बन्धी -न्धिनी -न्धि (न्).

PUERPEROUS, *a.* बालप्रसविनी, बालप्रसवन्ती, प्रसूतिका, सूतिका.

PUFF, *s.* (Breath from the mouth) श्वासः, श्वसितं, मुखमरुत्, वदनमरुत्.—(A puff or sudden whiff) फूत्कृतं, फुत्कारः, फूत्कृतं, फूत्कारः फूत् indec.—(Blast, gust) ध्मानं, आध्मानं, ध्मातं, वातः, वातरूषः, वाय्या, निर्घातः, प्रभञ्जनः.—(Kind of cake) पिष्टकं, आपूपिकं.—(Tumid commendation) अतिशयप्रशंसा, अत्युक्तिरूपा प्रशंसा, अधिकप्रशंसा, अतिशयोक्तिः *f.*

To PUFF, *v. n.* (Breathe) श्वस् (c. 2. श्वसिति -तुं), श्वासं कृ, प्रश्वासं कृ.—(Pant) कृच्छ्रेण श्वस्, कृच्छ्रेण श्वासप्रश्वासं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), उद्धमं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.—(Blow) वा, प्रवा.—(Eject air from the mouth suddenly) सकलाद् वदनमरुतं or मुखमरुतं निरस् (c. 4. -अस्यति -असितुं) or निःसृ in caus.—(Blow upon with a puffing noise) फूत्कृ, फूत्कृ, फुत्कारं कृ, फूत्कारं कृ, फुत्कारेण or फुत्कृतेन प्रवह्.—(Swell or be inflated with air) ध्मा in pass. (ध्मायते), आध्मा, वातेन भू in pass. (भूयते).

To PUFF, *v. a.* (Inflate, dilate with air) ध्मा (c. 1. धमति, ध्मा), आध्मा, समाध्मा, प्रध्मा, उपध्मा, वातेन पू (c. 10. पूरयति -यितुं), वातेन पू, वायुपूरितं -तां कृ.—(Blow away) अपध्मा, विध्मा.—(Puff up with pride, &c.) दर्पाध्मातं -तां कृ, गर्वाध्मातं -तां कृ, उद्धतीकृ, उन्नतीकृ.—(Praise with exaggeration) अत्युक्त्या or अतिशयोक्त्या प्रशंस्, अतिशयप्रशंसां कृ.

PUFFED, *p.p.* (Inflated) ध्मातः -ता -तं, आध्मातः &c., समाध्मातः &c., प्रध्मातः &c., वातपूरितः -ता -तं, वायुपूरीः -री -रि, श्वासपूरितः &c.—(Puffed up with pride, &c.) दर्पाध्मातः -ता -तं, गर्वाध्मातः &c., धद्धतः &c., दर्पोद्धतः &c., मदोद्धतः &c.

Puffy, *a.* आध्मातः -ता -तं, वातमयः -यी -यं, शून्दमात्रः -त्रा -त्रं.

Pug-dog, *s.* मर्कटमुखः क्षुद्रकुक्कुरभेदः.

Pug-faced, *a.* वानरमुखः -खी -खं, मर्कटवदनः -ना -नं, कपिमुखः &c.

Pug-nose, *s.* चिपिटः, चिपिटकः, चिपुटः, चिक्किनः, अवभटः.

Pugilism, *s.* मुष्टियुद्धं, मुष्टियोधनं, मुष्टिपातः, मल्लयुद्धं, मुष्टीमुष्टि, बाहुयुद्धं.

Pugilist, *s.* मुष्टियोद्धा *m.* (द्धृ), मुष्टियोधः, मुष्टियोधी *m.* (न्), बाहुयोधी *m.*

Pugilistic, *a.* मुष्टियुद्धसम्बन्धी -न्धिनी -न्धि (न्), बाहुयुद्धसम्बन्धी &c.

Pugnacious, *a.* युयुत्सुः -त्सुः -त्सु, कलहप्रियः -या -यं, युद्धप्रियः &c., रणप्रियः &c., युद्धेच्छुः -च्छुः -च्छु, युद्धकारी -रिणी -रि (न्), कलहकारी &c., रणकामी -मिनी &c., युद्धकामी &c.

Pugnacity, *s.* युयुत्सा, युद्धेच्छा, युद्धप्रियता, कलहप्रियता, कलहेच्छा.

Puisne, *a.* अवरः -रा -रं, अवरपदस्थः -स्था -स्थं, अवरजः -जा -जं.

Puissance, *s.* पराक्रमः, विक्रमः, प्रभावः, ऐश्वर्यं, तेजस् *n.*, प्रावल्यं.

Puissant, *a.* पराक्रमी -मिणी -मि (न्), विक्रमी &c., पराक्रान्तः -न्ता -न्तं, विक्रान्तः &c., महाबलः -ला -लं, बलवान् -वती -वत् (न्), महाशक्तिः -क्तिः -क्ति, महाविक्रमः -मा -मं.

To puke, *v. n.* वम् (c. 1. वमति -मितुं), वमनं कृ, छर्दे (c. 10. छर्दयति -यितुं).

Puke, *s.* वान्तिकारकम् औषधं, वान्तिकृत्, छर्दनकृत्.

Puking, *s.* वान्तिः *f.*, वमनं, छर्दनं; *part.* वमी -मिनी -मि (न्).

Pulchritude, *s.* *See* Beauty.

To pule, *v. n.* (Like a child) बालकवद् रु (c. 2. रौति, रवितुं), शिशुवद् रुद् (c. 2. रोदिति -तुं); 'like a chicken,' पक्षिशावकवत् कूज् (c. 1. कूजति -जितुं).

To pull, *v. a.* or *n.* (Draw, drag) कृष् (c. 1. कर्षति, c. 6. कृषति -ते, क्रष्टुं, कर्ष्टुं), आकृष्, समाकृष्, परिकृष्, प्रतिकृष्, संकृष्, कर्षणं कृ.—(Pull forcibly) हृ (c. 1. हरति- हर्तुं), हरणं कृ.—(Pluck, gather by plucking) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), आदा (c. 3. -ददाति -दत्ते -दातुं), अङ्गुलिभिर् ग्रह् or आदा or चि or अवचि; 'to pull the hair,' केशग्रहं कृ, केशग्रहणं कृ, केशान् ग्रह्.—(Pull down) अपकृष्, अवकृष्, व्यपकृष्, पत् in caus., अधःपत्.—(Pull off) अपकृष्, अवकृष्, व्यपकृष्, उत्कृष्, अपहृ, व्यपहृ, अपनी, अवहृ in caus. (-हारयति -यितुं); 'he pulls off his clothes,' वस्त्रम् अवतारयति.—(Pull out) उत्कृष्, निष्कृष्, उद्धृ, निर्हृ, उत्पट् (c. 10. -पाटयति -यितुं), उत्खन् (c. 1. -खनति -नितुं), नियो in caus., उत्पाटनं कृ; 'the hair,' लुच् (c. 1. लुचति -चितुं), उन्मुच्, अवलुच्, विलुच्, उत्पद्, केशोन्मुचनं कृ, केशोत्पाटनं कृ.—(Pull towards) आकृष्, समाकृष्, प्रतिकृष्.—(Pull in pieces, pull in two) विद् (c. 10. -दारयति -यितुं), अवद्, विभिद्, विदलीकृ, खण्डशः कृ, खण्डं खण्डं कृ.—(Pull up) उत्पद्, उद्धृ, समुद्धृ, उच्छिद्, उत्खन्; 'by the roots,' उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, समूलं or आमूलम् उद्धृ.

Pull, *s.* कर्षणं, कृष्टिः *f.*, कर्षः, आकर्षः -र्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षणं.

Pulled, *p. p.* कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, आकर्षितः &c., आकृष्टः &c., अवकृष्टः &c., विकर्षितः &c., विकृष्टः &c., हृतः -ता -तं, गृहीतः -ता -तं; 'pulled by the hair,' केशगृहीतः &c., केशेषु गृहीतः; &c.; 'pulled off, as clothes, &c.,' अवतारितः -ता -तं; pulled out,' उत्कृष्टः -ष्टा -ष्टं, निष्कर्षितः &c., उद्धृतः &c., उत्पाटितः &c.; 'as the hair,' उन्मुचितः &c.; 'pulled up,' उन्मूलितः -ता -तं. उत्पाटितः &c., उत्खातः &c., व्यपरोपितः &c.

Pullet, *s.* कुक्कुटीशावकः, कुक्कुटशावकः, पक्षिशावकः, पक्षिणीशावकः.

Pulley, *s.* काष्ठान्तर्गतं क्षुद्रचक्रं, काष्ठान्तःस्थं सूक्ष्मचक्रं तच्च रज्जुसम्बद्धं भूत्वा कीलकोपरि परिवर्त्तते, कीलकोपरि परिवर्त्तमानं क्षुद्रचक्रं.

Pulling, *s.* कर्षणं, कृष्टिः *f.*, आकर्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षः -र्षणं, उत्कर्षः, हरणं, ग्रहणं, अङ्गुलिग्रहणं; 'pulling the hair,' केशग्रहः -हणं; 'mutual pulling of the hair,' केशाकेशि indec.; 'pulling up the hair,' केशलुञ्चनं, केशोन्मुचनं.

To pullulate, *v. n.* (Germinate) स्फुट्, फुल्, अङ्कुर, विकस्.

Pullulation, *s.* स्फुटनं, फुल्लतिः *f.*, फुल्लिः *f.*, उद्भेदः, विकसनं.

Pulmonary, pulmonic, *a.* फुप्फुससम्बन्धी -न्धिनी -न्धि (न्), फुप्फुसनिष्ठः -ष्ठा -ष्ठं, फुप्फुसस्थः -स्था -स्थं, फुप्फुसीयः -या -यं.

Pulp, *s.* मज्जा, मज्जा *m.* (न्), मज्जनं, सारः, गर्भः.—(Of fruit) फलसारः, फलगर्भः, फलस्य कोमलभागः or मृदुभागः.

Pulpiness, *s.* समज्जता, मज्जावत्त्वं, मज्जागुणकत्वं, कोमलता, मृदुता.

Pulpit, *s.* उपदेशासनं, उपदेशपीठं, धर्म्मोपदेशपीठं, पीठं, पुरोहितासनं, धर्म्मोपदेशकासनं, धर्म्माध्यापकासनं, धर्म्माध्यापकपीठं.

Pulpous, pulpy, *a.* मज्जागुणकः -का -कं, मज्जोपमः -मा -मं, मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं, मांसलः -ला -लं, मांसगुणकः -का -कं, कोमलः -ला -लं, आर्द्रमृदुः -ढ्वी -दु, मृदुः &c.

To pulsate, *v. n.* (Palpitate) स्पन्द्, स्फुर, कम्प्, वेप्.

Pulsation, *s.* स्पन्दनं, प्रतिस्पन्दनं, स्पन्दितं, कम्पः -म्पनं, स्फुरणं, विष्पन्दः, चलनं; 'of the heart,' हृदयस्पन्दनं, हृत्कम्पः; 'of an artery,' नाडिस्फुरणं, नाड्याघातः.

Pulse, *s.* (Of the blood or an artery) नाडिः -डी *f.*, नाली -लिः *f.*, नाडीस्फुरणं, नालीस्फुरणं, नाडीस्पन्दनं, नाड्याघातः; 'feeling the pulse,' नाडीपरीक्षा; 'to feel the pulse,' नाडीपरीक्षां कृ.—(Leguminous plant) कलायः, सतीनः -नकः, सतीलः -ला -लकः, सितीलकः, सातीलकः, सातिलकः, द्विदलं, त्रिपुटः, खण्डिकः, हरेणुः *m.*, शमीधान्यं, वनसङ्कटः, धान्यवीरः, मुद्गः, वर्त्तुलः; 'pulse ground and fried,' वडा, वटकः.

Pulverable, *a.* क्षोदनीयः -या -यं, चूर्णनीयः &c., चूर्णीकरणयोग्यः &c.

Pulverization, *s.* चूर्णीकरणं, क्षोदीकरणं, चूर्णनं, सञ्चूर्णनं, क्षोदनं.

To pulverize, *v. a.* चूर्ण् (c. 10. चूर्णयति -यितुं), संचूर्ण्, प्रचूर्ण्, विचूर्ण्, चूर्णीकृ, क्षुद् (c. 7. क्षुणद्धि, क्षोत्तुं), प्रक्षुद्, संक्षुद्, क्षोदीकृ, पिष्, गुहृ &c. *See To* pound, powder.

Pulverized, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, संचूर्णितः &c., चूर्णीभूतः -ता -तं, क्षोदितः -ता -तं, क्षोदीकृतः &c., पिष्टः -ष्टा -ष्टं, गुहितः -ता -तं, गुहितः -ता -तं.

Pulverulent, *a.* चूर्णमयः -यी -यं, पांशुलः -ला -लं. *See* Powdery.

Pummel, *s.* (Of a saddle) वट्टा.

Pump, *s.* जलोत्क्षेपणयन्त्रं, जलोत्क्षेपननाडिः -डी *f.*, जलोत्क्षेपणयन्त्रं, जलोत्क्षेपकयन्त्रं, जलोत्क्षेपकनाडी, जलोत्क्षेपनी, जलोत्क्षेपणी, जलनाडी, जलनाली; 'place where water is distributed,' प्रपा.

To pump, *v. a.* or *n.* नाडीद्वारेण जलम् उत्सृज् (c. 10. -तोलयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or जलोत्क्षेपनं कृ or जलोत्क्षेपणं कृ, जलनाडीं सञ्चल् (c. 10. -चालयति -यितुं), जलोत्क्षेपनयन्त्रं सञ्चल्.—(Interrogate artfully) सव्याजं प्रच्छ् or अनुप्रच्छ् or परिप्रच्छ्, प्रश्नेन परीक्ष् or अनुसन्धा.

Pumpkin, *s.* कूष्माण्डः -ण्डा -ण्डी, कूष्माण्डकः, कूष्माण्डः -ण्डी -ण्डकः, अलाबूः *f.*, अलाबुः *f.*, आलाबुः *f.*, तुम्बी, ककोरुः *m.*

Pun, *s.* श्लेषः, श्लेषोक्तिः *f.*, श्लेषवाक्यं, श्लेषालङ्कारः, द्व्यर्थवाक्यं, अर्थद्वयोक्तिः *f.*

To pun, *v. n.* श्लेषोक्तिं कृ, श्लेषवाक्यं वद् (c. 1. वदति -दितुं)

Punch, *s.* (Instrument for perforating) वेधनी, वेधनिका.—(Thrust, blow) आघातः, अभिघातः, प्रहारः; 'with the elbow,' कोल-

-ला, कीलाघातः, अरलिप्रहारः.—(Kind of drink) शर्करादिमिश्रितं मद्यजलीरादिरसमयं पानीयं.—(In a puppet show) पुत्तलिकाक्रीडायां वैदूषिकः or विदूषकः.

To PUNCH. *v. a.* (Pierce with a punch) पृष्ठीकृतयन्त्रेण व्यध्.—(With the elbow) अरलिना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्तुं), अरलिं प्रसार्य्य तड्, कीलाघातं कृ.

PUNCHEON, *s.* (Instrument), *see* PUNCH.—(A measure), *see* CASK.

PUNCHY, *a.* ह्रस्थूलः -ला -लं स्थूलह्रस्वः -स्वा -स्वं, घनह्रस्वः &c.

PUNCTILIO, *s.* सूक्ष्मविधयः, सूक्ष्मविधिः *m.*, सूक्ष्मनियमः, सूक्ष्मता, अतिसूक्ष्मता, सौक्ष्म्यं, अतिसौक्ष्म्यं, शिष्टाचारसौक्ष्म्यं, सभ्याचारसूक्ष्मत.

PUNCTILIOUS, *a.* अतिसूक्ष्मदृष्टिः -ष्टिः -ष्टि, अतिसूक्ष्मदर्शी -र्शिनी -र्शि (न्), अतिसूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मोपचारदर्शी, सूक्ष्माचारनिष्ठः -ष्ठा -ष्ठं, अतिसूक्ष्माचारी &c., सूक्ष्मनियमनिष्ठः &c., सूक्ष्मोपचारनिष्ठः &c., सूक्ष्मोपचारशीलः -ला -लं, सूक्ष्मादरनिष्ठः &c., सूक्ष्मनियमी &c., नियमनिष्ठः &c., अत्याचारी &c.

PUNCTILIOUSNESS, *s.* अतिसूक्ष्मदर्शनं, अतिसूक्ष्मदृष्टिः *f.*, सूक्ष्मोपचारनिष्ठा, सूक्ष्मनियमनिष्ठा, सूक्ष्मादरनिष्ठा, सूक्ष्मसत्कारनिष्ठा, सूक्ष्मादरशीलता, अत्याचारः.

PUNCTUAL, *a.* समयपालकः -का -कं, समयरक्षकः -का -कं, समयनिष्ठः -ष्ठा -ष्ठं, समयसेवी -विनी -वि (न्), कालरक्षकः -का -कं, कालनिष्ठः -ष्ठा -ष्ठं, कालपालकः -का -कं, कालसेवी &c., सामयिकः -की -कं, सङ्केतपालकः -का -कं, सङ्केतनिष्ठः &c., नियमपालकः &c., नियमनिष्ठः &c., वचननिष्ठः &c., प्रतिज्ञानिष्ठः &c., प्रतिज्ञापालकः &c., दृढनियमी &c.

PUNCTUALITY, PUNCTUALNESS, *s.* समयपालनं, समयनिष्ठा, समयसेवनं, कालनिष्ठा, कालसेवनं, कालपालनं, समयरक्षणं, कालरक्षणं, सङ्केतपालनं, सङ्केतनिष्ठा, नियमनिष्ठा, नियमपालनं, वचननिष्ठा, प्रतिज्ञानिष्ठा.

PUNCTUALLY, *adv.* यथासमयं, समयतस्, यथाकालं, कालतस्, नियमतस्, यथानियमं, यथासङ्केतं, समयनिष्ठापूर्व्वं, कालनिष्ठापूर्व्वं.

To PUNCTUATE, *v. a.* विरामचिह्नैर् अङ्क (c. 10. अङ्कयति -यितुं) विरामचिह्नानि लिख् (c. 6. लिखति, लेखितुं) or कृ, विरामचिह्नाङ्कनं कृ, विरामचिह्नाङ्कितं -तां कृ.

PUNCTUATED, *p. p.* विरामचिह्नाङ्कितः -ता -तं, अवसानचिह्नाङ्कितः -ता -तं.

PUNCTUATION, *s.* विरामचिह्नाङ्कनं, अवसानचिह्नाङ्कनं, विरामचिह्नलिखनं.

To PUNCTURE, *v. a.* सूक्ष्मकीलकाग्रेण व्यध् (c. 4. विध्यति, व्यद्धुं). *See To* PRICK.

PUNCTURE, *s* वेधः -धनं, सूक्ष्मकीलकवेधः, व्यधः -धनं. *See* PRICK.

PUNCTURED, *p. p.* वेधितः -ता -तं, कीलकवेधितः &c., कीलकविद्धः -द्धा -द्धं,

PUNDIT, *s.* पण्डितः, विद्वान् *m.* (स्), प्राज्ञः, बहुश्रुतः, अधीयानः. श्रोत्रियः, वेदविद् *m.*, वेदविद्वान् *m.*, अनुचानः. *See* LEARNED.

PUNGENCY, *s.* कटुता -त्वं, उग्रता -त्वं, तीव्रता, तिग्मता -त्वं, खरता, प्रखरता, प्राखर्य्यं, तैग्म्यं, तीक्ष्णता, तैक्ष्ण्यं, अरून्तुदत्वं, चण्डता -त्वं, उष्णता -त्वं, औषण्यं, ओषणः, दाहः, विदाहः.

PUNGENT, *a.* कटुः -टुः -टुी -टु, उग्रः -ग्रा -ग्रं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं, खरः -रा -रं, प्रखरः रा -रं, अरून्तुदः दा -दं, चण्डः -ण्डा -ण्डं, उष्णः -ष्णा -ष्णं, तिक्तः -क्ता -क्तं, विदाही -हिनी -हि (न्), दाही &c.

PUNINESS, *s.* अल्पता, क्षुद्रता -त्वं, शरीरक्षुद्रता, अल्पशरीरता, तनुता.

To PUNISH, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं), शास् (c. 2. शास्ति, -सितुं, c. 10 शासयति -यितुं), अनुशास्, ताड् (c. 10. ताडयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), दम् (c. 10. दमयति -यितुं) वियत् (c. 10. -यातयति -यितुं) चन्द् (c. 9. चन्नाति चन्दुं), दण्डं प्रणी *See*

To INFLICT.—(Pain) पीड्, व्यध्, तप्, सन्तप्.

PUNISHABLE, *a.* दण्डनीयः -या -यं, दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डार्हः -र्हा -र्हं, दण्डनार्हः &c., ताडनीयः -या -यं, ताड्यः -ड्या -ड्यं, शासनीयः -या -यं, शास्यः -स्या -स्यं, शासनार्हः -र्हा -र्हं, दमनीयः -या -यं, दण्डयोग्यः -ग्या -ग्यं, शिक्षणीयः &c., शिक्ष्यः -क्ष्या -क्ष्यं, शिक्षार्हः &c., विनेयः -या -यं.

PUNISHED, *p. p.* दण्डितः -ता -तं, शासितः -ता -तं, शिष्टः -ष्टा -ष्टं, ताडितः -ता -तं, निगृहीतः &c., पीडितः &c., विनीतः &c., शिक्षितः &c.

PUNISHER, *s.* दण्डयिता *m.* (तृ), शासिता *m.*, शास्ता *m.*, शासकः, ताडयिता *m.*, ताडकः, दण्डप्रणेता *m.*, शिक्षकः.

PUNISHMENT, *s.* दण्डः, दण्डनं, शासनं, अनुशासनं, शास्तिः *f.*, शिष्टिः *f.*, ताडनं, साहसं, दमः, दमनं, दमथः -थं, दमथुः *m.*, निग्रहः, शिक्षणं; 'corporal punishment,' शरीरदण्डः -डनं, शारीरदण्डः, शारीरिकदण्डः, शारीरः, देहदण्डः -डनं; 'just punishment,' सम्यग्दण्डनं; 'infliction of punishment,' दण्डयोगः, दण्डप्रयोगः, दण्डप्रणयनं, *see* INFLICTION; 'capital punishment,' वधदण्डः, प्राणदण्डः, प्राणान्तदण्डः, जीवान्तदण्डः, देहान्तदण्डः, उत्तमसाहसं; 'severity of punishment,' दण्डपारुष्यं; 'repeated punishment,' चिरादण्डः; 'fear of punishment,' दण्डभीतिः *f.*, दण्डभयं; 'through fear of it,' दण्डभयात्.

PUNITIVE, PUNITORY, *a.* दाण्डः -ण्डी -ण्डं, दाण्डिकः -की -कं, दण्डसम्बन्धी -न्धिनी &c., साहसिकः -की -कं, दण्डविषयकः -का -कं, दण्ड in comp.

PUNJÁB, *s.* (The country) पञ्चनदः. *See* PANJÁB.

PUNKA, *s.* तालवृन्तः -न्तकं, धर्वित्रं, मरुदान्दोलः.

PUNSTER, *s.* सश्लेषवक्ता *m.* (क्तृ), सश्लेषवादी *m.* (न्).

PUNT, *s.* तरालुः *m.*, तरान्युः *m.*, तरण्डः -ण्डं, वहित्रं.

PUNY, *a.* क्षुद्रः -द्रा -द्रं, अल्पः -ल्पा -ल्पं, क्षुद्रशरीरः -रा -रं.

PUP, *s.* कुक्कुरशिशुः *m.*, कुक्कुरशावकः, शिशुः *m.*, डिम्भः.

To PUP, *v. n.* कुक्कुरशावकान् सू or प्रसू or जन्, कुक्कुरशिशून् सू.

PUPIL, *s.* (Scholar) शिष्यः, विद्यार्थी *m.* (न्), छात्रः, अन्तेवासी *m.* (न्), अन्तेवासिजनः, अध्यायी *m.*, अध्येता *m.* (तृ), प्राचार्य्यः, बालः, शिशुः *m.*, माणवकः, मृडक्कः, प्रबालः.—(Of the eye) तारा, तारका, अक्षितारा -रका, तारः -रकं, कनीनिका. दृष्टिः *f.*, लोचकः, ज्योतिस् *n.*, नयना.

PUPILAGE, *s.* शिष्यत्वं, शिष्यावस्था, शिष्यदशा, विद्यार्थित्वं -ता, अन्तेवासित्वं, बालत्वं, शिशुत्वं -ता, शैशवं.

PUPILARY, *a.* शैष्यः -ष्यी -ष्यं, शिष्यसम्बन्धी &c., शैशवः -वी -वं.

PUPPET, *s.* पुत्रिका, दारुपुत्रिका, पाञ्चालिका, पाञ्चलिका, पाञ्चाली, पुत्तली -लिका, शालाद्री, शालभञ्जी -ञ्जिका, दारुस्त्री, दारुगौः, कुरुण्टी, अङ्गलिकारिका, यावा.

PUPPET-SHOW, *s.* पुत्तलिकाक्रीडा, पुत्रिकाक्रीडा, पाञ्चलिकाक्रीडा.

PUPPY, *s.* कुक्कुरशावकः, कुक्कुरशिशुः *m.*, शिशुः *m.*, डिम्भः.—(Conceited person) दर्शनीयमानी *m.* (न्), आत्माभिमानी *m.*, मानी *m.*, रूपगर्वितः, दाम्भिकः.

To PUR, *v. n.* मार्जारवत् सन्तोषसूचकं रणरणशब्दं कृ or रणत्कारं कृ.

PURÁNA, *s.* (Sacred and mythological poem, derived from the same religious system as the Rámáyana and Mahábhárata, or from the mytho-heroic style of Hindú belief; being a departure from the purer system of the Vedas. They are eighteen in number, and each one is supposed to treat of five topics, viz. 1. the creation, 2. the destruction and renovation of worlds, 3. the genealogy of gods and heroes, 4. the reign of the Manus, 5. the transac-

tions of their descendants. From this five-fold division, and from the antiquity of the stories narrated, come the general names पुराणं, पञ्चलक्षणं. The specific titles are as follows: 1. ब्राह्मपुराणं or ब्राह्मपुराणं, 2. पाद्मपुराणं, 3. विष्णुपुराणं, 4. शैवपुराणं, 5. भागवतपुराणं or भगवत्पुराणं, 6. नारदपुराणं, 7. मार्कण्डपुराणं, मार्कण्डेयपुराणं, 8. आग्नेयपुराणं, 9. भविष्यपुराणं, 10. ब्रह्मवैवर्त्तपुराणं, 11. लैङ्गपुराणं, 12. वाराहपुराणं, 13. स्कान्दपुराणं, 14. वामनपुराणं, 15. कौर्म्मपुराणं, 16. मात्स्यपुराणं, 17. गारुडपुराणं, 18. ब्रह्माण्डपुराणं. Sometimes a Puráṇa called the वायुपुराणं or वायवीयपुराणं is substituted for the शिवपुराणं, and another called the नरसिंहपुराणं for the ब्रह्माण्डपुराणं. These eighteen mythological works are the repository of the modern and popular religious creed of the Hindús. They are amplifications of the two great heroic and historical poems or Itihása, called Rámáyana and Mahábhárata, giving a more connected and definite explanation of the mythical fictions and historical traditions contained in those works. They are consequently remarkable for attributing paramount importance to the two divinities, Śiva and Vishnu, who, under one form or other, are almost the sole objects that are made to claim homage. Each separate Puráṇa cannot, therefore, be taken as a guide to Hindú belief as a whole, but rather to some separate branch of it, in which the worship of either one of these deities in particular incarnations is encouraged in preference to that of the other. The most celebrated of them all is the fifth in the above list, or Bhágavata Puráṇa, designed for the glorification of Bhagavat or Vishnu, in the form of Krishna. This exercises a more direct and powerful influence on the opinions of the natives of India than any other. The third, or Vishnu Puráṇa, translated by Professor Wilson, is also a work of great celebrity, and conforms most closely to the definition of Panchalakshanam, *i. e.* treating of five specified topics. There are also eighteen Upapuráṇas, or similar poems of inferior sanctity and different appellations, viz.: 1. सनत्कुमारं, 2. नारसिंहं, 3. नारदीयं, 4. शिवं, 5. दुर्वाससं, 6. कापिलं, 7. मानवं, 8. औशानसं, 9. वारुणं, 10. कालिका, 11. शाम्बं, 12. नन्दिकेश्वरं, 13. सौरं, 14. पाराशरं, 15. आदित्यं, 16. माहेश्वरं, 17. भागवतं, 18. वशिष्ठं. The collector and arranger of the Puráṇas, as well as of the more ancient Vedas, was a sage named Krishna कृष्णः, or Dwaipáyana द्वैपायनः, or Krishnadwaipáyana कृष्णद्वैपायनः. The surname of Vyása व्यासः or 'Arranger' (from the root अस् with वि, meaning to 'dispose' or 'set in order'), was given to him, and is now used to denote any expounder of the Vedas or Puráṇas. His seat is called व्यासासनं, व्यासपीठं.

PURANIC, *a.* पौराणिकः -की -कं, पौराणः -णी -णं, पुराणविषयकः &c.

PURBLIND, *a.* अस्पष्टदृक् *m. f. n.* (ज्), अव्यक्तदृक् *m. f. n.*, हतदृष्टिः -ष्टिः -ष्टि, अदीर्घदृष्टिः &c., ईषदन्धः -न्धा -न्धं.

PURCHASABLE, *a.* क्रेयः -या -यं, क्रेतव्यः -व्या -व्यं, क्रय्यः -य्या -य्यं.

To PURCHASE, *v. a.* क्री (c. 9. क्रीणाति -णीते, क्रेतुं), उपक्री, संक्री, मूल्यं दत्त्वा लभ् or प्राप्, पण् (c. 1. पणते -णितुं), पणीकृ

PURCHASE, *s.* (The act of buying) क्रयः, क्रययं, संक्रययं, उपक्रयः, क्रीणनं.—(Thing purchased) क्रीतवस्तु *n.*, क्रीतद्रव्यं.—(Hold, force) ग्रहणं, ग्राहः, संग्राहः, संग्रहणं, ग्रहः, आग्रहः, धृतिः *f.*, ग्रहणशक्तिः *f.*, शक्तिः *f.*

PURCHASED, *p. p.* क्रीतः -ता -तं, क्रयक्रीतः &c., संक्रीतः &c., उपक्रीतः &c.

PURCHASE-MONEY, *s.* क्रयमूल्यं, क्रयणमूल्यं, मूल्यं, अर्घः.

PURCHASER, *s.* क्रयी *m.* (न्), क्रेता *m.* (तृ), क्रायकः, क्रयिकः, क्रयकर्त्ता *m.*

PURE, *a.* (Clean, free from dirt) निर्मलः -ला -लं, विमलः -ला -लं, अमलः &c., अमली -लिनी -लि (न्), मलहीनः -ना -नं, शुद्धः -द्धा -द्धं, विशुद्धः &c., पवित्रः -त्रा -त्रं, स्वच्छः -च्छा -च्छं, अच्छः &c., शुचिः -चिः -चि.—(Free from sin or guilt, morally pure) शुद्धः -द्धा -द्धं, शुचिः -चिः -चि, पुण्यः -ण्या -ण्यं, अनघः -घा -घं, निष्कलङ्कः -ङ्का -ङ्कं, निष्पापः -पा -पं, अदुष्टपापः &c., अपापः &c., पापहीनः -ना -नं, अकृतपापः &c., अज्ञातपापः &c., अकल्मषः -षा -षं, धूतकल्मषः &c., अलिप्तः -प्ता -प्तं, साधुः -ध्वी -धु, अदुष्टदोषः -षा -षं, साध्विकः -की -कं, प्राञ्जलः -ला -लं.—(Ceremonially clean) पवित्रः -त्रा -त्रं, पूतः -ता -तं, पावनः -ना -नं, पवनः -ना -नं, शुचिः -चिः -चि, शौचवान् -वती -वत् (त्), शौचोपेतः -ता -तं, मेध्यः -ध्या -ध्यं.—(Unadulterated, incorrupted) अदूषितः -ता -तं, अदुष्टः -ष्टा -ष्टं, शुद्धः -द्धा -द्धं, अविकारितः -ता -तं, अभ्रष्टः -ष्टा -ष्टं, असंसृष्टः -ष्टा -ष्टं.—(Mere, simple) केवलः -ला -लं, केवली &c., मात्रकः -का -कं, मात्र in comp., शुद्धः &c.—(Free from corrupt words, as speech) अपशब्दहीनः -ना -नं, अपशब्दरहितः -ता -तं, अपशब्दशून्यः -न्या -न्यं, शुद्धः -द्धा -द्धं, अपप्रयोगहीनः -ना -नं.—(Chaste, ignorant of carnal intercourse) अज्ञातव्यवायः -या -यं, अज्ञातमैथुनः -ना -नं; 'as a woman,' पुरुषास्पृष्टा.—(Of pure descent or blood) मौलः -ली -लं.—(Pure in heart or mind) शुद्धमतिः -तिः -ति, शुद्धात्मा -त्मा -त्म (न्), विमलात्मा &c., अमलात्मा &c., निर्मलान्तःकरणः -णा -णं, शुद्धहृदयः -या -यं, प्रयतात्मा &c.

PURENESS, *s.* निर्मलता, शुचिता, शुद्धता -त्वं, शुद्धिः *f.* *See* PURITY.

PURGATION, *s.* रेचनं, विरेचनं, रेकः, विरेकः, शोधनं, शुद्धिः *f.*

PURGATIVE, *a.* रेचकः -की -कं, विरेचकः &c., शोधकः -का -कं, उदरशोधकः &c., अधोभागहरः -रा -रं, अतिसारी -रिणी -रि (न्), सारकः -का -कं, अतिसारकः &c.

PURGATIVE, *s.* (Medicine) रेचकं, रेचनं, विरेचनं, विरेकः, अधोभागहरं, उदरशोधनं, अधोभागशोधकं, सारकं, सारकौषधं.

PURGATORY, *a.* शोधकः -का -कं, पावनः -ना -नं, पापकः -का -कं, पापशोधनः -ना -नं, पापनाशकः &c., पापनाशनः -ना -नं, पापघ्नः -घ्नी -घ्नं, अघनाशनः &c., अघमर्षणः -णी -णं.

PURGATORY, *s.* पापशोधनस्थानं, अघशोधनस्थानं, यातनास्थानं; 'pain of purgatory,' यातना, भैरवी यातना.

To PURGE, *v. a.* (The bowels, &c.) विरिच् (c. 7. -रिणक्ति -रिङ्क्ते -रेक्तुं),

रिच्, उदरं or अधोभागं शुध् (c. 10. शोधयति -यितुं), उदरशोधनं कृ, मलं सृ in caus. (सारयति -यितुं), मलशोधनं कृ, मलशुद्धिं कृ.—(Cleanse from guilt) पापात् शुध् or परिशुध् or विशुध्, पापशोधनं कृ, अघशोधनं कृ.—(Cleanse in general) पू, परिपू, शुध्, मलापकर्षणं कृ.

PURGE, *s.* रेचनं, विरेचनं, रेचकं, विरेकः, उदरशोधनं, अधोभागहरं.

PURGED, *p. p.* (As the bowels) रेचितः -ता -तं, विरेचितः &c., रिक्तः -क्ता -क्तं, विरिक्तः &c., शोधितः -ता -तं, सारितः &c.—(Cleared) शोधितः &c., पूतः &c., पावितः &c.

PURGING, *s.* (Of the bowels) रेचना -नं, रेकः, विरेकः, सारणः, अतिसारः. *See* DIARRHŒA, DYSENTERY.

PURIFICATION, *s.* शोधनं, संशोधनं, विशोधनं, परिशोधनं, शोधः, परिशोधः, शुद्धिः *f.*, संशुद्धिः *f.*, विशुद्धिः *f.*, पावनं, पवित्रीकरणं, मार्जनं, परिमार्जनं, निर्मलीकरणं, विमलीकरणं, मलापकर्षणं, मलापनयनं, मलहरणं, शुचीकरणं, क्षालनं, प्रक्षालनं, निर्णेकः, स्वच्छीकरणं.—(State) शुद्धिः *f.*, संशुद्धिः, शुद्धता -त्वं, विशुद्धता, शोधितत्वं, शौचं, शुचिता, पवित्रता, पूतत्वं, पावितत्वं, पूतिः *f.*, निर्मलता; 'of a new house,' शान्त्योद्धारः, वास्तुसंज्ञनं.

PURIFICATIVE, PURIFICATORY, *a.* पावकः -का -कं, पावनः -ना -नं, पावी -विनी -वि (न्), पावमानः -ना -नं, शोधकः -का -कं, शोधनः -ना -नं, संशोधकः &c., विशोधकः &c., शुद्धिकरः -रा -री -रं, मलापकर्षकः -का -कं.

PURIFIED, *p. p.* पावितः -ता -तं, पूतः &c., परिपूतः &c., शोधितः -ता -तं, शुद्धः -द्धा -द्धं, संशोधितः &c., संशुद्धः &c., विशुद्धः &c., पवित्रः -त्रा -त्रं, पवित्रितः &c., पवित्रीकृतः -ता -तं, कृतशौचः -चा -चं, मार्जितः &c., प्रक्षालितः &c., निर्णिक्तः -क्ता -क्तं, धौतः -ता -तं, अवदातः &c.; 'from sin' पापशोधितः -ता -तं, पापपूतः -ता -तं, अघनिष्कृतः -ता -तं; 'by austerity,' प्रयतः -ता -तं; 'to be purified,' शुध् (c. 4. शुध्यति -ते, शोद्धुं), पू in pass. (पूयते), पवित्रीभू, शुद्धीभू.

To PURIFY, *v. a.* पू (c. 9. पुनाति -नीते, पवितुं, c. 10. पावयति -यितुं), परिपू, विपू, शुध् (c. 10. शोधयति -यितुं), विशुध्, परिशुध्, संशुध्, शुद्धीकृ, पवित्रीकृ, पवित्र (nom. पवित्रयति -यितुं), निर्मलीकृ, विमलीकृ, मृज् (c. 1. मार्ष्टि, c. 2. मार्ष्टि -ष्टुं), सम्मृज्, निर्णिज् (c. 3. -णेनेक्ति -णेक्तुं), धाव् (c. 10. धावयति -यितुं), शुचीकृ, मलं हृ (c. 1. हरति, हर्तुं) or अपनी (c. 1. -नयति -नेतुं), मलापकर्षणं कृ, परिष्कृ, प्रक्षल्.

PURIFYING, *part.* or *a.* पुनानः -ना -नं, पावमानः -ना -नं, पवमानः &c., पावनः -ना -नं, पावकः -का -कं. *See* PURIFICATIVE.

PURITAN, *s.* पवित्रमतावलम्बी *m.* (न्), पवित्रमतधारी *m.* (न्).

PURITY, *s.* (Freedom from dirt, defilement &c.) निर्मलता -त्वं, नैर्मल्यं, निर्मात्यं, विमलता, वैमल्यं, मलहीनता, मलराहित्यं, शुद्धता -त्वं, शुद्धिः *f.*, विशुद्धिः *f.*, पवित्रता, पूतता, पूतिः *f.*, शुचिता, शौचं, मेध्यता, अलिप्तता.—(Clearness, transparency) प्रसादः, प्रसन्नता, प्रसत्तिः, *f.*, स्वच्छता, वैशद्यं, विशदत्वं.—(Freedom from guilt, moral purity) शुचिता -त्वं, शुद्धता, शुद्धिः *f.*, अनघता, पापहीनता, अघहीनता, निष्पापत्वं, पुण्यता, साधुता, निष्कलङ्कता.—(Purity of mind) चित्तशुद्धिः *f.*, मतिशुद्धता, विमलचित्तत्वं, शुद्धमतित्वं.—(Chastity in a woman) सतीत्वं, पुरुषास्पृष्टता, साध्वीत्वं.—(Of language) शुद्धिः अपशब्दहीनता.

To PURL, *v. n.* नदीप्रकारेण रवरवशब्दं कृ or सुभगस्खलितां कृ.

PURLIEU, *s.* समन्तः, सामन्तदेशः, चत्वैन्तदेशः, उपान्तदेशः, सामन्तं, परिसरः.

To PURLOIN, *v. a.* चुर्, हृ, अपहृ, मुष्, परिमुष्. *See To* PILFER.

PURLOINED, *p. p.* अपहृतः -ता -तं, मूषितः -ता -तं, चौरहृतः -ता -तं.

PURLOINER, *s.* अपहर्त्ता *m.* (र्तृ), परिमोषी *m.* (न्), स्तेयकृत्. *See* PILFERER.

PURPLE, *a.* धूम्रः -म्रा -म्रं, धूम्रवर्णः -र्णा -र्णं, धूमलः -ला -लं, कृष्णालोहितः -ता -तं, नीललोहितः &c., धूमाभः -भा -भं, बालसन्ध्याभः &c., धूम्ररुक् *m. f. n.* (च्).

PURPLE, *s.* धूम्रवर्णः, धूम्रः, धूमलः, धूमलवर्णः, रम्रः.

To PURPLE, *v. a.* धूम्रीकृ, लोहितीकृ, धूम्रवर्णेन रञ्ज् (c. 10. रञ्जयति -यितुं).

PURPLISH, *a.* ईषद्धूम्रः -म्रा -म्रं, आधूम्रः &c., आधूमलः -ला -लं.

PURPORT, *s.* अर्थः, अभिप्रायः तात्पर्य्यं, आशयः, अभिप्रेतं, उद्देशः, भावार्थः, भावः, विवक्षितं, विवक्षा, अन्वयः, छन्दः. *See* MEANING.

To PURPORT, *v. a.* or *n.* अभिप्रे, उद्दिश्, वच् in des., अर्थवान् &c. भू or अस्. *See To* MEAN.

PURPOSE, *s.* अभिप्रायः, अभिप्रेतं, चिकीर्षितं, चिकीर्षा, आशयः, सङ्कल्पः, मनःसङ्कल्पः, उद्देशः, अर्थः, तात्पर्य्यं, इच्छा, आकांक्षा, कार्य्यं, बुद्धिः *f.*, कल्पना, परिकल्पना, आकूतं, मनोनिरूपणं, चिन्ता, प्रयोजनं, उपयोगः, *See* INTENTION; 'fixed purpose,' निश्चयः, निश्चितं; 'of unfailing purpose,' सत्यसङ्कल्पः -ल्पा -ल्पं; 'declared purpose,' ईरिताकूतं, 'one who does not effect his purpose,' अकृतार्थः -र्था -र्थं, असिद्धार्थः &c., अचरितार्थः &c., वृथार्थः &c., अकृतकृत्यः -त्या -त्यं; 'one who effects it,' कृतार्थः &c.; 'for the purpose of,' अर्थं or अर्थे or हेतोः affixed, कृते, निमित्ते; 'for the purpose of religion, or for religious purposes,' धर्म्मार्थं; 'to no purpose,' वृथा, मुधा, व्यर्थः -र्था -र्थं; 'for what purpose,' किमर्थं, किमुद्दिश्य; 'on purpose,' बुद्धिपूर्व्वं, बुद्धा. *See* PURPOSELY.

To PURPOSE, *v. a.* अभिप्रे, अभिप्रायं कृ, कृ in des., उद्दिश्, मनसा उद्दिश्, अभिसन्धा, इष्, परिकल्प्, सङ्कल्पं कृ, बुद्धिं कृ. *See To* INTEND.

PURPOSED, *p. p.* अभिप्रेतः -ता -तं, चिकीर्षितः &c., उद्दिष्टः -ष्टा -ष्टं.

PURPOSELY, *adv.* बुद्धिपूर्व्वं -र्व्वकं, बुद्धिपुरःसरं, मतिपूर्व्वं, साभिप्रायं, अभिप्रायपूर्व्वं, बुद्धा, कामतस्, इच्छातस्. *See* INTENTIONALLY.

PURSE, *s.* कोषः धनकोषः, मुद्राकोषः, ग्रन्थिबन्धः, ग्रन्थिः *m.*, कौलिकं.

To PURSE, *v. a.* (Put in a purse) कोषे निविश्; in caus.—(Contract) संकुच्, संदु, संकृ, आकुञ्च्.

PURSE-CUTTING, *s.* ग्रन्थिभेदः, ग्रन्थिभेदनं, ग्रन्थिछेदः, कोषछेदः.

PURSE-PRIDE, *s.* धनगर्वः, धनदर्पः, धनाभिमानं, अर्थगर्वः, द्रव्याभिमानं.

PURSE-PROUD, *a.* धनगर्वितः -ता -तं, द्रव्यगर्वितः &c., धनाभिमानी -निनी &c.

PURSER, *s.* युद्धनावि कोषाधिकारी *m.* (न्), or धनभोजनादिपरिचल्पकः.

PURSUANCE, *s.* अनुसरणं, अनुसारः, अनुवर्त्तनं, अनुगमनं. 'in pursuance of,' अनुसारेण, अनुसारतस्, अनुरूपेण.

PURSUANT, *a.* अनुसारी -रिणी -रि (न्), अनुरूपः -पा -पं, अनुवर्त्ती &c.

PURSUANTLY, *adv.* अनुसारेण -रात्, अनुसारतस्, अनुरूपेण.

To PURSUE, *v. a.* (Follow) अनुसृ (c. 1. -सरति -सर्त्तुं), अनुगम् (c. 1. -गच्छति -गन्तुं) अनुया (c. 2. -याति -तुं), अनुवृत्, अनुव्रज्, अनुक्रम्.—(Chase) अनुधाव्, (c. 1. -धावति -धितुं), पश्चाद् धाव्, अनुसृ, पश्चाद् वृत्.—(Prosecute, practise), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं) आस्था, आचर् (c. 1. -चरति -रितुं), समाचर्, सेव्, निषेव्, अनुसेव्. *See* PROSECUTE.—(Carry on) निर्वह् in caus., प्रवृत् in caus., प्रणी, सम्पादी, विधा.—(Endeavour to obtain) आप् in des. (ईप्सति -प्सितुं), अभ्याप in des., प्राप् in des., लभ् in des. (लिप्सते -प्सितुं) अभिलभ्.—Imitate) अनुकृ, अनुगम्.

PURSUED, *p. p.* (Followed) अनुसृतः -ता -तं, अनुगतः &c., अनुयातः

&c., अनुगम्यमानः -ना -नं, अन्वीयमानः &c.—(Chased) अनुधावितः -ता -तं.—(Prosecuted, practised) अनुष्ठितः -ता -तं, आचरितः &c., सेवितः -ता -तं, निषेवितः &c.

Pursuer, *s.* अनुगामी *m.* (न्), अनुयायी *m.*, अनुसारी *m.*, अनुधावकः.

Pursuit, *s.* (Following) अनुसरणं, अनुयन्त्रनं, अनुगमनं, अनुव्रजनं. —(Running after, chasing) अनुधावनं, अभिधावनं, पश्चाद् धावनं, अनुसरणं, अनुसारः, अन्वेषणं, मार्गणं, मृगणं.—(Prosecution, carrying on with a view to obtain) अनुष्ठानं, सेवनं, निषेवनं, अनुसेवनं, आचरणं, प्रवृत्तिः *f.*, प्रवर्त्तनं, व्यापारः, व्यवसायः, निष्ठता, अभियोगः, अनुशीलनं, परिशीलनं, अनुसन्धानं.—(Course of occupation, employment) व्यापारः, व्यवसायः, कर्म्म *n.* (न्), उद्योगः, उद्यमः, प्रवृत्तिः *f.*, व्यवहारः, कार्य्यं; 'interesting pursuit,' विनोदः, विनोदजनकव्यापारः.

Pursuivant, *s.* राजदूतः, राजदूतपरिचरः, वेत्रधरः, याष्टीकः.

Pursy, *a.* दुःश्वासी -सिनी &c., प्राणकृच्छ्रग्रस्तः -स्ता -स्तं, हृत्स्थूलः &c.

Purulence, purulency, *s.* पूयत्वं, सपूयत्वं -ता, पूयपूर्णता, पूययुक्तता.

Purulent, *a.* सपूयः -या -यं, पूयमयः -यी -यं, पूयरूपः -पा -पं, पूययुक्तः -क्ता -क्तं, पूयपूर्णः -र्णा -र्णं.—(Running with pus) पूयस्रावी -विणी -वि (न्).

To purvey, *v. a.* and *n.* खाद्यद्रव्याणि परिकॢप् (c. 10. -कल्पयति -यितुं) or उपकॢप् or सम्भृ (c. 1. -भरति -भर्त्तुं) or युज् (c. 10. योजयति -यितुं) or समायुज्, भोजनपरिकल्पनं कृ, भोजनसम्भारं कृ, आहारयोजनां कृ, आहारनिर्व्वाहं कृ.

Purveyance, *s.* खाद्यद्रव्यपरिकल्पनं, भोजनपरिकल्पनं, अन्नादिपरिकल्पनं, भोजनसम्भारः, आहारयोजना, आहारनिर्व्वाहः, परिकल्पनं, निर्व्वाहः.

Purveyor, *s.* भोजनपरिकल्पकः, अन्नादिपरिकल्पकः, भोजनाधिकारी *m.* (न्), भोजनाधिकृतः, आहारयोजकः.

Pus, *s.* पूयं, पूयरक्तं, पूयशोणितं, दूष्यं, मलजं, क्षतजं, प्रसितं, अवक्लेदः.

To push, *v. a.* and *n.* (Make a thrust) तुद् (c. 10. ताडयति -यितुं), प्रभृ (c. 10. -भारयति -यितुं), प्रसारणं कृ, आहन् (c. 2. -हन्ति -न्तुं), अभिहन्, अभ्याहन्.—(Impel, move by pressure) हस्ताभ्याम् अवलम्ब्य चल् (c. 10. चालयति -यितुं) or सञ्चल or सृ (c. 10. सारयति -यितुं) or स्थानान्तरीकृ or प्रेर् or प्रणुद् or नुद् or कृष् or समाकृष्.—(Push aside, push out) अपभृ in caus., बहिष्कृ, बहिःकृ. —(Push forward) प्रभृ, प्रचल in caus., अग्रे चल् or सृ, अग्रे नी.

Push, pushing, *s.* ताडनं, आहतिः *f.*, आघातः, अभिघातः, अभ्याघातः, प्रहारः, प्रमारणं, अपमारणं, सारणं.—(Impelling) प्रणोदः, प्रेरणं -णा, वेगः.—(Vigorous effort, onset) सुयत्नः, आक्रमः -मणं.

Pushed, *p. p.* ताडितः -ता -तं, आहतः &c., अभिहतः &c., प्रसारितः -ता -तं, अपसारितः &c., सारितः &c., चालितः &c., प्रेरितः -ता -तं, प्रणोदितः &c., प्रणुन्नः -न्ना -न्नं, स्थानान्तरीकृतः &c., बहिष्कृतः &c.

Pushing, *a.* (Enterprising) साहसिकः -की -कं, साहसशीलः -ला -लं, साहसबुद्धिः -द्धिः -द्धि, उद्योगी -गिनी &c., अनुद्योगी &c., उद्योगशीलः -ला -लं, अनुद्यमी &c., धृष्टः -ष्टा -ष्टं, प्रगल्भः -ल्भा -ल्भं, प्रतिभानवान् -वती -वत् (त्).

Pusillanimity, *s.* भीरुता, कातरता, धैर्य्यहीनता, शौर्य्यहीनता, वीर्य्यहीनता, निर्वीर्य्यं, कार्पण्यं, कृपणबुद्धित्वं, क्लीवता, भीरुहृदयत्वं, कापुरुषत्वं.

Pusillanimous, *a.* भीरुहृदयः -या -यं, कृपणबुद्धिः -द्धिः -द्धि, कातरबुद्धिः &c., धैर्य्यहीनः -ना -नं, शौर्य्यहीनः &c., वीरुषहीनः &c.

Puss, pussy, *s.* मार्जारः, विडालः. *See* Cat.

Pustule, *s.* स्फोटः -टकः, विस्फोटः, रक्तपटी, रक्तपरटी, घटी, घरटी, व्रणः, तनुव्रणः, गण्डः, गुटिका. *See* Pimple.

Pustulous, *a.* स्फोटपूर्णः -र्णा -र्णं, स्फोटमयः -यी -यं, सस्फोटः -टा -टं.

To put, *v. a.* (Lay, place, set) धा (c. 3. दधाति, धातुं), स्था in caus. (स्थापयति -यितुं), क्षु in caus. (क्षेपयति -यितुं), निविश् (c. 10. -वेशयति -यितुं), सन्निविश्, न्यस् (c. 4. -अस्यति -असितुं), विन्यस्, आरुह् in caus. (-रोपयति -यितुं), दा (c. 3. ददाति, दातुं), धृ (c. 1. धरति, धर्त्तुं), कृ (c. 8. करोति, कर्त्तुं). *See To* lay, place.—(Apply) आधा, संयुज् (c. 10. -योजयति -यितुं), आयुज्, युज्, क्षु or सम्भृ in caus.—(Incite) प्रवृत् in caus., प्रोत्सह् in caus., प्रेर्.—(Put a question), *see To* propose.—(Put about, as a ship, &c.) नौमार्गं परिवृत् (c. 10. -वर्त्तयति -यितुं), मार्गपरिवर्त्तनं कृ, गतिपरिवर्त्तनं कृ.—(Put away) अपसृ (c. 10. -सारयति -यितुं), निःसृ, परिष्कृ, दूरीकृ.—(Put aside, put by) न्यस्, सन्यस्, व्युदस्, निधा, रक्ष्, परिरक्ष्.—(Put down, lay down) न्यस्, उपन्यस्, निधा, अवधा, निक्षिप्.—(Put down), *see To* repress, degrade.—(Put forth, extend) प्रसृ in caus.—(Put forth), *see To* sprout, bud.—(Put forth), *see To* exert; 'he puts forth his strength,' कृतशक्तिर् भवति.—(Put off), *see To* postpone.—(Put off, divest one's self) वस्त्राणि अवनी (c. 10. -तारयति -यितुं), उत्कृष्, उन्मुच्, अवमुच्, विमुच्, उच्छद्, अपनह्.—(Put off), *see To* discard.—(Put off from land) तीराद् अपगम् or अपया or अपसृ. —(Put on clothes, dress) वस्त्रं परिधा or पिधा, वस्, प्रवस्, विवस्, प्रतिवस्, वेष्ट्, परिवेष्ट्, प्रवेष्ट्, आच्छद्, प्रवृ, संव्ये, परिव्ये, परिधा, वस्त्राणि परिधा or आच्छद् or आमुच्, प्रसाध्, वस्त्र, संवस्त्र, *see To* dress, invest.—(Put on armour) नह् (c. 4. नह्यति -ते, नद्धुं), सन्नह्, दंशनं सन्नह्, वर्म्म (c. 10. वर्म्मयति -यितुं), संवर्म्म.—(Put on shoes) पादुके अधिरुह् (c. 1. -रोहति -रोढुं) or रुह् or आरुह in caus.—(Put on, assume) ग्रह्, धृ (c. 10. धारयति -यितुं), स्वीकृ, अङ्गीकृ. —(Put out, extinguish) शम् in caus., उपशम्, प्रशम्, निशम्, निर्व्वा in caus.; 'having put out the fire,' अग्निं शमयित्वा or निशाम्य.—(Put out, extend) प्रसृ in caus.—(Put out), *see To* confuse, disconcert.—(Put out the eyes) लोचने उत्पद् in caus. or उत्कृष् or उच्छिद्.—(Put to it), *see To* distress, perplex.—(Put together) सन्धा, समाधा, संयुज्.—(Put up, lodge) उष्, उष्टरणगृहे वस्, रात्रौ अवत्.—(Put up with) सह् (c. 1. सहते, सोढुं), क्षिपह्.—(Put up), *see To* pack.—(Put up), *see To* expose.—(Put upon), *see To* deceive.—(Put in order) विरच्, रच्, विन्यस्, मञ्जीकृ.—(Put in mind), *see To* remind. —(Put in practice), *see To* exercise, practise.—(Put in fear), *see To* frighten.—(Put in writing), *see To* commit to writing.—(Put in jeopardy) संशयितं -तां कृ, *see To* jeopardy.—(Put to death), *see To* kill.

Put, *p. p.* स्थापितः -ता -तं, अर्पितः &c., निहितः &c., निवेशितः &c., न्यस्तः -स्ता -स्तं. *See* Placed.—(Put on, as clothes) परिहितः -ता -तं.—(Put off, discarded) अवतारितः -ता -तं, अपास्तः -स्ता -स्तं, सन्यस्तः &c., व्युदस्तः &c., त्यक्तः -क्ता -क्तं.

Put, *s.* (Clown) वृषलः, ग्राम्यजनः.—(Harlot) वेश्या.

Putative, *a.* लोकप्रसिद्धः -द्धा -द्धं, जनप्रसिद्धः &c., लोकमतः -ता -तं.

Putid, *a.* क्षुद्रः -द्रा -द्रं, कुत्सितः -ता -तं, कृपणः -णा -णं, तुच्छः &c

Putidness, *s.* क्षुद्रता, कुत्सितत्वं, तुच्छता -त्वं, कृपणता, कार्पण्यं.

Put-off, *s.* (An excuse) अपदेशः, व्यपदेशः, छद्म *n.* (न्), छलं.

PUTREFACTION, *s.* पूतिः *f.*, पूतत्वं -ता, गलितत्वं, गलनं, विगलनं, गलितावस्था, विलयः -यनं, दौर्गन्ध्यं, दौर्गन्धिः *m.*, दुर्गन्धता, पूतिगन्धः.

PUTREFIED, *p. p.* गलितः-ता-तं, विगलितः &c., पूतीभूतः &c., विलीनः-ना-नं.

To PUTREFY, *v. a.* पूतीकृ, गल् in caus. (गालयति, गलयति -यितुं), विगल्, गलितीकृ, विली in caus. (-लापयति -यितुं).

To PUTREFY, *v. n.* गल् (c. 1. गलति -लितुं), विगल्, गलितः-ता-तं भू, पूतीभू, विली (c. 4. -लीयते -लेतुं), प्रविली, दुर्गन्धः-न्धा-न्धं भू, पूतिगन्धिकः-का-कं भू.

PUTRESCENCE, *s.* गलनं, विगलनं, विलयः -यनं, पूतिः *f.*, पूतत्वं.

PUTRESCENT, *a.* गलन्-लन्ती-लत् (त्), विगलन् &c., विलीयमानः-ना-नं.

PUTRID, *a.* पूतः-ता-तं, पूतिगन्धः-न्धा-न्धं, दुर्गन्धः-न्धा-न्धं, दुर्गन्धी-न्धिनी-न्धि (न्), पूतिगन्धिकः-का-कं, उग्रगन्धिः-न्धिः-न्धि, गलितः-ता-तं, विगलितः &c., विलीनः-ना-नं.

PUTRIDNESS, PUTRIDITY, *s.* पूतत्वं-ता, पूतिः *f.*, दुर्गन्धता, दौर्गन्ध्यं, दौर्गन्धिः *m.*, पूतिगन्धिता, गलितत्वं-ता, विगलितत्वं, विलीनता.

PUTTY, *s.* काचबन्धनलेपः, काचबन्धनयोग्यो विलेपः, उदपेषं.

To PUTTY, *v. a.* पूर्वोक्तलेपेन काचं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To PUZZLE, *v. a.* मुह् (c. 10. मोहयति -यितुं), विमुह्, व्यामुह्, भ्रम् (c. 10. भ्रमयति -यितुं), भ्रान्तिं जन्, निरुत्तरीकृ, बुद्धिभ्रान्तिं कृ, शल्यं कृ. *See To* POSE.

PUZZLE, *s.* (Enigma) गूढं, कूटं, प्रवह्लिः *f.* -ह्लिका, प्रहेलिका, अप्रलौपिका.—(Perplexity) व्यस्तता, मोहः, व्यामोहः, भ्रान्तिः *f.*, भ्रमः, व्याकुलता, व्यग्रता, बुद्धिभ्रान्तिः *f.*, बुद्धिभ्रमः.

PUZZLED, *p. p.* मोहितः-ता-तं, विमोहितः &c., भ्रान्तः-न्ता-न्तं, सम्भ्रान्तः &c., भ्रान्तहृदयः-या-यं, व्यस्तः-स्ता-स्तं, निरुत्तरीकृतः-ता-तं, इतिकर्त्तव्यतामूढः-ढा-ढं.

PUZZLE-HEADED, *a.* भ्रान्तबुद्धिः-द्धिः-द्धि, व्यस्तबुद्धिः &c., जडबुद्धिः &c.

PUZZLING, *part.* or *a.* भ्रमजनकः-का-कं, मोहजनकः &c. *See* PERPLEXING.

PYGMY, *s.* वामनः, खर्वः, खर्वेः, वाममूर्त्तिः *m.*, ह्रस्वमूर्त्तिः, ह्रस्वकायः.

PYGMY, PYGMEAN, *a.* वामनः-ना-नं, वामनतनुः-नुः-नु. *See* DWARFISH.

PYLORUS, *s.* जठरस्य अधःस्थमुखं, जठराधोमुखं, जठराधोद्वारं.

PYRAMID, *s.* सूच्यग्रस्तम्भः, सूच्याकारस्तम्भः, शुण्डाकारस्तम्भः, सूचिः-ची *f.*, शिखा, शङ्कुः *m.*, सूक्ष्माग्रस्तम्भः.

PYRAMIDAL, PYRAMIDICAL, *a.* सूच्यः-च्या-च्यं, सूच्याकारः-रा-रं, सूच्यग्रस्तम्भाकारः &c., शुण्डाकारः &c., सूक्ष्माग्रस्तम्भाकृतिः-तिः-ति, शङ्वाकृतिः-पा-पं, शिखावलः-ला-लं, शिखरी-रिणी &c.

PYRE, *s.* चितिः-ती *f.*, चिता, चित्या, श्मशानाग्निः *m.* *See* PILE.

PYRITES, *s.* पिटमाक्षिकं, सुवर्णमाक्षिकं, स्वर्णमाक्षिकं, माक्षिकं, आवल्लिः, सुवर्णमुखी, कामारिः *m.*, मधुधातुः *m.*, आग्नेयप्रस्तरः; 'iron pyrites,' नीलमृत्तिका, तप्तकुलीयः-यकः; 'hepatic iron pyrites,' रूप्यमाक्षिकं, कांस्यमाक्षिकं.

PYRITIC, *a.* माक्षिकसम्बन्धी -न्धिनी &c., माक्षिकगुणकः-का-कं.

PYROTECHNY, *s.* अग्निक्रीडाविद्या, आग्नेयक्रीडाविद्या, अग्निशिल्पं.

PYRRHIC, *s.* (Foot in prosody) सुप्रियः, लल.

PYRRHONIST, *s.* नास्तिकः, शास्त्राविश्वासी *m.* (न्), चार्वाकः, धर्म्मनिन्दकः.

Q.

QUACK, *s.* (Cry of a duck or goose) हंसनादः, हंसरावः, हंसचीत्कारः, क्लक्शब्दः.—(Empiric, pretender to medical skill) दुश्चिकित्सकः, मिथ्याचिकित्सकः, मिथ्यावैद्यः, अप्रवैद्यः, वैद्यम्मन्यः, वैद्यमानी *m.* (न्), आयुर्वेदानभिज्ञः.

To QUACK, *v. n.* हंसवद् नद् (c. 1. नदति -दितुं) or रु (c. 2. रौति, रवितुं) or चीत्कृ or कृ, हंसनादं कृ, क्लक् शब्दं कृ.—(Pretend to medical skill) दुश्चिकित्सां कृ, मिथ्याचिकित्सनं कृ, आयुर्वेदविरोधेन चिकित्सां कृ.

QUACKERY, *s.* दुश्चिकित्सा -त्सनं, मिथ्याचिकित्सा -त्सनं, आयुर्वेदविरुद्धा चिकित्सा, आयुर्वेदानभिज्ञता.

QUADRAGESIMA, *s.* चत्वारिंशद्दिवसोपवासः, चत्वारिंशद्दिनापवासः.

QUADRAGESIMAL, *a.* चत्वारिंशद्दिनोपवाससम्बन्धी -न्धिनी -न्धि (न्).

QUADRANGLE, *s.* चतुरस्रं, चतुष्कोणः, चतुर्भुजः; 'formed by four houses,' चतुःशालं -ला -लकं, चतुश्शाला, प्रकोष्ठः.

QUADRANGULAR, *a.* चतुष्कोणः-णा-णं, चतुरस्रः-स्रा-स्रं, चतुर्भुजः-जा-जं.

Repelling, *s.* प्रतिघातः -तनं, प्रतिसारणं, प्रतिवारणं, निवारणं, वारणं, निराकरणं, निरसनं, परासनं, प्रतिकारः, प्रतिकरणं.

To repent, *v. n.* (Feel regret or remorse) अनुतप् in pass. (-तप्यते), पश्चात् तप्, प्रत्यनुतप्, पश्चात् मन्तप्, तप्, मनसा तप्, अनुशुच् (c. 1. -शोचति -चितुं), पश्चात् शुच्, खिद् in pass. (खिद्यते), पश्चात् खिद्, अनुशी (c. 2. -शेते -शयितुं), पापस्मृत्या पीड् in pass., अनुतापं कृ, पश्चात्तापं कृ, अनुतप्तः -प्ता -प्तं भू, मन्तप्तः &c. भू, अनुशोकं कृ, अनुशयं कृ.—(Change the mind) मनः परिवृत् (c. 10. -वर्त्तयति -यितुं) or परावृत् or व्यावृत्, अन्यमानमीभू.

Repentance, *s.* पश्चात्तापः, अनुतापः, मन्तापः, पश्चात्मन्तापः, मनस्तापः, अनुशोकः, अनुशोचनं, अनुशयः दुष्कृतखेदः, पापखेदः, खेदः, पश्चात्खेदः, अन्वाधिः *m.*, पश्चाल्लोकः, विसरितं, विप्रतीसारः, विप्रतिसारः, निर्वर्त्तनं, पश्चात्तापबुद्धिः *f.*, अनुतापबुद्धिः *f.*—(Change of mind) मनःपरिवर्त्तनं, मनःपरावर्त्तनं, मनोव्यावर्त्तः.

Repentant, *a.* अनुतापी -पिनी -पि (न्), पश्चात्तापी &c., अनुतप्तः -प्ता -प्तं, अनुशोचकः -का -कं, अनुशयी -यिनी &c., पश्चात्तापयुक्तः -क्ता -क्तं, पश्चात्तापान्वितः -ता -तं, जातानुतापः -पा -पं, जातपश्चात्तापः &c., जातानुशोकः -का -कं, जातानुशयः -या -यं, पापस्मृतिपीडितः -ता -तं, दुष्कृतस्मृतिपीडितः &c., जातखेदः -दा -दं, खेदान्वितः &c., अनुतापबुद्धिः -द्धिः -द्धि, पश्चात्तापबुद्धिः &c., शाकुणः -णी -णं.

Repented, *p. p.* अनुशोचितः -ता -तं, पश्चात् शोचितः &c., अनुशयितः &c.

Repercussion, *s.* प्रतिघातः, प्रतिहतिः *f.*, प्रतिहननं, प्रतिसारणं, परापतनं.

Repercussive, *a.* प्रतिघाती -तिनी -ति (न्), पराघाती &c., प्रतिसारकः -का -कं.

Repertory, *s.* कोषः, कोषागारं, भाण्डागारं, सञ्चयागारं, भाण्डगृहं.

Repetition, *s.* (Saying again) अनुवादः, पुनर्वादः, पुनरुक्तिः *f.*, पौनरुक्त्यं, पुनःकथनं, पुनर्वचनं, पुनरुच्चारणं, पुनर्वचनं, मुहुर्भाणा, पुनर्भाषा, अनुलापः; 'saying twice,' द्विरुक्तिः *f.*—(Doing again) पुनःकरणं, मुहुःकरणं, पुनर्विधानं, पुनरनुष्ठानं, पुनरावृत्तिः *f.*, पुनरावर्त्तनं, आवृत्तिः *f.*, आवर्त्तनं, पौनःपुन्यं; 'doing twice,' द्विरावृत्तिः *f.*—(Of a word or sound) आम्रेडनं, आम्रेडितं.—(A word repeated) कथितपदं, कथितवाक्यं.—(Of an act) क्रियासमभिहारः, क्रियावृत्तिः *f.*—(Recital, rehearsal) पठनं, पाठः, अनुवादः; 'from memory,' अभ्यसनं, अभ्यासः.

To repine, *v. n.* व्यथ् (c. 1. व्यथते -थितुं), शुच् (c. 1. शोचति -चितुं), तप् in pass. (तप्यते), परितप्, सन्तप्, आत्मानं तप् in caus. or व्यथ् in caus., खिद् in pass. (खिद्यते), अवसद् (c. 1. -सीदति -सत्तुं), ग्लै, परिग्लै, ग्लै.

Repining, *s.* आत्मव्यथा, मनस्तापः, मनःसन्तापः, मनोव्यथा, अवसादः.

To replace, *v. a.* (Put again in its place) स्वस्थाने पुनर् ऋ in caus. (अर्पयति -यितुं) or पुनर् धा (c. 3. दधाति, धातुं) or पुनर् आधा or पुनः स्था in caus. (स्थापयति -यितुं) or पुनर् न्यस्, प्रतिमृ (c. 10. -मारयति -यितुं), पुनराधानं कृ, पुनरर्पणं कृ. पुनःस्थापनं कृ.—(Supply the place of) उपकॢप् (c. 10. -कल्पयति -यितुं), उपसृज् (c. 6. -सृजति -स्रष्टुं), उपमर्जनं कृ. प्रतिनिधिं दा.

Replaced, *p. p.* पुनरर्पितः -ता -तं, पुनःस्थापितः &c., प्रतिमारितः &c.

To replenish, *v. a.* पॄ (c. 10. पूरयति -यितुं), पुनः पॄ, पुनः सम्पॄ.

Replenished, *p. p.* पूरितः -ता -तं, सम्पूर्णः -र्णा -र्णं, समृद्धः -द्धा -द्धं.

Replete, *a.* पूर्णः -र्णा -र्णं, सम्पूर्णः -र्णा -र्णं, परिपूर्णः &c., पर्याप्तः -प्ता -प्तं, पूरितः -ता -तं, संकीर्णः -र्णा -र्णं, आकीर्णः &c., आढ्यः -ढ्या -ढ्यं in comp., मयः -यी -यं in comp.; 'replete with knowledge,' विद्यापूर्णः &c., सम्पूर्णविद्यः -द्या -द्यं; 'with guile,' मायामयः &c.

Repletion, *s.* (State of being completely filled) पूर्णता, परिपूर्णता, सम्पूर्णता, पर्याप्तिः *f.*, पूर्तिः *f.*, आपूर्तिः *f.*, परिपूर्तिः *f.*, आभोगः.—(Fulness of the blood or system from eating, &c.) अतिपुष्टिः *f.*, अतिसौहित्यं, रक्तबाहुल्यं, रक्तवृद्धिः *f.*, रक्ताधिक्यं.

Replicant, *s.* उत्तरवादी *m.* (न्), प्रतिवादी *m.*, उत्तरपक्षी *m.*

Replied, *p. p.* प्रत्युक्तः -क्ता -क्तं, पुनरुक्तः &c. *See* Answered.

To reply, *v. a.* प्रतिवच् (c. 2. -वक्ति -क्तुं), प्रतिवद् (c. 1. -वदति -दितुं), पुनर् वद्, अनुवद्, पुनर् वच्, प्रतिब्रू, पुनर् ब्रू, प्रतिभाष्, पुनर् भाष्, प्रतिभण्, पुनर् भण्; 'he replied,' प्रत्युवाच, पुनराह, प्रत्याह, *see To* answer.—(In law) उत्तरं वद्, उत्तरं कृ, प्रतिवद्.

Reply, *s.* (Answer) प्रतिवचनं, प्रतिवाक्यं, प्रत्युक्तिः *f.*, प्रत्युक्तं, उत्तरं, प्रत्युत्तरं, प्रतिवाक् *f.* (च्), प्रतिवादः, प्रतिवाणी -णिः *f.*—(In disputation) उत्तरं, प्रत्युत्तरं, कथा, उद्ग्राहः, कोटिः *f.*, प्रत्यर्थं.

To report, *v. a.* (Give an account, relate) आविद् (c. 10. -वेदयति -यितुं), निविद्, विद्, आख्या, ख्या in caus., ज्ञा in caus., विज्ञा in caus., कथ्, संकथ्, शंस्, वृध् in caus.—(Give an official account) अधिकारपूर्वं विज्ञापनं कृ or आवेदनं कृ or विज्ञा in caus.

Report, *s.* (Account given, statement) आवेदनं, विज्ञापनं, विज्ञप्तिः *f.*, वादः, कथा; 'written report,' आवेदनपत्रं, विज्ञापनपत्रं, लेखः.—(Rumor, common talk) प्रवादः, जनप्रवादः, जनवादः, जनश्रुतिः *f.*, जनवार्त्ता, जनरवः, जनवदन्ती, लोकप्रवादः, लोकवार्त्ता, वार्त्ता, किंवदन्ती, यदन्ती, वादः, उपश्रुतिः *f.*, रवः, वृत्तान्तः, आख्या, चर्चा, उद्घोषः,—(Reputation) कीर्तिः *f.*, ख्यातिः *f.*, यशस् *n.*; 'good report,' सुख्यातिः *f.*; 'evil,' कुख्यातिः *f.*, कुकीर्तिः *f.*, अकीर्तिः *f.*, कौलीनं,—(Sound, noise) शब्दः, ध्वनिः *m.*, क्वणः -णितं.

Reported, *p. p.* (Related) आवेदितः -ता -तं, कथितः &c., विज्ञप्तः -प्ता -प्तं, विज्ञापितः -ता -तं, आख्यातः &c., शंसितः &c.—(Rumored) घोषितः -ता -तं, उद्घोषितः &c., कीर्त्तितः &c.

REPORTER, *s.* वृत्तान्तलेखकः, समाचारलेखकः, वाक्यसारलेखकः.

To REPOSE, *v. n.* (Lie, rest) शी (c. 2. शेते, शयितुं), संविश् (c. 6. -विशति -वेष्टुं), विश्रम् (c. 4. -श्राम्यति -श्रमितुं), शयनं कृ, *see To* LIE.—(Rest on) अवलम्ब्, समालम्ब्, संश्रि, समाश्रि, उपाश्रि, निली, अवलम्बनं कृ.—(Confide in) विश्वस्, विश्रम्भ्.

REPOSE, *s.* विश्रामः, विश्रान्तिः *f.*, विश्रमः, शमः, शान्तिः, विरामः, श्रमच्छेदः, क्लान्तिच्छेदः, श्रमनिवृत्तिः *f.*, निर्वृतिः *f.*, शीः *f.*

REPOSED, *p. p.* विश्रान्तः -न्ता -न्तं, गतश्रमः -मा -मं, गतक्लमः &c., नष्टश्रमः &c., अपहृतश्रमः &c., निवृत्तश्रमः &c., छिन्नक्लान्तिः -न्तिः -न्ति.

To REPOSIT, *v. a.* निधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), न्यासीकृ, रक्षणार्थं न्यस् or निधा, रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्, निधिं कृ.

REPOSITED, *p. p.* न्यस्तः -स्ता -स्तं, निहितः -ता -तं, रक्षितः -ता -तं.

REPOSITORY, *s.* निधिः *m.*, निधानं, आधारः, कोषः, आगारं, भाण्डं, भाजनं, पात्रं, कोष्ठः-ष्ठकं, रक्षणस्थानं; 'of corn,' धान्यागारं, धान्यकोष्ठकं.

To REPREHEND, *v. a.* *See To* BLAME, REPROVE, &c.

REPREHENSIBLE, *a.* निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, विगर्ह्यः &c., परिभाषणीयः &c., दूषणीयः &c., दूष्यः -ष्या -ष्यं, दूषणार्हः -र्हा -र्हं, दोषवान् -वती -वत् (त्), सदोषः -षा -षं, निन्दापात्रं, निन्दाभाजनं, परिभाषणीयः &c.

REPREHENSION, *s.* निन्दा -न्दनं, उपालम्भः. *See* REPROOF, BLAME.

To REPRESENT, *v. a.* (Exhibit) दृश् (c. 10. दर्शयति -यितुं), प्रदृश्, *see To* SHOW.—(Describe) वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, विवृ, निरूप्; 'in writing or drawing,' लिख् (c. 6. लिखति, लेखितुं), आलिख्, विलिख्.—(Personate) रूप् (c. 10. रूपयति -यितुं), अभिनी, वेषं धृ or भृ.—(State respectfully) निविद् (c. 10. -वेदयति -यितुं), विज्ञा in caus. (-ज्ञापयति -यितुं), निवेदनं कृ, विज्ञापनं कृ.—(Stand in the place of) प्रतिनिधिर् भू or अस्, प्रतिभूर् अस्, प्रतिपुरुषो भू or अस्.

REPRESENTATION, *s.* (Act of exhibition) दर्शनं, प्रदर्शनं, प्रकाशनं; 'on the stage,' अभिनयः -यनं.—(Description) वर्णनं -ना, अनुवर्णनं, उपवर्णनं, निरूपणं.—(Respectful statement) निवेदनं, विज्ञापनं -ना, विज्ञप्तिः *f.*, आवेदनं, उपन्यासः, उपपादनं,—(Delineation, sketch) आलेख्यं, आलेखनं, लेख्यं.—(Image, likeness, picture) प्रतिरूपं, प्रतिकृतिः *f.*, प्रतिमा, प्रतिमानं, प्रतिमूर्त्तिः *f.*, मूर्त्तिः *f.*, प्रतिनिधिः *m.*, प्रतिबिम्बं, प्रतिच्छाया, प्रतिच्छन्दः -न्दकं, चित्रं, चित्रलेखा.

REPRESENTATIVE, *a.* प्रदर्शकः -का -कं, उद्बोधकः -का -कं, प्रतिरूपकः &c.

REPRESENTATIVE, *s.* प्रतिनिधिः *m.*, प्रतिभूः *m.*, प्रतिपुरुषः, उपसर्जनं.

REPRESENTED, *p. p.* (Exhibited) दर्शितः -ता -तं, प्रदर्शितः &c.—(Described) वर्णितः -ता -तं.—(In a picture, &c.) चित्रलिखितः -ता -तं, आलिखितः &c., *see* PAINTED.—(Stated respectfully) निवेदितः -ता -तं, आवेदितः &c., विज्ञापितः &c., विज्ञप्तः -प्ता -प्तं, उपन्यस्तः -स्ता -स्तं, उपपादितः &c.—(Having substitutes) सप्रतिनिधिः -धिः -धि, सप्रतिभूः -भूः -भु.

To REPRESS, *v. a.* निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), नियम् (c. 1. -यच्छति -यन्तुं), संयम्.

REPRESSED, *p. p.* निगृहीतः -ता -तं, संयतः &c., जातनिग्रहः -हा -हं.

REPRESSION, *s.* निग्रहः -हणं, संयमः -मनं, निगृहीतिः *f.*, यन्त्रणं.

REPRESSIVE, *a.* नियामकः -का -कं, निग्रहकारी -रिणी -रि (न्).

REPRIEVE, *a.* दण्डविलम्बः -म्बनं, दण्डनविलम्बः, आकालान्तराद् दण्डत्यागः or दण्डयापनं, दण्डकालयापनं, दण्डकालान्तरनयनं, परावर्त्तः, दण्डकालपरावर्त्तः, दण्डपरावर्त्तः.

To REPRIEVE, *v. a.* दण्डविलम्बनं कृ, दण्डविलम्बं कृ, आकालान्तराद् दण्डनं त्यज् or या in caus., शिक्षाविलम्बनं कृ, दण्डं or दण्डकालं परावृत् (c. 10. -वर्त्तयति -यितुं), दण्डकालपरावर्त्तं कृ, प्राणदानं कृ, प्राणदण्डविलम्बं कृ.

To REPRIMAND, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), उपालभ् (c. 1. -लभते -लब्धुं), गर्ह्, विगर्ह्, अभिशंस्, क्षिप्, भर्त्स्, शब्दताडनं कृ, मुखदण्डनं कृ, वाग्दण्डं कृ, धिग्दण्डं कृ. *See To* REPROVE.

REPRIMAND, *s.* उपालम्भः, वाग्दण्डः, शब्ददण्डः, शब्दताडनं, धिग्दण्डः, मुखदण्डः -ण्डनं, प्रत्यादेशः, प्रत्यादेशवाक्यं, भर्त्सनवाक्यं, अभिशंसनं, निन्दा.

REPRIMANDED, *p. p.* उपालब्धः -ब्धा -ब्धं, प्रत्यादिष्टः -ष्टा -ष्टं, अभिशस्तः &c.

To REPRINT, *v. a.* पुनर् मुद्र (nom. मुद्रयति -यितुं), पुनर् मुद्रीकृ.

REPRINTED, *p. p.* पुनर्मुद्रितः -ता -तं, पुनर्मुद्रीकृतः &c., पुनर्मुद्राङ्कितः &c.

REPRISAL, *s.* प्रत्यपहारः, प्रत्यपहरणं, प्रत्यपकारः, प्रत्यपकरणं, प्रतिपीडनं, क्षतिपूरणार्थम् अपहरणं or अपहारः, हानिपूरणार्थं प्रत्यपहरणं or प्रतिहरणं.

To REPROACH, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), विनिन्द्, प्रतिनिन्द्, प्रणिन्द्, तिरस्कृ, परिवद् (c. 1. -वदति -दितुं), परिभाष् (c. 1. -भाषते -षितुं) उपालभ् (c. 1. -लभते -लब्धुं), गर्ह्, विगर्ह्, परिगर्ह्, कुत्स्, अभिकुत्स्, भर्त्स्, अपवद्, आक्रुश्, समाक्रुश्, उपक्रुश्, गुप् in des., तर्ज्, क्षिप्, अधिक्षिप्, दोषम् आरुह् in caus., दोषं क्षिप्, दोषारोपं कृ, दोषीकृ, वाक्पारुष्यं कृ, धिक्कृ, धिक्पारुष्यं कृ. *See To* BLAME, CENSURE.

REPROACH, *s.* निन्दा -न्दनं, तिरस्कारः, तिरस्क्रिया, परिवादः, परीवादः, परिभाषा -षणं, गर्हा -र्हणं, उपालम्भः, उपक्रोशः, आक्रोशः, जुगुप्सा, परुषोक्तिः *f.*, परुषवचनं, वाक्पारुष्यं, धिक्पारुष्यं, धिक्क्रिया, दुर्वाक्यं, दुरुक्तं, कुत्सा, घृणा, ऋतीया, पर्यनुयोगः, अर्त्तनं, वाच्यता, वचनीयता, हृणीया, रीज्या, छिः *m.*, अपकारगी, *f.*

REPROACHABLE, *a.* निन्द्यः -न्द्या -न्द्यं, परिभाषणीयः &c., गर्ह्यः -र्ह्या -र्ह्यं.

REPROACHED, *p. p.* निन्दितः -ता -तं, तिरस्कृतः &c., उपालब्धः -ब्धा -ब्धं, परिभाषितः &c., गर्हितः &c., अभिक्रुष्टः -ष्टा -ष्टं, धिक्कृतः &c.

REPROACHFUL, *a.* (Opprobrious) निन्दकः -का -कं, परिवादकः &c., कुत्सावादी -दिनी -दि (न्), निन्दात्मकः &c., घृणाकरः -रा -रं, निन्दामयः -यी -यं.—(Shameful) गर्ह्यः -र्ह्या -र्ह्यं, लज्जाकरः -रा -री -रं, लज्जाप्रदः -दा -दं.

REPROACHFULLY, *adv.* सनिन्दं, निन्दया, सतिरस्कारं, सासूयं, सपरिवादं.

REPROBATE, *a.* दुष्टः -ष्टा -ष्टं, दुराचारः -रा -रं, दुरात्मा -त्मा -त्म (न्), धर्म्मबाह्यः -ह्या -ह्यं, त्यक्तधर्म्मा -र्म्मा -र्म्म (न्), दुष्टभावः -वा -वं, पापात्मा &c., पापचेताः -ताः -तः (स्), त्यक्तलज्जः -ज्जा -ज्जं, दुःशीलः -ला -लं.

REPROBATE, *s.* दुष्टजनः, कुलनाशः -शनः, वृषलः, हतपरलोकः.

To REPROBATE, *v. a.* गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, गर्हापूर्व्वम् असम्मतिं सूच् (c. 10. सूचयति -यितुं), निन्द् (c. 1. निन्दति -न्दितुं), घृणां कृ, न्यक्कृ.

REPROBATED, *p. p.* गर्हितः -ता -तं, गर्हापूर्व्वं निन्दितः &c., विगर्हितः &c.

REPROBATION, *s.* (Act) गर्हा -र्हणं, विगर्हणं -णा, निन्दा -न्दनं, घृणा.—(State) अतिदुष्टता, त्यक्तत्वं, गर्ह्यता.

To RE-PRODUCE, *v. a.* प्रत्युत्पद् (c. 10. -पादयति -यितुं), पुनर् उत्पद् or जन्.

REPRODUCED, *p. p.* प्रत्युत्पन्नः -न्ना -न्नं, प्रत्युत्पादितः -ता -तं, पुनरुत्पन्नः &c.

REPRODUCTION, *s.* प्रत्युत्पादनं, प्रत्युत्पत्तिः *f.*, पुनरुत्पादनं, पुनरुत्पत्तिः *f.*

REPROOF, *s.* निन्दा -न्दनं, परिभाषणं, परिवादः, परीवादः, उपालम्भः, प्रत्यादेशः, निन्दावाक्यं, भर्त्सनवाक्यं, भर्त्सना, वाग्दण्डः, मुखदण्डः, शब्ददण्डः. *See* CENSURE, CHIDING.

REPROVABLE, *a.* निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, परिभावणीयः &c.

To REPROVE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, विनिन्द्, प्रणिन्द्, प्रत्यादिश् (c. 6. -दिशति -देष्टुं), उपालभ् (c. 1. -लभते -लब्धुं), परिवद्, अपवद्, परिभाष्, अपभाष्, गर्ह्, विगर्ह्, भर्त्स्, गुप् in des., कुत्स्, अभिकुत्स्, क्षिप्, अधिक्षिप्, तिरस्कृ, वाग्दण्डं कृ, आक्रुश्, उपक्रुश्, धिक्कृ. *See To* CENSURE.

REPROVED, *p. p.* निन्दितः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, उपालब्धः -ब्धा -ब्धं.

REPROVER, *s.* निन्दकः, प्रत्यादेशकः, परिवादकः, वाग्दण्डकारी *m.* (न्).

REPTILE, *s.* उरगः, उरोगामी *m.* (न्), उरोगः, उरोगमः, उरङ्गः, उरङ्गमः, सर्पः, सरीसृपः, सर्पी *m.* (न्), कृमिः *m.*, बिलवासी *m.* (न्), बिलेवासी *m.*, बिलौकाः *m.* (स्), अपदः, अपादः, बदुपादः.

REPTILE, *a.* (Creeping) सर्पी -र्पिणी -र्पि (न्), सर्पन् -र्पन्ती -र्पत् (त्), सर्पणः-र्णा-र्णं.—(Relating to a reptile) सार्पः-र्पी-र्पं, कृमिलः-ला-लं.

REPUBLIC, *s.* लोकप्रभुत्वं, सर्वलोकप्रभुत्वं, लोककनृकप्रभुत्वं, प्रजाप्रभुत्वं, सर्ववर्णप्रभुत्वं, सर्ववर्णाधिपत्यं, साधारणप्रभुत्वं, साधारणाधिपत्यं, साधारणजनप्रभुत्वं, लोकसाधारणाधिपत्यं, सर्वप्रजाधिपत्यं, लोककनृकराज्यं, सामान्यजनकनृकराज्यं, लोकपालितं राज्यं, साधारणजनपालितराज्यं, प्रजापालितराज्यं.

REPUBLICAN, *a.* लोकप्रभुत्वसम्बन्धी -न्धिनी -न्धि (न्), प्रजाप्रभुत्वसम्बन्धी &c., लोकाधिपत्यसम्बन्धी &c., लोकप्रभुत्वविषयकः -का -कं, लोकप्रभुत्वानुसारी &c., लोकप्रभुत्वानुरूपः -पा -पं.

REPUBLICAN, *a.* लोकप्रभुत्ववादी *m.* (न्), लोकाधिपत्यपक्षपाती *m.*, लोकप्रभुत्वावलम्बी *m.*, प्रजाधिपत्यवादी *m.*, प्रजाधिपत्यानुग्राही *m.*, प्रजानाथः, लोकनाथः.

REPUBLICANISM, *s.* लोकप्रभुत्वपक्षपातः, लोकाधिपत्यपक्षपातः, लोकप्रभुत्वावलम्बनं, प्रजाधिपत्यवादः, लोकाधिपत्यानुग्रहः.

To REPUDIATE, *v. a.* प्रत्याख्या (c. 2. -ख्याति -तुं), निराकृ, निरम्, प्रत्यादिश्, त्यज्, परित्यज्, प्रत्याचक्ष्, निर्नुद्, अपध्वंस्. *See To* REJECT.

REPUDIATED, *p. p.* प्रत्याख्यातः -ता -तं, निराकृतः &c., प्रत्यादिष्टः -ष्टा -ष्टं.

REPUDIATION, *s.* प्रत्याख्यानं, निरमनं, निरामः, निराकरणं, निराकृतिः *f.*, त्यागः, परित्यागः, प्रत्यादेशः, *see* REJECTION.—(Divorce) विवाहसम्बन्धत्यागः, विवाहमम्बन्धमुक्तिः *f.* दाम्पत्यमुक्तिः *f.*, भार्यानिराकरणं.

REPUGNANCE, REPUGNANCY, *s.* प्रतिकूलता, प्रातिकूल्यं, विरोधः, विरुद्धता, वैपरीत्यं, विमुखता, विमतिः *f.*, अनिच्छा.

REPUGNANT, *a.* प्रतिकूलः -ला -लं, विरुद्धः -द्धा -द्धं, विपरीतः -ता -तं, विरोधी -धिनी &c., विमुखः -खा -खी -खं. *See* OPPOSED, ADVERSE.

REPULSE, *s.* प्रतिघातः, प्रतिहतिः *f.*, पराहननं, प्रतिहननं, प्रतिसारणं, निवारणं, वारणं, व्यपाकृतिः *f.*, विद्रवः, विद्रावणं, पराजयः, अपजयः.

To REPULSE, *v. a.* पराहन् (c. 2. -हन्ति -न्तुं), प्रतिहन्, प्रतिम्. *See To* REPEL.

REPULSED, *p. p.* पराहतः -ता -तं, प्रतिहतः &c., व्याहतः &c., निहतः &c., आहतः &c., प्रहतः &c., प्रतिसारितः &c., प्रतिक्षिप्तः -प्ता -प्तं, विद्रावितः &c., निवारितः &c., व्यपाकृतः &c., पराजितः &c., प्रत्याख्यातः &c.

REPULSION, *s.* प्रतिसारकत्वं, प्रतिघातकत्वं, प्रतिसारणगुणः, प्रतिसारणशक्तिः *f.*, प्रतिहननशक्तिः *f.*, प्रतिहननं, प्रतिसारणं. *See* REPULSE.

REPULSIVE, *a.* (Repelling) प्रतिघाती -तिनी -ति (न्), प्रतिघातकः -का -कं, प्रतिमारकः -का -कं, निवारकः &c., वारकः &c.—(Forbidding) अप्रीतिजनकः -का -कं, त्रासजनकः &c., त्रासकरः -री -रं, अमङ्गलः -ला -लं, अप्रसन्नमुखः -खी -खं.

REPUTABLE, *a.* (In good esteem) मान्यः -न्या -न्यं, सम्मान्यः &c., माननीयः -या -यं, आदरणीयः &c., प्रशंसनीयः &c., मानार्हः -र्हा -र्हं, सम्मानार्हः &c., शिष्टः -ष्टा -ष्टं.—(Conferring reputation, not disgraceful) मानदः -दा -दं, मानप्रदः &c., मानदायी -यिनी &c., यशस्यः -स्या -स्यं, यशस्करः -री -रं, कीर्तिकरः -री -रं, ख्यातिकरः &c., सुप्रतिष्ठः -ष्ठा -ष्ठं, अलङ्काकरः &c.

REPUTABLY, *adv.* समानं, यथा मुख्यातिर् उत्पद्यते तथाप्रकारेण.

REPUTATION, *s.* कीर्तिः *f.*, ख्यातिः *f.*, विख्यातिः *f.*, प्रतिष्ठा, समाख्या, यशस् *n.*, परिख्यातिः *f.*, प्रतिख्यातिः *f.*, प्रविख्यातिः, प्रकीर्तिः *f.*, कीर्तनं -नं, प्रतिपत्तिः *f.*, प्रथा, सम्प्रथा, मर्य्यादा, समाज्ञा, प्रसिद्धिः *f.*, गौरवं, चारित्रं; 'one who has established a reputation,' लब्धप्रतिष्ठः -ष्ठा -ष्ठं, प्राप्तप्रतिष्ठः &c.; 'good reputation,' सुकीर्तिः *f.*, सत्कीर्तिः *f.*, सुख्यातिः *f.*; 'bad reputation,' कुकीर्तिः *f.*, दुष्कीर्तिः *f.*, अकीर्तिः, अपकीर्तिः *f.*, कुख्यातिः *f.*, अख्यातिः *f.*, अयशस् *n.*, वाच्यता.

To REPUTE, *v. a.* गण् (c. 10. गणयति -यितुं), विगण्, मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), संख्या, परिसंख्या, कृत् (c. 10. कीर्तयति -यितुं).

REPUTE, *s.* कीर्तिः *f.*, ख्यातिः *f.*, प्रसिद्धिः *f.* *See* REPUTATION.

REPUTED, *p. p.* मतः -ता -तं, गणितः &c., विगणितः &c., कीर्तितः &c.

REQUEST, *s.* (Entreaty) प्रार्थनं -ना, अर्थना, अभ्यर्थना, अर्थः, याचना, याञ्ञा, स्वार्थनिवेदनं, अर्थविज्ञापना, सनिः -नी *m. f.*—(Desire) आकांक्षा, अभिकांक्षा, कांक्षा, इच्छा, स्पृहा, अभ्येषणा.—(State of being desired or held in estimation) अपेक्षा, आकांक्षा, मान्यता -त्वं, माननीयता; 'general request,' लोकमान्यता.

To REQUEST, *v. a.* प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अभ्यर्थ्, सम्प्रार्थ्, अर्थ्, याच् (c. 1. याचति -ते -चितुं), अभियाच्, प्रयाच्, सम्प्रयाच्, संयाच्, अर्थं निविद् (c. 10. -वेदयति -यितुं) or विज्ञा in caus. (-ज्ञापयति -यितुं), वृ (c. 9. वृणोति, वरितुं -रीतुं, c. 10. वारयति -यितुं), कांक्ष्, आकांक्ष्, अभिकांक्ष्.

REQUESTED, *p. p.* प्रार्थितः -ता -तं, अभ्यर्थितः &c., अर्थितः &c., याचितः &c., अर्दितः -ता -तं.

To REQUIRE, *v. a.* (Ask, demand) प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), याच् (c. 1. याचति -चितुं), अभियाच्.—(Need, call for) आकांक्ष् (c. 1. -कांक्षति -क्षितुं), अभिकांक्ष्, कांक्ष्, अर्ह् (c. 1. अर्हति -र्हितुं), प्रार्थ्; or expressed by भू or अस् in conjunction with the nouns प्रयोजनं, उपयोगः or कार्यं. *See To* NEED. The desid. form may sometimes be used to express the sense of 'require,' thus; 'three quantities being given, it is required to find a fourth,' त्रीन् राशीन् निर्दिश्य चतुर्थी जिज्ञास्यते (desid. pass. of ज्ञा).

REQUIRED, *p. p.* आकांक्षितः -ता -तं, अभिकांक्षितः &c., प्रार्थितः &c.

REQUISITE, *a.* आकांक्षितः -ता -तं, आकांक्षणीयः -या -यं, अभिकांक्षितः &c., प्रयोजनीयः &c., प्रयोजनार्हः -र्हा -र्हं, अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यप्रापणीयः &c. *See* NEEDFUL.

REQUISITE, *s.* अवश्यकवस्तु *n.*, अवश्यकद्रव्यं, अवश्यकविषयः; 'requisites,' प्रयोजनीयद्रव्यसामग्री, उपकरणसाहित्यं. *See* NECESSARIES.

REQUISITION, *s.* आकांक्षा, अभिकांक्षा, कांक्षा, प्रार्थनं -ना, अभ्यर्थनं -ना, अर्थना, याचनं -ना, अपेक्षा -क्षणं; 'is in requisition,' सेव्यता याति.

REQUITAL, *s.* (Recompense, return) प्रतिफलं, प्रतिदानं, निस्तारः, निष्कृतिः *f.*, प्रत्युपकारः, पारितोषिकं, उपकारमोक्षः, उपकारशुद्धिः *f.*, शुद्धिः *f.*, परिशोधः, परिक्षेपणं.—(Retaliation) प्रतिकारः, प्रतीकारः, प्रतिकृतिः *f.* प्रतिक्रिया, प्रत्यपकारः, प्रतिकर्मन् *n.* (न्), प्रतिहिंसा, निर्यातनं.

To REQUITE, *v. a.* (Compensate, repay) प्रतिफलं दा, प्रतिदा, प्रतिफल् (nom. प्रतिफलयति -यितुं), निष्कृतिं दा, प्रत्युपकृ, निस्तारं कृ, पारि-

तोषिकं दा.—(Retaliate) प्रतिकृ, विप्रतिकृ, प्रत्यपकृ, प्रतिकारं कृ, प्रतिहिंस् (c. 1. -हिंसति -सितुं, c. 7. -हिनस्ति), निर्यत् (c. 10. -यातयति -यितुं).

REQUITED, *p. p.* प्रतिफलितः -ता -तं, प्रतिकृतः &c., विप्रतिकृतः &c., निर्यातितः &c.

To RESALUTE, *v. a.* प्रत्यभिनन्द् (c. 1. -नन्दति -न्दितुं), प्रतिनन्द्, प्रत्यभिवद्, प्रत्यर्च्.

To RESCIND, *v. a.* लुप् (c. 6. लुम्पति, लोपुं), लोपं कृ, खण्ड् (c. 10. खण्डयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), परिच्छिद्, उच्छिद्, भङ्ग् कृ, भञ्ज्. *See To* REPEAL.

RESCINDED, *p. p.* लुप्तः -प्ता -प्तं, खण्डितः &c., उच्छिन्नः -न्ना -न्नं, परिच्छिन्नः &c.

RESCISSION, *s.* लोपः, खण्डनं, उच्छेदः, परिच्छेदः, भङ्गः, उद्धरणं, निरुद्धरणं, अवरोपः -पणं, अनुशयः, विप्रतिपत्तिः *f.*; 'of sale,' क्रयानुशयः. *See* REPEAL.

RESCRIPT, *s.* शासनं, आज्ञापत्रं, शासनपत्रं, राजाज्ञा, निबन्धः.

To RESCUE, *v. a.* त्रै (c. 1. त्रायते, त्रातुं), परित्रै, मंत्रै, उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, रक्ष् (c. 1. रक्षति -क्षितुं), परिरक्ष्, अभिरक्ष्, संरक्ष्, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, निस्तृ (c. 10. -तारयति -यितुं), तॄ, उद्धरणं कृ, उद्धारं कृ, रक्षणं कृ; 'from confinement,' बन्धनाद् मुच्.

RESCUE, *s.* त्राणं, परित्राणं, उद्धरणं, उद्धारः, समुद्धारः, समुद्धरणं, रक्षा -क्षणं, परिरक्षणं, निस्तारः, निस्तरणं, तारणं, मुक्तिः *f.*, मोचनं, विमोचनं, मोक्षः -क्षणं, परिमोक्षणं; 'to the rescue!' त्राहि, त्रायस्व.

RESCUED, *p. p.* उद्धृतः -ता -तं, समुद्धृतः &c., त्राणः -णा -णं, त्रातः -ता -तं, रक्षितः -ता -तं, परिरक्षितः &c., मुक्तः -क्ता -क्तं, मोचितः -ता -तं, विमोचितः &c., निस्तारितः &c.; 'from confinement,' मुक्तबन्धनः -ना -नं, बन्धनमुक्तः -क्ता -क्तं.

RESCUER, *s.* त्राता *m.* (तृ), उद्धर्त्ता *m.* (र्त्तृ), रक्षकः, मुक्तिदाता *m.* (तृ), उद्धारकः, मोचकः, निर्यत्नकः. *See* DELIVERER.

RESEARCH, *s.* अन्वेषणं -णा, पर्येषणं -णा, अनुसन्धानं, परीष्टिः *f.*, संवीक्षणं, गवेषणं -णा, निरूपणं, जिज्ञासा, मीमांसा, मार्गणं, मृगणा, मृगया, मृगः, विचारणा, तत्त्वानुसन्धानं, विचयः, वीक्षयनं, विचयनं.

RESEMBLANCE, *s.* (Likeness) औपम्यं, सादृश्यं, सदृशता, सरूपता, सारूप्यं, समता, साम्यं, समानता, तुल्यता -त्वं, तुला, तौल्यं, सारूप्यं, सरूपता, उपमा, उपमितिः *f.*, उपमानं -नता, अनुकारः, अनुहारः, *see* LIKENESS.—(Something similar, a representation) उपमा, प्रतिमा -मानं, प्रतिरूपं, प्रतिभासः, प्रतिकृतिः *f.*, प्रतिमूर्त्तिः *f.*, प्रतिच्छाया, प्रतिविम्बं, प्रतिनिधिः *m.*

To RESEMBLE, *v. a.* (Be like) सदृशः -शी -शं भू or अस्, सदृशीभू, अनुकृ (c. 8. -करोति -कर्त्तुं), तुल्यः -ल्या -ल्यं भू, समः -मा -मं भू, समानः -ना -नं भू, उपमः -मा -मं भू, सरूपः -पा -पं भू, अनुरूपः -पा -पं भू; 'the son resembles his father,' पुत्रः पितुर् अनुकरोति or पुत्रः पितृरूपो भवति or पुत्रः पित्रा सदृशाकारो भवति; 'no one resembles him,' अनेन सदृशः कश्चिन् नास्ति or तस्य तुल्यः or तेन तुल्यः or तेन समो न कोऽपि भवति. A nominal verb may sometimes express the sense of 'resemble,' thus; 'he resembles a lion,' सिंहायते; 'it resembles heaven,' स्वर्गायते.—(Liken) उपमा (c. 2. -माति, c. 3. -मिमीते -मातुं), सदृशीकृ, समीकृ, समान (nom. समानयति -यितुं).

RESEMBLING, *part.* अनुकारी -रिणी -रि (न्), सदृशः -शी -शं, तुल्यः -ल्या -ल्यं, समः -मा -मं, समाकारः -रा -रं, सरूपः -पा -पं, रूपधृत् *m. f. n.*, रूपभृत् *m. f. n.*, सवर्णः -र्णा -र्णं &c. *See* LIKE.

To RESENT, *v. n.* अपकारम् अपेक्ष्य कुप् (c. 4. कुप्यति, कोपितुं) or प्रकुप् or क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं) or रुष् (c. 1. रुष्यति, रोषितुं) or रोषं कृ or मन्युं कृ, अपकारमपेक्ष्य प्रत्यपकाराय or प्रतिकाराय मनः कृ, अपकारमपेक्ष्य जातमन्युः -न्युः -न्यु भू or जातक्रोधः -धा -धं भू, अपकारमपेक्ष्य क्रोधात् प्रत्यपकारं कृ in des., हिंसाम् अपेक्ष्य जातक्रोधत्वात् प्रतिहिंसां कृ in des. (चिकीर्षति -षितुं) or प्रतिद्रोहाय मनः कृ.

RESENTFUL, *a.* समन्युः -न्युः -न्यु, जातमन्युः &c., प्रतिहिंसाबुद्धिः -द्धिः -द्धि, प्रतिद्रोहबुद्धिः &c., प्रत्यपकारबुद्धिः &c., क्रोधशीलः -ला -लं, कोपशीलः &c., प्रतिहिंसाशीलः &c., दंशी -शिनी -शि (न्), सामुयः -मा -यं.

RESENTMENT, *s.* मन्युः *m.*, क्रोधः, कोपः, रोषः, प्रकोपः, प्रतिद्रोहबुद्धिः *f.*, प्रत्यपकारबुद्धिः *f.*, प्रतिहिंसाबुद्धिः *f.*, दंशः, द्वेषः, असूया, ईर्ष्या, मात्सर्य्यं.

RESERVATION, *s.* (Keeping back, concealing) गोपनं, गुप्तिः *f.*, उपसंहारः, उपसंहरणं, उपसंहृतिः *f.*, संहरणं, संहृतिः *f.*, प्रत्याहारः, प्रत्याहरणं, संवृतिः *f.*, संवरणं, अपवरणं, अपावरणं, धृतिः *f.*, धरणं, विधृतिः *f.*, विधरणं, विनिग्रहः, निभृते स्थापनं.—(Mental reservation) मनोगुप्तिः *f.*, मनोगोपनं, मनोसंवृतिः *f.*, मनोसंवरणं, निह्नुतिः *f.*, अपह्नुतिः *f.*, निह्नवः, अपह्नवः.—(Custody, keeping in store) रक्षा -क्षणं, परिरक्षणं, संग्रहणं, सञ्चयः -यनं.

To RESERVE, *v. a.* (Keep back, withhold to a future time) उपसंहृ (c. 1. -हरति -हर्त्तुं), प्रत्याहृ, संहृ, विधृ (c. 1. -धरति -धर्त्तुं, c. 10. -धारयति -यितुं), विनिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), निग्रह्, आकालान्तरात् or कालान्तरं यावद् उपसंहृ or रक्ष् (c. 1. रक्षति -क्षितुं) or परिरक्ष्.—(Lay up, keep in store to a future time) रक्ष्, परिरक्ष्, आकालान्तरात् or परकालं यावद् रक्ष् or निधा (c. 3. -दधाति -धातुं) or सञ्चम् (c. 4. -अस्यति -सितुं) or संचि (c. 5. -चिनोति -चेतुं) or संग्रह्.—(Conceal to another time) आकालान्तराद् गुप् (c. 1. गोपायति, c. 10. गोपयति, गोपुं) or गोपनं कृ or निभृते स्था in caus. (स्थापयति -यितुं) or संवृ (c. 5. -वृणोति -वरितुं, c. 10. -वारयति -यितुं) or अपवृ or अपावृ or संवरणं कृ; 'in the mind,' मनसा गुप्, मनोगोपनं कृ.—(Suffer to remain to another time) आकालान्तरात् शिष् (c. 10. शेषयति -यितुं) or परिशिष् or अवशिष् or रक्ष्; 'one should reserve one's money for a time of want,' आपदर्थं धनं रक्षेत्.

RESERVE, *s.* (Withholding, keeping back), *see* RESERVATION.—(Something concealed in the mind, withheld from disclosure) मनोगुप्तिः *f.*, मनोगुप्तं, निह्नुतिः *f.*, अपह्नुतिः *f.*—(Restraint) यन्त्रणं, निग्रहः, विनिग्रहः, निगृहीतिः *f.*—(In manner, disinclination to talk) कथाविरक्तिः *f.*, कथाविमुखता, कथावैरक्त्यं, वाग्यतत्वं, वाग्यतिः *f.*, वाग्यन्त्रणं, अल्पभाषणं, कथापराङ्मुखता, संलापपराङ्मुखता, आलापविरक्तिः *f.*, धीरता.—(Stock laid up) सञ्चयः, सञ्चितं, संग्रहः, निचयः.—(Stratagem in reserve, double resource) द्वैधं.—(Of an army) प्रतिग्रहः, परिग्रहः, सज्जनं, पार्ष्णिग्रं, पतद्ग्रहः. *See* REAR-GUARD.—(Without reserve), *see* UNRESERVEDLY.—(In reserve) निभृते, गोपने, गुप्तं. *See* the next.

RESERVED, *p. p.* or *a.* (Kept back or concealed to a future time) आकालान्तरात् or परकालं यावद् रक्षितः -ता -तं or उपसंहृतः -ता -तं or विधारितः &c. or विधृतः &c. or गुप्तः -प्ता -प्तं or निभृते स्थापितः -ता -तं or संवृतः &c.—(Left remaining) शिष्टः -ष्टा -ष्टं, अवशेषितः -ता -तं, आकालान्तराद् अवशेषितः &c.—(Restrained in manner, disinclined to talk) वाग्यतः -ता -तं, वाग्यन्त्रितः &c., यन्त्रितकथः -था -थं, यन्त्रितवाक् *m. f. n.* (च्), कथाविरक्तः -क्ता -क्तं.

संवादविरक्तः &c., कथाविमुखः -खा -खी -खं, कथापराङ्मुखः &c., संलापविमुखः &c., आलापविरक्तः &c., अनालापी -पिनी -पि (न्), अल्पभाषी -षिणी &c., अल्पालापी &c., परिमितालापी &c., परिमितकथः &c., गूढभावः -वा -वं, गूढस्वभावः &c., लज्जाशीलः -ला -लं, धीरः -रा -रं.

Reservedly, *adv.* वाग्यतम, वाग्यतत्वात्, परिमितवाचा, गूढभावेन.

Reservedness, *s.* वाग्यतत्वं, कथाविरक्तिः *f.*, धीरता. *See* Reserve.

Reservoir, *s.* जलाशयः, तडागः, जलाधारः, उदकाधारः, निधानं, खातं, वापी, अम्भोनिधिः *m.*, जलदानगृहं, सरोवरः, क्रीडासरस् *n.*, वरासनं, तल्लः.

To reside, *v. n.* वस् (c. 1. वसति, वस्तुं), निवस, अधिवस्, आवस्, समावस्, प्रतिवस्, वासं कृ, वृत्, स्था, आश्रि, निली, अध्यास्. *See To* dwell.—(Reside together or with) संवस्, सहवासं कृ; 'resided,' उषितः -ता -तं.

Residence, *s.* (Act of dwelling) वासः -सनं, वसनं, वसतिः *f.*, निवसतिः *f.*, निवासः, अधिवासनं -सिता, अधिष्ठानं, अधिष्ठितिः *f.*, अवस्थितिः *f.*, स्थितिः *f.*, संस्थितिः *f.*, प्रतिष्ठा, यज्ञनं, निलयनं, आश्रयणं, अध्यासः -सनं; 'residence abroad,' प्रवासः.—(Place of dwelling) वसतिः *f.*, वासः, वासस्थानं, निवसतिः *f.*, निवासः, निवासस्थानं, निवासभूमिः, गृहं, आवासः, अधिवासः, समावासः, आवसथः, वास्तुः -स्तु *m. n.*, स्थानं, अवस्थानं, प्रतिष्ठा, आयतनं, निकेतनं, आलयः, निलयः, निलायिता, क्षिः *f.*; 'permanent residence,' स्थिरप्रतिष्ठा, स्थावरप्रतिष्ठा; 'changing of residence,' गृहान्तरगमनं, स्थानान्तरगमनं, स्थलान्तरकरणं. *See* Dwelling.

Resident, *a.* वासी -सिनी -सि (न्), निवासी &c., वासकारी &c., स्थायी &c., स्थः -स्था -स्थं in comp., संस्थः -स्था -स्थं in comp., निलायी &c., कृतवासः -सा -सं, कृतालयः -या -यं, आश्रितः -ता -तं, समाश्रितः &c., समावासितः &c., अवस्थितः &c., अधिष्ठितः &c.; 'resident in Mathurá,' मथुरावासी &c., मथुरानिवासी &c.; 'in the city,' नगरस्थः &c.; 'the people resident there,' तत्रस्था जनाः.

Resident, *s.* वासी *m.* (न्); 'temporary resident,' आगन्तुः -न्तुकः.

Residentiary, *a.* वासी -सिनी &c., वासकारी &c. *See* Resident, *a.*

Residuary, residual, *a.* शेषसम्बन्धी -न्धिनी &c.; 'legatee,' शेषभागी *m.* (न्), शेषाधिकारी *m.*, शेषरिक्थभागी *m.*, शेषरिक्थभाक् *m.* (ज्).

Residue, *s.* शेषः -षं, अवशेषः, अवशिष्टं, परभागः, *see* Remainder.

To resign, *v. a.* (Give up) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, संत्यज्, उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अपसृज्, उत्सर्गं कृ, उत्सर्जनं कृ, हा (c. 3. जहाति, हातुं), विहा, प्रहा, प्रोज्झ्, सन्यस्, प्रत्यादिश्; 'by writing,' त्यागपत्रेण उत्सृज्; 'to resign a title or claims,' अधिकारत्यागं कृ, स्वत्वत्यागं कृ, स्वत्वनिवृत्तिं कृ.—(Commit) समृ in caus. (-अर्पयति -यितुं), न्यस् in caus., न्यस्, निक्षिप्, न्यासीकृ, प्रतिपद् in caus., परिदा, समर्पणं कृ.—(Submit to) सह् (c. 1. सहते, सोढुं), विषह्, क्षम् (c. 1. क्षमते, क्षन्तुं), तिज् in des.

Resignation, *s.* (Giving up) त्यागः, परित्यागः, उत्सर्गः, उत्सर्जनं, विसर्जनं, सन्यसनं, सन्यासः; 'written resignation,' त्यागपत्रं, परित्यागपत्रं, त्यागलेखः; 'of claim,' स्वत्वत्यागः, स्वत्वनिवृत्तिः *f.*—(Committing, yielding) समर्पणं, अर्पणं, निक्षेपः, न्यसनं, न्यासीकरणं.—(Submission) क्षमा, क्षान्तिः *f.*, तितिक्षा, सहनं, सहिष्णुता, धीरता, धर्यं, शान्तिः *f.*, सन्तोषवृत्तिः *f.*—(To the will of God) ईश्वरेच्छासन्तोषवृत्तिः *f.*, ईश्वरेच्छानुवृत्तिः *f.*, ईश्वरेच्छानुवर्त्तनं, ईश्वरेच्छानुमतिः *f.*, ईश्वरेच्छानुरोधः, ईश्वरेच्छापरितोषः, भगवदिच्छानुमतिः *f.*, तितिक्षा, ईश्वरसंकल्पानुवृत्तिः *f.*

Resigned, *p. p.* or *a.* (Given up) त्यक्तः -क्ता -क्तं, परित्यक्तः &c., उत्सर्जितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, सन्यस्तः -स्ता -स्तं.—(Submissive) क्षान्तः -न्ता -न्तं, क्षमावान् -वती -वत् (त्), सेहिष्णुः -ष्णुः -ष्णु, तितिक्षुः &c., शान्तः &c., *see* Patient.—(To the will of God) ईश्वरेच्छासन्तोषवृत्तिः -त्तिः -त्ति, ईश्वरेच्छानुवर्त्ती -र्त्तिनी -र्त्ति (न्), ईश्वरेच्छानुरोधी &c., ईश्वरेच्छासन्तुष्टः -ष्टा -ष्टं, ईश्वरेच्छाभिमतः -ता -तं, ईश्वरेच्छानुमतः &c., ईश्वरसङ्कल्पानुवर्त्ती &c., भगवत्सङ्कल्पपरितुष्टः &c., यतचित्तः -त्ता -त्तं, शान्तचेताः -ताः -तः (स्).

Resilience, resiliency, *s.* प्रतिघातः. *See* Rebound.

Resin, *s.* सर्ज्जरसः, यक्षधूपः, अरालः, रालः, वृक्षधूपः, वृक्षनिर्य्यासः, शालनिर्य्यासः, सर्ज्जमणिः *m.*, सुरधूपः, धूपनः, सर्ज्जरसः, रसाढ्यः, दधि *n.*, तीक्ष्णतैलं, अग्निवल्लभः, वह्निवल्लभः, महारूपः, बहुरूपः, कलकलः, धूनकः.

Resinous, *a.* सर्ज्जरसगुणकः -का -कं, यक्षधूपसगुणः -णा -णं.

To resist, *v. a.* or *n.* (Oppose, withstand) प्रतिकृ, विप्रतिकृ, विप्रकृ, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं), प्रतिकूलः -ला -लं भू, पर्यवस्था (c. 1. -तिष्ठति -स्थातुं), प्रत्यवस्था, प्रत्याहन् (c. 2. -हन्ति -न्तुं), व्याहन्, निहन्, प्रतीप (nom. प्रतीपायते), प्रतियुध्, प्रतिसमास् (c. 2. -आस्ते -आसितुं), परिपन्थ (nom. परिपन्थयति -यितुं), विपक्षतां कृ, विरोधं कृ, प्रतिरोधं कृ, प्रातिकूल्यं कृ.—(Hinder) निवृ (c. 10. -वारयति -यितुं), बाध् (c. 1. बाधते -धितुं), प्रतिबन्ध् (c. 9. -बध्नाति -बन्धुं), रुध्, निरुध्.—(Check) निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, स्तम्भ् (c. 10. स्तम्भयति -यितुं), प्रतिष्टम्भ्.

Resistance, *s.* प्रतिकारः, प्रतीकारः, विप्रतिकारः, प्रतिक्रिया, विरोधः, प्रतिरोधः, प्रतिकूलता, प्रातिकूल्यं, प्रतियोगः -गिता, पर्यवस्थानं, पर्यवस्था, पर्यवस्थितिः *f.*, प्रत्यवस्थानं, प्रत्यवस्थितिः *f.*, प्रतिच्छेदः, निकारः, प्रतिबन्धः -न्धकता, प्रतिष्टम्भः, निग्रहः -हणं, अवग्रहः, निवारणं, प्रतियत्नः, प्रत्युपायः.—(In mechanics) प्रत्याघातः, प्रतिघातः.

Resisted, *p. p.* प्रतिकृतः -ता -तं, विप्रतिकृतः &c., विप्रकृतः &c., प्रतिरुद्धः -द्धा -द्धं, रुद्धः &c., पर्यवस्थितः &c., प्रत्यवस्थितः &c., प्रतिष्टम्भः -भा -भं, निवारितः -ता -तं, प्रतिहतः &c., व्याहतः &c.

Resister, *s.* विरोधी *m.* (न्), प्रतिरोधी *m.*, प्रतियोगी *m.*, पर्यवस्थाता *m.* (तृ), प्रत्यवस्थाता *m.*, प्रतिरोधकः, प्रतिघाती *m.*, विरोधकारी *m.*

Resistless, *s.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अनवग्रहः -हा -हं. *See* Irresistible.

Resolute, *a.* दृढनिश्चयः -या -यं, स्थिरनिश्चयः &c., दृढसंकल्पः -ल्पा -ल्पं, स्थिरमतिः -तिः -ति, स्थिरचेताः -ताः -तः (स्), सुस्थिरचेताः &c., स्थितधीः -धीः -धि, वज्रसंकल्पः -ल्पा -ल्पं, स्थिरः -रा -रं, सुस्थिरः &c., धीरः -रा -रं, सुधीरः &c., धैर्य्यवान् -वती -वत् (त्), धृतिमान् &c., साङ्कल्पिकः -की -कं, प्रगल्भः -ल्भा -ल्भं, व्यवसायी -यिनी -यि (न्), कृतनिश्चयः &c.

Resolutely, *adv.* दृढनिश्चयपूर्व्वं, सुस्थिरनिश्चयं, सुस्थिरं, स्थिरचेतसा.

Resoluteness, *s.* स्थिरमतित्वं, दृढसंकल्पता, धैर्य्यं. *See* the next.

Resolution, *s.* (Fixed purpose, determination) निश्चयः, विनिश्चयः, सङ्कल्पः, व्यवसायः, अध्यवसायः, निर्णयः, दृढनिश्चयः, दृढसङ्कल्पः, स्थिरनिश्चयः, कल्पः, मतिः *f.*, दृढमतिः *f.*, सम्प्रधारणा.—(Constancy) स्थिरमतित्वं, स्थिरता, सुस्थिरता, स्थैर्य्यं, धीरता, धैर्य्यं, धृतिः *f.*, धृतिमत्त्वं, धारणं -णा, प्रगल्भता, प्रागल्भ्यं, आग्रहः, निर्बन्धः.—(Decision or proposition offered for determination) निश्चयः, निर्णयः, उपन्यासः.—(Separation of parts), *see* Dissolution, Solution.

Resolvable, *s.* विलयनीयः -या -यं, विभाज्यः -ज्या -ज्यं, विभेद्यः -द्या -द्यं.

To resolve, *v. a.* (Dissolve) विली in caus., विद्रु in caus., *see* Dissolve, Liquefy.—(Separate component parts) पृथक्कृ,

विभज्, वियुज्, विभिद्, विच्छिद्, विश्लिष् in caus., विदु in caus., मूलतत्त्वशोधनं कृ, उपोद्घातं कृ.—(Resolve doubts or difficulties) संशयान् छिद् (c. 7. छिनत्ति, छेत्तुं) or उच्छिद्, व्याख्या (c. 2. -ख्याति -तुं), *see To* SOLVE.—(Constitute by resolution) निश्चयपूर्व्वं व्यवस्था in caus. or संस्था or विधा or कृ.

To RESOLVE, *v. n.* (Determine in the mind) निश्चयं कृ, विनिश्चयं कृ, निर्णयं कृ, सङ्कल्पं कृ, मनसा निश्चि (c. 5. -चिनोति -चेतुं) or निर्णी (c. 1. -णयति -णेतुं) or संकल्प् (c. 10 -कल्पयति -यितुं), व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो, मतिं कृ, बुद्धिं कृ, मनः कृ with dat. or loc. c.; as, 'he resolves to go,' गमनाय मनः or मतिं करोति, गमनाय निश्चयं करोति; 'he resolves to do that,' तत् कर्त्तुं व्यवस्यति; 'he is resolved to sacrifice his life,' स्वप्राणान् परित्यक्तुं व्यवसितो ऽस्ति.—(Dissolve) *see* DISSOLVE, MELT.

RESOLVED, *p. p.* (Analyzed) पृथक्कृतः -ता -तं, व्याकृतः &c., विभक्तः -क्ता -क्तं.—(Determined) कृतनिश्चयः -या -यं, कृतसङ्कल्पः -ल्पा -ल्पं, निश्चितः -ता -तं, सुनिश्चितः &c., सङ्कल्पितः &c., साङ्कल्पिकः -की -कं, व्यवसितः -ता -तं, प्रपतितः &c. कृतबुद्धिः -द्धिः -द्धि; 'having resolved on going to the forest,' वनगमनाय कृतबुद्धिः or वनं गन्तुं व्यवसितः.

RESOLVENT, *s.* (In medicine) द्रायकः, द्रायणं, शोथघ्नः, शोथहृत्.

RESOLVER, *s.* (Of doubts) संशयच्छेत्ता *m.* (त्र्), संशयोच्छेदी *m.* (न्).

RESONANCE, *s.* अनुनादः, ध्वनुनादः, प्रोद्घोषणं, उद्घोषणं, प्रतिध्वनिः *m.*

RESONANT, *a.* अनुनादी -दिनी -दि (न्), अनुनादः -दा -दं, प्रोद्घुष्टः -ष्टा -ष्टं, संघुष्टः &c., परिसंघुष्टः &c., उपघुष्टः &c., निर्ह्रादी &c., मुखरितः -ता -तं.

To RESORT, *v. n.* आश्रि (c. 1. -श्रयति -यितुं), श्रि, आश्रयणं कृ, गम् (c. 1. गच्छति, गन्तुं), उपगम्, प्रतिगम्, अभिगम्, आगम्, उप (c. 2. उपैति -तुं, rt. इ), अभ्युपे, अभिसृ (c. 1. -सरति -सर्त्तुं), या (c. 2. याति -तुं), प्रतियां, प्रत्यायां, अभियां, या, सेव् (c. 1. सेवते -वितुं); 'resorted to,' आश्रितः -ता -तं; 'having resorted to,' आश्रित्य.

RESORT, *s.* (Act of going or betaking one's self) आश्रयणं, श्रयणं, उपगमः -मनं, अभ्युपगमः -मनं, प्रतिगमनं, अभिगमः -मनं, गमनं, अभिसारणं.—(Place of resort) गमनागमनस्थानं, अभिगमनस्थानं, अभिसारणस्थानं, आश्रयणस्थानं, आश्रयः, समाश्रयः, आयतनं, आशयः; 'resort of man,' लोकयात्रा.—(Refuge, means of relief) गतिः *f.*, उपायः.

To RESOUND, *v. a.* अनुनद् (c. 10. -नादयति -यितुं), ध्वनुनद्, अभिनद्, आनद्, सन्नद्, नद्, ध्वन् (c. 10. ध्वनयति -यितुं), प्रतिध्वन्, प्रतिध्वनिं कृ.

To RESOUND, *v. n.* ध्वन् (c. 1. ध्वनति -नितुं), प्रतिध्वन्, प्रध्वन्, स्वन् (c. 1. स्वनति -नितुं), प्रतिस्वन्, स्तन् (c. 1. स्तनति -नितुं), प्रोद्घुष् (c. 1. -घोषति -षितुं), परिसंघुष्, गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), प्रक्ष्वेड् (c. 1. -क्ष्वेडति -डितुं), रस् (c. 1. रसति -सितुं).

RESOUNDING, *part.* (Sounding with) अनुनादः -दा -दं, निर्घुष्टः -ष्टा -ष्टं, परिसंघुष्टः &c., उपकूजितः -ता -तं, विकूजितः &c.

RESOURCE, *s.* गतिः *f.*, उपायः, अभ्युपायः, युक्तिः *f.*, प्रयुक्तिः *f.*, उपपत्तिः *f.*, तरणोपायः, कृत्रिः *f.*, कल्पना; 'other resource,' गत्यन्तरं, अन्योपायः, अन्यगतिः *f.*; 'having no other resource,' अनन्यगतिः -तिः -ति, अनन्यगतिकः -का -कं; 'having no resource,' अगतिकः -का -कं, गतिहीनः -ना -नं, निरुपायः -या -यं; 'last resource,' चरमगतिः *f.*, चरमोपायः, अगतिकगतिः *f.*—(Resources) विभवः, वित्तं, सम्भवः, धनं, अर्थः, आगमः, आयः; 'of small resources,' अल्पविभवः -वा -वं; 'of concealed resources,' उपगुप्तवित्तः -त्ता -त्तं.

RESOURCELESS, *a.* अगतिकः -का -कं, गतिहीनः -ना -नं, निरुपायः -या -यं.

To RESPECT, *v. a.* (Regard, relate to) अपेक्ष (c. 1. अपेक्षते -क्षितुं, rt. ईक्ष्), अवेक्ष्, प्रतीक्ष, उद्दिश् (c. 6. -दिशति -देष्टुं), विषयकः -का -कं भू, सम्बन्ध् in pass. (-ध्यते), सम्बद्धः -द्धा -द्धं भू, सम्बन्धी -न्धिनी -न्धि भू.—(Esteem, reverence) मन् (c. 10. मानयति -यितुं), प्रतिमन्, सम्मन्, पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, आदृ (c. 6. -द्रियते -दर्त्तुं), सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), भज् (c. 1. भजति, भक्तुं), अर्ह् (c. 10. अर्हयति -यितुं), अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), अभ्यर्च्, समभ्यर्च्, समर्च्, सम्भू (c. 10. -भावयति -यितुं), पुरस्कृ, आदरं कृ, सम्मानं कृ.

RESPECT, *s.* (Relation, reference, regard) अपेक्षा, प्रतीक्षा, उद्देशः, विषयत्वं -ता, सम्बन्धः, अवेक्षा, अन्ववेक्षा, मन्धानं; 'with respect to,' अपेक्षया, अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, उद्देशेन, प्रति affixed; as, 'with respect to me,' मां प्रति.—(Esteem, reverence) मानं, सम्मानं, आदरः, मान्यत्वं, पूजा, अर्हा -र्हणं -र्हणा, सम्भावना, अर्चा, अर्चनं -ना, अभ्यर्चा -र्चनं, सेवा -वनं, पुरस्कारः, प्रतीतिः *f.*, सत्कारः, अनुनयः, भक्तिः *f.*, सम्भ्रमः, मर्य्यादा; 'much respect,' बहुमानं.—(Respects, act of reverence) प्रणिपातः, प्रणामः, प्रणतिः *f.*, प्रणिपतनं, अभिवादनं, नमस्कारः, नमस्, नमस्या, वन्दनं, अभिवन्दनं; 'to pay one's respects,' प्रणिपत्, प्रणम्, नमस्कृ, अभिवद्, अभिवन्द्, वन्दनं कृ, प्रणामं कृ.—(Regard, view) अवेक्षा, अन्ववेक्षा, प्रतीक्षा, दृष्टिः *f.*; 'respect of persons,' भेददृष्टिः *f.*, पक्षदृष्टिः, पक्षपातः.—(Particular) विषयः, प्रकरणं.

RESPECTABILITY, *s.* मान्यता, सम्मान्यता, आर्य्यता -त्वं, गौरवं, गुरुता -त्वं, मर्य्यादा, प्रतिष्ठा; 'family respectability,' कुलमर्य्यादा.

RESPECTABLE, *a.* आर्य्यः -र्य्या -र्य्यं, मान्यः -न्या -न्यं, माननीयः -या -यं, सम्मान्यः &c., आदरणीयः -या -यं, पूजनीयः -या -यं, पूज्यः -ज्या -ज्यं, पूजनार्हः -र्हा -र्हं, प्रतीक्ष्यः -क्ष्या -क्ष्यं, प्रतीक्षणीयः -या -यं, अर्च्यः -र्च्या -र्च्यं, अर्चनीयः -या -यं, गुरुः -रुः -रु, सगौरवः -वा -वं, गौरवितः -ता -तं, मर्य्यादावान् -वती -वत् (त्), मर्य्यादापालकः -का -कं, कुलमर्य्यादापालकः &c., मानी -निनी -नि (न्), पुरस्करणीयः &c., शिष्टः -ष्टा -ष्टं, सम्भावितः -ता -तं, भद्रकः -का -कं, अकुत्सितः -ता -तं, प्रतिष्ठितः &c., सप्रतिष्ठः -ष्ठा -ष्ठं; 'highly respectable,' परममान्यः &c.; 'a respectable person,' आर्य्यजनः, आर्य्यकः, आर्य्यमिश्रः, सज्जनः, सुजनः; 'respectable woman,' आर्य्यिका, आर्य्यका, कुलपालिका, कुलमर्य्यादापालिका, कुलस्त्री, कुलवधूः *f.*—(Moderate, fair) मध्यमः -मा -मं.

RESPECTABLY, *adv.* आर्य्यं, सगौरवं, समर्य्यादं, आर्य्यवत्, मान्यवत्, शिष्टवत्, आर्य्यजनवत्, आर्य्य in comp.; as, 'respectably dressed,' आर्य्यवेशः -शा -शं.

RESPECTED, *p. p.* सम्मानितः -ता -तं, पूजितः &c., आदृतः &c., कृतादरः -रा -रं, सेवितः -ता -तं. अर्चितः &c., प्रतीक्षितः &c.

RESPECTER, *s.* पूजकः, सम्पूजकः, आदरकृत्, प्रतीक्षकः, अवेक्षकः.

RESPECTFUL, *a.* आदरकारी -रिणी -रि (न्), आदृतः -ता -तं, दत्तादरः -रा -रं, कृतादरः &c., सादरः -रा -रं, आदरपूर्व्वः -र्व्वा -र्व्वं, आदरशीलः -ला -लं, आदरयुक्तः -क्ता -क्तं, मानकारी &c., मर्य्यादाशीलः &c., समर्य्यादः -दा -दं, प्रतीतः -ता -तं, सम्प्रतीतः &c.

RESPECTFULLY, *adv.* सादरं, समानं, आदरपूर्व्वं, आदरपुरःसरं, ससम्मानं, सम्मानपूर्व्वं, समर्य्यादं, अर्चापूर्व्वकं.

RESPECTFULNESS, *s.* आदरशीलता, मर्य्यादाशीलता, सादरत्वं, मर्य्यादा.

RESPECTING, *part.* प्रतीक्षकः -का -कं, अपेक्षकः &c., उद्देशकः &c.,

अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, प्रति affixed with an acc. c.

Respective, *a.* (Relative, not absolute) सापेक्षः -क्षा -क्षं, अपेक्षकः -का -कं, सम्बन्धः -न्धा -न्धं. *See* Relative.—(Several) इतरेतरः -रा -रं, अन्योन्यः -न्या -न्यं, *see* Several; 'respective inclination,' इतरेतरकाम्या.—(Own) expressed by doubling the pronouns स्व, स्वकीय, स्वीय, स्वक, निज, आत्म, आत्मीय &c.; thus, 'in their respective stations.' स्वेषु स्वेषु स्थानेषु or simply by doubling the noun; thus, 'they dwell each in their respective houses,' गृहे गृहे प्रत्येकं वसन्ति.

Respectively, *adv.* इतरेतरं, अन्योन्यं, प्रत्येकं, प्रति or अनु prefixed, or more usually expressed by doubling a pronoun or noun, *see* the last.

Respiration, *s.* श्वासप्रश्वासं, श्वासोच्छ्वासं, श्वासः, श्वसनं, उच्छ्वासनं, प्राणः.

Respiratory, *a.* श्वासप्रश्वासकारी -रिणी &c., श्वासोच्छ्वाससम्बन्धी &c.

To respire, *v. n.* श्वासप्रश्वासं कृ, श्वासोच्छ्वासं कृ, श्वस् (c. 2. श्वसिति -तुं), आश्वस्, उच्छ्वस्, प्रश्वस्, प्राण् (c. 2. प्राणिति -तुं, rt. अन्).

Respite, *s.* विश्रामः, विश्रान्तिः *f.*, विरामः, विरतिः *f.*, निवृत्तिः *f.*, उपशमः, अपशमः, शमः, शान्तिः *f.*, विच्छेदः, अवरतिः *f.* *See* Reprieve.

To respite, *v. a.* विश्रामं दा, विश्रान्तिं दा, विश्रम् in caus. (-श्रामयति -यितुं), विरामं दा, अवकाशं दा. *See To* reprieve.

Resplendence, resplendency, *s.* प्रतापः, तेजस् *n.*, अतितेजस्. *See* Splendor.

Resplendent, *a.* प्रतापी -पिनी -पि (न्), सुप्रभः -भा -भं, देदीप्यमानः -ना -नं, प्रकाशमानः &c., विभ्राजमानः &c., आदित्यः -त्या -त्यं, भानुमान् -मती -मत् (न्) *See* Splendid.

To respond, *v. n.* प्रतिवच् (c. 2. -वक्ति -क्तुं), प्रतिवद (c. 1. -वदति -दितुं), प्रतिभू, प्रतिभण्, प्रतिजल्प्. *See To* answer, reply, correspond.

Respondent, *s.* (In law) प्रतिवादी *m.* (न्), उत्तरवादी *m.*, प्रतिपक्षी *m.*, उत्तरपक्षी *m.*, समाधानपक्षी *m.*—(Party or cause of the respondent) उत्तरपक्षः, प्रतिपक्षः, समाधानपक्षः.

Response, *s.* (Answer) प्रतिवाक्यं, प्रतिवचनं, उत्तरं, *see* Reply.—(In disputations) प्रतिवादः, उत्तरं, प्रत्युत्तरं, समाधानं.—(Of an oracle) शकुनः -नं, प्रश्नः, प्रसादः, दैववाणी, आकाशवाणी.—(In a litany, &c.) उत्तरवाक्यं.

Responsibility, *s.* अनुयोगाधीनता, अनुसन्धानाधीनता, विचाराधीनता, आह्वानाधीनता, अभियोज्यता, अनुयोज्यता, अभियोजनीयता, पर्यनुयोगाधीनता, पर्यनुयोज्यता, अनुसन्धानयोग्यता, आह्वानयोग्यता, आह्वेयता, उत्तरदानाधिकारः, उत्तरदानाधीनता, पृच्छाधीनता.

Responsible, *a.* (Liable to account or answer) अनुयोगाधीनः -ना -नं, पर्यनुयोगाधीनः &c., अनुसन्धानाधीनः &c., आह्वानाधीनः &c., आह्वेयः -या -यं, विचाराधीनः -ना -नं, अभियोज्यः -ज्या -ज्यं, अनुयोज्यः &c., पर्यनुयोज्यः &c., अनुयोजनीयः -या -यं, अनुयोक्तव्यः -व्या -व्यं, अभियोक्तव्यः &c., पृच्छाधीनः &c., आह्वानयोग्यः &c., अभियोक्तुराह्वानाधीनः &c., उत्तरदानाधिकारी -रिणी -रि (न्), उत्तरदानाधीनः -ना -नं; 'a responsible person,' अनुयोगाधीनजनः, यः प्रत्युत्तरं or प्रतिवाक्यं दातुम् अर्हति or येन प्रत्युत्तरं दातव्यम् ईदृशो जनः.—(Admitting or requiring an answer) प्रतिवाक्यः -क्या -क्यं.

Responsion, *s.* प्रतिवचनं, प्रतिवाक्यं, उत्तरकरणं, प्रत्युत्तरकरणं.

Responsive, *a.* उत्तरकारी -रिणी -रि (न्), उत्तरदायकः -का -कं, उत्तरदायी &c.

Rest, *s.* (Cessation of action or motion) विश्रामः, विश्रान्तिः *f.*, विश्रमः, निवृत्तिः *f.*, विरामः, विरतिः *f.*, अवरतिः *f.*, उपरतिः *f.*, चेष्टानिवृत्तिः *f.*, व्यापारनिवृत्तिः *f.*, श्रमनिवृत्तिः *f.*, निश्चलता, श्रमच्छेदः, निर्व्यापारता, निरुद्यमता, व्यापाराभावः, उद्योगनिवृत्तिः *f.*, स्थिरता, नैश्चल्यं, अचलता, चलनाभावः. *See* Quiescence.—(Tranquillity, ease, quiet) सुखं, शान्तिः *f.*, शमः, उपशमः, शान्तता, प्रशान्तिः *f.*, स्वस्थता, स्वास्थ्यं, सौख्यं, समाधानं.—(Sleep, repose) निद्रा, निद्रावस्था, निद्रादशा, स्वप्नः, शयनं; 'at rest,' शान्तः -न्ता -न्तं, निर्वृतः -ता -तं, विश्रान्तः -न्ता -न्तं, निश्चलः -ला -लं, निर्व्यापारः -रा -रं, निश्चेष्टः -ष्टा -ष्टं, निरुद्यमः -मा -मं, निरुद्योगः -गा -गं.—(Pause in music or poetry) यतिः *f.*, अवसानं.—(That which is left) शिष्टं, अवशिष्टं, उच्छिष्टं, शेषः -षं, अवशेषः, *see* Remainder.—(The others) शिष्टजनाः *m. pl.*, अवशिष्टजनाः *m. pl.*, इतरे *m. pl.*, अपरे *m. pl.*, अन्ये *m. pl.* *See* Et-cætera.

To rest, *v. n.* (Cease from action or motion, be still) विश्रम् (c. 4. -श्राम्यति -श्रमितुं), निश्चलीभू, निश्चलः -ला -लं भू, विरम् (c. 1. -रमति -रन्तुं), आरम्, उपरम्, निवृत् (c. 1. -वर्तते -र्त्तितुं), निवृत्, विनिवृत्, स्थिरीभू.—(Be tranquil, quiet) शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, सुखी -खिनी -खि भू, स्वस्थः -स्था -स्थं भू.—(Repose, sleep) शी (c. 2. शेते, शयितुं), स्वप् (c. 2. स्वपिति -तुं), संविश् (c. 6. -विशति -वेष्टुं), निद्रा, शयनं कृ, स्वप्नं कृ, निद्रां कृ.—(Lean on) अवलस् (c. 1. -लसते -सितुं), समालस्, आलस्, संश्रि (c. 1. -श्रयति -ते -यितुं), समाश्रि, उपाश्रि, अवस्था (c. 1. -तिष्ठति -स्थातुं), निली (c. 4. -लीयते -लेतुं), सन्निली, अवलसनं कृ.—(Confide) विश्वस्, विश्रम्भ्.—(Remain) स्था, वृत्.

To rest, *v. a.* (Lay to rest, cause to rest) शी in caus. (शाययति -यितुं), विश्रम् (c. 10. -श्रामयति -यितुं), संविश् (c. 10. -वेशयति -यितुं), शयनं कृ.—(Lay, place on a support) अवलस् in caus. (-लसयति -यितुं), न्यस् (c. 4. -अस्यति -स्तितुं), निधा, आधा, निविश्, स्था in caus., सु in caus., समृ, आधारं कृ, आश्रयं कृ.

Rested, *p.p.* (Relieved from fatigue) विश्रान्तः -न्ता -न्तं, गतक्लमः -मा -मं, गतश्रमः -मा -मं, *see* Refreshed.—(Laid on for support) अवलम्बितः -ता -तं, आश्रितः -ता -तं, निलीनः -ना -नं, निषण्णः -ण्णा -ण्णं, निहितः &c., न्यस्तः -स्ता -स्तं; 'having rested upon,' अवलम्ब्य, उपधाय.

Resting, *part.* अवलम्बी -म्बिनी -म्बि (न्), अवलम्बितः -ता -तं, आश्रितः &c., संश्रितः &c., सन्निहितमानः -ना -नं; 'her face resting on her hand,' हस्तनिहितवदना; 'resting on the head,' मस्तकस्थः -स्था -स्थं; 'a vessel resting on his head,' मस्तकावस्थितभाण्डं.

Resting-place, *s.* विश्रामस्थानं, विश्रमस्थानं, शयनस्थानं, उपधानं.

Restitution, *s.* प्रतिदानं, प्रत्यर्पणं, परिदानं, हृतप्रतिदानं, हृतप्रत्यर्पणं, हृतपरिदानं, पुनरर्पणं, प्रत्यानयनं. *See* Restoration.

Restive, restiff, *a.* दुर्दम्यः -म्या -म्यं, दुर्विनीतः -ता -तं, दुर्विनेयः -या -यं, दुर्वश्यः -श्या -श्यं, अदम्यः &c., अवश्यः &c., अविनेयः &c., प्रतीपः -पा -पं, विषमः -मा -मं, दुर्नियहः -हा -हं, दुर्ज्ञेयः -या -यं, दुष्टः -ष्टा -ष्टं; 'horse,' शूकलः, शूलकः; 'elephant,' अंकुशदुर्द्धरः.

Restiveness, *s.* दुर्दम्यता, दुर्विनीतता, अवश्यता, प्रतीपता, दुष्टता.

Restless, *a.* (Unquiet) अशान्तः -न्ता -न्तं, शान्तिहीनः -ना -नं, अनिवृतः -ता -तं, अशान्तचित्तः -त्ता -त्तं, अस्वस्थः -स्था -स्थं, व्यग्रः -ग्रा -ग्रं, व्यग्रचित्तः &c., परिस्रवः -वा -वं, आकुलः -ला -लं, विह्वलः -ला -लं, असमाहितः -ता -तं.—(Fidgety, always moving) चञ्चलः -ला -लं, चपलः -ला -लं, सदाचलः &c., सततगतिः -तिः -ति, सदा-

गतिः &c., निरास्पदः -दा -दं, अत्यनीनः -ना -नं.—(Sleepless) निर्निद्रः -द्रा -द्रं, विनिद्रः &c., अनिद्रः &c., उन्निद्रः &c., निद्राहीनः -ना -नं, स्वप्नहीनः &c.

RESTLESSLY, *adv.* अशानं, अशान्या, चचलं, सचाचल्यं, अनिर्वृतं.

RESTLESSNESS, *s.* अशानिः *f.*, शान्तिहीनता, अनिर्वृतिः *f.*, अस्वस्थता, अस्वास्थ्यं, चचलता, चाचल्यं, चपलता, व्यग्रता, व्याकुलता, असमाधानं, असमाहितत्वं.

RESTORABLE, *a.* परावर्त्यः -र्त्या -र्त्यं, प्रतिदेयः -या -यं, प्रत्यर्पणीयः &c.

RESTORATION, *s.* (Act of giving back) प्रतिदानं, प्रत्यर्पणं, परावर्त्तः -र्त्तनं, परावृत्तिः *f.*, परिदानं, द्रुतप्रतिदानं, द्रुतपरिदानं, द्रुतप्रत्यर्पणं.—(Bringing back, or replacing in a former state) प्रत्यानयनं, उद्धरणं, उद्धारः, पूर्व्ववत्करणं, पूर्व्वस्थितिस्थापना, पूर्व्वदशास्थापनं, पूर्व्वदशानयनं, पुनःस्थापनं -ना.—(Repairing) जीर्णोद्धारः, जीर्णोद्धरणं, नष्टोद्धारः, नष्टोद्धरणं.—(Recovery) समुत्थानं, रोगात्समुत्थानं. *See* RECOVERY.

RESTORATIVE, *a.* तेजोदायकः -का -कं, तेजस्करः -रा -रं, सत्त्वदः -दा -दं, अग्निदायकः &c., अग्निदः &c., तेजोवर्धकः &c. *See* INVIGORATING.

RESTORATIVE, *s.* अग्निदायकम् or तेजोदायकम् औषधं, तेजोवर्धनं.

To RESTORE, *v. a.* (Give back) प्रतिदा (c. 3. -ददाति -दत्ते -दातुं), परिदा, प्रत्यृ in caus. (-अर्पयति -यितुं), प्रतिपद् (c. 10. -पादयति -यितुं), पुनः प्रतिपद्, पुनर् भृ in caus., पुनर् दा, पुनः प्रदा, परावृत् in caus. (-वर्त्तयति -यितुं), प्रयम् (c. 1. -यच्छति -दातुं), पुनः प्रयम्, नियैत् (c. 10. -यातयति -यितुं), समुपाकृ, प्रत्यर्पणं कृ, प्रतिदानं कृ, परावर्त्तं कृ.—(Replace) पुनः स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, प्रतिरुह् in caus., प्रतिधा, *see* REPLACE.—(Bring back to its former state, repair) पूर्व्ववत् कृ, पूर्व्वस्थितिम् आनी or गम् in caus., पूर्व्वदशाम् आनी or प्रत्यानी, उद्धृ (c. 1. उद्धरति, उद्धर्त्तुं, rt. हृ), जीर्णोद्धारं कृ, प्रतिकृ, प्रतिसंस्कृ, साध्, *see To* REPAIR.—(Bring back) प्रत्यानी (c. 1. -नयति -नेतुं), प्रतिनी, पुनर् आनी.—(Restore to life) जीव् in caus., *see To* RE-ANIMATE.—(To health), *see To* CURE, RECOVER.

RESTORED, *p. p.* (Given back) प्रतिदत्तः -त्ता -त्तं, परिदत्तः &c., प्रत्यर्पितः -ता -तं, पुनरर्पितः &c., प्रतिपादितः &c., प्रत्यापन्नः -न्ना -न्नं, प्रदत्तः -त्ता -त्तं, परावृत्तः -त्ता -त्तं, परावर्त्तितः -ता -तं.—(Replaced) पुनःस्थापितः -ता -तं, प्रतिष्ठापितः &c.—(Repaired) उद्धृतः -ता -तं, जीर्णोद्धृतः &c., प्रतिसंस्कृतः &c.—(Brought back) प्रत्यानीतः -ता -तं, पुनरानीतः &c.—(To life) प्राप्तजीवनः -ना -नं.—(To one's senses) लब्धचेताः -ताः -तः (स्), प्राप्तचैतन्यः -न्या -न्यं. *See* RECOVERED.

RESTORER, *s.* प्रतिदाता *m.* (तृ), उद्धर्त्ता *m.* (र्त्तृ), जीर्णोद्धर्त्ता, जीर्णोद्धारकः.

To RESTRAIN, *v. a.* निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, संयम्, परियम्, अभ्यायम्, यम्, निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, सन्निरुध्, संरुध्, निषृ (c. 10. -धारयति -यितुं), धृ, संहृ (c. 1. -हरति -हर्त्तुं), प्रत्याहृ, उपसंहृ, विधृ (c. 10. -धारयति -यितुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), बाध्, निषिध्, प्रतिषिध्, प्रतिबन्ध्, नियमनं कृ, आकलनं कृ, आकल्.

RESTRAINABLE, *a.* निग्रहीतव्यः -व्या -व्यं, निग्रहणीयः -या -यं, नियन्तव्यः &c., नियम्यः -म्या -म्यं, निवारणीयः &c., संहरणीयः &c., प्रत्याहरणीयः &c., आकलनीयः &c.

RESTRAINED, *p. p.* निगृहीतः -ता -तं, नियमितः &c., नियतः &c., संयतः &c., संयमितः &c., यतः &c., यन्त्रितः &c., नियन्त्रितः &c., रुद्धः -द्धा -द्धं, निरुद्धः &c., विधृतः -ता -तं, विधारितः &c., निवारितः &c., प्रत्याहृतः &c., उपसंहृतः &c., बाधितः &c., आकलितः &c., बद्धः -द्धा -द्धं, निबद्धः &c., प्रतिबद्धः &c., धैर्य्यशाली -लिनी &c.; 'in desire,' यतेन्द्रियः -या -यं, बद्धकामः -मा -मं.

RESTRAINER, *s.* नियन्ता *m.* (न्तृ), यन्ता *m.*, नियामकः, निग्रहीता *m.*, निरोधकः.

RESTRAINT, *s.* निग्रहः -हणं, नियमनं, संयमः -मनं, संयामः, यमः, यतिः *f.*, नियतिः *f.*, यमनं, निगृहीतिः *f.*, यन्त्रणं, नियन्त्रणं, निरोधः, अवरोधः, प्रतिरोधः, उपरोधः, रोधः, सम्प्रतिरोधकः -कं, संग्रहः, प्रग्रहः, वियमः, वियामः, वारणं, निवारणं, आवरणं, प्रतिबन्धः, निबन्धः -न्धनं, बाधः -धा -धनं, आकलनं, दमः -मनं, स्तम्भः, गुप्तिः *f.*, निषेधः, प्रतिषेधः; 'self-restraint,' आत्मसंयमः, आत्मयमः, दान्तिः *f.*, नैयत्यं; 'absence of restraint,' निर्यन्त्रणं.—(Of speech) वाग्यमः -मनं, वाग्यतत्वं.—(In law, limitation) आसेधः; 'of time,' कालासेधः; 'of place,' स्थानासेधः; 'from living away from home,' प्रवासासेधः; 'from employment,' कर्म्मासेधः.

To RESTRICT, *v. a.* निबन्ध् (c. 9. -बध्नाति -बन्द्धुं), परिमा (c. 2. -माति -तुं), परिमितं -तां कृ, सपरिमाणं -णां कृ, नियम् (c. 1. -यच्छति -यन्तुं), संयम्, निग्रह् (c. 9. -गृह्णाति, ग्रहीतुं), निरूप् (c. 10. -रूपयति -यितुं), मर्य्यादां or सीमां निरूप्, समर्य्यादं -दां कृ, ससीमं -मां कृ.

RESTRICTED, *p. p.* निबद्धः -द्धा -द्धं, परिमितः -ता -तं, मितः &c., नियतः &c., नियमितः &c., समर्य्यादः -दा -दं, सावधिकः -का -कं, ससीमः -मा -मं; 'as a word,' मितार्थः, योगरूढः. *See* LIMITED.

RESTRICTION, *s.* निबन्धः -न्धनं, बन्धः -न्धनं, नियमः -मनं, संयमः, नियतिः *f.*, निग्रहः, मर्य्यादा, सीमा, परिसीमा, अवधिः *m.*, परिमितिः *f.*, परिमितता, परिमाणं, परिच्छेदः, विशेषः -षणं; 'without restriction,' अनिबन्धनः -ना -नं, अविशेषणः -णा -णं.

RESTRICTIVE, *a.* निबन्धनः -ना -नं, नियामकः -का -कं, परिमापनः -ना -नं, परिच्छेदकः &c., मर्य्यादानिरूपकः &c., सीमानिरूपकः &c.

To RESULT, *v. n.* (Issue, proceed) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्, जन् (c. 4. जायते, जनितुं), उपजन्, सिध् (c. 4. सिध्यति, सेद्धुं), प्रभू (c. 1. -भवति -वितुं), उद्भू, अनुभू in pass., प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं), अनुवृत्, निःसृ, उदि.—(End in) अवसो (c. 4. -स्यति -सातुं), पर्य्यवसो, निष्पद् in pass., विगम्, निर्गम्, अपगम्.

RESULT, *s.* (Consequence, issue) परिणामः, फलं, उत्पत्तिः *f.*, सिद्धिः *f.*, प्रयुक्तिः *f.*, प्रयोगः, उत्पन्नं, उद्भूतं, निष्पन्नं, उत्तरं, फलमुत्तरं, फलोदयः, फलोत्पत्तिः *f.*, निर्गमः, शेषः, अन्तः, उदर्कः, जन्यं, अनुभवः, भव्यं, अनुसारः, अनुवर्त्तनं, अन्वयः, प्रत्ययः, अनुषङ्गः, योगः, कार्य्यं, अर्थः, अर्थितार्थः, अवसानं, अवसायः, पर्य्यवसानं, गुणः, परिपाकः, *see* EFFECT; 'unexpected result,' विपाकः; 'happy result,' शुभफलं.—(Result of reasoning, conclusion) सिद्धान्तः, सिद्धिः *f.*, निश्चितार्थः, मथितार्थः, निर्णीतार्थः, उपपत्तिः *f.*, अनुभूतिः *f.*, अनुमितिः *f.*, घटितार्थः.

RESULTING, *part.* प्रयुक्तः -क्ता -क्तं, उत्पन्नः -न्ना -न्नं, जातः -ता -तं, जनितः &c., जन्यः -न्या -न्यं, उद्भूतः &c., अनुवृत्तः -त्ता -त्तं, प्रवृत्तः &c., अनुसारी -रिणी &c., अनुयायी &c., फल in comp., प्रभव in comp., उद्भव in comp.; 'pain resulting from sin,' पापप्रयुक्तं दुःखं; 'fever resulting from fasting,' उपवासप्रयुक्तो ज्वरः; 'obedience resulting from fear,' भयप्रयुक्ता भक्तिः; 'resulting from that,' तत्फलः -ला -लं.

RESUMABLE, *a.* प्रत्याहरणीयः -या -यं, प्रत्याहार्य्यः -र्य्या -र्य्यं, अवहार्य्यः &c.

RESUMÉ, *s.* सारः, सारार्थः, सारसंग्रहः, संग्रहः, उपसंहारः.

To RESUME, *v. a.* (Take back or again) पुनर् आदा (c. 3. -ददाति

-दत्ते -दातुं), प्रत्यादा, पुनर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्रत्याद (c. 1. -हरति -हर्त्तुं), पुनर् आहृ, पुनर् हृ, अपहृ, अनुप्राप् (c. 5. -आप्नोति -आप्तुं), पुनः प्राप्, प्रत्यवाप्, पुनर् लभ्.—(Take up again after interruption, begin again) प्रकृतम् or प्रस्तुतम् or मूलविषयम् अनुसृ (c. 1. -सरति -सर्त्तुं), प्रकृतप्रसङ्गं कृ, प्रकृतानुसरणं कृ, पुनर् आरभ् (c. 1. -रभते -रब्धुं), पुनःप्रसङ्गं कृ, पुनर् वद् or ब्रू; 'he resumed,' पुनराह.

RESUMED, *p. p.* प्रत्याहृतः -ता -तं, अपहृतः &c., पुनर्गृहीतः -ता -तं.

RESUMING, *part.* दत्तापहारी -रिणी -रि (न्), प्रत्याहारकः -का -कं.

RESUMPTION, *s.* प्रत्याहरणं, प्रत्याहारः, पुनराहरणं, पुनर्हरणं, अपहारः, अपहरणं, पुनर्ग्रहणं, प्रत्यादानं, पुनरादानं; 'of a grant,' दत्तापहारः, दत्तापहरणं.

RESURRECTION, *s.* मृतोत्थानं, मृतोत्थितिः *f.*, मृतलोकोत्थानं, पुनरुत्थानं, पुनरुत्थितिः *f.*, मृतपुनरुत्थानं, न्यायदिने or विचारदिने मृतलोकानां पुनरुत्थितिः *f.* or श्मशानादुत्थितिः *f.*; 'resurrection day,' मृतोत्थानकालः.

To RESUSCITATE, *v. a.* प्रतिजीव् (c. 10. -जीवयति -यितुं), संजीव्, उज्जीव्, जीव्, पुनः सञ्जीवं -वां कृ, उत्था in caus. *See To* REVIVE.

RESUSCITATED, *p. p.* संजीवितः -ता -तं, प्रतिजीवितः &c., पुनः सञ्जीवीकृतः &c.

RESUSCITATION, *s.* प्रतिजीवनं, सञ्जीवनं, पुनः सञ्जीवीकरणं, पुनरुत्थापनं.

RETAIL, RETAILING, *s.* अल्पविक्रयः, खण्डविक्रयः, क्षुद्रविक्रयः, अल्पपणायां, अल्पविपणः, अल्पवाणिज्यं, खण्डवाणिज्यं, क्षुद्रवाणिज्यं.

To RETAIL, *v. a.* अल्पशः or खण्डशो विक्री (c. 9. -क्रीणाति -णीते -क्रेतुं), अल्पविक्रयं कृ, खण्डविक्रयं कृ, अल्पपणायां कृ, पण् (c. 1. पणते -णितुं), खण्डवाणिज्यं कृ.

RETAILER, *s.* खण्डविक्रयी *m.* (न्), खण्डविक्रयकारी *m.*, अल्पविक्रयकारी *m.*, विपणी *m.* (न्), प्रापणिकः, आपणिकः, खण्डवाणिज्यकृत् *m.*, खण्डवणिक् *m.* (ज्).

To RETAIN, *v. a.* (Keep, hold) धृ (c. 10. धारयति -यितुं, c. 1. धरति. धर्त्तुं), मन्थ्, धा (c. 3. दधाति, धत्ते, धातुं), रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्, अभिरक्ष्, धारणं कृ.—(Keep back) विधृ, निग्रह्, विनिग्रह् सन्निग्रह्, संग्रह्, उपसंग्रह्.—(Hire, engage) वेतनेन or मूल्येन ग्रह्, निरूपितवेतनं प्रतिज्ञाय कर्म्मणि नियुज् or स्था in caus.—(Remember), *see* the word.

RETAINED, *p. p.* धृतः -ता -तं, धारितः &c., विधृतः &c., स्थापितः &c.

RETAINER, *s.* (Dependant, adherent) आश्रितः, आश्रयी *m.* (न्), अनुचरः, अनुजीवी *m.* (न्), उपजीवी *m.*, भाक्तिकः, भृत्यः, अवलम्बी *m.*, अनुषङ्गी *m.*, अनुगामी *m.*, अनुचारी *m.*, अनुयायी *m.*, अनुगः, सपक्षः, सेवकः, पार्श्वकः; 'an old retainer,' चिराश्रितः, चिरसेवकः; 'body of retainers,' परिवारः, भृत्यवर्गः, सेवकवर्गः, अनुयायिवर्गः.

RETAINING, *s.* धारणं, धरणं, धृतिः *f.*, रक्षणं, नियोजनं, स्थापनं.

To RETALIATE, *v. a.* प्रतिकृ, विप्रतिकृ, विप्रकृ, प्रत्यपकृ, वैरप्रतिकारं कृ, प्रत्यपकारं कृ, प्रतिफल (nom. प्रतिफलयति -यितुं), प्रतिफलं दा, प्रतियत्नं कृ, प्रतिहिंस (c. 7. -हिनस्ति, c. 1. -हिंसति -सितुं), प्रतिहिंसां कृ, वैरशुद्धिं कृ, वैरोद्धारं कृ, निर्यत् (c. 10. -यातयति -यितुं), वैरनिर्यातनं कृ.

RETALIATED, *p. p.* प्रतिकृतः -ता -तं, विप्रतिकृतः &c., विप्रकृतः &c., प्रत्यपकृतः &c., प्रतिफलितः -ता -तं, निर्यातितः -ता -तं.

RETALIATION, *s.* प्रतिकारः, प्रतीकारः, प्रतिकृतिः *f.*, प्रतिक्रिया, प्रतिकर्म्म *n.* (न्), विप्रतिकारः, विप्रकारः, विप्रकृतिः *f.*, प्रत्यपकारः, वैरप्रतिक्रिया, वैरप्रतिकारः, प्रतिविधिः *m.*, प्रतिफलं, प्रतियत्नः, प्रतिहिंसा, वैरशुद्धिः *f.*, वैरोद्धारः, निर्यातनं, वैरनिर्यातनं, अपकारः, अपक्रिया, अपकरणं, समाधिः *m.*, क्षुद्रं.

To RETARD, *v. a.* (Diminish the velocity of motion) वेगरोधं कृ, वेगावरोधं कृ, वेगं or गतिं रुध् (c. 7. रुणद्धि, रोद्धुं) or अवरुध् or विधृ (c. 10. -धारयति -यितुं), वेगविधारणं कृ, वेगविलम्बनं कृ, गतिविलम्बनं कृ, गतिमन्दतां कृ, मन्दगतिं -तिं -ति कृ.—(Cause delay) विलम्ब् (c. 10. -लम्बयति -यितुं), विलम्बं कृ, विलम्बनं कृ, मन्दतां कृ, मन्दं -न्दां कृ.—(Hinder) रुध्, निरुध्, प्रतिरुध्, अवरुध्, संरुध्, बाध्, स्तम्भ्, प्रतिबन्ध्.

RETARDATION, RETARDING, *s.* वेगरोधः, वेगावरोधः, वेगविधारणं, वेगविलम्बनं, गतिविलम्बनं, गतिप्रतिबन्धः, वेगसंकोचः, रोधः, अवरोधः, विलम्बनं.

RETARDED, *p. p.* रुद्धवेगः -गा -गं, अवरुद्धवेगः &c., रुद्धगतिः -तिः -ति, अवरुद्धगतिः &c., विलम्बितः -ता -तं, विलम्बितवेगः -गा -गं, विलम्बितगतिः -तिः -ति, विधारितवेगः &c.; 'gradually retarded motion,' क्षीयमाणो वेगः, क्षीयमाणा गतिः.

RETARDING, *part.* विलम्बी -म्बिनी &c., वेगरोधकः -का -कं, वेगावरोधकः &c.

To RETCH, *v. n.* वमितुं or छर्दयितुं यत्नं कृ or उद्यमं कृ or उद्यम् वमनोद्यमं कृ.

RETENTION, *s.* धारणं -णा, धृतिः *f.*, धरणं, आग्रहः, ग्रहः, संग्रहः -हणं.—(Faculty of the mind) धारणाशक्तिः *f.*, धारणा, स्मृतिः *f.*, मेधा.

RETENTIVE, *a.* (As memory) धारणावान् -वती -वत् (त्), धारणाशक्तिविशिष्टः -ष्टा -ष्टं, धारणाशक्तियुक्तः -क्ता -क्तं.—(Retaining) धारकः -का -कं, धरः -रा -रं, आग्रही -हिणी &c.; 'of moisture,' क्लेदधारकः -का -कं; 'of life,' दुर्भरः -रा -रं.

RETENTIVENESS, *s.* धारणशक्तिः *f.*, धारणक्षमता, धारकत्वं, धृतिः *f.*, दृढता.

RETICULAR, RETICULATED, *a.* जालाकारः -रा -रं, जालाकृतिः -तिः -ति, जालरूपः -पा -पं, व्यत्यस्तरेखाविशिष्टः -ष्टा -ष्टं, जालवद् अन्तरालविशिष्टः &c.

RETICULATION, *s.* जालकर्म्म *n.* (न्), जालाकारकर्म्म *n.*, जालवत्कर्म्म *n.*

RETICULE, *a.* स्त्रीलोकेन हस्तेन धृतं मुच्यादिधारणयोग्यो लघुकोषः.

RETINA, *s.* नेत्रान्तःस्थितचित्रपत्रं, नेत्रान्तःस्थचित्रपत्रं.

RETINUE, *s.* परिवारः, परिवर्हः, वर्हः, परिग्रहः, तन्त्रं, परिकरः, परिजनः, परिजनाः *m. pl.*, परिचराः *m. pl.*, अनुचराः *m. pl.*, परिचरवर्गः, सहचरवर्गः, भृत्यवर्गः, परिच्छदः.

To RETIRE, *v. n.* अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, परावृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रतिनिवृत्, निवृत्, पार्श्वं परावृत्, अवस्था (c. 1. -तिष्ठते -स्थातुं), अपसृ (c. 1. -सरति -सर्त्तुं), अपया (c. 2. -याति -तुं), अपगम् (c. 1. -गच्छति -गन्तुं), व्यपगम्, चल् (c. 1. चलति -लितुं), पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्.—(Retire into privacy or private life) विविक्तां or विविक्तवृत्तिम् आस्था or सेव्, सङ्गसङ्कान् सदयस् (c. 4. -अस्यति -सितुं) or त्यज्, सङ्गसंन्यासं कृ, गृहसंन्यासं कृ, विविक्तदेशे वस.

RETIRED, *a.* (Sequestered, secluded) विविक्तः -क्ता -क्तं, विजनः -ना -नं, निभृतः -ता -तं, एकान्तः -न्ता -न्तं, निर्जनः &c., निःशलाकः -का -कं.—(Secret) गूढः -ढा -ढं, गुप्तः -प्ता -प्तं, प्रच्छन्नः -न्ना -न्नं; 'a retired spot,' विविक्तस्थानं, निर्जनस्थानं, निर्जनदेशः, रहःस्थानं; 'a place whence water has retired,' पराप्तः -प्ता -प्तं, परेयः -या -यं; 'leading a retired life,' विविक्तसेवी -विनी -वि (न्).

RETIREMENT, *s.* (Act of retiring) परायणं, -नीं, प्रतिनिवर्त्तनं, निवर्त्तनं, पार्श्वपरिवर्त्तनं, अपक्रमः -मणं, अपसरणं, अपगमः -मनं, पलायनं.—(Act of retiring into privacy or private life) विविक्तसेवनं, विविक्तवृत्तिसेवनं, विविक्तवाससेवनं, विविक्तदेशे वासः, सङ्गसंन्यासः, गृहसंन्यासः.—(Private or retired life or state) विविक्तता -त्वं,

विविक्तवृत्तिः *f.*, विविक्तदशा, एकान्तता, एकान्तवृत्तिः *f.*—(Place of retirement) विविक्तस्थानं, निर्जनस्थानं, निभृतस्थानं, निषद्या.

RETIRING, *part.* or *a.* (Withdrawing) परावर्त्ती -र्त्तिनी -र्त्ति (न्), अपक्रामन् -मन्ती -मत् (त्), पार्श्वपरिवर्त्ती &c.—(Not forward or bold) विविक्तसेवी &c., एकान्तसेवी &c., विविक्तप्रियः -या -यं, एकान्तप्रियः &c., अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं, मन्दास्यविशिष्टः -ष्टा -ष्ट, मन्दस्वभावः -वा -वं. *See* RESERVED.

To RETORT, *v. a.* प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रत्यवक्षिप्, पुनः क्षिप् or अवक्षिप्, प्रतिकृ, प्रत्यारुह् in caus. (-रोपयति -यितुं). *See To* RECRIMINATE.

To RETORT, *v. n.* प्रत्यपवद् (c. 1. -वदति -दितुं), प्रत्यपवादं कृ, प्रत्यवक्षेपं कृ, प्रत्युत्तरं कृ, प्रतिनिन्द् (c. 1. -निन्दति -न्दितुं), पुनर् निन्द्, प्रत्यारोपं कृ.

RETORT, *s.* (Return of an accusation or incivility) प्रत्यपवादः, प्रत्यवक्षेपः, प्रत्यारोपः, प्रत्यभियोगः, प्रत्युत्तरं, प्रतिनिन्दा, विप्रकृतिः *f.*, विप्रकारः, विप्रतिकारः, प्रतिकारः.—(Vessel in chemistry for distillation) वकः, वकयन्त्रं, मूषः -षी -षा -षिका; 'glass retort,' काचवकः, काचवकयन्त्रं.

To RETRACE, *v. a.* (One's steps) निवृत्, प्रतिनिवृत्. *See To* RETURN.

To RETRACT, *v. a.* or *n.* कथितत्यागं कृ, उक्तत्यागं कृ, उक्तास्वीकारं कृ, कथितास्वीकारं कृ, उक्तप्रत्यादेशं कृ, व्यतिक्रमं कृ, अनुशयं कृ, निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl.; 'induce to retract,' निवृत् in caus. *See To* RECANT, RECALL.

RETRACTATION, RETRACTION, *s.* कथितत्यागः, उक्तत्यागः, उक्तप्रत्यादेशः, उक्तास्वीकारः, कथितास्वीकारः, निवर्त्तनं, निवृत्तिः *f.*, अनुशयः, व्यतिक्रमः. *See* RECANTATION.

RETRACTED, *p. p.* अनुशयितः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, व्यतिक्रान्तः -न्ता -न्तं.

RETREAT, *s.* (Act of retiring) अपक्रमः -मणं, अपसरणं, अपयानं, परावर्त्तः, परावृत्तिः *f.*, अपावर्त्तनं, अपावृत्तिः *f.*, परिवर्त्तः -र्त्तनं, विप्रयाणं, प्रतिप्रयाणं, अपायः, अपगमः -मनं, उपक्रमः, निवर्त्तनं, प्रतिनिवर्त्तनं, वक्रमः.—(Of an army) पलायनं, विपलायनं, प्रपलायनं, द्रावः, विद्रवः, प्रद्रावः, सन्द्रावः, उद्द्रावः, द्रवः, संयुगे निवर्त्तनं.—(Place of retirement) विविक्तस्थानं, विविक्तदेशः, निर्जनस्थानं, निर्जनदेशः, निभृतस्थानं, रहःस्थानं, परावर्त्तनस्थानं.

To RETREAT, *v. n.* (Retire) अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, परावृत्, अपया, अपगम्, *see To* RETIRE.—(As an army) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, प्रपलाय्, सम्पलाय्, प्रद्रु (c. 1. -द्रवति -द्रोतुं), विद्रु, विप्रद्रु, अपधाव् (c. 1. -धावति -वितुं), प्रधाव्.—(Withdraw into privacy), *see To* RETIRE.

RETREATED, *p. p.* परावृत्तः -त्ता -त्तं, अपावृत्तः &c., पलायितः -ता -तं.

To RETRENCH, *v. a.* (Cut off, curtail) छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, अवकृत् (c. 6. -कृन्तति -कर्त्तितुं), लू (c. 9. लुनाति, लवितुं), लप् (c. 6. लुम्पति, लोप्तुं), खण्ड्, छेदनं कृ.—(Lessen expenses, &c.) व्ययं न्यून्यीकृ or अल्पीकृ or ह्रस् in caus. or संहृ.

RETRENCHMENT, *s.* छेदः, अवच्छेदः, लोपः, व्ययच्छेदः, व्ययलोपः, न्यूनव्ययः.

RETRIBUTION, *s.* प्रतिफलं, प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकारः, निष्कृतिः *f.*

RETRIBUTIVE, RETRIBUTORY, *a.* प्रतिफलप्रदः -दा -दं, प्रतिफलदायकः -का -यिका -कं, प्रतिफलदः &c., परिशोधकः -का -कं, प्रतिकारकः -का -कं, प्रतिकारी -रिणी -रि (न्).

RETRIEVABLE, *a.* उद्धरणीयः -या -यं, पुनरुद्धरणीयः &c., पुनःप्रापणीयः &c.

To RETRIEVE, *v. a.* उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, पुनर् उद्धृ, पुनः प्राप् (c. 5. -आप्नोति -आप्तुं), पुनर् लभ्, पुनर् आनी, उद्धारं कृ, उद्धरणं कृ. *See To* RECOVER, RESTORE.

RETRIEVED, *p. p.* उद्धृतः -ता -तं, समुद्धृतः &c., पुनः प्राप्तः -प्ता -प्तं.

To RETROCEDE, *v. n.* प्रतिगम् (c. 1. -गच्छति -गन्तुं), विपरीतं गम्, परावृत्.

RETROCESSION, *s.* प्रतिगमनं, पश्चाद्गमनं, विपरीतगमनं, परावर्त्तनं.

RETROGRADATION, *s.* प्रतिक्रमः, व्यतिक्रमः, विपरीतगतिः *f.*, वक्रगतिः *f.*

RETROGRADE, *a.* विपरीतगामी -मिनी -मि (न्), प्रतिगामी &c., व्यतिक्रान्तः -न्ता -न्तं, विपरीतगतिकः -का -कं, परावृत्तः -त्ता -त्तं, प्रतीपः -पा -पं, प्रातीपिकः &c.—(In astronomy) वक्रगतिः -तिः -ति, वक्रः -क्रा -क्रं.

To RETROGRADE, *v. n.* (Go backward) परावृत् (c. 1. -वर्त्तते -र्त्तितुं), विपरीतं गम् (c. 1. गच्छति, गन्तुं), प्रतिगम्, पश्चाद् गम्, प्रतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, व्यतिक्रमं कृ.—(Decline) क्षीणसत्त्वः -त्त्वा -त्त्वं भू, मूलसत्त्वाद् भंश्. *See To* DEGENERATE, DECLINE.

RETROGRESSION, *s.* पश्चाद्गमनं, विपरीतगमनं, प्रतिगमनं, व्यतिक्रमः.

RETROSPECT, *s.* गतावलोकनं, अतीतावलोकनं, गतकालावलोकनं, अतीतकालावलोकनं, भूतावलोकनं, भूतकालावलोकनं, अनुदर्शनं, अनुदृष्टिः *f.*, पश्चाद्दर्शनं, पश्चाद्दृष्टिः *f.*, पश्चादवलोकनं, अन्ववलोकनं.

RETROSPECTIVE, *a.* (Looking back) पश्चाद्दर्शी -र्शिनी -र्शि (न्), पश्चादवलोकी &c., गतावलोकी &c., गतकालावलोकी &c., अनुदर्शी &c.—(Relating to what is past) गतापेक्षकः -का -कं, भूतापेक्षकः &c., अतीतापेक्षकः &c., गतकालापेक्षकः &c., गतकालापेक्षी -क्षिणी &c., गतकालसापेक्षः -क्षा -क्षं, भूतकालसापेक्षः &c.

RETROSPECTIVELY, *adv.* गतापेक्षया, गतकालापेक्षया, गतकालसापेक्षं, भूतापेक्षया.

To RETURN, *v. n.* (Come back, go back) पुनर् आगम् (c. 1. -गच्छति -गन्तुं), प्रत्यागम्, प्रतिगम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रत्यावृत्, प्रतिनिवृत्, सन्निवृत्, पर्यावृत्, उपावृत्, व्यावृत्, विनिवृत्, आवृत्, पुनर् आवृत्, प्रतिया (c. 2. -याति -तुं), प्रत्याया, पुनर् आया, प्रत्युपया, प्रत्ये (c. 2. प्रत्यैति -तुं, rt. इ), पुनर् ए, प्रतिक्रम् (c. 1. -क्रामति -क्रमितुं), प्रतिपद् (c. 4. -पद्यते -पत्तुं), पुनर् अभिपद्, पुनर् उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रत्युपस्था, पुनर् आव्रज्; 'he returned to the place whence he came,' प्रतिजगाम यथागतं.—(Turn back or round) परावृत्, परिवृत्, पर्यावृत्, परिवर्त्तनं कृ.—(Answer), *see* REJOIN, RETORT.

To RETURN, *v. a.* (Give back) प्रतिदा (c. 3. -ददाति -दातुं), पुनर् दा, परिदा, प्रत्यृ in caus., पुनर् ऋ, प्रतिपद्, *see To* RESTORE.—(Bring or send back) पुनर् नी or आनी, पुनर् आनी in caus. (-नाययति -यितुं), पुनर् गम् in caus., पुनः प्राप् in caus.—(Give in recompense) प्रतिकृ, प्रतिफलं दा, प्रतिफलाय दा, प्रतिदा; 'to return a benefit,' प्रत्युपकृ; 'an injury,' प्रत्यपकृ, प्रतिहिंस्, प्रतिहिंसां कृ; 'to return evil for good,' परेणोपकारे कृते प्रत्यपकारं कृ or आचर्, उपकारात् प्रति अपकारं कृ, उपकारं प्राप्य अपकारं कृ; 'to return good for evil,' परेणापकारे कृते प्रत्युपकारं कृ or आचर्.—(Render an official account), *see To* REPORT.

RETURN, *s.* (Coming back) पुनरागमनं, प्रत्यागमः -मनं, प्रतिगमनं, प्रत्यावृत्तिः *f.*, प्रत्यावर्त्तनं, निवर्त्तनं, निवृत्तिः *f.*, प्रतिनिवृत्तिः *f.*, सन्निवृत्तिः *f.*, पर्यावृत्तिः *f.*, पर्यावर्त्तः -र्त्तनं, पुनरावृत्तिः *f.*, आवृत्तिः *f.*, परावृत्तिः *f.*, उपयातं.—(Turning back or round) परावर्त्तनं, परावृत्तिः *f.*, परिवृत्तिः *f.*—(Periodical revolution) परिवर्त्तः -र्त्तनं, परिवृत्तिः *f.*, पुनरावर्त्तः, पुनरावृत्तिः *f.*, विवर्त्तः, पर्य्ययः, पर्य्यायः; 'of the seasons,' ऋतुपरिवर्त्तः, ऋतुपर्य्यायः.—(Repayment) प्रतिदानं, परिदानं.—(Requital) प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकर्म्म *n.* (न्),

प्रतिकारः, प्रतीकारः, प्रतिफलं. *see* REQUITAL; 'return of a benefit,' प्रत्युपकारः, उपकारमोक्षः; 'of an injury,' प्रत्यपकारः; 'of good for evil,' परेणापकारे कृते तस्य प्रत्युपकाराचरणं.—(Profit, return of trade) उत्पत्तिः, फलं, फलोदयः, लाभः, लब्धिः *f.*, प्राप्तिः *f.*—(Official statement), *see* REPORT.—(In return for) प्रति with abl. c., विनिमयेन, हेतोः, हेतौ, *see* FOR.

RETURNED, *p. p.* पुनरागतः -ता -तं, प्रत्यागतः &c., प्रतिगतः &c., आगतः &c., पुनरायातः &c., प्रत्यावृत्तः -त्ता -त्तं, प्रतिनिवृत्तः &c., विनिवृत्तः &c., निवृत्तः &c., पुनरावृत्तः &c., परावृत्तः &c.—(Given back) प्रतिदत्तः -त्ता -त्तं, परिदत्तः &c.—(Requited) प्रतिकृतः -ता -तं, प्रतिफलितः &c.

RE-UNION, *s.* पुनर्योगः, पुनःसंयोगः, पुनःसंसर्गः, पुनर्मेलनं, पुनःसन्धिः *m.*, पुनःसन्धानं, प्रतिसमाधानं, पुनःसमागमः.—(Assembly) सभा.

To RE-UNITE, *v. a.* पुनः संयुज्, पुनः सन्धा, पुनः संमृज्, पुनर् एकीकृ.

RE-UNITED, *p. p.* पुनःसंयुक्तः -क्ता -क्तं, पुनःसंसृष्टः -ष्टा -ष्टं, पुनर्मिलितः -ता -तं.

To REVEAL, *v. a.* प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, विवृ (c. 5. -वृणोति -णुते -वरितुं -रीतुं), अपवृ, अपावृ, व्यक्तीकृ, व्यञ्ज् (c. 7. -अनक्ति -अक्तुं, c. 10. -अञ्जयति -यितुं) प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), आविष्कृ, प्रादुष्कृ.—(Tell) सूच्, ज्ञा in caus., ख्या in caus., निविद्.—(A secret) रहस्यभेदं कृ.

REVEALED, *p. p.* प्रकाशितः -ता -तं, विवृतः &c., आविष्कृतः &c., प्रादुष्कृतः &c., व्यक्तीकृतः &c., सूचितः &c., ज्ञापितः &c., प्रकटितः -ता -तं.

REVEALER, *s.* प्रकाशकः, विवरणकृत्, सूचकः, ज्ञापकः, ख्यापकः; 'of a secret,' रहस्यभेदकः, रहस्यप्रकाशकः.

REVEALING, REVEALMENT, *s.* प्रकाशनं, विवरणं, विवृतिः *f.*, व्यक्तीकरणं, प्रकटीकरणं, आविष्करणं, स्पष्टीकरणं; 'of a secret,' रहस्यभेदः,

To REVEL, *v. n.* अतिशयहास्यशब्देन उत्सवं कृ, रात्रिकाले हासिकादिशब्देन उत्सवं कृ or अतिशयपतुमुलेन सम्प्रीतिं कृ or केलिं कृ; 'one who revels in his lusts,' कामकामी *m.* (न्).

REVEL, *s.* अतिशयहास्यशब्देन उत्सवः, हासिकादिशब्देन सम्प्रीतिः *f.* or केलिः *m. f.*; 'master of the revels,' केलिसचिवः.

REVELATION, *s.* प्रकाशनं, विवरणं, प्रादुष्करणं, आविष्करणं, स्पष्टीकरणं, प्रकाशितवाक्यं, ईश्वरप्रत्यादेशः. *See* REVEALING.

REVELER, *s.* अतिशयहास्यशब्देन or अतिशयहासिकादिशब्देन उत्सवकारी *m.* (न्), सम्प्रीतिरतः, सम्प्रीतिप्रसक्तः, सम्प्रीतिप्रियः, पानोत्सुकः, पानासक्तः.

REVELRY, *s.* अतिशयहासिकादिशब्देन उत्सवकरणं. *See* REVEL.

To REVENGE, *v. a.* प्रतिकृ, वैरशुद्धिं कृ, वैरप्रतिक्रियां कृ, वैरप्रतिकारं कृ, अपकारशुद्धिं कृ, अपकारं प्राप्य प्रत्यपकृ, हिंसां प्राप्य प्रतिहिंस् (c. 7. -हिनस्ति, c. 1. -हिंसति -सितुं), परेणापकारे कृते प्रत्यपकारं कृ, अपकारात् प्रति अपकारं कृ, परेण द्रोहे कृते प्रतिद्रोहं कृ, वैरोद्धारं कृ, वैरनिर्यातनं कृ, निर्यत् (c. 10. -यातयति -यितुं), अपकारमोक्षं कृ; 'to revenge an insult,' अवलेपप्रतिकारं कृ, अवलेपशुद्धिं कृ.

REVENGE, *s.* वैरशुद्धिः *f.*, वैरप्रतिक्रिया, वैरप्रतिकारः, वैरप्रतिकृतिः *f.*, वैरनिर्यातनं, वैरोद्धारः, अपकारशुद्धिः *f.*, प्रतिकारः, प्रतीकारः, प्रतिक्रिया, प्रतिकृतिः *f.*, प्रतिकर्म्म *n.* (न्), विप्रतिकारः, प्रतिहिंसा, प्रत्यपकारः, प्रतिद्रोहः, निर्यातनं, प्रतिफलं, प्रतिविधिः *m.*—(Feeling or desire of revenge) प्रतिहिंसाबुद्धिः *f.*, प्रतिद्रोहबुद्धिः *f.*, प्रत्यपकारबुद्धिः *f.*, प्रतिद्वेषः, प्रत्यपकारेच्छा, प्रतिद्रोहेच्छा, वैरिता, जिघांसा.

REVENGED, *p. p.* प्रतिकृतः -ता -तं, निर्यातितः &c., वैरशुद्धः -द्धा -द्धं.

REVENGEFUL, *a.* प्रतिहिंसाबुद्धिः -द्धिः -द्धि, प्रतिद्रोहबुद्धिः &c., प्रत्यपकारबुद्धिः &c., प्रतिहिंसाशीलः -ला -लं, प्रतिहिंसेच्छुः -च्छुः -च्छु, प्रतिद्रोहेच्छुः &c., प्रत्यपकारेच्छुः &c., प्रतिकारेच्छुः &c., निर्यातनशीलः &c., दंशी -शिनी -शि (न्), द्विजनपः -पा -पं.

REVENGEFULLY, *adv.* प्रतिहिंसाबुद्धा, प्रत्यपकारबुद्धा, प्रतिद्रोहशीलत्वात्.

REVENGEFULNESS, *s.* प्रतिहिंसाशीलत्वं, प्रतिहिंसाबुद्धिः *f.*, प्रत्यपकारशीलता.

REVENGER, *s.* प्रतिकारकः, प्रतिहिंसकः, वैरशोधकः, प्रत्यपकारकः.

REVENUE, *s.* बलिः *m.*, करः, आयः, राजस्वं, राजधनं, राजकरः -रं, उत्पत्तिः, नृपांशः, राजांशः, उपस्वत्वं, भागधेयः, कारः, लाभः, प्राप्तिः *f.*

To REVERBERATE, *v. a.* (Send or beat back) प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रतिप्रक्षिप्, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिहननं कृ, प्रतिघातं कृ.

To REVERBERATE, *v. n.* प्रतिध्वन् (c. 1. -ध्वनति -नितुं), प्रतिध्वनिं कृ, प्रतिध्वननं कृ, प्रतिनद् (c. 1. -नदति -दितुं), अनुनद्, अनुनद्, प्रतिनादं कृ, प्रतिगर्ज् (c. 1. -गर्जति -र्जितुं), प्रतिगर्जनं कृ; 'cause to reverberate,' अनुनद् in caus., ध्वनुनद्, प्रतिनद्. *See To* RESOUND.

REVERBERATING, *part.* प्रतिध्वनन् -नन्ती -नत् (त्), प्रतिगर्जन् &c., प्रतिनादयन् &c.

REVERBERATION, *s.* (Sending or beating back) प्रतिक्षेपः -पणं, प्रतिप्रक्षेपः -पणं, प्रतिघातः, प्रतिहननं.—(Of sound) प्रतिध्वनिः *m.*, प्रतिध्वननं, प्रतिनादः, अनुनादः, ध्वनुनादः, प्रतिगर्जनं -ना, प्रतिशब्दः, प्रतिनिनदः.

To REVERE, *v. a.* पूज् (c. 10. पूजयति -यितुं), अभिपूज्, सम्पूज्, मन् (c. 10. मानयति -यितुं), सम्मन्, अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), समर्च्, अभ्यर्च्, उपास् (c. 2. -आस्ते -आसितुं), सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), आदृ (c. 6. -द्रियते -दर्तुं), भज् (c. 1. भजते, भक्तुं), नमस्कृ, पुरस्कृ, सत्कृ, पूजां कृ, आदरं कृ. *See* OBEISANCE.

REVERED, *p. p.* पूजितः &c., सेवितः &c., अर्चितः &c. *See* HONOURED.

REVERENCE, *s.* पूजा -जनं, मानं, सम्मानं, अर्चनं -ना, अर्चा, अभ्यर्चा -र्चनं, आदरः, सेवा -वनं, सपर्या -र्हणं -र्णा, भक्तिः *f.*, श्रद्धा, नमस् ind., सत्कारः, सपर्या, आराधनं, पुरस्कारः, मान्यत्वं, बहुमानं, सम्भ्रमः, उपासना; 'act of reverence,' नमस्कारः, नमस्या, प्रणामः, प्रणतिः *f.*, नमस्, अभिवादनं, अभिवन्दनं; 'your reverence,' भगवान् *m.* (त्), भवान् *m.*

To REVERENCE, *v. a* पूज्, सम्पूज्, नमस् (nom. नमस्यति). *See To* REVERE.

REVERENCED, *p. p.* पूजितः -ता -तं, आदृतः &c., सम्मानितः &c., उपासितः &c.

REVEREND, *a.* पूज्यः -ज्या -ज्यं, पूजनीयः -या -यं, पूजार्हः -र्हा -र्हं, अर्च्यः -र्च्या -र्च्यं, अर्चनीयः -या -यं, आर्य्यः -र्य्या -र्य्यं, मान्यः -न्या -न्यं, सम्मान्यः &c., माननीयः -या -यं, अर्चार्हः &c., अर्ह्यः -र्ह्या -र्ह्यं, आदरणीयः &c., नमस्कार्य्यः -र्य्या -र्य्यं, नमस्यः -स्या -स्यं, उपास्यः &c., उपासनीयः &c., श्रद्धेयः &c., पूजिलः -ला -लं, भट्टारः -रा -रं.

REVERENTIAL, REVERENT, *a.* सादरः -रा -रं, आदरयुक्तः -क्ता -क्तं, पूजकः -का -कं, सम्पूजकः &c., पूजाकारी -रिणी &c., आदरबुद्धिः -द्धिः -द्धि, आदरकारी &c., भक्तिमान् -मती -मत् (त्), भक्तिसूचकः -का -कं, आदरसूचकः &c.

REVERENTIALLY, *adv.* सादरं, समानं, सनमस्कारं, आदरपूर्वं, शिरसा.

REVERIE, *s.* ध्यानं, चिन्ता, भावना, अनर्थकध्यानं, विशृङ्खलध्यानं, अप्रकृतध्यानं, अनर्थकचिन्ता, अनर्थकवासना, अनर्थकभावना, बुद्धिविलासः.

REVERSAL, *s.* परावर्त्तः -र्त्तनं, परावृत्तिः *f.*, प्रत्यावर्त्तनं, परिवर्त्तनं.

To REVERSE, *v. a.* (Turn upside down) परावृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्, पर्यस्, विपर्यस्, अधोमुखीकृ, *see To* OVERTURN, INVERT.—(Change to the contrary) परिवृत्, विपरीतं -तां कृ, विपर्यस्तं -स्तां कृ, व्यत्यस्तं -स्तां कृ, विपर्यासं कृ, विपर्ययं कृ, वैपरीत्यं कृ, व्यतिक्रमं कृ.

(In law, overthrow a decision) परावृत्, परावर्त्तं कृ, परावृत्तिं कृ.

Reverse, *s.* (Change, vicissitude) परिवर्त्तनं, परिवृत्तिः *f.*, आवृत्तिः *f.*, पर्य्ययः, अवस्थान्तरं, परिणामः, विकारः.—(The contrary) विपर्य्ययः, विपर्य्यासः, व्यत्ययः, व्यत्यासः; विपर्य्यायः, प्रत्यवायः, विपरीतं, वैपरीत्यं, व्यतिक्रमः, विपक्षः, प्रतिपक्षः.—(Reverse of) expressed by इतर, *see* Opposite, *a.*—(Misfortune) कार्य्यविपत्तिः *f.*, *see* Misfortune.

Reverse, *a.* विपरीतः -ता -तं, विपर्य्यस्तः -स्ता -स्तं, व्यत्यस्तः &c., व्यतिक्रान्तः -न्ता -न्तं, विरुद्धः -द्धा -द्धं, अपसव्यः -व्या -व्यं, प्रसव्यः &c., सव्यः &c., प्रतीपः -पा -पं, विप्रतीपः &c., प्रतीकः -का -कं, विपक्षः -क्षा -क्षं, प्रतिपक्षः &c., विलोमः -मा -मं, प्रतिलोमः &c., प्रातीपिकः -की -कं, अर्वाचीनः -ना -नं, प्रतिकूलः -ला -लं, वामः -मा -मं; 'reverse order,' व्यतिक्रमः.

Reversed, *p. p.* विपर्य्यस्तः -स्ता -स्तं, पर्य्यस्तः &c., व्यतिक्रान्तः -न्ता -न्तं, व्यत्यस्तः -स्ता -स्तं, अपवृत्तः -त्ता -त्तं.—(Turned upside down or with the end downwards) अधोमुखीकृतः -ता -तं, अधोमुखः -खा -खं, अधःकृतः -ता -तं, अधरोत्तरः -रा -रं, अधरायः -या -यं.—(As a sentence) परावृत्तः -त्ता -त्तं, परावर्त्तितः -ता -तं.

Reversely, *adv.* विपर्य्ययेण, व्यतिक्रमेण, विपरीतं, वैपरीत्येन, आदिपश्चात्.

Reversible, *a.* परावर्त्यः -र्त्त्या -र्त्त्यं, परावर्त्तनीयः -या -यं, परिवर्त्तनीयः &c.

Reversion, *s.* परावर्त्तः -र्त्तनं, परावृत्तिः *f.*, प्रत्यावर्त्तनं, प्रत्यावृत्तिः *f.*, पर्यावृत्तिः *f.*, पर्यावर्त्तनं, परिवर्त्तनं, आवृत्तिः *f.*—(Succession, right to future possession) उत्तराधिकारः, अन्यभोगोत्तराधिकारः, अन्यभोगोत्तरप्राप्तिः *f.* -प्राप्तणं.

Reversionary, *a.* अन्यभोगोत्तरप्राप्यः -प्या -प्यं, अन्यभोगोत्तरप्रापणीयः -या -यं, उत्तरप्रापणीयः &c., उत्तरभोग्यः -ग्या -ग्यं, क्रमेण भोग्यः &c.

To revert, *v. n.* प्रत्यावृत् (c. 1. -वर्त्तते -र्त्तितुं), परावृत्, पर्यावृत्, प्रतिनिवृत्, परिवृत्, आवृत्, पुनर् आवृत्, प्रत्यागम्, पुनर् आगम्.

Revertible, *a.* परावर्त्यः -र्त्त्या -र्त्त्यं, परिवर्त्तनीयः -या -यं, परिवर्त्यः &c.

To review, *v. a.* (Look back on) पश्चाद् अवलोक् (c. 1. -लोकते -कितुं, c. 10. -लोकयति -यितुं), पश्चाद् दृश् (c. 1. पश्यति, द्रष्टुं), अनुदृश्, गतावलोकनं कृ, गतकालावलोकनं कृ, पश्चादवलोकनं कृ.—(Examine again, revise) पुनः परीक्ष् (c. 1. -ईक्षते -क्षितुं), पुनर् निरूप् (c. 10. -रूपयति -यितुं), पुनर् अनुसन्धा (c. 3. -दधाति -धातुं), पुनर् आलोक् or अवलोक् or समवलोक् or दृश्, पुनर् विचर्, पुनर्विचारं कृ.—(Inspect) निरूप्, परीक्ष्, अनुसन्धा, दृश्.—(A book, &c.) काव्यग्रन्थादेर् गुणदोषौ परीक्ष् or प्रकाश्, गुणदोषविवेचनं कृ, दोषादोषविचारं कृ, ग्रन्थदोषादोषविचारं कृ.

Review, *s.* (Looking back) पश्चाद्दर्शनं, पश्चाद्वृत्तिः *f.*, पश्चादवलोकनं, अनुदर्शनं, अनुदृष्टिः *f.*, गतावलोकनं.—(Examining again) पुनःपरीक्षा, पुनर्निरूपणं, पुनरनुसन्धानं, पुनर्दर्शनं, पुनर्दृष्टिः *f.*, पुनर्विचारः.—(Inspection) निरूपणं, दर्शनं, निरीक्षणं, परीक्षणं.—(Of a book) काव्यग्रन्थादेर् गुणदोषविवेचनं or गुणदोषविचारः, ग्रन्थगुणदोषविवेचनं or गुणदोषप्रकाशनं or दोषादोषप्रकाशनं.

Reviewer, *s.* ग्रन्थदोषादोषप्रकाशकः, ग्रन्थगुणदोषविवेचकः -विचारकः.

To revile, *v. a.* तिरस्कृ, निन्द् (c. 1. निन्दति -न्दितुं), आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), समाक्रुश्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), सम्भर्त्स्, कुत्स्, अभिकुत्स्, तर्ज्, उपालभ्, अपवद्, शप्, अभिशप्, क्षिप्, परिक्षिप्, अधिक्षिप्, अतिक्रू, मुखरीकृ, भष्, गुप् in des., अभिशंस्, *see To* reproach, abuse; 'to revile in return,' प्रत्याक्रुश्.

87 Reviled, *p. p.* निन्दितः -ता -तं, तिरस्कृतः &c., आक्रुष्टः -ष्टा -ष्टं, उपालब्धः -ब्धा -ब्धं, निर्भर्त्सितः &c., जुगुप्सितः &c., अभिशस्तः -स्ता -स्तं.

Reviler, *s.* निन्दकः, आक्रोशकः, आक्रोष्टा *m.* (ष्टृ), उपक्रोष्टा *m.*, निर्भर्त्सकः.

Reviling, *s.* निन्दा -न्दनं, तिरस्कारः, आक्रोशः -शनं, उपक्रोशः, पारुष्यं, परुषोक्तिः *f.*, परुषवचनं, निर्भर्त्सनं, जुगुप्सा, गौरव्यं, अपवादः, अभिवादः, तर्जनं, उपालम्भः, कुत्सा -त्सनं, गालिप्रदानं, क्षेपः, अवक्षेपः, परिभाषणं.

Revisal, *s.* पुनर्दृष्टिः *f.*, अनुदृष्टिः *f.*, अनुदर्शनं, पुनःशोधः -धनं, पुनःपरीक्षा.

To revise, *v. a.* (Review), *see* the word.—(Amend) शुध् (c. 10. शोधयति -यितुं), परिशुध्, संशुध्, विशुध्, पुनः शुध्, शोधनं कृ, पुनःशोधनं कृ.

Revised, *p. p.* शोधितः -ता -तं, पुनःशोधितः &c., पुनर्निरूपितः &c.

Revision, *s.* पुनर्दृष्टिः *f.*, अनुदृष्टिः *f.*, पुनःशोधः -धनं, शुद्धिः *f.*, पुनरावृत्तिः *f.*

Revival, *s.* (Return to life) पुनर्जीवनं, प्रतिजीवनं, सञ्जीवनं, उज्जीवनं, पुनःप्राणनं, पुनर्जीवनप्राप्तिः *f.*, पुनश्चैतन्यप्राप्तिः *f.*, *see* Recovery.—(Return to a vigorous or healthy state) पुनःस्वास्थ्यप्राप्तिः *f.*, पुनःस्वास्थ्यं, समुत्थानं, समुत्थितिः *f.*, पुनःसंस्थितिः *f.*, पुनरुपस्थितिः *f.*, पुनःप्रवृत्तिः *f.*—(Recovery from misfortune) विपदुद्धारः, आपदुद्धारः, पुनरुद्धारः.

To revive, *v. n.* उज्जीव् (c. 1. -जीवति -वितुं), विजीव्, प्रतिजीव्, संजीव्, पुनर् जीव्, जीवनं or संज्ञां or चैतन्यं पुनः प्राप् or लभ् or आपद् or प्रतिपद्, समुत्था (c. 1. समुत्तिष्ठति -त्थातुं, rt. स्था), उत्था, प्रत्याश्वस् (c. 2. -श्वसिति -तुं), समाश्वस्, प्रत्यापन्नजीवनः -ना -नं भू, प्रत्यागतप्राणः -णा -णं भू, प्रत्यापन्नचेतनः -ना -नं भू. *See To* recover.

To revive, *v. a.* जीव् (c. 10. जीवयति -यितुं), प्रतिजीव्, संजीव्, उज्जीव्, पुनर् जीव्, पुनः सजीवं -वां कृ, पुनः सजीवीकृ, पुनर् उत्था in caus. (उत्थापयति -यितुं, rt. स्था) or समुत्था, पुनः संस्था, प्रत्याश्वस् (c. 10. -श्वासयति -यितुं), समाश्वस्, *see To* recover, *v. a.*—(Renew) नवीकृ.

Revived, *p. p.* प्रतिजीवितः -ता -तं, सञ्जीवितः &c., पुनः सजीवीकृतः &c., प्रत्यापन्नजीवनः -ना -नं, प्रत्यागतप्राणः -णा -णं, प्रत्यापन्नसंज्ञः -ज्ञा -ज्ञं, प्रत्याश्वस्तः -स्ता -स्तं, समाश्वासितः -ता -तं.—(Renewed) नवीकृतः -ता -तं, नवीभूतः &c.

Revocable, *a.* परावर्त्यः -र्त्त्या -र्त्त्यं, परावर्त्तनीयः -या -यं, लोप्यः -प्या -प्यं.

Revocation, *s.* परावर्त्तः -र्त्तनं, परावृत्तिः *f.*, लोपः, खण्डनं, प्रत्यादेशः, अनुशयः, विप्रतिपत्तिः *f.* *See* Recall, repeal.

To revoke, *v. a.* परावर्त्तं कृ, परावृत्, लुप्, खण्ड्, लोपं कृ, अनुशयं कृ, प्रत्यादिश् (c. 6. -दिशति -देष्टुं). *See To* recall, repeal.

To revolt, *v. n.* शासनत्यागं कृ, अधिकारत्यागं कृ, राजद्रोहं कृ, राजाभिद्रोहं कृ, स्वस्वामित्यागं कृ, स्वपक्षत्यागं कृ, द्रोहं कृ. *See To* rebel.

Revolt, *s.* राजद्रोहः, राजाभिद्रोहः, शासनत्यागः, अधिकारत्यागः, स्वस्वामित्यागः, स्वपक्षत्यागः, शासनपरित्यागः, कोपः, प्रकोपः. *See* Rebellion.

Revolter, *s.* शासनत्यागी *m.* (न्), राजद्रोही *m.*, स्वस्वामित्यागी *m.* (न्).

Revolting, *a.* बीभत्सजनकः -का -कं, घृणोत्पादकः &c., अतिद्वेषजनकः &c., परमद्वेषजनकः &c., अत्यन्तद्वेषजनकः &c., गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः &c., कुत्सितः -ता -तं; 'revolting appearance,' बीभत्सदर्शनं.

Revolution, *s.* (Revolving) परिवर्त्तनं, परिवर्त्तः, परिवृत्तिः *f.*, आवर्त्तनं, आवृत्तिः *f.*, आवर्तः, विवर्त्तः -र्त्तनं, परिवर्त्तिः *f.*, परावृत्तिः *f.*, भ्रमणं, परिभ्रमणं, भ्रान्तिः *f.*, घूर्णिः *f.*, घूर्णनं; 'of a wheel,' चक्रावर्त्तः, चक्रगतिः *f.*—(Motion of a body round a fixed point) भ्रमणं, परिभ्रमणं.—(Motion of any thing which brings it back to the same point) परिवृत्तिः *f.*, परिवर्त्तनं, आवर्त्तः, पुनरावर्त्तः, पर्य्ययः, पर्य्यायः, विपर्य्ययः; 'of the seasons,' ऋतुपर्य्यायः; 'of all the seasons,' सर्व्वर्तुपरिवर्त्तः; 'of employment or duty,' कर्म्मविपर्य्ययः; 'of time,' कालचक्रं.—(Continued course) गतिः *f.*,

प्रवृत्तिः *f.*, चक्रगतिः *f.*; 'of a planet,' ग्रहगतिः.—(Change in the government) राज्यपरिवर्त्तनं, राज्यरीतिपरिवर्त्तनं, राज्यव्यवस्था-परिवर्त्तनं, राज्यस्थितिपरिवर्त्तनं.

REVOLUTIONARY, *a.* राज्यपरिवर्त्तनसम्बन्धी -न्धिनी &c., राज्यपरिवर्त्तकः -का -कं.

REVOLUTIONIST, *s.* राज्यपरिवर्त्तकः, राज्यरीतिपरिवर्त्तकः, राज्यस्थितिपरिवर्त्तकः.

To REVOLVE, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), विवृत्, सम्परिवृत्, विपरिवृत्, व्यावृत्, आवृत्, भ्रम् (c. 4. भाम्यति, c. 1. भ्रमति -मितुं), परिभ्रम्, घूर्ण् (c. 1. घूर्णति -र्त्तितुं), विघूर्ण्, व्याघूर्ण्, परिघूर्ण्, लुठ् (c. 6. लुठति -ठितुं), लुड् (c. 1. लोटति -टितुं); 'the earth revolves on its own axis,' स्वाक्षोपरि भ्रमति पृथिवी; 'pains and pleasures revolve like a wheel,' चक्रवत् परिवर्त्तन्ते दुःखानि च सुखानि च.

To REVOLVE, *v. a.* (Cause to turn round) भ्रम् in caus. (भ्रमयति, भ्रामयति -यितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), विवृत् आवृत्, घूर्ण् in caus. (घूर्णयति -यितुं), परिघूर्ण्, विघूर्ण्, व्याघूर्ण्, भ्रमि (c. 10. -भारयति -यितुं), लुठ् (c. 10. लोठयति -यितुं) or लुड्.—(In the mind) मनसा विचर् (c. 10. -चारयति -यितुं) or विगण् or विमृश् or वितर्क or विवेचनं कृ.

REVOLVED, *p. p.* परिवर्त्तितः -ता -तं, परिवृतः -ता -त्तं, परावृत्तः &c., विवृत्तः &c., विवर्त्तितः -ता -तं, भ्रान्तः -न्ता -न्तं, घूर्णितः &c.; 'in the mind,' मनसा विचारितः &c.

REVOLVING, *part.* परिवर्त्ती -र्त्तिनी -र्त्ति (न्), परिवर्त्तमानः -ना -नं, विवर्त्तमानः &c., आवर्त्तमानः &c., भ्रमन् -मन्ती -न्तं (न्), भ्रमी -मिणी &c., घूर्णायमानः &c.

REVULSION, *s.* विपरीतकर्षणं, पश्चात्कर्षणं, प्रतिकर्षणं, पराकर्षणं.

To REWARD, *v. a.* पारितोषिकं दा, वरं दा, प्रतिफलं दा, फलं दा, दानेन परितुष् (c. 10. -तोषयति -यितुं) or सन्तुष् or सम्भू (c. 10. -भावयति -यितुं), दक्षिणां दा, प्रतिफल् (nom. प्रतिफलयति -यितुं). *See To* RECOMPENSE, REQUITE.

REWARD, *s.* पारितोषिकं, प्रतिफलं, फलं, दक्षिणा, वरः, वेतनं, प्रतिदानं, मानं, बहुमानं, *see* RECOMPENSE; 'worthy of a reward,' दक्षिणार्हः -र्हा -र्हं, दक्षिणार्ह्यः -र्ह्या -र्ह्यं; 'the reward of learning,' विद्यावरः.

REWARDED, *p. p.* गृहीतपारितोषिकः -का -कं, गृहीतदक्षिणः -णा -णं, गृहीतवेतनः -ना -नं, प्रतिफलितः -ता -तं, परितोषितः &c., दानपरितोषितः &c.

REWARDER, *s.* फलदाता *m.* (तृ), प्रतिफलदः, वरदाता *m.*, वरदः.

RHAPSODIC, RHAPSODICAL, *a.* असम्बद्धः -द्धा -द्धं, अबद्धः &c., असङ्गतः -ता -तं, विसङ्गतः &c., अयुक्तिकः -का -कं, अनर्थकः &c., निरन्वयः -या -यं, अनन्वितः -ता -तं.

RHAPSODY, *s.* असम्बद्धकाव्यं, असम्बद्धवाक्यं, असङ्गतवाक्यं, असम्बद्धकविता.

RHETORIC, *s.* अलङ्कारविद्या, अलङ्कारशास्त्रं, शब्दालङ्कारविद्या, काव्यालङ्कारादिविषयका विद्या, शब्दालङ्कारः, वाङ्मयविद्या, साहित्यशास्त्रं, प्रवचनविद्या, प्रवचनशास्त्रं, परार्थानुमानं, वाङ्मयं.

RHETORICAL, *a.* आलङ्कारिकः -की -कं, अलङ्कारविद्यासम्बन्धी -न्धिनी -न्धि (न्), अलङ्कारशास्त्रसम्बन्धी &c., अलङ्कारी &c., अलङ्कारविषयकः -का -कं, अलङ्काररूपः -पा -पं, प्रवचनविद्यासम्बन्धी &c., वाङ्मयः -यी -यं; 'rhetorical expression,' अलङ्कारः.

RHETORICALLY, *adv.* अलङ्कारविद्यानुसारेण, अलङ्कारशास्त्रानुसारेण, अलङ्कारशास्त्रवत्.

RHETORICIAN, *s.* अलङ्कारविद्याज्ञः, अलङ्कारशास्त्रज्ञः, अलङ्कारशास्त्रपण्डितः, अलङ्कारशास्त्राध्यापकः, प्रवचनपटुः *m.* *See* ORATOR.

RHEUM, *s.* श्लेष्मा *m.* (न्), श्लेष्मकः, दूषिः -षी *f.*, दूषिका, दूषीका, क्लेदनः, क्लेदकः, वारुखं, पिच्चटः, कफः, नेत्रमलं.

RHEUMATIC, *a.* (Pertaining to rheumatism) वातरोगसम्बन्धी -न्धिनी &c., वातुलः -ला -लं, वातीयः -या -यं.—(Affected with it) वातरोगी -गिणी -गि (न्), वातग्रस्तः -स्ता -स्तं, वायुग्रस्तः &c., वातुलः -ला -लं, वातूलः &c., वातकी &c., वाताहतः -ता -तं, वातोपहतः &c., पवनाहतः &c.

RHEUMATISM, *s.* वातरोगः, वायुरोगः, वातामयः, वातव्याधिः *m.*, वातः, वायुः *m.*, रसवातः, अनिलामयः, अनिलरोगः, अनिलः, धनुर्वातः, पटीरं, गृध्रसी; 'acute rheumatism,' वातरक्तं, वातगुल्मः, वातशोणितं; 'chronic, from dyspepsia,' आमवायुः *m.*, आमवातः; 'rheumatism in the joints,' सन्धिवातः, सन्धिवायुः *m.*; 'shooting rheumatism in the bones,' अस्थिशूलः -लं, अस्थितोदः.

RHEUMY, *a.* श्लेष्मलः -ला -लं, श्लेष्मणः -णा -णं, श्लेष्मवान् -वती -वत् (न्), श्लेष्ममयः -यी -यं, श्लेष्मयुक्तः -क्ता -क्तं; 'rheumy eyed,' क्लिन्नाक्षः -क्षा -क्षं. *See* BLEAR-EYED.

RHINOCEROS, *s.* खड्गः, खड्गी *m.* (न्), एकशृङ्गः, गण्डः -ण्डकः, गण्डाङ्गः, एकचरः, वनोत्साहः, तैतिलः; 'its horn,' खड्गः; 'the female,' खड्गधेनुः *f.*

RHOMB, RHOMBUS, *s.* विषमचतुरस्रं, विषमचतुष्कोणः.

RHUBARB, *s.* रेवसं, रेवाचिनी. These are Mahratti words.

RHYME, *s.* (Correspondence of sounds in poetry) यमकः -कं, अन्त्ययमकः -कं, अन्त्यशब्दयमकः -कं, अन्त्यशब्दसमता, अनुप्रासः, मित्राक्षरं.—(A word to correspond in sound to another) यमकशब्दः, यमकः -कं.—(Poetry) कविता, काव्यं.

To RHYME, *v. n.* (Correspond in sound) यमकः -का -कं भू, यमकशब्दो भू.—(Make rhyme) कवितां कृ, काव्यं कृ, अनुप्रासं कृ.

RHYMELESS, *a.* यमकहीनः -ना -नं, अयमकः -का -कं, अननुप्रासः -सा -सं.

RHYTHM, RHYTHMUS, *s.* तालः, लयः, गाथा, तालबन्धनं, तालबद्धता.

RHYTHMICAL, *a.* तालबद्धः -द्धा -द्धं, लयबद्धः &c., तालसम्बन्धी -न्धिनी &c.

RIB, *s.* (Bone of an animal) पर्शुका, पार्शुका, पर्शुः *m.*, पार्श्वास्थि *n.*, पार्श्वकः, वंक्रिः *m.*; 'the ribs collectively,' पञ्जरं -रः, पिञ्जरं -रः, पार्श्वं.—(Of a boat) पोलिन्दः.—(Of an umbrella, &c.) शलाका.—(A thin slip of wood) शलाका.—(A prominent line) रेखा.

RIBALD, *a.* दुर्मुखः -खा -खं, अशुद्धभाषी -षिणी -षि (न्), अवाच्यभाषी &c., अवाच्यः -च्या -च्यं, अवद्यः &c., गर्ह्यः -र्ह्या -र्ह्यं, दुरुक्तः -क्ता -क्तं, कुत्सितः -ता -तं.

RIBALDRY, *s.* दुरुक्तिः *f.*, दुर्वचनं, कुत्सितवाक्यं, अवद्यं, अवाच्यं, न्यक्कः.

RIBBED, *p. p.* or *a.* सशलाकः -का -कं, शलाकी -किनी &c., रेखाङ्कितः -ता -तं.

RIBBON, RIBAND, *s.* पट्टः, दुकूलपट्टः, दीर्घदुकूलखण्डः, दीर्घपट्टः, बन्धनी.

RICE, *s.* (The grain in the husk) शालिः *m.*, व्रीहिः *m.*, धान्यं, धान्योत्तमं, रसकरिः *m.*, जीवसाधनं.—(The grain without the husk, or after threshing) तण्डुलः, धान्यास्थि *n.*, धान्यसारः, शालिसारः; 'a grain of rice,' तण्डुलकणः.—(Wild rice) नीवारः; 'a grain of it,' नीवारकणः.—(A white rice growing in deep water) कलमः.—(*Red sort, growing in moist soil*) षष्टिकः -का; 'fit for growing it,' षष्टिक्यः -क्या -क्यं.—(*Large or fragrant sort*) महाव्रीहिः *m.*, महाशालिः *m.*—(New rice) नवधान्यं, नवान्नं. One hundred and eighty varietes of rice

are enumerated.—(Boiled rice) अन्नं, ओदनः -नं, भक्तं, अन्धस् *n.*, भिस्सा, दीदिविः *m.*; 'scum of it,' माडरः, आचामः, निस्रावः, विस्रावः.—(Scorched) भिस्सटा, भिस्सिटा, भिण्टा, भिण्टिका, भिण्टिका, दग्धिका.—(Fried rice) धानाः *f. pl.*, धानाकाः *f. pl.*; 'the meal of it,' धानाचूर्णं.—(Rice flattened by threshing) धान्यचमसः, पृथुकः -कं.—(Oblation of rice) अर्घः, अर्घ्यं, चरुः *m.*—(Heap of rice for presentation) धान्यधेनुः *f.*, धान्याचलः, तण्डुलीघः.—(Rice-water) तण्डुलोदकं, तण्डुलाम्बु *n.*, तण्डुरीणः.—(Rice-gruel) यवागूः *f.*, उष्णिका, आरणा, विलेपी, तरला, धान्याम्लं.—(Rice-field) शालिक्षेत्रं.—(Rice-milk) पायसः -सं.—(Rice-husk) तुषः.—(Ear of rice) कणिशः -शं, धान्यशीर्षकं.—(Granary for rice) कुशूलः, व्रीह्यगारं.—(Having rice, bearing it, made of it) व्रीहिमयः -यी -यं, व्रीहिकः -का -कं, व्रीही -हिणी -हि (न्), व्रैहः -हो -हं, व्रैहेयः -यी -यं, शालेयः -यी -यं, शालिमयः &c.

Rich, *a.* (Wealthy) धनी -निनी -नि (न्), धनवान् -वती -वत् (त्), सधनः -ना -नं, महाधनः -ना -नं, बहुधनः &c., विभ्रवान् &c., वसुमान् &c., अर्थवान् &c., अर्थान्वितः -ता -तं, सार्थः -र्थी -र्थं, धनसम्पन्नः -न्ना -न्नं, धनिकः -का -कं, धनाढ्यः -ढ्या -ढ्यं, धनसमृद्धः -द्धा -द्धं, धनविपुलः -ला -लं, लक्ष्मीवान् &c., श्रीमान् &c., सश्रीकः -का -कं, कोपवान् &c., सम्पत्रिमान् &c., समृद्ध &c., धनेश्वरः &c., लक्ष्मीशः, इभ्यः -भ्या -भ्यं; 'extremely rich person,' अतिधनी &c., लक्षाधीशः, कोटीश्वरः, कोट्यधीशः, लक्षपतिः *m.*, कुबेरः.—(Abounding in) आढ्यः -ढ्या -ढ्यं, पूर्ण in comp., बहु in comp., बहुल in comp., प्रचुर in comp., सम्पन्न in comp., समृद्ध in comp., पुष्कल in comp., मय in comp., अधिक in comp.; 'rich in good qualities,' गुणाढ्यः &c., गुणसम्पन्नः -न्ना -न्नं.—(Fertile) स्फीतः -ता -तं, पीनः -ना -नं, बहुफलदः -दा -दं.—(Costly, splendid) महार्घः -र्घा -र्घं, महामूल्यः -ल्या -ल्यं, बहुमूल्यः &c., अतिशोभनः -ना -नं; अतिशोभान्वितः -ता -तं, तेजसः -सी -सं, अतितेजसः &c., प्रतापवान् &c.—(As a dish) घृतपूर्णः -र्णा -र्णं, घृतप्लुतः -ता -तं, घृतमयः -यी -यं.

Riches, *s.* धनं, वित्तं, वसु *n.*, अर्थः, सम्पत्तिः *f.*, द्रव्यं, विभवः, लक्ष्मीः *f.*, श्रीः *f.*, रा: *m.* (रै), सम्पद् *f.*—(State of having great riches) धनाढ्यता, धनवाहुल्यं, धनप्राचुर्यं, धनसमृद्धिः *f.*, धनवैपुल्यं, धनैश्वर्यं, धनसम्पत्तिः *f.*, महाधनत्वं, सधनता; 'desirous of riches,' धनार्थी -र्थिनी -र्थि (न्); 'desire of riches,' धनाशा, धनतृष्णा; 'pride of riches,' धनदर्पः; 'puffed up by riches,' धनगर्वितः -ता -तं.

Richly, *adv.* (With riches) सधनं, धनबाहुल्येन, बहुधनेन, महाधनेन.—(Splendidly) महामूल्येन, अतिशोभया, अतिशोभापूर्वं.—(Abundantly) बाहुल्येन, अतिबहुलं, प्राचुर्येण, वैपुल्येन, विपुलं, अतिविपुलं, समृद्धा.

Richness, *s.* (Opulence) धनाढ्यता, सधनता, धनबाहुल्यं, धनसमृद्धिः *f.*, धनसम्पत्तिः *f.*, धनिकता, सश्रीकता, *see* Riches.—(Fertility) स्फीतता, पीनता, स्फीतिः *f.*, बहुफलता.—(Costliness, splendor) महार्घता, महामूल्यता, शोभा, अतिशोभा, तेजस् *n.*, प्रतापः.—(Abundance) बाहुल्यं, प्राचुर्यं, वैपुल्यं, समृद्धिः *f.*, समृद्धता.—(Of a dish) घृतपूर्णता, मिष्टता.

Rick, *s.* (Stack) चितिः *f.*, चयः, उत्करः, राशिः *m.*, निचयः, निकरः, ओघः; 'of hay,' तृणोत्करः, तृणचितिः *f.*, *see* Hay-rick.

Rickets, *s. pl.* बालरोगः, बालव्याधिः *m.*, बालामयः.

Rickety, *a.* शिथिलसन्धिः -न्धिः -न्धि, अदृढसन्धिः &c., अस्थिरः -रा -रं, अनवस्थितः -ता -तं, विचलः -ला -लं, चलस्वभावः -वा -वं, स्खलितगतिः -तिः -ति.

To Rid, *v. a.* (Free from encumbrance, &c.) विप्रात् or भारात् मुच् (c. 6. मुञ्चति, मोक्तुं) or शुध् (c. 10. शोधयति -यितुं) or विशुध or उद्वृ (c. 1. -हरति -हर्तुं) or मोक्ष (c. 10. मोक्षयति -यितुं), विप्रं or भारम् अपनी or पिनी or हृ, निर्विघ्नीकृ; 'to rid of thieves,' कण्टकान् उद्धृ, कण्टकोद्धरणं कृ, कण्टकशोधनं कृ, निष्कण्टकीकृ: 'of thorns,' शल्योद्धारं कृ, शल्यानि उद्धृ.

Rid, *a.* मुक्तः -क्ता -क्तं, विमुक्तः &c., शोधितः -ता -तं, वर्जितः &c., रहितः &c., विगत in comp., वीत in comp., गत in comp., हीन in comp., हृत in comp., निर or स prefixed; 'rid of thieves or thorns,' कण्टकमुक्तः -क्ता -क्तं, मुक्तकण्टकः -का -कं, विगतकण्टकः &c., वीतकण्टकः &c., कण्टकहीनः -ना -नं, हृतकण्टकः &c., निष्कण्टकः &c.; 'to be rid of,' मुच् in pass. (मुच्यते) विमुच्: 'to get rid of,' अपास, निरस, निराकृ, त्यज्, परित्यज्, अपनुद्, अपहृ *see To* escape; 'to be got rid of,' त्याज्यः -ज्या -ज्यं, अपासनीयः -या -यं, निराकरणीयः &c.

Riddance, *s.* मुक्तिः *f.*, मोचनं, मुक्तता, मोक्षः -क्षणं, उद्धारः, उद्धरणं, शोधनं, शुद्धिः *f.*, निस्तारः, त्राणं, परित्राणं.

Riddle, *s.* प्रवह्लिः *f.* -ह्लिका, प्रहेलिका, प्रश्नदूती, कूटप्रश्नः, दृष्टकूटं गूढप्रश्नः, गूढं, गूढवाक्यं, श्लेषः, श्लेषोक्तिः *f.*; different kinds are सर्वतोभद्रः, वर्द्धमानः, अन्तर्लापिका, बहिर्लापिका.—(Large sieve) शोधनी, बृहच्चालनी, महाचालनी.

To Riddle, *v. a.* (Clean grain) पृष्ठोक्तयन्त्रेण शुध् (c. 10. शोधयति -यितुं), or शोधनं कृ or उत्पवनं कृ.—(Perforate) व्यध्, छिद्र्, छिद्रपूर्णं -र्णां कृ, सच्छिद्रीकृ.

To Ride, *v. n.* (Be carried on horseback) अश्वेन वह् in pass. (उह्यते), अश्वेन सञ्चर् (c. 1. -चरति -रितुं) or चर्, अश्वेन गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं), अश्ववाहनेन गम् or या or चल्.—(On an elephant) गजेन वह् in pass. or सञ्चर् or गम् or या or चल्, गजवाहनेन चल् or व्रज्.—(Be borne on a fluid, &c.) वह् in pass., प्लु (c. 1. प्लवते, प्लोतुं).

To Ride, *v. a.* (Sit on a horse) अश्वम् आरुह् (c. 1. -रोहति -रोढुं) or अधिरुह् or अध्यारुह् or समारुह् or अधिक्रम् (c. 1. -क्रामति -क्रमितुं), अश्वारूढः -ढा -ढं भू, अश्वारोही -हिणी -हि भू, अश्वारोहणं कृ.—(Sit on an elephant) गजारूढः -ढा -ढं भू, गजारोही &c. भू, गजम् आरुह्.—(On the back of a peacock) मयूरपृष्ठारूढः -ढा -ढं भू, मयूरपृष्ठम् आरुह् or आश्रि.—(A chariot) यानारूढः -ढा -ढं भू, यानम् आरुह्, यानारोहणं कृ.

Ride, *s.* अश्वेन गमनं or चलनं, अश्वेन विहरणं, अश्वारोहणं; 'to take a ride,' अश्वेन विहारं कृ or विह्, अश्वेन भ्रमणं कृ or परिभ्रमणं कृ.

Rider, *s.* (On a horse) अश्वारोही *m.* (न्), अश्वारोढा *m.* (ढृ), अश्वारूढः, *see* Horse-man.—(In general) आरोढा *m.*, आरोही *m.*, रोहकः.

Ridge, *s.* (Of a mountain) कटकः -कं, कूटं, दनः, उत्सादः.—(Of earth, a mound) सेतुः *m.*, पिण्डलः, पिण्डिलः, धरणः, आलिः -ली *f.*, संवरः, जङ्गालः.—(Back, top) पृष्ठं, अग्रं.

Ridgy, *a.* सकटकः -का -कं, कटकाकारः -रा -रं, कटकरूपः -पा -पं.

Ridicule, *s.* उपहासः, परिहासः, अपहासः, अवहासः, प्रहासः, प्रहसनं, उपहसनं, उपहसितं, उपहसनीयता, विहसितं, हसनं, हास्यं, हासिका, परिभाषणं, अवक्षेपः, अवहेला, अवज्ञा, उत्प्रासनं, उत्प्रासः -सनं.

To Ridicule, *v. a.* उपहस् (c. 1. -हसति -सितुं), अवहस्, अपहस्, उपहासभूमिं कृ, अवहासभूमिं कृ, अवहासास्पदं कृ, अवहासास्पदीकृ, अपहासास्पदीकृ, हास्यास्पदीकृ, अवहासस्थानं कृ, उत्स्मि (c. 1. -स्मयते -स्मेतुं).

अभिनिन्द्, अवधिक्षिप्, आक्षिप्. *See To* DERIDE.

RIDICULED, *p. p.* उपहसितः -ता -तं, अवहसितः &c., आक्षिप्तः -प्ता -प्तं.

RIDICULOUS, *a.* उपहास्यः -स्या -स्यं, अवहास्यः &c., परिहास्यः &c., हास्यः &c., हास्यजनकः -का -कं, हासजनकः, हासकरः -री -रं, हास्योत्पादकः &c., हासोत्पादकः &c., उपहासयोग्यः -ग्या -ग्यं, उपहासार्हः -र्हा -र्हं, उपहासविषयः -या -यं, हास्यास्पदः -दा -दं, तक्कः -क्का -क्कं.

RIDICULOUSLY, *adv.* हास्यप्रकारेण, उपहास्यप्रकारेण, उपहास्यं.

RIDICULOUSNESS, *s.* उपहास्यता, अपहास्यता, परिहास्यता, हास्यत्वं.

RIDING, *s.* अश्वारोहणं, हयारोहः, अश्वारोहणविद्या, अश्वविद्या.

RIDING, *part.* आरोही -हिणी -हि (न्), आरूढः -ढा -ढं, आरोह in comp., रोहक in comp., आश्रयी &c.; 'riding on a horse,' अश्वारोही &c.; 'on an elephant,' गजारूढः &c.; 'on the back of a peacock,' मयूरपृष्ठारूढः &c., मयूरपृष्ठाश्रयी &c.

RIDING-SCHOOL, *s.* अश्वारोहणशाला, अश्वशिक्षाशाला, हयशिक्षाशाला.

RIFE, *a.* प्रसिद्धः -द्धा -द्धं, प्रचलः -ला -लं. *See* PREVALENT.

RIFENESS, *s.* प्रसिद्धता, प्रसिद्धिः *f.*, बाहुल्यं. *See* PREVALENCE.

RIFF-RAFF, *s.* खलाः *m. pl.*, पृथग्जनाः, अधमवर्गाः &c. *See* RABBLE.

To RIFLE, *v. a.* हृ (c. 1. हरति, हर्तुं), अपहृ, अभिहृ. *See To* ROB.

RIFLE, *s.* (Kind of gun) सीतारूपेण सुषिरीकृता गुलिकाप्रक्षेपणी.

RIFT, *s.* छिद्रं, भिन्नः *f.*, भङ्गः. *See* CLEFT, FISSURE.

To RIFT, *v. a.* भिद्, विभिद्, छिद्. *See To* CLEAVE, SPLIT.

To RIG, *v. a.* सज्जीकृ, सज्ज (c. 1. सज्जति -ज्जितुं), समज्जं -ज्जां कृ.—(A ship) नावं समुद्रयानार्थं वातवसनादिना सज्जीकृ or समायुज्. *See To* EQUIP.

RIG, RIGGING, *s.* सज्जा, सज्जनं -ना, नौकासज्जा -ज्जनं, वातवसनादिसज्जा, रज्ज्वादिसज्जनं, वसनरज्ज्वादि, वसनं, परिच्छदः.

RIGGED, *p. p.* सज्जीकृतः -ता -तं, सज्जितः &c., वसनरज्ज्वादियुक्तः &c.

RIGHT, *a.* (Just, fit, proper) युक्तः -क्ता -क्तं, उपयुक्तः &c., यथायुक्तः &c., यथायोग्यः -ग्या -ग्यं, सम्यङ् ममीची सम्यक्, समञ्जसः -सा -सं, योग्यः &c., न्याय्यः -य्या -य्यं, उचितः -ता -तं, यथोचितः &c., समीचीनः -ना -नं, यथार्थः -र्था -र्थं, याथार्थिकः -की -कं, समुचितः &c., साधुः -धुः -ध्वी -धु, लभ्यः -भ्या -भ्यं, *see* PROPER.—(True, correct) ऋतः -ता -तं, सत्यः -त्या -त्यं, तथ्यः -थ्या -थ्यं, अवितथः -था -थं, यथार्थः &c., शुद्धः -द्धा -द्धं.—(Straight) सरलः -ला -लं, ऋजुः -जुः -जु, अजिह्मः -ह्मा -ह्मं; 'a right line,' सरलरेखा.—(Not left) दक्षिणः -णा -णं, अपसव्यः -व्या -व्यं, अवसव्यः &c., वामेतरः -रा -रं; 'right and left,' सव्यापसव्यः -व्या -व्यं; 'to the right,' प्रदक्षिणः -णा -णं; 'winding to the right,' दक्षिणावर्त्तः -र्त्तिनी -र्त्ति (न्); 'the right side,' *see* RIGHT, *s.*; 'the right hand,' दक्षिणपाणिः *m.*, अग्रपाणिः *m.*, अग्रहस्तः, अग्रकरः; 'being on the right hand,' दक्षिणस्थः -स्था -स्थं; 'right ascension, in astronomy,' विषुवांशः.

RIGHT, *s.* (Justice, propriety) धर्म्मः, न्यायः, नीतिः *f.*, न्याय्यत्वं -ता, न्यायिता, न्यायता, युक्तिः *f.*, युक्तता, योग्यता, उपयुक्तता, उपयोगिता, यथायोग्यता, यथार्थता, याथार्थ्यं, सामञ्जस्यं, सम्यक्त्वं, औचित्यं, उचितत्वं, समञ्जसं. 'right and wrong,' धर्म्माधर्म्मौ, युक्तायुक्तं, न्यायान्यायं, हिताहितं.—(Correctness) सत्यता, सत्यं, ऋतं, अवितथं, समञ्जसं, शुद्धता.—(Just claim, title) अधिकारः -रित्वं, स्वत्वं, स्वाम्यं, सत्ता; 'to have a right,' अर्ह् (c. 1. अर्हति -र्हितुं); 'a woman has no right to independence,' स्त्री न स्वातन्त्र्यम अर्हति.—(The right side, not the left) दक्षिणं, अपसव्यं, अवसव्यं, वामेतरं, दक्षिणदिक् *f.* (श्), दक्षिणपार्श्वः, दक्षिणाङ्गं; 'right and left,' सव्यापसव्यं; 'upon the right side,' दक्षिणस्यः -स्था -स्यं; 'on the right,' दक्षिणपार्श्वे, दक्षिणतस्, दक्षिणेन.—(One's own right) स्वाधिकारः, स्वस्वत्वं, 'to set to rights,' *see To* RIGHT, *v. a.*

RIGHT, *adv.* (Justly) युक्तं, यथायुक्तं, यथायोग्यं, यथोचितं, यथान्यायं, धर्म्मतस्, न्यायतस्, समञ्जसं, सम्यक्, यथार्थं, स्थाने.—(Truly) सत्यं, ऋतं, अञ्जसा, अवितथं, यथावितथं.—(In a straight line) सरलं, ऋजु, अजिह्मं, अवक्रं.—(To a great degree) सु or अति prefixed.

RIGHT, *interj.* साधु, भद्रं, युक्तं, स्वस्ति, वाढं.

To RIGHT, *v. a.* (Restore to a right position, set to rights) सुस्थ (nom. सुस्थयति -यितुं), सुस्थं -स्थां कृ, स्वस्थ (nom. स्वस्थयति -यितुं), स्वस्थं -स्थां कृ, *see To* RESTORE, *v. a.*—(Do justice to) न्यायं कृ.

To RIGHT, *v. n.* (Become right) सुस्थः -स्था -स्थं भू, स्वस्थः -स्था -स्थं भू.—(Become erect) ऋजुः -जुः -जु भू, ऋजूभू.

RIGHT-ANGLE, *s.* समकोणः, समलम्बः, समलम्बकोणः, समलम्बषड्भुजः.

RIGHTEOUS, *a.* धार्म्मिकः -की -कं, न्यायाचारः -रा -रं, न्यायाचारी -रिणी &c., न्यायपरः -रा -रं, पुण्यः -ण्या -ण्यं, साधुः -धुः -ध्वी -धु, धर्म्मवर्त्ती &c. *See* JUST.

RIGHTEOUSLY, *adv.* धर्म्मतस्, न्यायतस्, धर्म्मानुसारेण. *See* JUSTLY.

RIGHTEOUSNESS, *s.* धर्म्मः, धर्म्मता, धार्म्मिकता -त्वं, न्यायः, न्याय्यता, न्यायिता, साधुता -त्वं, पुण्यता, शुचिता. *See* JUSTICE.

RIGHTFUL, *a.* (Having a just title) अधिकारी -रिणी -रि (न्), अधिकारवान् -वती -वत् (त्), साधिकारः -रा -रं, स्वत्वाधिकारी &c.—(Agreeable to justice), *see* JUST.

RIGHTFULLY, *adv.* अधिकारेण, अधिकारतस्, साधिकारं. *See* JUSTLY.

RIGHTFULNESS, *s.* अधिकारिता, अधिकारवत्त्वं, साधिकारत्वं, *see* JUSTICE.

RIGHT-HAND, *s.* दक्षिणपाणिः *m.*, दक्षिणहस्तः, दक्षिणकरः, अग्रहस्तः, *see* RIGHT, *a.*

RIGHT-HANDED, *a.* दक्षिणहस्तसेवी -विनी -वि (न्), दक्षिणसाची &c.

RIGHTLY, *adv.* युक्तं, सम्यक्, धर्म्मतस्, धर्म्मेण, न्यायतस्, यथान्यायं, यथायोग्यं, यथाधर्म्मं, यथार्थं, यथोचितं, समञ्जसं, स्थाने, *see* JUSTLY, FITLY.—(Truly) सत्यं, ऋतं, अञ्जसा, यथार्थं -र्थतस्, *see* TRULY.

RIGHTNESS, *s.* यथार्थता, याथार्थ्यं, सत्यता, सामञ्जस्यं, सम्यक्त्वं, शुद्धता.

RIGID, *a.* (Stiff, not pliant) दृढः -ढा -ढं, स्तब्धः -ब्धा -ब्धं, स्तब्धीकृतः -ता -तं, घनः -ना -नं, कठिनः -ना -नं, स्तिमितः -ता -तं, अशिथिलः -ला -लं, अमृदुः -दुः -दु.—(Strict, severe) कठोरः -रा -रं, कर्कशः -शा -शं, उग्रः -ग्रा -ग्रं, नियतः -ता -तं, सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मदर्शी &c.

RIGIDITY, RIGIDNESS, *s.* दृढता, स्तब्धता, घनता, कठिनता, काठिन्यं, दार्ढ्यं, कठोरता, कर्कशता, कार्कश्यं, उग्रता -त्वं, अशिथिलता, अशैथिल्यं; 'of the eye-lids,' वर्त्मबन्धः.

RIGIDLY, *adv.* दृढं, सुदृढं, स्तब्धं, स्तब्धतया, स्तब्धत्वेन, सकाठिन्यं, सदार्ढ्यं, सकार्कश्यं, कठोरं, कठिनं, अशिथिलं.

RIGMAROLE, *s.* अनर्थककथा, निरर्थककथा, असम्बद्धार्थका दीर्घकथा.

RIGOR, *s.* (Stiffness) दृढता, कठिनता, कठोरता, काठिन्यं, *see* RIGIDITY.—(Severity) उग्रता, उग्रदण्डता -त्वं, कठोरता, कर्कशता, निष्ठुरता, नैर्घृण्यं.—(Intensity) *see* the word.

RIGOROUS, *a.* (Severe) उग्रदण्डः -ण्डा -ण्डं, उग्रः -ग्रा -ग्रं, उग्रदण्डवः &c., कठोरः -रा -रं, निष्ठुरः -रा -रं, कठिनः -ना -नं, क्रूरः &c., कर्कशः -शा -शं.—(Exact) सूक्ष्मः -क्ष्मा -क्ष्मं. *See* STRICT.

RIGOROUSLY, *adv.* उग्रत्वेन, उग्रं, उग्रदण्डेन, कठोरं, निष्ठुरं, नैर्घृण्येण.

RILL, *s.* अल्पनदी, क्षुद्रनदी, अल्पसरित् *f.*, सूक्ष्मसरित्, क्षुद्रसरित् *f.*

Rim, *s.* प्रान्तः, अन्तः, धारः -रा, प्रान्तभागः, अन्तभागः, उत्सङ्गः, पार्श्वः; 'of a cup,' पात्रप्रान्तः, पात्रकाग्रः, पात्रपार्श्वः.

Rime, *s.* तुषारः, नीहारः, कुम्झटिः *f.* -टिका. *See* Hoar-frost.

Rimy, *a.* तुषारमयः -यी -यं, नीहारमयः &c., कुम्झटिकामयः &c.

Rind, *s.* त्वक् *f.* (च्), त्वचा, वल्कं -ल्कलं, शल्कं -ल्कलं, चर्म *n.* (न्), छल्लिः -ल्ली *f.*, शल्कं, चोचं -चकं, चोलकं, चीरं, अग्रडकोपः; 'having rind,' त्वचीयान् -यसी -यः (स्), त्वचिष्ठः -ष्ठा -ष्ठं.

Ring, *s.* (Circle) मण्डलं, परिमण्डलं, चक्रं, चक्रवालं, वलयः -यं, वर्तुलः. —(Of metal) लोहचक्रं, लोहवलयः -यं; 'of a chain,' लोहल्लः.—(Ornament for the finger) अङ्गुलीयकं, अङ्गुरीयकं, अङ्गुरीयः -यं, अङ्गुलीकः -कं, ऊर्मिका, करारोटः, वालकः; 'seal-ring,' अङ्गुलिमुद्रा -द्रिका, मुद्रा, वेदिः -दी *f.*; 'ring for the toes or feet,' नूपुरः, पादाङ्गदं, पादकटकः, मञ्जीरं; 'marriage-ring,' कौतुकं, मङ्गलसूत्रं, *see* Marriage; 'sacred ring of kuśa grass worn during religious ceremonies,' पवित्रं -त्रकं.—(Circle of persons) मण्डलं; 'dancing in a ring,' मण्डलनृत्यं, हल्लीषं -षकं.—(Arena) रङ्गः.—(Ringing sound) क्वणितं, शिञ्जितं, क्वणः, घण्टाशिञ्जितं, घण्टाशब्दः, झनत्कारः, झम्झा -झनं.

SANDS, *s. pl.* सिकताः *f. pl.*, सैकतभूमिः *f.*, परेयभूः *f.*, परापभूः *f.*, परेयभूमिः *f.*

SANDY, *a.* सैकतः -ती -तं, सिकतामयः -यी -यं, सिकतावान् -वती -वत् (त्), बालुकामयः &c., सिकतिलः -ला -लं, बहुबालुकः -का -कं, बहुसिकतः -ता -तं, बालुकाप्रचुरः -रा -रं.

SANE, *a.* प्रकृतिस्थः -स्था -स्थं, स्वस्थः &c., सुस्थः &c., समञ्जः -ञ्जा -ञ्जं, अनुन्मत्तः &c., अविक्षिप्तः -प्ता -प्तं, अविकृतः -ता -तं, अवातुलः &c.

SANGUIFEROUS, *a.* रक्तवाहकः-का-कं, रक्तवाही -हिनी-हि (न्), असृग्वहः &c.

SANGUIFICATION, *s.* रक्तोत्पादनं, रक्तोत्पत्तिः *f.*, शोणितोत्पत्तिः *f.*, रक्तवर्धनं.

SANGUINARY, *a.* (Bloody, attended with much blood) रक्तमयः -यी -यं, बहुरक्तः -क्ता -क्तं, बहुरक्तपातसहितः -ता -तं.—(Bloody minded) रक्तप्रियः -या -यं, मारात्मकः -का -कं, जिघांसुः -सुः -सु, क्रूरचेताः -ताः -तः (स्), निष्ठुरः -रा -रं.

SANGUINE, *a.* (Of ardent temperament) उष्णप्रकृतिः -तिः -ति, उष्णस्वभावः -वा -वं, चण्डप्रकृतिः &c., सानुरागः -गा -गं, अनुरागी &c., प्रचण्डः -ण्डा -ण्डं, उत्सुकः -का -कं, तीक्ष्णः -क्ष्णा -क्ष्णं.—(Confident, hopeful) अतिविश्वासी -सिनी -सि (न्), अतिविश्वासशीलः -ला -लं, अत्याशावान् -वती -वत् (त्), अत्याशान्वितः -ता -तं, अत्याकांक्षी &c., सुफलापेक्षी &c., सुखापेक्षी &c., सुखप्रतीक्षः -क्षा -क्षं, भाविलाभासंशयी &c., सुप्रत्याशी &c., आशाबद्धः -द्धा -द्धं.

SANGUINENESS, *s.* अतिविश्वासः, अत्याशा, अत्याकांक्षा, सुफलापेक्षा, सुखापेक्षा, सुखप्रतीक्षा, भाविलाभासंशयः, सुप्रत्याशा.

SANIES, *s.* पूयरक्तं, पूयशोणितं, पूयं, मलजं, क्षतजं. *See* PUS.

SANIOUS, *a.* पूयरक्तवान् -वती -वत् (त्), पूयरक्तस्रावी -विणी -वि (न्).

SANITY, *s.* स्वास्थ्यं, स्वस्थता, सुस्थता, सुस्थितिः *f*, समञ्जता, अनुन्मत्तता.

SÁNKHYA, *s.* (A system of philosophy ascribed to the Muni Kapila. It asserts duality द्वैतं, or the co-existence of two principles in the universe, viz. spirit and matter. Its doctrines being opposed to the oneness of the Vedas led to the formation of another school called the Vedánta or Uttara-Mímánsá system, asserting the opposite idea of unity एकत्वं or अद्वैतं, and shewing that the end or aim of the Vedas was to inculcate the oneness of Spirit or God) सांख्यः, सांख्यदर्शनं; 'with the commentary,' सांख्यकारिका.

SANSKRIT, *s.* (The classical and sacred language of the Hindús, from which are formed all their modern dialects. The word means highly polished and artificially constructed) संस्कृतं, संस्कृतोक्तिः *f.*, संस्कृतभाषा, ब्राह्मणभाषा, देवभाषा, दैवभाषा, आदिभाषा.

SAP, *s.* (Of plants) सारः, रसः, द्रवः, मज्जा, मज्जा *m.* (न्), निर्यासः, निकरः, सक्थं, वृक्षसारः, वृक्षरसः.

To SAP, *v. a.* (Undermine) अधस् or अधस्तात् खन् (c. 1. खनति -नितुं), अधोभागे गूढखातं कृ, अधो खात्वा पर्यस् (c. 4. -अस्यति -सितुं) or निपत् (c. 10. -पातयति -यितुं) or नश् (c. 10. नाशयति -यितुं).

SAPAN-WOOD, *s.* रक्तचन्दनं, पत्राङ्गं, पत्रकं, रञ्जनं, कुचन्दनं, पत्तङ्गं, पट्टरञ्जनं.

SAPID, *a.* सुरसः -सा -सं, सरसः &c., मिष्टः -ष्टा -ष्टं, स्वादुः -दुी -दु, स्वादुरसः -सा -सं, सरसान् -सती -सत् (त्), रसवान् &c. *See* TASTEFUL.

SAPIDITY, SAPIDNESS, *s.* सुरसता, सरसता, मारस्यं, स्वादुता, मिष्टता.

SAPIENCE, *s.* प्राज्ञत्वं, प्रज्ञता, वैदुष्यं. *See* WISDOM.

SAPIENT, *a.* विद्वान् -दुषी -द्वत् (त्), प्राज्ञः -ज्ञा -ज्ञं. *See* WISE.

SAPLESS, *a.* असारः -रा -रं, निःसारः &c., निस्सारः &c., सारहीनः -ना -नं, सारवर्जितः -ता -तं, विरसः -सा -सं, निरसः &c., नीरसः &c., रसहीनः -ना -नं, निस्सत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः &c., म्लानुः -ल्नुः -ल्नु.

SAPLING, *s.* बालवृक्षः, कोमलवृक्षः, रसार्द्रः पेलववृक्षः, बालद्रुः *m.*

SAPONACEOUS *a.* मेदुरः -रा -रं, चिक्कणः -णा -णं, चिक्किणः &c.

SAPOR, *s.* रुचिः *f.*, रसः, स्वादः, आस्वादः. *See* TASTE.

SAPPAN-WOOD, *s.* *See* SAPAN-WOOD.

SAPPER, *s.* खनकः, आखनिकः, सुरङ्गाखनकः, सौरङ्गिकः. *See* MINER.

SAPPHIRE, *s.* नीलः, नीलकान्तः, नीलाश्मा *m.* (न्), इन्द्रनीलः, तृणग्राही *m.* (न्), शितिरत्नं, शनिः *m.*

SAPPHIRINE, *a.* नीलमयः -यी -यं, नीलगुणकः -का -कं, नीलोपमः &c.

SAPPINESS, *s.* सरसता, रसवत्त्वं, रसालता, बहुरसत्वं, बहुसारत्वं.

SAPPY, *a.* रसवान् -वती -वत् (त्), सरसः -सा -सं, रसी -सिनी -सि (न्), बहुरसः &c., रसाढ्यः -ढ्या -ढ्यं, सारवान् &c., बहुसारवान् &c., बहुसारः -रा -रं, मज्जावान् &c., ससारः -रा -रं, ससत्त्वः -त्त्वा -त्त्वं, सत्त्ववान् &c., आर्द्रः -र्द्रा -र्द्रं.

SARASWATÍ, *s.* (The wife of the god Brahmá, or, according to some, of Dharma. She is goddess of speech and eloquence, patroness of music and the arts, and inventress of the Sanskrit language and Devanágarí letters) सरस्वती, वाग्देवी, वागीश्वरी, वाणी, वाक् *f.* (च्), ब्राह्मी, ब्रह्मकन्यका, वाङ्मयी, भारती, शारदा, लपिता, वाग्विलासिनी, वाग्वल्ली, वाग्वल्लरी. The name Saraswatí, signifying 'flowing,' is applied to a celebrated river as well as to the goddess of speech. The river rises in the mountains N. E. of Dehli.

SARCASM, *s.* अवक्षेपः, आक्षेपः, क्षेपः, व्यञ्जना -नं, व्यंग्यः -ग्यं, व्यंग्योक्तिः *f.*, वक्रोक्तिः *f.*, तीक्ष्णवाक्यं, तीक्ष्णवचनं, अरून्तुदवाक् *f.* (च्), अरून्तुदवाक्यं, वागसिः *f.*, वागिषुः *m. f.*

SARCASTIC, SARCASTICAL, *a.* अरून्तुदः -दा -दं, अवक्षेपकः -का -कं, सावक्षेपः -पा -पं, साक्षेपः &c., सव्यञ्जनः -ना -नं, तीक्ष्णः -क्ष्णा -क्ष्णं, तिग्मः -ग्मा -ग्मं, कटुः -टुः -टु.

SARCASTICALLY, *adv.* सावक्षेपं, साक्षेपं, सव्यञ्जनं, अरून्तुदवाचा.

SARCOMA, *s.* मांसवृद्धिः *f.*, अर्बुदः, अधिमांसं. *See* TUMOR.

SARCOPHAGOUS, *a.* मांसभक्षकः -का -कं, मांसभोजी &c. *See* CARNIVOROUS.

SARCOPHAGUS, *s.* प्रस्तरमयः शवाधारः, पाषाणमयी शवपेटिका.

SARDONIC, *a.* (Laugh) विकृतहासः, करालस्मितं, पिशाचस्मितं.

SARDONYX, *s.* (Gem) गोमेदकः -कं, शिवधातुः *m.*, वैदूर्यं

SARSAPARILLA, SARSA, *s.* गन्धवल्कलं, उत्कटं.

SASH, *s.* (Ornamental belt) शोभार्थं धृता दुकूलमयमेखला, कटिबन्धनी, कटिसूत्रं, कटिशृङ्खला, परिकरः.—(Of a window) वातायनकाष्ठं, वातायनपरिगतं काष्ठादि.

SÁSTRA, *s.* (Sacred treatise) शास्त्रं, *see* SHÁSTRA.

SATAN, *s.* (The devil) पिशाचः, *see* DEMON. The Arabic word is शैतान्, from which a Sanskrit word शैतानः or सैतानः may perhaps be formed.

SATANICAL, *a.* शैतानसम्बन्धी -न्धिनी &c., पैशाचिकः &c. *See* DEMONIACAL.

SATCHEL, *s.* पुस्तककोषः, लेख्यपत्रकोषः. *See* SACHEL.

To SATE, *v. a.* अत्यन्तं or अतिशयेन तृप् in caus., *See To* SATIATE.

SATED, *p. p.* अतितृप्तः -प्ता -प्तं, अतितर्पितः -ता -तं, अतिपूरितः &c.

SATELLITE, *s.* (In astronomy) उपग्रहः, चन्द्रः.—(Obsequious follower) अनुपङ्क्ती *m.* (न्), नित्यानुपङ्क्ती *m.*, नित्यानुचारी *m.*, पार्श्वपरिचर्त्ती *m.*

To SATIATE, *v. a.* अत्यन्तं or अतिशयेन तृप् (c. 10. तर्पयति -यितुं) or सन्तृप् or परितृप् or पृ (c. 10. पूरयति -यितुं) or परिपृ or तृद्ध (c. 10. तोषयति -यितुं) or सन्तुष् or परितुष्, अतितृप्तिं or अतिसौहित्यं जन् (c. 10. जनयति -यितुं) or कृ, अतितुष्टिं जन् or उत्पद् (c. 10. -पादयति -यितुं), मुहितं -तां कृ.

SATIATED, *p. p.* अतितृप्तः -प्ता -प्तं, अतितर्पितः -ता -तं, अतिपूरितः &c., परितृप्तः -प्ता -प्तं, सन्तृप्तः &c., सन्तर्पितः &c., तर्पितः &c., सन्तोषितः &c., परितुष्टः -ष्टा -ष्टं, अतिपूर्णः -र्णा -र्णं, परिपूर्णः &c., पूर्णकामः -मा -मं, परिपूर्णकामः &c., शान्तकामः &c., पर्याप्तकामः &c., प्रतिलब्धकामः &c., मुहितः -ता -तं, अतितुष्टः &c., अतितोषितः &c.

SATIETY, *s.* अतितृप्तिः *f.*, परितृप्तिः *f.*, तृप्तिः *f.*, अतितर्पणं, तर्पणं, आतृप्तिः *f.*, अतितृप्तता, अतिपूर्तिः *f.*, अतिपूर्णता, परिपूर्तिः *f.*, अतितुष्टिः *f.*, अतितुष्टता, परितोषः, परितुष्टिः *f.*, सौहित्यं, सुहितता, कामपर्य्याप्तिः *f.*, कामशान्तिः *f.*, पूर्णकामत्वं, क्षुधाशान्तिः *f.*, वितृष्णता, आघ्राणः.

SATIN, *s.* (The silk) अतिशोभनदुकूलं, अतिरुचिरदुकूलं, श्लक्ष्णदुकूलं.

SATIRE, *s.* (Discourse or poem in which wickedness is satirized) दुराचारोपहासकरूपिता -भाषणं, सावक्षेपकविता, दुर्वृत्तावक्षेपककविता -भाषणं, दोषोपहासकभाषणं, अरून्तुदकाव्यं, अवगीतं, अरून्तुदभाषणं, निन्दोपाख्यानं.—(Keen remark or ridicule) अवक्षेपः, उपहासः, व्यञ्जना, अरून्तुदवाक् *f.* (च्), विदूषणं, वागसिः *f.*, *see* SARCASM.

SATIRICAL, *a.* दुराचारोपहासकः -का -कं, दोषोपहासकः &c., दुर्वृत्तावक्षेपकः &c., उपहासकः &c., उपहासात्मकः &c., उपहासरूपः -पा -पं, अवक्षेपकः &c., सावक्षेपः -पा -पं, सोपहासः -सा -सं, साक्षेपः &c., सव्यञ्जनः -ना -नं, अवक्षेपार्थकः &c., अवगीतरूपः -पा -पं, अरून्तुदः &c. *See* SARCASTIC.

SATIRICALLY, *adv.* सोपहासं, सावक्षेपं, साक्षेपं, अरून्तुदं, सव्यञ्जनं.

SATIRIST, *s.* दोषोपहासकः, दुराचारोपहासी *m.* (न्), दोषावक्षेपकः.

To SATIRIZE, *v. a.* अरून्तुदवाक्यैर् उपहस् or अवक्षिप् or अवगै, सव्यञ्जनं or सावक्षेपं or सोपहासं निन्द्, तीक्ष्णवाचा निन्द्.

SATIRIZED, *p. p.* अरून्तुदवाक्यैर् अवक्षिप्तः -प्ता -प्तं, अवगीतः -ता -तं.

SATISFACTION, *s.* (The state) तुष्टिः *f.*, तृप्तिः *f.*, तोषः, सन्तोषः, परितोषः, इच्छातृप्तिः *f.*, कामतृप्तिः *f.*, इच्छापूर्त्तिः *f.*, इच्छाशान्तिः *f.*, कामशान्तिः *f.*, इच्छानिवृत्तिः *f.*, शान्तिः *f.*, तुष्टता, परितुष्टता, तृप्तता, शान्तता, पर्य्याप्तिः *f.*, इच्छापर्य्याप्तिः *f.*, पूर्त्तिः *f.*, परिपूर्त्तिः *f.*, सौहित्यं, सुहितता, समाधानं.—(The act) तर्पणं, सन्तर्पणं, तोषणं, सन्तोषणं, परितोषणं, पूरणं, पारणं, आप्यायनं, अयनं, इच्छाशमनं, इच्छाशान्तिः *f.*, इच्छानिवृत्तिः *f.*; 'of hunger,' क्षुधाशान्तिः *f.*—(Gratification) प्रीणनं, तर्पणं, अनुवर्त्तनं.—(Relief from doubt) सन्देहनिवृत्तिः *f.*, संशयनिवृत्तिः *f.*, सन्देहभञ्जनं, सन्देहहरणं.—(Compensation) पारितोषिकं,

see COMPENSATION.—(Payment) निस्तारः, शुद्धिः *f.*

SATISFACTORILY, *adv.* यथामुखं, यथा तुष्टिर् जायते तथा, पर्य्याप्तं

SATISFACTORY, *a.* तुष्टिजनकः -का -कं, तुष्टिजननः -नी -नं, तुष्टिकरः -री -रं, तुष्टिदः -दा -दं, सन्तोषदः &c., सन्तोषदायकः -यिका -कं, तृप्तिजनकः -का -कं, तृप्तिदः &c., सन्तोषकः -का -कं, परितोषकः &c., मनोहरः -रा -रं, मनोयोग्यः -ग्या -ग्यं, इच्छापूरकः -का -कं, कामपूरकः &c., पर्य्याप्तः -प्ता -प्तं, सन्देहहारी &c., सन्दहभञ्जकः -का -कं, संशयनिवर्त्तकः &c.

SATISFIABLE, *a.* आतृप्यः -प्या -प्यं, मनर्पणीयः -या -यं, सन्तोषणीयः &c.

SATISFIED, *p.p.* (Having desires gratified) तृप्तः -प्ता -प्तं, सन्तुष्टः &c., परितुष्टः &c., सन्तोषितः -ता -तं, तृप्तः -प्ता -प्तं, सन्तर्पितः -ता -तं, तर्पितः &c., तृप्तकामः -मा -मं, वितृप्तकामः &c., पूर्णकामः &c., शान्तकामः &c., निवृत्तकामः &c., पर्य्याप्तकामः &c., पर्य्याप्तः -प्ता -प्तं, आप्यायितः -ता -तं, आप्तकामः -मा -मं, मुदितः -ता -तं, चरितार्थः -र्था -र्थं, कृतार्थः &c., कृतकृत्यः -त्या -त्यं, प्रीतः -ता -तं, प्रमादितः &c., अजितः &c.—(Having doubt removed) निवृत्तसन्देहः -हा -हं, निवृत्तसंशयः -या -यं, छिन्नसन्देहः -हा -हं, गतसन्देहः &c., 'to be satisfied,' तृप (c. 1. तृप्यति, तर्पितुं), तृप् (c. 4. तृप्यति, तोष्टुं): 'fire cannot be satisfied with fuel,' अग्निस् न तृप्यति काष्ठानां.

To SATISFY, *v. a.* (Gratify desires to the full) तृप (c. 10. तर्पयति -पयितुं), सन्तुष्, परितुष्, तृप् (c. 10. तर्पयति -पयितुं), सन्तृप्, परितृप्, पृ (c. 10. पूरयति -पयितुं), परिपृ, कामं पृ or इच्छां पृ or श्रम (c. 10. श्रमयति -पयितुं) or निवृत् (c. 10. -वर्त्तयति -यितुं), तृप्तिं or मोदित्वं कृ (c. 10. जनयति -यितुं), तुष्टिं जन् or जनप् (c. 10. -वादयति -यितुं), आप्यं in caus. (आपयति -यितुं), मुख् (c. 10 मुखयति -यितुं), प्री (c. 9. प्रीणाति, c. 10 प्रीणयति -यितुं), हृद् (c. 1. हृदते -दितुं), प्रीतिं कृ, मुखं दा. (Free from doubt, सशय or सन्देह हृ (c. 1. हरति, हर्त्तुं), संशयनिवृत्तिं कृ, संशयच्छेदं कृ संशयभञ्जनं कृ.

SATISFYING, *part.* or *a.* तृप्तिः -प्तिः -प्तिं, तोषजनकः -का -कं, तुष्टिकरः -री -रं, तृप्तिकरः -री -रं, तृप्तिजनकः &c., सन्तर्पकः &c., सन्तोषकः &c., आप्यायनशीलः &c.

SATOL, *s.* उद्यानजः -जा -जं, उद्यानसंभवः -वा -वं, शुक्लः -क्ला -क्लं.

SATRAP, *s.* (Rice) व्रतदुः, व्रतिदुः, व्रतदुकः *f.*

SATRAP, *s.* क्षत्रपः, क्षत्रपतिः *m.*, मण्डलाधिपः, मण्डलाधिपतिः *m.*

To SATURATE, *v. a.* अतिशयेन or अत्यन्तं क्लिद् (c. 9. क्लिनाति, क्लेदति or क्लिद्यति or आर्द्रयति, अतिशयेन or अत्यन्तं क्लेदं (c. 10 क्लेदयति -यितुं) or परिक्लेदं, अत्यन्तं पृ (c. 10. पूरयति -यितुं) or परिपृ.

SATURATED, *p.p.* अतिक्लिन्नः -न्ना -न्नं, अतिक्लेदितः -ता -तं, अतिपूर्णः -र्णा -र्णं.

SATURATION, *s.* अतिशयक्लेदः, अतिक्लेदः, अतिक्लेदनं, अतिपूरणं.

SATURDAY, *s.* शनिवारः, शनिवासरः, मन्दवारः, मन्दवासरः, कृतान्तः.

SATURN, *s.* (The planet, variously famed as the son of Revatí and Balaráma, or of Cháyá and the sun. His influence is considered to be malignant and injurious) शनिः *m.*, शौरिः *m.*, सौरः, सौरिः *m.*, रवतीभवः, छायासूनुः, छायातनयः, छायात्मजः, ब्रह्मण्यः, ब्राह्मण्यः, पातङ्गिः *m.* (The evil-eyed one) क्रूरदृक् *m.* (श्), क्रूरलोचनः. (The slow-goer) मन्दगतिः, मन्दः, पङ्गुः &c. (Lord of the planets) ग्रहनाथः. (Lord of seven lights or satellites) सप्तांशपुङ्गवः, सप्तार्चीः *m.* (स्), सप्तार्चिः. Other names are क्रोडः, क्रोरः.

SATURNALIA, *s. pl.* (Spring festivals of the Hindus) होलिका, होलो, होलाका, दोलयात्रा, दोलोत्सवः.

SATURNIAN, *a.* सत्ययुगसम्बन्धी -न्धिनी &c., सत्ययुगविषयकः -का -कं.

SATURNINE, *a.* मन्दः -न्दा -न्दं, मन्दप्रकृतिः -तिः -ति, जडः -डा -डं, जडस्वभावः -वा -वं, शीतः -ता -तं, शीतप्रकृतिः -तिः -ति.

SATYR, *s.* वनेचरः, वनचारी *m.* (न्), अरण्यचरः, वनदेवता, अरण्यदेवता.

SAUCE, *s.* व्यञ्जनं, उपस्करः, सूपः, तेमनं, मिष्टावं, निष्टानं, प्रहितं, प्रदिग्धः, लालभीकं, उपकरणं, घसः, पिच्छिलः; 'fish-sauce,' पाकमत्स्यः, मीनाम्बीशः.

SAUCE-PAN, *s.* पिठरः, उखा, पिष्टपचनं, पिष्टपाचकं, कन्दुः *m.f.*, कन्दूः *m.f.*, खोलकः, पाकः.

SAUCER, *s.* शालाजिरः -रं, वैदलं, पात्राधारः, शरावः, पुटकः, पार्श्वं.

SAUCILY, *adv.* अविनयेन, धृष्टवत्, प्रगल्भं, सप्रागल्भ्यं. *See* IMPUDENTLY.

SAUCINESS, *s.* अविनयः, अविनीतता, धृष्टता, प्रगल्भता, प्रागल्भ्यं, चापल्यं, चपलता, वाकपारुष्यं, परुषवचनं, पारुष्यं, दुरुक्तिः *f.*, दुरुक्तरं, धृष्टता, उत्तरदायकता.

SAUCY, *a.* अविनीतः -ता -तं, अविनयः -या -यं, धृष्टः -ष्टा -ष्टं, प्रगल्भः -ल्भा -ल्भं, चपलः -ला -लं, उत्तरदायकः -यिका -कं, उत्तरदायी -यिनी -यि &c.

To SAUNTER, *v. n.* अलसगत्या or आलस्येन मन्दं मन्दं परिक्रम् (c. 1. -क्रामति -क्रमितुं) or शनैः शनैः परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं) or मन्दं मन्दं चल्.

SAUNTERER, *s.* अलसपरिक्रमः, आलस्येन परिक्रमणं, मन्दपरिक्रमणं.

SAUNTERING, *part.* शिक्षणमन्त्रयन्त्रनादिभिर् मन्त्रपुरीतत्.

SAVAGE, *a.* (Uncivilized) अशिष्टः -ष्टा -ष्टं, अशिक्षितः -ता -तं, विद्याचारहीनः -ना -नं, दुराचारः -रा -रं, निराचारः &c., अनाचारी -रिणी -रि &c., विद्याचारशून्यः -न्या -न्यं, शिक्षाहीनः &c., शिक्षारहितः -ता -तं, आचारहीनः -ना -नं, आचारशून्यः &c. (Cruel, ferocious, &c.) क्रूरः -रा -रं, क्रूरकर्म्मशाली &c., क्रूराचारः &c., निष्ठुरः -रा -रं, दारुणः -णा -णं, रौद्रः -द्री -द्रं, रौरवः -वी -वं, &c. (Indigenous.) As a beast) श्वापदः -दी -दं, श्वापदः -दी -दं. (Wild, pertaining to the forest) आरण्यः -ण्यी -ण्यं, अरण्यजः -जा -जं, जाङ्गलः -ली -लं, जाङ्गलः -ली -लं, वनचरः -रा -रं &c. (Pertaining to barbarians) म्लेच्छीयः -या -यं, म्लेच्छवत्की &c. शब्द in comp.

SAVAGE, *s.* (Uncivilized person) अशिष्टजनः, आशिष्टजनः, असज्जनः, खसः. (A foreigner or one of a barbarous tribe, not speaking Sanskrit and not subject to Hindu institutions) म्लेच्छः, म्लेच्छातिः *m.*, किरातः, पुलिन्दः, शबरः, यवनः, मिल्लः, बुधनः. (Cruel person, brute) राक्षसः, दैत्यः, क्रूरजनः, क्रूरकर्म्मा *m.* (न्), अधार्म्मिकः *m.*, पुरुषपशुः *m.*

SAVAGELY, *adv.* अशिष्टवत्, किरातवत्, राक्षसवत्, अतिक्रूरं, अतिनिष्ठुरं.

SAVAGENESS, *s.* आशिष्टता, शिक्षाहीनता, विद्याचारहीनता, दुराचारता -त्वं, अनाचारता -त्वं, असज्जनता, म्लेच्छभावः, क्रूरता, क्रौर्य्यं, निष्ठुरता, निर्दयता, दारुणता, दारुणं, रौद्रता, रौरवता, पारुष्यं.

SAVANT, *s.* गुणग्राहकः, गुणज्ञः, पण्डितः, विद्वान् *m.* (द्वस्), ज्ञानवान्, ज्ञानी *m.* (न्), अभिज्ञः, विद्याभव्यः

To SAVE, *v. a.* (Preserve from injury) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, त्रै (c. 1. त्रायते -ति -त्रातुं), परित्रै, सन्त्रै, पाल्, गुप्, तॄ in caus., क्षत् in caus., क्षप् in des., रक्षणं कृ, रक्षां कृ, *see To* PRESERVE; 'save me,' त्राहि मां, त्रायस्व मां, मामव, त्राहि त्राहि.—(Deliver) उद्धृ (c. 1. उद्धरति, उद्धर्त्तुं, rt. हृ), समुद्धृ, मुच्, मोक्ष्, निस्तॄ in caus (-तारयति -यितुं), मन्तॄ, त्रै, परित्रै.—(In theology) त्रै, उद्धृ, तॄ in caus., पापाद् मुच्. —(Not to lose or spend) न क्षि न व्ययीकृ, अव्ययीकृ, न नश्

in caus. यथा न क्षीयते or यथा न व्ययीक्रियते तथा कृ.—(Lay by) रक्ष्, निधा, संचि (c. 5. -चिनोति -चेतुं), सञ्चयं कृ, संग्रहं, संग्रहं कृ.—(Prevent) निवृ, वृ, रुध्, निवृत् in caus.

Save. (Except) वर्ज्जयित्वा, मुक्त्वा, अवशिष्य, *see* Except, Excepted.

Saved, *p. p.* (Preserved) रक्षितः -ता -तं, त्रातः -ता -तं, त्राणः -णा -णं, तारितः -ता -तं, मन्तारितः &c., अवितः &c. (Delivered) मुक्तः -क्ता -क्तं, मोचितः -ता -तं, मोक्षितः &c., उद्धृतः &c., निस्तारितः &c.—(In theology) त्रातः -ता -तं, तारितः &c., कृतनिष्कृतिः -तिः -ति; 'not saved,' अकृतनिष्कृतिः &c.—(Not spent, laid by) अव्ययितः -ता -तं, अव्ययीकृतः &c., रक्षितः &c., सञ्चितः &c.—(Prevented) निवारितः -ता -तं.—(Left) शिष्टः -ष्टा -ष्टं, अवशिष्टः &c.; 'those that were saved out of the slain,' हतजेषाः *m. pl.* हतशिष्टाः *m. pl.*

Saving, *s.* (The act) रक्षणं, त्रायणं, मन्त्रणं, उपार्जनं -नः, अर्जनं, लब्धयः, लब्धिः.—(Something saved) रक्षितांशः, अव्ययितांशः, रक्षितधनं, अव्ययितधनं, सञ्चितांशः सञ्चितधनं, उपार्जितांशः.—Desire of saving life) प्राणपरीप्सा.

Saving, *part.* or *a.* (Frugal) अव्ययशीलः -ला -लं, अल्पव्ययी -यिनी -यि (न्), स्वल्पव्ययः -या -यं, परिमितव्ययः &c.—(Securing everlasting salvation) त्राणसाधकः -धिका -कं, मुक्तिसाधकः &c., मोक्षसाधकः &c., उद्धारसाधकः &c., परमगतिसाधकः &c., सद्गतिसाधकः &c.—(Excepting) वर्ज्जयित्वा.

Saviour, *s.* त्राता *m.* (तृ), परित्राता *m.*, उद्धारकः, उद्धर्त्ता *m.* (र्त्तृ), तारकः, तारणकर्त्ता *m.*, निस्तारकः, त्रायकः, [illegible] *m.*; 'of the world,' जगदुद्धारकः, जगत्त्राता *m.*

Savor, savour, *s.* (Odor) गन्धः, वासः; 'sweet savor,' सुगन्धः, सुगन्धिः *m.*, सुवासः, सौरभ्यं; 'ill savor,' दुर्गन्धः दौर्गन्ध्यं -न्धिः *m.*, कुत्सितगन्धः.—(Taste) रसः, स्वादः, रुचिः *f.*, लावण्यं, लवणत्वं.

To savor *v. n.* (Have a smell or flavor) सगन्धीभू, गन्धाढ्यीभूः -श्वा -श्वं भू, सुरभीभू, रसवत्कः -त्का -त्कं भू.—(Appear a little like) ईषत्सदृशः -शी -शं भू, ईषत्सदृशगुणः -णा -णं भू or प्रतिभा (c. 2. -ते तुं).

Savoriness, *s.* सुरसता -त्वं, सौरस्यं, सरसता, स्वादुता, मिष्टता -त्वं.

Savory, *a.* (Pleasing to the taste) सुरसः -सा -सं, रसिकः -की -कं, सरसः &c., रसी -सिनी -सि (न्), रसवान् -वती -वत् (त्), स्वादी -दिनी -दि, मिष्टः -ष्टा -ष्टं, रुचिकरः -रा -रं; 'savory food,' रसवद्भक्ष्यं, खाद्यं.—(To the smell) सुगन्धी -न्धिनी &c., सुरभिः -भिः -भि.

Saw, *s.* (The instrument) करपत्रं, क्रकचः, क्रकरः, पत्रदारकः, शाणः, दारुरायणः, तालाङ्कः, कर्त्तनी.

To saw, *v. a.* करपत्रेण or क्रकचेन पट् (c. 10. पाटयति -यितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं) or भिद् or विभिद् or विद् (c. 10. -दारयति -यितुं) or विदल् (c. 10. -दलयति -यितुं) or द्विखण्डीकृ, शाणवर्षणेन विद्; 'he sawed the wood,' करपत्रेण काष्ठम् अपाटयत.

Saw-dust, *s.* विदीर्णकाष्ठचूर्णं, काष्ठविदलं, काष्ठघर्षणजक्षोदः.

Sawed, *p. p.* करपत्रविदीर्णः -र्णा -र्णं, करपत्रच्छिन्नः -न्ना -न्नं, क्रकचभिन्नः -न्ना -न्नं, करपत्रविदार्य्यमाणः -णा -णं, करपत्रपाटितः -ता -तं, करपत्रविदारितः -ता -तं, करपत्रघर्षितः &c.

Sawing, *s.* करपत्रेण विदारणं or विपाटनं or विच्छेदः, शाणघर्षणं.

Saw-pit, *s.* काष्ठपाटनगर्त्तः, काष्ठविदारणगर्त्तः, काष्ठदारणयोग्यो गर्त्तः.

Sawyer, *s.* क्राकचिकः, काष्ठपाटनजीवी *m.* (न्), काष्ठविदारकः.

To say, *v. a.* (Speak, utter) वद् (c. 1. वदति -दितुं), ब्रू (c. 2. ब्रवीति, वक्तुं 2 pret. आह), वच् (c. 2. वक्ति -क्तुं), भाष (c. 1. भाषते -षितुं), गद् (c. 1. गदति -दितुं), निगद्, भण (c. 1. भणति -णितुं), उदाह् (c. 1. -हरति -हर्त्तुं), व्याह्, समुदाह्, उच्चर (c. 10. -चारयति -यितुं), उदीर् (c. 10. -ईरयति -यितुं), समुदीर्, ईर्, लाप (c. 1. -लपति -पितुं), जल्प् (c. 1. जल्पति -ल्पितुं), सञ्जल्प्, उपजल्प्, मन्त्र (c. 10. मन्त्रयते -यितुं), अभिधा, वाक्यं वद्, वाक्यं ब्रू, आह the irregular 2. pret. of ब्रू is used for 'he says' or 'he said.'—(Declare) कथ् (c. 10. कथयति -यितुं), प्रवद्, सम्प्रवद्, प्रवच्, आख्या.—(Rehearse) आवृत्, *see* To recite.—(That is to say) अर्थतस्, वस्तुतस्.

Saying, say, *s.* उक्तिः *f.*, वाक्यं, उक्तं, वचनं, वाक् *f.* (च्), भाषणं, भाषितं, लपितं, भणितं, गदितं *n.* अभिधा, अभिधानं, आख्यानं, कथनं, वादः, प्रवादः, प्रवचनं; 'popular saying,' लोकप्रवादः, जनवादः, लोकवाक्यं, लोकोक्तिः *f.*

Saying, *part.* वदन् -दन्ती -दत् (त्), भाषमाण &c., भाषमाणः -णा -णं. The particle इति, meaning 'so, thus,' is often placed at the end of a speech or quotation, either with or without the participle, which [illegible] इत्युक्त्वा इत्यभिधाय or simply इति.

Scab, *s.* कक्षुः *f.* (क्षुस्), कक्षूः *f.* (क्षूस्), पिच्छं *n.* (च्), भिष्मं, पामा *f.*, पाम *m.* (न्), कण्डूः *f.*, कण्डूः, वल्गुः *f.*, रुमः, पाथिम *n.* क्लिन्नमः, त्वक्पर्ष्पटी त्वचा विपाटिका.—Low, low spirited: अधमाचारः, अधमवृत्तिः *m.*

Scabbard, *s.* कोषः, कोशः, खड्गकोषः, खड्गकोशः, खड्गपिधानं, खड्गाधारः, खड्गाधारः, दृढः, दृढ्यः, परिवारः, प्रसेवकः.

Scabbiness, *s.* कक्षुरता, मिष्मलता -त्वं, पामलता, पिच्छत्वं.

Scabby, *a.* कक्षुरः -रा -रं, भिष्मलः -ष्मा -ष्मं, भिष्मवान् -वती -वत् (त्), पामलः -ला -लं, कण्डूलः -ला -लं, कण्डूमती -मान् &c.

Scabious, *a.* (Of or like the scab) कक्षूसदृशः, कक्षूवत्, कक्षूसम्बन्धी -न्धिनी -न्धि (न्), कक्षूसम्बन्धीय, भिष्मसदृशः, भिष्मवत्, भिष्मसम्बन्धी &c.—(Forming a scab) [illegible] -त्का -त्कं, पामाजनकः &c.—(Full of scabs) पामाढ्यः, पामावान् &c.—(For specific diseases) वातरक्तः, वातशोणितः, वातशोणितवान्, वातशोणितयुक्तः, वातशोणितसम्बन्धी &c.

Scabrous, *a.* खरत्वचः -चा -चं, खरत्वक्कः -क्का -क्कं, खरत्वगादिः -दी -दि, खरत्वगादिमान् -मती -मत् (त्), खरत्वगादियुक्तः &c.

To scald, *v. a.* अतितप्तजलसम्पर्केण दह् (c. 1. दहति, दग्धुं), अतितप्तजलेन दह्, तप्तजलसम्पर्केण दह्, अतितप्तजलसेकेण दह्.

Scald, *s.* अतितप्तजलकृतं क्षतं, तप्तजलकृतः, तप्तजलसम्पर्केण दाहः.

Scalded, *p. p.* अतितप्तजलसम्पर्केण दग्धः -ग्धा -ग्धं, तप्तजलदग्धः &c., तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं.

Scalding, *part.* अतिदाहकः -का -कं, अतिदाहयुक्तः &c., ज्वलन् -लन्ती -लत् (त्).

Scale, *s.* (Balance, pair of scales) तुला, तुलायन्त्रं, मापनयन्त्रं, मापनदण्डः, मापनः, घटः, पदार्थमापनार्थं तुलायन्त्रं; 'goldsmith's scales,' स्वर्णी -र्णिका, नाराची -चिका.—(The cup or dish of a balance) घटः, तुलाघटः.—(Sign of the balance), *see* Libra.—(Of a fish) शल्कं, शल्कलं, वल्कं, मत्स्यवल्कं, मीनवल्कं, वल्कलं, शकलं.—(Of an animal) कवचः.—(Thin plate or crust) फलकः -कं, शल्कं, शकलं, पल्कं, पत्रं, पटलं.—(Ladder) सोपानं, सोपानपद्धतिः *f.*, निःश्रेणी.—(Regular gradation or series) श्रेणी -णिः *f.*, श्रेधी, क्रमः, अनुक्रमः, पंक्तिः *f.*, आवली, पर्य्यायः; 'on a small scale,' अल्पपरिमाणः -णा -णं.—(In music) ग्रामः, रागः, वर्णः, *see* Gamut, Mode.

To scale, *v. a.* (Climb) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), अधिक्रम्.—(The walls of a fortress, &c.) लंघ् (c. 10. लंघयति -यितुं), अभिलंघ्, उल्लंघ्, अवस्कन्द्, लंघनं कृ,

दुर्गलंघनं कृ.—(Strip of scales) वल्क (nom. वल्कयति -यितुं), वल्कं or वल्कलं हृ or निर्हृ or निष्कृष्, निर्वल्कलीकृ.

To SCALE, *v. n.* (Come off in scales) निर्वल्कलीभू, शकलीभू.

SCALED, *p. p.* लंघितः -ता -तं, उल्लंघितः &c., अवस्कन्दितः -ता -तं.

SCALENE, *a.* (Triangle) विषमत्रिभुजः, विषमत्रिकोणं, असमत्रिभुजः.

SCALL, *s.* कच्छूः *f.*, सिध्म *n.* (न्), शुष्कव्रणः. *See* SCAB.

SCALLOP, *v. a.* (Shell-fish) कस्रुः *m.*, कस्रुभेदः.

To SCALLOP, *v. a.* कस्रुरूपेण छेदाङ्कितं -तां कृ, ऊर्म्याकारछेदाङ्कितं -तां कृ, खण्डमण्डलरूपछेदाङ्कितं -तां कृ, अर्द्धमण्डलरूपचिह्नैर् वस्त्रान्तं परिच्छिद्.

SCALP, *s.* मस्तकाग्रत्वक् *f.* (च्), मस्तकाग्रचर्म्म *n.* (न्), शिरोग्रत्वक् *f.*, शिरोस्थित्वक् *f.*, शिरोग्रचर्म्म *n.*, शिरोस्थिचर्म्म *n.*, मस्तकास्थिचर्म्म *n.*

To SCALP, *v. a.* मस्तकाग्रत्वचम् अवछिद् (c. 7. -छिनत्ति -छेत्तुं), मस्तकाग्रचर्म्म अपकृत् or उत्कृत् or निष्कृत्, शिरोस्थिचर्म्म निष्कृष् or निर्हृ or हृ.

SCALPED, *p. p.* हृतमस्तकत्वक् *m. f. n.* (च्), हृतमस्तकचर्म्मा -र्म्मा -र्म्म (न्).

SCALY, *a.* सशल्कः -ल्का -ल्कं, सवल्कः &c., वल्कवान् -वती वत् (त्), वल्कमयः -यी -यं, वल्करूपः -पा -पं, वल्की -ल्किनी -ल्कि (न्), वल्कली &c., शल्की &c., शल्कली &c., शकली &c., वल्कावतः -ता -तं, शल्कावृतः &c.

SCAMP, *s.* अधमाचारः, दुराचारः, दुर्वृत्तः, दुष्टजनः, जाल्मः, धूर्त्तः, खलः.

To SCAMPER, *v. n.* सत्वरं or त्वरितं धाव् (c. 1. धावति -वितुं) or द्रु or चल्.

To SCAN, *v. a.* (Scrutinize) सूक्ष्मं निरीक्ष् or परीक्ष् or वीक्ष्, सूक्ष्मं दृश् or निरूप्, सूक्ष्मं ज्ञा in des.—(Count in [illegible] of verse) छन्दोमात्रां गण् (c. 10. गणयति -यितुं), छन्दोमात्रागणनं कृ.

SCANDAL, *s.* (Reproachful aspersion or calumny) अपवादः, परिवादः, पिशुनवाक्यं, पिशुनवचनं, पिशुनकथा, पैशुन्यं, असूया, अभ्यसूया, असूयककथा, अभ्यसूयककथा, विगर्ह्यकथा, विगानं, [illegible] (Non-siping rumor) जनरवः, लोकप्रवादः, लोकरवः, लोकवादः. (Cause of reproach, disgrace) कलङ्कः, कलङ्ककारणं, अकीर्त्तिकारणं, अपमानकारणं, अपमानहेतुः *m.*, वचनीयता.—(Cause of stumbling, impediment) स्खलनहेतुः *m.*, स्खलितकारणं, बाधा, विघ्नः व्याघातः.

To SCANDALIZE, *v. a.* बीभत्सं or अरुचिं or असन्तोषं जन् or कृ, वैकृत्यं जन्, गर्हां जन्, कुत्सां जन्, व्यथ (c. 10. व्यथयति -यितुं), व्यथां जन् or कृ, क्लेशं दा, बाधां कृ, बाध्, विप्रियं कृ, व्यलीकं कृ.

SCANDALIZED, *p. p.* जातबीभत्सः -त्सा -त्सं, जातबाधः -धा -धं, व्यथितः &c.

SCANDALOUS, *a.* (Disgraceful) कलङ्ककरः -री -रं, अकीर्त्तिकरः &c., कुकीर्त्तिकरः &c., कुख्यातिजनकः &c., लज्जाकरः &c., गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, गर्हितः -ता -तं, अपयशस्करः &c., अपयशोजनकः &c., यशोनाशकः &c., यशोघ्नः -घ्नी -घ्नं, अपमानजनकः &c.—(Offensive, causing disgust, &c.) बीभत्सजनकः -का -कं, बीभत्सकरः -री -रं, घृणोत्पादकः &c., कुत्सितः -ता -तं.—(Defamatory) अपवादकः -का -कं, असूयकः &c., असूकः &c., अभ्यसूयकः &c.

SCANDALOUSLY, *adv.* गर्हणीयं, गर्ह्यं, कुत्सितं, गर्ह्यप्रकारेण, कुत्सितप्रकारेण, यथा बीभत्सो जायते तथाप्रकारेण.

SCANDALOUSNESS, *s.* गर्ह्यता, गर्हणीयता, बीभत्सजनकता, घृणाजनकता.

SCANNED, *p. p.* सूक्ष्मं निरूपितः -ता -तं or निरीक्षितः &c. or परीक्षितः &c.

SCANSION, *s.* छन्दोमात्रागणनं, श्लोकमात्रागणनं, छन्दोमात्रापरीक्षा.

SCANT, *To* SCANT, *see* SCANTY, *To* STINT, LIMIT.

SCANTILY, *adv.* अविस्तीर्णं, अविस्तारेण, अबाहुल्येन, अविपुलं, अप्रचुरं, अप्राचुर्य्येण, अपर्य्याप्तं, विकलं, अबहु, अल्पमात्रं, स्वल्पं.

SCANTINESS, *s.* अविस्तीर्णता, अविस्तृतिः *f.*, अबाहुल्यं, अविपुलता, अवैपुल्यं, अप्रचुरता, अप्राचुर्य्यं, अबहुत्वं, अल्पता, स्वल्पता, क्षुद्रता, अपृथुता, सम्बाधता, न्यूनता.

SCANTY, *a.* (Narrow) अविस्तीर्णः -र्णा -र्णं, अविस्तृतः -ता -तं, सङ्कटः -टा -टं, सम्बाध in comp., अपृथुः &c., तनुः &c.—(Small, not full) अल्पः -ल्पा -ल्पं, स्वल्पः &c., क्षुद्रः -द्रा -द्रं, अविपुलः -ला -लं, अबहुलः &c., अप्रचुरः -रा -रं, अभूयिष्ठः -ष्ठा -ष्ठं, विकलः -ला -लं, न्यूनः -ना -नं, अपर्य्याप्तः -प्ता -प्तं, लुप्तः -प्ता -प्तं.—(Niggardly) कृपणः -णा -णं.

SCAPULA, *s.* स्कन्धः, भुजशिरस् *n.*, अंशः, अंसः, बाहुमूलं, फलकः.

SCAPULAR, *a.* स्कन्धसम्बन्धी -न्धिनी -न्धि (न्), स्कन्धविषयकः -का -कं.

SCAR, *s.* (Mark of a wound) क्षतचिह्नं, व्रणचिह्नं, व्रणः -णं, शुष्कव्रणं, शुष्कक्षतं, क्षतं, किणः -णं, खारी, क्षताङ्कः, व्रणाङ्कः.—(Any mark) चिह्नं, अङ्कः.

To SCAR, *v. a.* क्षतेन or व्रणेन चिह्न् (c. 10. चिह्नयति -यितुं), क्षतचिह्नितं -तां कृ.

SCARAMOUCH, *s.* भण्डः, वैहासिकः. *See* BUFFOON.

SCARCE, *a.* (Rare) विरलः -ला -लं, विरलागतः -ता -तं, दुर्लभः -भा -भं, दुर्लभ्यः -भ्या -भ्यं, दुष्प्रापः -पा -पं, दुष्प्राप्यः -प्या -प्यं, अप्राप्यः &c., असाधारणः -णा -णी -णं, *see* RARE.—(Small in quantity, deficient) अबहुलः -ला -लं, अप्रचुरः -रा -रं, अपुष्कलः -ला -लं, अविपुलः &c., अल्पः -ल्पा -ल्पं, स्वल्पः &c.

SCARCELY, SCARCE, *adv.* कष्टेन, कृच्छ्रेण, सकृच्छ्रं, दुःखेन, सदुःखं, कष्टं, सकष्टं, आयासेन, कठिनं, काठिन्येन, सकाठिन्यं, दुर् or दुःख prefixed; 'scarcely to be found,' दुर्लभ्यः &c., दुःखप्राप्यः &c.

SCARCITY, SCARCENESS, *s.* (Rareness) विरलता -त्वं, वैरल्यं, दुर्लभता, दौर्लभ्यं, दुर्लभ्यता, दुष्प्रापत्वं, दुष्प्राप्यता, अप्रसिद्धता, असाधारणता, असाधारण्यं, क्वाचित्कता.—(Smallness of quantity, deficiency) अबाहुल्यं, अबहुत्वं, अप्राचुर्य्यं, अप्रचुरता, अपुष्कलता, अविपुलता, अल्पता -त्वं, स्वल्पता, न्यूनता.—(Time of scarcity) दुर्भिक्षं, दुष्कालः, अनाकालं, प्रयामः, नीवाकः, महार्घता.

To SCARE, *v. a.* त्रस् (c. 10. त्रासयति -यितुं), संत्रस्, वित्रस्, भी in caus. (भाययति -यितुं, भीषयति -यितुं), उद्विज् (c. 10. -वेजयति -यितुं), त्रासं कृ, भयहेतुदर्शनेन विद्रु (c. 10. -द्रावयति -यितुं), भयप्रदर्शनेन द्रु.

SCARE-CROW, *s.* काकत्रासकमूर्त्तिः *f.*, काकादित्रासकवस्तु *n.*, काकादित्रासनार्थं क्षेत्रस्थापितं भयानकवस्तु or भयङ्करवस्तु *n.*, पक्षित्रासकमूर्त्तिः *f.*, भयहेतुः *m.*, भयप्रदर्शनं.

SCARED, *p. p.* त्रासितः -ता -तं, वित्रस्तः -स्ता -स्तं, त्रस्तः &c., भीतः -ता -तं.

SCARF, *s.* चैलं, अङ्गवस्त्रं, उपवस्त्रं, उत्तरीयं, सिचयः, अधिकाङ्गं.

SCARF-SKIN, *s.* वाह्यत्वक् *f.* (च्), बहिस्त्वक् *f.*, वाह्यचर्म्म *n.* (न्), अवभासिनी.

SCARIFICATION, *s.* त्वक्छेदः -दनं, त्वग्लिखनं, त्वगुल्लिखनं, लिखनं, उल्लिखनं, प्रोल्लेखनं, रक्तमोक्षणार्थं त्वक्छेदनं or चर्म्मछेदनं.

SCARIFICATOR, SCARIFIER, *s.* त्वक्छेदकः, त्वगुल्लेखकः, त्वक्छेदनयन्त्रं.

SCARIFED, *p. p.* लिखितः -ता -तं, उल्लिखितः &c., छिन्नत्वक् *m. f. n.*, उल्लिखितत्वक्.

To SCARIFY, *v. a.* त्वचं or चर्म्म लिख् (c. 6. लिखति, लेखितुं) or उल्लिख् or प्रोल्लिख् or प्रलिख् or विलिख्, त्वचं छिद् (c. 7. छिनत्ति, छेत्तुं) or विछिद्.

SCAR-LESS, *a.* निव्रणः -णा -णं, निर्व्रणः &c., व्रणहीनः -ना -नं, अव्रणः &c.

SCARLET, *a.* सुरक्तः -क्ता -क्तं, रक्तः &c., शोणितः &c., सिन्दूरवर्णः &c.

SCARLET-FEVER, SCARLATINA, *s.* उदर्द्धः, उदर्धः.

SCATE, *s.* (Fish) शङ्कुचिः *m.* -ची *f.*, शाङ्कुचिः -ची, शङ्कुः *m.*, शङ्कोचः, सङ्कोचः.

To SCATH, *v. a.* क्षतं कृ, क्षतिं कृ, क्षण्, अर्द्, हिंस्. *See To* HURT, DAMAGE.

Scathed, *p. p.* क्षतः -ता -तं, परिक्षतः &c., विक्षतः &c. अर्दितः &c.

Scathless, *a.* अक्षतः -ता -तं, अपरिक्षतः &c., क्षतहीनः -ना -नं, अविक्षतः &c., अक्षितः &c., अहिंसितः &c., अजातक्षतः -ता -तं, अजातापकारः -रा -रं.

To scatter, *v. a.* कॄ (*c.* 6. किरति, करितुं -रीतुं), विकॄ, प्रकॄ, आकॄ, अवकॄ, इतस्ततो or बहुधा विकॄ or विक्षिप् (*c.* 6. -क्षिपति -क्षेप्तुं), बहुधा क्षिप् or व्यस् (*c.* 4. -अस्यति -सितुं), विनिधूं (*c.* 5. -धूनोति -धवितुं), विधू, विद्रु (*c.* 10. -द्रावयति -यितुं), विध्मा. *See To* disperse, dissipate.

To scatter, *v. n.* विकॄ in pass. (-क्रीयते), कॄ in pass., बहुधा गम् (*c.* 1. गच्छति, गन्तुं) or विगम्, विक्षिप् in pass. (-क्षिप्यते).

Scattered, *a.* विकीर्णः -र्णा -र्णं, आकीर्णः &c., अवकीर्णः &c., प्रकीर्णः &c., कीर्णः &c., विक्षिप्तः -प्ता -प्तं, व्यस्तः -स्ता -स्तं, सुव्यस्तः &c., उदस्तः &c., बहुधा क्षिप्तः &c., बहुधागतः -ता -तं, प्रसृतः &c., प्रसारितः &c., विधूतः -ता -तं, विनिर्धूतः &c., खण्डितः &c., असंहतः -ता -तं; 'having scattered,' विकीर्य्य; 'being scattered,' कीर्य्यमाणः -णा -णं, अवकीर्य्यमाणः &c., विकीर्य्यमाणः &c.

Scattering, *s.* किरणं, विकिरणं, अवकिरणं, कीर्णिः *f.*, विकीर्णिः *f.*, विकिरः, विक्षेपः -पणं, विसारणं, बहुधा क्षेपः, बहुधागमनं.

Scattering, *part.* विकिरन् -रन्ती -रत् (त्), विकिरणकारी -रिणी -रि (न्).

Scavenger, *s.* अवस्करकरः, मलापकर्षी *m.*, मलाकर्षी *m.* (न्), खलपूः *m.*, मार्गशोधकः, मार्गसम्मार्जकः.

Scene, *s.* (Stage) रङ्गः, रङ्गभूमिः *f.*, रङ्गशाला; 'back of the scenes,' नेपथ्यं; 'behind the scenes,' नेपथ्ये.—(Curtain or hanging of a theatre) अपटी.—(Division of an act) प्रवेशः, पात्रप्रवेशः, अङ्कपरिच्छेदः; 'introductory scene,' प्रवेशकः.—(Place represented) भूमिः *f.*, स्थलं -ली, स्थानाकारः, स्थानप्रतिरूपं, भूमिप्रतिरूपं.—(Place where any thing is represented) रङ्गः, भूमिः *f.*—(Painting representing scenery) चित्रगता गृहवृक्षादिरचना, वर्णगता दृक्पातविषयरचना.—(Assemblage of objects seen at one view) दृक्पातविषयः, दृक्पथगोचरविषयाः *m. pl.*, दृष्टिपातविषयः.

Scenery, *s.* (Appearance of various natural objects as seen together) जलतृणवृक्षादिसंस्था, पर्व्वतवृक्षादिसंस्था, जलपर्व्वतवृक्षादिरचना, दृष्टिपातविषयरचना, दृक्पातविषयसंस्था, दृक्पथगोचरजलपर्व्वतवृक्षादि.—(Of a theatre) रङ्गभूमौ or रङ्गशालायां गृहवृक्षादिरचना, चित्रगता or वर्णगता गृहवृक्षादिरचना.

Scenic, scenical, *a.* नाटकीयः -या -यं, अभिनयविषयकः -का -कं.

Scent, *s.* (Odor, smell) गन्धः, वासः; 'sweet scent,' सुगन्धः, सुवासः, आमोदः, मोदः, वासः, परिमलः, धूपः, सौरभं, सुरभिगन्धः, 'a scent spreading far,' समाकर्षी *m.* (न्), निहारी *m.*; 'made up scent,' कृत्रिमधूपः -पकः, वृकधूपः, वकधूपः.—(Power of smelling) घ्राणशक्तिः *f.*, घ्राणेन्द्रियं, घ्राणं; 'having a quick scent,' क्षीप्रघ्राणः -णा -णं, तीक्ष्णघ्राणः &c., क्षीप्रचेतनः -ना -नं.

To scent, *v. a.* (Smell) घ्रा, आघ्रा, उपघ्रा. उपाघ्रा.—(Perfume) वास् (*c.* 10. वासयति -यितुं), सुरभीकॄ, भू in caus., धूप्, सुगन्धीकॄ, *see To* perfume.

Scented, *p. p.* (Smelt) घ्रातः -ता -तं, आघ्रातः &c., घ्राणः -णा -णं. (Perfumed) वासितः -ता -तं, सुवासितः &c., अनुवासितः &c., सुरभितः -ता -तं, सुरभीकृतः &c., सुरभिः -भिः -भि, सुरभिगन्धिः -न्धिः -न्धि, सुगन्धी -न्धिनी -न्धि (न्), गन्धी &c., सुगन्धवान् -वती -वत्
(90) (त्), गन्धवान् &c., आमोदितः -ता -तं, भावितः &c., परिमलितः &c., *see* Perfumed.

Scentless, *a.* निर्गन्धः -न्धा -न्धं, अगन्धः &c., गन्धहीनः -ना -नं.

Sceptic, *s.* अविश्वासी *m.* (न्). हैतुकः, सन्दिग्धमतिः *m.*, संशयात्मा *m.* (न्), चार्वाकः, अप्रत्ययी *m.*, संशयकारी *m.*, युक्तिबलेन सर्व्वत्र संशयकारी *m.*

Sceptical, *a.* अविश्वासी -सिनी -सि (न्), अप्रत्ययी &c., संशयालुः -लुः -लु, संशयात्मा -त्मा -त्म (न्), सन्दिग्धमतिः -तिः -ति, सन्दिग्धमानसः -सा -सं, संशयानः -ना -नं, संशयापन्नः -न्ना -न्नं, संशयापन्नमानसः -सा -सं. *See* Infidel.

Scepticism, *s.* अविश्वासः, संशयः, सन्दिग्धमतित्वं, *see* Infidelity.

Sceptre, scepter, *s.* राजदण्डः -ण्डं, राजवेत्रं, राजयष्टिः *m.*, शास्तिः *f.*—(Royal authority or office) राज्ञाधिकारः, क्षत्रसिंहासनं.

Sceptred, sceptered, *a.* राजदण्डधारी -रिणी -रि (न्), दण्डी -ण्डिनी &c.

Schedule, *s.* (Paper, document) पत्रं, लेखः, लेख्यं.—(Paper annexed to a larger document) पत्रानुबन्धः, लेख्यानुबन्धः.—(List), *see* List, Inventory.

Scheme, *s.* कल्पना, उपायः, सकल्पः, परिकल्पना. परिकल्पितं, व्यवसायः, अनुसन्धानं, अनुसन्धा, युक्तिः *f.*, प्रयुक्तिः *f.*, प्रयोगः, कल्पितं, उपायकल्पना.

To scheme, *v. a.* मनसा कॢप् or परिकॢप्, उपायं कॢप्. *See To* plan.

Schemer, *s.* उपायकल्पकः, परिकल्पकः, कल्पनाकारी *m.* (न्), उपायी *m.*

Scheming, *part.* or *a.* युक्तिमान् -मती -मत् (त्), अनुसन्धानी -निनी -नि (न्), अनुसन्धायी &c., उपायी &c., उपायचिन्तकः -का -कं, विदग्धः -ग्धा -ग्धं; 'a scheming woman,' स्त्रोटिः *f.*, स्त्रोरिः *f.*, विदग्धा स्त्री.

Schirrhus, *s.* *See* Scirrhus.

Schism, *s.* शाखा, शाखाभेदः, धर्म्मभेदः, मतभेदः, मार्गभेदः, सम्प्रदायः, धर्म्मविभेदः, मतविभेदः, धर्म्मविच्छेदः.

Schismatic, schismatical, *a.* धर्म्मभेदकः -का -कं, मतभेदकः &c., मार्गभेदकः &c., शाखाभेदसम्बन्धी -न्धिनी -न्धि (न्), मार्गभेदसम्बन्धी &c., मार्गभेदविषयकः -का -कं.

Scholar, *s.* (Learner, pupil) शिष्यः, विद्यार्थी *m.* (न्), अन्तेवासी *m.*, छात्रः, अन्तेवासिजनः, अध्यायी *m.*, अध्येता *m.* (तृ), विद्याभ्यासी *m.* (न्), शिक्षिताक्षरः, अधीती *m.*, विद्याभ्यासकृत् *m.*, अक्षरमुखः, पाठार्थी *m.*; 'head scholar,' पट्टशिष्यः; 'scholar of a scholar,' प्रशिष्यः.—(Learned man) पण्डितः, पण्डितजनः, विद्वान् *m.* (स्), विद्वज्जनः, कृतविद्यः, सङ्गीरसः, रसज्ञः, तान्त्रिकः, *see* Learned.

Scholar-like, scholarly, *a.* पण्डितयोग्यः -ग्या -ग्यं, छात्रयोग्यः &c.

Scholarship, *s.* पाण्डित्यं, पण्डितत्वं, विद्या, वैदुष्यं, *see* Learning.

Scholastic, scholastical, *a.* पाठशालासम्बन्धी -न्धिनी -न्धि (न्), शालासम्बन्धी &c., पण्डितसभासम्बन्धी &c., पाण्डित्यविषयकः -का -कं.

Scholiast, *s.* भाष्यकारः, टीकाकारः, टीकालेखकः, *see* Commentator.

Scholium, *s.* टीका, भाष्यं, टीकाग्रन्थः, आदर्शः, *see* Commentary.

School, *s.*, (Place of instruction) पाठशाला, विद्यालयः -यं, विद्यावेश्म *n.* (न्), विद्यागृहं, शिक्षालयः -यं, शिक्षागृहं, विद्याभ्यासगृहं, विद्याभ्यासशाला, अध्ययनशाला, अध्ययनगृहं, मठः, आश्रमः, अवसथः, अवसथ्यः, शाला.—(Body of scholars) शिष्यसमूहः, विद्यार्थिसमूहः, छात्रसमूहः, पाठशाला, शाला.—(Sect of philosophers) शाखा, पण्डितशाखा, शिक्षासम्प्रदायः, शालासम्प्रदायः; 'difference of school,' शाखाभेदः; 'of the same school,' एकशाखः -खा -खं; 'of a good school,' शालाशुद्धः -द्धा -द्धं.—(School or system of philosophy) दर्शनः, तीर्थः. There are six schools or systems of philosophy recognised by the Hindús, viz. 1. Púrva Mí-

mánsá, पूर्वमीमांसा, founded by Jaimini, for the purpose of illustrating and explaining the karmakánda, or ritual part of the Vedas. It gives the rationale or meaning of the ritual enjoined in those sacred books, as distinct from the theological or spiritual part of them, and acknowledges the principle of एकत्वं, or oneness, which it was the object of the Vedánta system more fully to investigate. 2. Sánkhya, सांख्यः, ascribed to the Muni Kapila. This system is an attempt to account for the existence of the universe without the Deity, by asserting the principle of द्वैतं or duality, or, in other words, the co-existence of Spirit and matter. 3. Vedánta, वेदान्तः, or Uttara Mímánsá, उत्तरमीमांसा, said to have been founded by Vyása, and subsequently fully developed by its most celebrated teacher शङ्करः or शङ्कराचार्यः. This system is wholly concerned with the theological and philosophical part of the Vedas, or that part contained in the chapters called Upanishads, and its teaching is intended to oppose the duality of the Sánkhya system by shewing that the end or aim of the Vedas is एकत्वं, or the oneness of Spirit. It denies the co-existence of matter with Spirit, and hence the conclusion arrived at is the non-existence of any thing but God. 4. Nyáya, न्यायः, founded by the inspired sage Gautama, and the most popular of all the systems. It is neither so mystical as the Vedánta, nor so fanciful as the Sankhya. Its title signifies 'the fitness of things,' and it may be described as an attempt to treat of almost all subjects, according to a philosophical method and logical arrangement. 5. Vaiśeshika, वैशेषिकं, a branch of the Nyaya, founded by the sage कणादः, to supply what was incomplete in the aphorisms of Gautama. 6. Yoga, योगः or Pátanjala, पातञ्जलं, founded by the sage पतञ्जलिः *m.* Its object is to shew that, even in the body, there may be, to a great extent, union with the Supreme Being. These philosophical systems are contained in sacred writings called Shástras. *See* the word.

To SCHOOL, *v. a.* शिक्ष्, अनुशिक्ष्, उपदिश्, शास्. *See To* TEACH, INSTRUCT.

SCHOOL-BOY, *s.* बालशिष्यः, बालछात्रः, बालाध्यायी *m.* (न्), विद्याभ्यासार्थं पाठशालाम् अभिगच्छति यः कुमारः or बालः or बालकः.

SCHOOL-FELLOW, *s.* सहाध्यायी *m.* (न्), सहपाठकः, समाध्यायी *m.*, एकपाठशालाभिगामी *m.*, एकगुरुः *m.*, एकोपाध्यायः.

SCHOOL-HOUSE, *s.* पाठशाला, पाठगृहं, शिक्षागृहं, शिक्षाशाला, शाला.

SCHOOLING, *s.* शिक्षा -क्षणं, अध्यापनं, उपदेशः, पाठः, विद्यादानं.—(Compensation for instruction) शिक्षावेतनं, शिक्षामूल्यं.

SCHOOLMAN, *s.* तार्किकः, नैयायिकः, न्यायविद् *m.*, तर्कशास्त्रज्ञः.

SCHOOLMASTER, *s.* बालाध्यापकः, बालोपदेशी *m.* (न्), बालोपदेशकः, बालशिक्षकः, अर्भकाध्यापकः, उपाध्यायः, शिक्षागुरुः *m.*, शिक्षादाता *m.* (तृ), विद्यादाता *m.*, पाठशालानायकः, पाठशालाध्यक्षः, आचार्यः, गुरुः *m.*, उपाध्यायः, अध्यापकः.

SCHOOLMISTRESS, *s.* बालाध्यापिका, बालोपदेशिनी, उपाध्याया, आचार्यी, शिक्षादात्री, विद्यादात्री, पाठशालाध्यक्षा, पाठशालानायिका.

SCHOOL-ROOM, *s.* पाठशाला, शिक्षाशाला. *See* SCHOOL-HOUSE.

SCHOONER, *s.* कूपकद्वयविशिष्टा नौका, द्विकूपकनौः *f.*, द्विकूपकः.

SCIATICA, *s.* कटिशिरावेदना, कटिस्नायुवेदना, श्रोणिशिरावेदना.

SCIATICAL, *a.* कटिसन्धी -न्धिनी -न्धि (न्), श्रोणिसन्धी &c.

SCIENCE, *s.* विद्या, विज्ञानं, ज्ञानं, शास्त्रं, व्युत्पत्तिः *f.*, *see* KNOWLEDGE; 'study of science,' विद्याभ्यासः; 'a science,' विद्या; 'book of science,' शास्त्रं, *see* SHÁSTRA; 'sacred science,' श्रुतं, ज्ञानं; 'profane,' विज्ञानं, उपविद्या; 'skilled in sacred science,' शास्त्रविद्, अन्तर्वाणिः -णिः -णि.

SCIENTIFIC, SCIENTIFICAL, *a.* (According to the principles of science) विद्यासूत्रानुसारी -रिणी -रि (न्), विद्यातत्त्वानुसारी &c., विद्याक्रमानुसारी &c., विद्यासूत्रानुयायी &c., शास्त्रानुसारी &c.—(Well versed in science) विद्यावान् -वती -वत् (त्), ज्ञानी &c., विद्वान् -दुषी -द्वत् (त्), ज्ञानवान् &c., कृतविद्यः -द्या -द्यं, कोविदः -दा -दं, ज्ञातसिद्धान्तः, तान्त्विकः.

SCIENTIFICALLY, *adv.* विद्यासूत्रानुसारेण, विद्यातत्त्वानुसारात्, विद्याक्रमेण.

SCIMITAR, *s.* खड्गः, वक्रखड्गः, न्युब्जखड्गः, असिः *m.*, निस्त्रिंशः, वक्रनिस्त्रिंशः, वक्रकृपाणः, चन्द्रहासः, मण्डलाग्रः, असिरिष्टिः *m.*, धाराविषः, विधुपह्वः, करपालः, करवालः, कौक्षेयकः.

To SCINTILLATE, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), अग्निकणान् or अग्निस्फुलिङ्गान् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), ज्वलनकणान् मुच् or निःसृ in caus.

SCINTILLATION, *s.* स्फुरणं, अग्निकणस्फुरणं, स्फुलिङ्गस्फुरणं, स्फुलिङ्गचलनं, अग्निकणचलनं, स्फुलिङ्गोत्क्षेपः, कणोत्क्षेपः.

SCIOLISM, *s.* खण्डपाण्डित्यं, खण्डज्ञानं, खण्डितज्ञानं, पाण्डित्याभासः, अर्द्धपाण्डित्यं, किञ्चिज्ज्ञानं, अल्पज्ञानं, चुम्बकता -त्वं

SCIOLIST, *s.* खण्डपण्डितः, खण्डज्ञानी *m.* (न्), अल्पविद्यः, अल्पज्ञः, किञ्चिज्ञः, अल्पविद्यावान् *m.* (त्), चुम्बकः.

SCION, *s.* अङ्कुरः, पल्लवः, नवपल्लवः, किसलयः, प्ररोहः, प्रवालः.

SCIRRHOUS, *a.* ग्रन्थिमान् -मती -मत् (त्), ग्रन्थिलः -ला -लं, घनीभूतः &c.

SCIRRHUS, SCIRRHOSITY, *s.* मांसग्रन्थिः *m.*, मांसकाठिन्यं, मांसघनता.

SCISSIBLE, SCISSILE *a.* छेदनीयः -या -यं, छेद्यः -द्या -द्यं, कर्त्तनीयः -या -यं.

SCISSORS, *s. pl.* कर्त्तरी, कर्त्तनी, कृपाणी, कर्त्री, छेदनी, खड्गधारा, शरारीमुखी.

To SCOFF, *v. n.* अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), क्षिप्, अवज्ञा, तिरस्कृ, मुखरीकृ, अवहस्, उपहस्, अपहस्, विहस्, प्रहस्, अवहासमूर्धि कृ, उपहासास्पदं कृ, अपहासास्पदं कृ, गर्ह्, अवगर्ह्, अवगुर्, अवधीर्, आधीर्, भर्त्स्, परिभू, निन्द्, तुच्छीकृ, अवज्ञां कृ. *See To* JEER, MOCK.

SCOFF, *s.* अवक्षेपः, क्षेपः, अवहासः, उपहासः, उपहासोक्तिः *f.*, अवज्ञा, अवज्ञायाक्यं, अवमानोक्तिः *f.*, अवमानं, अवहेला, तिरस्कारोक्तिः *f.*, निन्दोक्तिः *f.*

SCOFFER, *s.* उपहासकः, अवहासकः, अवक्षेपकः, क्षेपकः. *See* MOCKER.

SCOFFING, *s.* अवहासः, उपहासः, तिरस्कारः, तिरस्क्रिया, अवक्षेपणं.

SCOFFINGLY, *adv.* सावक्षेपं, सावहासं, सतिरस्कारं, उपहासेन, सावहेलं.

To SCOLD, *v. a.* or *n.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, विनिन्द्, उपालभ् (c. 1. -लभते -लब्धुं), भर्त्स् (c. 10. भर्त्सयति -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), तर्ज् (c. 10. तर्जयति -यितुं), आक्रुश्, गर्ह्, धिगर्ह्, धिगद् in des., क्षिप्, अवक्षिप्, अधिक्षिप्, वाग्दण्डं कृ, तिरस्कृ, परिवद्, परिभाष्. *See To* CHIDE, REPROVE.

SCOLD, *s.* (Foul-mouthed scolding woman) दुर्मुखी, वाग्दुष्टा, कर्कशा,

पूतना, कैकेयी, दुर्गा, कृत्या, महामाया, सदावक्रा, वक्रशीला, अधीरा.

SCOLDED, *p. p.* निन्दितः -ता -तं, उपालब्धः -ब्धा -ब्धं, प्रत्यादिष्टः -ष्टा -ष्टं, तर्जितः -ता -तं, सन्तर्जितः &c., तिरस्कृतः &c., अधिक्षिप्तः -प्ता -प्तं.

SCOLDER, *s.* निन्दकः, उपालम्भकारी *m.* (न्), प्रत्यादेशकः, उपक्रोष्टा *m.* (ष्टृ).

SCOLDING, *s.* निन्दा -न्दनं, उपालम्भः, तर्जनं, भर्त्सनं, निर्भर्त्सनं, वाग्दण्डः, वाक्पारुष्यं, परिवादः, परिभाषणं, धिक्कारः, धिक्क्रिया, तिरस्कारः, तिरस्क्रिया.

SCOLLOP, *To* SCOLLOP, *see* SCALLOP, *To* SCALLOP.

SCONCE, *s.* (Holder of the end of a candle) दीपाग्राधारः, वर्त्त्यग्राधारः, दीपाग्रधारणयोग्या लोहनलिका.—(Mulct) दण्डः, दण्डलेशः.

To SCONCE, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं). *See To* MULCT, FINE.

SCOOP, *s.* (Kind of ladle) दर्वी, दर्विकः, दार्वी, कस्रिः *f.*, कस्री, खजिका; 'butter-scoop,' कुन्तलिका.—(Instrument for excavating) खनित्रं, उत्खनित्रं, खात्रं.

To SCOOP, *v. a.* (Lade out), *see To* LADLE.—(Make hollow, excavate) खन् (c. 1. खनति -नितुं), उत्खन्, निखन्, प्रोत्खन्, खनित्रेण शून्यीकृ or शुषिरीकृ or पुट् or पुटीकृ.

SCOOPED, *p. p.* उत्खातः -ता -तं, उत्खनितः -ता -तं, शुषिरीकृतः &c.

SCOPE, *s.* (End, aim) अभिप्रायः, अभिप्रेतं, तात्पर्य्यं, आशयः, अर्थः, उद्देशः, आकूतं, अभिसन्धिः *m.*, अभिसन्धानं, तात्पर्य्यार्थः, आकांक्षा, विवक्षितं, *see* MEANING.—(Limit, compass) अन्तः, पर्य्यन्तः -न्तं, परिमाणं, विषयः.—(Room, space) अवकाशः, प्रसरः, अवसरः.

SCORBUTIC, SCORBUTICAL, *a.* नाविकरक्तपित्तसम्बन्धी -न्धिनी -न्धि (न्), नाविकरक्तपित्तरोगी -गिणी &c.; 'scorbutic affection of the gums,' शीतादः; 'diseased with it,' शीतादरोगी &c.

To SCORCH, *v. a.* वाह्यतस् or वहिस् or वहिर्भागे दह् (c. 1. दहति, दग्धुं) or निदह् or परिदह् or तप् (c. 1. तपति, तप्तुं, c. 10. तापयति -यितुं).

To SCORCH, *v. n.* वाह्यतस् or वहिर्भागे दह् in pass. or तप् in pass.

SCORCHED, *p. p.* वाह्यतस् or वहिर्भागे दग्धः -ग्धा -ग्धं or परिदग्धः &c. or तप्तः -प्ता -प्तं or सन्तप्तः &c. or अभितप्तः &c. or उत्तप्तः &c., भर्जितः -ता -तं, भृष्टः -ष्टा -ष्टं.

SCORCHING, *part.* or *a.* दाहकः -का -कं, तापकः &c., उष्णः -ष्णा -ष्णं, अत्युष्णः &c., प्रचण्डः -ण्डा -ण्डं, चण्डः &c., नैदाघः -घी -घं.

SCORCHING, *s.* वहिर्दाहः, वहिर्दहनं, वहिर्भागे दाहः, वाह्यतस्तापः.

SCORE, *s.* (Twenty) विंशकं, विंशी *m.* (न्), विंशतिः *f.*—(Notch) छेदः, अवच्छेदः, विच्छेदः.—(Line) रेखा, अङ्कः, वर्त्तिः *f.*—(Account, reckoning) गणना, विगणना, विगणनपत्रं, विगणनलेखः, विगणनापत्रं.—(Reason) हेतुः *m.*, कारणं, निमित्तं; 'on the score of,' हेतोः, हेतौ, कारणात्, कृते, निमित्ते or expressed by the abl. c., or by the affix तस्; 'on the score of relationship,' ज्ञातित्वहेतोः, ज्ञातित्वात्, ज्ञातिभावतस्.

To SCORE, *v. a.* (Notch) छिद्, अवछिद्, छेदं कृ.—(Mark with lines) रेखाङ्कितं -तां कृ, रेखाभिर् अङ्क् (c. 10. अङ्कयति -यितुं) or चिह्न्, अङ्कं कृ, अङ्कनं कृ.—(Set down a debt) ऋणं लिख् or अभिलिख्, ऋणाभिलेखनं कृ, ऋणं लेख्ये आरुह् in caus.—(Set down, take an account of) लिख् (c. 6. लिखति, लेखितुं), अभिलिख्, अङ्क्.

SCORED, *p. p.* अङ्कितः -ता -तं, रेखाङ्कितः &c., लिखितः &c., अभिलिखितः &c.

SCORIA, *s.* रीतिः *f.*, रीतिका, किट्टं, किट्टालः, लोहकिट्टं. *See* DROSS.

SCORN, *s.* अवज्ञा, अवज्ञानं, अवमानं, अवमतिः *f.*, अपमानं, अवहेला -लं -लनं, परिभवः, परिभावः, परिभूतिः *f.*, तिरस्कारः, तिरस्क्रिया, अवलेपः, घृणा, उन्माथः, *see* CONTEMPT; 'object of scorn,' तिरस्कारविषयः, तिरस्कारास्पदं, तिरस्कारपात्रं, परिभवास्पदं, परिभवपदं.

To SCORN, *v. a.* अवज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), तृणाय मन्, अवधीर्, तिरस्कृ, परिभू, गर्ह्, विगर्ह्, तुच्छीकृ, न्यक्कृ, कुत्स्, उपेक्ष्, कदर्थीकृ, बाध् in des., अवध्यै, निन्द्, धिक्कृ. *See To* CONTEMN, DESPISE.

SCORNED, *p.p.* अवज्ञातः -ता -तं, अवमतः &c., अवमानितः &c., अवधीरितः &c., विमानितः &c., तिरस्कृतः -ता -तं, गर्हितः -ता -तं, विगर्हितः &c., परिभूतः &c., अतिनिन्दितः &c., निन्दितः &c.

SCORNER, *s.* अवज्ञाता *m.* (तृ), निन्दकः, अवमन्ता *m.* (न्तृ), अवमानकृत्, अवहेलकृत्, अवज्ञाकारी *m.* (न्), तिरस्कारी *m.*, तिरस्कर्त्ता *m.*, (र्त्तृ), घृणाकरः.

SCORNFUL, *a.* अवज्ञाकारी -रिणी -रि (न्), अवज्ञानी &c., अवमानी &c., सावहेलः -ला -लं, सावज्ञः -ज्ञा -ज्ञं, परिभवी &c., परिभावी &c., परिभावुकः -का -कं, अवमन्ता -न्त्री -न्तृ (न्तृ), सावलेपः -पा -पं, सोन्माथः -था -थं, अवलिप्तः -प्ता -प्तं, दूप्तः -प्ता -प्तं, तिरस्कारी &c., अवहेलात्मकः -का -कं, निन्दात्मकः &c., अवज्ञारूपः -पा -पं, अवमानार्थकः &c.

SCORNFULLY, *adv.* सावज्ञानं, सावहेलं, सावमानं, सपरिभावं, परिभवेण, सावलेपं, सोन्माथं, सतिरस्कारं, दूप्तवत्, निन्दापूर्व्वं, निन्दकवत्.

SCORNFULNESS, *s.* अवज्ञाशीलता, सावहेलत्वं, अवलिप्तता, सोन्माथत्वं.

SCORPIO, *s.* (The sign) वृश्चिकः, कौर्प्यः, अलिः *m.*

SCORPION, *s.* वृश्चिकः, अलिः *m.*, अली *m.* (न्), आलिः *m.*, आरी *m.* (न्), द्रुणः, द्रोणः, द्रूणः, अलिपकः, अवशीनः, लूमविषः, वस्कराटिका; 'its tail or sting,' लूमं -मः.

SCOT, *s.* (Portion of money assessed) करः, देयभागः, देयांशः, देयं.

To SCOTCH, *v. a.* छेदं कृ, छेदैर् अङ्क्, त्वक्छेदं कृ, ईषद् व्रश्च् or छिद्.

SCOT-FREE, *a.* अदण्डितः -ता -तं, अक्षतः -ता -तं, निर्व्रणः -णा -णं.

SCOUNDREL, *s.* धूर्त्तः, दुर्जनः, दुरात्मा *m.* (न्), दुर्वृत्तः, खलः, कृष्णकर्म्मा *m* (न्), अधमवृत्तिः *m.*, दुष्टजनः, जघन्यवृत्तिः *m.*, खण्डितवृत्तः. *See* RASCAL.

To SCOUR, *v. a.* (Scrub, cleanse by friction) मृज् (c. 1. मार्ज्जति -र्ज्जितुं, c. 2. मार्ष्टि -र्ष्टुं), सम्मृज्, प्रक्षल् (c. 10. -क्षालयति -यितुं), निर्णिज् (c. 3. -णेनेक्ति -णेक्तुं), धाव् (c. 10. धावयति -यितुं), घर्षणेन शुध् (c. 10. शोधयति -यितुं), निर्घर्षणेन शुध् or परिष्कृ.—(Purge), *see* the word.—(Pass swiftly over) शीघ्रं or सत्वरं तॄ or अतितॄ or अतिक्रम्.—(Run swiftly) शीघ्रं धाव्.

SCOURED, *p. p.* मार्जितः -ता -तं, सम्मार्जितः &c., मृष्टः -ष्टा -ष्टं, सम्मृष्टः &c., प्रक्षालितः -ता -तं, निर्णिक्तः -क्ता -क्तं, घर्षणेन धावितः -ता -तं or धौतः -ता -तं or शोधितः &c., निर्धौतः &c., परिष्कृतः &c.

SCOURER, *s.* वस्त्रनिर्णेजकः, वस्त्रसम्मार्जकः, वस्त्रप्रक्षालकः, वस्त्रधावकः, वस्त्रशोधकः, चैलमार्जकः, चैलधावः -वकः, निर्णेजकः, नेजकः.

SCOURGE, *s.* कशा, कषा, प्रतिष्कशः, प्रतिष्कषः, बलिसङ्गः, चर्म्मदण्डः, रज्जुः *m. f.*, चर्म्मरज्जुः *m. f.*, ताडनी, प्रतोदः.

To SCOURGE, *v. a.* कशया तड् (c. 10. ताडयति -यितुं), रज्जुना or रज्ज्वा or चर्म्मरज्ज्वा तड् or प्रतॄ (c. 1. -हरति -हर्त्तुं) or आहन् (c. 2. -हन्ति -न्तुं), कशाघातं कृ, कशाताडनं कृ.

SCOURGED, *p. p.* कशाहतः -ता -तं, कशाताडितः &c. रज्जुताडितः -ता -तं

SCOURGING, *s.* कशाघातः, कशाताडनं, रज्ज्वाघातः, कशाप्रहारः; 'worthy of scourging,' कशार्हः -र्हा -र्हं, कश्यः -श्या -श्यं.

SCOURING, *s.* मार्जनं, सम्मार्जनं, मार्ष्टिः *f.*, परिमार्जनं, प्रक्षालनं, निर्णेकः, निर्णेजनं, धावनं, परिष्कारः, वस्त्रमार्जनं, मलापकर्षणं.

SCOUT, *s*, चारः, चरः, गुप्तचरः, गुप्तदूतः, गूढचारः -री *m.* (न्), गुप्तगतिः *m.*

गूढदूतः, गूढनिरूपकः, शत्रुचेष्टानिरूपकः, प्रणिधिः *m.* *See* Spy.

To scout, *v. n.* (Act as scout) गूढचारवत् शत्रुचेष्टानिरूपणं कृ.

To scout, *v. a.* गर्ह् (c. 1. गर्हते -र्हितुं), सभीभत्सं निराकृ or निरस्.

Scowl, *s.* भ्रूभङ्गः, भृकुटिः *f.*, भ्रूक्षेपः, भ्रमङ्गोचः, कटाक्षः, अप्रसन्नदृष्टिः *f.* अप्रसादसूचका कुदृष्टिः *f.*, मुखमालिन्यं.

To scowl, *v. n.* भ्रूभङ्गं कृ, भृकुटिं कृ, कटाक्षेण or भ्रूभङ्गेन दृश् (c. 1. पश्यति, द्रष्टुं), भ्रुवौ संकुच् (c. 1. -कोचति -चितुं), भ्रूसंकोचं कृ.

Scowling, *part.* सभ्रूभङ्गमुखः -खी -खं, मलिनमुखः &c. *See* Frowning.

Scowlingly, *adv.* सभ्रूभङ्गं, सकटाक्षं, भ्रूभङ्गेन, सभ्रूक्षेपं, भ्रूसङ्कोचपूर्व्वं.

Scragginess, *s.* कृशता, परिकृशता, कृशाङ्गता, श्यामता, खरिता, काश्यं.

Scraggy, scragged, *a.* (Lean) कृशः -शा -शं, परिकृशः &c., कृशाङ्गः -ङ्गी -ङ्गं, श्यामः -मा -मं, शिरालः -ला -लं.—(Rough) रूक्षः -क्षा -क्षं, रूक्षः &c., *see* Rugged.

To scramble, *v. n.* (Climb by seizing with the hands) हस्ताभ्यां धृत्वा or हस्ताभ्याम् अवलम्ब्य आरुह् or अभिरुह्.—(Catch with haste, preventive of another) परनिवारणपूर्व्वं or परनिरसनपूर्व्वं सहसा धृ (c. 1. धरति, धर्त्तुं) or हृ (c. 1. हरति, हर्त्तुं) or झटिति ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

Scramble, scrambling, *s.* (Seizing with haste, &c. इष्टद्रव्यग्रहणार्थं परनिवारणपूर्व्वं सहसा हरणं or हरणेच्छा.—(Climbing with the hands) हस्ताभ्याम अवलम्ब्य आरोहणं.

Scrap, *s.* खण्डः -डकः, लवः, अंशः, भागः, विभागः, शकलः -लं; 'of food,' पिण्डः, पिण्डोलिः *f.*, फेलकः, फेला, लवः. *See* Crum.

Scrap-book, *s.* खण्डकाव्यादिरचणपुस्तकं, खण्डकवितादिरचणग्रन्थः, खण्डकविताग्रन्थः, श्लोकमुद्रादिरचणार्थं पुस्तकं.

To scrape, *v. a.* (Rub the surface with something sharp) लिख् (c. 6. लिखति, लेखितुं), उल्लिख्, विलिख्, प्रलिख्, निर्लिख्, प्रोल्लिख्, तक्ष् (c. 1. तक्षति -क्षितुं), त्वच्, खन् (c. 1. खनति -नितुं), खुर् (c. 6. खुरति, खोरितुं), क्षुर् (c. 6. क्षुरति, क्षोरितुं), उल्लेखनं कृ, तक्षणं कृ.—(Rub with a grating noise) घृष् (c. 1. घर्षति -र्षितुं), घर्षणं कृ, *see To* rub.—(Clean by scraping) घर्षणेन मृज् or प्रक्षल् or निर्मिज्.—(Remove by scraping, scrape off) घर्षणेन अपनी or विनी or मृज् or अपमृज् or अवमृज् or परिमृज् or शुध in caus., निर्घर्षणं कृ.—(Scrape together) संचि (c. 5. -चिनोति -चेतुं), समाचि, एकीकृ, एकत्र कृ.—(Scrape the feet) पादघर्षणं कृ.

three divisions of time, past, present, and future. He holds a trident in his hand to denote, as some say, his relationship to water, or according to others, to show that the three great attributes of Creator, Destroyer, and Regenerator are combined in him. His loins are enveloped in a tiger's skin. In his character of Time, he not only presides over its extinction, but also its astronomical regulation. A crescent or half-moon on his forehead indicates the measure of time by the phases of the moon; a serpent forms one of his necklaces to denote the measure of time by years, and a second necklace of human skulls marks the lapse and revolution of ages, and the extinction and succession of the generations of mankind. He is often represented as entirely covered with serpents, which are the emblems of immortality. They are bound in his hair, round his neck, wrists, waist, arms, and legs; they serve as rings for his fingers, and earrings for his ears, and are his constant companions. Śiva has more than a thousand names, which are detailed at length in the sixty-ninth chapter of the Śiva Purána. The following list of the principal of these will give the best idea of his character and attributes. (The Auspicious one) शिवः, शम्भुः *m.*, शङ्करः, सदाशिवः, श्रीमान् *m.* (त्), भद्रः, भगः.—(The great god or lord) महादेवः, ईश्वरः, महेश्वरः, महेशः, ईशः, ईशानः, नाथः, देवः.—(Lord of the universe, as worshipped at Benares) विश्वेश्वरः, विश्वेशः, विश्वनाथः, सर्वेश्वरः.—(Lord of the earth) धरणीश्वरः.—(The seizer) हरः, हरकः, हरिः *m.*—(The Destroyer, a personification of Time that destroys all things) कालः, महाकालः, जगद्धाती *m.* (तृ), जगद्भक्षकः, कालेश्वरः.—(The Reproducer, the Conqueror of Death and cause of life and being) भवः, मृत्युञ्जयः, मृत्युवञ्चनः, जगद्योनिः *m.*, भूतात्मा *m.* (न्), जः, भरुः *m.*—(Disperser of the tears of mortals) रुद्रः.—(The terrific or tremendous one) भैरवः, घोरः, भीषणः, भीष्मः, भीमः.—(The fierce one) उग्रः, चण्डः.—(Blue-throat, having a dark blue and beautiful throat, so stained by the acrimony of the poison, which he swallowed on its production at the churning of the ocean; *see* OCEAN) नीलकण्ठः, श्यामकण्ठः, नीलग्रीवः, शितिकण्ठः, कालकण्ठः, श्रीकण्ठः, नीललोहितः.—(Tri-ocular, having three eyes) त्रिलोचनः, त्रिनेत्रः, त्रिदृक् *m.* (श्), त्रिनयनः, त्र्यक्षः.—(Having deformed or unnatural eyes) विरूपाक्षः.—(Moon-crested, having a crescent on his brow) चन्द्रमौलिः *m.*, चन्द्रशेखरः, शशिशेखरः, इन्दुभृत्, चन्द्रापीडः, शशीशः, चन्द्रचूडः, भोमः.—(Borne on, or accompanied by the Bull which personifies Justice) वृषवाहनः, वृषभवाहनः, वृषध्वजः, वृषभध्वजः, धर्मवाहनः, वृषपतिः *m.*, वृषभगतिः *m.*, वृषण्वी *m.* (न्), वृषाङ्कः, वृषाङ्कनः, वृषाणाङ्कः.—(Having matted or braided hair) धूर्जटिः *m.*, जटाधरः, जटाधारी *m.* (न्), जटिलः, जटाटङ्कः, जटाटीरः, कपर्दी *m.* (न्), कपर्दः.—(Having sky-coloured hair) व्योमकेशी *m.* (न्), व्योमकेशः.—(Trident-bearer) शूली *m.* (न्), त्रिशूली *m.*, शूलधरः, पिनाकी *m.*—(Lord of animals or cattle) पशुपतिः *m.*, गोपतिः, गोरक्षः, गोपालकः.—(Lord of spirits) भूतेशः, भूतनाथः, भूतः.—(Bearer of the Ganges, this river having on its descent from heaven alighted on his head, and thence descended upon earth, through a chasm in the Himálaya mountains called Gomukha) गङ्गाधरः.—(Clothed with a tiger's skin) कृत्तिवासाः *m.* (स्), कृत्तिवासः.—(Bound or covered with snakes) अहिब्रध्नः.—(Having a necklace of human skulls) कपालभृत्, कपाली *m.* (न्), अस्थिमाली *m.*, पुरुषास्थिमाली *m.*, अस्थिधन्वा *m.* (न्), भगाली *m.*—(The white one or yellowish white) शुचिः, गौरः, हरिणः.—(Conqueror and Destroyer of the district and king of Tripura) त्रिपुरजित्, त्रिपुरमूदनः, त्रिपुरदहनः, त्रिपुरान्तकः.—(Presiding over the three Vedas, or the three letters of the mystical syllable *om*) त्र्यम्बकः.—(He of whom one form is water) जलमूर्त्तिः *m.*—(The Steadfast) स्थाणुः *m.*—(The Universal) सर्वः.—(The Omnipresent) सर्वगः.—(The Omniscient) सर्वज्ञः.—(The Imperishable) अक्षरः.—(The Five-faced) पञ्चमुखः, पञ्चाननः, पञ्चवक्त्रः, सप्तलोमुखः.—(Scorcher of Cupid, *see* KÁMADEVA) स्मरहरः, कामध्वंसी *m.* (न्), अनङ्गमुद्, भगः.—(Restorer of his body) पराङ्गदः.—(Lord of Kailása, in the Himálayas, the favourite haunt of both Śiva and Kuvera) गिरीशः, गिरिशः, कैलासीकाः *m.* (स), कैलासनिकेतनः.—(Lord of Benares) काशीनाथः, काशीशः; hence one of the names of Benares is रुद्रावासः, शिवपुरी.—(Having three residences) त्रिधामा *m.*—(Destroyer of Daksha's sacrifice. That sage having on one occasion made a sacrifice, to which he invited all the gods, excepting his son-in-law Śiva and his daughter Durgá, the latter went unbid, and being received coldly, threw herself into the fire, whence emanated a form of Śiva, who decapitated the sage) दक्षाध्वरध्वंसकृत्, दक्षयज्ञविनाशी *m.* (न्), क्रतुध्वंसी *m.*—(He of whom the seed was cast into Fire) बह्निरेताः *m.* (स्), कृशानुरेताः *m.*—(Teacher of the grihya, or book of domestic rites) गृह्यगुरुः.—(Possessor of the head of Brahmá, having in a dispute cut off one of the heads of that deity) ब्रह्ममूर्द्धभृत्.—(Enemy of the demon Pura) पुरारिः *m.*, पुरासुद्.—(Enemy of the demon Andhaka) अन्धकरिपुः *m.*—(He who cuts to pieces with his axe) खण्डपरशुः *m.*, खण्डपर्शुः *m.*—(Armed with the Khatwánga or Pánsúla) खट्वाङ्गी *m.*, खट्वाङ्गभृत् *m.*, पांशुली *m.*—(Armed with a rope) पाशी *m.*—(Lord of devotion or devotees) योगेशः.—(Lord of gold) हेमकेशः.—(Fond of dancing) नाट्यप्रियः.—(The naked one) दिगम्बरः, दिग्वासाः *m.* (स्), नग्नः.—(Covered with sandal powder) पांशुचन्दनः, पांशुलः.—(Mounted on a deg in his terrific form) श्वाश्वः.—(The perverse) वामः, वामदेवः.—(Husband of Párvatí) पार्वतीनाथः.—(Of Durgá) दुर्गापतिः, दक्षजापतिः.—(Of Gaurí) गौरीपतिः.—(Of Umá) उमापतिः.—(Of Bhaváni) भवानीपतिः.—(Lord of the Pramathas, his attendants) प्रमथाधिपः.—(Lord of Nandi, one of his chief attendants) नन्दीशः, नन्दीश्वरः, नन्दिवर्धनः.—(Lord of Bhringi, one of his chamberlains) भृङ्गीशः.—(Loved of Vishnu) हरिप्रियः.—(Having Vishnu as his dart,

that deity having served him for a shaft which set the city of Tripura on fire) हरिशरः. Some of his other names, the derivation of which is not very apparent, are the following: नकुलः, अध्यूढः, शिपिविष्टः, शिविविष्टः, त्रीरक्षः, नाथः, मृडः, कुष्कारः, वारः, ड: *m.*—(Under the emblem of the Phallus) लिङ्गं; 'a worshipper of him under that type,' लिङ्गी *m.*—(A form of Śiva, half male and half female) अर्द्धनारीशः, अर्द्धनारीनटेश्वरः.—(Inferior manifestations of him, called Bhairavas) असिताङ्गः, रुरुः *m.*, चण्डः, क्रोधः, उन्मत्तः, कपर्दिः, भीषणः, संहरः, नकुलः.—(His wife) पार्वती, दुर्गा, गौरी, उमा, सती, भवानी, *see* Párvatí; as the symbol of created nature his wife is called प्रकृतिः.—(His sons) कार्त्तिकेयः, गणेशः, *see* Kártikeya, Ganesha.—(His attendants) प्रमथः, शिवकीर्त्तनः.—(Some of the names of his attendants are) नन्दी *m.*, नन्दिः *m.*, भृङ्गी *m.*, नाडीदेहः, नाडीविग्रहः, नाडीस्नेहः, भृङ्गरिटः, तण्डुः, पशुः.—(His vehicle or bull) वृषः, नन्दी *m.*—(Temple consecrated to his bull) गोपुटिका.—(His trident) त्रिशूलं, पिनाकः, महितं, पाशुपतास्त्रं.—(His bow) पिनाकः, अजगवं.—(One of his weapons, a staff with transverse pieces, representing the breast-bone and ribs, surmounted by a skull) खट्वाङ्गं, पांशुलः.—(His rope for binding incorrigible offenders) पाशः.—(His musical instrument, a kind of rattle, shaped like an hour-glass, and held in one hand) डमरुः *m.*—(His serpent earrings) नागकुण्डलं.—(His necklace of skulls) अस्थिमाला, मुण्डमाला.—(His matted hair) जटा, जटाजूटः, कपर्दः.—(His superhuman power) विभूतिः *f.*, भूतिः *f.*, *see* Superhuman, *a.*—(Daitya flayed by him) रुरुः.—(Worshipper of Śiva) शैवः, शैव्यः, शिवव्रतः, पाञ्चार्थिकः. Many plants are sacred to Śiva, as the aśoka, vilva, mango, &c.

Six, *a.* षट् *m. f. n. pl.* (षष्), षट्संख्यकः -का -कं, षट्कः -ट्का -ट्कं; 'six months,' षण्मासाः *m. pl.*, षण्मासं; 'the six seasons,' षड्ऋतवः *m. pl.*; 'of six months standing,' षाण्मासिकः -की -कं, षण्मास्यः -स्या -स्यं; 'six-fingered,' षडङ्गुलिः -लिः -लि; 'six-angled,' षट्कोणः -णा -णं; 'six-limbed,' षडङ्गः -ङ्गा -ङ्गं; 'six-armed,' षड्भुजः -जा -जं; 'six-faced,' षण्मुखः -खा -खं; 'a yoke of six oxen,' षड्गवं; 'having six feet,' षट्पदः -दा -दं; 'in six ways,' षड्धा; 'the aggregate of six,' षट्कं.

Six-fold, *a.* षड्गुणः -णा -णं, षड्विधः -धा -धं, षट्कः -ट्का -ट्कं.

Sixteen, *a.* षोडश *m. f. n. pl.* (न्) षोडशकः -का -कं.

Sixteenth, *a.* षोडशः -शी -शं; 'a sixteenth part,' षोडशांशः.

Sixth, *a.* षष्ठः -ष्ठी -ष्ठं, षष्ठकः -का -कं; 'a sixth part,' षड्भागः, षडंशः; 'a sixth meal,' षष्ठान्नं; 'being or having a sixth,' षष्ठी -ष्ठिनी -ष्ठि (न्).

Sixthly, *adv.* षष्ठतः, षष्ठस्थाने, षष्ठपदे.

Sixtieth, *a.* षष्टितमः -मी -मं, षष्टः -ष्टी -ष्टं.

Sixty, *a.* षष्टिः *f.*, षष्टिसंख्यकः -का -कं; 'he reigned sixty years,' षष्टिम् अब्दान् राज्यं चकार; 'sixty-one,' एकषष्टिः; 'sixty-two,' द्वाषष्टिः; 'sixty-three,' त्रयःषष्टिः; 'sixty-four,' चतुःषष्टिः; 'sixty-five,' पञ्चषष्टिः; 'sixty-six,' षट्षष्टिः; 'sixty-seven,' सप्तषष्टिः; 'sixty-eight,' अष्टषष्टिः; 'sixty-nine,' नवषष्टिः, एकोनसप्ततिः, ऊनसप्ततिः; 'aggregate of sixty,' षष्टिकं; 'bought with sixty,' षष्टिकः -का -कं.

Size, *s.* (Bulk) परिमाणं, मानं, परिमितिः *f.*, प्रमाणं, मात्रं, आकारः, आकारमानं, आकृतिः *f.*, आकृतिमानं, महत्त्वमानं, महत्त्वपरिमाणं, आकारपरिमाणं, आकृतिपरिमाणं; 'of the same size,' समपरिमाणः -णा -णं, समप्रमाणः -णा -णं; 'of the size of an egg,' अण्डपरिमाणः -णा -णं; 'of the size of a grain of mustard,' सर्षपपरिमाणः -णा -णं; 'of unequal size,' विषमपरिमाणः &c., असमपरिमाणः &c.; of all sizes,' उडुप्रमाणमध्यमाः *m. pl.*; 'having ascertained the size and distance of the moon,' चन्द्रस्य मानं दूरत्वं च ज्ञात्वा.

Skain, skein, *s.* पक्षिका, पिक्षिका, पक्षिः -क्षी *f.*, पिक्षिः -क्षी *f.*; 'of silk,' कौशिकसूत्रपक्षी, कौशिकसूत्रग्रन्थिः *m.*

Skate, *s.* (For moving on the ice) हिमसंहतजलोपरि विसर्पणयोग्या लोहयुक्तपादुका or स्खलनयोग्यपादुका, स्खलनपादुका.—(The fish), *see* Scate.

To skate, *v. n.* पूर्व्वोक्तपादुकाद्वारेण हिमोपरि or हिमसंहतजलोपरि विसृप् (c. 1. -सर्पति -सर्प्तुं) or संसृप् or स्खल् (c. 1. स्खलति -लितुं).

Skater, *s.* पूर्व्वोक्तपादुकाद्वारा हिमोपरि विसर्पी *m.* (न्) or संसर्पी *m.*

Skating, *s.* लोहयुक्तपादुकाद्वारेण हिमोपरि विसर्पणं or संसर्पणं or स्खलनं or रिङ्गणं.

Skein, *s.* पक्षिका, पिक्षिका, पक्षिः *f.* *See* Skain.

Skeleton, *s.* कङ्कालः, अस्थिपञ्जरः, अस्थिपिञ्जरः, पञ्जरः, संयः, शरीरास्थिमात्रं, देहास्थिमात्रं; 'reduced to a mere skeleton,' त्वगस्थिमात्रशेषः -षा -षं.—(Frame, compages) संस्थानं, व्यूहः, आकारः.—(Of any subject) वस्तुमात्रं, वस्तु *n.*

Skeptic, skeptical, skepticism. *See* Sceptic, Infidel, &c.

Sketch, *s.* (Of a figure, &c.) आलेख्यं, पाण्डुलेख्यं, पाण्डुलेख्यमात्रं, लघ्वालेख्यं, बहिर्लेख्यं, ईषदालेख्यं, किञ्चिदालेख्यं, ईषदङ्कनं, किञ्चिदङ्कनं, ईषद्वर्णनं, स्थूलालेख्यं; 'of a painting,' चित्रारम्भः, पाण्डुचित्रं, चित्रं.—(Of a subject) वस्तुमात्रं, ईषद्वर्णनं, किञ्चिद्वर्णनं, वस्तु *n.*

To sketch, *v. a.* यावद्रेखामात्रं लिख् (c. 6. लिखति, लेखितुं) or आलिख् or विलिख्, पाण्डुलेख्यम् कृ (c. 10. अकुरुते -कर्तुं) पाण्डुलेख्यं कृ, लघ्वालेख्यं कृ, स्थूलालेख्यं कृ, किञ्चिदालेख्यं कृ, किञ्चिद्वर्णनं कृ, ईषद्वर्णनं कृ, ईषद् वर्ण् (c. 10. वर्णयति -यितुं) or अनुवर्ण् or उपवर्ण् or संवर्ण्, चित्रारम्भं कृ, पाण्डुचित्रं कृ.

Sketched, *p. p.* आलिखितः -ता -तं, किञ्चिदालिखितः &c., चित्रारम्भः -म्भा -म्भं, किञ्चिद्वर्णितः -ता -तं, बहिरङ्कितः &c.

Skewer, *s.* शलाका, कीलः -लकः, शङ्कुः *m.*, मांसबन्धनशलाका.

To skewer, *v. a.* शलाकया बन्ध् (c. 9. बध्नाति, बन्द्धुं), शलाकाबद्धं -द्धां कृ.

Skiff, *s.* (Light boat) लघुनौका, क्षुद्रनौका, सुवहनौका.

Skilful, *a.* कुशलः -ला -लं, निपुणः -णा -णं, प्रवीणः -णा -णं, प्रटुः -टुः -टुी -टु, विचक्षणः -णा -णं, विशारदः -दा -दं, चतुरः -रा -रं, अभिज्ञः -ज्ञा -ज्ञं, विज्ञः &c., विदग्धः -ग्धा -ग्धं, वैशलः -ला -लं, वैज्ञानिकः -की -कं, कृती -तिनी -ति (न्), युक्तिमान् -मती -मत् (त्), निष्णातः -ता -तं, ज्ञ in comp.; 'skilful in arms,' अस्त्रज्ञः -ज्ञा -ज्ञं, शस्त्रकुशलः &c.; 'skilful in expedients,' उपायज्ञः -ज्ञा -ज्ञं.

Skilfully, *adv.* कुशलवत्, कौशल्येन, सकौशल्यं, निपुणवत्, सपाटवं, विचक्षणवत्, चतुरवत्, सचातुर्य्यं, विदग्धवत्, सवैदग्ध्यं, युक्त्या, निपुणं.

Skilfulness, *s.* कुशलता, कौशल्यं, निपुणता, नैपुण्यं, प्रवीणता, प्रावीण्यं, पटुता, पाटवं, विचक्षणता, वैचक्षण्यं, चतुरता, चातुर्य्यं, युक्तिः *f.*, युक्तिज्ञत्वं, विज्ञता, अभिज्ञता, विदग्धता, वैदग्ध्यं, विचित्रता, व्यवसायः, गुणः.

Skill, *s.* कुशलता, पाटवं, युक्तिः *f.*, पटुता. *See* Skilfulness.

Skilled, *a.* कुशलः -ला -लं, शिक्षितः -ता -तं, ज्ञ in comp., अभिज्ञ in comp., विद् in comp., कृतमुखः &c., *see* Skilful; 'skilled in the śástras,' शास्त्रज्ञः -ज्ञा -ज्ञं, शास्त्राभिज्ञः &c., शास्त्रविद् *m.f.n.*, शास्त्रतत्त्वज्ञः &c., शास्त्रकुशलः -ला -लं; 'in music,' गान्धर्वतत्त्वज्ञः -ज्ञा -ज्ञं.

Skim, *s.* (Matter that forms on the surface) मलः, फेनः, उत्तरं, उत्तरमलं, *see* Scum.—(Of milk) दुग्धफेनः -नं, दुग्धतालीयं, शाकिकः, शाकिरः.

To skim, *v. a.* (Clear off the thick matter from the surface) मलं or फेनम् अपनी (c. 1. -नयति -नेतुं) or हृ (c. 1. हरति, हर्त्तुं) or अपहृ.—(Skim milk) दुग्धफेनम् अपनी or हृ. दुग्धतालीयम् अपनी or अपहृ.

To skim, *v. n.* (Glide along the surface, brush) विसृप् (c. 1. -सर्पति -सर्पुं -सर्प्तुं), लघुगत्या वहिर्भागं घृष् (c. 1. घर्षति -र्षितुं).

Skimmed, *p. p.* हृतमलः -लां -लं, हृतफेनः -ना -नं; 'milk,' पक्वलं.

Skin, *s.* त्वक् *f.* (च्), त्वचा, त्वचं, चर्म्म *n.* (न्), असृग्धरा, रक्ताधारः, असृग्धारा, तनुः -नूः *f.*, शरीरचर्म्म *n.*, शरीरावरणं, देहावरणं, देहकोषः, रोमभूमिः *f.*, मांसहासा, शिपिः *f.*, शिक्निः *f.*, वेदनी, नटपर्णी, सावणीलक्ष्यं.—(Hide) चर्म्म *n.* (न्), कृत्तिः *f.*, दृतिः *f.*, अजिनं, लोम *n.* (न्); 'of a tiger,' व्याघ्रचर्म्म *n.*; 'deer's skin,' मृगचर्म्म *n.*, एणाजिनं; 'hare or rabbit's skin,' शशचर्म्म *n.*, शशलोम *n.* (न्), शशकाजिनं, शशोर्णी.—(Of a snake) कञ्चुकः, निर्मोकः. (Bark, rind) त्वक् *f.* (च्), वल्कलः -लं, शल्कलं, शकलं, छल्ली.—(Reduced to mere skin and bone) त्वगस्थिमात्रशेषः -षा -षं, त्वगस्थिभूतः -ता -तं.

To skin, *v. a.* त्वच (nom. त्वचयति -यितुं), निस्त्वचीकृ, निश्चर्म्मं (nom. निश्चर्म्मयति -यितुं), त्वक्परिपुटनं कृ, त्वष्. *See To* peel, flay.

Skin-flint, *s.* अतिकृपणः, दृढमुष्टिः *m.*, गाढमुष्टिः *m.* *See* Miser.

Skinned, *p. p.* निस्त्वचीकृतः -ता -तं, निस्त्वचः -चा -चं, हृतत्वक् *m.f.n.* (च्).

Skinniness, *s.* शिरालता, त्वगस्थिमात्रभावः, चर्म्ममात्रभावः, जरुर्यं.

Skinny, *a.* शिरालः -ला -लं, त्वगस्थिमात्रमयः -यी -यं, चर्म्ममात्रमयः &c., त्वगस्थिमात्रभूतः -ता -तं, त्वङ्मात्रमयः &c., त्वङ्मयः &c. *See* Lean.

To skip, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग्, नृत्. *See To* leap.

Skip, skipping, *s.* प्लुतं, प्लवः -वनं, उत्प्लुतं, प्लुतिः *f.*, प्लुतगमनं, प्लुतगतिः *f.*, मण्डूकप्लुतं -तिः *f.*, मण्डूकगतिः *f.* *See* Leap.

Skipping, *part.* प्लुतगतिः -तिः -ति, प्लुतगामी -मिनी &c., प्लवकारी &c.

Skirmish, skirmishing, *s.* विप्लवः, विप्लावः, डमरः, विप्लयुद्धं, सेनामुखयुद्धं, ईषद्युद्धं, लघुयुद्धं, उपयुद्धं.

To skirmish, *v. n.* विप्लयुद्धं कृ, विप्लावं कृ, सेनामुखयुद्धं कृ.

Skirt, *s.* (Of a garment) वस्त्राञ्चलः -लं, वस्त्रान्तः, वसनान्तः, वस्त्रसीमा, वसनदशा, वस्त्रदशा, पटान्तः, अञ्चलः, दशा, वस्तिः *m.*, तरी, तरिः *f.*—(Edge, border) प्रान्तः, प्रान्तभागः, अन्तभागः, अन्तः -न्तं, उपान्तः -न्तं, पर्य्यन्तभागः, पर्य्यन्तः -न्तं, परिसरः, सीमा, धारः -रा; 'of a wood,' वनान्तः -न्तं, वनधारा, अरण्यवनं; 'of a mountain,' पर्य्यन्तभूः *f.*

To skirt, *v. a.* प्रान्त (nom. प्रान्तयति -यितुं), समन्त, प्रत्यन्त, पर्य्यन्तं कृ.

Skirting, *part.* प्रत्यन्तः -न्ता -न्तं, पार्य्यन्तिकः -की -कं, प्रान्तकः -का -कं.

Skittish, *a.* खेलाशीलः -ला -लं, खेलापरः -रा -रं, लीलाशीलः -ला -लं, चञ्चलः -ला -लं, चपलः &c., तरलः &c., क्रीडाशीलः &c.

Skittishness, *s.* खेलाशीलता, चञ्चलता, चपलता, चापल्यं, तरलता.

To skulk, *v. n.* निभृते स्था or गुह्. *See To* sculk, lurk.

Skull, *s.* कपालः, भगालः, शिरोस्थि *n.* *See* Scull.

Sky, *s.* आकाशः, व्योम *n.* (न्), गगणं, अन्तरीक्षं, अन्तरिक्षं, नभस् *n.*, खं, द्यौः *f.* (दिव्), द्यौ *f.* (द्यो), अम्बरं, दिगन्तरं, दिगन्तरालं, अन्तरालं, अभं, वियत् *n.*, मेघवर्त्म *n.* (न्), मेघवेश्म *n.* (न्), तारापथः, मरुत्पथः, मरुद्वर्त्म *n.*, नाकः, घनपदवी, विष्णुपदं, पुष्करं, अननं, सुरवर्त्म *n.*

Sky-coloured, *a.* आकाशवर्णः -र्णी -र्णं, व्योमवर्णः &c., नीलवर्णः &c.

Sky-lark, *s.* व्याघ्राटः, भरद्वाजः. *See* Lark.

Sky-light, *s.* पटलगवाक्षः, पटलजालिका, पटलकाचः.

Sky-rocket, *s.* आकाशबाणः, आग्नेयबाणः. *See* Rocket.

Sky-touching, *a.* व्योमस्पृक् *m.f.n.* (श्), अभ्रलिहः -हा -हं, नभोलिह् *m.f.n.* (ह्), गगणचुम्बी -म्बिनी -म्बि (न्), गगणचुम्बितः -ता -तं.

Slab, *s.* शिला, शिलापट्टः, शिलापटः, शिलाफलकः, फलकः.

To slabber, *v. n.* लालां मुखात् सु in caus. *See To* drivel.

Slack, *a.* शिथिलः -ला -लं, अग्रः &c. *See* Loose, Remiss.

To slacken, *v. a.* शिथिलीकृ, शिथिल (nom. शिथिलयति -यितुं), मुच्, *see To* loose, *v. a.*; 'to slacken one's speed,' वेगं or रयं शम् in caus.

To slacken, *v. n.* शिथिलीभू, मन्दीभू. *See To* loose, *v. n.*

Slackened, *p. p.* शिथिलितः -ता -तं, शिथिलीकृतः &c., शिथिलीभूतः &c., विगलितः &c., मन्दीभूतः &c., शान्तवेगः -गा -गं, शान्तरयः -या -यं.

Slackly, *adv.* शिथिलं, शैथिल्येन. *See* Loosely, Remissly.

Slackness, *s.* शैथिल्यं, शिथिलता, अग्रता, *see* Looseness, Remissness.

Slain, *p. p.* हतः -ता -तं, निहतः &c., व्यापादितः -ता -तं, घातितः -ता -तं, मारितः &c., सूदितः &c., निसूदितः -ता -तं. *See* Killed.

To slake, *v. a.* (Quench) शम् in caus., उपशम्, प्रशम्, छिद्, *see To* quench.—(Mix with water) जलेन सह मिश्र्, जलसंसृष्टं -ष्टां कृ.

To slam, *v. a.* (A door) यथा आकस्मिकशब्दो जायते तथा लघ्वाघातेन द्वारं पिधा or बलवदाघातेन द्वारं चडं कृ.

Slam, *s.* आकस्मिकशब्दः, आकस्मिकध्वनिः *m.*, द्वारक्षणितं.

Slander, *s.* अपवादः, परिवादः, पैशुन्यं, पिशुनवाक्यं, असूया, अभ्यसूया, गुणनिन्दा, गुणापवादः, कलङ्कः. *See* Calumny, Defamation.

To slander, *v. a.* अपवद् (c. 1. -वदति -दितुं), परिवद्, गुणापवादं कृ, पिशुनवाक्यं वद्, कलङ्क (nom. कलङ्कयति -यितुं), असूय (nom. असूयति -यितुं). *See To* defame, calumniate.

Slandered, *p. p.* अपवादितः -ता -तं, अभिशस्तः -स्ता -स्तं, अभिशापितः &c.

Slanderer, *s.* अपवादी *m.* (न्), परिवादी *m.*, अपवादकः. *See* Defamer.

Slanderous, *a.* अपवादकः -का -कं, पिशुनः -ना -नं, अपवादात्मकः -का -कं, कलङ्कमयः -यी -यं, असूयकः &c. *See* Defamatory.

Slanderously, *adv.* सापवादं, सपरिवादं, सासूयं, पिशुनवाक्यपूर्व्वं.

Slang, *s.* (Low language) खलोक्तिः *f.*, अश्लीलं, अश्लीलाक्षेपः.

Slant, slanting, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं, तिर्य्यङ् -र्य्क्षी -र्य्यक् (च्), वृजिनः -ना -नं, ऋजुः -जुः -जु, विषमः -मा -मं, प्रवणः -णा -णं.

To slant, *v. a.* आवृज् (c. 10. वर्जयति -यितुं), वक्रीकृ, तिर्य्यक्कृ, प्रवणीकृ.

To slant, *v. n.* आनम् (c. 10. -नमति -नन्तुं), प्रवणीभू, वक्रीभू, तिर्य्यग्भू.

Slantingly, *adv.* तिर्य्यक्, तिरस्, वक्रं, प्रवणं, प्रावण्येन, आवर्ज्यं.

Slap, *s.* चपेटिका, चपेटाघातः, चपेटप्रहारः, तलप्रहारः, तलाघातः, कराघातः, आस्फोटः -टनं, आस्फोटनशब्दः, तलं.

To slap, *v. a.* चपेटेन आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ, चपेटाघातं कृ, आस्फुट् (c. 10. -स्फोटयति -यितुं), आस्फोटनं कृ.

Slap, *adv.* आकस्मिकाघातेन, आकस्मिकप्रहारेण, आस्फोटनशब्देन.

Slash, *s.* दीर्घच्छेदः -दनं, दीर्घवेधः, दीर्घक्षतं -तिः *f.*, छेदविच्छेदः.

To SLASH, *v. a.* दीर्घच्छेदं कृ, दीर्घक्षतं कृ, छेदविच्छेदं कृ, व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विनिकृत्, छिन्नभिन्नीकृ, क्षतविक्षतीकृ.

SLASHING, *part.* छेदविच्छेदकारी -रिणी -रि (न्), दीर्घच्छेदकारी &c.

SLATE, *s.* श्लक्ष्णशिला, तनुशिला, छेद्यसंज्ञकः श्लक्ष्णशिलाफलकः.

To SLATE, *v. a.* श्लक्ष्णशिलाफलकैर् आस्तृ or आस्तॄ or आवृ.

SLATTERN, *s.* वेशप्रमत्ता, वेशप्रमादिनी, अविनीतवेशिनी.

SLAUGHTER, *s.* वधः, घातः -तनं, हननं, निहननं, मारणं, व्यापादनं, निषूदनं, सूदनं, संहारः, विशसनं, वैशसं, प्रतिघातनं, क्षपणं, प्रमयः, आलम्भः, विमर्दनं, निर्वहणं, निर्वेहणं, प्रमापणं, निकारणं, निशारणं, विशारः, विशारणं, प्रवासनं, निकृन्तनं, परासनं, निर्हिंसनं, निर्वासनं, संज्ञपनं, निर्ग्रन्थनं, निर्गेन्थनं, अपासनं, निस्तर्हणं, परिवर्जनं, निर्वापणं, उच्छासनं, उच्छासः, प्रमथनं, क्रथनं, मथनं, उच्छासनं, पिप्पः, उन्मन्थः, निशुम्भः -म्भनं.

To SLAUGHTER, *v. a.* हन् (c. 2. हन्ति -न्तुं), विशस् (c. 1. -शसति -सितुं), *see To* KILL.

SLAUGHTERED, *p. p.* हतः -ता -तं, विशसितः -ता -तं. *See* KILLED.

SLAUGHTER-HOUSE, *s.* घातस्थानं, आघातस्थानं, आघातः -तनं, शूना, सूना, वधस्थानं, हिंसास्थानं, पशुमारणस्थानं, पशुवधस्थानं, प्राणिवधस्थानं.

SLAVE, *s.* दासः, दाशः, दासेयः, दासेरः, सेवकः, चेटकः, चेटः, किङ्करः, प्रेष्यः, प्रैष्यः, प्रैषः, भृत्यः, गोप्यः -प्यकः, नियोज्यः, परजितः, भुजिष्यः, परिचारकः, चेडः -डकः, कर्म्मकरः, कर्म्मकारः, *see* SERVANT; 'female slave,' दासी, दासिका, दाशी, चेटी, चेडी, चेटिका, चेडिका; 'domestic slave,' गृहदासः; 'female slave of a slave,' दासदासी; 'multitude of female slaves,' दासीसभं; 'son of a slave,' दासीपुत्रः; 'dealer in slave-girls,' क्रय्यापालः; 'born of a slave,' दासेयः -यी, दासेरः; 'to be a slave,' दास (nom. दासायति).

To SLAVE, *v. n.* आयस् (c. 4. -यस्यति -सितुं). *See To* DRUDGE, TOIL.

SLAVERY, *s.* दास्यं, दासत्वं, दासभावः, दासावस्था, दासदशा, प्रेष्यत्वं, परप्रेष्यत्वं, भृत्यत्वं. *See* SERVITUDE, DRUDGERY.

SLAVISH, SLAVISHNESS, SLAVISHLY. *See* SERVILE, SERVILITY, &c.

To SLAY, *v. a.* हन् (c. 2. हन्ति -न्तुं), व्यापद् in caus. *See To* KILL.

SLAYER, *s.* हन्ता *m.* (न्तृ), घातकः, घाती *m.* (न्). *See* KILLER.

SLEDGE, *s.* निश्चक्रयानं, निश्चक्रवाहनं, अचक्रयानं, चक्रशून्यवाहनं.

SLEDGE-HAMMER, *s.* घनः, वृहद्घनः, मुद्गरः, वृहन्मुद्गरः.

SLEEK, *a.* सुस्निग्धशुभ्रः -भ्रा -भ्रं, श्लक्ष्णः -क्ष्णा -क्ष्णं, स्निग्धः -ग्धा -ग्धं.

SLEEKNESS, *s.* सुस्निग्धशुभ्रता, श्लक्ष्णता -त्वं, स्निग्धता -त्वं, अपरूक्षता.

To SLEEP, *v. n.* स्वप् (c. 2. स्वपिति, स्वप्तुं), प्रस्वप्, सम्प्रस्वप्, संस्वप्, अवस्वप्, निद्रा (c. 2. -द्राति -तुं), शी (c. 2. शेते, शयितुं), निद्रां कृ, स्वप्नं कृ, स्वपनं कृ, सुप्तिं कृ, शयनं कृ, निमील् (c. 1. -मीलति -लितुं), संविश् (c. 6. -विशति -वेष्टुं); 'he sleeps comfortably,' सुखेन or सुप्त्वः स्वपिति; 'to desire to sleep,' स्वप् in des. (सुषुप्सति -प्सितुं), शी in des. (शिशयिषते).

SLEEP, *s.* निद्रा, स्वप्नः, स्वापः, स्वपनं, सुप्तिः *f.*, सुप्तं, शयनं, शयितं, शीः *f.*, शायिका, संवेशः, सर्वेन्द्रियाव्यापारः; 'state of sleep,' निद्रावस्था, स्वप्नावस्था; 'a deep or sound sleep,' सुनिद्रा, सुषुप्तिः *f.*, निर्भरनिद्रा, गाढनिद्रा, सुषुप्तावस्था, साधिका; 'very deep or dead sleep,' घोरनिद्रा, अघोरनिद्रा; 'fallen into a deep sleep,' सुनिद्रामग्नः -ग्ना -ग्नं; 'in a sound sleep,' सुषुप्तः -प्ता -प्तं, शेश्वियतः -ता -तं शेश्वियतवान् &c.; 'arousing from sleep,' निद्राभङ्गः; 'aroused from sleep,' भग्ननिद्रः -द्रा -द्रं; 'to go to sleep, स्वप्, निद्रा, शी, शयनं कृ, निद्रां गम्; 'he went to sleep,' निद्रद्रौ, सुष्वाप.

SLEEPER, *s.* शायी *m.* (न्), शयनकृत्, निद्राणः, स्वप्नावस्थः.

SLEEPINESS, *s.* निद्रालुता, निद्राशीलता, शयालुता, शिशयिषा, सुषुप्सा, निद्रेच्छा, स्वप्नेच्छा, शयनेच्छा, स्वापः, तन्द्रा, तन्द्रिका.

SLEEPING, *s.* स्वपनं, स्वापः, शयनं, शायिका. *See* SLEEP.

SLEEPING, *part.* शयानः -ना -नं, स्वपन् -पती -पत् (त्), निद्रान् -द्रान्ती -द्रात् (त्), निद्रायमाणः -णा -णं, निद्राणः -णा -णं, शयितः -ता -तं, शयितवान् -वती -वत् (त्), सुप्तः -प्ता -प्तं, स्वप्नक् *m. f. n.* (ज्); 'soundly,' शेश्वियतः -ता -तं, शेश्वियतवान् &c.

SLEEPING-ROOM, *s.* शयनगृहं, स्वप्नगृहं, निद्राशाला. *See* BEDROOM.

SLEEPLESS, *a.* निर्निद्रः -द्रा -द्रं, विनिद्रः &c., अनिद्रः &c., उन्निद्रः &c., निद्राहीनः -ना -नं, निद्रारहितः -ता -तं, अनागतनिद्रः &c., विगतनिद्रः &c.

SLEEPLESSNESS, *s.* निर्निद्रता, विनिद्रता -त्वं, अनिद्रता -त्वं, उन्निद्रता, निद्राहीनता, निद्रारहित्यं, निद्राभावः.

SLEEPY, *a.* (Habitually sleepy) निद्रालुः -लुः -लु, शयालुः &c., तन्द्रालुः &c., निद्राशीलः -ला -लं, स्वप्नशीलः &c., नैद्रः -द्री -द्रं, निद्राणः -णा -णं.—(Desirous of sleeping) शिशयिषुः -षुः -षु, सुषुप्सुः -प्सुः -प्सु.—(Overcome by sleep) निद्राकुलः -ला -लं, निद्राक्रान्तः -न्ता -न्तं, निद्रायत्तः -त्ता -त्तं, निद्रातुरः -रा -रं.

SLEET, *s.* शीकरः, शीकरवर्षः, शीभवः, सीकरः, तुषारवर्षः.

To SLEET, *v. n.* शीक् (c. 1. शीकते -कितुं), शीकर (nom. शीकरायते).

SLEEVE, *s.* पिप्पलः, बाहुवस्त्रं, बाहुवसनं, दोर्वस्त्रं, दोराच्छादनं; 'to laugh in one's sleeve,' अनहासं कृ, उड्डर्धनं कृ, उच्चघनं कृ.

SLEIGHT, *s.* (Of hand) हस्तलाघवं, लघुहस्तत्वं, हस्तचापल्यं, कुसृतिः *f.*, माया, कुहकः, इन्द्रजालं, *see* JUGGLERY, LEGERDEMAIN.

SLENDER, *a.* (Thin skin) तनुः -नुः -न्वी -नु, प्रतनुः &c., वितनुः &c., क्षीणः -णा -णं, सूक्ष्मः -क्ष्मा -क्ष्मं, श्यामः -मा -मं, कृशः -शा -र्शं, शीर्णः -र्णा -र्णं, कृशाङ्गः -ङ्गी -ङ्गं, अविपुलः -ला -लं; 'slender in the waist,' क्षीणमध्यः -ध्या -र्ध्यं, तनुमध्यः &c., तनुमध्यमः -मा -मं, हरिमध्यः &c., सिंहमध्यः &c., सिंहकटिः -टिः -टि, मृगकटिः &c., मृगमध्यः &c., तनुशरीरः -रा -रं, श्यामाङ्गः -ङ्गा -ङ्गं, कृशोदरः -रा -रं; 'a slender-waisted woman,' सुमध्यमा, तनुमध्यमा, मध्यक्षीणा; 'having a slender stem,' शीर्णनालः -ला -लं.—(Small, inconsiderable) अल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं, क्षीणः -णा -णं, लघुः -घुः -घु, अवहुः &c., निश्चेलः -ला -लं; 'of slender means,' क्षीणार्थः -र्था -र्थं.

SLENDERNESS, *s.* तनुता, क्षीणता, श्यामता, शीर्णता, सूक्ष्मता, कृशता, कार्श्यं, अल्पता; 'of waist,' मध्यक्षीणता.

To SLICE, *v. a.* तक्ष् (c. 1. तक्षति -क्षितुं), छेदं कृ, परिच्छेदं कृ, छिद् (c. 7. छिनत्ति, छेत्तुं), परिच्छिद्, खण्ड्, खण्डीकृ, पृथुच्छेदं कृ.

SLICE, *s.* छेदः, परिच्छेदः, खण्डः, शकलं; 'of bread,' पूपखण्डः.

To SLIDE, *v. n.* (Move along the surface of snow, ice, &c.) हिमोपरि स्खल् (c. 1. स्खलति -लितुं) or रिङ्ग् (c. 1. रिङ्गति -ङ्गितुं) or रिंख् (c. 1. रिंखति -खितुं) or विसृप् (c. 1. -सर्पति -सर्प्तुं) or संसृप्.—(Slip) च्यु (c. 1. च्यवते, च्योतुं), स्खल्.

SLIDE, SLIDING, *s.* स्खलनं, रिङ्गणं, रिङ्गणं, रिङ्गः, च्यवनं.

SLIGHT, *a.* (Thin, slim) तनुः -नुः -न्वी -नु, सुतनुः -नुः -नु, क्षीणः -णा -णं; 'a slight woman,' लघ्वी, *see* SLENDER.—(Trifling, inconsiderable) अल्पः -ल्पा -ल्पं, स्वल्पः &c., लघुः -घुः -घु, श्लोकः -का -कं, क्षुद्रः द्रा -द्रं, ईषत् prefixed; 'a slight inspection,'

ईषद्दर्शनं; 'a slight blow,' ईषदाघातः, उपघातः; 'a slight obstacle,' अल्पविघ्नः; 'in a slight degree,' ईषत्, किञ्चित्, कियत्, स्तोकं; 'not in the slightest,' न मनागपि, न किञ्चिदपि, न किमपि, न कियदपि, न मूक्ष्ममपि, न स्तोकमपि, न लेशमपि; 'there is not the slightest movement of the tongue or lips,' जिह्वोष्ठं मनागपि न चलति.

SLIGHT, *s.* (Neglect) अनादरः, उपेक्षा, अवमानं, अवज्ञा, अवधीरणं, ईषदवज्ञा, ईषदुपेक्षा, ईषदवमानं, ईषदनादरः, अनपेक्षा, प्रणिपातलंघनं, अमाननं, अवगणनं -ना.

To SLIGHT, *v. a.* उपेक्ष् (c. 1. -ईक्षते -क्षितुं), ईषद् अवज्ञा (c. 9. -जानाति -ज्ञातुं) or अवमन् (c. 4. -मन्यते -मन्तुं) or अवधीर् (c. 10. -धीरयति -यितुं), अवगण् (c. 10. -गणयति -यितुं), अनादरं कृ, ईषदवज्ञां कृ.

SLIGHTED, *p. p.* उपेक्षितः -ता -तं, ईषदवज्ञातः &c., अवगणितः &c., अवधीरितः -ता -तं, ईषदवधीरितः &c., ईषदवमानितः &c.

SLIGHTER, *s.* उपेक्षकः, उपेक्षाकारी *m.* (न्), मन्दादरः, अनादरकृत्.

SLIGHTINGLY, *adv.* उपेक्षया, अनपेक्षया, अनादरेण, ईषदवज्ञापूर्वं.

SLIGHTLY, *adv.* ईषत्, कियत्, स्तोकं, मनाक्, अल्पमात्रं, अवहु, अभृशं; 'slightly warm,' ईषदुष्णः -ष्णा -ष्णं; 'slightly red,' ईषद्रक्तः -क्ता -क्तं.

SLIGHTNESS, *s.* तनुता, सूक्ष्मता, क्षीणता, अल्पता, लघुता, क्षुद्रता.

SLILY, *adv.* छलेन, सव्याजं, सकपटं, सवैदग्ध्यं, छद्मना, अव्यक्तं; 'going slily,' अव्यक्तगतिः -तिः -ति, गूढगतिः &c.

SLIM, *a.* तनुः -नुः -न्वी -नु, क्षीणः -णा -णं, श्लक्ष्णः &c. *See* SLENDER.

SLIME, *a.* शिलाजतु *n.*, शैलनिर्यासः, सान्द्रपङ्कः, श्यानपङ्कः, चिक्कणपङ्कः.

SLIMINESS, *s.* सान्द्रता, श्यानता, चिक्कणता, पङ्किलता -त्वं.

SLIMNESS, *s.* तनुता -त्वं, तानवं, क्षीणता, श्लक्ष्णता. *See* SLENDERNESS.

SLIMY, *a.* सान्द्रः -न्द्रा -न्द्रं, श्यानः -ना -नं, चिक्कणः -णा -णं, चिक्किणः &c., पङ्किलः -ला -लं, सान्द्रपङ्कमयः -यी -यं, सान्द्रपङ्कगुणाक्तः &c.

SLING, *s.* (Instrument for throwing stones) गोफणा, प्रस्तरक्षेपणी, पाषाणक्षेपणी, प्रस्तरप्रक्षेपणी, प्रक्षेपणी, भिन्दपालः.—(Pole with ropes for carrying burdens) भारयष्टिः *m.f.*, काचः.

To SLING, *v. a.* (Throw with a sling) गोफणया क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or प्रक्षिप्.—(Hang so as to swing) उद्बन्ध्, उद्बैं बन्ध्, आन्दोल (nom. आन्दोलयति -यितुं), काच (nom. काचयति -यितुं).

To SLINK, *v. n.* अपसृप् (c. 1. -सर्पति -सर्प्तुं), अपसृप्, पलाय् (c. 1. पलायते -यितुं. rt. इ), विपलाय्, अपधाव् (c. 1. -धावति -वितुं), लक्षकम्, अपया, निष्पत्.

To SLIP, *v. n.* (Slide) स्खल् (c. 1. स्खलति -लितुं), चल्, रिङ्ग्, रिङ्ख्.—(Glide) विसृप्, संसृप्.—(Stumble, fall) च्यु (c. 1. च्यवते, च्योतुं), भंश् (c. 4. भश्यति, c. 1. भंशते -शितुं), संस् (c. 1. संसते -सितुं), विसंस्, आसंस्, पत् (c. 1. पतति -तितुं), गल्, विगल्.—(Err) विच्यु, विचल्, भंश्.—(Slip away), *see To* SLINK.—(Slip off) संस्, विसंस्, विगल्.—(Slip down) प्रच्यु, प्रभंश्, लङ्घ्, अवपत्, अवगल्.—(Slip in) छलेन or निभृते प्रविश् (c. 6. -विशति -वेष्टुं).

To SLIP, *v. a.* (Let slip) शिथिल (nom. शिथिलयति -ते -यितुं), शिथिलीकृ, मुच् (c. 6. मुचति, मोक्तुं), संस् (c. 10. संसयति -यितुं), च्यु (c. 10. च्यावयति -यितुं), हा in caus. (हापयति -यितुं), *see To* LOOSE, *v. a.*; 'I will not let slip the occasion,' अवकाशं न शिथिलिष्ये.—(Neglect, omit), *see* the words.—(Slip in) छलेन or निभृते प्रविश् in caus. or निविश् in caus.

SLIP, *s.* (Sliding) स्खलनं, रिङ्गणं, रिङ्खणं, रिङ्खः, च्यवनं.—(Stumble, fall) स्खलनं, स्खलितं, च्युतिः *f.*, भंशः, प्रभंशः, पातः, पतनं, संसनं, विसंसा.—(Error) दोषः, भ्रमः, प्रमादः, स्खलनं, अपराधः; 'of the hand,' हस्तदोषः; 'of the tongue,' जिह्वादोषः.—(Twig) शाखिका, प्रशाखिका, पल्लवः, काण्डः.—(Long, narrow piece) खण्डः, दीर्घखण्डः -ण्डकः; 'of cloth,' वस्त्रखण्डः.

SLIPPED, *p. p.* च्युतः -ता -तं, स्खलितः &c., भ्रष्टः -ष्टा -ष्टं, प्रभ्रष्टः &c.; 'from its place,' स्थानच्युतः -ता -तं, पदच्युतः &c.—(Slipped off) सस्तः -स्ता -स्तं, विगलितः -ता -तं.

SLIPPER, *s.* (Light shoe) लघुपादुका, लघुपादत्रं, लघुपादपा, पादुका, पादपा, उपानत् *f.* (ह्), चर्मपं; 'magical slipper,' योगपादुका, सिद्धिः *f.*

SLIPPERINESS, *s.* चिक्कणता -त्वं, स्निग्धता, क्लेद्यं, श्लक्ष्णता, अस्थिरता.

SLIPPERY, *a.* चिक्कणः -णा -णं, चिक्किणः &c., स्निग्धः -ग्धा -ग्धं, भेदुरः -रा -रं, खेही -हिनी -हि (न्), श्लक्ष्णः -क्ष्णा -क्ष्णं; 'slippery ground,' निपत्या.—(Unstable, uncertain) अस्थिरः -रा -रं, अनवस्थितः -ता -तं, चञ्चलः -ला -लं, चपलः &c., तरलः &c., लोलः &c., विचलः -ला -लं.

SLIPPING, *s.* स्खलनं, च्युतिः *f.*, च्यवनं, रिङ्गणं, रिङ्खणं. *See* SLIP.

To SLIT, *v. a.* दीर्घच्छेदं कृ, दीर्घछेदनं कृ, दीर्घछिद्रं कृ, दीर्घवेधनं कृ.

SLIT, *p. p.* छिन्नः -न्ना -न्नं, दीर्घछेदान्वितः -ता -तं, विद्धः -द्धा -द्धं.

SLIT, *s.* दीर्घछेदः -दनं, दीर्घछिद्रं, छेदः, छिद्रं, दीर्घभेदः.

To SLOBBER, *v. n.* लालां सु in caus. *See To* SLABBER.

SLOP, *s.* (Soiled water, &c.) मलिनजलं, मलिनजलादि *n.*, समलजलं, अमेध्यजलादि, अमेध्यजलं.—(Water, &c., carelessly thrown about) प्रमाद्यात् इतस्ततः क्षिप्तं or पातितं जलादि.—(Mess) कर्दमः.

To SLOP, *v. a.* प्रमाद्यात् इतस्ततो जलादि पत् in caus. or क्षिप्.

SLOPE, *s.* प्रावण्यं, प्रवणभूमिः *f.*, निम्नभूमिः, निम्नता, क्रमप्रवणभूमिः *f.*, क्रमनिम्नभूभागः, क्रमशो निम्नो भूभागः, स्थानं क्रमशः प्रवणं, स्थानं क्रमशो ऽधोगम्यं; 'of a mountain,' उत्सङ्गः, कटकः, शैलकटकः.

To SLOPE, *v. a.* आवृज् (c. 10. -वर्जयति -यितुं), प्रवणीकृ, निम्नीकृ.

To SLOPE, *v. n.* क्रमशः प्रवणः -णा -णं भू, क्रमप्रवणः -णा -णं भू, प्रवणीभू, क्रमशो निम्नः -म्ना -म्नं भू, निम्नीभू.

SLOPING, *part.* or *a.* प्रवणः -णा -णं, क्रमशः प्रवणः &c., क्रमप्रवणः &c., क्रमशो निम्नः -म्ना -म्नं, क्रमशः पातुकः -की -कं, क्रमशो ऽधोगामी -मिनी -मि (न्).

SLOPPY, *a.* पङ्किलः -ला -लं, जलपङ्कमयः -यी -यं, अनूपः -पा -पं.

SLOP-SELLER, *s.* तुच्छवस्त्रविक्रेता *m.* (तृ), सिद्धवस्त्रविक्रयी *m.* (न्).

SLOP-SHOP, *s.* तुच्छवस्त्रादिविक्रयस्थानं, प्रस्तुतवस्त्रविक्रयगृहं.

SLOTH, *s.* तन्द्रा, तन्द्रिः -न्द्री *f.*, तन्द्रिका, आलस्यं, तुन्दपरिमार्जनं, मिडं, गुडाका, *see* LAZINESS.—(The animal) ऋक्षमृगः.

SLOTHFUL, *a.* तन्द्रालुः -लुः -लु, अलसः -सा -सं. *See* LAZY.

SLOTHFULNESS, *s.* तन्द्रालुता, आलस्यं, अलसता. *See* LAZINESS.

To SLOUCH, *v. n.* निम्नगत्या चल्, अलसगत्या चल्, ग्रामिकवत् चर्.

SLOUCHING, *a.* निम्नः -म्ना -म्नं, प्रलम्बः -म्बा -म्बं, निम्नगतिः -तिः -ति.

SLOUGH, *s.* (Muddy place) पङ्कः, महापङ्कः, कुपङ्कः, पङ्काढ्यस्थानं.—(Of a snake) कञ्चुकः, निर्मोकः, जहकः, भुजङ्गनिर्मोकः, भुजङ्गत्वक् *f.* (च्), अहित्वक् *f.*, अहिचर्म *n.* (न्), तीक्ष्णा, निर्वयनी.—(From a wound) व्रतगलितमांसं.

SLOVENLINESS, *s.* अविनीतवेशत्वं, वेशप्रमत्तता, अविनीतता -त्वं, अपरिष्कारः, अव्यवस्था, प्रमत्तता, प्रमार्ष्टं.

SLOVENLY, SLOVEN, *a.* वेशप्रमत्तः -त्ता -त्तं, वेशप्रमादी -दिनी -दि (न्), अविनीतवेशी -शिनी &c., अविनीतपरिच्छदः -दा -दं, अपरिष्कृतवेशः

-शा -शं, अपरिष्कृतपरिच्छदः -दा -दं, अविनीतः -ता -तं, अपरिष्कृतः &c., प्रामादिकः -की -कं.

SLOW, *a.* (Not swift, moving slowly) मन्दः -न्दा -न्दं, मन्थरः -रा -रं, मन्दगतिः -तिः -ति, मन्दगमनः -ना -नं, मन्दगामी -मिनी -मि (न्), अद्रुतः -ता -तं, अशीघ्रः -घ्रा -घ्रं, विलम्बितः -ता -तं, विलम्बी -म्बिनी &c.; 'slow fire,' मन्दाग्निः *m.*—(Not ready, not prompt) मन्दः -न्दा -न्दं, मन्थरः &c., अक्षिप्रः -प्रा -प्रं, अत्वरितः -ता -तं, मनाक्करः -रा -रं; 'slow in recognising,' प्रत्यभिज्ञानमन्थरः -रा -रं.—(Behind in time) विलम्बितः -ता -तं, कालातीतः -ता -तं, मन्दः &c., *see* LATE, *a.*—(Slow in intellect) मन्दबुद्धिः -द्धिः -द्धि, मन्दमतिः -तिः -ति, मन्दः -न्दा -न्दं, स्थूलबुद्धिः &c., *see* DULL.—(Tedious) दीर्घकालीनः -ना -नं, दीर्घसूत्रः -त्रा -त्रं, दीर्घसूत्री &c., *see* DILATORY.—(In music) विलम्बितः -ता -तं; 'slow time,' विलम्बितवृत्तिः *f.*, तत्त्वं.—(Slow fever) जीर्णज्वरः.

SLOW-GOING, *adv.* मन्दगतिः -तिः -ति, मन्दगामी -मिनी -मि (न्), मन्दगमनः -ना -नं, मन्दगतः -ता -तं, शनैश्चरः -रा -रं, शनैर्गामी &c.

SLOWLY, SLOW, *adv.* मन्दं, शनैस्, मन्दं मन्दं, शनैः शनैः, मन्द in comp., मान्द्येन, समान्द्यं, मनाक्, मन्थरं, अद्रुतं, अशीघ्रं, अक्षिप्रं, अत्वरितं, विलम्बितं, विलम्बेन.

SLOWNESS, *s.* मान्द्यं, मन्दता -त्वं, मन्थरता, विलम्बः -म्बनं, विलम्बितत्वं, अद्रुतत्वं, अशीघ्रता, अक्षिप्रता, दीर्घसूत्रता; 'of intellect,' बुद्धिमान्द्यं, मन्दबुद्धित्वं, मन्दता. *See* DULLNESS.

SLUG, *s.* (Kind of snail) शम्बूकहीनः कृमिविशेषः.

SLUGGARD, *s.* अलसः, आलस्यशीलः, तुन्दपरिमार्जः, तुन्दपरिमृजः.

SLUGGISH, *a.* तन्द्रालुः -लुः -लु, अलसः -सा -सं, आलस्यशीलः -ला -लं, निद्रालुः -लुः -लु, मन्दः -न्दा -न्दं, मन्दगतिः -तिः -ति, मनाक्करः -रा -रं, शयालुः &c.

SLUGGISHLY, *adv.* आलस्येन, अलसवत्, मन्दं, समान्द्यं, सतन्द्रं, तन्द्रया.

SLUGGISHNESS, *s.* तन्द्रालुता, तन्द्रा -न्द्री, तन्द्रिका, आलस्यं, अलसता -त्वं, मन्दता, मान्द्यं, जडता, जाड्यं. *See* LAZINESS, INDOLENCE.

SLUICE, *s.* (Flood-gate) जलद्वारं, जलनिर्गमः, जलवर्त्म *n.* (न्), जलबन्धनद्वारं.—(Stream of water) जलप्रवाहः, जलप्रपातः.

To SLUMBER, *v. n.* (Sleep lightly) लघुनिद्रां कृ, अल्पनिद्रां कृ, ईषन्निद्रां कृ.—(Sleep) स्वप् (c. 2. स्वपिति, स्वप्तुं), प्रस्वप्, निद्रा &c., *see To* SLEEP.

SLUMBER, *s.* निद्रा, लघुनिद्रा, अल्पनिद्रा, श्वाननिद्रा, स्वप्नः, *see* SLEEP.

To SLUR, *v. a.* (Soil, sully) मलिन (nom. मलिनयति -यितुं), मलिनीकृ, कलङ्क (nom. कलङ्कयति -यितुं), दुष् in caus.—(Do hurriedly) अतिक्षिप्रं कृ, अतिशीघ्रं कृ or अनुष्ठा, सहसा कृ, त्वरितं कृ, अनवधानेन or अनवेक्षया कृ.—(Pass over lightly, overlook) उपेक्ष्, समुपेक्ष्.—(Pronounce imperfectly) लुप्तवर्णपदेन व्याहृ or उदाहृ or उच्चर्.—(Sing in a gliding way) अविलम्बितपदेन or अविच्छिन्नस्वरेण गै or उच्चर्.

SLUR, *s.* (Mark, stigma) कलङ्कः, लाञ्छनं, अपकलङ्कः, अकीर्त्तिचिह्नं, अपमानचिह्नं.—(In music) स्वराविच्छेदचिह्नं.

SLURRED, *p. p.* (Soiled) कलङ्कितः -ता -तं, मलिनीकृतः -ता -तं, दूषितः &c.—(Done hurriedly) सहसा कृतः -ता -तं, त्वरितकृतः &c.—(Pronounced imperfectly) लुप्तवर्णपदः -दा -दं, लुप्तवर्णः -र्णा -र्णं, ग्रस्तः -स्ता -स्तं, ग्रस्तवर्णः -र्णा -र्णं.—(Pronounced glidingly or rapidly) अविच्छिन्नस्वरेणोच्चारितः -ता -तं, त्वरितोदितः -ता -तं, निरस्तः -स्ता -स्तं.

SLUSH, *s.* पङ्ककर्वटः, मृदुपङ्कः, सजलपङ्कः, कर्दमः.

SLUT, *s.* अविनीतवेशिनी, अपरिष्कृतवेशिनी, अविनीता, बन्धकी.

SLUTTISH, *a.* अविनीतवेशी -शिनी &c., अविनीतः -ता &c. *See* SLOVENLY.

SLY, *a.* विदग्धः -ग्धा -ग्धं, कापटिकः -की -कं, छाद्मिकः -की -कं, छद्मकुशलः -ला -लं, दाम्भिकः -की -कं, सव्याजः -जा -जं, मायान्वितः -ता -तं, बहुमायः -या -यं, भूरिमयः -या -यं, धूर्त्तः -र्त्ता -र्त्तं, व्याजिकः -की -कं, चतुरः -रा -रं; 'sly laugh,' अन्तर्हासः, उद्वर्धनं, उच्चघनं.

SLYNESS, *s.* विदग्धता, वैदग्ध्यं, व्याजः, कपटः, कापट्यं, सव्याजत्वं, धूर्त्तता, छलं, छद्म *n.* (न्), छाद्मिकत्वं, चतुरता, मक्षः, स्रक्षः.

To SMACK, *v. a.* (Kiss with a noise) सशब्दं चुस्, आस्फोटनशब्देन चुस्, सशब्दचुम्बनं कृ.—(The lips) ओष्ठास्फोटनं कृ, ओष्ठविष्वणनं कृ, ओष्ठसंवारानन्तरम् आस्फोटनशब्दं कृ.—(The face), *see To* SLAP.—(Crack) आस्फोटनं कृ, आस्फोटनशब्दं कृ; 'a whip,' आस्फोटनशब्देन कशाघातं कृ.

To SMACK, *v. n.* (Have a taste) स्वादनं कृ, *see To* SAVOR, *v. n.*

SMACK, *s.* (Loud kiss) सशब्दचुम्बनं, साम्फोटनचुम्बनं.—(Of the lips) ओष्ठास्फोटनं, ओष्ठविष्वणनं.—(Crack, slap) आस्फोटनं, आस्फोटनशब्दः, आकस्मिकशब्दः, स्फुत्कारः, क्वणितं, ध्वनितं.—(Taste) आस्वादः, रसः, *see* SAVOR.

SMACK, *adv.* आस्फोटनशब्देन, आकस्मिकशब्देन, आकस्मिकाघातेन.

SMALL, *a.* अल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं, *see* LITTLE, *a.*—(In stature) अल्पतनुः -नुः -नु, अल्पशरीरः -रा -रं, *see* LITTLE, *a.*—(Small quantity) अल्पभागः, *see* LITTLE, *s.*—(In a small degree) ईषत्, *see* LITTLE, *adv.*

SMALLAGE, *s.* अजमोदा, अजमोदाजातीयः शाकभेदः.

SMALLEST, *a.* अल्पिष्ठः -ष्ठा -ष्ठं, कनिष्ठः &c. *See* LEAST, *a.*

SMALLNESS, *s.* अल्पता -त्वं, क्षुद्रता, तनुता, सूक्ष्मता, स्तोकता, क्षोदिमा *m.* (न्), अणिमा *m.* *See* LITTLENESS.

SMALL-POX, *s.* शीतला -ली, रक्तवटी, रक्तवरटी, वसन्तः, वसन्तरोगः, मसूरी -रिका, गुली, विस्फोटः, पापरोगः.

SMART, *a.* (Sharp) तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, पटुः &c., *see* SHARP.—(Quick, brisk) शीघ्रः -घ्रा -घ्रं, लघुः -घुः -घु, द्रुतः -ता -तं, तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), आशुकारी -रिणी &c., शीघ्रकारी &c., *see* QUICK, SHARP.—(Witty) रसिकः -का -कं, मार्म्मिकः &c.—(Fine, well-dressed, showy) सुवेशी -शिनी -शि (न्), सुवेशः -शा -शं, शोभनः -ना -नं, शोभनवेशी &c., छेकः -का -कं.

SMART, *s.* (Sharp pain) तीव्रवेदना, तीक्ष्णवेदना, वेदना, तीक्ष्णव्यथा, शूलः -लं, तोदः, तीव्रदुःखं.

To SMART, *v. n.* व्यथ् (c. 1. व्यथते -थितुं), तीक्ष्णवेदनां or तीक्ष्णव्यथाम् अनुभू, दुःखोष्णः -ष्णा -ष्णं भू, व्यथोष्णः &c. भू, तप् in pass. (तप्यते).

SMARTLY, *adv.* (Sharply), *see* SHARPLY.—(Briskly) द्रुतं, क्षिप्रं, शीघ्रं, लाघवेन.—(Finely) सु prefixed; as, 'smartly dressed,' सुवेशी &c.

SMARTNESS, *s.* (Sharpness), *see* SHARPNESS.—(Quickness) शीघ्रता, द्रुतता, क्षिप्रता, लघुता, लाघवं; 'of hand,' हस्तलाघवं, लघुहस्तत्वं, हस्तचापल्यं.—(Wittiness, cleverness) रसिकत्वं, सरसत्वं, मार्म्मिकता, पटुता, पाटवं.—(Fineness) शोभा, शोभनत्वं, सुवेशिता.

To SMASH, *v. a.* भञ्ज्, चूर्ण्, *see To* BREAK, DASH, SHATTER.

SMASH, SMASHED. *See* SHATTERING, SHATTERED, BROKEN.

SMATTERER, *s.* चुम्बकः, किञ्चिज्ज्ञः, खण्डज्ञानी *m.* (न्), खण्डविद्यावान् *m.* (त्).

SMATTERING, *s.* किञ्चित्, अल्पमात्रं, अल्पिका, अल्पभागः; 'of knowledge,' किञ्चिज्ज्ञानं, खण्डज्ञानं, खण्डपाण्डित्यं, खण्डितपाण्डित्यं, खण्डविद्या.

To SMEAR, *v. a.* लिप् (c. 6. लिम्पति, लेप्तुं), आलिप्, उपलिप्, विलिप्, समालिप्, अभ्रञ् (c. 7. अनक्ति, अंक्तुं, c. 10. अभ्रञ्जयति -यितुं), अभ्यभ्रञ्, दिह् (c. 2. देग्धि -ग्धुं), प्रदिह्, लेपनं कृ, लेपं कृ, उपलेपं कृ, विलेपनं कृ.

SMEARED, *p. p.* लिप्तः -प्ता -प्तं, विलिप्तः &c., उपलिप्तः &c., अवलिप्तः &c., अभ्यक्तः -क्ता -क्तं, अक्तः in comp., दिग्धः -ग्धा -ग्धं, निदिग्धः &c.; 'with blood,' रक्ताक्तः -क्ता -क्तं, शोणिताक्तः &c., रक्तावलिप्तः &c.

SMEARING, *s.* लेपः -पनं, विलेपः -पनं, अवलेपः -पनं, उपलेपः -पनं, लिपिः *f.*, अभ्यञ्जनं, अभ्यभ्रञ्जनं, अभ्यक्तिः, समालम्भः.

SMELL, *s.* (Faculty or sense of smell) घ्राणं, घ्राणेन्द्रियं, घ्राणशक्तिः *f.*, आघ्राणशक्तिः *f.*, गन्धग्रहणशक्तिः *f.*—(Perception of odour) गन्धग्रहणं, घ्राणं, आघ्राणं, अवघ्राणं, घ्रातिः *f.*—(Odour) गन्धः, वासः; 'bad smell,' दुर्गन्धः, *see* under ODOUR; 'good smell,' सुगन्धः, सुवासः, *see* ODOUR, FRAGRANCE.

To SMELL, *v. a.* (Perceive by the nose) घ्रा (c. 1. जिघ्रति, घ्रातुं), आघ्रा, उपघ्रा, उपाघ्रा, अवघ्रा, शिङ्ग् (c. 1. शिङ्गति -ङ्गितुं), उपशिङ्ग्, घ्राणं कृ, आघ्राणं कृ, अवघ्राणं कृ, घ्राणेन्द्रियेण ग्रह् or ज्ञा or बुध् or अनुभू, नासाद्वारेण ग्रह् or गन्धग्रहणं कृ.

To SMELL, *v. n.* (Have an odour) गन्धी -न्धिनी -न्धि भू or अस्, सगन्धः -न्धा -न्धं भू or अस्, गन्धवान् -वती -वद् भू, गन्धविशिष्टः -ष्टा -ष्टं भू, सवासः -सा -सं भू; 'have a bad smell,' दुर्गन्धी &c. भू, *see To* STINK, *v. n.*—(Have the same smell) सगन्धः -न्धा -न्धं भू, समगन्धः -न्धा -न्धं भू, तुल्यगन्धः &c. भू; 'to smell of smoke,' धूमसगन्धः -न्धा -न्धं भू.

SMELLED, SMELT, *p. p.* घ्रातः -ता -तं, घ्राणः -णा -णं. आघ्रातः &c., अवघ्रातः &c., उपघ्रातः &c., शिङ्गितः -ता -तं.

SMELL-FEAST, *s.* परान्नरुचिः *m.*, परपाकरुचिः *m.* *See* PARASITE.

SMELLING, *part.* (Perceiving by the nose) घ्राणकारी -रिणी -रि (न्), आघ्राणकारी &c., गन्धग्राही &c.—(Having a smell) गन्धवान् -वती -वत् (न्), गन्धी &c., गन्धयुक्तः -क्ता -क्तं, सगन्धः -न्धा -न्धं, वासयुक्तः -क्ता -क्तं.

To SMELT, *v. a.* लोहादि विलो in caus. or विदु in caus. or द्रवीकृ.

SMELTER, *s.* लोहादिविद्रावकः, लोहादिविलयनकृत्, लोहकारः.

SMELTING, *s.* लोहादिविलयनं, लोहादिविद्रावणं, लोहादिकरणं.

To SMILE, *v. n.* स्मि (c. 1. स्मयते, स्मेतुं), उत्स्मि, स्मितं कृ, मन्दस्मितं कृ, मन्दहास्यं कृ, ईषद्धासं कृ, उपहासं कृ, विहस् (c. 1. -हसति -सितुं), उपहस्, विहासं कृ; 'to smile at,' अभिस्मि, अभ्युत्स्मि; 'to cause to smile,' स्मि in caus. (स्माययति -यितुं); 'to smile on, be propitious,' कृपादृष्टिं कृ, प्रसन्नः -न्ना -न्नं भू, प्रसन्नमुखः -खी -खं भू, कृपावलोकनं कृ.

SMILE, *s.* स्मितं, मन्दस्मितं, स्मयः, उत्स्मयः, विहासः, विहसितं, विहसनं, उपहासः, ईषद्धासः, मन्दहास्यं, मन्दहासः, चन्द्रोष्ठिका, चन्द्रोष्ठिः *f.*; 'with a smile,' सस्मितं; 'with a bitter smile,' सामर्षहासं.

SMILING, *part.* or *a.* स्मितः -ता -तं, सस्मितः -ता -तं, स्मेरः -रा -रं, विहासी -सिनी -सि (न्), प्रफुल्लः -ल्ला -ल्लं, विहस्य indec.; 'smiling sweetly,' चारुहासी &c., शुचिस्मितः -ता -तं; 'smiling words,' सस्मितानि वचनानि; 'a smiling countenance,' स्मेरमुखं, हास्यमुखं, हास्यवदनं; 'having a smiling countenance,' स्मेरमुखः -खी -खं, सुहसाननः -ना -नं, प्रसन्नमुखः &c., प्रफुल्लवदनः &c.

SMILINGLY, *adv.* सस्मितं, विहस्य, सविहसितं, सहास्यं.

To SMIRK, *v. n.* विलक्षणस्मितं कृ, कुस्मितं कृ, अपहसितं कृ, विलक्षहास्यं कृ.

SMIRK, *s.* विलक्षणस्मितं, विलक्षस्मितं, विलक्षहास्यं, अपहसितं, अपहास्यं, कुस्मितं, जिह्महसितं, जिह्महास्यं.

To SMITE, *v. a.* (Strike) हन् (c. 2. हन्ति -न्तुं), अभिहन्, निहन्, तड् (c. 10. ताडयति -यितुं), व्यध्, प्रतिव्यध्, प्रहृ, तुद्, *see To* STRIKE.—(Kill) हन्, मृ in caus., मूद्, शस् &c., *see To* KILL.

SMITER, *s.* हन्ता *m.* (न्), ताडयिता *m.* (तृ), प्रहर्त्ता *m.*, घातकः, घाती *m.*

SMITH, *s.* शिल्पी *m.* (न्), अयोघनेन तप्तलोहादिताडकः.—(Blacksmith) लोहकारः, अयस्कारः, आकारः, धमकः.

SMITHERY, SMITHY, *s.* लोहकारशाला, अयस्कारशाला, धमकशाला.

SMITING, *s.* हननं, ताडनं, मारणं; 'of the breast,' वक्षस्ताडनं.

SMITTEN, *s.* हतः -ता -तं, निहतः &c., समाहतः &c., उपहतः &c.—(With love) कामोपहतः -ता -तं, काममोहितः &c., कामार्तः -र्त्ता -र्त्तं.

SMOCK, SMOCK-FROCK, *s.* स्थूलशाटकः -टी, ग्राम्यजनभृतं शिथिलोत्तरीयं.

SMOKE, *s.* धूमः, धूमिका, धूपः -पिका, दहनकेतनं, मरुद्वाहः, करमालः, खतमालः, व्योमः; 'quantity of smoke,' धूम्या; 'volume of it,' धूमावलिः -ली, धूममाला; 'cloud of it,' धूममेघः, धूमौघः, धूमपटलः -लं; 'absence of it,' विधूमः, धूमाभावः.

To SMOKE, *v. n.* (Emit smoke) धूम (nom. धूमायति -ते), धूमम् उत्सृज् (c. 6. -सृजति -स्रष्टुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or निःसृ in caus. or निर्गम् in caus., धूम्र (nom. धूम्रायति -ते), धूप (nom. धूपायति -ते).—(Inhale tobacco through a pipe) नालद्वारेण ताम्रकुट्टधूमिकां निपा, धूमनिपानं कृ.—(Cause to emit smoke) धूम in caus. (धूमाययति -यितुं).

To SMOKE, *v. a.* (Apply smoke, affect by smoke) धूमस्यं -स्यां कृ, धूमोपहतं -तां कृ, धूमीकृ, धूम्र (nom. धूम्रयति -यितुं), धूमेन शुष् in caus., धूम (nom. धूमयति -यितुं), धूप् (c. 1. धूपायति -यितुं, धूपितुं), अवधूप्, सधूमीकृ.—(A pipe), *see* under *To* SMOKE, *v. n.*

SMOKED, *p. p.* धूपितः -ता -तं, अवधूपितः &c., धूमीकृतः &c., सधूमीकृतः -ता -तं, धूमशोषितः -ता -तं.

SMOKELESS, *a.* निर्धूमः -मा -मं, विधूमः &c., धूमहीनः -ना -नं.

SMOKER, *s.* धूमपायी *m.* (न्), धूमनिपाता *m.* (तृ), ताम्रकुट्टधूमपायी.

SMOKING, *s.* (Act of emitting smoke) धूमोत्क्षेपः -पणं, धूमोत्सर्जनं.—(Inhaling tobacco-smoke) धूमनिपानं, धूमपानं, ताम्रकुट्टधूमपानं.

SMOKING, *part.* धूमायमानः -ना -नं, धूमोत्क्षेपी -पिणी -पि (न्).

SMOKY, *a.* धूमः -म्या -मं, धूमलः -ला -लं, सधूमः -मा -मं, धूममयः -यी -यं, धौमेयः -यी -यं, सधूपः -पा -पं; 'smoky coloured,' धूम्रवर्णः -र्णा -र्णं.—(Having the appearance of smoke) धूमाकारः -रा -रं.

SMOOTH, *a.* (Not rough, having an even surface, glossy) श्लक्ष्णः -क्ष्णा -क्ष्णं, स्निग्धः -ग्धा -ग्धं, स्नेही -हिनी -हि (न्), चिक्कणः -णा -णं, मसृणः -णा -णं, समः -मा -मं, पेशलः -ला -लं, अरुक्षः -क्षा -क्षं, अरूक्षः &c., अरुशः -शा -शं, अखरः -रा -रं, अपरुषः -षा -षं, सुखस्पर्शः -र्शा -र्शं.—(Level) समः -मा -मं, समानः -ना -नं.—(Bland, soft) मृदुः -दुः -दु, मेदुरः -रा -रं, स्निग्धः &c.—(Gently flowing, moving equally) विसृत्वरः -रा -रं, विसारी -रिणी &c., धारावाही &c., समानगतिः -तिः -ति.—(Unruffled, calm) अक्षुभ्रः -भ्रा -भ्रं, शान्तः -न्ता -न्तं, निर्वेगः -गा -गं, निस्तरङ्गः -ङ्गा -ङ्गं, प्रसन्नः -न्ना -न्नं.

To SMOOTH, *v. a.* श्लक्ष्ण (nom. श्लक्ष्णयति -यितुं), श्लक्ष्णीकृ, स्निग्धीकृ, समीकृ, समानीकृ.—(Free from obstruction) निर्विघ्नीकृ, *see To* EASE.

SMOOTHLY, *adv.* सुखेन, अदुःखेन, निर्विघ्नं, अक्लेशेन. *See* EASILY.

SMOOTHNESS, *s.* श्लक्ष्णता, स्निग्धता, श्लेष्यं, अरूक्षता, अरूक्षता, मृदुता, ममता, समानता; 'of speech,' वाक्चापल्यं, मधुरभाषित्वं, *see* FLUENCY; 'of the sea, &c.,' अक्षुब्धता, शान्तता.

SMOOTH-TONGUED, *a.* चपलजिह्वः -ह्वा -ह्वं, चपलवाक् *m. f. n.* (च्).

To SMOTHER, *v. a.* (Suffocate) श्वासरोधं कृ, श्वासनिरोधं कृ, प्राणरोधं कृ, कण्ठनिरोधं कृ, श्वासावरोधं कृ.—(Suppress) निग्रह्, स्तम्भ्, नियम, नियन्त्र्, गुह, छद, अन्तः कृ.

SMOTHERED, *p. p.* रुद्धश्वासः -सा -सं, रुद्धप्राणः -णा -णं, निरुद्धकण्ठः -ण्ठा -ण्ठं; 'with dust and mud,' पांशुपङ्काच्छन्नः -न्ना -न्नं.

To SMOULDER, *v. n.* अन्तर्दाहं कृ, अन्तर्ज्वलनं कृ, अन्तर्ज्वाली -लिनी -लि भू, अन्तर्दाहवान् -वती -वत् भू, गूढदाहवान् &c. भू.

SMOULDERING, *part.* अन्तर्दाही -हिनी -हि (न्), अन्तर्ज्वाली &c., अन्तर्दाहवान् -वती -वत् (न्), गूढदाहवान &c.

To SMUGGLE, *v. a.* निषिद्धवस्तूनि देशान्तरात् छलेन आनी or उपनी or आवह्, शुल्कदानम् अकृत्वा वाणिज्यद्रव्याणि देशान्तरात् छलेन आनी.

SMUGGLED, *p. p.* छलेन देशान्तरादानीतः -ता -तं or विदेशादानीतः &c.

SMUGGLER, *s.* निषिद्धद्रव्यानेता *m.* (तृ), शुल्कदानम् अकृत्वा वाणिज्यवस्तूनि विदेशात् छलेन आनयति यो दस्युः, शुल्कदस्युः *m.*

SMUGGLING, *s.* निषिद्धद्रव्यानयनं, शुल्कादानपृष्ठे वाणिज्यवस्तूनां देशान्तरात् छलेनानयनं, शुल्कादानापराधः.

SMUT, *s.* मषी, *see* LAMP-BLACK.—(Obscene language) दुर्वचनं, दुर्भाषणं, अपशब्दः, दुरुक्तिः *f.* कुत्सितवचनं, कुत्सितवाक्यं.

To SMUT, SMUTCH, *v. a.* मलिनीकृ, मलीमसीकृ, मलिन (nom. मलिनयति -यितुं).

SMUTTY, *a.* मलीमसः -सा -सं, मलिनः -ना -नं. *See* OBSCENE.

SNACK, *s.* अंशः, भागः, *see* SHARE.—(Light repast) *see* REPAST.

SNAFFLE, *s.* (Light bridle) लघुयागा, लघुयज्ञा, लघुखलीनः.

SNAIL, *s.* शम्बूकः, शम्बूकस्वामी *m.* (न्), कोशाम्बः, कोशावासी *m.*, कवचवासी कृमिः, कम्बुवासी *m.*, कम्बुयुक्तः or कवचयुक्तः कृमिः.

SNAIL-SHELL, *s.* कृमिकोशः, कृमिकोषः, कृमिकवचः, कृमिकम्बुः *m.*, जन्तुकम्बुः *m.*, कम्बुः *m.*, शम्बुः *m.*

SNAKE, *s.* सर्पः, अहिः *m.*, भुजङ्गः, भुजङ्गमः, भुजगः, उरगः, उरङ्गः, उरङ्गमः, उरःसरः, व्यालः, नागः, पन्नगः, सरीसृपः, खगेज्यः, विलेशयः, बिलवासी *m.* (न्), विषधरः, विषाननः, विषास्यः, विषायुधः, आशीविषः, दीर्घजिह्वः, दीर्घरसनः, द्विजिह्वः, द्विरसनः, दीर्घपृष्ठः, दृक्कर्णः, चक्षुःश्रवाः *m.* (स्), लताजिह्वः, लतारसनः, वायुभक्षः, पवनाशनः, श्वसनाशनः, जिह्मगः, भेकभुक् *m.* (ज्), मण्डूकभुक्, चक्री *m.* (न्), कञ्चुकी *m.*, काकोदरः, कञ्चुकालुः *m.*, गूढपाद *m.*, गूढपादः, कुण्डली *m.* (न्), दन्दशूकः, पृदाकुः *m.*, मृदुः, ममकोलः, तक्षकः, तृपूः *m.*, व्याडः, सर्पी *m.* (न्); 'hooded snake,' फणी *m.* (न्), भोगी *m.*, फणवान् *m.* (त्), भोगवान् *m.*, फणावान. फणभृत् *m.*, फणाधरः, फणाधरः, फणाभरः, फणकरः, दर्वीकरः; 'female snake,' सर्पी, सर्पिणी, भुजगी, भुजङ्गी; 'variegated snake,' मालुधानः, मातुलाहिः *m.*; 'other sorts of snakes,' गोनसः, गोनासः, तिलित्सः, अजगरः, शयुः *m.*, वाहसः, राजिलः, दुण्डुः, दुण्डुभः, राजाहिः *m.*, नागभिद् *m.*; 'a water-snake,' जलव्यालः, कालकन्दकः, अलगर्दः, अलगर्द्दः; 'the king of the snakes that inhabit the infernal regions, forming the couch and canopy of Vishnu, and upholding the world which rests on one of his thousand heads,' शेषः, अनन्तः, सर्पेश्वरः, फणीश्वरः; 'other kings and chiefs of the snakes,' वासुकिः *m.*, सर्पराजः, तक्षकः, शङ्खः, महापद्मः; 'the expanded hood of a snake,' फणः -णा, भोगः, स्फटा, स्फोटा, दर्विः -र्वी, दर्वीः -र्वी; 'his skin,' कञ्चुकः, निर्मोकः, *see* SLOUGH; 'a snake that has cast his skin,' निर्मुक्तः, मुक्तकञ्चुकः; 'his venom,' गरलं, विषं, क्ष्वेडः; 'his fang,' विषदन्तः, आशी, आशिम् *f.*, सर्पदंष्ट्रः.—(Bitten by a snake) अहिदष्टः -ष्टा -ष्टं, अहिविदष्टः &c.

SNAKE-CATCHER, SNAKE-CHARMER, *s.* व्यालग्राही *m.* (न्), सर्पग्राही *m.*, आहितुण्डिकः, अहितुण्डिकः, जाङ्गुलिकः, विषवैद्यः, सर्पमन्त्री *m* (न्), मन्त्रवादी *m.*, मन्त्री *m.*, जीवकः.

SNAKE-HOLE, *s.* सर्पविवरं, सर्पबिलं, भुजङ्गबिलं, अहिविवरं.

SNAKE-STONE, *s.* (A jewel said to be found in the head or hood of a snake) सर्पमणिः *m.*, नागमणिः *m.*, फणमणिः *m.*, सर्पफणजः.

SNAKY, *a.* आहेयः -यी -यं, सार्पः -र्पी -र्पं, सार्पः -र्पी -र्पं, सौरगः -गी -गं, सर्पसम्बन्धी -न्धिनी -न्धि (न्), सर्पस्वभावः -वा -वं.

To SNAP, *v. a.* (Break at once) एकपदे or युगपत् or अकस्मात् त्रुट् (c. 6. त्रुटति -टितुं, c. 10. त्रोटयते -यितुं) or भञ्ज् or खण्ड् or स्फुट् or रुज् or छिद् or तक्ष्.—(The fingers) अङ्गुलिस्फोटनं कृ, अङ्गुलिभङ्गं कृ, छोटिकां कृ, मुचुटीं कृ, मुकुटीं कृ.—(Bite suddenly) अकस्माद् दंश् or विदंश्.—(Snap up) अकस्माद् ग्रह् or उद्ग्रह् or उद्ग्राहं कृ, *see To* SNATCH.

To SNAP, *v. n.* (Break suddenly) एकपदे or युगपत् or अकस्मात् त्रुट् (c. 4. त्रुट्यति -टितुं) or स्फुट् (c. 6. स्फुटति -टितुं) or भञ्ज् in pass. or भिद् in pass. or छिद् in pass.—(Make an effort to seize with the teeth, as a dog) श्ववद् or कुक्कुरवद् दन्तैर् ग्रह् in des. (जिघृक्षति -क्षितुं) or दंश् in des.—(Utter angry words) भष (c. 1. भषति -षितुं).

SNAP, SNAPPING, *s.* (Sudden break) अकस्मात् त्रोटनं or स्फोटनं or स्फुटनं, आकस्मिकभङ्गः, अकस्माद् भञ्जनं or भङ्गः, अकस्मात् खण्डनं.—(Of the fingers) अङ्गुलिस्फोटनं, अङ्गुलिभङ्गः, छोटिका, पुच्छटिः *m.*, मुकुटी, मुचुटी.—(Sudden bite, or effort to seize with the teeth) आकस्मिकदंशः -शनं, अकस्माद् दंशः or दन्तैर् जिघृक्षा.

SNAPPED, *p. p.* अकस्मात् त्रुटितः -ता -तं or भग्नः -ग्ना -ग्नं or स्फुटितः -ता -तं or छिन्नः -न्ना -न्नं or भिन्नः &c.

SNAPPISH, *a.* (Eager to bite or seize) दंशनशीलः -ला -लं, दिदंक्षुः -क्षुः -क्षु, जिघृक्षुः -क्षुः -क्षु, जिगरिषुः -षुः -षु.—(Peevish, carrish) ककेशः -शा -शं, ककेशशीलः &c., कुक्कुरस्वभावः -वा -वं, अस्वभावः -वा -वं.

SNARE, *s.* पाशः, पाशबन्धः, जालं, वागुरा, उन्माथः, कूटः, मोहजालं, कूटयन्त्रं; 'snares of the world,' प्रपञ्चपाशः, भवपाशः.

To SNARE, *v. a.* पाशबद्धं -द्धां कृ, जालबद्धं -द्धां कृ, पाशे or उन्माथे or वागुरायां पत् (c. 10. पातयति -यितुं), जाले पातयित्वा बन्ध् (c. 9. बध्नाति, बन्धुं), पाशीकृ, पाश (nom. पाशयति -यितुं).

SNARED, *p. p.* पाशबद्धः -द्धा -द्धं, जालबद्धः &c., पाशीकृतः -ता -तं, पाशितः -ता -तं, उन्माथपतितः -ता -तं, वागुरापतितः &c., कोटः -टी -टं.

To SNARL, *v. n.* भष (c. 1. भषति -षितुं), रै (c. 1. रायति, रातुं), तर्ज्, तर्जनं कृ, गर्ज्, गर्जनं कृ, ककेशवाक्यं वद्, परुषवाक्यं वद्, कटुवाक्यं वद्.

SNARLER, *s.* भषकः, कुक्कुरस्वभावः, अशीलः, सदाककेशः.

To SNATCH, *v. a.* or *n.* अकस्मात् or झटिति ग्रह् (c. 9. गृह्णाति, गृहीतुं) or हृ (c. 1. हरति, हर्त्तुं) or अभिहृ or धृ (c. 1. धरति, धर्त्तुं) or कृष् (c. 1. कर्षति, क्रष्टुं) or आकल् (c. 10. -कलयति -यितुं) or प्रकल् (c. 10. -कालयति -यितुं); 'to snatch at,' अकस्माद् जिघृक्षया हस्तं प्रसृ (c. 10. -सारयति -यितुं), अकस्माद् ग्रह् in des. (जिघृक्षति -क्षितुं) or हृ in des. (जिहीर्षति -र्षितुं); 'to snatch away,' अकस्माद् अपहृ

or अपहृ or अपकृष् or विलुप्; 'to snatch out,' अकस्माद् उद्धृ or निर्हृ or उत्कृष्.

SNATCH, SNATCHING, *s.* (Hasty seizing) अकस्माद् हरणं or ग्रहणं or धरणं, आकस्मिकहरणं, अकस्मादाकलनं, आकस्मिकजिघृक्षा.—(Short interval) अल्पान्तरं, अल्पावकाशः, क्षणावकाशः.—(Short fit of action) क्षणप्रवृत्तिः *f.*

SNATCHED, *p. p.* अकस्माद् गृहीतः -ता -तं or हृतः -ता -तं or धृतः -ता -तं or अभिहृतः &c., अकस्मादाकलितः -ता -तं; 'snatched away,' अकस्माद् अपहृतः -ता -तं or विलुप्तः -प्ता -प्तं; 'snatched out,' उद्धृतः &c.

To SNEAK, *v. n.* कुत्सितजनवत् छलेन अपसृप् (c. 1. -सर्पति -सर्प्तुं) or अपक्रम्, कापुरुषवद् निभृतस्थानम् आस्था (c. 1. -तिष्ठति -स्थातुं) or निभृतस्थाने आत्मानं गुह् or गुप्, कुत्सितजनवद् आचर्, कुत्सितवृत्तिः -त्तिः -त्ति भू.—(Behave with meanness and servility) कृपणवत् or कुत्सितप्रकारेण अतिलालनं कृ or अतिसान्त्वनं कृ.

SNEAKING, *part.* or *a.* कुत्सितवृत्तिः -त्तिः -त्ति, कुत्सिताचारः -रा -रं, कुत्सितप्रकारेण अतिलालनकारी-रिणी-रि(न्) or अतिसान्त्वनकारी &c.

To SNEER, *v. n.* विकृतमुखेन or मुखविकारेण अवज्ञां सूच् (c. 10. सूचयति -यितुं), विकृतहासेन अवमानं सूच्, अवज्ञाहासं कृ, अवज्ञासूचनार्थं विकृतस्मितं कृ or विकृतहासं कृ; 'to sneer at,' अवहस्, *see To* DERIDE.

SNEER, *s.* अवज्ञासूचनार्थं विकृतस्मितं or विकृतहासः, अमर्षहासः, अवज्ञासूचकहासः, अवज्ञाहासः. अवज्ञासूचका मुखविकृतिः *f.*, अवहासः. *See* SARCASM.

SNEERINGLY, *adv.* सावज्ञाहासं, सामर्षहासं, सावहासं, अवहासेन.

To SNEEZE, *v. n.* क्षु (c. 2. क्षौति, क्षवितुं), क्षुतं कृ, क्षवं कृ, छिक्कां कृ, छिक्कनं कृ, छिक्क् (nom. छिक्कति -क्कितुं, छिक्कायते); 'to sneeze upon,' अवक्षु.

SNEEZE, SNEEZING, *s.* क्षुतं, क्षवः, क्षवथुः *m.*, क्षुत *f.*, क्षुता, छिक्का, छिक्कनं, काशः, प्राणनी, हिक्किः *m.*, घ्राणदुःखदा.

SNEEZED, *p. p.* क्षुतः -ता -तं; 'sneezed upon,' अवक्षुतः -ता -तं.

SNEEZING, *part.* क्षवकृत *m. f. n.*, क्षवकारी-रिणी &c., क्षुतवान् -वती &c.

To SNIGGER, *v. n.* अन्तर्हासं कृ, उच्चघनं कृ, उद्घर्घनं कृ, गूढहासं कृ.

To SNIFF, *v. a.* नासाद्वारेण घ्रम (c. 2. -घ्रसिति -तुं) or निघ्रम् or घ्रासं कृ.

To SNIP, *v. a.* कर्त्रेण मूलमूलेदं कृ or अल्पछेदं कृ or छिद्.

SNIPE, *s.* दीर्घचञ्चुः, दीर्घमुखः, दीर्घचञ्चुविशिष्टः पक्षिभेदः.

To SNIVEL, *v. n.* नासिकामलं सु in caus. (स्रावयति -यितुं), नासिकास्रावोपहतः -ता -तं भू.—(Whimper) बालकवत् परिदेव्.

SNIVEL, *s.* नासामलं, नासिकामलं, सिंहानं, सिंहाणं, सिङ्घाणं.

SNIVELLING, *s.* नासिकास्रावः, नासास्रावः, नासापरिस्रावः.

SNOB, *s.* मध्यमन्यः, कुलीनलोकव्यवहारानुकारी प्राकृतजनः.

SNOOZE, *To* SNOOZE, *see* NAP, *To* NAP.

To SNORE, *v. n.* स्वप्नमध्ये कर्कशशब्दपूर्वं नासाद्वारेण श्वासं कृ or नासया श्वासप्रश्वासं कृ, स्वप्नमध्ये कर्कशस्वरेण नासिकां ध्मा (c. 1. धमति, ध्मातुं) or नासया घ्रम् (c. 2. घ्रमिति -तुं), निद्रामध्ये कर्कशश्वासं कृ or कर्कशस्वरं कृ, उच्छिङ्गनं कृ, क्रथनं कृ.

SNORE, SNORING, *s.* स्वप्नमध्ये कर्कशश्वासः or सशब्दश्वासः or नासया श्वासः, निद्रामध्ये कर्कशस्वरेण श्वासः, निद्रावस्थायाम् उच्छिङ्गनं or क्रथनं, स्वरः.

To SNORT, *v. n.* नासाद्वारेण उग्रश्वासं कृ, नासिकाद्वारेण फूत्कृ or फूत्कारं कृ or फूत्शब्दं कृ, फुत्कारं कृ, सूत्कृ, सूसूशब्दं कृ.

SNORTING, *s.* नासाद्वारेण उग्रश्वासः or उग्रशब्दसहितश्वासः, सूत्कारः.

SNOT, *s.* नासामलं, नासिकामलं, सिंहानं, सिंहाणं. *See* MUCUS.

SNOUT, *s.* पोचं, प्रोथः -थं, नस्तः, नस्या, नासा, नासिका, मुखः.

SNOW, *s.* हिमं, तुषारः, हिमानी, नीहारः, तुहिनं, तोषारं, हिममंहतिः *f.*, हिमिका, खराभ्यः, भस्मतूलं, कारः; 'a fall of snow,' तुषारपातः, तुषारवर्षः; 'a particle of snow,' हिमकणः, तुषारकणः.

To SNOW, *v. n.* तुषारं वृष (c. 1. वर्षति -र्षितुं), हिमं वृष्, तुषारकणान् वृष्, हिमकणान् वृष्.

SNOW-BALL, *s.* हिमपिण्डः, तुषारपिण्डः, हिममण्डलं.

SNOW-CAPPED, *a.* हिमशेखरः -रा -रं, हिमशिखरः &c., हिमावृतशिखरः.

SNOW-DRIFT, *s.* हिमसंहतिः *f.*, तुषारसंहतिः, हिमराशिः *m.*, हिमौघः.

SNOW-STORM, *s.* तुषारवर्षः, तुषारपातः, हिमपातः, हिमसम्पातः.

SNOWY, *a.* (Abounding with snow, covered with it) हिमवान् -वती -वत् (त्), हिममयः -यी -यं, हिम्यः -म्या -म्यं, हैमः -मी -मं, हिम in comp., तुषारमयः &c., हिमाढ्यः -ढ्या -ढ्यं, तोषारः -री -रं, हिमावृतः -ता -तं; 'snowy mountain,' हिमाद्रिः *m.*, तुषाराद्रिः, तुहिनाद्रिः, हिमपर्वतः, शीताद्रिः *m.*—(White, like snow) हिमाभः -भा -भं, हिमवर्णः -र्णा -र्णं.

To SNUB, *v. a.* प्रत्यादिश्, वाग्रोधं कृ, अपकृष्, दर्पभङ्गं कृ, पराभू.

SNUB-NOSED, *a.* नतनासिकः -का -कं, खुरणसः -सा -सं, खुरणाः -णाः -णः (स), चिपिटः -टा -टं, चिपिटकः -का -कं, चिपुटः -टा -टं, चिक्किनः -ना -नं, अवनाटः -टा -टं, अवटोटः &c., अवभटः &c.

SNUFF, *s.* (Burnt or charred wick) दग्धतूला -लो, तप्ततूला -लो, दग्धपिञ्जूलं.—(Pulverized tobacco) नस्यं, नस्तं, नासिकाचूर्णं, नासाचूर्णं, अवघोटः, घ्रातकरी; 'to take snuff,' नस्यं पा or निपा.

To SNUFF, *v. a.* (Inhale by the nose) नासाद्वारेण निघ्रम्, उच्छिङ्गनं कृ, *see To* SNUFF, SMELL.—(Crop the snuff of a candle) दग्धतूलाम् अवछिद् (c. 7. -छिनत्ति -छेत्तुं) or छिद् or लू, प्रदीपतूलीं छिद् or लू, दीपिकातूलीम् अवछिद्.

SNUFF-BOX, *s.* नस्याधारः, नासिकाचूर्णाधारः, नस्यपात्रं, नस्यभाजनं.

SNUFFERS, *s.* तूलाकर्त्तनी, तूलालूदनी, प्रदीपतूलाकर्त्तनी, कर्त्तनी.

To SNUFFLE, *v. n.* नासाद्वारेण मन्दशब्दं कृ. *See To* SNORT, SNUFF.

SNUFF-TAKER, *s.* नस्यपायी *m.* (न्), नासिकाचूर्णनिपाता *m.* (तृ).

SNUFFY, *a.* नस्यदूषितः -ता -तं, नासिकाचूर्णमलिनः -ना -नं.

SNUG, *a.* (Close, compact, covered up) संहतः -ता -तं, सुसंहतः &c., संवृतः -ता -तं, आवृतः &c., सुप्रच्छन्नः -न्ना -न्नं, प्रच्छन्नः -न्ना -न्नं, गुप्तः -प्ता -प्तं, गूढः -ढा -ढं, उपगूढः &c.—(Comfortable) सुस्थः -स्था -स्थं, सुस्थितः -ता -तं, स्वस्थः -स्था -स्थं, सुखी -खिनी -खि(न्), सुखः -खा -खं, यथासुखः &c.—(Lying close) निकटशायी &c., पार्श्वापार्श्वशायी &c.

To SNUGGLE, *v. n.* निकटे or अङ्के or पार्श्वतः or पार्श्वापार्श्वं शी.

SNUGLY, *adv.* सुखेन, यथासुखं. *See* CLOSELY, COMFORTABLY.

SNUGNESS, *s.* सुसंहतता, सुप्रच्छन्नता, सुस्थता, सुस्थितिः *f.*, सौख्यं.

So, *adv.* (Thus) एवं, तथा, इति, इत्थं; 'and so forth,' इत्यादि, इत्यादिप्रकारेण; 'be it so,' एवं भवतु, एवमस्तु, तथास्तु, अस्तु; 'is it so?' कच्चित्.—(In this manner, in such a manner) एवं, तथा, एवंविधं -धेन; 'I must so contrive that my master awake,' यथा स्वामी जागर्त्ति तथा मया कर्त्तव्यं.—(In like manner, after the same manner) तद्वत्, एवं, तथा, एवम्प्रकारेण, तथाविधेन, तथाप्रकारेण, एवंविधेन, एवंविधानेन, एतादृशं.—(To such a degree) एतावत्, ईदृक्, एतादृक्, ईदृशं, एतादृशं, तादृक्, एतत्पर्य्यन्तं, तथा,

इत्थं, इयत्, इयत्पर्य्यन्तं; 'so far,' तावत्, एतावत्, तदन्तं, तत्पर्य्यन्तं; 'so many, so much,' तावत् indec., तावान् -वती -वत् (त्), तावत्संख्यकः -का -कं, तत्संख्यकः &c.; 'so great, so large,' एतावान् &c., एतावन्महान् &c., ईदृशः -शी -शं, ईदृक्महान् &c.; 'so long,' तावत्; 'so long a time,' तावत्कालं; 'there is no body so small but that it may be divided in half,' न तादृगल्पः परिमाणांशो यस्य अर्द्धं कल्पयितुम् अशक्यं; 'he is not so sagacious as to discriminate,' न तस्य ईदृग् विज्ञानम् अस्ति परिच्छेत्तुं; 'am I so weak that the goods in my house are to be carried off by the sea?' किम् अहं दुर्बलो मम गृहस्थभाण्डानि समुद्रेण अपहरिष्यामि; 'let it be ascertained whether he is worthy to receive so large a salary,' ज्ञायतां किम् उपयुक्त एतावद् वर्त्तनं गृह्णाति; 'so true is it,' यत्सत्यम् अस्ति.—(Therefore) ततस्, तस्मात्, तेन.—(So so, indifferent) तावन्मात्रं, यावन्मात्रं.—(So and so) expressed by अमुक in comp.; as, 'Mr. So and so,' अमुकनामा *m.* (न्), अमुकजनः.

To SOAK, *v. a.* चिरेण जलसिक्तं -क्तां कृ, चिरकालं जलेन सिच् (c. 6. सिञ्चति, सेक्तुं), चिरेण जलस्थं -स्थां कृ, चिरकालं जलेन समाप्लु (c. 10. -प्लावयति -यितुं) or जलसमाप्लुतं -तां कृ or आर्द्रीकृ or क्लिद् (c. 10. क्लेदयति -यितुं) or समुष्ण् (c. 1. -उष्णति -ष्णितुं) or अभ्युष्.

SOAKED, *p. p.* चिरेण सिक्तः -क्ता -क्तं, चिरसिक्तः &c., चिरक्लेदितः -ता -तं, चिरजलस्थः -स्था -स्थं, चिरजलस्थितः -ता -तं, प्रक्लिन्नः -न्ना -न्नं, आर्द्रः -र्द्रा -र्द्रं, समुष्णितः -ता -तं.

SOAP, *s.* सज्जिः *f.*, सज्जिका, क्षारः, सज्जीक्षारः, अभ्यङ्गनं, अभ्यङ्गनं, मार्जनतैलं, मार्जनलेपः, मेदस् *n.*, प्रदेहः, स्नेहः.

To SOAP, *v. a.* सज्जिकया अभ्यङ् or अभ्यभ्यङ् or लिप्, सज्जिकालिप्तं कृ.

SOAP-BERRY-PLANT, *s.* अरिष्टः, रिष्टः, फेनिलः.

SOAPY, *a.* मेदुरः -रा -रं, चिक्कणः -णा -णं, सज्जिकालिप्तः -प्ता -प्तं.

To SOAR, *v. n.* ऊर्द्धं or ऊर्द्ध्वं गम् (c. 1. गच्छति, गन्तुं), ऊर्द्धं डी (c. 4. डीयते, c. 1. डयते -यितुं), उड्डी, प्रोड्डी, उड्डीनं कृ, उड्डयनं कृ, ऊर्द्धं विहायसा गम् or नभसा गम् or पियति विसृप् (c. 1. -सर्पति -सर्प्तुं), ऊर्द्धगमनं कृ, ऊर्द्धारोहणं कृ, नभोगमनं कृ, उत्क्रमणं कृ.

SOARER, *s.* ऊर्द्धगामी *m.* (न्), आकाशगामी *m.*, उड्डीनकारी *m.*, उड्डयनकृत्.

SOARING, *s.* उड्डीनं, उड्डयनं, ऊर्द्धगमनं, ऊर्द्धगतिः *f.*, नभोगमनं, नभोगतिः *f.*, उपरिगमनं, उत्क्रमणं, ऊर्द्धारोहणं.

SOARING, *part.* उड्डीयमानः -ना -नं, आकाशगामी -मिनी -मि (न्).

To SOB, *v. n.* (Make a convulsive sound in crying) गद्गद (nom. गद्गदायति), गद्गदं कृ, क्रन्दनमध्ये गद्गदध्वनिं कृ, गद्गदशब्देन क्रन्द् (c. 1. क्रन्दति -न्दितुं) or रुद् (c. 2. रोदिति -दितुं) or प्ररुद्, गद्गदशब्देन क्रन्दनं कृ, छन्छन (nom. छन्छनायते), छन्छनशब्दं कृ.

SOB, SOBBING, *s.* गद्गदः, गद्गदध्वनिः *m.*, गद्गदशब्दः, गद्गदशब्दसहितक्रन्दनं, क्रन्दनं, रोदनं, छन्छनशब्दः, फूत्कारः, फुत्कारः.

SOBER, *a.* (Not drunk) अमत्तः -त्ता -त्तं, निर्मदः -दा -दं, अप्रमोदः -दा -दं, अनागतमदः -दा -दं.—(Temperate in drink) पानाप्रसक्तः -क्ता -क्तं, परिमितपानी -निनी -नि (न्), मितपानी &c., यतपानी &c., पानसंयमी &c.—(Not wild or extravagant, serious) धीरः -रा -रं, स्थिरः -रा -रं, नियतः -ता -तं, नियमी &c., विनीतः -ता -तं, नियतवृत्तिः -त्तिः -त्ति, विचारबुद्धिः -द्धिः -द्धि, विचारशीलः -ला -लं, विचारी &c., अमत्तः -त्ता -त्तं, स्थिरमतिः -तिः -ति, स्थिरबुद्धिः -द्धिः -द्धि, गम्भीरवृत्तिः &c.

To SOBER, *v. a.* निर्मदीकृ, मदहीनं -नां कृ, नियतीकृ, स्थिरीकृ, धीरीकृ.

SOBERED, *p. p.* निर्मदीकृतः -ता -तं, विगतमदः -दा -दं, क्षीणक्षैव्यः -व्या -व्यं.

SOBERLY, *adv.* धीरवत्, विनीतवत्, सविनयं, नियतवत्, विचारपूर्व्वं.

SOBER-MINDED, *a.* धीरमनस्कः -स्का -स्कं, गम्भीरमनस्कः &c., स्थिरबुद्धिः &c.

SOBERNESS, SOBRIETY, *s.* (Freedom from intoxication) अमत्तता, अप्रमोदिता, निर्मदत्वं, मदहीनता, मदाभावः.—(Temperance in drink) पानसंयमः, पानाप्रसक्तिः *f.*, पानाप्रसक्तता, परिमितपानं, मितपानं.—(Seriousness) धीरता, गम्भीरता, गाम्भीर्य्यं, स्थिरता, स्थैर्य्यं, विनीतता, विनयः, विचारशीलता, नियतवृत्तिः *f.*, अमत्तता.

SOCIABLE, *a.* जनसङ्गप्रियः -या -यं, सङ्गप्रियः &c., जनसङ्गासक्तः -क्ता -क्तं, संलापप्रियः -या -यं, सम्भाषणप्रियः &c., सङ्गशीलः -ला -लं, संलापशीलः &c., स्नेहबुद्धिः -द्धिः -द्धि, सुशीलः -ला -लं.

SOCIABILITY, SOCIABLENESS, *s.* सङ्गप्रियता, सङ्गप्रीतिः *f.*, सङ्गासक्तिः *f.*, जनसङ्गप्रीतिः *f.*, जनसङ्गप्रियता, संलापप्रियता, संलापासक्तिः *f.*, संलापशीलता, स्नेहबुद्धिः *f.*, सुशीलता.

SOCIABLY, *adv.* सङ्गासक्तत्वात्, जनसङ्गासक्तत्वात्, स्नेहबुद्ध्या, सुशीलवत्.

SOCIAL, *a.* (Pertaining to society) सांसर्गिकः -की -कं, सांसृष्टिकः -की -कं, जनसंसर्गसम्बन्धी -न्धिनी -न्धि (न्), सांसृष्टिकः &c., सहवाससम्बन्धी &c., सहवासविषयकः -का -कं, सहभावसम्बन्धी &c.; 'social duty,' जनाचारः.—(Ready to unite in friendly converse) सङ्गप्रियः -या -यं, सङ्गमशीलः -ला -लं, संसर्गशीलः &c., संवासशीलः &c., समागमशीलः &c., अनेकचरः -रा -रं, सहचरः &c., *see* SOCIABLE.—(Consisting in mutual converse) संसर्गरूपः -पा -पं, सङ्गरूपः &c., प्रतिभाववान् -वती -वत् (त्).

SOCIETY, *s.* (Association, consociation) संसर्गः, सङ्गः, सङ्गमः, सङ्गतिः *f.*, समागमः, सहवासः, संवासः, सहभावः, साकं, साहचर्य्यं, साहित्यं, सहायता, साहायं, लोकयात्रा, उपपत्तिः *f.*—(Community, body of people) जनसमूहः, लोकसमूहः, लोकसङ्गः, पंक्तिः *f.*, सभा, समाजः, मण्डली; 'good society,' सभा; 'fit for it,' सभ्यः -भ्या -भ्यं; 'not fit for it,' असभ्यः -भ्या -भ्यं, अपांक्तेयः -या -यं, अपांक्त्यः -क्त्या -क्त्यं, अपांक्तः &c.—(Corporate body) श्रेणी -णिः *m. f.*, ग्रामसङ्घः.

SOCK, *s.* पादवस्त्रं, पादरक्षा -क्षणं, पादच्छदः, पादपरिधानं.

SOCKET, *s.* पात्रं, आधारः, आधानं, गर्भः, कूपः, गर्त्तः, भाजनं.

SOD, *s.* तृणावृतभूमिखण्डः, घासावृतभूमिखण्डः, सतृणभूमिखण्डः.

SOD, *a.* सज्जिः *f.*, सज्जिका, सज्जिकाक्षारः, क्षारः, मुञ्जिकाक्षारः, कापोतः, सौवर्चलं, रुचकं, वज्रक्षारः -रं, मुखवर्चकः, भ्रुग्निका, काचमलं.

To SODER, *v. a.* *See To* SOLDER.

SODOMITE, *s.* गुदमैथुनकृच्च *m.* (न्), गुदमैथुनकारी *m.*, पुंमैथुनकृत्.

SODOMY, *s.* गुदमैथुनं, पुंमैथुनं, पायुमैथुनं.

SOEVER. Expressed by prefixing the relative to the interrogative, with the affixes चित्, अपि or चन; thus, 'whosoever,' यः कश्चित्; 'whatsoever,' यत् किञ्चित्; 'wheresoever,' यत्र कुत्रचित्; 'whensoever,' यदा कदाचित्, or by doubling the relative, thus यो यः, यद् यत्, यत्र यत्र, यदा यदा; 'any soever,' कश्चित्, काचित्, किञ्चित्; 'at any time whatsoever,' कदाचित्.

SOFA, *s.* केलिशयनं, केलिशय्या, पर्य्यङ्कः, शय्या, शयनं, शयनीयं.

SOFT, *a.* (Not hard or rough) मृदुः -दुः -दु, मृदुलः -ला -लं, कोमलः &c., मसृणः -णा -णं, स्निग्धः -ग्धा -ग्धं, मृदुस्पर्शः -र्शा -र्शं, सुखस्पर्शः -र्शा -र्शं, श्लक्ष्णः -क्ष्णा -क्ष्णं, मेदुरः -रा -रं, सुकुमारः &c., बालेयः -या -यं, मरालः -ला -लं, अखरः -रा -रं, अप्रखरः &c., अकर्कशः -शा -शं, अपरूषः -षा -षं, अनुग्रः -ग्रा -ग्रं, अकठिनः -ना -नं, अकठोरः -रा -रं.—(Wanting firmness, flaccid) शिथिलः -ला -लं, अदृढः -ढा

-दं, अघनः -ना -नं.—(Mild, gentle) सौम्यः -म्या -म्यं. मृदुः &c., मृदुस्वभावः -वा -वं.—(Weak in mind) अल्पबुद्धिः -द्धिः -द्धि, बालिशबुद्धिः &c., सुवचनीयः -या -यं.—(Having a soft voice) मृदुस्वरः -रा -रं, मधुरस्वरः &c.

SOFT, *interj.* नीचैस्, नीचकैस्, तूष्णीं, तूष्णीम्भव, शान्तं.

To SOFTEN, *v. a.* मृदूकृ, कोमलीकृ, यद् (nom. यदयति -यितुं), शम् in caus., सान्त्व् or शान्तं, दम् in caus., स्निग्धीकृ, करुणार्द्रीकृ. *See To* MOLLIFY, MELT, *v. a.*

To SOFTEN, *v. n.* मृदूभू, कोमलीभू, स्निग्धीभू, शम् (c. 4. शाम्यति, शमितुं), प्रशम्, शान्तः -न्ता -न्तं भू, दयार्द्रीभू. *See To* MELT, *v. n.*

SOFTENED, *p. p.* मृदूकृतः -ता -तं, शमितः &c., स्निग्धीभूतः -ता -तं.

SOFTENING, *part.* or *a.* शान्तिदः -दा -दं, शान्तिकः -की -कं, शान्तिकरः -री -रं.

SOFTLY, *adv.* शनैस्, शनैः शनैस्, शनकैस्, मन्दं, मृदु, समादेवं.

SOFTNESS, *s.* मृदुता, मार्दवं, यदिमा *m.* (न्), कोमलता, स्निग्धता -त्वं, मृदुस्पर्शता -त्वं, सुखस्पर्शता -त्वं, सुकुमारता -त्वं, सौकुमार्यं, अखरता, अकर्कशता -त्वं, अकठिनता, अकाठिन्यं, शिथिलता, शैथिल्यं; 'of voice,' स्वरमधुरता -माधुर्यं.

To SOIL, *v. a.* मलिन (nom. मलिनयति -यितुं), मलिनीकृ, कलङ्क (nom. कलङ्कयति -यितुं), दुष् (c. 10 दूषयति -यितुं), लिप्. *See To* STAIN.

SOIL, *s.* (Dirt, stain) मलं, परिमलं, कलुषं, कलङ्कः, कल्कं, म्लानिः *f.*, परिम्लानं.—(Mould, earth) मृत्तिका, मृद् *f.*, मृदा, भूमिः *f.*, भूः *f.*, स्थलं -ली, पांशुः *m.*, खलं; 'good soil,' मृत्ला, मृत्सा, मृदिनी; 'fertile soil,' उर्व्वरा, ऊर्व्वरा; 'dry or barren soil,' मरुः *m.*, मरुस्थलं -ली, ईरिणं -णा, इरिणं; 'salt soil,' ऊषः, ऊषरः, उषः, क्षारमृत्तिका; 'having salt soil,' ऊषरः -रा -रं, ऊषवान् -वती -वत् (त्); 'untilled or waste soil,' खिलः, अप्रहतभूमिः *f.*; 'stony,' शर्करा; 'a black soil,' नीलमृत्तिका, कृष्णमृद् *f.*, कृष्णमृत्तिका, कृष्णभूमिः *f.*; 'pale soil,' पाण्डुमृत्तिका; 'native soil,' जन्मभूमिः *f.*, जन्मवसुधा; 'mountain-soil,' गिरिमृद्; 'soil fertile with every crop,' सर्व्वशस्याढ्यभूमिः *f.*

SOILED, *p. p.* मलिनितः -ता -तं, मलिनीकृतः &c., कलङ्कितः &c., परिमलितः &c., दूषितः -ता -तं, लिप्तः -प्ता -प्तं, अवलिप्तः &c., विलिप्तः &c., कलुषितः &c., मलिनः -ना -नं, कल्की -ल्किनी &c.; 'having soiled hands,' लिप्तहस्तः -स्ता -स्तं.

To SOJOURN, *v. n.* (Dwell for a time) कियत्कालं or अल्पकालपर्य्यन्तं वस् (c. 1. वसति, वस्तुं) or निवस्, प्रवस्, प्रवासं कृ, कियत्कालं स्था or वृत् or आस् or अध्यास्, देशान्तरे or परदेशे वस्, देशान्तरम् अधिवस् or आवस्, *see To* LODGE, *v. n.*

SOJOURN, SOJOURNING, *s.* प्रवासः -सनं, प्रवसनं, कियत्कालपर्य्यन्तवासः, अल्पकालनिवासः, अदीर्घवासः, देशान्तरवासः, देशान्तराधिवासः, परदेशवासः, देशान्तरसेवनं, परदेशसेवनं, देशान्तरावलम्बनं.

SOJOURNER, *s.* प्रवासी *m.* (न्), प्रवसन् *m.* (त्), प्रोषितः, देशान्तरवासी *m.* (न्), देशान्तराधिवासी *m.*, परदेशवासी, देशान्तरसेवी *m.*, परदेशसेवी.

To SOLACE, *v. a.* सान्त्व् or शान्तव्, आश्वस् in caus., विनुद् (c. 10. -नोदयति -यितुं), *see To* COMFORT, CONSOLE; 'to solace one's self,' आत्मानं विनुद्.

SOLACE, *s.* सान्त्वनं -ना, परिसान्त्वनं, आश्वासनं, विनोदः -दनं, आपत्प्रतीकारः, क्लेशापहरणं, शोकापनोदः -दनं, क्लेशशान्तिः *f.*, शोकशान्तिः *f.*, दुःखशान्तिः *f.*, शोकापहरणं.

SOLAR, SOLARY, *a.* सौरः -री -रं, सवित्रियः -या -यं, सवितृलः -ला -लं, सावनः -नी -नं, सूर्य्यसम्बन्धी -न्धिनी -न्धि (न्), सूर्य्यविषयकः -का -कं, सूर्य्य in comp., सूर्क in comp.; 'solary dynasty,' सूर्य्यवंशः; 'solar day,' सौरसावनदिनं, सावनदिनं, सौरदिनं; 'solar month,' सौरमासः, सावनमासः; 'solar year,' सौरवर्षः, सूर्कवर्षः.

SOLD, *p. p.* विक्रीतः -ता -तं, पणितः &c.; 'having sold,' विक्रीय.

To SOLDER, *v. a.* द्रुतधातुमयलेपेन संलग्नीकृ, द्रुतसीसकादिना सन्धा.

SOLDER, *s.* द्रुतधातुमयलेपः, द्रुतसीसकादिमयलेपः, धातुमयलेपः.

SOLDIER, *s.* सैन्यः, सैनिकः, आयुधिकः. आयुधीयः, योद्धा *m.* (द्धृ), योधः, शस्त्रजीवी *m.* (न्), शस्त्राजीवः, शस्त्रधरः, शस्त्रभृत् *m.*, शस्त्रधारी *m.* (न्), शस्त्रोपजीवी *m.*, युद्धोपजीवी *m.*, युद्धजीवी *m.*, अस्त्रधरः, अस्त्रधारी *m.*, अस्त्रभृत् *m.*, अस्त्रजीवः, युधानः, चमूचरः, सेनाचरः, तन्त्री *m.*, काण्डस्पृष्टः, काण्डपृष्ठः; 'man of the military class,' क्षत्रियः, क्षत्रः, क्षत्री *m.*, राजन्यः, राजपुत्रः, विराट् *m.* (ज्).

SOLDIER-LIKE, SOLDIERLY, *a.* सैन्ययोग्यः -ग्या -ग्यं, सैन्योपयुक्तः -क्ता -क्तं, सैनिकः -की -कं, आयुधीयः -या -यं, योधसम्बन्धी &c., सैन्यसम्बन्धी &c.

SOLDIERY, *s.* सैन्यसमूहः, सैनिकवर्गः, योधसमूहः, राजन्यकं, योद्धृत्वं.

SOLE, *s.* (Of the foot) तलं, पादतलं; 'from the sole of the foot to the head,' आपादतलमस्तकात्, आपादमस्तकात्.—(Of a shoe) तलः, पादुकातलः, पादुकाधोभागः.

SOLE, *a.* एकः -का -कं, एकाकी -किनी -कि (न्), केवलः -ला -लं, केवली &c., कैवल्यः -ल्या -ल्यं, अद्वितीयः -या -यं. *See* SINGLE.

SOLECISM, *s.* अपशब्दः, अपभंशः, अशुद्धशब्दः, अशुद्धप्रयोगः, म्लेच्छितं, अपप्रयोगः, अप्रयोगः, अवचनीयता.

SOLELY, *adv.* केवलं, मात्रं -त्रेण -त्रात्, एकान्ततस्, एकतस्.

SOLEMN, *a.* (Attended with religious rites) विधिपूर्ब्बः -र्ब्बा -र्ब्बं, देवकर्म्मसहितः -ता -तं, संस्कारसहितः &c., पुण्यविधिसहितः &c., पुण्यसंस्कारसहितः &c., धर्म्मसंस्कारपूर्ब्बः -र्ब्बा -र्ब्बं, धर्म्मसंस्कारसहितः -ता -तं, धर्म्मक्रियासहितः &c.—(Serious, grave) गुरुः -रुः -रु, गुर्व्वीः -र्व्वी -र्व्वं, गम्भीरः -रा -रं, गभीरः &c., गम्भीरार्थः &c., धीरः -रा -रं, अलघुः -घुः -घ्वी -घु.—(Attended with a serious promise, consisting of a solemn asseveration) दृढप्रतिज्ञापूर्ब्बः -र्ब्बा -र्ब्बं, दृढप्रतिज्ञारूपः -पा -पं, गुरुप्रतिज्ञापूर्ब्बः &c., दृढनिश्चयपूर्ब्बः &c., दृढनिश्चयरूपः &c., दृढनिश्चयात्मकः -का -कं; 'a solemn pledge,' दृढप्रतिज्ञा, अलघुप्रतिज्ञा.

SOLEMNITY, SOLEMNNESS, *s.* (Seriousness, gravity) गुरुता -त्वं, गौरवं, गम्भीरता, गाम्भीर्य्यं, अलघुता, धीरता.—(Religious ceremony) धर्म्मक्रिया, पुण्यक्रिया, देवक्रिया, संस्कारः, उत्सवः. *See* RITE.

To SOLEMNIZE, *v. a.* (Perform according to ritual forms) यथाविधि or यथाशास्त्रं कृ or अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), विधिवत् कृ or अनुष्ठा or निर्वह् (c. 10. -वाहयति -यितुं), विधिपूर्ब्बं कृ or अनुष्ठा.—(Make grave or serious) गम्भीरीकृ, धीरत्वं कृ or जन्, गुरुत्वं or गौरवं कृ or जन्; 'the mind,' चित्रधीरत्वं जन्, चित्तगौरवं कृ.

SOLEMNLY, *adv.* (According to ritual form) यथाविधि, यथाशास्त्रं, विधिवत्, विधिपूर्ब्बं, पुण्यविधिपूर्ब्बं.—(Seriously) सगौरवं, गौरवेण, गम्भीरं, सगाम्भीर्य्यं, अलघु, अलाघवेन.—(With solemn asseveration) दृढप्रतिज्ञापूर्ब्बं, दृढनिश्चयपूर्ब्बं, गुरुप्रतिज्ञापूर्ब्बं. 'solemnly pledged,' अलघुप्रतिज्ञः -ज्ञा -ज्ञं.

To SOLICIT, *v. a.* प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अभ्यर्थ्, अर्थ्, विनयेन प्रार्थ् or याच्. *See To* IMPLORE, ENTREAT, BEG.

SOLICITATION, *s.* प्रार्थनं -ना, अभ्यर्थना, अर्थः, याचना, सनिः -नी *m. f.*, अभ्येषणा; 'affectionate solicitation,' प्रणयः, प्रश्रयः, प्रसरः.

SOLICITED, *p. p.* प्रार्थितः -ता -तं, अभ्यर्थितः &c., विनयेन याचितः -ता -तं

or उपयाचितः -ता -तं or प्रयाचितः &c. *See* Implored.

Solicitor, *s.* प्रार्थयिता *m.* (तृ), प्रार्थकः, याचकः, उपयाचकः.—(Attorney) प्रतिनिधिः *m.*, प्रतिपुरुषः.

Solicitous, *a.* (Eagerly anxious about) उत्सुकः -का -कं, व्यग्रः -ग्रा -ग्रं, उत्कः -त्का -त्कं, उत्कण्ठितः -ता -तं, सोत्कण्ठः -ण्ठा -ण्ठं.—(Careful, anxious) उद्विग्नः -ग्ना -ग्नं, चिन्तायुक्तः -क्ता -क्तं, चिन्तायस्तः -स्ता -स्तं, चिन्ताक्रान्तः -न्ता -न्तं, विधुरः -रा -रं, चिन्तितः -ता -तं, भावितः &c.

Solicitude, *s.* औत्सुक्यं, उत्सुकता -त्वं, व्यग्रता -त्वं, उत्कण्ठा, उद्विग्नता, उद्वेगः, चिन्ता, चिन्तावेदना, हृदयवेदना, अनुध्यानं.

Solid, *a.* (Hard, firm, compact) घनः -ना -नं, दृढः -ढा -ढं, मृदृढः &c., संहतः -ता -तं, सुसंहतः &c., दृढसन्धिः -न्धिः -न्धि, जरठः -ठा -ठं, ग्रावा -वा -व (न), कक्खटः -टा -टं, *see* Hard.—(Not hollow) सगर्भः -र्भा -र्भं, गर्भपूर्णः -र्णा -र्णं, अशून्यः -न्या -न्यं.—(Not liquid) अद्रवः -वा -वं, द्रवेतरः -रा -रं, अद्रुतः -ता -तं, घनः -ना -नं, अप्रवाही -हिणी -हि (न); 'solids,' अद्रवद्रव्याणि *n. pl.*, अद्रवपदार्थाः *m. pl.*—(Substantial) वास्तवः -वी -वं, सारवान् -वती -वत् (त्), घनः -ना -नं; 'solid food,' चर्व्यं; 'solid hoofed,' एकशफः -फा -फं.

Solid, *s.* (In geometry) घनः; 'its contents,' घनफलं.—(Something not liquid) अद्रवद्रव्यं, अद्रवपदार्थः, घनद्रव्यं, घनपदार्थः.

Solidity, **solidness**, *s.* घनता -त्वं, दृढता -त्वं, संहतत्वं, अद्रवता -त्वं, कठिनता, काठिन्यं, अद्रुतता, अप्रवाहिता.

Solidungulate, **solidungulous**, *a.* एकशफः -फा -फं, एकखुरः -रा -रं.

Soliloquy, *s.* आत्मगतभाषणं, आत्मभाषणं, स्वगतभाषणं, स्वगतवाक्यं.

Solitarily, *adv.* विविक्तं, एकान्ततस्, निभृतं, रहस्, रहसि, उपांशु.

Solitariness, *s.* विविक्तता, एकान्तत्वं, एकाकित्वं. *See* Solitude.

Solitary, **solitaire**, *s.* विविक्तवासी *m.* (न्), वनवासी *m. See* Recluse.

Solitary, *a.* (Living alone, going alone) विविक्तवासी -सिनी -सि (न्), एकान्तवासी &c., विविक्तसेवी &c., एकान्तसेवी &c., विविक्तप्रियः -या -यं, विजनप्रियः -य्या -य्यं, विजनसेवी &c., निर्जनप्रियः &c., विविक्तचरः -रा -रं, एकचरः &c., एकान्तचरः &c., असंसर्गः -र्गा -र्गं, असङ्गः -ङ्गा -ङ्गं, जनसंसर्गरहितः -ता -तं, जनसंसर्गशून्यः -न्या -न्यं.—(Retired, said of places) निर्जनः -ना -नं, विजनः &c., निर्मनुजः -जा -जं, निर्मनुष्यः -ष्या -ष्यं, विविक्तः -क्ता -क्तं, निभृतः -ता -तं, एकान्तः -न्ता -न्तं, निःशलाकः -का -कं, लुप्तः -प्ता -प्तं, छन्नः -न्ना -न्नं, *see* Lonely.—(Single) एकः -का -कं, एकाकी -किनी &c., असहायः -या -यं.

Solitude, *s.* (Lonely state) विविक्तता, विविक्तदृशा, विविक्तवृत्तिः *f.*, विविक्तवासित्वं, एकान्तता, एकान्तवृत्तिः *f.*, एकाकिता, जनसंसर्गहीनता, संसर्गाभावः, जनसंसर्गाभावः, असहायता.—(Loneliness, said of places) विविक्तता, निर्जनता, विजनता, निर्मनुष्यता, *see* Loneliness.—(Lonely place, desert) विविक्तस्थानं, विविक्तस्थलं, अरण्यं, वनं, वसुरं, वसूरं.

Solo, *s.* एकाकिगानं, एकाकिगीतं, एकाद्यस्वरः, एकाकिस्वरः.

Solstice, *s.* अयनं, अयनान्तः, अयनकालः, अयनसन्धिः *m.*, अयनसन्धिकालः, क्रान्तिः *f.*, क्रान्तिकालः; 'summer solstice,' उत्तरायणं, उत्तरक्रान्तिः; 'winter,' दक्षिणायनं, दक्षिणक्रान्तिः *f.*, याम्यायनं.

Solstitial, *a.* अयनान्तसम्बन्धी -न्धिनी -न्धि (न्), अयनसम्बन्धी &c., क्रान्तिसम्बन्धी &c., अयनान्तकालिकः -की -कं; 'solstitial point,' अयनं, अयनसन्धिः *m.*, अयनान्तः.

Solubility, **solubleness**, *s.* द्राव्यता -त्वं, विद्राव्यता -त्वं, द्रावणीयता, गलनीयता, याव्यता -त्वं, विलयनीयता, द्रावणशक्यता.

Soluble, *a.* द्राव्यः -व्या -व्यं, द्रावणीयः -या -यं, विद्राव्यः &c., याव्यः -व्या -व्यं, विलयनीयः -या -यं, द्रावणशक्यः -क्या -क्यं, गलनीयः -या -यं, द्रवार्हः -र्हा -र्हं. *See* Dissolvable.

Solution, *s.* (The act) द्रावणं, विद्राव्णं, विलयनं, गलनं, विगलनं.—(The state) द्रवत्वं, द्रुतत्वं, विद्रुतता, विलीनता, समाधानं, संयोगः.—(Chemical union) द्रवमूलकसारूप्यसंयोगः, द्रवमूलकसंयोगः, संयोगः, योगः.—(Explanation) ज्ञापनं, ज्ञापनिका, व्याख्या -ख्यानं, विख्यापनं, शोधनं, परिशोधनं; 'of a difficult verse,' श्लोकज्ञापनं; 'of a riddle,' क्षित्रिः *f.*—(Of doubt) संशयनिर्वृत्तिः *f.*

To **solve**, *v. a.* (Dissolve) द्रवीकृ, विद्रु in caus., विली in caus.—(Explain, resolve) व्याख्या (c. 2. -ख्याति -तुं), ली in caus. (लापयति -यितुं), लापनं कृ, शुध् (c. 10. शोधयति -यितुं), परिशुध्; 'a problem,' साध् (c. 10. साधयति -यितुं), सिद्धीकृ; 'a doubt,' संशयं छिद् (c. 7. छिनत्ति, छेत्तुं) or उच्छिद्, संशयम् अपनी or अपहृ.

Solved, *p. p.* व्याख्यातः -ता -तं, लापितः &c., छिन्नः -न्ना -न्नं; 'as a problem,' सिद्धः -द्धा -द्धं; 'is solved,' सिध्यति.

Solvency, *s.* ऋणशोधनक्षमता, ऋणशोधनशक्तिः *f.*, ऋणाधिकधनवत्त्वं, ऋणाधिकधनिता, ऋणाधिकधनसम्पत्तिः *f.*, ऋणापकरणक्षमता.

Solvent, *a.* (Having the power of dissolving) द्रावकः -का -कं, विद्रावकः &c., द्रावकरः -रा -रं, द्रवकरः &c., सावकः -का -कं.—(Able to pay) ऋणशोधनक्षमः -मा -मं, ऋणपरिशोधनक्षमः &c., ऋणापकरणक्षमः &c., ऋणाधिकधनः -ना -नं, ऋणाधिकधनसम्पन्नः -न्ना -न्नं.

Solvent, *s.* (Menstruum) द्रावकरसः, योगवाही *m.* (न्), द्रावणं.

Solver, *s.* व्याख्याता *m.* (तृ), विख्यापकः, लेत्ता *m.*, उच्छेदी *m.* (न्).

Somber, **sombre**, *a.* न्यूनप्रभः -भा -भं, न्यूनतेजाः -जाः -जः (स), अल्पतेजाः &c., मन्दप्रभः -भा -भं, मलिनप्रभः &c., धूमरः -री -रं, श्यामः -मा -मं.

Some, *a.* (A certain quantity of a thing, a small quantity) किञ्चित, कियत, ईषत, अल्पभागः, अल्पांशः, अंशः, अल्पिका, अल्पं; 'some water,' किञ्चिज्जलं, कियज्जलं, ईषज्जलं, जलांशः; 'some seed,' कियन्ति बीजानि; 'some bread,' अपूपांशः, कियान् अपूपः, अपूपान्यभागः, अपूपस्य अल्पांशः; 'some meat,' किञ्चिन्मांसं, मांसाल्पभागः, मांसाल्पिका; 'for some distance,' कियद्दूरं, कियत्पर्य्यन्तं; 'for some time,' कियत्कालं, किञ्चित्कालं, कतिचित्कालं; 'some time afterwards,' कियत्कालात्परं; 'to some extent,' किञ्चित, ईषत.—(A certain number, a few, said of things) अल्पः -ल्पा -ल्पं, कतिपयः -या -यं, कतिचित, अनेकः -का -कं; 'some days,' कतिपयदिनानि *n. pl.*; 'some paces,' कतिचित्पदानि *n. pl.*, कतिपयपदानि; 'some trees,' कतिपयवृक्षाः *m. pl.*, कतिचिद्वृक्षाः *m. pl.*, कतयश्चिद् वृक्षाः; 'in some trees,' कतिचिद्वृक्षेषु, कतिपुचिद् वृक्षेषु.—(A certain number, few, said of persons) कश्चित् *m. sing.*, काचित् *f.*, कञ्चन *m. sing.*, काचन *f.*, को ऽपि *m. sing.*, कापि *f.*, कतिपय in comp., कतिचित्, कतयश्चित् *m. pl.*; 'some persons,' केचित्, केपि, कतिचिज्जनाः *m. pl.*, कतिपयजनाः *m. pl.*, केचिज्जनाः, कतिपयलोकाः *m. pl.*; 'of some persons,' केषाञ्चित्, केषामपि.—(Denoting a person or thing not definite) अमुकः -का -कं, or expressed by the affixes चित्, अपि or चन after the interrogative; as, 'some person,' अमुकजनः, कश्चित्, कश्चिज्जनः; 'having some name or other,' अमुकनामा *m.* (न्); 'some place or other,' अमुकस्थानं, किञ्चित्स्थानं; 'some day,' कदाचित्, कदापि; 'by some means or other,' *see* the next.

Some-how, *adv.* कथञ्चित्, कथञ्चन, कथमपि, कथं कथमपि, यथाकथञ्चित्.

SOME-ONE, SOME-BODY, *s.* कश्चित् *m.*, काचित् *f.*, को ऽपि *m.*, कापि *f.*, कश्चन *m.*, काचन *f.*, कश्चिज्जनः, को ऽपि जनः, अमुकः *m.*, अमुका, अमुकजनः; यः कश्चित्, यः कश्चन; 'of some one,' कस्यचित्, कस्यापि; 'by some one,' केनचित्, केनापि; 'to some one,' कस्मैचित्.

SOMER-SAULT, SOMERSET, *s.* ऊर्द्धपादवल्गितं, ऊर्द्धचरणवल्गितं.

SOMETHING, *s.* किञ्चित्, किमपि, किञ्चन, यत्किञ्चित्, अल्पं, स्वल्पं.

SOMETIME, *adv.* (Formerly) पुरा, पूर्व्वं, पूर्व्वकाले, पुरस्तात्, प्राक्.—(At some future time) परकाले, अतःपरं, *see* HEREAFTER.

SOMETIMES, *adv.* कदाचित्, कदापि, कदाचन, कर्हिचित्, जातु.

SOMEWHAT, *s.* किञ्चित्, किमपि, किञ्चन, यत्किञ्चित्. *See* LITTLE, *s.*

SOMEWHAT, *adv.* किञ्चित्, ईषत्, कियत्, आ prefixed, कल्प or देश्य or देशीय affixed; 'somewhat less,' किञ्चिन्यूनः -ना -नं, ईषदूनः &c.; 'somewhat eloquent,' पटुकल्पः -ल्पा -ल्पं, पटुदेश्यः -श्या -श्यं, पटुदेशीयः -या -यं; 'somewhat blue,' आनीलः -ला -लं; 'somewhat ruddy,' आताम्रः -म्रा -म्रं.

SOMEWHERE, *adv.* क्वचित्, क्वापि, कुत्रचित्, कुत्रापि, कुत्रचन, यत्रकुत्रचित्, यत्रकुत्रापि; 'from somewhere,' कुतश्चित्, कुतश्चन.

SOMNAMBULISM, *s.* निद्राचारः, निद्रापरिक्रमः, निद्राभ्रमणं, स्वप्नचारः.

SOMNAMBULIST, *s.* निद्राचारी *m.* (न्), निद्रापरिक्रमी *m.*, स्वप्नचारी *m.*

SOMNIFEROUS, SOMNIFIC, *a.* निद्राकरः -री -रं, स्वप्नकारी -रिणी -रि (न्), स्वप्नकृत् *m. f. n.*, निद्राजनकः -का -कं, स्वप्नजनकः &c., सुप्तिजनकः &c., सुप्तिकारकः &c., सौप्तिकः -की -कं, नैद्रः -द्री -द्रं.

SOMNILOQUIST, *s.* निद्राभाषी *m.* (न्), निद्रालापी *m.*, स्वप्नभाषी *m.*

SOMNILOQUISM, *s.* निद्राभाषणं, निद्रालापः, स्वप्नभाषणं, स्वप्नप्रलापः.

SOMNOLENCY, SOMNOLENT, *see* SLEEPINESS, SLEEPY.

SON, *s.* पुत्रः. पुत्रकः, सुतः, सूनुः *m.*, तनयः, नन्दनः, आत्मजः, स्वजः, आत्मसम्भवः, अङ्गजः, शरीरजः, तनुजः, तनूजः, तनूजनिः *m.*, प्रसूतः, दारकः, कुमारः, उद्वहः; 'legitimate son,' औरसः, औरस्यः, धर्म्यः; 'son of a rival wife,' सापत्नः; 'of an auspicious mother,' सुभगासुतः; 'of an unmarried woman,' कन्यकाजातः, कानीनः; 'by another's wife,' पारक्षेत्रेयः; 'dutiful and affectionate son,' सत्पुत्रः, सुपुत्रः; 'having a son,' पुत्री *m.* -त्रिणी *f.* (न्), पुत्रवान् *m.* -वती (त्), सपुत्रः -त्रा; 'rejoicing on the birth of a son,' पुत्रोत्सवः, पुत्रानन्दः; 'son and daughter,' पुत्रौ *m. du.*

SON-IN-LAW, *s.* जामाता *m.* (तृ), दुहितृःपतिः *m.*, दुहितुर्भर्त्ता *m.* (र्त्तृ), पुत्रिकाभर्त्ता *m.*, विदृपतिः *m.*, विवाह्यः.

SONG, *s.* गीतं, गानं, गीतिः *f.*, गायनं, गेयं, गाथा, गा, गं, खेलिः *f.*, काकली; 'song with music,' सङ्गीतं, सङ्गीतिः *f.*; 'holy song,' सद्गीतं; 'sweet song,' मधुरगीतं; 'song of victory,' जयशब्दः.

SONGSTER, *s.* गायकः, गाथकः, गाथिकः, गीतकुशलः, *see* SINGER.—(Bird) गायकपक्षी *m.* (न्).

SONLESS, *a.* निष्पुत्रः -त्रा -त्रं, अपुत्रः &c., पुत्रहीनः -ना -नं, अपुत्रकः -का -कं, अपुत्री -त्रिणी -त्रि (न्), अपुत्रीकः -का -कं, पुत्ररहितः -ता -तं.

SONNET, *s.* गीतकं, गीतिका, लघुगीतकं, लघुकविता, काव्यबन्धः.

SONOROUS, SONORIFIC, *a.* शब्दनः -ना -नं, शब्दकारः -री -रं, शब्दकरः -रा -रं, ध्वनिकरः &c., ध्वनिकारकः -का -कं, शब्दजनकः -का -कं, नादजनकः &c., शब्दः -ब्दी -ब्दं, मुखरः -रा -रं, महाशब्दः -ब्दा -ब्दं, नादी -दिनी &c., रवणः -णा -णं.

SONOROUSLY, *adv.* महाशब्देन, महानादेन, महाशब्दपूर्व्वं, महाध्वनिपूर्व्वं.

SONOROUSNESS, *s.* शब्दनत्वं, महाशब्दत्वं, शब्दजनकत्वं, मुखरता.

SONSHIP, *s.* पुत्रत्वं, पुत्रभावः, पुत्रावस्था, पुत्रदशा, पुत्रधर्म्मः.

SOON, *adv.* (In a short time) अचिरेण, अचिरात्, आशु, सद्यस्, अनन्तरं, शीघ्रं, झटिति, सपदि, अञ्जसा, द्राक्, न चिरेण, न चिरात्, माचिरं, हठात्, अदूरात्.—(Without delay) अविलम्बेन, अविलम्बितं, अकालक्षेपेण; 'as soon as,' यावत्, followed by 'so soon,' तावत्, or expressed by च, repeated thus, 'as soon as water was asked, so soon a shower fell into his mouth,' यावद् असु याचितं तावद् धारा मुखे तस्य निपतिता or असु च याचितं धारा च मुखे तस्य निपतिता; or expressed by मात्रात्, *see* IMMEDIATELY.—(Readily, willingly) कामं, प्रकामं.

SOONER, *adv.* (Rather) वरं, *see* RATHER; 'sooner or later,' आदिपश्चात्.

SOOT, *s.* कज्जलं. कज्जलं. दीपकज्जलं, दीपकिट्टं, दीपध्वनं, मषी.

SOOTH, *s.* (Truth) सत्यं, सत्यता; 'in sooth,' सत्यं, सत्यमेव.

To SOOTHE, *v. a.* शम् (c. 10. शमयति -यितुं), उपशम्, प्रशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, अभिशान्त्व्, साम् (c. 10. सामयति यितुं), लल् (c. 10. लालयति -यितुं), अनुनी (c. 1. -नयति -नेतुं), परिमृज्, परामृश्, प्रमृद् (c. 10. -मादयति -यितुं), अभिप्रसद्, विनुद् in caus., आश्वस् in caus., चप (c. 1. चपति -यितुं).

SOOTHED, *p. p.* शमितः -ता -तं, शान्तः -न्ता -न्तं, उपशान्तः &c., कृतशान्तिः -न्तिः -न्ति, कृतसान्त्वनः -ना -नं, लालितः -ता -तं, अनुनीतः &c., विनोदितः &c.

SOOTHER, *s.* शमकः, उपशमकः, सान्त्वनकृत्, सान्त्वयिता *m.* (तृ), लालकः.

SOOTHING, *s.* शमनं, शमः, प्रशमनं, उपशमः -मनं, सान्त्वनं -ना, शान्तिः *f.*, सान्त्वः, लालनं, विनोदः -दनं, तापहरणं, प्रसादनं, आश्वासनं.

SOOTHING, *part.* or *a.* शमकः -का -कं, उपशमकः &c., शान्तिकः -की -कं, शमी -मिनी -मि (न्), शमकारी -रिणी &c., शान्तिकरः -रा -रं, सान्त्वनकरः -रा -रं, लाली &c., आश्वासनशीलः -ला -लं, तापहरः -रा -रं, तापहारी &c.

SOOTHSAYER, *s.* दैवज्ञः, सांवत्सरिकः, साम्वित्तिकः. *See* DIVINER.

SOOTHSAYING, *s.* शाकुनपरीक्षणं, गणना, दैवज्ञानं. *See* DIVINATION.

SOOTY, *a.* कज्जली -लिनी -लि (न्), कज्जलदूषितः -ता -तं, मषीमयः -यी -यं.

SOP, *s.* जूषादिसिक्तः पिष्टकखण्डः, यूषादिसिक्तः पृषखण्डः or जूषपृषखण्डः, जूषसिक्तपिष्टकः, जलादिसिक्तपृषखण्डः, भिक्तपिष्टकः, आर्द्रपिष्टकः.

To SOP, *v. a.* जूषपृषखण्डं or पिष्टकखण्डं यूषादिना सिच् or आर्द्रीकृ.

SOPHIST, SOPHISTER, *s.* आभासवादी *m.* (न्), सिद्धान्ताभासवादी *m.*, सत्याभासवादी *m.*, हेत्वाभासवादी *m.*, हैतुकः, तार्किकः, जल्पकः, चार्व्वाकः, मिथ्याहेतुवादी *m.*

SOPHISTIC, SOPHISTICAL, *a.* आभासात्मकः -का -कं, सत्याभासकः -का -कं, सिद्धान्ताभासकः &c., सत्याभासी -सिनी -सि (न्), सत्यप्रतिभासकः &c., हेत्वाभासरूपः -पा -पं, हैतुकः -की -कं.

SOPHISTRY, SOPHISM, *s.* आभासः, हेत्वाभासः, सिद्धान्ताभासः, सत्याभासः, यक्षाभासः, प्रतिभासः, सिद्धान्तप्रतिभासः, मिथ्याहेतुः *m.*, वाक्छलं, फक्किका.

To SOPHISTICATE, *v. a.* अशुद्धद्रव्यसंसर्गेण दुष् (c. 10. दूषयति -यितुं), हीनद्रव्यमिश्रणेन दुष्, दुष्टद्रव्यसम्पर्केण भ्रष्टीकृ.

SOPHISTICATED, *a.* हीनसंसर्गदूषितः -ता -तं, अशुद्धसम्पर्कदूषितः &c., दूषितः &c.

SOPORIFIC, SOPORIFEROUS, *a.* निद्राकारकः -का -कं, निद्राकारी -रिणी -रि (न्), निद्राजनकः -का -कं, उपशायी &c., स्वापनः -ना -नं. *See* SOMNIFEROUS.

SOPPED, *p. p.* यूषादिसिक्तः -क्ता -क्तं, जूषादिसिक्तः &c., जलादिसिक्तः &c.

Sorcerer, *s.* अभिचारविद् *m.*, अभिचारी *m.* (न्), मायाकारः. *See* Magician.

Sorceress, *s.* मायिनी, मायाकारिणी, माया, पूतना, अभिचारिणी.

Sorcery, *s.* अभिचारः, अभिचारविद्या, मायाविद्या, माया, मायाक्रिया, वशक्रिया, कुविद्या, कुमृतिः *f.*, संघदनं, योगः. *See* Magic.

Sordid, *a.* (Filthy) मलिनः -ना -नं, मलवान् -वती -वत् (त्), मलीमसः -सा -सं.—(Mean, vile) कुत्सितः -ता -तं, जघन्यः -न्या -न्यं, जघन्यवृत्तिः -त्तिः -त्ति, अधमः -मा -मं, *see* Mean, *a.*

Sordidness, *s.* मलिनत्वं, कुत्सितत्वं, जघन्यता, पामरता, अपकृष्टता.

Sore, *s.* क्षतं, व्रणः, त्वक्क्षतं, त्वग्व्रणः, अरुस् *n.*, ईर्म्मं, त्वक्कणडुरः, विपादिका; 'pain of a sore,' व्रणवेदना; 'cleansing or cicatrising of one,' व्रणशोधनं; 'having one,' व्रणी -णिनी &c.; 'causing one,' व्रणकृत्.

Sore, *a.* (Tender to the touch) स्पर्शासहः -हा -हं, स्पर्शासहनः -ना -नं, स्पर्शाक्षमः -मा -मं, स्पर्शदुःखितः -ता -तं; 'a sore eye,' चुक्षः, चिक्षः, पिक्षः; 'having sore eyes,' चुक्षः -क्षी -क्षं, चिक्षः -क्षी -क्षं, पिक्षः -क्षी -क्षं, क्लिन्नाक्षः -क्षा -क्षं.—(Painful, easily pained) वेदनायुक्तः -क्ता -क्तं, सवेदनः -ना -नं, मुलभवेदनः -ना -नं, मुलभव्यथः -था -थं.—(In mind) मनोदुःखी -खिनी -खि (न्), मुलभदुःखः -खा -खं, मुलभतापः -पा -पं.—(Grievous) उग्रः -ग्रा -ग्रं, उग्रक्लेशदः -दा -दं, गुरुक्लेशदः &c., क्लेशदः &c., गुरुः -रुः -रु.

Sore, sorely, *adv.* अत्यन्तं, अतिशयेन, अतिशय in comp., उग्रं, भृशं, *see* Intensely; 'sorely-grieved,' उग्रशोकः -का -कं.

Soreness, *s.* स्पर्शासहत्वं, स्पर्शासहनत्वं, स्पर्शाक्षत्वं, सव्रणत्वं, क्षतत्वं.

Sorrel, *s.* अम्लवेतसः, चुक्रः, चुक्रिका, दलाम्लं, शुक्ता, शतवेधी *m.*, सहस्रवेधी *m.* (न्), लोलिका.

Sorrow, *s.* शोकः, खेदः, दुःखं, मनोदुःखं, शुक् *f.* (च्), क्लेशः, मन्युः *m.*, शोचनं, मनस्तापः, आधिः *m.*, *see* Grief; 'freed from all sorrow,' शोकमुक्तः -क्ता -क्तं, आधिव्याधिनिर्मुक्तः &c.

To sorrow, *v. n.* शुच् (c. 1. शोचति -चितुं), शोचनं कृ, खिद् (c. 4. खिद्यते, खेत्तुं), *see To* grieve, *v. n.*; 'to sorrow much,' शुच् in freq. (शोशुच्यते).

Sorrowful, *a.* शोकार्त्तः -र्त्ता -र्त्तं, शोकान्वितः -ता -तं, शोकी -किनी -कि (न्), शोकोपेतः -ता -तं, सशोकः -का -कं, दुःखी &c., दुःखान्वितः -ता -तं, दुःखार्त्तः &c., दुःखोपेतः -ता -तं, शोचनः -ना -नं, शोचितः -ता -तं, शोकयुक्तः -क्ता -क्तं, उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), दुर्मनाः &c., विमनाः &c., उद्विग्नचित्तः -त्ता -त्तं, उदासीनः -ना -नं, उदासी &c., विषादी &c., विषण्णः -ण्णा -ण्णं, समन्युः -न्युः -न्यु, प्रमन्युः &c., परिद्यूनः -ना -नं, *see* Sad.—(Causing sorrow) शोकजनकः -का -कं, शोकदः -दा -दं, दुःखावहः &c., *see* Mournful.

Sorrowfully, *adv.* सशोकं, सखेदं, सदुःखं, सोद्वेगं, शोकेन, शोकपूर्व्वं.

Sorrow-stricken, *a.* शोकार्त्तः -र्त्ता -र्त्तं, शोकातुरः -रा -रं, शोकोपहतः -ता -तं.

Sorry, *a.* (Grieved) दुःखी -खिनी -खि (न्), दुःखितः -ता -तं, *see* Grieved.—(Sorry for one's own conduct, pained) अनुतापी &c., पश्चात्तापी &c., अनुतप्तः -प्ता -प्तं, अनुशोचकः -का -कं, अनुशयी &c., सानुशयः -या -यं, जातानुशोकः -का -कं, जातानुतापः -पा -पं, जातानुशयः -या -यं, जातखेदः -दा -दं, खेदयुक्तः -क्ता -क्तं, अनुतापयुक्तः &c.; 'to be sorry,' *see To* repent.—(Poor, wretched) तुच्छः -च्छा -च्छं, कृपणः -णा -णं, कुत्सितः -ता -तं or expressed by the affixes तर, र, क, कल्प, पाश, देशीय, or by the prefixes दुर्, कु, कद् &c.; as, 'a sorry horse,' अश्वतरः, अश्वकः; 'a sorry ox,' वृषभतरः; 'a sorry poet,' कविकल्पः, कुकविः; 'sorry fare,' कदन्नं; 'a sorry wench,' पापीयसी.

Sort, *s.* प्रकारः, जातिः *f.*, भेदः, विधः, व्यक्तिः *f.*, *see* Kind, Manner. *To* sort, *v. a.* जातिक्रमेण or वर्गक्रमेण or यथावर्गं विरच् (c. 10. -रचयति -यितुं), यथावर्गं or वर्गक्रमेण विन्यस् (c. 4. -अस्यति -सितुं) or व्यस्. *To* sort, *v. n.* युज् in pass. (युज्यते), उपपद् in pass. (-पद्यते). *See To* suit.

Sot, sottish, *s.* or *a.* पानासक्तः -क्ता -क्तं, मद्यासक्तः &c., पानरतः -ता -तं, सदापायी -यिनी -यि (न्), पानजडः -डा -डं, मद्यपानजडः &c., पानमूढः &c.

Sottishness, *s.* पानासक्तिः *f.*, मद्यासक्तिः *f.*, पानजडता, पानमूढता.

Sought, *p. p.* अन्विष्टः -ष्टा -ष्टं, अन्वेषितः -ता -तं, मार्गितः -ता -तं, मृगितः &c., इष्टः -ष्टा -ष्टं, गवेषितः -ता -तं; 'long sought for,' चिरान्वेषितः -ता -तं; 'is sought,' अन्विष्यते, इष्यते.

Soul, *s.* (The immortal essence viewed as an emanation from the Deity) आत्मा *m.* (न्), परमात्मा *m.*, अन्तरात्मा *m.*, चिदात्मा *m.*, अन्तर्यामी *m.* (न्), सच्चिदंशः, चित्कला, चिदाभासः; 'of the universe,' ब्रह्म *n.* (न्), परमात्मा *m.*—(The spirit, vital or intellectual principle) आत्मा *m.* (न्), जीवात्मा *m.*, मनस् *n.*, चेतस, चित् *f.*, चैतन्यं, चेतनः -ना, प्राणः, जीवः, प्राणात्मा *m.*, शरीरी *m.* (न्), देहवान् *m.* (त्), देही *m.*, शारीरं, पुरुषः, क्षेत्रज्ञः, चैतन्यकारणं, जीवनकला, परमंशकः, धियाम्पतिः *m.*, स्वधीजः, पुङ्गलः; 'union of soul and body,' चिच्छरीरसंयोगः; 'seated in the soul,' आत्मनिष्ठः -ष्ठा -ष्ठं; 'oneness of soul,' आत्मैक्यं, ऐक्यभावः, तादात्म्यं; 'knowledge of soul,' आत्मज्ञानं, आत्मविद्या; 'the whole soul,' सर्व्वात्मा *m.*, सर्व्वभावः; 'with one's whole soul,' सर्व्वभावेन.—(Self) आत्मा *m.* (न्) स्वः.—(Essence, chief part) सारः, सारांशः, सारता, सारभागः, तत्त्वांशः, सत्त्वांशः, सत्त्वं, तन्मात्रं.—(Fire, spirit, life) तेजस् *n.*, सत्त्वं, वीर्य्यं.—(Departed soul) प्रेतः, परेतः, प्रेतनरः, नारकः.—(Person), *see* the word.

Sound, *a.* (Entire, undecayed) अविकलः -ला -लं, अक्षतः -ता -तं, अभिन्नः -न्ना -न्नं, अखण्डः -ण्डा -ण्डं, अन्यूनः -ना -नं —(Not diseased, hale) निरामयः -या -यं, अनामयः &c., कल्यः -ल्या -ल्यं, नीरोगः -गा -गं, नीरुजः -जा -जं, अरोगी -गिणी -गि (न्), अरुग्नः -ग्ना -ग्नं, सुस्थः -स्था -स्थं, चङ्गः -ङ्गा -ङ्गं.—(Not hurt) अक्षतः -ता -तं, अपरिक्षतः &c., अजातक्षतः &c., क्षतहीनः -ना -नं, निर्व्रणः -ण्णा -ण्णं, व्रणहीनः -ना -नं, अव्रणः &c., अक्षुण्णः -ण्णा -ण्णं.—(In good condition, safe and sound) सुस्थः -स्था -स्थं, सुस्थितः -ता -तं, अनामयः -या -यं, सुरक्षितः -ता -तं.—(Without flaw) निर्दोषः -षा -षं, दोषहीनः -ना -नं, अनघः -घा -घं, निश्छिद्रः -द्रा -द्रं, विशुद्धः -द्धा -द्धं.—(Correct in views) सत्पथवर्त्ती &c., सत्पथानुसारी &c., सत्यमतधारी &c., *see* Orthodox.—(Valid, not to be refuted) अखण्डनीयः -या -यं, अखण्ड्यः -ण्ड्या -ण्ड्यं, सुप्रमाणः -णा -णं, सुप्रमाणवान् -वती &c., सप्रमाणः &c., प्रमाणोपेतः -ता -तं, दृढप्रमाणः &c., धर्म्यः -र्म्या -र्म्यं, युक्तिसिद्धः -द्धा -द्धं.—(Fast, deep, heavy) गाढः -ढा -ढं, निर्भरः -रा -रं, अतिशय or सु or अति prefixed; 'a sound sleep,' सुनिद्रा &c., *see* under Sleep; 'a sound beating,' अतिताडनं, अतिशयताडनं.

Sound, *s.* (Noise) शब्दः, ध्वनिः *m.*, स्वनः, निस्वनः, निस्वानः, स्वानः, नादः, निनादः, निनदः, नादितं, अनुनादः, निह्रादः, संह्रादः, निर्घोषः,

घोषः, निघुष्टं, रवः, रावः, आरावः, विरावः, संरावः, आरवः, स्वरः, ध्वानः, ध्वनः, निध्वानः, स्वनिः *m.*, स्वनितं, क्वाणः, रणः, कृणिन्दः, घुः *m.*, *see* NOISE; 'a mere sound,' शब्दमात्रं; 'musical sound,' क्वाणः, क्वाणः, क्वणनं, निक्वाणः, निक्वाणः, वादः -दनं; 'of a lute,' प्रक्वाणः, प्रक्वणः; 'tinkling sound,' शिञ्जितं; 'rustling sound,' मर्मरः; 'confused sound,' कोलाहलः, कलकलः; 'auspicious,' जयध्वनिः *m.*; 'deep or hollow,' गम्भीरशब्दः, गम्भीरनादः; 'prolonged,' दीर्घनादः, दीर्घरावः.

To SOUND, *v. a.* (Cause to make a noise) ध्वन् (c. 10. ध्वनयति -यितुं), स्वन् (c. 10. स्वनयति -यितुं), नद् (c. 10. नादयति -यितुं), विनद्, अनुनद्, स्तन् (c. 10. स्तनयति -यितुं), शब्दनं कृ, ध्वननं कृ; 'a musical instrument,' वद् (c. 10. वादयति -यितुं), संवद्, वादनं कृ; 'they sounded the conchs and drums,' शङ्खान् पटहांश्च समवादयन्.—(Spread by report), *see To* NOISE.—(Try, examine) परीक्ष् (c. 1. -ईक्षते -क्षितुं), ज्ञा in des. (जिज्ञासते -सितुं), निरूप्, *see To* TRY.—(The depth of water) लक्षसूत्रेण जलवेधं or जलं परिमा (c. 2. -माति -तुं, c. 10. -मापयति -यितुं), लक्षेन जलगाम्भीर्यं परिमा, सूत्रेण or रज्जुना जलपरिमाणं कृ or जलवेधपरीक्षां कृ.

To SOUND, *v. n.* ध्वन् (c. 1. ध्वनति -नितुं), स्वन् (c. 1. स्वनति -नितुं), क्वण् (c. 1. क्वणति -णितुं), स्तन् (c. 1. स्तनति -नितुं), नद् (c. 1. नदति -दितुं), प्रणद्, विनद्, शब्द् (c. 10. शब्दयति -यितुं), रस् (c. 1. रसति -सितुं), ह्राद् (c. 1. ह्रादते -दितुं), रु (c. 2. रौति, रवितुं), विरु, रेभ् (c. 1. रेभते -भितुं), शब्दं कृ, नादं कृ, ध्वनिं कृ.

SOUNDED, *p. p.* (Caused to sound) ध्वनितः -ता -तं, स्वनितः &c., शब्दितः &c., क्वणितः &c., नादितः &c., स्वानः -ना -नं, आस्वानः &c., स्वरितः -ता -तं, विरेभितः &c.; 'as a musical instrument,' वादितः -ता -तं.—(Tried) परीक्षितः -ता -तं, जिज्ञासितः &c., निरूपितः &c.—(As water) लक्षसूत्रपरिमापितः -ता -तं, लक्षपरिमापितः &c.

SOUNDING, *part.* or *a.* (Making a noise) शब्दनः -ना -नं, शब्दकरः -रा -रं, नादी -दिनी -दि (न्), निह्रादी &c., संह्रादी &c., स्वनवान् -वती -वत् (त्), सनादः -दा -दं, शब्दायमानः -ना -नं, *see* SONOROUS.—(Causing to sound) वादकः -का -कं, वादनकारी &c.

SOUNDING, *s.* (Causing to sound) शब्दनं, ध्वननं, वादनं, संवादनं.—(Of the depth of water) जलपरिमापणं, जलवेधपरिमापणं; 'soundings,' गाधः, गाधस्थलं; 'mean soundings,' समरज्जुः *f.*

SOUNDING-LEAD, *s.* लक्षः, लक्षकः, लक्षसोसकं. *See* PLUMMET.

SOUNDLY, *adv.* गाढं, अत्यन्तं, निर्भरं, दृढं, सुखेन, सु or अति or अतिशय prefixed; 'soundly asleep,' सुषुप्तः &c., *see* under SLEEP.

SOUNDNESS, *s.* (Entireness) अक्षतत्वं, अभिन्नता, अखण्डत्वं, अविकलता, अविकल्यं.—(State of being healthy or without hurt) अक्ष्यत्वं -ता, निरामयत्वं, अनामयत्वं, स्वास्थ्यं, सुस्थता, सुस्थितिः *f.*, अरोगिता, आरोग्यं, रोगाभावः, अक्षतत्वं, व्रताभावः, व्रणाभावः, व्रतहीनता, निर्व्रणत्वं.—(Validity) अखण्डनीयता, सप्रमाणत्वं.—(Correctness in views) सत्यपानुसरणं, सत्यपः, सत्यधर्मः, *see* ORTHODOXY.—(State of being without flaw) निर्दोषत्वं, दोषहीनता, छिद्रहीनता.

SOUP, *s.* जूषं, यूषः -षं, यूषः, मांसजूषं, निष्काथः, पिच्छिलः.

SOUR, *a.* (Acid) अम्लः -म्ला -म्लं, अम्लरसः -सा -सं, शुक्तः -क्ता -क्तं, शौक्तः -क्ती -क्तं, शौक्तिकः -की -कं, शटः -टा -टं, अरुन्तुदः -दा -दं.—(In temper) कर्कशः -शा -शं, कर्कशस्वभावः -वा -वं, वज्रस्वभावः &c., मदाग्रः -ग्रा -ग्रं, अरुन्तुदः &c.

To SOUR, *v. a.* (Make acid) अम्लीकृ, शुक्तीकृ, शटीकृ, अम्लरसीकृ. (Make cross) कर्कशीकृ, वज्रीकृ.

To SOUR, *v. n.* अम्लीभू, शुक्तीभू, अम्लरसीभू, कर्कशीभू, अरुन्तुदीभू.

SOURCE, *s.* (Origin, spring) मूलं, योनिः *m. f.*, उद्भवः, सम्भवः, प्रभवः, हेतुः *m.*, बीजं, गर्भः, आदिः *m.*, उत्तमः, उत्तमस्थानं, उत्पत्तिस्थानं; 'of a river,' सरिन्मुखं; 'the source of the Ganges is in the Himálayas,' गङ्गा हिमवत्प्रभवा or हिमवान् गङ्गायाः प्रभवः.

SOURED, *p. p.* अम्लीभूतः -ता -तं, शुक्तीभूतः &c., कर्कशीभूतः -ता -तं.

SOURISH, *a.* ईषदम्लः -म्ला -म्लं, ईषदम्लरसोपेतः -ता -तं, किञ्चिदम्लः &c.

SOURNESS, *s.* अम्लता -त्वं, अम्लभावः, अम्लः, शुक्तता -त्वं, शटता, चुक्रः.—(Of temper) कर्कशत्वं, कार्कश्यं, भाषवक्रता, मदाग्रता.

To SOUSE, *v. a.* (Plunge suddenly) अकस्मात् मज्ज् (c. 10. मज्जयति -यितुं) or निमज्ज् or मु in caus. or जलेन सिच्, *see To* IMMERSE.

To SOUSE, *v. n.* (As a hawk) वेगेन पतित्वा नखैर् ग्रह्, *see To* POUNCE.

SOUTH, *s.* दक्षिणा, दक्षिणाशा, दक्षिणादिशा, दक्षिणदिक् *f.* (श्), दक्षिणापथः, दक्षिणापथः, अवाची, अपाची, याम्या; 'lying or pointing towards the south,' दक्षिणस्थः -स्था -स्थं, दक्षिणाभिमुखः -खी -खं, दक्षिणामुखः &c., दक्षिणप्रवणः -णा -णं, दक्षिणाग्रः -ग्रा -ग्रं, दक्षिणदिश्यः -श्या -श्यं, दक्षिणदिक्स्थः &c.; 'lying to the north and south,' दक्षिणोत्तरस्थः &c., दक्षिणोत्तरः -रा -रं. According to the Hindús, Yama is the Regent of the south.

SOUTH, SOUTHERN, SOUTHERLY, *a.* (Lying towards the south), *see* the last.—(Belonging to the south) दक्षिणः -णी -णं, दाक्षिणः -णी -णं, अवाङ् -वाची -वाक् (च्), अवाचीनः -ना -नं, अवाच्यः -च्या -च्यं, दाक्षिणात्यः -त्या -त्यं, दाक्षिणिकः -की -कं, सव्यः -व्या -व्यं, अपाङ् -पाची -पाक् (च्), अपाचीनः &c., अपाच्यः &c., दक्षिणदेशीयः -या -यं; 'the southern mountain,' दक्षिणाचलः; 'in a southerly direction,' दक्षिणदिशि.

SOUTH-EAST, *s.* दक्षिणपूर्वा, प्रागवाची, दक्षिणप्राची, प्राग्दक्षिणा, आग्नेयी. Agni is the Regent of the S. E. quarter.

SOUTH-EAST, SOUTH-EASTERN, SOUTH-EASTERLY, *a.* दक्षिणपूर्वः -र्वा -र्वं, प्रागवाङ् -वाची -वाक् (च्), प्रागवाचीनः -ना -नं, दक्षिणपूर्वस्थः -स्था -स्थं, आग्नेयः -यी -यं.

SOUTH-WARD, *adv.* दक्षिणतस्, दक्षिणात्, दक्षिणेन, दक्षिणदिशि.

SOUTH-WEST, *s.* नैर्ऋतिः *f.*, निर्ऋतिः *f.*, दक्षिणपश्चिमा, दक्षिणप्रतीची, पश्चादवाची. The demon Nairrita or Nirriti is the Regent of the S. W. quarter.

SOUTH-WEST, SOUTH-WESTERN, SOUTH-WESTERLY, *a.* दक्षिणपश्चिमः -मा -मं, दक्षिणप्रतीचीनः -ना -नं, दक्षिणपाश्चात्यः -त्या -त्यं, नैर्ऋतिस्थः -स्था -स्थं.

SOUTHERN-WOOD, *s.* (Artemisia) दमनः, दमनकः.

SOUVENIR, *s.* स्मरणार्थकदानं, स्मारकदानं. *See* MEMENTO, MEMORIAL.

SOVEREIGN, *s.* राजा *m.* (न्), महाराजः, अधिराजः, अधिपतिः *m.*, अधीश्वरः, परमराजः, सर्वाधिकारी *m.* (न्), सर्वेश्वरः, अधीशः. *See* KING.

SOVEREIGN, *a.* परमः -मा -मं, मुख्यः -ख्या -ख्यं, श्रेष्ठः -ष्ठा -ष्ठं, सर्वश्रेष्ठः &c., प्रमुखः -खा -खं, प्रधान in comp., *see* PARAMOUNT, SUPREME; 'a sovereign remedy,' महौषधं, परमौषधं, सर्वरोगौषधं.

SOVEREIGNTY, *s.* राज्यं, राजत्वं, आधिपत्यं, आधिराज्यं, मुख्याधिकारः, श्रेष्ठाधिकारः, प्रधानाधिकारः, सर्वाधिकारः, प्रभुत्वं, स्वाम्यं, ईशत्वं, साम्राज्यं, राजभूयं, भूमिपतित्वं, पार्थिवेन्द्रता; 'over the beasts,' मृगेन्द्रता.

SOW, *s.* शूकरी, सूकरी, वराही, कोली, पङ्क्तिक्रीडा.

To sow, *v. a.* or *n.* (As seed) वप् (c. 1. वपति, वप्तुं), निवप्, प्रवप्, संवप्, बीजानि क्षेत्रे विकृ (c. 6. -किरति -करितुं -कीर्तुं) or प्रकृ or कृ or रुह् in caus. (रोपयति -यितुं) or आरुह्, बीजारोपं कृ, बीजारोपणं कृ, बीजविकिरणं कृ, बीजप्रकिरणं कृ, वपनं कृ, वापं कृ; 'as you sow so shall you reap,' यथा वपनं तथा फलसिद्धिः, यथानुष्ठानं तथा सिद्धिः, अमानुसारी लाभः.—(To sow discord) भेदं कृ or जन्.

Sower, *s.* वप्ता *m.* (प्तृ), बीजवप्ता, वापी *m.* (न्), प्रवापी *m.*, वापकः, वपनकृत् *m.*, वपनकर्त्री *m.* (त्रृ), उप्तिकर्त्री *m.*, बीजारोपकः, बीजारोपणकृत्.

Sowing, *s.* वपनं, वापः, उप्तिः *f.*, बीजारोपः -पणं, बीजविकिरणं.

Sowing-time, *s.* वपनकालः, उप्तिकालः, वापकालः, बीजारोपकालः.

Sown, sowed, *p. p.* उप्तः -प्ता -प्तं, वापितः -ता -तं, पर्युप्तः &c., बीजविकीर्णः -र्णा -र्णं, बीजप्रकीर्णः &c., बीजाकीर्णः &c., बीजितः -ता -तं, उप्यमानः -ना -नं, उप्तिमः -मा -मं; 'is sown,' उप्यते, रोप्यते.

Space, *s.* (In the abstract, mere extension or vacuity) आकाशः -शं, शून्यं, शून्यत्वं -ता, रिक्तं, रिक्तता -त्वं, दिगन्तरं, दिगन्तरालं, व्योम *n.* (न्), गगणं, अन्तरीक्षं, वियत् *n.*; 'infinite space,' महाकाशः -शं, अनन्तं; 'finite,' घटाकाशं, मठाकाशं; 'empty space,' शून्यं, रिक्तं.—(Region, quarter, direction) दिक् *f.* (श्), देशः, प्रदेशः, काष्ठा, ककुभ् *f.*, आशा, हरित् *f.*; 'extending through all space,' दिग्व्यापी -पिनी -पि, अभिव्याप्तः -प्ता -प्तं, चतुर्दिग्व्यापी &c.; 'in the first second the stone falls through a space not exceeding 17 feet,' प्रथमे ऽनुपादे नैकादशहस्तमितदेशम् अतिक्रामति प्रस्तरः; 'the space traversed,' अतिक्रान्तप्रदेशः, अन्तरं.—(Included or intervening space, space between) अभ्यन्तरं, अन्तरालं -लकं, अन्तरं, मध्यं, व्यवधानं, व्यवायः, मात्रं.—(Room) अवकाशः, प्रसरः, अवसरः, आकाशः, विषयः; 'want of space,' अनवकाशः.—(Place, spot) स्थानं, स्थलं -ली, भूमिः *f.*; 'open space near a village,' परीहारः, परिहारः, ग्रामान्तं, ग्रामान्तीयं.—(Space of time) अवधिः *m.*, कालान्तरं, कालावधिः *m.*, अन्तरं.

Spacious, *a.* विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, विपुलः -ला -लं, असम्बाधः -धा -धं, विशालः -ला -लं, सावकाशः -शा -शं, लम्बः -म्बा -म्बं.

Spaciousness, *s.* विस्तीर्णता, विस्तारः, विस्तृतिः *f.*, विशालता, विपुलता, असम्बाधता -त्वं, सावकाशता -त्वं, लम्बता.

Spade, *s.* खनित्रं, खात्रं, आखनिकः, आखनः, आखानं, आखः, अवदारणं, गोदारणं, लम्भः, टङ्कः, टङ्कः, पिशिखा. *See* Hoe.

Span, *s.* (From tip of the thumb to that of the little finger) वितस्तिः *m. f.*, पाटकः, किष्कुः *m.*—(From tip of the thumb to that of the fore-finger) प्रादेशः, प्रदेशः.—(To tip of the middle finger) तालः, तलः.—(To tip of the ring-finger) गोकर्णः.

To span, *v. a.* हस्ततलेन or तालेन or प्रतलेन परिमा (c. 2. माति -तुं, c. 10. -मापयति -यितुं) or मा, अङ्गुष्ठकनिष्ठाभ्यां परिमा or प्रमा or मा.

Spangle, *s.* धातुतारा, धातुकणः, चपुकणिका. स्फुरद्धातुकणः, तेजःकणः.

To spangle, *v. a.* स्फुरद्धातुकणिकाभिर् or धातुतारिकाभिर् अलङ्कृ.

To spank, *v. a.* चपटेन आहन्, चपेटाघातं कृ. *See To* slap.

To spank, *v. n.* (Move along impetuously) वेगेन चल्, महावेगेन चल्.

Spar, *s.* (Long piece of wood) दीर्घकाष्ठं, दीर्घदारुः *m.*, काष्ठखण्डः, दारुखण्डः.—(Mineral) धातुखण्डः, स्फुरद्धातुः *m.*, स्फुरद्धातुखण्डः.

To spar, *v. n.* क्रीडायुद्धं कृ, परिहासेन or क्रीडार्थेम् अन्योन्यप्रहारं कृ or परस्पराघातं कृ, विनोदार्थं मुष्टियुद्धं कृ or मुष्टीमुष्टि युध्.

